This is a digital copy of a book that was preserved for generations on library shelves before it was carefully scanned by Google as part of a project to make the world's books discoverable online.

It has survived long enough for the copyright to expire and the book to enter the public domain. A public domain book is one that was never subject to copyright or whose legal copyright term has expired. Whether a book is in the public domain may vary country to country. Public domain books are our gateways to the past, representing a wealth of history, culture and knowledge that's often difficult to discover.

Marks, notations and other marginalia present in the original volume will appear in this file - a reminder of this book's long journey from the publisher to a library and finally to you.

Usage guidelines

Google is proud to partner with libraries to digitize public domain materials and make them widely accessible. Public domain books belong to the public and we are merely their custodians. Nevertheless, this work is expensive, so in order to keep providing this resource, we have taken steps to prevent abuse by commercial parties, including placing technical restrictions on automated querying.

We also ask that you:

+ *Make non-commercial use of the files* We designed Google Book Search for use by individuals, and we request that you use these files for personal, non-commercial purposes.
+ *Refrain from automated querying* Do not send automated queries of any sort to Google's system: If you are conducting research on machine translation, optical character recognition or other areas where access to a large amount of text is helpful, please contact us. We encourage the use of public domain materials for these purposes and may be able to help.
+ *Maintain attribution* The Google "watermark" you see on each file is essential for informing people about this project and helping them find additional materials through Google Book Search. Please do not remove it.
+ *Keep it legal* Whatever your use, remember that you are responsible for ensuring that what you are doing is legal. Do not assume that just because we believe a book is in the public domain for users in the United States, that the work is also in the public domain for users in other countries. Whether a book is still in copyright varies from country to country, and we can't offer guidance on whether any specific use of any specific book is allowed. Please do not assume that a book's appearance in Google Book Search means it can be used in any manner anywhere in the world. Copyright infringement liability can be quite severe.

About Google Book Search

Google's mission is to organize the world's information and to make it universally accessible and useful. Google Book Search helps readers discover the world's books while helping authors and publishers reach new audiences. You can search through the full text of this book on the web at http://books.google.com/

Digitized by Google

a. Or. 2708

[illegible] Adelung's [illegible]

a. Or. 4130 [illegible]

Digitized by Google

Digitized by Google

Digitized by Google

2.12.6

Vira Mitrodaya

(a poem)
Sanscrit

Digitized by Google

Digitized by Google

Digitized by Google

A. or. 116m
177.

Digitized by Google

॥ ॐ ॥ श्रीगणेशायनमः ॥ अथवीरमित्रोदयाख्यधर्मशास्त्रंलिख्यते ॥ ० ॥ तत्रप्रथमंव्यवहाराख्यप्रकरणम् ॥ * ॥
॥ पुरतःप्रविलोक्यभर्गचापम्परतःकामपिकामकार्मुकश्रीम् । पुलकाञ्चितपीनबाहुदण्डःकुशलङ्कलयताद्रघुप्रकाण्डः ॥ १ ॥
स्वस्तिश्रीयुतवीरसिंहनृपतेराज्ञावशादुत्सुकःश्रीमित्राभिधपण्डितःप्रतिदिशङ्कीर्त्यानिशंमण्डितः । नानानिर्णयवर्णनंव्यव
हितंसंख्यावतान्मुदेतिदंसम्प्राप्तव्यवहारसाधकमिमंकुर्वेप्रकाशम्परम् ॥ २ ॥ उद्धूतप्रभवप्रजापरिभवप्राग्भारभग्नाद्भुता
नन्ताकारमरागमस्मरबुधाराध्यन्निदिध्यासनैः । धर्मैकाश्रयमाश्रयंमुनिगिरामद्धामदुद्धारकम्प्रज्ञोमिव्यवहारमच्युतमिवप्रा
रम्प्रस्तुतम्प्राक्तनैः ॥ ३ ॥ परिभाषापरिष्कारःप्रमाणानान्निरूपणम् । विवादपदनिर्देशःप्रकीर्णकविवेचनम् ॥ ४ ॥ एवम्प्र
करणान्यत्रचत्वारिप्रथमेपुनः । लक्षणंव्यवहारस्यनिरुक्तिर्मुनिभाषिता ॥ ५ ॥ व्यवहारस्यभेदाश्चस्वलक्षणविलक्षणाः । सा
मान्यतोविशेषाच्चपरिभाषाप्रकाशनम् ॥ ६ ॥ सामान्यपरिभाषायान्धर्माधिकरणेक्षणम् । दर्शनेव्यवहारस्यराज्ञोविधिविवे
चनम् ॥ ७ ॥ प्राड्विवाकस्वरूपञ्चसभापतिसभासदाम् । निरूपणञ्चसभ्यानांसयुक्तिकबलाबलम् ॥ ८ ॥ केषाञ्चित्सभ्यभि
ज्ञानामपिस्थानंसभास्थले । तत्प्रयोजनमादेयानादेयव्यवहारयोः ॥ ९ ॥ विवेचनमथोकार्य्येसदृष्टकसभापतेः । प्रतिष्ठा
नस्यहेतूनांपदानांसिद्धिशालिनाम् ॥ १० ॥ निरूपणमसदृष्टावदृष्टेचसभापतेः । सदृष्टकस्यदोषोक्तिःसम्यक्दृष्टेफला
भिधा ॥ ११ ॥ विशेषपरिभाषायांप्रत्यभियोगनिर्णयः । निह्नवादौविधिस्तत्रनिह्नवादिविवेचनम् ॥ १२ ॥ विलंबोत्तरदानस्य
क्वचिन्नैवविलम्बनम् । आद्येप्रकरणेत्वर्थाविविच्यन्तेक्रमादमी ॥ १३ ॥ उपोद्घातप्रसङ्गाद्यैरन्येपितदनुव्रताः । द्वैतीयीकेतु
साक्ष्यादिलक्षणान्नत्रसाक्षिणः ॥ १४ ॥ असाक्षिणस्तत्रहेतुःसाक्षिप्रश्नविधिस्ततः । ततद्वैधेनिर्णयःकौटसाक्ष्येक्वचिददोषता
॥ १५ ॥ निर्णयोलिखितस्याथतद्भेदास्तत्परीक्षणम् । साक्षिणांलिखितस्यापिशहत्वेनप्रमाणता ॥ १६ ॥ भुक्तिर्विशेषणान्य
स्यास्त्वर्थापत्त्यनुमानता । लौकिकानाम्प्रमाणानामभावेदिव्यभावना ॥ १७ ॥ दिव्यभेदास्तदावस्थादेशकालाधिकारिणः । त

BIBLIOTHECA REGIA MONACENSIS

Digitized by Google

न्यानुकास्तद्विशेषविधयो विविधात्क्रमात् ॥ १८ ॥ तेषामपि चशब्दोपात्ताऽनुमानत्वेन मानतः । एते चैव विविधयन्ते येनाद्दीयकोम
नःक्रमात् ॥ १९ ॥ व्यवहारपदत्वस्यास्तादशोद्दिष्टानि लक्षणाम् । तेषां सामान्यमथ तद्भिदानां विविधा विधा ॥ २० ॥ एतेषु चैक
सत्यपि चान्तेन तुरीयेनुप्रकीर्णकम् । यत्रोक्तमुपयुक्तं तद्विविच्य प्रतिपाद्यते ॥ २१ ॥ अथ कोयं व्यवहारः ॥ ० ॥ प्रमाणकर्तृकाप
स्वपक्षप्रतिपक्षपरिग्रह इति चेन्न । वादादेरपि तत्त्वापत्तेः । लिखितादिःप्रमाणविशेषःपरिगृह्यत इति चेत् । तथापि तस्य
पुष्पविरोधात् । अनुमानाद्बहिर्भावात्तेषामव्यावर्तकत्वात् । अत एवान्यविरोधेन स्वसंबन्धितया कथनमित्यपि परास्तम् ।
प्रमाणान्तर्भावेण स्वरूपनिरूपणानौचित्यात्कथनादेर्व्यवहारपदवाच्यत्वे व्यवहारान्नृपः पश्येदित्यानन्वयाच्च । उच्यते ।
ऋणादानादिलौकिकार्थविषयकथैव व्यवहारः । कथात्वं पदार्थाभावस्तु शास्त्रीयपदार्थाविषयत्वात् । अधिकरणादिस्वय
हेतुरेयं वादादिकार्यविषयककथायामत्र व्यवहारव्यपदेशः । अत एव यथायथं हेत्वाभासनियहस्थानादियोजनमपि
युक्तम् । तच्च तत्र तत्र प्रदर्शयिष्यते । चतुष्पात्त्वमपि तस्य तद्विशेषेष्वेवोपपादयिष्यते । यत्तु गोपालेन तत्तन्निर्णयेषु क
थात्वाद्वादत्वमेवास्येति मिश्रमतत्वेनोपन्यस्य जयभङ्गफलकत्वात् स्थापनावत्त्वाच्च जल्पमेवायमिति वर्णितं तन्नसङ्गतमस्य
युक्तम् । पंक्तितत्त्वाभिनिवेशभेदेन उभयरूपत्वस्यैव युक्तत्वात् । वैतण्डिकस्य व्यवहारायोग्यत्वादस्य वितण्डात्वपरमतमपि ।
अन्यविरोधेन स्वसंबन्धितया कथनमिति विज्ञानयोगिवचोप्येवं सति नायुक्तम् । न च पश्येदित्यनन्वयः । निर्णयार्थकथनस्य
सर्वे निबन्धभिरुक्तत्वाद्व्याख्यानात् । स्मृत्याचारव्यपेतेन मार्गेणाधर्षितः परैः । आवेदयति चेद्राज्ञे व्यवहारपदं हि तत् ॥ इति या
ज्ञवल्क्यवचनं यद्यपि व्यवहारपदान्यृणादानादीनि सामान्येन लक्षयति तथापि व्यवहारसामान्यलक्षणमपि समानसंबन्धिसंवेद्य
तयानेन प्रणीयते । तस्यायमर्थः । स्मृत्याचाराद्धर्म्यप्रमाणातिक्रान्तरीत्यान्यैरभिभूतः पूर्वोक्तजातिभ्यो व्यवहारदर्शि
भ्यो यद्यावेदयति तदावेदनं मनुष्याद्व्यवहारपदमिति विषयः । इति प्रसिद्ध ऋणादानादि लक्ष्यत्वेन मन्वाद्युक्तमुपधि

प्तमिति। एवञ्चार्थित्वं तस्यार्थित्वमाधर्षकस्य प्रत्यर्थित्वं तयोर्विवादश्च व्यवहार इति प्रतीयते। इदमेव च मिताक्षरायामन्य
विरोधेनेत्यादिना निष्कृष्टमुक्तम्। अन्यविरोधेनेत्यनुक्ते प्रश्नोत्तरादिरूपेण स्वसंबन्धिकथनमपि व्यवहारः स्यात्। स्वसम्बन्धि
नयेत्यनुक्ते एकसम्बन्धितया साक्षिणां कथनमन्यविरोधि भवत्येवेत्यस्याप्यर्थित्वापत्तिरतः स्वसम्बन्धितयेति॥ इदं चोत्तरचतुष्ट
येष्वनुगतं। नच सम्प्रतिपत्तावव्याप्तिः तत्रापि साध्यतया वादिना निर्दिष्टस्यासिद्धतया निर्देशे तद्विरोधपर्य्यवसानात्। अन्य
थोत्तरत्वभङ्गप्रसंगात्। यत्रापि द्वावपि भाषावादिनौ तत्रापि परस्परविरोधावश्यभावान्नाव्याप्तिः। इत्थं चाग्रेव्यक्तिर्भविष्यति।
यच्च कात्यायनेनोक्तं। प्रयत्नसाध्ये विच्छिन्ने धर्माख्ये न्यायविस्तरे। साध्यमूलस्तु यो वादो व्यवहारः स उच्यत इति। एतच्च व्यवहा
रहेतुव्यवहारस्वरूपोक्तिपरं तथा माधवीयपारिजातादिष्वेवं व्याख्यातम्। विहिताचरणनिषिद्धवर्जनादिप्रयत्नसाध्ये धर्मा
ख्ये वस्तुनि विच्छिन्ने विप्लुते सतीति व्यवहारहेतुरुक्तः॥ धर्माधर्मविप्लवस्यैव व्यवहारहेतुत्वात्। तथा च नारदः॥ मनुः प्रजा
पतिर्यस्मिन् काले राज्यमवूभुजत्। धर्मैकतानाः पुरुषास्तदासन्सत्यवादिनः। तदा न व्यवहारोऽभून्न द्वेषो नापि मत्सरः। नष्टे
धर्मे मनुष्येषु व्यवहारः प्रवर्त्तत इति। वृहस्पतिरपि। धर्मप्रधानाः पुरुषाः पूर्वमासन्नहिंसकाः। लोभद्वेषाभिभूतानां व्यवहारः
प्रवर्त्तत इति। न्यायेत्यादिना व्यवहारस्वरूपमुक्तम्। तत्र माधवीयव्याख्यानम्। न्यायः शिष्टसम्प्रतिपन्नं लौकिकमाचरणं
तस्य विस्तर इदं युक्तमिदमयुक्तमिति। उपपत्तिपुरःसरो निर्णयः। तस्मिन्विषयभूते तात्पर्वर्त्तकोऽर्थिप्रत्यर्थिनोः साध्यमूलः सा
ध्यमृणादानादिपदं तन्मूलस्तद्विषयको यो विवादः स व्यवहार इति। मदनरत्ने तु न्यायः प्रमाणं तस्य विस्तरः प्रवृत्तिर्यस्य त
स्मिन्विषय इति। साध्यमूलेत्यादि तुल्यम्। मदनरत्नाकरस्मृतिचन्द्रिकाकल्पतरुकारैः सर्वमेवेदं वचनं व्यवहारस्वरूपप
रतयापि व्याख्यानमुक्तम्। प्रयत्नसाध्ये कष्टसाध्ये पराभिभवेन स्वेच्छया भोक्तुमशक्ये गृहक्षेत्रादौ सति न्यायः प्रमाणं विस्तार्यते
प्रपंच्यते यस्मिंस्तस्मिन् धर्माधिकरणे सदसि साध्यमूलेत्यादि पूर्ववत्। तेनापि प्रागुक्तमेवाविवक्षितमतस्तत्र्यपदकृत्येना

Digitized by Google

णीयमिति तत्त्वं । वयन्तु सर्वेषु प्रत्ययान्तसामानाधिकरण्येन व्याचक्ष्महे । विहितानुष्ठानादिगोचरप्रयत्नसाध्ये धर्माख्ये न्यायवि-
स्तरे । नीयतेऽर्थोऽनेनेति न्यायः प्रमाणं श्रुतिस्मृत्यादि विस्तार्यते प्रवर्त्ततेऽस्मिन् श्रुत्यादि प्रमेयइत्यर्थः । विछिन्ने विविधं छिन्ने प्रमा-
णापरिज्ञानमतात्पर्यानवधारणादिना दुर्ज्ञेये सति । यद्वा । धर्मश्चाख्यायतेऽनेनेति धर्माख्यो धर्मप्रतिपादकइतियावत् । न्या-
यविस्तरे प्रमाणसमूहे श्रुतिस्मृत्यादौ प्रमादादिना विछिन्ने लुप्तप्राये सति साध्यमूलेत्यादिगतार्थमिति । हारीतः । स्वधर्मस्य य-
थाप्राप्तिः परधर्मस्य वर्जनम् । न्यायेन क्रियते तत्तु व्यवहारः स उच्यतइति । न्यायेन प्रमाणेन । एतस्यापि पूर्वोक्त एव तात्पर्यम्
॥ इति व्यवहारलक्षणम् ॥ * ॥ निरुक्तिमपि व्यवहारपदस्याऽमुमेवार्थमुपलक्षयति । सा च कात्यायनेनोक्ता । वि नानार्थेऽव
संदेहो हरणं हार उच्यते । नानासन्देहहरणाद्व्यवहारइति स्मृतइति । अथ व्यवहारभेदाः नारदः । सोत्तरोऽनुत्तरश्चेति स विज्ञे-
योद्विलक्षणः । सोत्तरोऽभ्यधिको यत्र विलेखपूर्वकः पणइति । यदि पराजयेऽहन्तदा पराजयदण्डमभ्यधिकमेतावद्राज्ञे दा-
स्यामीति यत्र लिखनपूर्वकम्प्रतिज्ञायते स सोत्तरइत्यर्थः । तद्रहितोऽनुत्तरइत्यर्थादुक्तम्भवति । स एव त्रयोदशप्रकारं निब-
न्धनानवान्तरभेदानुद्दिश्य विवृतवान् । यथाह । चतुष्पाच्च चतुःस्थानश्चतुःसाधन एव च । चतुर्हितश्चतुर्व्यापी चतुष्कारी च
कीर्त्तितः । त्रियोनिर्द्व्यभियोगश्च द्विद्वारो द्विगतिस्तथा । अष्टाङ्गोऽष्टादशपदः शतशाखस्तथैव च । धर्मश्च व्यवहारश्च चरि-
त्रं राजशासनम् । चतुष्पाद्व्यवहारोऽयमुत्तरः पूर्वबाधकः । तत्र सत्ये स्थितो धर्मो व्यवहारस्तु साक्षिषु । चरित्रं तु स्वीकरणे रा-
जाज्ञायां तु शासनम् । सामाद्युपायसाध्यत्वाच्चतुस्साधन उच्यते । चतुर्णामपि वर्णानां रक्षणाच्च चतुर्हितः । कर्त्तॄनथो साक्षिण-
श्च सभ्यान् राजानमेव च । व्याप्नोति यादृशो यस्माच्चतुर्व्यापी ततः स्मृतः । धर्मस्यार्थस्य यशसो लोकपंक्तेस्तथैव च । चतुर्णाङ्करणा-
देव चतुःकारी प्रकीर्त्तितः । कामात्क्रोधाच्च लोभाच्च त्रिभ्यो यस्मात्प्रवर्त्तते । त्रियोनिः कीर्त्त्यते तेन त्रयमेतद्विवादकृत् । द्व्यभियो-
गस्तु विज्ञेयः शंकातत्त्वाभियोगतः । शंका सतां तु संसर्गात्तत्त्वं होढाभिदर्शनात् । पक्षद्वयाभिसंबन्धाद्द्विद्वारः समुदाहृतः ।

पूर्ववादस्तयोः पक्षप्रतिपक्षस्तदुत्तरः । भूतच्छलानुसारित्वात् द्विगतिः समुदाहृतः । भूतन्तत्वार्थसंयुक्तंप्रमादाभिहितंच्छलं
। राजा सपुरुषः सभ्यः शास्त्रं गणकलेखकौ । हिरण्यमग्निरुदकमष्टांगः समुदाहृतः । ऋणादानन्त्युपनिधिः संभूयोत्थानमे
व च । दत्तस्यपुनरादानमशुश्रूषाभ्युपेत्य च । वेतनस्यानपाकर्मतथैवास्वामिविक्रयः । विक्रीयासंप्रदानंचक्रीत्वानुशय एव
च । समयस्यानपाकर्मविवादः क्षेत्रजस्तथा । स्त्रीपुंसयोश्चसम्बन्धोदायभागोथसाहसः । वाक्पारुष्यंतथैवोक्तंदण्डपारु
ष्यमेव च । द्यूतंप्रकीर्णकञ्चैवेत्यष्टादसपदः स्मृतः । क्रियाभेदान्मनुष्याणांशतशाखोनिगद्यतेइति । यद्यपिप्रतिज्ञादीनां
वक्ष्यमाणानांसाक्षाद्व्यवहारस्वरूपघटकत्वाद्व्यवहारपादकत्वंयुक्तम् । धर्म्मादीनान्तुतत्रसत्येस्थितोधर्म्मइतिनारदोक्त
प्रकारेणैवनिर्णयमात्रहेतुत्वान्नसाक्षाद्व्यवहारःपादत्वमर्हं । याज्ञवल्क्यादिभिरतएवतेषामेवव्यवहारपादत्वमुक्तन्नञ्च
धर्मादिष्वयं प्रदर्शयिष्यन्ते । तथापिनिर्णयाख्यचतुर्थव्यवहारपादहेतुत्वेनगौणमेवव्यवहारपादत्वमेषामत्रोक्तं । व्यव
हारपदेनंनिर्णयएववालक्ष्यते । तद्धेतुत्वन्तत्पादत्वमितिमन्तव्यम् । तथाचवृहस्पतिः । धर्मादीनांनिर्णयहेतुत्वंस्प
ष्टमेवाह । धर्मेणव्यवहारेणचरित्रेणान्नृपाज्ञया । चतुःप्रकारोभिहितः सन्दिग्धेर्थेविनिर्णयइति । गौणानामेवात्त्वर्मादि
पादानामधिकरणकथनम् । तत्रसत्येस्थितोधर्मइत्यादिना । अत्रमाधवीयेचरित्रंतुस्वीकरणइतिपाठंलिखित्वादेशाचार
चरित्रंतत्स्वीकारेणदेवनिर्णयहेतुरितिव्याख्यातम् । कात्यायनवचनञ्चतत्र । यद्यदाचर्यतेयत्रधर्म्यंवाधर्म्यमेववा । देशस्या
चरणान्नित्यंचरित्रन्तद्धिकीर्त्तितम् । चराडेश्वरेणातुचारित्रन्तुपुस्तकरणमितिपठित्वापुस्तमपञ्जिकेत्यर्थः । तत्करणमधिकर
णंयस्येतिव्याकृतन्तद्दूढिहीनाद्वचनान्तरासम्भवादाचरहेयम् । तेषांनिर्णयहेतुत्वंप्रपञ्चितंकात्यायनेन । दोषाकारीतुकर्तृत्वं
धनहारीस्वकन्धनं । विवादेप्राप्नुयात्तत्रसधर्मेणैवनिर्णयः । वाक्पारुष्यस्तेयादिदोषकारीव्यवहारप्रवर्त्तनमंतरेणैवाऽ
नुतापादिनाधर्माभिमुखोऽधर्मोद्भीतस्वस्वस्यदोषकर्तृत्वंस्वयमभ्युपैति । यत्रधनस्वामीधर्माभिमुखाद्धर्मभीरोस्त्वाऽधम

णादेर्व्यवहारं विनैव स्वकीयं धनमाप्नोति तत्रोभयत्र संप्रतिपत्युत्तरइतियावत्। धर्मेणैव निर्णय इत्यर्थः ॥ अत एवोक्तं तत्र सत्ये
स्थितो धर्म इति। स्मृतिशास्त्रमनुयत्किंचित्प्रथितं धर्मसाधकैः। कार्याणां नियमार्थेषु व्यवहारः स्मृतो हि सः। धर्मसाधकैः सभ्यैः
स्मृतिशास्त्रं साक्ष्यादिक्रियाप्रत्यायकमर्थिप्रत्यर्थिनोः कार्यनिर्णयार्थे प्रथितं प्रख्यापितं यत्र चनुष्पाद्व्यवहारप्रश्नेनेन निर्णयकर
णामितियावत्। तत्र व्यवहारो निर्णयहेतुरित्यर्थः ॥ अत एवोक्तं। व्यवहारस्तु साक्षिषु तिष्ठति। साक्षिग्रहणं प्रमाणोपलक्षणम्
। चरित्रविषयं वचनं पूर्वमेवोपवर्णितम्। न्यायशास्त्राविरोधेन देशदृष्टेस्तथैव च। यं धर्मं स्थापयेद्राजा न्याय्यं तद्राजशा
सनम्। न्यायशास्त्रं व्यवहारप्रतिपादकं स्मृत्यादिशास्त्रम्। तदविरोधेन देशदृष्टेर्देशाचारस्याविरोधेनेति। सम्प्रत्यान्तर्गत
स्यानिष्कृष्यान्वयः राजायं धर्मं स्थापयेदाज्ञापयेत्तन्न्याय्यमुक्तं राजशासनं अन्यदन्याय्यमित्यर्थात्। तादृशशासनानुरोधेन निर्णे
यः कर्त्तव्य इत्यर्थः। धर्मादीनामुत्तरोत्तरस्य पूर्वपूर्वबाधकमुत्तरत्र विवक्ष्यते। असतां विषये स्तेयादीनां संसर्गात्पारदार्यस्तेया
दिशंकातयाभियोगः। होडालिंगं चौर्य्यादिचिह्नं तद्दर्शनात्साक्षाद्दर्शनं वा होडादर्शनं तस्माददनेनैव चौर्य्यादिकृतमिति
निश्चयरूपेणाभियोगस्तत्त्वाभियोग इत्यर्थः ॥ हिरण्यमन्युदकानां यथासम्भवं व्यवहाराङ्गत्वं अष्टादशपदानां निरूपयिष्य
न्नेक्रियाभेदादेकैकव्यवहारपदसम्बन्धिव्यापारभेदादनन्तरप्रकारत्वं शाश्वतम् ॥ इति व्यवहारभेदः ॥ * ॥ अथ सामान्यप
रिभाषा ॥ तत्र धर्माधिकरणाख्यासभानिरूपणम्। बृहस्पतिः। दुर्गमध्ये गृहं कुर्याज्जलवृक्षान्वितं पृथक्। प्राग्दिशि प्राङ्मु
खीं तस्य लक्षण्यां कल्पयेत्सभाम्। माल्यधूपासनोपेतां बीजरत्नसमन्विताम्। प्रतिमालेख्यदैवैश्च युक्तामग्न्यम्बुना तथेति। ल
क्षण्यां वास्तुशास्त्रोक्तलक्षणेन तु लक्षिताम्। अग्न्यम्बुनेति समाहारद्वंद्वः। सभायां धर्माधिकरणं च कात्यायन आह। धर्मशास्त्रा
नुसारेणार्थशास्त्रविवेचनम्। यत्राधिक्रियते स्थाने धर्माधिकरणं हि तदिति। तत्र सभ्योपवेशनमाह मनुः। यस्मिन्देशे निषी
दन्ति विप्रा वेदविदस्त्रयः। राज्ञश्चाधिकृतो विद्वान्ब्राह्मणास्तां सभां विदुरिति। त्रय इत्युपलक्षणम्। अधिकानामपि स्मृतत्वा

म् । तच्चवक्ष्यते । अधिकृतोविद्वान्प्राड्विवाकः अत्रप्रविशेत्सभाम् । सभामेवप्रविश्येदित्यादिवचनात्सभामुख्यंव्यवहारद
र्शनस्थानम् । अन्यान्यथमुख्यानिव्यवहारवचनाद्दवगंतव्यानि । देशस्थानानिवादानांपञ्चचैवाहबीहुगः । निर्णयंयेत
गच्छन्तिविवादंप्राप्यवादिनः । आरण्यास्तुस्वकैःकुर्युःसार्थिकाःसार्थिकैस्तथा । सैनिकाःसैनिकैरेवग्रामेषूभयवासिभिः ।
उभयानुमतश्चैवगृह्यतेस्थानमीप्सितम् । कुलिकाःसार्थमुख्याश्चपुरग्रामनिवासिनः । ग्रामपौरगणश्रेण्यश्चातुर्विद्याश्च
वर्गिणः । कुलानिकुलिकाश्चैवनियुक्तान्नृपतिस्तथेति । स्वकैरारण्यकैःग्रामेपीत्यपिशब्दाद्ग्रामेऽरण्यादौचनिवसन्तितेऽ
भयवासिभिर्निर्णयंकुर्युरुभयव्यवहाराभिज्ञत्वात्तेषांकुलिकाःकुलश्रेष्ठाः । सार्थोग्रामदेवयात्रादौमिलितोजनसंघःतन्मु
ख्याःसार्थवाहादयः । पुरंमुख्यनगरम् । तस्मादर्वाचीनोग्रामइतिपुरग्रामनिवासिनोभेदःसार्थःकुलिकादीनिपञ्चस्थाना
निनानिचारण्यकादीनामेवग्रामादीनिदशस्थानानिसाधारणानि । ग्रामोग्रामाकारेणावस्थितोजनः । पौरःपुरवासिनां
समूहः । श्रेण्योरजकाद्यष्टादशहीनजातयः । चातुर्विद्यःआन्वीक्षिक्यादिविद्याचतुष्टयोपेतः । वर्गिणोगणप्रभृतयः । इ
तिसभानिरूपणम् ॥ * ॥ अथव्यवहारदर्शनविधिः । तत्रमनुः । व्यवहारान्दिदृक्षुस्तुब्राह्मणैःसहपार्थिवः । मन्त्रज्ञैर्मन्त्रि
भिश्चैवविनीतःप्रविशेत्सभाम् । तत्रासीनःस्थितोवापिपाणिमुद्यम्यदक्षिणम् । विनीतवेषाभरणःपश्येत्कार्याणिकार्थिणाम् ।
प्रत्यहंदेशदृष्टैश्चशास्त्रदृष्टैश्चहेतुभिः । अष्टादशसुमार्गेषुनिबद्धानिपृथक्पृथक् । धर्मासनमधिष्ठायसंवीताङ्गःसमाहि
तः । प्रणम्यलोकपालेभ्यःकार्यदर्शनमारभेदिति । व्यवहारान्पूर्वलक्षितान्दिदृक्षुर्निर्णिनीषुः । पार्थिवोभिषिक्तक्षत्रियः । त
मेवाधिकृत्यप्रजापालनव्यवहारदर्शनादिविधानात् । यथावृत्तोभवेन्नृपइत्यादिषु । नृपग्रहणानुअन्यस्यापितत्स्थानापन्न
स्यप्रजापालनोपयिकंधर्मजातम्भवतीतिगम्यते । आसीनस्थितोवेतिसामर्थ्याद्यनुसारेणपूज्यापूज्यार्थिप्रत्यर्थ्यापेक्षयावाव्यव
स्थितोविकल्पः । दक्षिणपाण्युद्यमनंकार्यिणामवधानबोधनार्थं । विनीतवेषाभरणत्वन्तेषामपिप्रतिभानिवृत्यर्थमुपात्तं । प्र

न्यहमित्यनेनाह्निकवद्व्यवहारदर्शनस्यावश्यकतोक्ता। देशदृष्टः श्रुतिस्मृत्यनुक्तोऽपि देशाचाररूपास्तदविरुद्धा हेतवो युक्तिकलापाः। यथोदीच्यमध्यमानां कन्यां याचितुमागताय भोजनदानं कन्याप्रतिश्रवणप्रतिबद्धमतस्तस्मिन्कृते ऽवश्यं तस्मै कन्यादानव्येति निर्णेतव्यम्। एवमन्यदप्यूह्यम्। यथाह कात्यायनः। यस्य देशस्य यो धर्मः प्रवृत्तः सार्वकालिकः। श्रुतिस्मृत्यनुरोधेन देशदृष्टः स उच्यत इति। मार्गेषु व्यवहारपदेषु। निबद्धानि संबद्धानि धर्मनिर्णयोपयोगित्वाद्धर्मासनं। सम्वीतांगो वस्त्राद्याच्छादितशरीर इत्यनेन नीतिशास्त्रोक्तं कर्मणादिपरिहारोपयोगि सर्वमुपलक्षितम्। समाहितो विक्षेपशून्यः। विक्षेपदशायामन्यप्रतिभासायोग्यत्वाच्चितस्य लोकपालप्रमाणोपि तदुपयोगी। याज्ञवल्क्यः। व्यवहारान्नृपः पश्येद्विद्वद्भिर्ब्राह्मणैः सह। धर्मशास्त्रानुसारेण क्रोधलोभविवर्जित इति। अत्र व्यवहारान्स्वयम्पश्येत्सभ्यैः परिवृतोन्वहमित्यनेनैव याज्ञवल्क्येन विहितस्य व्यवहारदर्शनस्यानुवादो ब्राह्मणसाहित्यादिविधानार्थः। ब्राह्मणग्रहणं क्षत्रियादिव्युदासाय। सहयुक्तेऽप्रधान इति व्याकरणस्मृतेः। सहार्थतृतीयया तेषामप्राधान्यं गम्यत इति। तत्प्रयोजनमदर्शनान्यथादर्शनयोर्न्नृपस्य दोषः। किन्तु राज्ञ एवेति बोधनम्। धर्मशास्त्रानुसारेणेत्यनेनैव क्रोधलोभविवर्जिते सिद्धे तद्वर्जनोपादानं क्रोधलोभाभ्यामदर्शनान्यथादर्शनयोर्दृष्टातिशयप्रदर्शनार्थम्। न च क्रियानुवादेनानेकगुणविधाने वाक्यभेदः। दर्शनकर्तृतया वाक्यान्तरप्राप्तेनावद्विशेषणवैशिष्ट्यस्यैकार्थस्य बोधनात्तदनापत्तेः। पौरुषेयवाक्ये तात्पर्यानुरोधेन तस्यादोषत्वाच्च। ननु सर्वैपि व्यवहारदर्शनविधयो न तावत्केवलादृष्टार्थः। प्रजापालनोपयिकदुष्टादुष्टपरिज्ञानस्य दृष्टस्यावश्यकत्वात्। अत एव विज्ञानेश्वरः। अभिषेकादिगुणयुक्तस्य राज्ञः प्रजापालनम्परमो धर्मस्तच्च दुष्टनिग्रहं विना न सम्भवति। तत्परिज्ञानञ्च न व्यवहारदर्शनं विनेति व्यवहारदर्शनमहरहः कर्तव्यमित्युक्तम्। व्यवहारान्स्वयं पश्येदित्यादि। न च तद्देवफलमिति वाच्यम्। स्वर्गादिफलस्यादर्शनान्यथादर्शनयोः प्रत्यवायस्य च वचनान्तरैर्बोधनात्। तथा च कात्यायनः। स प्राड्विवाकसामात्यः सब्राह्मणपुरोहितः। ससभ्यः प्रेक्षको रा

ज्ञा स्वर्गे तिष्ठति धर्मे तइति । अत्र ब्राह्मणपुरोहितशब्देन अनियुक्तानान्तेषांग्रहणाम् । सभ्यशब्देननियुक्तानाम् । बृहस्पतिर

पि । विप्रो धर्मद्रुमस्यादिः स्कन्धशाखो महीपतिः । सचिवाः पत्रपुष्पाणि फलंन्यायेनपालनम् । यशोवित्तंफलरसोभोगोपब्र

ह्मपूजनम् । अजेयत्वंलोकपंक्तिःस्वर्गे स्थानञ्चशाश्वतम् । विदित्वैतान्न्यायरसान् सम्मोभूत्वाविवादनम् । त्यक्तलोभादिकंराजा

धर्म्यंकुर्याद्विनिर्णयमिति । न्यायरसान्व्यवहारदर्शनफलानि । प्रत्यवायोपिमनुनोक्तः । विद्धोधर्मोह्यधर्मेणसभांयत्रोप

तिष्ठते । शल्यंचास्यनकृन्तन्तिविद्धास्तत्रसभासदः । पादोऽधर्मस्यकर्तारम्पादःसाक्षिणमृच्छति । पादःसभासदःस

र्वान्पादोराजानमृच्छति । कर्तृसमपापाःसर्वेभवन्तीतितात्पर्यम् । नन्वन्यपापस्यान्यत्रसंक्रमसम्भवः । नारदोपि ॥ न्याय

मार्गादपेतन्तुज्ञात्वाचित्तंमहीपतेः । वक्तव्यन्तत्प्रियंनात्रसभ्यःकिल्बिषीभवेत् । तत्प्रियंनवक्तव्यंराज्ञःमनोनुकूलमेवनवाच्य

म् । किन्तुन्याय्यम्एवंसतिसभ्योनकिल्बिषीभवेदितिनञ्द्वयान्वयः । अधर्मतःप्रवृत्तंतंनोपेक्षेरन्सभासदः । उपेक्षमा

णाःसन्नृपानरकंयान्त्यधोमुखाः ॥ अन्यायेनापितंयान्तंयेनुयान्तिसभासदः । तेपितद्भागिनस्तस्माद्बोधनीयःसतैर्नृपइति ।

मनुः । राजाभवत्यनेनास्तुमुच्यन्तेचसभासदः । एनोगच्छतिकर्तारन्निन्दार्होयत्रनिंद्यतइति । किंचदृष्टादृष्टपरिज्ञानोपाये

ष्वनेकेषुप्राप्तेषुविधावस्मिन्नभ्युपगम्यमानेऽर्थान्नियमविधिः । स्वर्गादिफलप्रत्यवायपरिहारयोर्भव्यत्वेऽपूर्वविधिरितिवैरू

प्यंचापद्यते । व्यवहारदर्शनमात्रोपायकाचेद्यदिदृष्टादृष्टपरिज्ञानस्यतर्हितदर्थेनयाऽनुष्ठानार्थतयाज्ञानस्येतिविधिर्व्यर्थः

। अथयथाभट्टसोमेश्वरेणानुष्ठानंविनाभूतस्यापिज्ञानस्यविद्याधीनांगत्वनिर्वाहायाद्यदेवविद्ययेत्यादिवाक्येनकर्मार्थेनयावि

धिरभ्युपगतोयथाचमिश्रादिभिर्लिंगादेवांगत्वंज्ञानस्येत्युक्तम् । तथाव्यवहारदर्शनस्यतदविनाभावेपिविधिरभ्युपेयताम् ।

नैवंकर्मानुष्ठानस्यापूर्वसाधनत्वात्तत्पर्यवसायिज्ञानविधिरविनाभावेप्युक्तः । दृष्टादृष्टपरिज्ञानस्यतुतदभावान्नांगापेक्षेति

वैषम्यम् । नचास्यापिप्रजापालनमदृष्टार्थमुपकुर्वतःपरम्परयाऽपूर्वपर्यवसानमित्यस्त्वङ्गत्वार्थएवविधिरितिवाच्यम्

C

। एवमपूर्वपर्यवसायिविधिसम्भवेपिश्रुत्यनुभावेऽनारभ्यविधेरकृत्वावबोधकत्वात्। अन्वयाध्ययनाध्यापनयोरप्यकृत्वाव
मेः। ज्ञानस्यतुवाक्यादेवांगत्वंयदेवकरोतीतिश्रवणात्। येनकर्मणेच्छेत्तनजयानुजुहुयात्। एवंविनायकस्नपनग्रहहोमे
वविधानतः। कर्मणांफलमाप्नोतीतिश्रवणात्जपहोमविनायकस्नपनग्रहयज्ञानामिवमूलाद्यधिकारनिवृत्तिश्चतद्वि
धिबोधिताध्ययनोपायकज्ञानाग्निजभङ्गपायान्तरस्यज्ञानाग्निद्वारकक्षेपप्रतिक्षेपात्। प्रजापालनंपरंज्योतिष्टोमाद्यपूर्वमेवस्व
फलापूर्वञ्जनयतीत्यन्यदेतत्। अत्रब्रूमः। व्यवहारदर्शनोत्पन्नावेवविधेस्तात्पर्यम्। अन्यथेनुविधयस्तत्तन्निमित्तफलोपा
धिभेदेनाधिकारविषयःप्रयोगभेदस्याग्निहोत्रंजुहोतीत्युत्पन्नस्ययावज्जीवस्यमग्निहोत्रंजुहुयात्। अग्निहोत्रंजुहुया
त्स्वर्गकामइत्यत्रेव। अतोनवैरूप्यादिदोषः। दृष्टार्थतयातुनविधिरयम्प्रमाणान्तरसिद्धत्वात्तस्यापिव्यवहार
शास्त्रेन्यायसिद्धानुवादकात्प्रायोविषयइत्येतस्यापितथात्वेनबाधकन्तथापिविधित्वेसम्भवत्यनुवादत्वमङ्गीकर्तुमनर्हं।
यत्रतुतदसम्भवस्तत्रनदेवाश्रीयतेव्यवहारशास्त्रत्वादितिसकलनिबन्धसरसायातःसमाधिःदृष्टादृष्टपरिज्ञातेनुयश्चेपा
यान्तरप्राप्त्याव्यवहारदर्शनस्यपाक्षिकत्वतदास्यनियमविधित्वमेवाध्यापनादिविधीनामिवार्जनोपायतयानदृष्टेवोपायः
न्तरार्जनेप्रत्यवायकल्पनवदुपायान्तरात्दृष्टादृष्टपरीक्षयाप्रजापालनेप्यवसेयम्। स्मृत्यादीनाञ्चत्रैवर्णिकत्वानुवर्णा
धिकारिकत्वात्। म्लेच्छादीनांयथाकथञ्चिद्दृष्टादृष्टपरिज्ञानेनप्रजापालनेपिनक्षतिः। नचैवंप्रजापालनविधेरप्यभिवि
क्षत्रियाधिकारिकत्वादन्येषान्तत्रफलाभावेनाप्रवृत्तिः। दृष्टादृष्ट्यादिलाभार्थंकथंचित्प्रवृत्तावपितस्मादधर्माभावप्रसङ्गो
न्ययादर्शनादर्शनन्यायप्रवृत्त्यादिनाप्रत्यवायाभावापत्तिरत्रेतिवक्तव्यम्। दयाहिंसादिसाधारणधर्मान्तर्भावेनप्रजापाल
नस्यतेषामपिधर्मजनकत्वात्। नृपपदेनतत्त्वंयत्रसम्भवाच्च। तस्मादयमत्रनिष्कर्षः। अन्वर्गापवादादिमूलभूतान्वयव्य
तिरेकादिन्यायमूलकतायत्रसम्भवतितादृशव्यवहारशास्त्रस्यसर्वस्यन्यायमूलकताकल्पते। यदंशेतदसम्भवस्तत्रादृष्टार्थक

तयावेदएवमूलंकल्प्यते। वास्तुसामुद्रिकादिविधिवुज्योतिःशास्त्रायुर्वेदप्रामाण्यव्यवस्थापकत्वसंगेनाचार्यैःस्मृत्यधिकार
तोऽव्यक्रमेवएतत्प्रपञ्चितम्। अनएवार्थशास्त्रानुबलवद्धर्मशास्त्रमितिस्थितिरित्युक्तम्। वचनविरोधेन्यायप्रबाधनाद्धर्मशास्त्र
स्यचतन्मूलकत्वात्। यत्तुस्मृत्योर्विरोधेन्यायस्तुबलवान्व्यवहारतइतिवचनंतस्यायमाशयः। न्यायानुपष्टब्धस्मृत्यपेक्षया
न्यायोपष्टब्धास्मृतिर्बलवतीतिन्यायानुपष्टब्धस्मृतेस्तात्पर्यान्तरकल्पनाकार्येति। तत्रचोत्सर्गापवादविषयव्यवस्थाविकल्पादि
रूपस्यन्यायस्यप्रत्यायकंहेतुमाह। व्यवहारतइति। वृद्धव्यवहारादन्वयव्यतिरेकादिरूपादनादिप्रवृत्त्यापरपर्याया
न्यायाप्रत्येतव्यइत्यर्थः। नारदोपिधर्मशास्त्रविरोधेतुयुक्तियुक्तोविधिःस्मृतइति। धर्मशास्त्रयोर्विरोधेयुक्तिर्न्यायः। न्यायप
र्यालोचनाभावेसोपपत्तिकन्दोषमाह। बृहस्पतिः। केवलंशास्त्रमाश्रित्यनकर्तव्योहिनिर्णयः। युक्तिहीनविचारेहिधर्म
हानिःप्रजायते। चोरोऽचोरःसाध्वसाधुर्जायतेव्यवहारतः। युक्तिंविनाविचारेणमाण्डव्यश्चोरताङ्गतः। असत्यासत्यसङ्का
शाःसत्याश्चासत्यसन्निभाः। दृश्यन्तेभ्रान्तिजनकास्तस्माद्युक्त्याविचारयेत्। साध्वसाधुरितिछान्दसःसुलोपः। साधुर
साधुरित्यर्थः। व्यवहारतोनिर्युक्तिकात्। अर्थशास्त्रंचात्रधर्मशास्त्रान्तर्गतमेवनीतिव्यवहारशास्त्ररूपंगृह्यते। औशनसा
द्यर्थशास्त्रस्यधर्मशास्त्रानुसारित्वेऽप्यनेनैवनिरस्तत्वात्। विरोधोदाहरणन्तु। हिरण्यभूमिलाभेभ्योमित्रलब्धिर्वरायतः।
अतोयतेततत्प्राप्त्याइत्यर्थशास्त्रन्धर्मशास्त्रानुसारेणक्रोधलोभविवर्जितइतिधर्मशास्त्रं। अनयोश्चक्वचित्तुव्यवहारेप्रव
र्त्यमानेविरोधआपतति। कस्यचित्प्रमाणतःपराजयार्हस्यच्छलादिनाजयेऽवधार्यमाणेसोऽत्यन्तमैत्रीयोग्योमित्रंलभ्यते। अन्य
स्यतदवधारणेधर्मलाभोधर्मपरिहारश्चसत्यवादित्वात्। तत्रमित्रलाभमनपेक्ष्यधर्मएवानुरोद्धव्यः। द्वयोःप्रमाणयोरैका
र्थकत्वेनतुल्यबलत्वेपिप्रमेययोरर्थधर्मयोर्धर्मस्यप्राबल्यात्। प्रमाणबलाबलत्वेपरीक्ष्येपिप्रमेयबलाबलानुरोधेनतस्यबाधत्वे
नशिष्टाकोपनयेव्यवस्थितत्वात्। किमुतसमानबलाबलत्वे अतएवधर्मार्थसन्निपातेऽर्थग्राहिणएतदेवनिधर्मविरुद्धार्थग

हत्याश्चापस्तंबेनैतच्छब्दपरामृष्टं द्वादशवार्षिकं प्रायश्चित्तमुपदिष्टं। केचित्तु। गुरुम्वाबालवृद्धौ वा ब्राह्मणं वा बहुश्रुतम्। आ
ततायिनमायान्तं हन्यादेवाविचारयन्। नाततायिवधे दोषो हन्तुर्भवति कश्चन। प्रच्छन्नं वा प्रकाशं वा मन्युस्तंमन्युमृच्छति।
मन्युः क्रोधो मन्युं हन्ति न तु पुरुषः पुरुषान्तरमित्यर्थवादः। तथा आततायिनमायान्तमपि वेदान्तगं रणे। जिघांसन्तं जिघां
सीयान्न तेन ब्रह्महा भवेत्। जिघांसीयात् सन्नियाद्वच्छेदित्यर्थः इत्यादि। अग्निदो गरदश्चैव शस्त्रपाणिर्धनापहः। क्षेत्रदार
हरश्चैव षडेते ह्याततायिनः धनग्रहणेन प्राप्तावपि पृथक्क्षेत्रग्रहणं स्वल्पस्यापि क्षेत्रस्य शासनाद्यारूढस्य हर्त्ता धनस्य च बहुत
रस्य येन वृत्तिच्छेदस्तद्वदेवं भवति नावतो हर्त्ता नाततायीति द्रष्टव्यम्। तथा उद्यतासिर्विषाग्निश्च शापोद्यतकरस्तथा। आथर्वणेन हन्त्वं
ताचपिशुनश्चापि राजनि। यदभिधानेनावश्यम्प्राणात्ययो भवतीति तादृशपैशून्यस्य राजगामिनः कर्त्ता। भार्यातिक्रमकारी च
रंध्रान्वेषणतत्परः एवमाद्यान्विजानीयात् सर्वानेवाततायिनः। एवमाद्यामित्यनेन वधतुल्यस्वपीडाकारिणः इत्युक्तम्भवति।
उद्यतादिपदसमभिव्यवहारात्प्रवृत्तक्रिया एवाततायिनो न भूतभाविक्रिया। एतेषामाततायिनां वधे दोषाभावप्रतिपादकं च
चनकदंकमर्थशास्त्रम्। आत्मरक्षणार्थत्वात्। इयं विशुद्धिरुदिता प्रमाप्याकामतो द्विजम्। कामतो ब्राह्मणवधे निष्कृति
र्न विधीयत इत्यादि धर्मशास्त्रम्। दृष्टार्थत्वाभावात्। अनयोर्विरोधे सम्भवत्यपि आततात्यनाततायिविषयत्वेन सामान्यविशे
षभावेन बाध्यबाधकभावविपर्य्यये धर्म्मशास्त्रत्वान्मान्यशास्त्रमेव बलवत्। आततायिवधे दोषाभावप्रतिपादनं तु कथञ्चिदन्य
थात्मरक्षणासम्भवे आततायिवधस्यात्मरक्षणार्थं कुर्वतोऽनपराधत्वाद्राजदण्डाभावमात्रपरमर्थशास्त्रत्वात्। दुर्बलमित्युदा
हरणमर्थशास्त्रधर्मशास्त्रयोर्विरोधः स्यात्। अत्र विज्ञानेश्वरः। दोषाभावमाततायिवधे प्रतिपादयतां गुरुं वेत्यादिवचसां वि
ध्यन्तरशेषत्वादपि शब्दवाशब्दादीनां विधिशक्तिप्रतिबन्धकानां श्रवणाच्चन स्वार्थम्परत्वं किन्तु शस्त्रं द्विजातिभिर्ग्राह्यं धर्मो
यत्रोपरुध्यत इत्युपक्रम्य। आत्मनश्च परित्राणे दक्षिणानाञ्च संगरे। स्त्रीविप्राभ्युपपत्तौ च घ्नन् धर्मेण न दुष्यतीति आत्मार

क्षगोदक्षिणादीनां यज्ञोपकरणानां रक्षणे युद्धे च स्त्रीविप्रानुग्रहनिमित्तं चाततायिनमकूटशस्त्रेण घ्नन्न दोषभागिति दण्डाभा
वमुक्त्वा तदर्थवादोऽयमुच्यते । गुरुं चेत्यादि गुर्वादीनप्यनाततायिनो वध्यानप्याततायिनो घ्नतो न दोषः । किमुत तदन्यानिति कैमुतिक
न्यायेन स्तुतिप्रतीतेर्न गुर्वादीनां वध्यत्वप्रतीतिः । स्वार्थपर[illegible]नामनाततायिवधे दोषोऽन्यच्च गोब्राह्मणादि निरुक्त
न्नुवचनविरोधश्च । यच्च । आचार्यं च प्रवक्तारं मातरं पितरं गुरुम् । न हिंस्याद्ब्राह्मणान् गाश्च सर्वांश्चैव तपस्विन इति मनु
वचनम् । तदपि ब्राह्मणादिहननस्य वचनान्तरैरेव निषिद्धत्वादाततायिनामपि तेषां वधो न कार्य इति । अर्थवादत्वमेवार्थव
दिति । तद्विरोधे च गुर्वाद्याततायिवधस्य दोषोऽजनकत्वे । ननु गुरुं वेत्यादिवचसां त्वन्मते स्तुतिपरत्वेनाततायिवधदोषाभा
वाप्रतिपादकत्वात् प्रसक्तदोषाभावप्रतिप्रसवत्वे यच्चोक्तं मित्यनाततायिनामेव तेषां वधे दोषातिशयप्रतिपादनार्थत्वेन मानवस्था
र्थवत्त्वमिति न तद्विरोध इति चेत् । नैवम् । यस्य मते तेषां वचनानामाततायिवधे दोषाभावप्रतिपादकत्वं तं प्रति प्रतिप्रसवार्थ
त्वापादने विरोधपादने विज्ञानेश्वरतात्पर्यात् तर्हि तस्य भवन्मते दोषातिशयार्थत्वावश्यम्भावात्तन्मतेऽपि तथैवास्तु । क्वचिद्विरो
ध इति चेत् । भ्रान्तोऽसि । उभयत्र गुर्वाद्युपादाने विरोधप्रसक्तेरपरिहार्यत्वात् । विज्ञानेश्वरमते त्वर्थवादकल्पयोरन्यग
त्यसम्भवे हिंसानभिसन्धिनात्मरक्षणे प्रमादोपजातगुर्वाद्याततायिभिन्नाततायिवधे राजदण्डाभावलघुप्रायश्चित्तयोर्गुर्वा
दिविषये त्वपवादार्थमनुवचनमित्यदोषः । वस्तुतस्तु शस्त्रं द्विजातिभिर्ग्राह्यमित्यनेनोक्तस्याततायिवधे दोषाभावस्य प्राय
श्चित्तराजदण्डाभावयोश्चाचार्यादिविषयेऽपवादार्थं मानवम् । आततायिवधे दोषाभावस्य पलायनादिनाकेनापि प्रकारेणा
त्मरक्षणासम्भवे बोध्यः । अन्यथा वचनस्यादृष्टार्थत्वं हिंसादोषप्रतिपादकशास्त्रस्याततायिदोषेऽत्यन्तबाधश्चेत्युभ
यमप्यन्यायमापद्येत । गुर्वादिविषयकदोषाभावस्य प्रतिपादकार्थवादस्य वानाततायिगुर्वादिवधापेक्षयाततायितद्वधे
दोषाल्पत्वप्रायश्चित्ताल्पत्वे राजदण्डाभावे चार्थवचनानि स्तुत्युपयोगित्वादिति ॥ * ॥ अत्र भट्टभवदेवः ॥ ● ॥ स्वा

D

घ्यायिनं कुले जातं हन्यादेवाततायिनम्। नतेन ब्रह्महा स स्यान्मन्युस्तं मन्युमृच्छतीति। वसिष्ठवचनात्तदेकवाक्यतया वा शस्त्रा
दिग्रहणेऽपि गुर्वादिवाक्यानां प्रतिप्रसवविधित्वमेव न त्वर्थवादत्वम्। न च सुमन्तुवचनेनाततायिवधदोषोऽन्यत्र गोब्राह्मणादि
ष्वनेन विरोधः। सूत्रच्छेदापरिज्ञानात्। तथाहि। सूत्रत्रयमिदम्। आततायिवधेनेत्येकं १। दोषोऽन्यत्रेत्यपरम् २। गोब्रा
ह्मणात्स्नातः प्रायश्चित्तं कुर्यादित्यन्यत् ३। तत्र ब्रह्मवधप्रायश्चित्तमुक्त्वा यस्तैः सम्बन्धं कुर्यात्तस्याप्येतदेव प्रायश्चित्तमित्यभिधा
य सुमन्तुराह। आततायिवधेनेति। आततायिनो ब्राह्मणस्य वधे कृते न प्रायश्चित्तमिति प्रथमस्य सूत्रस्यार्थः। दोषोऽन्यत्र। आ
ततायिव्यतिरिक्ते दोष इति द्वितीयस्य। गोब्राह्मणात्स्नातः प्रायश्चित्तं कुर्यादिति प्रायश्चित्ताङ्गस्नानविधायकम्। तत्र गोहेतु
कं स्नानम्। व्यास आह। अयन्ते यानि तीर्थानि त्रिषु लोकेषु निम्नगाः। अभिषेकः समस्तेषां गवां शृङ्गोदकस्य चेति। ब्राह्म
णशब्देनात्र विधायकं वाक्यमुच्यते। तद्धेतुकं स्नानमघमर्षणादिजपादिपूर्वकम्। द्वन्द्वैकवद्भावश्च गोब्राह्मणादिति। तेन
गोहेतुकब्राह्मणहेतुकस्नानाभ्यां प्रायश्चित्ताधिकारी भवति न स्नानमात्रेणेति तृतीयस्येति। यदपि भविष्यपुराणवचनम्।
हत्वानुप्रहरन्तं वै ब्राह्मणं वेदपारगम्। कामतोऽपि चरेद्धीर द्वादशाब्दाख्यमुत्तममिति। तदपि नाततायिवधविषयम्। प्र
हारशब्दस्य वधायकत्वात् तेनायमर्थः। यश्चक्षुराद्यवयवानामपकर्षणाहरणे प्रवृत्तस्तद्वधेऽपि कामतोऽपि द्वादशवार्षिकमेव
प्रायश्चित्तमित्यर्थ इत्याह। तदयुक्तम्। आचार्यैश्चेत्यस्य मानवस्योक्तयुक्तिवशादाततायि आचार्यादिवधे दोषप्रतिप्रसवार्थत्व
स्यापापादितत्वात्तदेकमूलतया सुमन्तुवचनस्य मिताक्षराकृच्छेदेनैव व्याख्यातुमर्हत्वात्। तदुक्तच्छेदे दोषोऽन्यत्रेत्यस्यैव यथा
पत्तेश्च। गोब्राह्मणादित्यस्य स्नानहेतुत्वे पञ्चमीति व्याख्याने गोशब्दस्यावयविवाचकस्यावयवशृङ्गलक्षणायां लक्षितलक्षणापत्तेः
। गोस्नानाहेतुत्वात्। ब्राह्मणस्य ज्ञापकहेतुत्वाद्गोश्च कारकहेतुत्वस्य क्लिष्टस्य यद्ग्रहणाद्वैरूप्यादिदोषप्रसङ्गाच्च। यदपि भविष्य
पुराणीयवचनव्याख्यानं तदत्यन्तबहिर्मुद्रम्। ताडनादिवधपर्यन्तं तद्देहपीडनेच्छस्य प्रहर्तेश्चक्षुराद्यवयवप्राकर्षण

हरणेयेगयहणस्यरथकारनयविपरीतत्वात् । किञ्च । चक्षुरद्यवयवोद्धरणप्रवृत्तब्राह्मणवधेकामकृतेपिद्वादशाब्दमेवब्र
ह्मवधप्रायश्चित्तंनतुकामकृताऽन्यब्रह्मवधवत्प्रायश्चित्तद्वैगुण्यंमरणांतिकंवेत्यस्यैतद्वचनादिसंहितस्यप्रायश्चित्तह्रासप्रयो
जकदोषाल्पत्वस्याततायित्वमेवनिमित्तमन्यासम्भवाच्चस्त्रपाणित्वेताततायित्वन्तस्यैवसत्वाच्च । तथाचनाततायिविषयमिद
मित्यसम्बन्धं आततायिन्यदोषोन्यत्र । गोब्राह्मणांयदाहन्यात्तदाप्रायश्चित्तंकुर्य्यात् । शिखावानपिगोविप्रंनहन्याद्वैकदाच
नेत्याभ्यांसंवर्त्तभविष्यवचनाभ्यांविरोधस्यसर्वथादुष्परिहरत्वाच्चविध्यंतरशेषभूतस्यविधिशक्तिप्रतिबन्धकापिशब्दादिमनोर्गुर्वा
दिवाक्यप्रतिप्रसवविधित्वस्याभ्युपगन्तुमशक्यत्वाच्च । नचविध्यशेषभूतानांवसिष्ठादिवचसामर्थवादत्वमसम्भवतीतिगुर
वेत्यादीनामपिनार्थवादत्वंविध्यन्तरशेषत्वात्तेषामर्थवादत्वेपिवास्मदभिप्रेतत्वार्थसिद्धेर्वचनान्तरैःपरतन्त्रैरुरीकृतत्वान्नक्ष
तिरितिवाच्यम् । यतस्तेषामपिगोब्राह्मणाद्याततायिवधदोषप्रतिपादकबहुतरवचनान्तरविरोधाद्दोषाल्पत्वप्रतिपादक
त्वेनतदेकमूलकतालाभायोचिताऽन्यथादुःपरिहरत्वाद्विरोधस्येत्येतावत्तुविस्तरः । शूलपाणिस्तु । नाततायिवधेदोषात्किल्वि
षंप्राप्नुयात्क्वचित् । विनाशार्थिनमायांतंघातयन्नापराध्नुयादितिबृहस्पतिवचनम् । आततायिवधस्यादोषतापमाणत्वेना
पन्यस्यकिल्बिषाभावःप्रायश्चित्तनिषेधार्थः । अपराधाभावस्तुदण्डनिषेधार्थइतिचव्याख्यापयतसर्वेनआत्मानंगोपायेदिति
श्रुतिमूलकमिदमतःपलायनादिनाप्यात्मरक्षणासम्भवपरमितितत्तात्पर्यमुपवर्ण्यगुरवेत्यादिमन्वादिवचनान्यपितदुपष्ट
म्भकतयाप्रदर्श्यआततायिन्यदोषइत्यादिसंवर्त्तवचनंशिखावानित्यादिभविष्यवचनञ्चपूर्वोक्तत्वाद्विरोधित्वेनाशंक्यव्यवस्था
मेवमुक्तवान् । इत्यपेक्षयातपोविद्याजातिकुलैरुत्कृष्टोब्राह्मणगुर्वादिराततायिनवध्यः । समोपकृष्टश्चवध्यः । तथाच
कात्यानः । आततायिनिचोत्कृष्टेतपःस्वाध्यायजन्मतः । वधस्तत्रतुनैवस्यात्पापंहिनवधेतुनेति । अतएवगीतायामुक्तम्
। पापमेवाश्रयेदस्मान्हत्वैतानाततायिनइति । एतान्भीष्मादिनस्मत्तोत्यन्तोत्कृष्टानाततायिनोपिहत्वाऽस्मान्पापमेवाश्र

येदेवेत्यर्थः । उत्कृष्टाततायिहननान्निवृत्तौपातकमप्युक्तम् । बृहस्पतिना । आततायिनमुत्कृष्टं वृत्तस्वाध्यायसंयुतं । योन
हन्याद्वधप्राप्तं सोऽश्वमेधफलं लभेदिति । तेनोत्कृष्टाततायिवधनिवृत्तौ तद्वधप्रसक्तप्रत्यवायपरिहारोऽश्वमेधफलञ्च संयोगपृ
थक्त्वान्नपायात् । यद्यपिगुरुं वा कृष्णं वा हन्यादितिश्रूयते गुरोश्च शिष्यापेक्षयोत्कृष्टत्वमेवेतितत्र व्यवस्थेयं दुःखस्थानथापिगुरो
रपि सकाशात्कुलविद्यातपःप्रभृतिभिर्गुणैः शिष्यस्याप्युत्कर्षः सम्भवतीतिसुस्थैवतत्रापिव्यवस्थेयम् । गौरल्वाततायिन्यविशेषे
णावध्यत्वेविरोधिवचनाभावात् । एतेषाञ्चाततायितापयोजकव्यापारगोचरवर्तमानप्रवृत्तिकानामेवहन्तव्यानामप्याततायि
नां हनने दोषाभावोननुनिवृत्तव्यापारकाणामपि । उद्यतानांतुपापानां हन्तुर्दोषोनविद्यते । निवृत्तानान्तथारम्भाद्ग्रहणान्नव
धः स्मृतवृत्तिकात्यायनवचनादिति । तदपिनक्षोदक्षमम् । तथाहि । नहिंस्यादितिनिषेधावधारितस्य दोषस्य शस्त्रं द्विजा
तिभिरित्यादिनाऽऽततायिविषयेऽपवादमभिधाय तदर्थवादत्वेन गुरुं वेत्याद्युक्त्वा मनुस्तु मन्युस्तम्मन्युमृच्छतीत्यादिवचनैर्गोब्राह्म
णादिविषये तत्प्रतिप्रसूयचरितार्थैर्भवत्सर्ववचनेषु कात्यायनीयमाततायिनि चोत्कृष्टाइत्यादिवचोपि मन्वादिवचनोपात्ताचा
र्यब्राह्मणत्वाद्युत्कर्षमेवादायतदेकार्थकमेवोचितंननुतेषामुत्कृष्टाचार्यादिविषयकतया संकोचकं । तपःस्वाध्यायजन्मतइत्य
नेनापिब्राह्मणत्वादिकृतोत्कर्षस्यैवोपलक्षणात् । किञ्चाततायिवधे दोषाभावस्योत्कर्षमात्रेणापवादस्त्वयाभिमतः । गौतमस्य
स्यैतत्पदस्यतदुपष्टम्भकत्वमधमवर्णावध्यत्वमुत्तमवर्णाततायिनोवदतः । तथाचसामान्यतोब्राह्मणत्वादिपुरस्कारेणतदप
वादकवाक्यानामार्थक्यमेवस्यात् । अस्योपसंहाविषयत्वात् । यत्रहिमित्रविन्दावत् द्वयोरर्थवत्त्वंतत्रसामान्यविशेषउपसं
हारःस्वीक्रियते । अनुत्कृष्टतद्वधेत्वयादोषाभावस्यैवाभ्युपेतत्वात् । गुरुंवेत्यादिवक्तव्यसाम्प्रतिप्रसवविधित्वेनत्वयाभ्युपे
तानाङ्कात्यायनीयैकवचोनुरोधेनोत्कृष्टमात्रेणोपलक्षणत्वमानर्थकापरपर्यायएव । यद्वागोत्वब्राह्मणत्वादिनिमित्तप्रति
प्रसवेकृतेकात्यायनीयमुत्कर्षनिमित्तदोषातिशयप्रतिपादकम्भविष्यतीतिसमस्तवचनसामञ्जस्यसम्भवेवचनस्वरसभङ्गाश्री

करणमङ्गीकरणमेव । उत्कृष्टवदनिमित्तोपकारित्वयोरप्यस्तु । संयोगपृथक्त्वात् । तथाप्यश्वमेधपदमप्यनर्थकं स्यात्
सङ्गाद्विवक्षितमथवा तत्र श्रुतब्रह्महत्यातरणान्तत्वयापापस्यस्वरूप [illegible] नोपपापानुत्पत्तेः । फलाभावादिति प्राच्यामेव व्याख्यानं साधीयः । नारतम्ये
येते । फलपदन्तुपक्षे स्मिन्न समञ्जसं निषिद्धनिवृत्तेः पापानुत्पत्तेः । किञ्च । आततायिब्राह्मणादिवधस्यादोषतां प्रतिपादकतया
तवाश्वमेधफलमत्रापि भवतीति नाश्वानर्थक्यमिति समाधेयम् । किञ्च । कथमुत्कर्षं दोषपरं कात्या
तवाभिमतेषु कात्यायनदेवलादिवचनेष्वपि वेदान्तगं भ्रूणमपीत्यादीनामुत्कर्षप्रतिपादकत्वात् । कथमुत्कर्षं दोषपरं कात्या
यनीयमाततायिनिषेधोत्कृष्ट इति वचस्तद्विरोधसमाधानमवश्यं स्यात् । यच्च देवलवचनं भवतोदाहृतम् । उद्यम्य शस्त्रमाया
न्तं भ्रूणमप्याततायिनम् । निहत्य भ्रूणहा न स्यादहत्वा भ्रूणहा भवेदिति । भ्रूणः उत्तमब्राह्मणविशेषः । दोषप्रसक्तिं
नियमार्थमिति व्याख्यातञ्च । तदन्यसमञ्जसम् । तद्धि आततायिहनने दोषः कस्यापि संमतः । किन्तु तद्धनने दोषाभावमात्रम् । त
स्मादन्यथात्मरक्षणासम्भवे तद्धनने सत्यहत्यैव भ्रूणहत्या प्रसज्यत इत्यात्मरक्षणविधिप्राप्तानुवादमात्रमेतदिति व्याख्येयम्
। तस्मादाततायिनिषेधोत्कृष्ट इत्यादिकात्यायनवचनमस्मदुक्तरीत्यास्तु मनुसंवर्त्ताद्विवचः समानार्थतयोत्कर्षप्रयुक्तदोषाभि
धायपरतया वा वर्णनीयम् । ननु विरोधेऽव्यवस्थापकतयेत्यलमतिदूरङ्गत्वा मम तु प्रतिभाति सत्यपि गुरुत्वेऽप्यादीनाम्प्रतिप्र
सवविधित्वेन तेषामर्थशास्त्रत्वम् । अदृष्टदोषाभावस्याप्यदृष्टत्वेन दृष्टार्थत्वाभावात् । तथात्मरक्षणमात्रार्थत्वेन तद्धाराप्रा
प्रायश्चित्तप्रसङ्गात् । न चेष्टापत्तिः । नतेन ब्रह्महा भवेत् । आततायिवधे दोषो न्यत्र गोब्राह्मणाद्युदाहृत्या तदा प्रायश्चित्तं कु
र्यात्पापमेवाश्रयेदस्मानित्यादिषु पापतद्भावयोः स्पष्टमवगमात् । तस्मात्सर्वं मतेऽप्यर्थधर्मशास्त्रविरोधोदाहरणमिदमि
त्यलं तमिवेत्य सम्प्रसक्तानुप्रसक्तविचारप्रपञ्चेन । प्रकृतमनुसरामः । व्यवहारदर्शनकालमाह । कात्यायनः । समास्था
नेषु पूर्वाह्णे कार्याणां निर्णयं नृपः । कुर्याच्छास्त्रप्रणीतेन मार्गेणामित्रकर्षणः । दिवसस्याष्टमम्भागं मुक्त्वाभागत्रयन्तु यत् । स

E

कालोव्यवहाराणांशास्त्रदृष्टःपरःस्मृतइति । अत्रसभास्थानेष्वित्यादिसर्वमनुवादः । कात्यायनेनैववचनान्तरे विहितत्वात् । पूर्वार्द्धमात्रंविधेयन्तदपिदृष्टार्थंतदाबुद्धिप्रसादात्कार्यान्तराव्यावृतत्वाच्च । तत्रविशेषोदिवसस्याष्टमंभागमित्यादिनोक्तः । अष्टमोभागःप्रथमप्रहरार्द्धम् । भागत्रयन्तुनरमावर्त्तनात्प्राक्तनम् । अन्यथापूर्वार्द्धविधिविरोधात् । प्रथमप्रहरसंध्यागोपिनित्यहोमादिबाधपरिहारोपयिकतयादृष्टार्थएव । अत्रवर्ज्यास्तिथीराह । संवर्त्तः । चतुर्दशीममावास्यांपौर्णमासींतथाष्टमी । तिथिष्वासुनपश्येत्तुव्यवहारंविचक्षणइति । एतत्प्रतिषेधस्त्वदृष्टार्थएवदृष्टासम्भवात् । भोजनाग्नितर्दिगादिप्रतिषेधवत् । स्पष्टशास्त्रानुपलम्भेतुदेशव्यवहारानुरोध्येवनिर्णयः । कार्यइत्यप्याहसएव । तस्माच्छास्त्रानुसारेणराजाकार्याणिसाधयेत् । वाक्याभावेतुसर्वेषांदेशदृष्टमतंनयेत् । अत्रपूर्वार्द्धमनुवादः । उत्तरार्धन्तुन्यायमूलकम् । मनुः । जातिजानपदान्धर्मान्श्रेणीधर्मांस्तथैवच । समीक्ष्यकुलधर्मांश्चस्वधर्मंप्रतिपालयेत् । जातिजानपदान् । जातिप्रयुक्तान्देशप्रयुक्तांश्चधर्मान् । श्रेणयएककर्मोपजीविनोवणिक्कृषीवलादयः । स्वधर्मंराजप्रवर्त्तितंधर्मं । मदनरत्नेतुस्वधर्मंदुष्टदण्डनरूपमितिव्याख्यातम् । तदनुवादमात्रत्वापत्तेर्हेयम् । कुलधर्मलक्षणमभिहितम् । कात्यायनेन । गोत्रस्थितिस्तुयायेषांक्रमादायातिधर्मतः । कुलधर्मन्तुतंप्राहुःपालयेत्तन्तथैवतु । बृहस्पतिः । देशजातिकुलानांचयेधर्माःप्राक्प्रवर्त्तिताः । तथैवतेपालनीयाःप्रजाप्रक्षुभ्यतेऽन्यथा ॥ जनापरक्तिर्भवतिबलंकोशश्चनश्यति । उद्वह्यतेदाक्षिणात्यैर्मातुलस्यसुताद्विजैः ॥ मध्यदेशेकर्मकराःशिल्पिनश्चगवाशिनः । मत्स्यादाश्चनराःसर्वेव्यभिचाररताःस्त्रियः ॥ उत्तरेमद्यपानार्य्यःस्पृश्यान्नृणांरजस्वलाः । खशजाताःप्रगृह्णन्तिभ्रातृभार्य्यामभर्तृकाम् ॥ अनेनकर्मणानैतेप्रायश्चित्तदमार्हकाइतिसर्वइत्यनेनस्मृतिविरोधउक्तः । पूर्वइतिकल्पतरौपाठः । तत्रपूर्वदेशइत्यर्थः । दमोदण्डः । यत्तुस्मृत्यन्तरेष्वेतत्कर्मकरणेप्रायश्चित्तदण्डस्मरणंतदेतद्वचनानुपात्तदेशविषयमिति । मदनरत्नाकरः । वयन्तुप्रजाप्रक्षोभादिदृष्टदोषकथनाद्दृष्टार्थतच्चदण्डेनकार्यएव । प्रा-

यश्चिन्नाभावस्तुव्यवहारविषयः। परलोकशुध्यर्थम्प्रायश्चित्तंभवेदित्यर्थेवेतिनस्मृत्यंतरविरोधः। नन्वहेयथापकश्रुतिस्मृति
विरुद्धाचरणोव्यवहारप्रतिबन्धिकाश्किन्तज्जन्यपापस्यनाशिनरकजनिकास्त्येव। उपक्रमपर्यालोचनादेतावदर्थकत्वमेव
चैतद्वचनोपपन्नोसर्वथादोषाभावकल्पनस्यानुचितत्वात्। अतएवआपस्तम्बेनोक्तं। देशजातिकुलधर्माश्चाम्नायैरविरुद्धाः। प्र
माणमिति। येषांपरंपराप्राप्ताःपूर्वजैरप्यनुष्ठिताः। मस्यवतैनेदुष्येयुराचारान्नेतरे पुनरिति। नदुष्येयुरव्यवहार्याराजदण्ड्या
श्चनभवेयुरित्यर्थः। अन्यथैतयोर्वचनयोःपरस्परविरोधोदुर्व्यवहारःस्यादितिब्रूमः। यानितुवचनानिव्यासः। वणिक्शि
ल्पप्रभृतिषुकृषिरंगोपजीविषु। अशक्योनिर्णयोह्यन्यैस्तज्जैरेवतुकारयेत्। वृहस्पतिः। कीनाशाःकारुकाःशिल्पिकुसीदि
श्रेणिनर्तकाः। लिङ्गिनस्तस्कराःकुर्युःस्वेनधर्मेणनिर्णयम्। कीनाशाःकर्षकाः। कारुकावर्धक्यादयः। शिल्पिनश्चित्रकारा
दयः। कुसीदिनोवार्द्धुषिकाः। लिंगिनःपाशुपतप्रभृतयः। मनुः। आश्रमेषुद्विजातीनांकार्येविवदतांमिथः। नविब्रूयान्नृ
पोधर्मंचिकीर्षुर्हितमात्मनः। यथार्हमेतानभ्यर्च्यब्राह्मणैःसहपार्थिवः। सान्त्वेनप्रशमय्यादौस्वधर्मंप्रतिपादयेत्। आश्र
मेषुकार्य्ये। आश्रमसम्बन्धिनिकार्य्येविब्रूयात्। विरुद्धवचनस्यसामान्यतएवप्रतिषिद्धत्वात्। प्रशमय्यकोपमपनीय। बृ
हस्पतिः। तपस्विनांतुकार्य्याणित्रैविद्यैरेवकारयेत्। मायायोगविदाञ्चैवनस्वयंकोपकारणात्। कोपकारणात्तेषांकोपप्रसं
गात्। कात्यायनः। सम्यक्विज्ञानसम्पन्नेनोपदेशम्प्रकल्पयेत्। उत्कृष्टजातिशीलानांगुर्वाचार्य्यतपस्विनाम्। सम्यग्विज्ञा
नसम्पन्नेनेतितृतीयांतम्पदम्। तथाचतज्ज्ञानोत्कृष्टजातिशीलानांगुर्वाचार्य्यतपस्विनामुपदेशम्प्रकल्पयेत्। कारयेत्। न
स्वयमुपदेशम्प्रकल्पयेत्। कारयेत्। नस्वयमुपदेशन्तेषांकुर्य्यादित्यर्थः। तानितःसर्वथाराज्ञोव्यवहारदर्शनप्रतिषेधप
राणिकिन्तुतत्तत्कार्य्येवणिकादीनामभियुक्तत्वात्तान्विहायनव्यवहारनिर्णयः। करणीयइत्येवम्पराणियथाक्रमः। अभियुक्ता
श्चयेयत्रार्थन्निवन्धनियोजनाः। तत्रत्यगुणदोषाणान्तएवहिविचारकाइति॥ तत्रतत्त्वमभियोगविशेषात्स्यादितिजैमिनिरः

पिसाधुशब्दाधिकरणोऽस्तूचयामास। अतएवचिकीर्षुर्हितमात्मनः। सान्त्वेनप्रशमय्याकोपकारणादित्यादिहेतुप्रदर्शनम्।
यथातत्त्वावधारणांस्वानिष्टनिवारणञ्चभवतितथाकौशलेननिर्वाहणीयमित्यत्रतात्पर्यम् ॥ * ॥ अथप्राड्विवाकलक्षणम्। वि
वादेपृच्छतिप्रश्नम्प्रतिप्रश्नन्तथैवच। प्रियपूर्वंप्राग्वदतिप्राड्विवाकस्ततःस्मृतः। इतिवृहस्पतिः। व्यासोपि। विवादानुगतंपृ
ष्ट्वाससभ्यस्तत्प्रयत्नतः। विचारयतियेनासौप्राड्विवाकस्ततःस्मृतइति। गौतमेनतुवृहस्पतिवद्योगार्थः। प्राड्विवाकशब्दस्यद
र्शितः। प्राड्विवाकेवादिप्रतिवादिनौपृच्छतीतिप्राट्ताभ्यामुक्तंसभ्यैःसहविविच्यवक्तीतिविवाकइति। वृहस्पतिना। विचा
रयत्यभिधानाद्विविनक्तिइतिविवाकशब्दस्यव्युत्पत्तिरुक्ताविवक्तीतिविवाकइति। इतिगौतमेन। नारदहारीतौ। यथाशल्यंभि
षक्कायादुद्धरेद्यन्त्रयुक्तितः। प्राड्विवाकस्तथाशल्यमुद्धरेद्व्यवहारतः। इति। शल्यञ्चधर्मस्याधर्ममिश्रणम्। यथाचमनुः।
विद्धोधर्मोह्यधर्मेणसभांयत्रोपतिष्ठते। शल्यञ्चास्यनिकृन्तन्तिविद्धास्तत्रसभासदइति अयञ्चराज्ञास्वयंव्यवहारदर्शनेक्रिय
माणेऽस्यसहायःसप्राड्विवाकइतिस्मरणात्। यदानुराज्ञाकार्यान्तरव्यग्रतयास्वास्थ्याभावेनवास्वयंव्यवहारदर्शनासमर्थेन
दानप्रतिनिधिः। यदास्वयंनकुर्य्यात्तुनृपतिःकार्य्यदर्शनम्। तदानियुञ्ज्याद्विद्वांसंब्राह्मणंकार्य्यदर्शने। सोस्यकार्य्याणिस
म्पश्येत्सभ्यैरेवत्रिभिर्वृतः। सभामेवप्रविश्याग्र्यामासीनःस्थितएववा। इतिमनुवचनात्। सभ्यग्रहणादमात्यादिनिवृत्तिः
त्रियहणात्संख्यान्तरनिवृत्तिः। सभ्यानामितिस्मृतिचन्द्रिकाकारः। तत्रदृष्टार्थत्वप्रसंगादयुक्तमित्युपलक्षणत्वमेवन्याय्यंञ्च
पश्यताह्यर्थवशाद्व्यवहारानपेक्षात्। सभ्यैःसहनियोक्तव्योब्राह्मणःसर्वधर्मवित्। इतियाज्ञवल्क्यवचनाच्च। यदानकुर्य्यान्नृ
पतिःस्वयङ्कार्यविनिर्णयम्। तदातत्रनियुञ्जीतब्राह्मणांशास्त्रपारगम्। दान्तङ्कुलीनंमध्यस्थमनुद्वेगकरंस्थिरम्। परत्र
भीरुन्धर्मिष्ठमुद्युक्तंक्रोधवर्जितंइति। कात्यायनस्मरणाच्च। शास्त्रपारगंबहुशास्त्राभियोगशालिनम्। यथाचकात्यायन
एव। एकंशास्त्रमधीयानोनविद्यात्कार्यनिर्णयम्। तस्माद्बह्वागमःकार्य्योविवादेषूत्तमोनृपैः। एवंविधब्राह्मणाभावेक्षत्रि

यं वैश्यं वा प्रतिनियुञ्जीत न तु शूद्रम् । तथा स एव । यदा विप्रो न विद्वान् स्यात् क्षत्रियं तत्र योजयेत् । वैश्यं वा धर्मशास्त्रज्ञं शूद्रं यत्नेन
न वर्जयेत् । मनुः । जातिमात्रोपजीवी वा कामं स्याद् ब्राह्मणब्रुवः । धर्मप्रवक्ता नृपतेर्न तु शूद्रः कथञ्चन । यस्य शूद्रस्तु कुरुते राज्ञो
द्रो धर्मविवेचनम् । तस्य सीदति तद्राष्ट्रं पङ्के गौरिव पश्यतः । व्यासः । द्विजान्विहाय यः पश्येत्कार्याणि वृषलैः सह । तस्य प्र
क्षुभ्यते राष्ट्रं बलं कोशश्च नश्यति । इदं वचनं स्मृतिचन्द्रिकायामस्मत्यादि स्थानेऽपि शूद्रं वर्जयेत् । किमुत धर्मनिर्णये बहु वेदयम
रमुक्तम् । दोषानिश्चयकीर्तनात् । कल्पतर्वादिषु तु प्रकरणाद् व्यवहारदर्शन एव शूद्रवर्जकत्वेन लिखितम् । अयमस्य प्रतिषे
धोऽदृष्टार्थ एव । राष्ट्रक्षोभादेरदृष्टद्वारकत्वस्यैव संकीर्तनात् । चण्डेश्वरेण तु शूद्रस्य धर्मज्ञानेऽपि विवेकाभावप्रतिसंधा
नविरहान्न प्रतिसन्धानस्य च सम्यक् निर्णयोपायत्वात् । त्याग इति युक्तिरयुक्ता । सावर्ण्यागादिष्वपि नियमोऽन्वाचयमात्र
एते च सर्वे व्यवहारसंबन्धादिति प्रतिषेधः । अभिषिक्तक्षत्रियाधिकारिकास्तत्स्थानापन्नान्याधिकारिकाश्च प्राड्विवाकादयस्त
थाधिनयाऽऽर्त्विक्स्थानीयाः । स प्राड्विवाक इत्यादिना तेषां गुणाभावाच्च नियोगोक्तेश्च । राजाभिषेकसंयुक्तो ब्राह्मणो वा
बहुश्रुतः । धर्मासनगतः प्रेक्ष्य व्यवहाराननुत्तमानिति प्रजापतिवचनात् । अत्र राजशब्दोऽस्मिन्नधिकारे राजपदं न क्षत्रियजा
तिवचनः । अभिषेकसंयुक्त इति वचनात् स्मृत्यन्तरेष्वभिषिक्तक्षत्रियस्योक्त्यत्तदभिधानाच्चानभिषिक्तक्षत्रियस्य नाधिकारः ।
अतश्चानभियुक्तस्य शुभाशुभफलयोस्तद्गामित्वं । प्राड्विवाकादीनां तु प्राक्प्रदर्शितेभ्यो न्यायेनापि नियान्तमित्यादि वाक्येभ्यो राज्ञो
ऽनिवारणे परं दृष्टादृष्टदोषभागिता । अनियुक्तानां तु तत्रापि वादिमिताक्षरादौ व्यक्तं ब्राह्मणो वेत्यनुकल्पत्वाभिप्रायं बो
धा शूद्रो न तु स्यकक्षाधिकारपरः ॥ अनुक्तपक्षोऽनुक्तः । सभापतिश्च सपत्नितिर्यग्वदुर्गमध्ये गृहं कुर्यादित्यादिना बृहस्पत्यादि
भिः सभानिर्माणमुक्तं प्रासादेऽस्ति सभ्योपवेशनादेश्च तन्मध्य एव विधानात् । अदण्ड्यान् दण्डयन् राजा दण्ड्यांश्चैवाप्यदण्डयन्
। अयशो महदाप्नोति नरकं चैव गच्छति ॥ अपि भ्राता सुतोऽर्घ्यो वा श्वशुरो मातुलोऽपि वा । नादण्ड्यो नाम राज्ञोऽस्ति धर्माद्विचलि

नःस्वकादिव्याभिर्नित्यकामाधिकारयोस्तस्यैवयद्दृणात्प्रजापालनाधिकारश्च ॥ ७ ॥ अथसभ्याः । तत्रयोगीश्वरः । श्रुताध्यय
नसम्पन्नाःधर्मज्ञाःसत्यवादिनः । राज्ञासभासदःकार्यारिपौमित्रेचयेसमाइति । श्रुतेनमीमांसाव्याकरणादिश्रवणेनवेदाध्यय
नेनचसंपन्नाःधर्मज्ञाःसत्यवादिनः । सत्यवदनशीलाःरिपौमित्रेचसमाःद्वेषरागशून्याःएवंविधासभासदःसभायांसदविषया
सीदंतियथादानमानसत्कारैःराज्ञाकर्तव्याःसभ्यत्वेनवरीतव्याइत्यर्थः । अतस्तेषामुपादेयत्वात्स्वाध्यायोध्येतव्योयूपंछिनत्तिपुरो
हितस्तम्प्रवृणीतेत्यादिवत्सत्यपिकर्तृत्वेनुद्देश्यत्वात्तद्गतैकत्ववद्बहुत्वंविवक्षितम् । यच्चयद्यपिकपिञ्जलनयेनत्रित्वमात्रेणापि
चरितार्थत्वंतथापिस्मृत्यंतरेकत्रवद्बहुत्वविकल्पपरम् । तथाचबृहस्पतिः । लोकवेदज्ञधर्मज्ञाःसप्तपञ्चत्रयोपिवा । यत्रोपविष्टावि
प्राःस्युःसायज्ञसदृशीसभेति । मनुनातुत्रयएवोक्ताः । यस्मिन्देशेनिषीदन्तिविप्रावेदविदस्त्रयइति । अत्रत्रिभ्योन्यूनाः
सप्तभ्योधिकाश्चनकार्याइत्यत्रतात्पर्यंसंख्यावैषम्यन्तुभूयोल्पविरोधेभूयसांस्यात् । स्वधर्मत्वमितिन्यायेनविप्रतिपत्तौबाधकसंख्या
वचनमादरणीयंगुणसाम्यैः । तद्वैषम्येतुश्रुतमप्यन्धानान्नपश्यतीतिन्यायेनगुणवत्तरवचनमेवेतिप्रदर्शनार्थम् । य
त्तुचत्वारोधर्मज्ञाःपर्षत्त्रैविद्यमेववा । साब्रूतेयंसधर्मःस्यादेकोवाध्यात्मवित्तमइति । योगीश्वरेणविषमसंख्यत्वमपिवक्तव्यम
पिचानादृतम् । ननुपूर्वोक्तानान्धर्मकारकज्ञापकहेतूनांसन्देहनिर्णयविषयम्प्रक्रमात् । व्यवहारविषयेतुत्र्यवराणांविषम
संख्यानामेवसभ्यत्वंविशेषविधानादित्यवसेयम् । एतेचब्राह्मणाएव । मनुबृहस्पतिभ्यांविप्रपदोपादानात् । सतुसभ्यैःस्थि
रैर्युक्तःप्राज्ञैर्मौलैर्द्विजोत्तमैः । धर्मशास्त्रार्थकुशलैरर्थशास्त्रविशारदैरितिद्विजोत्तमपदस्यचकात्यायनेनोपादानात् । नार
दः । राजातुधार्मिकान्सभ्यान्नियुञ्ज्यात्सुपरीक्षितान् । व्यवहारधुरंवोढुंयेशक्ताःपुङ्गवाइव । धर्मशास्त्रेषुकुशलाःकुली
नाःसत्यवादिनः । समाःशत्रौचमित्रेचनृपतेःस्युःसभासदइति । पुङ्गवाइवेतिस्मृतिचन्द्रिकायांपाठः । मदनरत्नेतुसद्गवा
इतिपठित्वासद्गवाउत्तमवृषभाइतिव्याख्यानम् । कल्पतरावपिसद्गवाइतिएवपाठः । सब्राह्मणापुरोहितःसभ्यइतिपूर्वोदा

Digitized by Google

हृतकात्यायनवचने ब्राह्मणानां सभ्यानां च भेददर्शनान्नियुक्तानियुक्तविशेषयोगो वं वीवर्हेन्यायेन सभ्यानां ब्राह्मणानामुपाक

सहायत्वं व्यवहारदर्शनेऽवगन्तव्यम्। याज्ञवल्क्यस्यापि। व्यवहारान्नृपः पश्येद्विद्वद्भिर्ब्राह्मणैः सह। श्रुताध्ययनसम्पन्ना

त्यादिवदतो भेद एवाभिप्रेतः। न च श्रुताध्ययनसम्पन्ना इत्यादिवदतो भेद एवाभिप्रेतः। ... श्रुताध्ययनसम्पन्नाः इत्यादिपू

वाक्यविहितब्राह्मणानुवादेन विशेषणविधानमात्रमिति युक्तम्। तृतीयाप्रथमानिर्दिष्टानां विशेषणा ... ।

तात्पर्यगत्या विशेषणविधिर्न्नशब्दरीत्येति चेत्। न विद्वद्भिरित्यनेन श्रुताध्ययनादेः पुनरुक्तत्वप्रसंगात्। कात्यायनवचनेऽपि च

। भेदकन्तु नियुक्तानां राज्ञोऽन्यथाकरणे निवारणमावश्यकम्। अन्यथा येनापि तं यान्तमिति पूर्वोदाहृतकात्यायनवचनेनानि

वारणे दोषप्रतिपादनात्। अनियुक्तानां च वचनान्यथावचनयोरेव दोषो न तु राज्ञो निवारणे। अनियुक्तो नियुक्तो वा धर्मज्ञो

वक्तुमर्हति। दैवीं वाचं स वदति यः शास्त्रमुपजीवतीति वसिष्ठोक्तेः॥ सभां वा न प्रवेष्टव्यं वक्तव्यं वा समञ्जसम्। अब्रुवन्विब्रु

वन्वापि नरो भवति किल्बिषीति मनूक्तेश्च। नियुक्तेषु सभावानप्रवेष्टव्येत्यसङ्गतेः। नियोगस्वीकारे सभाप्रवेशस्यावश्यकत्वा

दनियुक्तविषयमेवैतन्मन्वनुवचनम्। यत्तु नारदेनोक्तम्। नानियुक्तेन वक्तव्यं व्यवहारेषु किञ्चन। नियुक्तेन तु वक्तव्यमप

क्षपतितं वचइति। तच्चानङ्गीकृतसभाप्रवेशाय दृष्ट्या कार्यं निरभाषाद्याय आगतस्यादृष्टानियुक्तविषयं वोध्यमन्यथा म

न्वादिवचनविरोधात्। शान्तिकपौष्टिकाद्यर्थमिव व्यवहारदर्शनार्थेपुरोहितोऽपि राज्ञाधिकर्त्तव्य इत्याह व्यासः। राजा पुरो

हितं कुर्यात् दुदोर्ग्रं ब्राह्मणं हितम्। श्रुताध्ययनसम्पन्नमनुग्रं सत्यवादिनमिति। उदीर्णमुग्रं क्रूरं हितमित्यनेन सभ्यापेक्षया

प्यस्योच्छृङ्खलप्रवृत्तिकराजानिवारणेऽधिको दोषस्तेन प्रख्यापितन्निवारणमनेनावश्यं कार्यमिति सूचितम्। अत एव व

सिष्ठेन। राजापेक्षयापि दण्डव्यत्ययेन तस्य प्रायश्चित्तमधिकमभिहितम्। दण्ड्योत्सर्गे राजैकरात्रमुपवसेत्त्रिरात्रम्पुरोहितः।

कृच्छ्रमदण्ड्यदण्डने पुरोहितस्त्रिरात्रं राजेति। पुरोहितमिति चैकत्वं विवक्षितं पुगञ्छिनत्ति भार्यामुद्वहेदित्यादिवदुपादेयग

नवान् । अथ सभ्यानां बलाबलम् । याज्ञवल्क्यः । नृपेणाधिकृताः पूगाः श्रेणयोऽथ कुलानि च । पूर्वं पूर्वं गुरु ज्ञेयं व्यवहार
विधौ नृणामिति । नृपेण सभ्याधिकृता व्यवहारदर्शने नियुक्ताः । पूगाः समूहाः । भिन्नजातीनां भिन्नवृत्तीनामेकस्थान
वासिनां ग्रामनगरादिस्थानाम् । श्रेणयो नानाजातीनामेकजातीयकर्मोपजीविनां संघाताः । हेडावुकतांबूलिककुविन्दचर्म
कारादीनाम् । कुलानि ज्ञातिसम्बन्धिबन्धूनां समुदायाः । एतेषां यत्पूर्वं पूर्वं पाठक्रमेण प्रथमावगतं तत्तद्गुरु बलवद्ज्ञेयं व्य
वहारिणां व्यवहारविधौ व्यवहारनिर्णयकार्ये । उत्तरोत्तरनिर्णीतो व्यवहारः कुदृष्टबुद्ध्यार्थिप्रत्यर्थिनोरन्यतरस्यापरितो
ये नृपाधिकृतपर्यन्तम्प्रवर्तते । न तु पूर्वकृत उत्तरोत्तरनिकर इत्यर्थः । नारदेन पुनर्नृपाधिकृतनिर्णीतोऽप्यसविधेयपरा
वर्तत इत्युक्तम् । कुलानि श्रेणयश्चैव गणाश्चाधिकृतो नृपः । प्रतिष्ठा व्यवहाराणां पूर्वेषामुत्तरोत्तरमिति । अत्र नृपपदं प्राड्वि
वाकोपलक्षणं नृपाधिकृतापेक्षया तस्याधिकत्वात् । तथा च नृपाधिकृतः प्राड्विवाकः सविधेतत्कृतव्यवहारश्च नृपसविधे पुनरावर्तत इ
त्यर्थः । न च नृपगमने सोत्तरसभ्येन सज्ञापूर्वं बहुसभ्या व्यवहारे निर्णीयमाने यदि कुदृष्टवादी पराजितस्तदा हि पुनर्व
सोढव्यः । यदि जयति तदापूर्वं सभ्यादण्ड्या यथाशास्त्रं नाचक्षते । ननु पूगादीनां व्यवहारदृष्टृत्वमेवासम्भावि । कुतस्तेषां
बलाबलम् । तथा हि राजनियोगेन वा व्यवहारदृष्टृत्वं तेषां स्वतन्त्र्येण वा । नाद्यः सहायत्वेन प्रतिनिधित्वेन प्राड्विवाकस्य पुरो
हितामात्यसभ्यानां च सहायत्वेनैव नियोगविधानात् । न द्वितीयः प्रजापालनाधिकृतानामेव व्यवहारदर्शनाधिकारे तदना
न्येषां स्वातन्त्र्यासम्भवात् । अथ पूर्वोपन्यस्तैर्वणिक्शिल्पिप्रभृतिभिर्व्यासबृहस्पत्यादिवचनैः पूगादीनां व्यवहारदृष्टृ
त्वेन नियोगावगमात् वणिगादिव्यवहारदृष्टृत्वं पूगादीनां राजनियोगेनैवेति मन्तव्यम् । तथा सति राजप्राड्विवाकभिन्नानां
तन्नैरपेक्ष्येण दृष्टृत्वाभावात् सर्वव्यवहारदृष्टृत्वं प्राधान्येन व्यपदेशाभावं नीतिन्यायेन तयोरेवेति कुलादिदृष्टो व्यवहारः
पौनःपुन्येन पपन्नं दृष्टृत्वाभावात् । अदृष्टयमनेन अर्थे दीनानि निषेधात्पूगादीनां च प्राधान्यादृष्टत्वं प्रतिनिधित्वेन प्राड्वि

निश्चितयापि केवलानां तद्दृष्टत्वाभावादिति । अत्रोच्यते । मास्तु तेषां व्यवहारदर्शने कैवल्यं तथापि वणिगादिव्यवहारे तेषाम
भियोगाद्राजादीनामपि तत्तत्प्रत्ययेन निर्णायकत्वात्तत्कृतप्राधान्यमादाय तत्कृतत्वव्यपदेशसम्भवात् दृष्टबुध्या पूर्ववृत्तपुन
र्व्यवहारप्रवर्त्तनाय बलाबलं तेषामनेन वचनेनोच्यते ऽन्यथास्य वचनस्य निर्विषयतापत्तेत । वस्तु तत्तु । अदूषयत्तत [illegible]
ष्यनेन प्रतिषिद्ध प्राप्तनिधिभावानामपि पूगादीनां पूगादिव्यवहारे प्रतिप्रसवः । प्रतिनिषेधभावस्य व्यासादिवचनैरभियोगावि
शेषा न क्रियत इति । प्राड्विवाकवत्कैवल्यमपि वक्तुं शक्यत इति न किंचिदनुपपन्नम् । बृहस्पतिस्त्वमुमेवार्थं स्फुटयति । तथाचा
ह । राज्ञा ये विदिताः सम्यक् कुलश्रेणिगणादयः । साहसन्यायवर्ज्यानि कुर्युः कार्य्याणि ते नृणाम् ॥ कुलश्रेणिगणाध्यक्षाः प्रो
क्ता निर्णयकारिणः । येषामग्रे निश्चितस्य प्रतिष्ठानूत्तरे नराः ॥ विचार्य्य श्रेणिभिः कार्यं कुलैर्यन्न विचारितम् । गणैश्च श्रेण्यविख्या
तं गणाज्ञानं नियुक्तकैः ॥ कुलादिभ्योऽधिकाः सभ्यास्तेभ्योऽध्यक्षोऽधिकः कृतः । सर्वेषामधिको राजा धर्म्यं यत्तेन निश्चितम् ॥
उत्तमाधममध्यानां विवादानां विचारणात् । उपर्युपरि बुद्धीनां चरन्तीश्वरबुद्धय इति ॥ कुलादिपदार्था व्याख्याताः । गणश्च
ह: पूगपर्य्यायः । आदिपदेन सभ्यादिग्रहणम् । नियुक्तकाः सभ्याः । साहसाख्यं व्यवहारपदम् । युक्तिश्चात्रेयम् । कुलादी
नां ज्ञात्यादिरूपाणां दाक्षिण्यादिनान्यथादर्शनमपि सम्भाव्यत इति कुदृष्टचोद्भावकवचनेन राजादीनामसंवः श्रेणीनामुदासी
नतया ततो बलवत्ता । पूगानां त्वेकस्थानवासमात्रसम्बन्धेपि भिन्नजातितया भिन्नवृत्तितया च ततोपि मिथोनपेक्षत्वादौदास्याद्ब
लवत्वम् । नृपाधिकृतानां तु ततोपि निःसम्बन्धतया राज्ञा परीक्ष्याधिकृतानां राजभयादपि पक्षपातदाक्षिण्याद्यसम्भव इति
पूगेभ्यो बलवत्त्वम्प्राड्विवाकस्य पुरोहितामात्यानां चसुतरां प्रागुक्तहेतुद्वयादाधिक्यम् । नृपस्य साक्षादेव नृपाणां प्रजापालना
धिकाराद्विपक्षपातकीभूतदोषाधिक्यादन्यायं कुरुते यदि पतिः कस्तं निरोद्धुं क्षम इति न्याये प्रजाप्रक्षोभादिदृष्टस्पष्टदोषभया
दवश्यमपक्षपातता सम्भवतीति सर्वेतो बलवत्तरत्वम् । बुद्धितारतम्यमपि बृहस्पतिवचने स्पष्टमिति ॥ ❁ ॥ अथ केषांचित्त

Digitized by Google

अथ भिन्नानामपि सभावस्थानं निरूप्यते ॥ कात्यायनः ॥ कुलशीलवयोवृत्तैर्वित्तवद्भिरमत्सरैः । वणिग्भिः स्यात्कतिपयैः कुलभू
तैरधिष्ठितम् । अधिष्ठितं सद इति प्रक्रमात् । कुलभूतैर्वृद्धैरित्यर्थः । तेषामुपयोगश्चोक्तस्तेनैव । श्रोतारो वणिजस्तत्र कर्त
व्या दर्शिन इति । गणकलेखकयोश्चापराजितोक्तराजपुरुषाणामपि सभावस्थानमाह । कार्यकथनमुखेन बृहस्पतिः । नृपोऽधि
कृतसभ्याश्च स्मृतिर्गणकलेखकौ । हेमाग्न्यम्बुस्वपुरुषाः साधनाङ्गानि वै दश । एतद्दशाङ्गकरणं यस्यामध्यास्य पार्थिवः । न्या
यान्पश्येत्कृतमतिः सा सभाध्वरसंमिता । दशानामपि चैतेषां कर्म प्रोक्तं पृथक्पृथक् । वक्ताध्यक्षो नृपः शास्ता सभ्याः कार्यपरी
क्षकाः ॥ स्मृतिर्विनिर्णयं ब्रूते जयदानं दमं तथा । शपथार्थे हिरण्याग्नी अम्बु तृषितक्षुब्धयोः । गणको गणयेदर्थं लिखेन्न्यायं च
लेखकः । प्रत्यर्थिसभ्यानयनं साक्षिणां च स्वपूरुषः । कुर्यादधमर्णौ रक्षेदर्थिप्रत्यर्थिनौ सदा । एषां मूर्धा नृपोऽङ्गानां मुखं
चाधिकृतः स्मृतः । बाहू सभ्याः स्मृतिर्हस्तौ जङ्घे गणकलेखकौ । हेमाग्न्यम्बु दृशौ हृत्पादौ स्वपुरुषस्तथेति । अधिकृता
श्च प्राड्विवाकोऽभिधीयते । एतादृशाकं सभारूपं शरीरं दशाङ्गमित्यर्थः । यस्यां सभायां शरीरं तु न्यायान्पार्थिवः पश्येदि
त्यध्याहारः । अनेन क्षेत्रज्ञः शरीरमिव सांगोपाङ्गं सभां राजाधिष्ठाय अन्तर्यामिवत्सर्वं चरितानि पश्येत्तदनुरूपं फलं
भोक्तादाता च भवतीति सूचितम् । स पुरुषलक्षणं बृहस्पतिरेवाह । आकारयेत्प्रत्यर्थिसाक्षिणोऽर्थिप्रतिवादिनाम् । सभ्याधी
नः सत्यवादी कर्तव्यस्तु स्वपूरुषः । अयं च साध्यपालनामा शूद्र एव । तथा च व्यासः । साध्यपालकस्तु कर्तव्यो ब्राह्मणो बा
धकः । कमायातो दृढः शूद्रः सभ्यानां च मते स्थित इति । गणकलेखकौ चेदृग्गुणयुतौ कर्तव्याविति बृहस्पतिरेव । शब्दाभिधानत
त्त्वज्ञौ गणनाकुशलौ शुचौ । नानालिपिज्ञौ कर्तव्यौ राज्ञा गणकलेखकौ । व्यासोऽपि । त्रिस्कन्धज्योतिषाभिज्ञं स्फुटं प्रत्ययकारकम्
। श्रुताध्ययनसम्पन्नं गणकं कारयेन्नृपः । स्फुटवेश्मयुक्तो नयज्ञः लाक्षणिकं शुचिम् । स्फुटाक्षरं जितक्रोधं सुवर्णं सत्यवादि
नं । त्रिस्कन्धज्ञो सर्गज्ञ संहितार्थाविभेदयुक्तं यज्ञो । निःश्वासं तद्विदिनम् । श्रुताध्ययनसम्पन्नमिति युक्तोऽर्गलकोद्भिज्ञाति गणका

ह चर्च्यां लेखको पि द्विजातिरस्माह चर्च्यां लेखको पि नृपः शास्त्रेतियदुक्तन्तद्धि दण्डवधदण्डयोराज्ञः कर्तृत्वनियमार्थं । वाग्दण्डधिग्दण्डयोस्तु दमन
। वाग्दण्डधिग्दण्डाविप्रायत्तौ तु नौ
वाग्दण्डधिग्दण्डौ तु प्राड्विवाकेनापि कार्यौ । दण्डप्राप्तधनेवध्यवधे च राज्ञ एवाधिकारात् । वाग्दण्डस्तु चवाग्दण्डाविप्रायत्तौ तु नौ
मात्रार्थत्वाद नियमः । नचा च वाद निर्णयहद्रा आत्राह्मण सच ऋग्भिधायेतनने नेवधिग्दण्ड निर्णयप्रमाणं च रसतापरमितत्वम् । पूर्वेवच
स्मृतौ । अर्थद दण्डवधावुक्तौ राजायत्तावुभावपीतिप्रतिष्ठितापतिष्ठितसभासत्वेतु सभ्यो
तान् कचिदपि दण्डेनेवामनधिकारात् । सर्वैरसङ्गकः सभास्तारोपिव्यासेनोक्तः । अर्थिप्रत्यर्थिनौ सभ्या लेखकः प्रेक्षकाश्च यः ।
धर्मवाक्येरञ्जयति सभास्तार यितामिथ्यात् ॥ अयञ्च चातुर्वर्ण्येयः कश्चिद्विशेषानभिधानात् । स्मृतिचन्द्रिकाकारमतेतु शूद्रंयात्
नवर्जयेदिति । यत्तस्य हगद्दोषातिशयकीर्तनाय चैवर्णिक एव ॥ ० ॥ अथादेयानादेयाख्यव्यवहारविवेकः । याज्ञवल्क्यः ॥
मत्तोन्मत्तार्त्तव्यसनिबालभीतादि योजितः । असम्बद्धकृतश्चैव व्यवहारोनसिध्यति ॥ मत्तोमदनीयद्रव्येणकन्मादेनचापितत्रो
ष्मसन्निपातनयद्द सम्भवेनोपहृष्टवृन्मत्तः । आर्तोव्याधिविकलः । व्यसनमिष्टवियोगानिष्टसम्बन्धजनितं दुःखतद्वान्व्यसनी
। बालोऽप्राप्तव्यवहारः । भीतोभयाकुलः । आदिग्रहणशस्त्रिनविक्षेपकारणानामन्येषामप्युपसंग्रहार्थम् । एतैर्योजितःकृतो
निर्णीतइतियावत् । एतैःसहयोजितइतिवा । एतेषामर्थिप्रत्यर्थिभावमापन्नाइत्यर्थः । तथासम्बन्धकृतोपि । अर्थिप्रत्य
र्थिसम्बन्धरहितैस्तदीयचेष्टितानभिज्ञैःकृतोनिर्णीतस्तैःसहकृतोवाव्यवहारोनसिध्यतिकृतोपिनिवर्त्तते । प्रवृत्तस्तनादृशैःस
ह निर्णयत्वेनतेनोपादेयइत्यर्थः । नचासम्बद्धत्वमुदासीनत्वंसभ्यानांगुण एव । अनुदासीनेषूपाधिसम्भवात् । अतएवरि
पौमित्रेचयेसमाइत्युक्तमितिवाच्यम् । असम्बद्धपदस्यदेशादिसम्बन्धराहित्यपरत्वात् । व्यवहारनिर्वाहसयदेशाचारस्यानु
रोधित्वात् । तथाचतदानभिज्ञनिर्णीतस्तदनभिज्ञार्थप्रत्यर्थिकोवेत्यर्थः । पर्यवसानितिहितोयथास्थानेतुसम्बन्धाभावनिश्चये
संशयाभावेनतादृशव्यवहारस्यानुपादेयत्वौचित्यात् । पुरस्सुविरहस्वयञ्चसहायविवर्जितः । अनादेयोभवेद्वादोधर्मविद्भि

रुदाहृतद्व्यस्याप्ययमर्थः। पुरराष्ट्रविरुद्धोयत्त्वनगरेराष्ट्रेचयाव्यवस्थापुरुषनीतद्विरोधापादकोव्यवहारोनादेयः। पौर
जानपदक्षोभापादकत्वात्। केनचिन्निमित्तेनप्राचीनोपिराज्ञास्वराष्ट्रेप्रतिषिद्धःसोपिराज्ञास्वराष्ट्रेप्रतिषिद्धःसोपिराज्ञाज्ञाभं
गप्रसङ्गान्नाङ्गीकर्त्तव्यइति। यत्तुस्मरन्ति। गुरोःशिष्येपितुःपुत्रेदम्पत्योःस्वामिभृत्ययोः। विरोधेतुमिथस्तेषांव्यवहारोनसिध्य
तीति। ननुगुरुशिष्यादीनामन्योन्यमात्यंतिकव्यवहारानुपादानपरत्वंभवति। तेषामपिधनिकाधमर्णत्वादिनाव्यवहारनि
वृत्तेरप्रत्यूहत्वात्। नचगुरुत्वशिष्यत्वपितृपुत्रत्वादिप्रयुक्तव्यवहारानादेयतापरमिदमितिवाच्यम्। तादृशस्याप्यनादेय
त्वेनिर्णयाभावप्रसङ्गेनयुक्तिविरोधात्। नचाप्रसक्त्यानुवादमात्रमनादेयत्वाभिधानमितियुक्तम्। प्रसक्तेसत्त्वात्तथाहि।
भार्य्यापुत्रश्चशिष्यश्चशिष्येभ्रातासहोदरः। प्राप्तापराधास्ताड्यास्युरज्वावेणुदलेनवा॥ पृष्ठतस्तुशरीरस्यनोत्तमाङ्गेक
थञ्चन। अतोन्यथानुप्रहरन्प्राप्तस्याचौरकिल्बिषम्। शिष्यशिष्टिरवधेनाशक्तौवेणुविदलाभ्यांतदनुभ्यामन्येनघ्नन्राज्ञाशा
स्यइत्यादिभिर्मनुगौतमादिवचनैःशिष्यस्यशासनप्रकारविशेषनियतमादानादिक्रमेणगुरुर्य्यदिमहतादण्डेनोत्तमाङ्गेशि
ष्यंकोपावेशवशात्ताडयतितदास्मृत्याचारव्यपेतमार्गेणगुरुणाधर्षितः। शिष्योवैयात्याद्धर्माधिकरणम्प्रविशतिचेत्तद्दण्डपा
रुष्यरूपंव्यवहारपदत्वंभवतीतिवक्तुमनर्हम्। तथादायभागप्रकरणेवक्ष्यमाणभूर्य्यापितामहोपात्तेत्यादिवचनात्पिताम
होपार्जितभूम्यादौपितापुत्रयोःस्वाम्यसाम्येयदिपितामहेविषमविभागादिचिकीर्षति। तदापितापुत्रयोर्दायभागाख्यविवा
दपदमादायव्यवहारःप्रसज्यमानोनापह्नोतुंशक्यःतथाः। दुर्भिक्षेधर्म्मकार्य्येचव्याधौसम्प्रतिरोधके। गृहीतंस्त्रीधनंभर्त्तानाका
कामोदातुमर्हतीतिवचनात्। दुर्भिक्षादिनिमित्तंविनैवयदिस्त्रीधनम्भर्त्तागृहीत्वाव्ययीकरोति। तयाचयाच्यमानोविद्यमान
धनोपिशापात्तप्रत्यर्पयति। तदस्त्रीदानपदमादायजायापत्योरपिव्यवहारप्रवृत्तिःकेननिरोद्धुंशक्याएवंस्त्रीपुन्धर्म्माख्यवि
वादपदोपादानेनतुतयोरेवव्यवहारआवश्यकः। तस्मात्तन्यविषयत्वात्दृष्टादृष्टव्यवहारपदान्तर्गणनामन्वादिस्मृतिषु

मृत्युप्रलपितमेवस्यात् । स्वामीभृत्ययोस्तुव्यवहारो वेतनादाननिरूपणे वक्ष्यते । गर्भदासादीनधिकृत्य च । यच्चैवं स्वामिनं
कश्चिन्मोचयेत्प्राणसंशयात् । दासत्वात्स विमुच्येत पुत्रभागं लभेत चेति ॥ नारदोक्तस्तादृशानानैषान्दास्यादमोचनेपुत्रभा
गादाने च स्वामिना सह विवादो दुर्वारः । तस्मादिदं वचनं गुर्वादिभिः सह शिष्यादीनां व्यवहारकरणे लोकद्वयेन स्येपद्ह
निन्दावहत्वादमुत्र नरकजनकत्वादित्येतत्परमेव । रागादिभिस्तु नायमुचितो व्यवहारो लोकद्वयहानिकरत्वादिति निषार्थे
मायाश्चपि शिष्यादयो न परितुष्यन्ति चेत्तदा नेषां यथाशास्त्रन्निर्णयकरणमदोष एव । गुर्वादिभिः सह व्यवहारः शिष्यादी
नामनादेयोऽसङ्गेष्वभिधानात्पुत्रादुन्निवारणपरं दृष्टादृष्टदोषइतिध्येयम् । गुरुशिष्यौ पितापुत्रौ दम्पती स्वामिभृत्यकौ । ए
तेषां समवेतानां व्यवहारो न विद्यते ॥ इति मदनरत्नधृतबृहस्पतिवचनमप्येतदभिप्रायकमेव । मदनरत्नकल्पतरुरत्नाक
रेषु तु राज्ञा यथाकथञ्चिदर्थमाकलय्य विवादोपशमं कुर्यान्न तु प्रतितरलेखकपूर्वकं विचारं कुर्य्यादिति व्याख्यानन्तदसत् । कथं
चिदर्थानाकालने च तु स्याद्व्यवहाराप्रवर्तनस्यावश्यकत्वात् । पूर्वप्रदर्शिततात्पर्यवर्णनमन्तरागत्यभावात् । एकस्य बहुभिः सा
र्धं स्त्रीणां प्रेष्यजनस्य च । अनादेयो भवेद्वादो धर्मविद्भिरुदाहृतः । इतिनारदवचनम् । तस्यापि भिन्नार्थैरनेकैरेकस्य युग
पद्व्यवहारोऽनादेय इत्यर्थः । गवाद्रव्यं हरेद्यस्तु सर्वविदं संघयेत्त्रयः । एकघ्नतां बहूनाञ्चेत्यादिस्मरणाद्व्यवहारिणएकस्य
बहुभिस्ताडितस्य वा गणेनताडयितृभिश्च सहैकार्थे युगपदपि व्यवहारस्य युक्तत्वात् । भिन्नार्थैरपिक्रमेणापि व्यवहारादर्शनेन
तत्तदर्थानिर्णयप्रसंगात् । प्रतिज्ञादोषा अपि वक्ष्यमाणास्तादृग्व्यवहारमादेयत्व एव पर्यवस्यन्ति ॥ ● ॥ अथ सदृष्टकसभाप
तेः कार्य्यं निरूप्यते । तत्रावेदयितुः प्रश्नप्रकारमाह । कात्यायनः । काले कार्य्यार्थिनम्पृच्छेत्प्रणतम्पुरतःस्थितम् । किंका
र्यं का च ते पीडा माभैषीर्ब्रूहि मानव ॥ केन कस्मिन् कदा कस्मात्पृच्छेदेवं सभागतम् । एवं पृष्टः कार्ययथावेदयेत्तम्प्रकारमाह
। याज्ञवल्क्यः । स्मृत्याचारव्यपेतेन मार्गेणाधर्षितः परैः । आवेदयति चेद्राज्ञे व्यवहारपदं हि तदिति ॥ चेदित्यनेन यदि केन

चिह्निमित्तेनसमावेदयेयुर्न्नहिंनबलाद्वादयेदित्युक्तम्। तथाचमनुः। नोत्पादयेत्स्वयङ्कार्य्यंराजानाप्यस्यपूरुषङ्क्वचित्। पिता
महोपि। ननुपश्येत्समुत्प्रेक्ष्यस्वयंवापुरुषेणवेति। नारदोपि। ननुराजावशित्वेनधनलोभेनवापुनः। स्वत्पादयेत्कार्य्याणि
नराणामविवादिनाम्॥ तयोत्पन्नमपिकार्य्यंकार्यिणानन्तरमभिमानादनिवेदितङ्कयञ्चिद्वगम्यापिनराजादिभिर्बलाद्वाद
नीयमित्यप्याहमनुः। नचप्रापितमन्येनग्रसेदर्थङ्कथञ्चनेति। अन्येनासम्बद्धेनकथञ्चनरागलोभादिना। अर्थङ्कार्य्यंच
सेत्स्ववशंकुर्य्यात्। अतएवपितामहः। नरागेणनलोभेननक्रोधेनग्रसेन्नृपः। परैरप्रापितानर्थान्नचापिस्वमनीषयेति। परैः
कार्य्यितन्नसम्बद्धैःकार्य्येसम्बन्धाःपुत्रभ्रात्रादयः। योनभ्राताचपितानपुत्रोननियोगकृत्। परार्थवादीदण्ड्यःस्याद्व्यवहारेषु
विब्रुवन्॥ इतिनारदवचनात्। अर्थिनासंनियुक्तोवाप्रत्यर्थिप्रहितोपिवा। योयस्यार्थेविवदतेतयोर्जयपराजयौ। इतिका
त्यायनवचनाच्च। पितामहोमुमर्थंस्पष्टमाह। पितामातासुहृद्बापिबन्धुःसम्बन्धिनोपिवा। यदिकुर्य्युरुपस्थानंवादन्तत्रप्रव
र्त्तयेदिति॥ यःकश्चित्कारयेत्किञ्चिन्नियोगाद्येनकेनचित्। तन्तेनैवकृतंज्ञेयमनिवर्त्त्यंहितत्स्मृतमिति॥ अनिवेदितामंहा
नापवादमाहसएव। छलानिचापराधांश्चपदानिन्नृपतेस्तथा। स्वयमेतानिगृह्णीयान्नृपस्त्वावेदकैर्विनेति। छलान्याहसए
व। पथिभङ्गीपराक्षेपीप्राकारोपरिलङ्घकः। निपानस्यविनाशीचतथाचायतनस्यच। परिखापूरकश्चैवराजच्छिद्रप्रकाशकः
। अन्तःपुरंवासगृहंभाण्डागारंमहानसम्। प्रविशत्यनियुक्तोयोभोजनञ्चनिरीक्षते। विण्मूत्रश्लेष्मवातानांक्षेप्ताकामान्नृपा
ग्रतः। पर्य्यङ्कासनबन्धीचाप्यग्रस्थाननिरोधकः। राज्ञोतिरिक्तवेषश्चविधृतःप्रविशेत्तुयः। यश्चापद्वारेणविशेद्वेलायामा
येवच। शय्यासनेपादुकेचशयनासनरोहकः। राजन्यासन्नशयनेयस्तिष्ठतिसमीपतः। राज्ञोविद्विष्टसेवीचाप्यदत्तविहिता
सनः। वस्त्राभरणयोश्चैवसुवर्णपरिधायकः। स्वयंग्राहेणताम्बूलंगृहीत्वाभक्षयेत्तुयः। अनियुक्तःप्रभाषीचन्नृपाक्रोशकएव
एवच। एकवासास्तथाभ्यक्तोमुक्तकेशोवगुण्ठितः। विचित्रिताङ्गःस्रग्वीचपरीधानविधूनकः। शिरःप्रच्छादकश्चैवच्छिद्रान्वे

यस्मात्परः । आसङ्गी मुक्तकेशश्च घातककर्ता छिद्रदर्शकः । दन्तोल्लेखनकश्चैव कर्मनाशा विशोधकः । कलान्येतानि यच्चा
शुद्धब्भित्त्वतः परसन्निधावपि ते । राज्ञः शय्यायां शयनं तदीयासने पवेशनं तत्पादुकारोहणमिति त्रीण्यकृत्यानि । वस्त्राभर
णायोश्चैवेत्यत्रापि स्वयं ग्राहे ण परिधायकः इति योज्यम् । परिधायपदं समासान्तर्गतमपि बुद्ध्या निष्कर्षोऽयम् ।। समाप्तम्
न्द्रिकाकारस्तु वस्त्राभरणयोश्चेत्यत्र चाहृतयाहकः इति शेषमाह । तच्चेयम् । पूर्वव्याख्याने नोपपन्नो शेषयाध्याहारस्यायुक्तम् ।
मुक्तकेश इति द्विःपाठो संयतकेशमुण्डितकेशयोः समावेशार्थः । अपराधानाह नारदः । आज्ञालङ्घनकर्तारः स्त्रीवधो वर्ण
संकरः । परस्त्रीगमनं चौर्य्यं गर्भश्चैव पतिं विना ॥ वाक्पारुष्यमवाच्यं च दण्डपारुष्यमेव च । गर्भस्य पातनं चैवेत्यपराधा
दशैव हि ते । पदान्याह पितामहः । उच्छ्रीसस्य घाती चाप्यग्निदश्च तथैव तु । विध्वंसकः कुमार्य्याश्च निधानस्योपभोज
कः । सेतुकराटकभेत्ता च क्षेत्रसञ्चरकस्तथा । अग्नयश्चोदकश्चैव गरदश्च तथैव च । राज्ञोद्रोहप्रवर्त्ता च तन्मुद्राभेदकस्त
था । तन्मन्त्रस्य प्रभेत्ता च बद्धस्य च विमोचकः । भोगदण्डौ च गृह्णाति दानं विक्रयमेव च । पटहाघोषणाच्छादी द्रव्यमस्वामि
कञ्चयत् । राजावलीढद्रव्यञ्च यच्चैवाङ्गविनाशनम् । द्वाविंशतिपदान्याहुर्नृपज्ञेयानि पण्डिताः इति ॥ एतानि कलान्य
पराधान्पदानि च राज्ञा नावेदितान्यपि । स्वयङ्कथं चिज्ज्ञात्वा विचारयेत् । यदा तु स्वयं ज्ञातुमशक्यः सदा स्तोभकसूचकाभ्या
राज्ञा ज्ञात्वा विचारयेत् । स्तोभकसूचकस्वरूपमुक्तं कात्यायनेन । शास्त्रेण निन्दितं त्वर्थं मुख्ये राज्ञा प्रचोदितः । आवेदयति
यत्पूर्वं स्तोभकः स उदाहृतः । नृपेण विनियुक्तो यः परदोषानवेक्षते । नृपस्य सूचयेज्ज्ञात्वा सूचकः स उदाहृत इति ।
शास्त्रेण निन्दितं स्वकलादिकम् । अर्थी मुख्यः प्रयोजकं यस्य धनं च प्रयोजनकः इति यावत् । राजनियोगानपेक्ष एव यः परा
पराधं राज्ञे निवेदयति । स स्तोभको यस्तु नियोगेन विवेदयति स सूचक इत्यनयोर्भेदः आवेदकेन चैवंविधेन नाप्रेदनं का
र्यमित्याहोशना । सशस्त्रेनु नरो यस्तु मुक्तकेशः ससूत्रमनः । वाहनस्थो यथा स ग्वो वदन्दण्डमवाप्नुयादिति । मुक्तक

च्छइतिमाधवीयपाठः । विनीतवेषोवदेदितितात्पर्य्यम् । तदावेदकवचनंलेखकःफलकादिषुराजाज्ञयालिखेदित्याह
नारदः । रागादिनायदेकेनकोपितःकरणेवदेत् । तदोमितिलिखेत्सर्वंलेखकःफलकादिष्विति । करणेधर्माधिकरणे ।
ओमित्यनेनयथावेदितन्तथैवलिखेदित्युक्तम् । लिखनानन्तरकृत्यमाह । कात्यायनः । एवम्पृष्टःसयद्ब्रूयात्तत्सभ्यैर्ब्रा
ह्मणैःसह । विचार्यकार्य्यंन्याय्यञ्चेदाह्वानार्थमतःपरम् । मुद्रांवानिक्षिपेत्तस्मिन्पुरुषंवासमादिशेदिति । न्याय्यंन्याया
दनपेतंमयाजन्मान्तरेस्मैदत्तमृणंयत्तन्नप्रत्यर्पयतीतिइत्यादिवद्व्यवहारयोग्यंयत्तद्भवतीत्यर्थः । तस्मिन्नावेदकेपुरुषंसाध्यपा
ल्लनामानम् । आह्वानार्थमभियुक्तस्येत्यर्थात् । तथाचबृहस्पतिः । यस्याभियोगंकुरुतेतत्त्वेनाशङ्कयाथवा । तमेवाह्वानये
द्राजामुद्रयापुरुषेणवा ॥ उत्तरदानेतस्यैवाधिकारादितिभावः । कात्यायनः । अधिकारोभियुक्तस्यनेतरस्यास्यसङ्गतेरि
ति । इतरस्याभियुक्ततदेकार्यभिन्नस्य । असंगतेरसम्बन्धात् । अभियुक्तानामपिकेषाञ्चिदनाह्वानमाह । सएव । अकल्य
बालस्थविरविषमस्थक्रियाकुलान् ॥ कार्य्यातिपातीव्यसनीनृपकार्य्योत्सवाकुलान् । मत्तोन्मत्तप्रमत्तार्त्तभृत्यान्नाह्वानयेन्नृपः
। अकल्पोव्याधितः । विषमस्थःसङ्कटापन्नः । क्रियाकुलोनित्यनैमित्तिककर्म्मकरणव्यग्रः । कार्य्यातिपाती । यस्यतदानीमा
गच्छतोगुरुतरकार्य्यहानिः । व्यसनी । इष्टवियोगादिजन्यशोकवान् । मत्तोमदनीयसेवनेनच्युतमतिः । उन्मत्तोग्रहा
द्याविष्टः । प्रमत्तस्तदानींसर्वत्रानवधानवान् । आर्त्तोविषादवान् । भृत्यग्रहणमस्वतन्त्रोपलक्षणम् । अतएवनहीनपक्षां
युवतिङ्कुलेजातांप्रसूतिकाम् । सर्ववर्णोत्तमाङ्कन्यान्नताज्ञातिप्रभुकाःस्मृता । इत्यत्रास्वतन्त्रस्त्रीणामाह्वानम्प्रतिषिद्धम्स्वत
न्त्राणान्तासामाह्वानमाह । सएव । तदधीनकुटुम्बिन्यःस्वैरिण्योगणिकाश्चयाः । निष्कुलायाश्चपतितास्तासामाह्वानमि
ष्यतइति । नारदः । निर्वेष्टुकामोरोगार्त्तोयियक्षुर्व्यसनेस्थितः । अभियुक्तस्तथान्येनराजकार्य्योद्यतस्तथा । गवांप्रचारे
गोपालाःसस्यावापेकृषीवलाः । शिल्पिनश्चापितत्कालंआयुधीयाश्चविग्रहे । अप्राप्तव्यवहारश्चदूतोदानोन्मुखोव्रतीविष

मस्याह्वानासाध्यान चैतानाह्वयेन्नृप इति । निर्वेष्टुकामो विवाहेऽतून्मुखः । एते च कार्यान्तराह्वाने न याः यदानुतत्काला
ह्वानमावश्यकं तदा पुत्रादि यत्प्रतिनिधयः । इदमाह बृहस्पतिः । अप्रगल्भजडोन्मत्तवृद्धस्त्रीबालरोगिणाम् । पूर्वोत्तरं व
देद्बन्धुर्नियुक्तोऽथवा नरः । बन्धुः पुत्रादिस्तस्य परार्थवादित्वाभावात् । नियुक्तस्य तत्त्वादेव । प्रतिनिध्याह्वानेन यदि नति
वीरुहः कालातिपातासहत्वश्च यत्र च प्रतिनिधिकरणप्रतिषेधस्तत्र यथाकथञ्चित् कल्याद्याह्वानमाह स एव । कालदेशव
विज्ञाय कार्याणां च बलाबलम् । अकल्यादीनपि शनैर्यानैराह्वापयेन्नृपः । ज्ञात्वाभियोगं येऽपि स्युर्वने प्रव्रजितादयः । तानप्या
ह्वापयेद्राजा गुरुकार्येष्वकोपयन् । गुरुकार्येष्वाह्वापयेदिति सम्बन्धः । निमित्तस्य प्रमोचेयम् । गुरुकार्यं निमित्तमाह्वा
पयेदित्यर्थः । अकोपयन् सान्त्वयन् । प्रतिनिधिप्रतिषेधं च कात्यायनः । ब्रह्महत्यासुरापानस्तेयगुर्वङ्गनागमे । अ
न्येषु चातिपापेषु प्रतिवादी न दीयते ॥ मनुष्यमारणे स्तेये परदाराभिमर्शने । अभक्ष्यभक्षणे चैव कन्याहरणदूषणे ॥ पा
रुष्ये कूटकरणे नृपद्रोहे तथैव च । प्रतिवादी न दातव्यः कर्ता पि विवदेत्स्वयमिति ॥ पुनस्तेयग्रहणं सर्वपापाणां प्रतिनिधि
प्रतिषेधार्थमिति मदनरत्नाकरः । पूर्वं स्तेयग्रहणं ब्रह्महत्यादिसंदंशात्सुवर्णस्तेयपरमिति नुचयम् । प्रतिवादी वादिप्र
तिवादिनोः प्रतिनिधिरीदृशेषु गुरुकार्येषु न ग्राह्य इत्यर्थः । राजाह्वानमतिक्रामतो दण्डो बृहस्पतिनोक्तः । आहूतो यस्तु ना
गच्छेद्दर्पाद्बन्धुबलान्वितः । अभियोगानुरूपेण तस्य दण्डं प्रकल्पयेत् ॥ अभियोगभेदेन दण्डभेदस्तु कात्यायनेनोक्तः ।
आहूतस्त्ववमन्येत यः शक्तो राजशासनात् । तस्य कुर्यान्नृपो दण्डं विधिदृष्टेन कर्मणा ॥ हीनेकर्मणि पञ्चाशन्मध्यमे तु शताव
रः । गुरुकार्येषु दण्डः स्यान्नित्यं पञ्चशतावरः । गुरुकार्येषु नित्यं चाशक्त्या निविशेषणात् आपन्नानागमने दण्डो नास्तीति का
यितम् । व्यासेन तु स्पष्टमुक्तम् । पत्नीकलहे तदेशे दुर्भिक्षव्याधिपीडिते । कुर्वीत न पुनराह्वानं दण्डेन परिकल्पयेत् । आपन्ना
व्यमनागमनासम्भवहेतुभूतं विवक्षितम् । आवेदनाय जिगमिषुना कृत्वा वेदनेन वा कार्यान्तरवैयग्र्यादिना राजाह्वानविलं

वेशजशपथादिना प्रतिवादिनः प्रतिरोध आसेधापरपर्य्यायः कार्य्य इत्याह कात्यायनः । उत्पादयति यो हिंसां देयम्वा न प्र
यच्छति । याचमानाय दोःमौल्यादाकृष्योसौ नृपाज्ञया ॥ आवेद्यानुत्तरे कार्य्यमसन्दिग्धे प्रतिश्रुते । तदासेधं प्रयुञ्जीत या
वदाह्वानदर्शनमिति । प्रतिश्रुते विचार्य्यत्वेन निश्चिते प्रतिज्ञाते च । नारदोपि । वक्तव्येऽर्थे न तिष्ठन्तमुत्क्रामन्तञ्च तद्वचः ।
आसेधयेद्विवादार्थी यावदाह्वानदर्शनमिति । वक्तव्ये निर्णीतव्ये । आसेधस्य चातुर्विध्यमाह स एव । स्थानासेधः कालकृतः प्र
वासात्कर्मणस्तथा । चतुर्विधः स्यादासेधो नासिद्धस्तं विलङ्घयेत् ॥ स्थानासेधो यावन्निर्णयमस्मात् स्थानात् पदमपि न चलित
व्यमित्यादिरूपः । कालासेधः एतावन्तं कालं कार्य्यान्तरं न करणीयमनिर्णीय मुं व्यवहारमितीदृशः । निर्णयावधि विदेशग
मनमकार्य्यमित्येवंविधः प्रवासासेधः । देशकालावधिरहितो निर्णयमात्रावधिकः स्नानादिकर्मनिरोधः कर्मासेधः क्वचिदासे
धनिषेधस्तेनैवोक्तः । नदीसन्तारकान्तारदुर्द्देशोपप्लवादिषु । आसिद्धस्तं परासेधमुत्क्रामन्नापराध्नुयात् । आसिद्धस्याप
राधाभावमुखेन निषेध उक्तः । दुर्द्देश इति माधवीयपाठो दुर्द्देशात् दुरवस्थेति तत्त्वार्थः । अत एवासेधानर्हासेध एव प्रत्युत दण्ड उ
क्तः । कात्यायनेन । आसेधयंस्त्वनासेध्यं राज्ञा शास्य इति स्थितिरिति नारदोपि । यस्त्विन्द्रियनिरोधेन व्याहारोच्छ्वासनादि
भिः । आसेधयेदनासेधैः स दण्ड्यो न त्वतिक्रमन् । स एव । आसेधकाल आसिद्ध आसेधं यो निवर्त्तते । स विनेयोन्यथा कुर्वन्नासे
द्धा दण्डभाग्भवेत् । कात्यायनः । आसेधयोग्य आसिद्धस्तत्कामन्दण्डमर्हति । अनासेध्या उक्तास्तेनैव । वृक्षपर्वतमारूढा
हस्त्यश्वरथनौस्थिताः । विषमस्थाश्च ते सर्वे नासेध्याः कार्य्यसाधकैः । व्याध्यार्त्ता व्यसनस्थाश्च यजमानास्तथैव चेति । निर्वे
ष्टुकाम इत्यादिना ह्वाननिषेधप्रसंगेनासेधकर्म्मपि नारदवचनं प्रागलेखि । वृहस्पतिरपि । शास्त्रोद्वाहोद्यतो रोगी शोकार्त्ता
न्मत्तबालकाः । मत्तो वृद्धोभियुक्तश्च नृपकार्य्योद्यतो व्रती । आसन्ने सैनिकः संख्ये कर्षको वापसंग्रहे । विषमस्थाश्च नासेध्याः स्त्री
सनाथास्तथैव चेति । संख्ये युद्धे । वापसङ्ग्रह इत्येकवाक्यं वा द्वन्द्वे । तथा च वीजवापे तत्संग्रहे चेत्यर्थः । स्त्रियः सनाथाश्चेत्ययमपि

Digitized by Google

दृह्यः । स्त्रियः कुलस्त्रियः । अन्यासामाह्वानवदासेधेऽप्यविरोधात् । सनाथाः परतन्त्राः भृत्यादयः । स्वाम्याद्यनुमतिमन्तरे
णाऽनासेध्याः स्त्रियासह रहसि स्थिताः । स्त्रीसनाथास्तत्कालेनासेध्या इति तु पौलस्त्याः । आसेधस्य कालान्तरेऽपि सम्भवा
दुर्बलन देशकालावस्थास्त्वासेधक्षमता सेध्यपीडानिषेधाय [illegible] कार्यासाद्दृश्या सेधेबासेध्यादर्शितो नासेध्यताऽदर्शि
मकराद्यपेक्षया वितासेधेऽतदर्दितिकामेऽसदरावृद्धिनिसकलवचननात्पर्यम्
मित्रानामुपलक्षणम् । राजपुरुषायब्बसाध्यपालनामकायाकूताह्वायकद्वारभूतिर्दीपनीयादेशकालाद्यनुसारेणेत्याह । का
यतः । एकाहद्व्यहाद्यपेक्षन्ते देशकालाद्यपेक्षया । दूतायसाधिते कार्ये तेनभक्तमप्रदापयेत् ॥ देशकालावयः शक्त्याद्यपेक्ष
भोजनं भृतम् । आकारकस्य सर्वेवइति नन्नविदोविदुरिति । आकारकस्याह्वानकर्तुः । अभियोक्त्रादीनामुक्तिः क्रमः
कात्यायनेनोक्तः । तत्राभियोक्ता प्राग्ब्रूयादभियुक्तस्त्वनन्तरम् । तयोरन्ते सदस्यास्तु प्राड्विवाकस्ततः परम् । सभ्यप्राड्विवाक
योरिदमस्मादभिधानमनुयोगादिव्यतिरिक्तपूर्व्याकलनादिविषयकवचनपरमनुयोगादीनामग्रेवनस्य तेऽव्याह्यन्वधे
यम् । प्राग्ब्रूयात्प्रतिज्ञां वदेदित्यर्थः । अभियुक्तस्त्वनन्तरमुत्तरं ब्रूयादिति । वादिप्रतिवादिनोर्धर्माधिकरणमुपागतयोः प्रति
भूः ससभ्येन सभापतिना ग्राह्य इत्याह । याज्ञवल्क्यः । उभयोः प्रतिभूर्ग्राह्यः समर्थः कार्यनिर्णये । उभयोरर्थिप्रत्यर्थिनोः प्र
तिभूस्तत्स्थाने प्रतिभवतीति प्रतिभूर्लग्नकः कार्यनिर्णये निर्णयकाले साधितफलदाने पराजयनिमित्तदण्डदाने
जिताद्राजग्राह्यभागदाने च समर्थः । ग्राहको याह्योऽव्यवहारद्रष्टा ससभ्येनेत्यर्थः । आहिताग्न्यादिषु पाठात्कार्यशब्दस्य परनि
पाताई स्यापि पूर्वनिपात इति विज्ञानेश्वरः । नासिकास्तनयोर्ध्माधेटोरिति भगवतः पाणिनेरित्यादिसूत्रप्रयोगात्पूर्वनिपात
स्यानित्यत्वज्ञापनात् । तुल्यास्यप्रयत्नं सवर्णमित्यादिसूत्रे प्रारम्भोयत्नस्य प्रयत्न इति वदता श्रीमता भगवता महाभाष्यका
रेण षष्ठीसमासे षष्ठ्यन्तस्यापि क्वचित्परनिपातज्ञापनाद्वा । कार्यशब्दस्य परनिपात इति मदन्तरत्नकारः । तच्चानुशासनाभावे

ज्ञापकानुसरणमन्यथाप्रसङ्गादित्ययुक्तम् । केचित्प्रतिभुवो न ग्राह्या इत्याह । कात्यायनः । न स्वामी न च वै शत्रुः स्वामिनाधिकृतस्तथा । निरुद्धो दण्डितश्चैव संशयस्थो न कुत्रचित् । नैव रिक्थी न रिक्तश्च न चैवात्यन्तवासिनः । राजकार्यनियुक्ताश्च ये च वै प्रव्रजिता नराः । नाशक्तो धनिने दातुं दण्डं राज्ञे च तत्समम् । नाविज्ञातो ग्रहीतव्यः प्रतिभूः स्वक्रियां प्रति । रिक्थी भ्रात्रादिः । रिक्तो निर्धनः । अत्यन्तवासिनो नैष्ठिकब्रह्मचारिण इति मिताक्षरादिषु । अन्यत्रवासिन इति पठित्वा देशान्तरवासिन इति मदनरत्ने व्याख्यातम् । अविज्ञातो विशेषतोऽपरिचितः । याज्ञवल्क्यः । भ्रातॄणामथ दम्पत्योः पितुः पुत्रस्य चैव हि । प्रातिभाव्यमृणं साक्ष्यमविभक्तेन तु स्मृतम् । नारदः । साक्षित्वम्प्रातिभाव्यञ्च दानं ग्रहणमेव च । विभक्ता भ्रातरः कुर्युर्नाविभक्ताः परस्परम् । इदमपि दृष्टार्थम् । तथा प्रतिभूभेदात्तत्कार्यं ऋणादानप्रस्तावे वक्ष्यते । प्रतिभुवो यद्यलाभोऽर्थिप्रत्यर्थिनोरन्यतरस्य तदा किं कार्यमित्यपेक्षित आह कात्यायनः । अथ चेत्प्रतिभूर्नास्ति कार्ययोस्तु विवादिनः । स रक्षितो दिनस्यान्ते दद्याद्भृत्याय वेतनम् । भृत्याय स्वपुरुषाय रक्षकाय साध्यपालाख्याय । अत्रैकत्वमविवक्षितम् । वादिन इत्युपलक्षणं प्रतिवादिनोऽपि ॥ ● ॥ अथ व्यवहारपादाः प्रतिज्ञादयः प्रस्तूयन्ते । ते चत्वारः । परस्परं मनुष्याणां स्वार्थविप्रतिपत्तिषु । वाक्यान्न्यायाद्व्यवस्थानं व्यवहार उदाहृतः ॥ भाषोत्तरक्रियासाध्यसिद्धिभिः क्रमवृत्तिभिः । आक्षिप्तचतुरंशस्तु चतुष्पादभिधीयत इति वचनात् बृहस्पतिः । भाषापादोत्तरपादौ क्रियापादस्तथैव च । प्रत्याकलितपादश्च व्यवहारश्चतुष्पद इति । कात्यायनोऽपि । पूर्वपक्षश्चोत्तरपक्षश्च प्रत्याकलितमेव च । क्रियापादश्च तेनायं चतुष्पात्समुदाहृतः ॥ बृहस्पतिः । मिथ्यायां चतुरः पादाः प्रत्यवस्कन्दने तथा । प्राङ्न्याये च स तु ज्ञेयो द्विपात्सम्प्रतिपत्तिषु । तृतीयतुरीयपादयोः सम्प्रतिपत्तावसम्भवाद्द्विपात्त्वमिति । अत्र विज्ञानयोगिना । साध्यसिद्धिस्तत्सिद्धौ सिद्धिमाप्नोति । विपरीतमतोऽन्यथेति योगीश्वरोक्तेर्जयपराजयावधारणान्तश्च चतुर्थपादः इत्यभिधायोत्तराभिधानानन्तरमर्थिप्रत्यर्थिनोः कस्य क्रियेत्यादिपरामर्शलक्षणस्य प्रत्याकलितस्य योगीश्वरेण

व्यवहारपादत्वेनानुक्रोर्थ्यं व्यवहर्तृसम्बन्धाभावाच्चनव्यवहारपादत्वमित्युक्तम् । अपराकस्तु साध्यसिद्धिपदेन प्रत्याकलितमेव व्यवहारपादत्वेनाम्नातम् ।

यदाह । अत्र सिद्धिशब्देन सभ्यानामर्थिप्रत्यर्थिजयपराजयोपायभूतप्रमाणस्येदंशास्त्रतः प्राप्नोतीति विचारका स्मरणः सर्वं प्रत्याकलितादिशब्दवाच्य उच्यते सिद्धिफलत्वादिति । प्रागुदाहृतकात्यायनवचनस्य [illegible] ॥

[illegible] ऽयं पक्षः स्मृतः पादो द्वितीय उत्तर स्मृतः । क्रियापादस्तृतीयस्तु चतुर्थो निर्णयस्तथेति । बृहस्पतिवचनस्थं निर्णयफलकपरामर्शरूपप्रत्याकलितपरमेव निर्णयपदमुपचारादित्याह । इतरथा पूर्वोदाहृततद्वचनविरोधः स्यात् ॥ ● ॥ तत्र प्रतिज्ञावादिनः [illegible] पेक्षिते । नारदः ॥ राज्ञे कुर्यात्पूर्वमावेदनं यस्तस्य ज्ञेयः पूर्ववादो [illegible] पूर्ववादः प्रतिज्ञा । पूर्ववादि [illegible] प्रतिज्ञावादिनं तस्यापवादमाह । स एव । यस्य वाभ्यधिका पीडा कार्यं वाभ्यधिकं भवेत् । तस्यार्थिवादो दातव्यो न यः पूर्वं निवेदयेत् ॥ अर्थिवादः प्रतिज्ञा । बृहस्पतिः । अहम्पूर्विकया यातावर्थिप्रत्यर्थिनौ तथा । वादो वर्णानुपूर्व्येण ग्राह्यः पीडामवेक्ष्य वेति । मनुरपि । अर्थानर्थावुभौ बुद्ध्वा धर्माधर्मौ च केवलौ । वर्णक्रमेण सर्वाणि पश्येत्कार्याणि कार्यिणाम् ॥ ब्राह्मणादीनां युगपद्धर्माधिकरणमुपागतानां वर्णानुक्रमेण ब्राह्मणस्यादौ ततः क्षत्रियस्येत्येवमादिक्रमेण चतुर्णां व्यवहारः प्रवर्तनीयो राज्ञा पीडाधिक्यकार्यगौरवे च यदर्थिप्रत्यर्थिनोरन्यतरस्य तदा न पूर्वावेदनक्रमो नापि वर्णक्रमः । यदा तु सर्वे सवर्णास्तदा आवेदनक्रमः । युगपदावेदने समानवर्णत्वे समानपीडत्वे च सभ्यः सभापतीच्छयेति निर्गलितोऽर्थः ॥ ● ॥ प्रतिज्ञालक्षणमाह याज्ञवल्क्यः ॥ प्रत्यर्थिनोऽग्रतो लेख्यं यथावेदितमर्थिना । समामासतदर्धाहर्नामजात्यादिचिह्नितम् । अर्थ्यतेऽर्थ्यः साध्यः । सोऽस्यास्तीत्यर्थी । तद्विपरीतः प्रत्यर्थी तस्याग्रतः पुरतो लेख्यं लेखनीयं सभ्येन सभापतिना । यथावेदितम्पूर्वावेदनमनतिक्रम्य येन प्रकारेणावेदनसमये स्ववचनं लेखितं तथैव प्रत्यर्थिसमक्षमपि न पुनरन्यथा । तथा सत्यन्यवादित्वेन भङ्गप्रसङ्गात् । अन्यवादी क्रियाद्वेषीत्यादि हीन लक्षणे वक्ष्यते । प्रागेवार्थिनास्वप्रतिज्ञातार्थस्य [illegible] मिथ्याशङ्कानिरासायाह । समामासेति । संवत्

रमासपक्षतिथिवारार्थिप्रत्यर्थिनामतदीयजातिभिरादिशब्दोपात्तैश्च द्रव्यसंख्यानज्ञातिनदयग्रहणादिस्थानवेलाक्षमालिंगा
दिभिर्ययोपयोगश्चिह्नितमितिकार्यमावमावेदनकालेलिखितमधुनोपयुक्तविशेषग्रहणं चिह्नितंलिखनादितिनानर्थक्यमितिभावः।
आदिशब्दग्राह्याणिचकात्यायनआह। निवेशकालंवर्षेचमासम्पक्षन्तिथिन्तथा। वेलाम्प्रदेशंविषयंस्थानंजात्याकृतीवयः
। साध्यम्प्रमाणंद्रव्यञ्चसंख्यानामतथात्मनः। राज्ञांचक्रमशोनामनिवासंसाध्यनामच। क्रमात्पितॄणांनामानिपीडामाहर्तृदा
यकौ। क्षमालिङ्गानिचान्यानिपक्षंसङ्कल्प्यकीर्तयेत्। कालोधनप्रयोगादिकालः। वर्षेपत्रलिखनकालीनंमासपक्षतिथयोवि
संध्यावन्दनादिक्रियोपलक्षितःकालोवेला। प्रदेशःक्षेत्रादिस्थलविशेषः। विषयोन्तर्वेद्यादिदेशः। स्थानंविवादास्पदीभूत
गृहादिग्रामादि। आकृतिरवयवसंस्थानविशेषः। वयस्तारुण्यादि। प्रमाणंनिवर्तनप्रस्थादि। आत्मनोराज्ञांचक्षेत्रादिभो
गकालीनाम्बर्त्तमानतदीयपित्रादिप्राप्त्यर्थे। निवासोनिकटगृहादिः। पितरोर्थिप्रत्यर्थिनोस्त्रियः। पीडाप्रतिभूप्रभृतीनाम
निकादिकृता। आहर्ताप्रतिग्रहादिविषयवस्तुनिधानेन। दायकोदातृविक्रेत्रादिः। क्षमालिङ्गान्यात्मीयधनादेः। परोपभो
गाद्युपसधसहनचिह्नानि ॥ ० ॥ अन्यदप्युबोधसंग्रहकारोपि। अर्थवद्धर्मसंयुक्तंपरिपूर्णमनाकुलम्। साध्यवद्वाचकपदम्प्र
कृतार्थानुबन्धिच ॥ प्रसिद्धमविरुद्धञ्चनिश्चितंसाधनक्षमम्। संक्षिप्तन्निखिलार्थंचदेशकालाविरोधिच। वर्षर्तुमासपक्षाहो
वेलादेशप्रदेशवत्। स्थानावसथसाध्याख्याजात्याकारवयोयुतम्। साध्यप्रमाणसंख्यावदात्मप्रत्यर्थिनामच। परात्मपूर्वजा
नेकराजनामभिरङ्कितम्। क्षमालिंगात्मपीडावत्कथिताहर्तृदायकम्। यदावेदयतेराज्ञेतद्भाषेत्यभिधीयते। इतिअर्थवत्
। प्रयोजनवत्। धर्मसंयुक्तम्। अल्पाक्षरप्रभूतार्थत्वादिगुणयुक्तम्। परिपूर्णमध्याहाराद्यनपेक्षम्। अनाकुलमसन्दिग्धा
क्षरम्। साध्यवत्। साधनीयार्थयुतम्। वाचकपदम्। गौणलाक्षणिकपदरहितं। प्रकृतार्थाविरोधिप्रागावेदितार्थेनसहस
म्बादि। प्रसिद्धलोकप्रसिद्धमनतिक्रान्तं। अविरुद्धम्पुरराष्ट्रप्राड्विवाकराजाद्यविरुद्धम्। पूर्वापराविरुद्धंव्यवहारिकधर्मा

विरुद्धञ्च। निश्चितं संशयरहितं। साधनक्षमं। साधनार्हम्। संक्षिप्तं शब्दाडम्बरशून्यं। निखिलार्थं निरवशेषवक्तव्यार्थप्रति
पादकम्। देशलोकाविरोधि। मध्यदेशीयममुकक्षेत्रम्। भरतकालीननाम्नकसहसंवमदीयमपहृतमित्यादि देशकालावि
रोधि विस्तरम्। परात्मनोः प्रतिवादिवादिनोर्यत्पूर्वं ज्ञापितवान् यस्त्वयः अनेकराजानः क्षेत्रादिषु [illegible]
नं युक्तम्। अनार्थवत्वादीनि देशकालविरोधित्वमार्थप्रत्यर्थिनामवेतिसर्वेत्र भाषायामवश्यम्भावानि। नैर्वनासर्व्वानर्दैशवि
कृः वर्षादीनतु यत्र यावद्यु पदयुज्यन्ते तत्र तावन्त्येव निवेशनीयानि सर्वाणि सर्वत्र दृष्टार्थत्वप्रसङ्गात्। नत्र वर्षादीनां कालानां
वृद्धिधनद्रव्यगुणयादि विवादेन प्रतिग्रहक्रयादि पौर्वापर्य्यविवादे वोपयोगः। देशप्रदेशस्थाममनामाह। दत्तृदायकयोरन्मादिपू
र्वजराजादिनामानं च स्थावरक्षेत्रादि विवादेषु। साध्याख्याजात्याकारवयसाञ्चौर्य्यादि स्वाम्यविक्रियादि विवादेषु। प्रमाणसं
ख्ययोर्मेयतुलितादि द्रव्यविवादे चैाैर्य्यादि विवादे च। क्षमालिंगानामुपेक्षितपरोक्षभुज्यमानभूम्यादि विवादे। आत्मपीडाया
र्द्दोशकपुत्रादि विवादे एवमन्यदप्यूह्यम्। अत एवाशयादाह। कात्यायनः। देशश्चैव तथा स्थानं सन्निवेशस्तथैव च
जातिः संज्ञाधिवासश्च प्रमाणं क्षेत्रनाम च॥ पितृपैतामहश्चैव पूर्वराजानुकीर्त्तनम्। स्थावरेषु विवादेषु दशैतानि निवेशयेदि
ति। एतेषामत्रोपयोगित्वात्। हारितोऽपि। आसनं शयनं यानं ताम्रं कांस्यं मनोमयम्। धान्यमश्ममयं यच्च द्विपदश्च चतुष्प
दम्। मणिमुक्ताप्रवालानि हीरकारूप्यकाञ्चनम्। यदि द्रव्यसमूहः स्यात्संख्या कार्य्या तदैव तु। यस्मिन्देशे च यद्द्रव्यं येन माने
नमीयते। तेन तस्मिंस्तदा संख्या कर्त्तव्या व्यवहारिभिरिति। मानसंख्याशब्दावत्रान्योन्योपलक्षणम्। अत्रैतावद्विवक्षितं यत्र या
वदुपयुज्यते तत्र तावन्निवेश्यं भाषायामन्यथा साध्यनिर्देशस्यापूर्णत्वात्पक्षाभासतापत्तेरधिकनिवेशाददृष्टार्थतापत्तेरिति
॥ ❁ ॥ कात्यायनोऽर्थेन सताह। देशकालविहीनश्च द्रव्यसंख्याविवर्जितः। क्रियामानविहीनश्च पक्षोनादेय इष्यते। क्रिया
प्रमाणम्। मानं साध्यपरिमाणम्। यद्यपि पूर्वोक्तपक्षलक्षणरहितानाम्पक्षाभासत्वमर्थसिद्धं तथापि नारदादिभिः स्पष्टार्थं

प्रपञ्चितम्। तत्र नारदः। अन्यार्थमर्थहीनं च प्रमाणागमवर्जितम्। लेख्यहीनाधिकं भ्रष्टं भाषादोषा उदाहृता। एतान्य एव विवृतवान्। अर्थे साधारणे एको सम्बन्धो यानियुक्तकः। लेखयेद्यस्तु भाषार्थमन्यार्थं तं विदुर्बुधाः। गणकार्य्यमेको वाय ह्यसम्बन्धी नदनियुक्तो वा लेखयेद्यस्तां भाषायामित्यर्थः। ब्रह्महत्यामिति द्वेवान्को धाद्दापि वदेत्तु यः। साध्यं च मोचयेत्पश्चाद र्थहीनां तु तां विदुः। उक्तं साध्यवादिना यस्यान्यूयते सा भाषार्थहीनेत्यर्थः। गणितेनतु लिखितेमेयेतथा क्षेत्रगृहादिषु। यत्र संख्या न निर्दिष्टा सा प्रमाणविवर्जिता। संख्यानं संख्येति व्युत्पत्त्या संख्याशब्देन गणनं तोलनं मानमानं परिग्रहः। विक्रयाप्राप्त्यर्थी वाच्यं कीर्तक्रमागतम्। न वेर्ह लिख्यते यत्र सामावाद्याद्दनागमा। समामासस्तथापक्षस्तिथिर्वारस्तथैव च। यत्रैतानि न लिख्यन्ते लेख्यहीनां तु तां विदुः। अवश्यं यत्र पूर्वीकरणीया लेख्यन्तं हि हि भावेलेख्यहीनेत्यर्थः। लेखयित्वा तु तां भाषामनिर्दिष्टे तथोत्तरे। निर्दिशेत्साक्षिणः पूर्वमधिकान्वा विनिर्दिशेत्। साक्षिण इति प्रमाणोपलक्षणं। व्युत्क्रमादत्राधिकत्वेनाप्राप्तकालता फलिता। यत्र स्यात्तु यथापूर्वं निर्दिष्टम्पूर्ववादिना। सन्दिग्धमेव लेख्येन भ्रष्टाभाषां तु तां विदुः। उभयम्पूर्वमिति पाठे पक्षद्वयमपि प्रतिज्ञावादिनैव निर्दिष्टं स्यादित्यर्थः। कात्यायनः। अप्रसिद्धं निराबाधं निरर्थं निःप्रयोजनम्। असाध्यं वा विरुद्धं वा पक्षाभासं विवर्जयेत्। अप्रसिद्धमाह। बृहस्पतिः। न केनचित्कृतो यस्तु सोऽप्रसिद्ध उदाहृतः। यथा। फलत्वस्त्वत्पुष्टक्षेत्रमपहृतमिति। मदीयं शशविषाणं गृहीत्वा न प्रयच्छतीत्यादि अप्रसिद्धमित्याह विज्ञानेश्वरः। बृहस्पतिनात्विदमसाध्योदाहरणमुक्तन्तच वक्ष्यते। निराबाधं निरुपद्रव्यमर्स्मन्मन्दिरदीप्यमानदीपकप्रकाशेनायं स्वमन्दिरे व्यवहरतीति प्रभृति निरर्थमभिधेयहीनं मदीयञ्च चटतपञ्च गजडदबं गृहीत्वा न ददातीत्यादि विज्ञानयोगी। बृहस्पतिवचनात्त्वन्यथा निरर्थकपदार्थः प्रतीयते। यथाह। स्वल्पापराधः स्वल्पार्थो निरर्थक इति स्मृत इति। एतस्योदाहरणं स्मृतिचन्द्रिकायां। अहमनेन सस्मितमीक्षितः। मामकी शिक्षा तेनापहृतेत्यादीनि। निष्प्रयोजनं यथायन्देवदत्तो मद्गृहसन्निधौ सुस्वरमधीत इत्यादि मिताक्षरा स्मृतिच

न्द्रिकयोदाहृतम्। बृहस्पतिनानतथैवलक्षितम्। कार्य्यबाधाविहीनस्तुविज्ञेयोनिष्प्रयोजनइति। सएवप्रकारान्तरेणापि
निरर्थनिष्प्रयोजनौलक्षितवान्। कुसीदाद्यैःपदैर्हीनोव्यवहारोनिरर्थकः। वाक्पारुष्यादिभिश्चैवविज्ञेयोनिष्प्रयोजनः।
कुसीदमृणादानन्नप्रभृतिभिश्चतुर्दशभिरर्थविषयव्यवहारैर्हीनोनिरर्थकः। वाक्पारुष्यादिभिर्हिंसामूलकैश्चतुर्भिर्हीनो
निष्प्रयोजनइत्यर्थः। अष्टादशपदाविषयःपक्षोदुष्टइत्याशयः। असाध्यविरुद्धावाहसएव। ममानेनप्रदत्तंशशशृ
ङ्गमित्यपक्षमाहुर्मनीषिणः॥ यस्मिन्नावेदितेपक्षेप्राड्विवाकेयराजनि। पुरेराष्ट्रेविरोधस्या
द्विरुद्धःसोभिधीयतइति। मिनाक्षरायामसाध्यविरुद्धान्यथोक्तौ। देवदत्तेनाहंसभूभङ्गमुपहसितइत्याद्यसाध्यसाधना
संभवात्। अल्पकालत्वात्साक्ष्यादिसम्भवात्पत्वान्नदिव्यमिति। मूकेनाहंशप्तइत्यादिविरुद्धमिति। पुरराष्ट्रादिवि
रुद्धमपिविरुद्धपदेनव्याख्यायशङ्काविवर्जितइत्यादिस्मृत्यन्तरञ्चनदर्शितयोदाहृतन्तच्चपूर्वमस्माभिरनादेयमव्यवहार
निरूपणेलक्षितम्। अन्येपिपक्षाभासाःस्मृतिचन्द्रिकोदाहृतवचनोक्ताज्ञेया। यथाभिन्नक्रमोव्युत्क्रमार्थःप्रकीर्णार्थोनिर
र्थकः। अतीतकालोविद्विष्टःपक्षोनादेयइष्यते॥ यथास्थानाभिवेशेननैवपक्षार्थकल्पना। अस्यतेतेनपक्षःसभिन्नक्रम
उदाहृतः॥ व्यस्ताक्षरसन्निवेशोभिन्नक्रमइतियावत्॥ व्युत्क्रमार्थोव्यवच्छिन्नान्वयेनार्थावोधकः। प्रकीर्णार्थोऽसंकलि
नार्थः॥ मूलमर्थम्परित्यज्यतत्सम्बन्धिविस्तार्यत्रलिख्यते। निरर्थकःसवैपक्षोभूतसाधनवर्जितः। भूतकालमतिक्रान्तन्द्रव्यंयत्रहिलि
ख्यते। अतीतकालःपक्षोसौप्रमाणैसन्यविस्मृतः। यस्मिन्पक्षेद्विधासाध्यम्भिन्नकालविमर्शनम्। विमृश्यतेक्रियाभेदात्सप
क्षोद्विष्टउच्यते॥ भूतसाधनंमूलभूतंसाधनन्तेनवर्जितः। भूतकालःसाध्यकालः। अन्यानपिपक्षाभासानाहसएव। अ
न्याक्षरनिवेशेनअन्यार्थगमनेनच। आकुलन्तुभवेल्लेख्यंक्रियाचैवाकुलाभवेत्। साधनंसहसाध्येननिर्दिष्टंयत्रलेखयेत्।
उक्तिक्रमविहीनत्वात्सोपिपक्षोनसिध्यतीति। विरुद्धश्चाविरुद्धश्च‌द्वाबप्यर्थौनिवेशितौ। एकस्मिन्यत्रदृश्येतेतंपक्षन्दूरत

Digitized by Google

स्त्यजेत्। परस्परविरुद्धानियःपदानिनिवेशयेत्। विरुद्धपदसंकीर्णाभावानस्यनसिध्यतीति। यत्तु। पुरस्थुविरुद्धश्च
यश्चराजाविवर्जितः। अनेकपदसंकीर्णःपूर्वपक्षोनसिध्यतीतिस्मरणात्तस्यायमर्थः। राज्ञाविवर्जितोराजाध्यक्षप्रभृत्यादिविष
यकर्णादानादिपदमिश्रितस्तुक्रियाभेदेनयुगपन्नसिद्ध्यतीति। मदीयारूपकाइयन्तोनयावृद्ध्यानेनगृहीताःसुवर्णञ्चयद
सहस्तेमयानिक्षेपीकृतमयमिदंमदीयक्षेत्रमपहरतीत्यनेकपदविषयस्यापिपक्षस्यक्रमेणाप्यनुपादेयत्वेतत्वनिर्णयाभाव
प्रसंगेनयुक्तिविरोधात्। बहुप्रतिज्ञंयत्कार्यंव्यवहारेषुनिश्चितम्। कामन्तदपिगृह्णीयाद्राजानत्त्वबुभूत्सयेतिकात्यायनवच
नविरोधाच्च। तस्माद्युगपत्पक्षाभासतैवेत्यवरमणीयम्। अनेकवस्तुसङ्कीर्णस्यापक्षत्वन्त्वत्पदसम्बद्धम्। हिरण्यरूपका
सांस्त्वानेनमत्तोवृद्ध्यागृहीतान्यस्यहस्तेमयानिःक्षिप्तान्यनेनापहृतानिवेत्येकस्मिन्नपिपदेयुगपदपीदृशपक्षोपन्यासस्यादुष्ट
त्वात्। साध्यंचविधिमुखेनप्रतिषेधमुखेनवापक्षनिक्षेपणीयमित्याहकात्यायनः। न्यायंमन्तेच्छतेकर्तुमन्यायंवाकरोत्ययम्।
नलेखयतियस्त्वेवंतस्यपक्षोनसिध्यति। न्यायंस्वमित्यनेनममैतावद्धनमादायनददातीत्यादिप्रतिवन्धमुखतोपिलक्षिता।
अन्यायंवेत्यनेनममेदमपहरतीत्यादिविधिमुखताप्रदर्शिता। वृहस्पतिरपि। प्रतिज्ञादोषनिर्मुक्तंसाध्यंसत्कारणान्वित
म्। निश्चितंलोकसिद्धञ्चपक्षम्पक्षविदोविदुरिति। प्रतिज्ञादोषैःप्रतिज्ञासंन्यासादिभिर्मुक्तंरहितम्। तेचदर्शिताःप्रा
क्। साध्यंसाध्याहम्। प्रत्यर्थिधर्म्मविशिष्टधर्मिवचनमितियावत्। सत्कारणान्वितंस्फुटदोषरहितहेतुसहितम्। नि
श्चितंसन्देहाजनकंवाक्यरचनायुक्तन्नतुस्वयमेवनिश्चितंविप्रतिपन्नावर्थेनिश्चयाभावात्। लोकसिद्धंव्यावहारिकधर्माविरुद्धम्।
अतएवमनुः। सत्यानभाषाभवतियद्यपिस्यात्प्रतिष्ठिता। बहिश्चेद्भाष्यतेधर्म्मान्नियताद्व्यावहारिकात्। प्रतिष्ठि
ताप्रसिद्धत्वादिदोषनिर्मुक्तादिभाषाप्रतिज्ञाव्यावहारिकधर्म्माविरुद्धाचसत्यायाह्यानभवतिराजादीनामित्यर्थः। भवदेव
स्तु। यत्रश्रुतमात्रमेवसतिलोकानांसम्प्रत्ययस्तल्लोकसिद्धन्तेननिर्धनकृतोलक्षादिसंख्यधनाक्षेपोनपक्षइतिव्याचख्यौतद्वा

धरूपप्रतिज्ञादोषवत्त्वेनैवतादृशपक्षस्यनिराकरणात्। प्रतिज्ञादोषनिर्मुक्तमित्यनेनैवगतार्थं । अयञ्चपक्षःप्राक्पाण्डुलेख्यं भूमिफलकादौकारयित्वाशोधितःपश्चात्पत्रेलेखनीयः। तथाचवृहस्पतिः। अधिकाञ्छातयेदर्थान्न्यूनांश्चपरिपूरयेत्। भूमौनिवेशयेत्तावद्यावदर्थोविनिश्चितः। शातयेदुद्धरेत्। भूमावितिपाण्डुलेख्ययोग्याधारोपलक्षणम्। अतएवाह। स एव। पूर्वपक्षंस्वभावोक्तम्प्राड्विवाकोभिलेखयेत्। पाण्डुलेखेनफलकेततःपत्रेविशोधितमिति। स्वभावोक्तन्नभयाद्युपाधिनोक्तम्। व्यासोपि। पाण्डुलेखेनफलकेभूमौवाप्रथमंलिखेत्। ऊनाधिकन्तुसंशोध्यपश्चात्पत्रेनिवेशयेत्। शोधनञ्चोत्तरयोग्यतावधिविधेयम्। नततःपरमनवस्थापत्तेरदृष्टार्थतापाताच्च। तथाचनारदः। शोधयेत्पूर्ववादन्तुयावन्नोत्तरदर्शने। अवष्टब्धस्योत्तरेणनिवृत्तंशोधनम्भवेत्। अवष्टब्धस्योत्तरयोग्यस्ययस्त्वर्थंप्रगल्भत्वात्पक्षदोषगुणहानादानाभ्यांशोधयितुमशक्तस्तस्यवक्तव्यार्थंनिर्धार्यसभ्यैरेवसंशोधनीयः। यथाहवृहस्पतिः। अभियोक्ताप्रगल्भत्वाद्वक्तुन्नोत्सहतेयदा। सभ्यैस्तुशोधनन्तस्यकार्यमर्थानुरूपतइति। यदिभाषामशोधयित्वैवोत्तरन्दापयन्तिसभ्यास्तदारागाल्लोभाद्भयाद्वापीत्यावृत्तदण्डेनसभ्यान्दण्डयित्वापुनःप्रतिज्ञालेखनपूर्वकंव्यवहारः। प्रवर्त्तनीयोराज्ञेतितात्पर्य्यम्। यदार्थिप्रत्यर्थिनोर्लेखनापाठवात्स्वकीयलेखकद्वारातौभाषोत्तरेलेखयतः। सचान्यतरपक्षपातेनान्यथालिखत्यन्यरस्मराज्ञाचौरवद्दण्ड्यइत्याहकात्यायनः। अन्यदुक्तंलिखेदन्यद्योर्थिप्रत्यर्थिनांवचः। चौरवच्छासयेत्तन्तुधार्मिकःपृथिवीपतिरिति। अत्रशासयेदित्युक्तेस्तत्प्रयोजनम्पुनस्तादृशकार्यप्रवृत्तिनिरोधे॥ स्मृतितत्त्वेतुचौरवच्छासयेदित्येवपठितम्॥०॥ एवमुक्तलक्षणःपक्षश्चतुर्विधः। तथाचवृहस्पतिः। शंकाभियोगस्तत्वञ्चलभ्येर्थेभ्यर्थिनन्तथा। वृत्तेवादेपुनर्न्यायःपक्षेज्ञेयश्चतुर्विधः। चतुर्विधःपूर्वपक्षःप्रतिपक्षस्तथैवच। चतुर्धानिर्णयःप्रोक्तःकैश्चिदष्टविधःस्मृतः॥ भ्रान्तिःशङ्कासमुद्दिष्टातत्त्वन्तत्त्वार्थदर्शनम्। लभ्येर्थेभ्यर्थनंमोहस्तथावृत्तेपुनःक्रियेति। नारदः। सारस्तुव्यवहाराणांप्रतिज्ञासमुदाहृता। तद्धानौहीयतेवादीतरंस्तामुत्तरोभवेत्। उत्तरउत्कृष्टोविज

येतियावत्। यद्यपिन्यायाख्यपञ्चावयववाक्यान्तर्गतप्रतिज्ञास्वरूपंसाध्यधर्मविशिष्टधर्म्मिवचनमात्रंतथाप्यत्रसत्कारणान्वि
तमित्युक्तत्वात्सहेतुकसाध्यविशिष्टधर्मिवचनंप्रतिज्ञेतिगम्यते। हेतोश्चपक्षभूताऽधमर्णादिनिष्ठत्वन्तदङ्गीकृतंक्रियापा
देनसिध्यतीतिध्येयम्। तथासतिस्थापनानुमानप्रयोगएवप्रतिज्ञा। प्रतिस्थापनानुमानप्रयोगएवचोत्तरमत्रपर्यवस्य
ति। अतएवस्मृत्युक्ताऽभयाभासायथायथमर्थान्तरमप्यनुयोज्यानुयोगासिद्ध्यादिनिग्रहस्थानहेत्वाभासादिष्वेवपर्यव
स्यन्ति। ततश्चत्वंशतंमह्यन्धारयसि। चटत्वेनमत्तोगृहीततावद्धनत्वादितिभाषाशरीरम्। नधारयाम्यगृहीतत्वात्प्रवि
दत्वाद्व्यादुत्तरशरीरम्। अत्रचनसाधुशब्दनियमस्तदनभिज्ञानामर्थार्थिप्रत्यर्थिनदर्शनात्। बोधकास्तुयेषांयेशब्दाः
प्रसिद्धास्तैरेवभाषालिखनीयम्। प्रतिवादिसभ्यादीनांनदभिज्ञत्वेभाषाद्वयाद्यभिज्ञैस्तैरेवबोधनीयाइत्याद्यूह्यम्। अतएव
विष्णुधर्मैध्यापनेपिसाधुशब्दनियमान्नारदउक्तः। संस्कृतैःप्राकृतैर्वाक्यैर्यःशिष्यमनुरोपतः। देशभाषाद्युपायैश्चबोधये
त्सगुरुःस्मृतइति। इतिप्रतिज्ञोपादोनिरूपितः ॥●॥ अथोत्तरपादोनिरूप्यते। तत्रनिर्दोषायाम्भाषायांनिश्चितनदर्थेन
प्रत्यर्थिनोत्तरन्देयम्। तथाचवृहस्पतिः॥ विनिश्चितेपूर्वपक्षेयाह्याग्राह्यविशोधिते। प्रतिज्ञार्थेस्थिरीभूतेलेखयेदुत्तरन्त
तः। विनिश्चितेसंशयरहितज्ञानगोचरीकृतार्थेविशोधितेऽतएवस्थिरीभूतेलेखयेदितिवाचयेदित्यस्याप्युपलक्षणंवाचनपू
र्वकत्वाल्लेखनस्य। इदञ्चार्थिसन्निधावेवलेखनीयमित्याह। याज्ञवल्क्यः। श्रुतार्थस्योत्तरंलेख्यंपूर्वावेदकसन्निधौ। श्रु
तोभाषार्थोयेनप्रत्यर्थिनासःश्रुतार्थस्तस्येतिकर्त्तरिषष्ठी। तेनलेख्यमित्यर्थः। पूर्वावेदकोर्थीपूर्वपक्षादुत्तरोपन्यासइत्युत्तरंपू
पक्षोपमर्दकमुच्यतेयथाहतुर्नारदप्रजापती। पक्षस्यव्यापकंसारमसन्दिग्धमनाकुलं। अव्याख्यागम्यमित्येतदुत्तरन्तद्विदो
विदुरिति। पक्षस्यव्यापकंनिराकरणसमर्थं। सारंन्याय्यम्। असन्दिग्धंसन्देहजनकनानार्थादिशब्दरहितं। अनाकुलंपूर्वा
पराविरुद्धम्। अव्याख्यागम्यमप्रसिद्धदेशभाषाभिधानेनाप्रसिद्धार्थपददुश्लिष्टविभक्तिसमासव्यवहितयोजनाव्यवधारण

कल्पनाविपरीतामसाध्याद्याह्रभिधानेनवाप्यनुक्लिष्टव्याख्यानेनदुर्गमार्थेनभवति। हारीतोपि। पूर्वपक्षार्थसम्बन्धमनेकार्थमनाकुलम्। उपयुक्तमव्यस्तपदंव्यापकंनातिभूरि च। सारभूतमसन्दिग्धंस्वपक्षैकान्तसम्भवम्। अर्थिश्चव्यमगूढार्थमन्त्यमुत्तरमीदृशमिति। अनेकार्थमनेकेऽर्थाउपयुक्ताविशेषणादयोयत्रतत्तथा। नन्वनेकार्थपदयुक्तत्वस्यसन्दिग्धत्वेनदुष्टत्वात्। अनाकुलमुक्तार्थम्। उपयुक्तशब्दैरन्यूनमनल्पं। अव्यस्तानिव्यत्यासयोजनानपेक्षाणिपदानियत्रतदव्यस्तपदम्। व्यापकम्परिपूर्णार्थं। नातिभूरि अनुपयोगिविस्तररहितम्। सारभूतत्वासन्दिग्धत्वेव्याख्याते। स्वपक्षैकान्तसम्भवम्। स्वपरिगृहीतपक्षएवैकान्तेननियमेनसम्भवतिनकथञ्चिदपिपक्षान्तरकक्षामवगाहतेतत्। अन्यद्युक्तार्थम्। शाठ्यदर्पादिभिर्य्यदोत्तरंनददातिप्रतिवादीतदाकथञ्चित्सभ्यप्राड्विवाकेनराज्ञाउत्तरन्दापनीयमित्याह। वृहस्पतिः। पूर्वपक्षेयथार्थन्तुनदद्यादुत्तरन्तुयः। प्रत्यर्थीदापनीयःस्यात् सामादिभिरुपक्रमैः। प्रियपूर्ववचःसामभेदस्तुभयदर्शनम्। अर्थापकर्षणन्दण्डस्ताडनंबन्धनन्तथा। उभयैश्चोद्यमानस्तुनदद्यादुत्तरन्तुयः। अतिक्रान्तेसप्तरात्रेजितोसौदण्डमर्हति। उभयैर्मृदुभिस्तीक्ष्णैश्चोपायैरित्यर्थः। कात्यायनः। यथार्थमुत्तरन्दद्यादयच्छन्तञ्चदापयेत्। मोहाद्वायदिवाशाठ्याद्यन्नोक्तंपूर्ववादिना। उत्तरान्तर्गतंवापितद्ग्राह्यमुभयोरपि। मोहादिवशात्पूर्ववादिनाप्रागनुक्तमप्युत्तरान्तर्गतमुत्तराभिधानसमयएवप्रोच्यमानमुभयोरुत्तरवादिव्यवहारदर्शिनोर्ग्राह्यंग्रहणार्हम्भवतीत्यर्थः। उत्तरलेखनोत्तरन्तुनग्राह्यमित्यर्थसिद्धमपिस्पष्टार्थमाह। सएव। उभयोर्लिखितेवाच्येप्रारब्धेकार्यनिर्णये। अयुक्तन्तत्रयोब्रूयात्तस्मादर्थात्सहीयतेइति॥

● ॥ अथोत्तरभेदाः। तत्रकात्यायनः। सत्यंमिथ्योत्तरञ्चैवप्रत्यवस्कन्दनन्तथा। पूर्वन्यायविधिश्चैवमुत्तरंस्याच्चतुर्विधमिति॥ सत्यंसम्प्रतिपत्तिः। प्रत्यवस्कन्दनङ्कारणोत्तरम्। व्यासः। साध्यस्यसत्यवचनंप्रतिपत्तिरुदाहृता। यथारूपकशतंमह्यन्धारयसीत्युक्तेसत्यन्धारयामिदास्यामीतिच। यद्यपिभाषार्थस्यानिसकरत्वादनुत्तरत्वमस्याभाति। तथापि

भियोक्तासाध्यतयोपन्यस्तस्यसिद्धत्वोपन्यासात्साध्यत्वनिराकरणादुत्तरत्वमस्यावसेयम्। तथाचस्मरणम्। अनुज्ञाकारणं
यत्रपक्षंवादीप्रपद्यते। प्रतिपत्तिस्तुसाज्ञेयाकारणेदूषणंपृथक्॥ कारणम्परोक्तहेतुदूषणं। वादीप्रत्यर्थी। कारणेकारणो
त्तरेपृथक्दूषणम्भवेदित्यर्थः। नचास्याःसिद्धसाधनत्वेनसदुत्तरत्वेपूर्ववादिनोनिग्रहस्थानंस्यादितिशंक्यंइष्टापत्तेः। परा
जयेपिपूर्ववादिनोदण्डःपरंनभवतिअपराधाभावात्। वाचस्पतिस्तुतत्वनिर्णिनीषुकथायाःसिद्धसाधनस्यादोषत्वान्ननिग्रहो
पीत्याह। नचैवन्धर्माधिकरणप्रवेशपक्षलिखनेपूर्ववादिनोवृथेतिवाच्यम्। प्राग्विप्रतिपन्नस्यानुतापवतःप्रत्यर्थिनःपश्चाद
पिसंप्रतिसम्भवात्सन्धिकरणोत्तरमिव। सन्धिकरणञ्चनिरूपयिष्यते॥ ● ॥ मिथ्योत्तरन्तुनधारयामीत्यादि। यथाहकात्या
यनः। अभियुक्तोऽभियोगस्ययदिकुर्यादपह्नवम्। मिथ्यातत्तुविजानीयादुत्तरंव्यवहारतइति॥ व्यासोपि। मिथ्यास्यात्साध्य
निह्नुतिरिति। साध्यस्यसहेतुकसाध्यस्यशब्दतोर्थतोवानिह्नवोमिथ्योत्तरमित्यर्थः। केवलसाध्यनिह्नवस्यसंप्रतिपत्तिभिन्नो
त्तरान्तरेष्वपिप्रसंगादितिवाचस्पतिः। तच्चिन्त्यं। सहेतुकसाध्यनिह्नवस्यतत्रापिसम्भवात्। तस्मादपह्नवमात्रंकारणाद्यसं
वलितंमिथ्योत्तरम्। कारणप्राङ्न्यायसम्वलितन्तूत्तरान्तरेइतिवयम्॥ ● ॥ एतच्चमिथ्योत्तरञ्चतुर्विधम्। मिथ्यैतन्नाभिजा
नामितदातत्रनसन्निधिः। अजातश्चास्मितत्कालइतिमिथ्याचतुर्विधमितिव्यासस्मरणात्। अत्रचमिथ्यैतदितिकण्ठतोप
ह्नवोनजानामीत्यादिरर्थतः। अतएवाहकात्यायनः। श्रुत्वाभाषार्थमन्यस्तुयदितम्प्रतिषेधति। अर्थतःशब्दतोवापिमिथ्या
तज्ज्ञेयमुत्तरमिति। अत्रवाचस्पतिः। भाषार्थस्यसहेतुसाध्यस्यमिथ्योत्तरेणनिह्नवेपिहेत्वपह्नवांशएवस्वरूपासिद्धिरुपस्था
पनादोषः। साध्यापह्नवांशस्तुकारणोत्तरादिव्यवच्छेदकतयात्रांतर्भाव्यते। तथाहि। गृहीतत्वाद्धारणभाषावादिनासा
ध्यउपन्यस्तेकालदेशविशेषगर्भायान्तस्यांमयानगृहीतइतिहेत्वभावशब्देनैवोच्यते। कालविशेषगर्भायान्तुतदानाहंजा
तइत्यर्थात्। देशविशेषगर्भायामपितदातत्राहंनासमित्यर्थात्। अतएवार्थिकभावाप्रतिषेधस्त्रिविधःसोपादेशमि

थ्योत्तरम्। आद्यस्तु केवलमिथ्योत्तरमिति। नचैवंग्रहणास्कन्दनयोरसन्निधानाजन्मनोरेवप्रतिपाद्यतास्तु किमार्थि कग्रहणापर्य्यन्ततात्पर्य्येणेतिवाच्यम्। यद्यपितदाजातस्तत्र संस्थनथापिनगृह्णातितादृशांसर्वेषांग्रहणाभावात्तः सन्निधा नजन्ममात्रस्यग्रहणाथाप्तत्वाद्याप्यकाभावात्। ग्राप्यग्रहणाभावासिद्धेस्तत्कालीनजन्माभावसन्निधानाभावयोरेवग्रहणाभा वसाधकता। नह्यनुत्पन्नोगृह्णात्यसन्निहितोवेतिसम्भवतीतितावत्पर्य्यन्ततात्पर्य्यावश्यम्भावात्। अतएवसर्वस्मिन्नपिमिथ्यो त्तरेस्थापकस्यग्रहणस्थापनायक्रियोपन्यासइत्याह। ननुच्छं। साध्यानालिंगितहेतुभावमात्रोपन्यासेऽर्थान्तरत्वापात्ता त्। हेतुत्वस्यसाध्यनिरूपितत्वेनतदभावमुखेनसाध्यभावव्यवस्थापनएवस्थापनाद्दूषणासम्भवात्। उत्तरान्तरव्यवच्छेद मात्रस्यादृष्टतार्थपत्तेश्च। यत्रतुपूर्ववादिनः पित्रर्णादिग्रहणहेतुकधारणादिप्रतिज्ञातत्राज्ञानद्वारकसाक्षाद्ज्ञानदपह्नवोमि थ्योत्तरम्। तत्कालाजन्मतद्देशासन्निधानयोरेतदीययोस्तदीययोस्तदीयग्रहणाभावासाधकत्वात्। अतएवप्रकाशास्वामि कयेनाष्टिकेनादत्तत्वादिकमपिप्रमापणीयमित्यभियुक्तस्मरणामपिसंगच्छते। अन्यथादूषणादत्तत्वाद्यनुपन्यासादत्तत्वा दिप्रमापणमधिकंस्यात्। तेनतत्प्रतिपादनेदत्तत्वादेर्नाष्टिकोक्तत्वावस्कन्दकत्वादस्यप्रत्यवस्कन्दनरूपत्वात्तस्यैवतत्साध नापत्तैःमिथ्याक्रियापूर्ववादइतिविरुद्धेव। इष्टापत्तावुच्यमानार्थमिथ्योत्तरभेदत्वोक्तिविरोधात्। प्रत्यवस्कन्दनन्नामसत्यं गृहीतम्परन्तुप्रतिदत्तम्प्रतिग्रहलब्धंवेत्यादि। यथाहनारदः। अर्थिनालेखितोयोर्थःप्रत्यर्थीयदितन्तथा। प्रपद्यकारणं ब्रूयात्प्रत्यवस्कन्दनंस्मृतमिति। प्रपद्यस्वीकृत्य। यद्यपिभाषार्थस्यनसर्वांशस्वीकारोत्रसम्प्रतिपत्त्यापत्तेः। कारणोक्त्य नर्थक्यापाताच्च। तथाचग्रहणेनधारणेनतेनचप्रत्यर्पणीयत्वेसाध्यत्वेनप्रतिज्ञातेनग्रहणांशमभ्युपेत्यप्रतिदानेनप्रतिग्रहादि नावाधारणम्प्रत्यर्पणीयत्वाभावम्प्रत्यर्थीसाधयति। मिथ्योत्तरादनएवास्यभेदः। तत्रभाषार्थस्यसर्वस्यापह्नवात्त्वेकदेशा नपह्नवात्। प्राङ्न्यायेतुयथायथमुभयसंभवइतिततोपिभेदः। तच्चतत्रविवक्ष्यामः। यत्तुप्राङ्न्यायोधार्यमाणत्वादिसा

मान्याभावज्ञापकःकारणान्तरन्तु तद्ध्वंसज्ञापकमिति तयोर्भेद इति वाचस्पतिनोक्तम् । ननूक्तम् । प्राङ्न्यायेनापि कारणमुखे
नोभयोरपि ज्ञापनसम्भवात् । तस्मादस्मादुक्तमेव भेदकं न्याय्यः । त्रिविधञ्चैतत् । स्थापनाधिकबलन्तत्समबलन्तदून
बलञ्चेति । उदाहृतमेवाधिकबलम् । तथाहि मह्यमयं शतस्य धारयः । प्रतिदेयतया मत्तो गृहीततावद्धनत्वादित्यादिभा
षायाङ्गिर्य्यातनादिस्थले व्यभिचारवारणायेदानीन्तनधारणाद्यर्थापत्तिगम्यमपरिशोधितत्वादिविशेषणमर्थिनो वश्य
हृदिस्थमास्थेयन्तथाच प्रतिज्ञानाद्युपन्यासेन तत्सिद्धिः । प्रत्यर्थिनोक्ता भवतीति ध्येयम् । कात्यायनोपि स्पष्टमाचष्टे । प्र
र्थिनाभिहितो ह्यर्थः प्रत्यर्थी यदि तं तथा । प्रपद्य कारणं ब्रूयादाधर्ष्यं भृगुरब्रवीत् । इति । आधर्ष्यमधरत्वन्दुर्बलत्वमिति
यावत् । पूर्वपक्षस्येति शेषः । पूर्वपक्षदौर्बल्यमुत्तरस्य प्राबल्यमर्थात्तदुक्तम् । अत एव नारदः । आधर्ष्ये पूर्वपक्षस्य य
स्मिन्नर्थवशाद्भवेत् । विवादे साक्षिग्रहणं प्रमाणमात्रोपलक्षणम् । प्रदीपकृतस्तु । धार्यमाणत्वे कारणं गृहीतत्वं प्रपद्य ब्रूया
त् । परिशोधनादिकमिति शेषः । अपरिशोधितत्वादिकञ्च स्थापनाहेतुविशेषणं कण्ठरवेणाज्ञेयमित्याहुः । तन्न । व्यव
हितयोजनाध्याहारयोर्विना कारणमनुचितत्वात् । कारणम्प्रपद्येत्यन्वये तमित्यस्य साकांक्षत्वेनानन्वयप्रसंगाच्च । अन्ये तु प्रप
द्य स्थापनाहेतुमभ्युपेत्य यत्तद्विपरीतवचनन्तत्कारणोत्तरमिति त्रितयपरमेवेदं वचनमिति वदन्ति । अत्राधिकसमबल
कारणोत्तरयोः स्थापनाया आधर्ष्यसम्भवेनैतद्वाक्यस्य त्रितयविषयत्वायोग इति वाचस्पत्युक्तम् । दूषणाङ्गारणोत्तरस्य त्रैविध्य
न्तदुक्तं खण्डयद्भिरनुपदमेवोद्धरिष्यते । समबलमियम्भूर्भट्टीयात्क्रमागतत्वादित्येकेन भाषिते ऽपरेणापि तद्देवोत्तरयितृसाप्र
तिपक्षरीत्येति । दुर्बलं कारणोत्तरन्तु मयेयं विंशतिवर्षावधि भूमिरमुकस्वामिकाधीनेनेति भाषायां स्वामिनैव पञ्चवर्षावधिम
प्याहितत्वान्मदीयेति साप्रतिपक्षरीत्योत्तरितं आधौ प्रतिग्रहे क्रीते पूर्वा तु बलवत्तरेति वचनाद्दुर्बलम् । अत्र चाधिकब
ले प्रतिवादिनः प्रमाणोपन्यासाधिकारः पूर्वपक्षसाधनाय । अन्ययोस्तु पूर्ववादिन एव । गुरावभिहिते हेतौ प्रतिवादिक्रिया

भवेत् । दुर्बलवादिनः प्रोक्तानुक्त्योः पूर्वक्रियैवचेतिस्मरणात् । कारणात्पूर्वपक्षोऽपि उत्तरत्वम्प्रपद्यते । अतः क्रियासदा प्रोक्ता पूर्वपक्षप्रसाधिनी ॥ इति कारणाद्बलवत्वात् । उत्तरत्वमुत्तमत्वम् । पूर्वपक्षबलवत्त्वहेतुकां पूर्ववादिनः क्रियाम्प्रतिपादयिता कात्यायनेनोत्तरस्यापि बलवत्त्वहेतुक उत्तरवादिनः क्रियेत्युक्तम्भवति । इदं वाचस्पतिमिश्रोक्तम् । व्यवहारतत्त्वकारस्त्वभ्युपेतञ्च कारणोत्तरत्रैविध्यमयुक्तम् । वचनानारूढत्वाद्युक्त्यभावाच्च । तथाहि । अर्थिनालेखितमित्यादिना नारदवाक्यस्याधिकबलकारणविषयत्वेन किञ्चिद्वीजमस्ति । प्रत्युत तस्य तन्मात्रविषयत्वे वितथसाधारणकारणोत्तरस्वरूपाभिधायकवचनानामानस्वरूपाज्ञानप्रसंगः । भवताप्येतस्य वितथसाधारणत्वानभ्युपगमाच्च । समानबलोनबलविषयवचनान्तराभावाच्च । यत्रोच्यते कात्यायनीये । अर्थिनाभिहितोह्यर्थः प्रत्यर्थी यदि तन्तथा प्रपद्य कारणं ब्रूयादित्यादिवाक्ये नारदीये वाधर्ये पूर्वपक्षस्येत्यादिवाक्ये तावदाधर्षेश्च द्वोपादानात्समानबलकारणोत्तरे विषयीभवतुमर्हे तदेकवाक्यतयार्थिनालिखितो योऽप्रत्यर्थी इत्यपि नारदवाक्यमधिकबलकारणोत्तरविषयमेवेति । तदबुद्धिपूर्वकम् । तथा सति नारदीयमेव वचनद्वयमनर्थकम्प्रसज्यत इति सामान्यविशेषविषयत्वमेव तस्याभ्युपगन्तव्यम् । अस्त्वेवन्तथा सति सामान्यलक्षणानभिधानदोषोऽपि प्रतिक्षिप्तः । आधर्ये पितृवचनयोरुक्तयुक्त्योर्वैचनमात्रविषयत्वम् । समबलातिबलयोस्त्वाधर्य्याभावात्तदाक्षिप्तं लक्षणान्तरमूह्यमिति सर्वं सुस्थमिति चेन्न आधर्य्यमुपमर्दकत्वं वाद्युपन्यस्तस्यार्थस्याङ्गीकारे साधारणादिकारणप्रतिदानाद्युपन्यासेनतस्यैवसाध्यत्वविभावेनदुर्ग्रहस्ययोः प्रमाणोपन्यासानपेक्षत्वमेव । इदमेवाभिप्रेत्य कल्पतरौ लक्ष्मीधरोप्याह । आधर्य्ये प्रमाणानर्हत्वम्पूर्वपक्षस्येत्यर्थ इति । अत एव कारणे प्रतिवादिनीतिसामान्यतस्तत्कारणोत्तरे प्रतिवादिन एव क्रियावक्ष्यते । तेनयद्वितथसाधारणत्वमस्यवचसोन्यमतमुपन्यस्याधर्य्यैक्यविरोधाद्दूषितम् । तदप्युक्तम् । वस्तुतस्तु प्रमाणोपन्यासेनत्वसामीचीन्यासामीचीन्यकृतं त्रैविध्यमुत्तरान्तरेपि पारमार्थिकं सम्भवत्येवेति कारणोत्तरमात्रे तदभिधानमर्हन्ततः पूर्वन्त्वापिदुर्ज्ञेयम् । स्वस्वाभिमानेनतु पक्षोत्त

रयोः सार्वत्रिकमधिकबलत्वमेव। अन्यथा विवादाप्रवृत्तिप्रसक्तेः प्रमाणोक्तिप्रत्याकलितयोस्तद्विवेचनार्थयोरन्तरस्यैवोपयोगोऽन्यथाधिकबलकारणोत्तरेणतयोरनुपयोगाद्वैफल्यप्रसङ्गः। संप्रतिपत्तिवत्। गुरुत्वभिहितेहेतौ विवादे सुस्मरणस्यैतत्कारणोत्तरत्रैविध्येनक्रियाव्यवस्थापकत्वम्। कारणोप्रतिवादिनीति सामान्यवचनसंकोचस्य निर्युक्तिकस्य प्रसक्तेः किन्तु मिथ्योत्तरत्रैविध्येन। तथाहि गुरौ पूर्वपक्षोक्तहेत्वभ्युपगमेन कारणोत्तरे कारणोपन्यासात्प्राङ्न्याये च तदुपन्यासात्तयोः साध्यत्वाविभावेवाद्युक्तसाध्ये साध्यत्वतिरोधानात्प्रतिवादिनः क्रिया। दुर्बलेतूत्तरे मिथ्यात्वे भावरूपत्वेन भावप्रमाणाभावमात्रेण सिद्धेः साध्यत्वानर्हे वादिसाध्यस्य साध्यत्वानिरोधानात्तस्य क्रिया। तुल्येद्वयोरपि भावसाधकयोरर्थिप्रत्यर्थिनोः पूर्वक्रियापूर्वेममेदमितिवदतोऽन्यतरस्येत्यर्थः। इदञ्च साक्षिषूभयतः सत्स्वित्यादिवचनव्याख्यानेनिपुणतरमुपपादयिष्यामः। कारणात्पूर्वपक्षोपीतिकात्यायनीयन्तु प्रामाणिकत्वनिबन्धनपूर्वपक्षस्योत्तमत्वप्रतिपादनतः यद्वा च पूर्ववादिनः क्रियावाक्यान्तरेणोक्तातद्विषयत्वेनाप्युपपद्यतइति न किञ्चिदेतत्। अतएव मिताक्षराकल्पतरुरत्नाकरमदनरत्नस्मृतिचन्द्रिकाकारादिभिरिदमुपेक्षितम्॥ ● ॥ प्राङ्न्यायलक्षणमाह। हारीतः। अस्मिन्नर्थे समानेन वादः पूर्वमभूत्तदा। जितोर्यमितिचेद्ब्रूयात्प्राङ्न्यायः स्यात्तदुत्तरम्। कात्यायनबृहस्पती। आचारेणावसन्नोपि पुनर्लेखयते यदि। सोभिधेयोजितः पूर्वं प्राङ्न्यायश्च स उच्यतइति। अतः प्राङ्न्यायपदमन्वर्थम्। प्राङ्न्यायस्य च प्रागवस्थायां मिथ्याकारणान्यतरोत्तरोपादानेनैव व्यवहारप्रवृत्तिरिति प्राङ्न्यायसाधनेतद्वैयर्थ्यसिद्धम्भवतीति सम्भवति धार्यमाणत्वादिसामान्याभावनद्धं सोभयज्ञापकता प्राङ्न्यायस्येति मिथ्याकारणोत्तराभ्यामस्य भेदः। त्रिप्रकारश्च प्राङ्न्यायः। तथा च कात्यायनः॥ विभावयामि कुलिकैः साक्षिभिर्लिखितेन वा। जितश्चैवमयायम्प्राक्प्राङ्न्यायस्त्रिप्रकारकः। कुलिकैरिति प्राकृतव्यवहारदर्शिनामुपलक्षणम्। इत्युत्तरभेदाः॥ ● ॥ अथोत्तराभासाः। यद्यप्युत्तरलक्षणराहित्यादेवोत्तराभासत्वमर्थसिद्धम्भवतीति नोत्तराभासाः पृथग्वाच्याः। योगीश्वरादिभिरतएव नोक्ताः। तथापि स्पष्टीकरणाय

कैश्चिदुक्ताः तथा च मिताक्षराधृतवचनम्। संदिग्धमन्यत्प्रकृतादत्यल्पमतिभूरि च। पक्षैकदेशव्याप्यन्यत्तथा नैवोत्तरम्भवेत्। इति। एतच्चतत्रैवोदाहरणनिष्ठतया व्याख्यातम्। सुवर्णशतमनेन गृहीतमित्युक्ते सत्यं गृहीतं सुवर्णशतं माषकशतं वेत्येवं सन्दिग्धमुत्तरम्भवेदिति। प्रकृतादन्यत्सुवर्णशताभियोगे पणशतन्धारयामीति। अत्यल्पं सुवर्णशताभियोगे पञ्च धारयामीति। सुवर्णशताभियोगे पञ्चशतानि धारयामीत्यतिभूरि। पक्षैकदेशव्यापि हिरण्यवस्त्राभियोगे हिरण्यं गृहीतमित्येतावन्मात्राभिधानम्। व्यस्तपदम्पदान्तरेणाभियोगे पदान्तरमादायोत्तरम्। यथा मदीयमेतावद्दृणं धारयतीत्यभियोगेऽनेनाहन्ताडित इत्यादि। अव्यापि देशस्थानादिभाषाविशेषेणाव्यापि। यथा मध्यदेशे वाराणस्याम्पूर्वदिगवस्थितमदीयमनेन नक्षत्रमपहृतमित्यभियोगे नक्षत्रमपहृतमिति। निगूढार्थं महां सुवर्णशतं धारयतीत्यभियोगे किमहमेवास्मै धारयामीति। अत्र ध्वनिना प्राड्विवाकः सभ्यो वर्थावान्यस्मै कस्मैचिद्वा धारयतीत्यादिसूचनसंभवान्निगूढार्थमिदम्। पूर्वापरविरुद्धमाकुलं यथा सुवर्णशतं मह्यं धारयतीत्यभियोगे धारयामि परन्तु गृहीतमेव नेति गृहीतम्परन्तु न धारयामीति वाकारणादुपन्यासमधारणाद्वा वक्तव्यैवोत्तरम्। व्याख्यागम्यम्। दुश्लिष्टसमासाध्याहारादिसापेक्षत्वेनमेयार्थम्। यथा सुवर्णशतविषये पितृकृतर्णाभियोगे गृहीतवचनात्सुवर्णानां पितुर्न जानामीति। अत्र गृहीतश्च तस्य सुवर्णस्य पितुर्वचनात्सुवर्णानां शतं गृहीतमिति न जानामीत्यर्थविवक्षायामीदृक्षमसमर्थसमासाध्याहारादिसापेक्षत्वादुक्तकृतस्वाभिमतार्थपरव्याख्यावगम्यार्थे। असारं। न्यायविरुद्धम्। यथा सुवर्णशतमनेन मत्तो वृद्ध्या गृहीतन्तस्य वृद्धिरेव दत्ता न मूलमित्यभियोगे सत्यं वृद्धिर्मया दत्ता मूलं तु न गृहीतमिति। अत्र कचित्पूर्वपक्षानिराकरणात्कचिदसम्बद्धार्थत्वात्क्वापि विलंबितार्थप्रत्यायकत्वाद्यथायथमनुत्तरत्वमवसेयम्। यद्यप्युदाहृतमसारम्पूर्वापरविरोध एव पर्य्यवस्यति। तथापि कचित्साक्षात्कचिन्न्यायविरोधात्तथात्वमिति भेदकन्द्रष्टव्यम्। स्मृतिचन्द्रिकाकारस्तु काकदन्तसद्भावोत्तरमिष्यत इति। कात्यायनवचनञ्चात्र संवादितवान्। का

कस्यदत्तानोसन्तिसन्तीत्यादियदुत्तरम्। असारमिति तत्तेन समन्नोत्तरमिथ्यत इति। कात्यायनेनान्येप्युत्तराभासाउक्ताः
। अप्रसिद्धंविरुद्धंयदत्यल्पमतिभूरिच । सन्दिग्धासम्भवाव्यक्तमन्यार्थंचातिदोषवत्। यद्व्यस्तपदमव्यापिनिगूढा
र्थंतथाकुलम्। व्याख्यागम्यमसारञ्चनोत्तरंस्वार्थसिद्धयइति। एतान्स्वयमेवव्याचष्टे। चिह्नाकारसहस्रन्तुसमयंचावि
जानता। भाषान्तरेणवाप्रोक्तमप्रसिद्धन्तदुत्तरम्। प्रतिदत्तंमयावाल्येप्रतिदत्तंमयानहीति। यदेवमाहविज्ञेयंविरुद्ध
न्तादिहोत्तरम्। जितःपुरामयावायमस्मिन्नर्थेविवक्षिते। पुरामयायमितियत्तदूनंचोत्तरंस्मृतम्। गृहीतमितिवाच्येतुका
र्यन्तेनकृतंमया। पुरागृहीतंयद्द्रव्यमिष्येतदितिभूरितु। देयंमयेतिवक्तव्येमयादेयमितीदृशम्। सन्दिग्धमुत्तरंज्ञेयंव्यवहा
रेबुधैःसदा। मयादेयमित्यत्राकारप्रश्लेषस्यापिसम्भवात्सन्दिग्धमिदम्। असम्भवमस्माभिर्दैयन्धनमस्मत्प्रपौत्रपुत्रेस्वद
त्तमित्येवमादि । अव्यक्तंसुखेनयदक्षराण्येवनिर्णेतुमशक्यानि। एतावुत्तराभासावुद्दिष्टावपिस्पष्टाविति नेनलक्षितौ।
बलाबलेनचैतेनसाहसंस्थापितंपुरा। अनुक्रमेतन्मन्यन्तेतदन्यार्थमितीरितम्। एतेनचबलेनप्राबल्येनअबलेनदौर्बल्ये
नचपुरासाहसंमनुष्यमारणादिस्थापितंहन्ताऽगोपितमितियावत्। इत्यादिप्रकृतानुपयोगित्वादन्यार्थमित्यर्थः॥ व्यस्तपद
म्पदान्तरेणाभियोगेकृतेपदान्तरसंक्रमेणोत्तरमितिसोदाहरणंमिताक्षरायांव्याख्यातन्तत्प्रागेवोक्तम्। स्मृतिचन्द्रिकाया
न्तुपूर्वपक्षनिश्चयात्प्रागुच्यमानंसर्वमेवोत्तरंव्यस्तपदमितिव्याख्यातम्। व्यस्तम्पदंस्थानमुपन्यासावसरोयस्येतिव्युत्पत्तेः। भ
वदेवेनतुअव्यस्तपदव्यापीतिपाठंलिखित्वाऽनन्वितार्थपदव्याप्तमितिव्याख्यातंव्यवहारतिलके। तत्तुदोषान्तरसंकरादयुक्तमि
तिप्राच्यमेवव्याख्याद्वयमनुसन्धेयम्। उत्तरमित्येकवचनाद्व्याहतवक्तोर्याद्युत्तरसङ्करादप्युत्तराभासत्वंसूचितम्। कात्याय
नादिभिःस्पष्टमुक्तम्। पक्षैकदेशेयत्सत्यमेकदेशेचकारणम्। मिथ्याचैवैकदेशेचसंकरात्तदनुत्तरमिति। संकरादनुत्तर
त्वेवीजंकात्यायनेनैवोक्तं॥ नचैकस्मिन्विवादेतुक्रियास्याद्वादिनोर्द्वयोः। नचार्थसिद्धिरुभयोर्नचैकत्रक्रियाद्वयमिति। मि

थाकारणोत्तरयोः संकरेऽर्थिप्रत्यर्थिनोर्द्वयोरेकस्मिन्व्यवहारे क्रियोपन्यासः प्रसज्यते। मिथ्याक्रियापूर्ववादे कारणे प्रतिवादि
नीतिस्मरणात्। मिथ्यामिथ्योत्तरे। पूर्ववादे क्रिया प्रार्थिनः क्रियोपन्यास इत्यर्थः। यथा सुवर्णशतं रूपकशतं च त्वयानेन गृहीत
मित्यभियोगे सुवर्णशतमगृहीतं रूपकशतं तु गृहीतमङ्गीकृत्य प्रतिदत्तं प्रतिग्रहलब्धमित्यादि। द्वयोरेकक्रियोपन्यासाभावे च
व्यवहारघटकभेदे व्यवहारद्वयप्रसक्तावेकस्मिन्नपि व्यवहारान्तरप्रवर्तनेनोचित्याद्युगपद्व्यवहारासम्भवरूपा युक्तिर्बीजम्।
अत एवतस्यतस्यांशस्य तत्प्रमाणमात्रसाध्यत्वे कर्मेणोत्तरत्वमेवेति क्रमिकं व्यवहारद्वयं तयोरेव प्रवर्तनीयमित्युक्तं मिताक्षरास्मृति
चन्द्रिकादिग्रन्थेषु। कारणे प्राङ्न्याये सङ्करे तु प्रत्यर्थिन एव क्रियाद्वयमप्रसज्यते। कारणे प्रतिवादि निष्प्राङ्न्यायकारणोत्तरे तु
प्रत्यर्थी निर्दिष्टो क्रियामिति स्मरणात्। यथा पूर्वोदाहरणे एव। यद्येवं ब्रूयात् सुवर्णशतं गृहीतं प्रतिदत्तं रूपकशतं तु प्रागयं
व्यवहारमार्गेण मया पराजित इति। अत्र यद्यप्येकस्यैव प्रमाणद्वयोपन्यासस्तथापि प्राग्युक्त्या युगपद्व्यवहारासंभवरूप
योनुसरणेनैवोभयत्रापि क्रमिकव्यवहारप्रवृत्तिरिष्टैव। कारणोत्तरे प्राङ्न्यायस्य दिभिस्तद्विभावनीयम्। प्राङ्न्यायस्तु तद्व
र्शिभिर्जयपत्रेण वेति क्रमस्यावश्यकः। एवमुत्तरत्रसङ्करेपि। यथानेन सुवर्णरूपकशतं वस्त्राणि च गृहीतानीत्यभियोगे स
त्यं सुवर्णं गृहीतं प्रतिदत्तं च रूपकशतं न गृहीतम् वस्त्रविषये प्राक्पराजित इति। अत्र द्वयोः क्रिययोः पूर्वन्यायेन एकस्य क्रियाद्वय
मिति द्वयमप्यनुत्तरत्वे बीजम्। सम्प्रतिपत्तौ क्रियाभावाच्चतुःसङ्करेणोदाहार्यः सङ्करसम्भवमात्रेणानुमिताक्षराकारेणैव चतुःस
ङ्करे बीजमुक्तम्। अत एवाग्नेयं यत्र सम्प्रतिपत्तेरुत्तरान्तरेण सङ्करस्तत्रोत्तरान्तरोपादानेन व्यवहारः प्रवर्तनीयः। सम्प्रतिपत्तौ कि
॥ [illegible] ॥ याभावादिति नैवोक्तम्। सङ्करस्य वैकल्पिकव्यवहारप्रावश्यकेकमोर्थिप्रत्यर्थिसभ्यानामन्यतरेच्छया बोध्यः। यत्र तु प्रभूता
॥ [illegible] ॥ र्थविषयत्वमन्यतरोत्तरस्य फलवत्तरत्वम्वा व्यवहाराकरणेन्यतरस्य पीडा निरेकादिकं वा प्राप्नोर्विनिगमकमस्ति तत्र तदुत्तरोपादा
॥ [illegible] ॥ नेनैव प्रथमो व्यवहारः प्रवर्तनीय इत्याह। हारीतः। यत्प्रभूतार्थविषयं यत्र वा स्यात्क्रियाफलम्। उत्तरं तत्र तज्ज्ञेयमसंकी

र्णमतेनान्यथा । असंकीर्णे सङ्करप्रयुक्तव्यवहारयौगपद्यासम्भवदोषाभावात् । अतोऽन्यथासङ्कीर्णमिति शेषः । तेन तत्रेच्छा
क्रमेणाव्यवहारक्रमइति भावः । सङ्करादनन्तरत्वेप्रागुक्तियुक्तिरनेन सूचिता । अत एव मिथ्योत्तरङ्कारणाख्यानामेकत्र
चेदुभे । अन्यं वापि समाम्नेन तत्रया ह्यं किमुत्तरमित्युक्त्वा तदुक्तं हारीतेन । उदाहरणं तु यथानेन सुवर्णरूपकशतं वस्त्राणि च
गृहीतानीत्ययं प्रत्यर्थी अभियोगे सुवर्णरूपकशतमनगृहीतं वस्त्राणि गृहीतानि प्रतिदत्तानीत्युत्तरे ऽत्र मिथ्योत्तरस्य प्रभूतार्थवि
षयत्वात्तदुपादाय क्रियार्थिनः प्रथमं व्यवहारो द्रष्टव्यः । पश्चाद्स्वविषयेकारणोत्तरमादाय प्रत्यपरक्रियाऽवलंबनो व्यवहारः ।
। एवं मिथ्याप्राङ्न्यायसङ्करेऽपि बोध्यं । सम्प्रतिपत्तिर्यदि सुवर्णादौ तत्र क्रियाफलाभावादल्पविषयमप्युत्तरमादायैव व्यवहा
रो भवति । एवं तुल्यार्थविषयत्वेऽप्युत्तरयोर्यत्र प्रथमदृष्टे फलं तदुत्तरावलम्बनेन व्यवहारो द्रष्टव्यः । तथा चोक्तं । यत्र वा स्यात्क्रि
याफलमिति । अर्थपूर्वं कथयाथानावर्थिप्रत्यर्थिनोर्यदा । वादो वर्णानुपूर्व्या स्यात् ह्यःपीडामवेक्ष्य चेति बृहस्पतिः । अत्र वा चर्त्र
निमिश्राः । भिन्नभिन्नावच्छेदेन कारणादिसंस्पर्शे सङ्करादनन्तरमिति । पक्षैकदेशे यत्सत्यं मिथ्यादि वाक्यार्थ एव न सम्भवति ।
अवच्छेदभेदेन सांकर्यस्यैवाभावात् । किन्तु पक्षस्यैकदेशे विशेषे यदुत्तरं सङ्कीर्णं तेनैतदनुत्तरं । शेषमेकदेशपदद्वयमनुवा
दः यथा शतमगृहीतं गृहीतमपि परिशोधितं वा न धारयाम्येवेत्यादि । यत्तु । शताभियोगे पञ्चशतं परिशोधिताः पञ्चविंशतिस्तु ने
व गृहीताः । पञ्चविंशतिस्तु धार्यन्ते देयाइत्युत्तरं । यत्र वस्तुभेदेन प्रागुदाहृतमन्तत्र यत्प्रभूतार्थविषयमिति वचनात् । कारणो
त्तरमादाय प्रथमं विचारः कार्यः । पश्चादनुपञ्चविंशतिरपह्नुता अर्थिप्रमाणेन वा साध्याः प्रत्यर्थिप्रमाणेन वा साध्याः । न चैवमनैक
धिम्नि येतद्वचनविरोधः । न्यायमूलकत्वेनैतद्वचनस्य लब्धार्थप्रमाणापरिग्रहाबाधकत्वात् । सति चानिर्णायप्रमाणे तदंशसंश
यस्यावश्यनिरस्यत्वात् । न च यत्प्रभूतार्थविषयमित्येतद्वचनबलादेव लब्धार्थप्रमाणग्राह्यता । तथात्वेऽन्यस्मृतीनां श्रुतिमूलक
तापत्तेः न चेष्टापत्तिः । असम्भवं मूलान्तरत्वस्यैव श्रुतिमूलकत्वप्रयोजकत्वात् । यूपहस्त्यादिस्मृतीनां तथा सिद्धान्तवचनात् । अ

अचन्यायमूलकत्वस्यैवसम्भवात्। नचतादृशविषयासम्भवएवनचैकस्मिन्निति वचनस्यमूलमितियुक्तम्। वक्तृशोविषयद
र्शनात्। नचेदृशमनुत्तरंनदेयमित्युपदेशार्थमिदम्। यथावस्थितार्थकथनस्यनिषेद्धुमशक्तेः। विद्वाएवविवदन्तेनत्वज्ञाइ
त्यपिवक्तुमशक्यम्। नचातएवनैपर्य्यनुयोज्याः। छलंनिरस्यभूतेभ्यःव्यवहारान्नयेन्नृपइतिवचनात्तादृशामपितन्त्रतोवोध्यत्वा
त्। नचवचनादेवास्योत्तरस्यहेयता। वचनस्यादृष्टार्थतापत्तेः। अपिच। अतन्नगृहीतमित्यस्यनाग्रहणमात्रमर्थः। अतप
दानर्थक्यप्रसङ्गात्। नापिअताग्रहणं। विशेषनिषेधेशेषाभ्यनुज्ञापत्तेः। नापिअतपदम्पक्षप्राप्तानुवादः। एवंह्यत्येकदे
शस्यगृहीतत्वविभावनादेवस्यापकोनिह्नुतेलिखितेनैकमितिवचनादेतावद्धनन्निरपवादमेवलभेतेत्यनिष्टापादकमेवेदमुत्त
रंस्यात्। मिथ्याकारणयोर्वापीत्यादिवचनमप्येवन्नेयम्। तस्माद्यावत्प्रकृतविषयःसंशयोनुवर्त्ततेतावन्निर्णायकमप्रमाणंलभ्यते
तावद्विचारणीयमितिपरमार्थः। भवदेवप्रदीपादयोप्येवम्। तस्मादस्मदुक्तमेवपक्षैकदेशेयत्सर्व्वमित्यादेरर्थमिति। त
देतद्वागाडंवरमात्रार्थक्षोदक्षमम्। तथाहि। तिमाक्षराद्युक्तरीत्यादृष्टार्थतयैवसकलवचनस्वरसाभङ्गसम्भवात्। नचै
कस्मिन्नित्यादिवचनपर्य्यालोचनयायुगपदनुत्तरत्वस्यैवास्यवर्णितत्वात्। क्रमिकान्तरत्वस्यसर्व्वैरपीष्टत्वात्। नचायौगपद्य
मेवनिर्वीजम्। युगपद्व्यवहारासम्भवस्यैतादृशविषयेउपपादितत्वात्। व्यवहारस्यचतुष्पात्त्वात्। क्रियारूपपादभेदेवा
ध्यभेदेनभाषारूपपादभेदेचानद्भुढितव्यवहारभेदप्रसङ्गस्यसचेतसादुरपह्नवत्वात्। किञ्चभवदुक्तरीत्यान्यायाभासमूलक
तयानचैकस्मिन्नित्यादेरप्रमाण्यप्रसङ्गः। यच्चैकदेशपदस्यैकविषयपरत्ववर्णनमेकदेशपदद्वयस्यचानुवादत्वप्रतिपादन
न्तदतिमन्दम्। एकदेशपदेरूढित्यागप्रसङ्गात्। सम्भवत्यस्मदर्थनार्थवत्त्वेनिरर्थकानुवादस्यानर्थक्यापरपर्य्यायस्याभ्युप
गमानौचित्याच्च। यच्चैकविषयसङ्करउदाहृतन्तदपिसन्दिग्धादिदोषसङ्कीर्णमसाधारण्येनैतद्वचनविषयतानर्हमितिस
मस्तवचनानर्थक्यं। यदप्युक्तं। असम्भवंमूलान्तरत्वस्यश्रुतिमूलकत्वंप्रयोजकत्वमिति। तदपिमीमांसानध्ययननिवन्धनम्।

नह्यसम्भवमूलकत्वमष्टकादिस्मृतीनांश्रुतिमूलकत्वेप्रयोजकम्। तथासतितुलापुरुषादिस्मृतीनांलोभादिमूलकत्वस्यसुतरां
सम्भवाच्छ्रुतिमूलकत्वाभावप्रसङ्गः। यथाऽऽर्बार्त्तिककाराः। रागद्वेषमदोन्मादप्रमादालस्यलुब्धता। कथानोत्प्रेक्षितुंशक्याः
स्मृत्यप्रामाण्यहेतवइति। यूपहस्त्यादिस्मृतीषुमुक्तकत्वेनाप्तप्रणीतत्वानवधारणान्मूलभूतश्रुत्यकल्पनंकर्तृसामान्याभा
वादिति। भाष्याभिमताप्रामाण्येमूलयुक्तिः। हेतुर्दर्शनन्तदुपष्टम्भकमन्वाचयमात्रमितितन्नैवव्याचक्षाणमाकरे। वार्त्तिक
कारणान्तुदृढतरवैदिकपरिग्रहीतप्रामाण्यमेवतासामभिमतमित्यर्पितदभियोगभाजांनदुर्लभम्। यद्यप्यपिवेत्याद्यसम्भ
वदुक्तिकस्वकपोलकल्पितविकल्पजालमुद्भाव्यखण्डनन्तदपिप्रस्तुतप्रतीपम्। तादृशोत्तरस्यसर्वैरभ्युपगन्तव्यत्वात्। अत
ग्रहणाभावस्यतदर्थस्यादुष्टत्वाच्च। अयमत्रसकलवचनसन्दर्भसमाधानान्निष्कृष्टोऽर्थः। क्रियालिखितादिप्रमाणरूपाप्रत्य
वस्कन्दनेप्राङ्न्यायेचप्रत्यर्थिनएवभवति। मिथ्योत्तरेचार्थिनएव। सम्प्रतिपत्तौनकस्यापीतिव्युत्पादयिष्यते। एवञ्चसत्येन
यत्रेतरेषान्त्रयाणामुत्तराणांसङ्करस्तत्रप्रत्यर्थिनःकारणप्राङ्न्यायसाधनायप्रमाणद्वयमर्थिनश्चस्वसाध्यसाधनायैकम्प्रमाण
म्प्राप्नोतियत्रकारणप्राङ्न्याययोस्तत्रप्रत्यर्थिनःप्रमाणद्वयम्। यत्रपुनर्म्मिथ्याकारणमिथ्याप्राङ्न्याययोर्वातत्रार्थिप्रत्यर्थिनो
रेकैकम्प्रमाणम्। नचयथाप्राप्तमेवमेवास्त्वितिवाच्यम्। प्रमाणंहिसाध्यसिद्ध्यर्थंएकस्मिन्व्यवहारेचैकमेवसाध्यमेकस्यैवो
चितम्। तेनतत्रनोभयोःप्रमाणमेकस्यवाप्रमाणद्वयम्भवितुमर्हं। उभयोःसाध्याभावादेकसाध्यस्यचैकेनैवप्रमाणेनसिद्धौ
क्तिरवैयर्थ्यात्। तस्मात्युक्तमुक्तंसङ्करस्तदनुत्तरमिति। तथाचसर्वत्रपक्षव्यापकमेवोत्तरंदेयम्स्थापनीयञ्च। यत्रपुनःसर्व
थानथाविधमुत्तरन्नलभ्यतेकिन्त्वेकैकांशव्यापकमनेकमेवोत्तरम्। तत्रनानोत्तरवशेननानाप्रतिज्ञाःकृत्वाक्रमेणैकैकप्रतिज्ञा
यामेकैकोत्तरोपादानेनव्यवहारःप्रवर्त्तनीयोऽन्यथातत्रनिर्णयाभावप्रसङ्गंसचानुचितः। छलंनिरस्येत्यादिवचनात्। सङ्करात्
नुत्तरमितिहेतूपादानादुक्तविधयासङ्करेनिराकृतेस्यादेवोत्तरत्वमित्यभिप्रायः। एतदेवव्यतिरेकमुखेनोक्तम्। यत्प्रभूतार्थ

विपर्ययंचवास्यात्क्रियाफलम्। उत्तरन्तत्रतज्ज्ञेयमसङ्कीर्णमतोन्यथेति। अतोन्यथायौगपद्येसंकीर्णंस्यादितिप्रागेवव्या
ख्यातं। पक्षव्यापकानेकोत्तरविकल्पेतुनजातुविन्यसङ्करावसरः। तस्मान्नक्वापिसङ्करेसदुत्तरत्वमिति॥●॥ अथक्रियापादः। त
त्रतदुपयोगिप्रत्याकलितम्प्रथमंनिरूप्यते। विज्ञानयोगिनानस्यव्यवहारपादत्वानभ्युपगमेपिक्रियादानोपयोगित्वाभ्युपगमा
त्। अन्येतुव्यवहारपादत्वस्यैवस्वीकारात्। क्रियापादप्रागभावत्वमुभयसंमतः। प्रत्याकलितन्नामभाषोत्तरयोरर्थिप्रत्यर्थि
भ्यांलेखितयोःक्रियोपन्यासनमन्वये।मर्मध्येकस्यस्यात्काचास्मिन्पदेक्रियास्याद्धीनवादीवानयोर्मध्येकइत्यादिःसभ्यप्राड्वि
वाकस्यसभापतेः। सभ्यस्यप्राड्विवाकस्यवापरमर्शउच्यते। तथाचवृहस्पतिः। येनुतिष्ठन्तिकरणेतेषांसभ्यैर्विभावना। कथ
यित्वोत्तरंसभ्यैर्दातव्यैकस्यवादिनः। करणेधर्माधिकरणे। येतिष्ठन्तिवादिनःप्रतिवादिनस्तेषामुत्तरंमिथ्यादिचतुर्भेदं
कथयित्वाविचार्यैतदुत्तरेकस्यक्रियोपन्यासउचितइति। निर्धार्यविभाव्यतेसाध्यमनयेतिविभावनाक्रियाप्रमाणमिति
यावत्। एकस्यवादिनोर्थिप्रत्यर्थिन्यतरस्यसभ्यैर्दातव्या। उपन्यसनीयत्वेनाज्ञापयितव्येत्यर्थः॥ कात्यायनोपि। लिखिते
शोधितेसम्यक्सतिनिर्दोषउत्तरे। अर्थिप्रत्यर्थिनोर्वापिक्रियाकरणमिष्यते। क्रियाकरणंक्रियोपन्यासः। पुनर्वृहस्पतिः।
श्रुत्वापूर्वोत्तरंसभ्यैर्निर्दिष्टायस्यभावना। विभावयेत्प्रतिज्ञातंसोखिलंलिखितादिना। विभाव्यतेसाध्यतेसाध्यमनयेतिविभाव
नाक्रियैव। पूर्वोत्तरम्पूर्वपक्षमुत्तरञ्चेत्यर्थः। द्वंद्वेकवद्भावः। निर्दिष्टाबुद्ध्योपदिष्टा। कस्मिन्नुत्तरेकस्यक्रियाक्रियारहि
तञ्चकिमुत्तरमित्यपेक्षयामाह। व्यासः। प्राङ्न्यायकारणोक्तौतुप्रत्यर्थीनिर्दिशेत्क्रियाम्। मिथ्योक्तौपूर्ववादीतुप्रतिपत्तौनसा
भवेत्। प्राङ्न्यायकारणोत्तरयोःप्राङ्न्यायेकारणेचसाधितेऽर्थीसाध्यस्यग्रहणस्यधारणासाधकत्वाद्ध्यर्थेसाधनम्प्रत्यर्थिनाभ्युप
गमाच्चेमितत्त्वैवसाध्यत्वाविभावात्तदुपन्यासकारिणएवप्रत्यर्थिनःप्रमाणोपन्यासस्तत्साधनायोचितः। अर्थिसम्बन्धविरहप्र
त्यर्थिसम्बन्धयोर्द्वयोरपितेनैर्वानर्थयात्। मिथ्योत्तरेतुवादिनःप्रमाणदुर्भिक्षंयदिप्रतिज्ञातेऽर्थेप्रमाणाभावादेवप्रत्यर्थ्यभि

मतेऽर्थिप्रतिज्ञानसाध्यहेत्वभावःसिध्यतीति तत्परिहाराय भावाभावयोर्भावस्यैव साध्यत्वेऽर्थिनैव क्रिया। सम्प्रतिप
त्तौ तु नैकस्यापि साध्यमस्तीति निरर्थकत्वात्क्रियैव नास्तीत्यर्थः। बृहस्पतिः। प्रतिज्ञां भावयेद्वादी प्रत्यर्थी कारणं तथा। प्रा
ग्वृत्तवादिविजयपत्रेणाभावयेदिति। प्राग्वृत्तं प्राङ्न्यायः प्रतिज्ञां प्रतिज्ञानार्थ इदं चपरिशेषान्मिथ्योत्तरविषयम्। जयप
त्रेणेति प्राङ्न्यायदर्शिप्रभृत्युपलक्षणम्। मनुः। अपह्नवे धमर्णस्य देहीत्युक्तस्य संसदि। अभियोक्ता दिशेद्देश्यं करणं वान्य
दुद्दिशेत्। दिशति कथयति यथादृष्टमर्थमिति देश्यः साक्षी। मेधातिथिस्तु। स्थानादिप्रयोगदेशवर्त्तिनः। साक्षिणो देश्य
शब्देन लक्ष्यन्त इत्याह। अन्यत्कारणम्प्रमाणं साक्षिभिन्नं लेख्यादि। मेधातिथिना तु करणं वा समुद्दिशेदिति पठित्वा क
रणशब्दः। प्रमाणसामान्यवाचकोऽपि गोबलीवर्दन्यायेन साक्षिभिन्नकरणमाचष्टे। पृथगुपादानात्। कारणं वा समुद्दिशे
दिति पाठेऽप्ययमेवार्थ इत्युक्तम्। यत्र मिथ्याप्रत्यवस्कन्दनयोः कृत्स्नपक्षव्यापिता। यथा कश्चिच्छृङ्ग्याहिकया कञ्चिदभियुङ्क्ते म
दीयेयं गौरमुकस्मिन्काले नष्टाऽस्य गृहे दृष्टा यतः। तत्राभियुक्त उत्तरयति मिथ्यैतत्। एतत्प्रदर्शितनाशकालात्प्रागेवास्मद्
गृहेऽवस्थितत्वादिति इदं तावत्पक्षप्रतिक्षेपक्षमत्वमभिथ्योत्तरत्वानर्हम्। कारणोपन्यासाच्छुद्धमिथ्योत्तरम्। एकदेशा
भ्युपगमाभावाच्चार्थिनालेखितोऽर्थ इत्यादि प्रागुक्तप्रत्यवस्कन्दनलक्षणं नास्कन्दति। साध्यभेदाय प्रतिज्ञाभेदापादकत्वाभावा
च्च न पक्षैकदेशे यत्नस्य मिथ्युक्तसङ्करवद्युगपद्व्यवहारासम्भवत्तं युगपदनुत्तरम्। तस्मात्कारणं मिथ्योत्तरमेवेदम्। अन्य
तरसाधनेनापि विवादपर्यवसानात्। अत्र मिथ्याक्रिया पूर्ववाद इति वचनात्कारणे प्रतिवादिनीति वचनाच्चान्यतरस्य यथा
रुचि क्रियोपन्यास इति भाति यद्यपि तथापि मिथ्याक्रियेत्यादेः शुद्धमिथ्याविषयत्वेन तद्विषयत्वाभावात्कारणे प्रतिवादिनीति
वचनात्। प्रतिवादिन एवात्र क्रिया। न चास्यापि शुद्धप्रत्यवस्कन्दनविषयत्वादेतद्विषयत्वाभावप्रसङ्गेन कस्यापि क्रिया प्रा
प्नोतीति निर्णयप्रतिबन्ध एवेति वाच्यम्। यतः प्रसिद्धप्रत्यवस्कन्दनेऽपि यद्ग्रहणाद्यभ्युपगमेन प्रतिदानादिकारणोत्तरतैवास्य।

सम्भाविनीतिवाच्यम् । एकदेशाभ्युपगमस्य प्रायिकत्वात् । कारणोपन्यासस्यैवोत्तरान्तरासंकीर्णतयानन्यपक्षत्वावश्यंभा
वात् । एवंकृत्स्नपक्षव्यापिसप्राङ्न्यायं मिथ्योत्तरमपिद्रष्टव्यम् । यथाप्राङ्न्यायमभियोगस्य एव । यद्येवंप्रतिवदतिमिथ्यैतत् । यतः
प्रागयमस्मिन्नभियोगे मयाव्यवहारमार्गेणपराजितइति । अत्रापिप्राङ्न्यायकारणोक्तावित्यादिप्राक्प्रदर्शितवचनात्प्रत्य
र्थिनएवक्रियोपन्यासः । प्राङ्न्यायसिद्धौप्रतिज्ञायाःप्रकटमेवमिथ्यात्वपर्यवसानाद्स्यशुद्धप्राङ्न्यायविषयत्वासम्भवादेतादृ
शप्राङ्न्यायविषयतायाश्चप्रवर्जनीयत्वात् । पक्षप्रतिक्षेपपक्षमस्यास्यप्राग्वदेवानुत्तरत्वानर्हत्वात् । यत्रतुकारणप्राङ्न्याययोः
कृत्स्नपक्षव्यापितयैकोत्तरत्वन्तत्रप्रत्यर्थिनाप्राङ्न्यायएवसाधनीयः । कारणसाधनस्यतदन्तर्भूतत्वात् । यथारूपकशतम
नेनमामकंगृहीतमित्यभियुक्तःप्रतिवदतिसत्यंगृहीतम्प्रतिदत्तञ्चादिदानीमस्मैनधारयामि । अस्मिन्नेवार्थेप्रागमुनाहमभि
युक्तस्तत्व्याञ्चव्यवहाररीत्यामुम्पराजितवानिति । इदानींहीनपरिज्ञानोपायः । तत्रमनुः । बाह्यैर्विभावयेल्लिङ्गैर्भावमन्तर्ग
तंनृणाम् । स्वरवर्णेङ्गिताकारैश्चक्षुषाचेष्टितेनच । स्वरोविकृतोगद्गदत्वादिः । वर्णोप्यस्वाभाविकःकृष्णतादिः । इङ्गितंस्वे
दवेपथुरोमाञ्चादि । आकारोविकृतोभ्रुवक्रिमादिः । चक्षुःकातरम् । चेष्टितंवृथास्थानात्स्थानान्तरगमनादि । याज्ञव
ल्क्यः । देशाद्देशान्तरंयातिसृक्कणीपरिलेढिच । ललाटंस्विद्यतेचास्यमुखंवैवर्ण्यमेतिच । परिशुष्यत्स्खलद्वाक्योविरुद्धम्ब
हुभाषते । वाक्चक्षुःपूजयतिनोतथोष्ठौनिर्भुजत्यपि । स्वभावाद्विकृतिंगच्छेन्मनोवाक्कायकर्मभिः । अभियोगेथसाक्ष्येवादु
ष्टःसपरिकीर्त्तितः । मनोवाक्कायकर्मभिर्यःस्वभावाद्विकृतिङ्गच्छेत्तेनभयादिनिमित्तमसावभियोगेसाक्ष्येवादुष्टःपरिकीर्त्ति
तः । मनःप्रकृतिविकृतिरेवंविविच्यदर्शयति । देशान्तरंयातिनचैकत्रावतिष्ठते । सृक्कणीओष्ठप्रान्तौपरिलेढिजिह्वयापुनःप
रिघट्टयतीतिकर्मणोविकृतिः । अस्यललाटंस्विद्यतेस्वेदबिन्दुवृन्दाङ्कितम्भवति । मुखंवैवर्ण्यंवर्णान्यत्वम्पाण्डुत्वकृष्णत्वादि ।
एतिप्राप्नोतीति । कायस्यपरिशुष्यत्स्खलद्वाक्यः । परिशुष्यत्वगद्गदंस्खलदव्यक्तपदवर्णोवाक्यंयस्यसः । वक्तुअनुपयुक्तमवि

रुद्धं पूर्वापरविरोधवद्भाषत इति वाचः ॥ परोक्तां वाचम्प्रतिवचनदानेन । चक्षुश्च परस्य प्रतिवीक्षणेन न पूजयति नाभिनंदती
ति मनोविकृतेर्लिङ्गम्परकीयमनोविकृतेरप्रत्यक्षत्वात् । तथा ओष्ठौ निर्भुजति वक्रयत्नपूर्वमधोभावेन चालयतीति कायस्यैव
विकृतिः । मनुरेव । आकारैरिङ्गितैर्गत्या चेष्टया भाषितेन च । नेत्रवक्त्रविकारैश्च गृह्यतेऽन्तर्गतं मनः । कात्यायनः । आका
रेङ्गितचेष्टाभिस्तस्य भावं विभावयेत् । प्रतिवादी भवेद्धीनः सोऽनुमानेन लक्ष्यते । कम्पः स्वेदोऽथ वैवर्ण्यमोष्ठशोषाभिमर्षणम् ।
भूलेखनं स्थानहानिस्तिर्य्यगूर्ध्वनिरीक्षणम् ॥ स्वरभेदश्च दुष्टस्य चिह्नमाहुर्मनीषिणः । प्रतिवादीग्रहणेन परस्परप्रतिपक्ष
त्वादुभयोर्ग्रहणम् । अभिमर्षणञ्जिह्वयोष्ठप्रान्तावलेहनं द्वन्द्वैकवद्भावः । श्रीरामायणे । आकारश्छाद्यमानोऽपि न श
क्यो विनिगूहितुम् । बलाद्धि विवृणोत्येव भावमन्तर्गतं नृणाम् । अनेन च पराजयसम्भावनामात्रम्प्रतिपाद्यते न तस्य च फलं क्रिया
दिपरामर्शः सभ्यादीनामवधानेन व्यवहारस्य विचारः । न त्वेतावता पराजयनिश्चयः साक्ष्यनिर्णयो वा नैसर्गिकनैमित्तिकवि
कारयोर्वैलक्षण्यस्य विवेकुमशक्यत्वात् । यद्यपि केऽपि निपुणतममतिर्विवेकं कुर्यात् तथापि न पराजयनिमित्तमसाक्षित्वनिबन्ध
नं वा दण्डादिकार्यं सम्भवति । नहि निपुणतमभिषगभियोगमूलकमरणनिश्चयेऽपि मृतकार्यमार्याः समाचरन्ति । योगीश्वरः ।
सन्दिग्धार्थं स्वतन्त्रो यः साधयेद्यश्च निष्पतेत् । न चाहूतो वदेत्किञ्चिद्धीनो दण्ड्यश्च स स्मृतः । सन्दिग्धमधमर्णादिभिरनभ्यु
पगतमेवार्थं यः स्वतन्त्रः । प्रमाणानिरपेक्ष एव साधयेदासेधादिना राजादिभ्योऽनिवेद्यैव तस्माज्जिघृक्षति तदुपरि दण्डाद्या
दयति वा स हीनो दण्ड्यश्च भवति । न परम्प्रकृतार्थहानिमाप्नोति प्रत्युत स्वतन्त्र्यनिबन्धनं राजदण्डमपि दातुमर्हति । यश्च स्वय
मभ्युपेतं साधनेन वा साधितं याच्यमानो निष्पतेत् । पलायेत सोऽपि तथा दण्ड्यः । साधितं धनञ्च दाप्यः । यश्चाहूतोऽभियुक्तो राज्ञा
चाहूतः सदसि न किञ्चिद्वदति स प्रकृतार्थहानिं दण्डञ्च प्राप्नोति । प्रकरणात् दुष्टपरिज्ञानमेवमाभूदिति दण्ड्यग्रहणाद्द
ण्डोऽपि भवति । पञ्चधा हीयत इति साध्याद्धीयत इत्यर्थाद्धीनत्वदर्शनादत्र तन्माभूदिति हीनग्रहणं नारदोऽपि । अन्यवादी क्रि

याद्वेषीनोपस्थाताविरुत्तरः । आहूतप्रपलायी चहीनःपञ्चविधःस्मृतः ॥ अन्यवादीतयाहीनःसएवविवृतवान । पूर्ववाद
म्परित्यज्ययोऽन्यमालम्बतेपुनः । वादसंक्रमणाज्ज्ञेयोहीनवादीसवैनरः ॥ कात्यायनेनापि । आवयित्वायदाकार्यन्त्यजेदन्य
द्वदेदसौ । अन्यपक्षाश्रयस्तेनकृतोवादीसहीयते ॥ यस्तुकश्चिदभियुज्यतात्वमेनमभियुज्यतइत्येवंविरुद्धमभिदधीतसो
प्यन्यवादीतयाहीनइत्याहसएव । नमयाभिहितंकार्दमभियुज्यपरंवदेत् । विब्रुवंस्तुभवेदेवंहीनत्तमपिनिर्दिशेत् ॥ न
यापत्रेविलिखितम्पूर्वपक्षमपन्यथाकुर्वन्नन्यवादीतयाहीनइत्याहसएव । लेखयित्वातुयोवाक्यमूनंवाभ्यधिकम्पुनः । वदेद्वा
दीसहीयेतनाभियोगमनुसार्हति । अभियोगंपूर्वपक्षंनार्हतिवादित्वयोग्योनभवतीत्यर्थः । क्रियाद्वेषीयोऽनुपस्थानुत्तरही
नतयास्तेनैवविवरणंकृतम् । सभ्याश्चसाक्षिणश्चैवक्रियाद्वैवामनीषिभिः । तांक्रियांद्वेष्टियोमोहात्क्रियाद्वेषीसउच्यते ॥
आह्वानादनुपस्थानात्सद्यएवसहीयते । निरुत्तरतयाहीनमप्याहसएव ॥ ब्रूहीत्युक्तोपिनब्रूयात्सद्यःसञ्जनमर्हति ।
द्वितीयेऽहनिदुर्बुद्धिंविद्यात्तस्यपराजयम् । पराजयम्पराजयचिह्नहीनताम् । अतएवहारीतः । सोपदेशंहरेत्कालमब्रुवं
श्चापसंसदि । उक्त्वावचोविब्रुवंश्चहीयमानस्यलक्षणम् । सोपदेशंसव्याजम् । यथाहकात्यायनः । व्याजेनैवतुयत्रासौदी
र्घकालमतिक्रमेत् । सोपदेशन्तुतद्विद्याद्वादहानिकरंस्मृतमिति । आहूतप्रपलायी । अभियोगपरिहारार्थमाह्वानबुद्ध्याप्र
च्छन्नचारी । एतेषामुत्तरोत्तरस्यहीनतागुर्वीतिज्ञापयितुंहीनम्पञ्चविधइत्युक्तंनपरिसंख्यार्थमन्येषामपिहीनत्वस्मरणात् । ही
नत्वगुरुत्वज्ञापनन्दण्डभूयस्त्वार्थं । तथाचकात्यायनेन । अन्यवादीपदार्थाच्चक्रियाद्वेषीपणान्दश । नोपस्थाताद्वे
योऽभ्यैवनिरुत्तरः । आहूतप्रपलायीचपणान्दापयस्तुविंशतिम् । अ्रापिविशेषचउक्तस्तेनैव । त्रिराहूतमनायान्तमाहूत
प्रपलायिनम् । पञ्चरात्रमतिक्रान्तंविनयेत्तंमहीपतिः । कात्यायनेनैवप्रकारान्तरेणापिहीनत्वमुक्तं । आविनयव्यवहारणामे
कंयत्नप्रभेदयेत् । वादिनंतोभयेचैवहीनत्वमपिनिर्दिशेत् । आविनयव्यवहाराणांसभ्यादीनांमध्येएकमपियःप्रभेदयेत् ।

अन्यद्वारानुरोधाद्भुत्पादनेनेत्यर्थः । बृहस्पतिरपि । भयंकुर्वंतिभेदंवाभीषणांवानिरोधनम् । एतानिवादिनोयस्तुव्यवहारे
सङ्गीयते । भयादीनिव्यस्तसमस्तानियेनकृतानिसङ्गीयतइत्यर्थः । भयंकरोतिभीषणमन्यमुखेनभयोत्पादनमितिशेषः ।
मनुरपि । अदेश्यंयश्चदिशतिनिर्दिश्यापह्नुतेचयः । यश्चाधरोत्तरानर्थान्विगीतान्नावबुध्यते । अपदिश्यापदेश्यञ्चपुनर्यस्त्व
पधावति । सम्यक्प्रणिहितञ्चार्थेपृष्टःसन्नाभिनन्दति । असम्भाष्येसाक्षिभिश्चदेशेसम्भाषतेमिथः । निरुच्यमानम्प्र
श्नञ्चनेच्छेद्यश्चापिनिष्पतेत् । ब्रूहीत्युक्तश्चनब्रूयादुक्तञ्चनविभावयेत् । नचपूर्वापरंविद्यात्तस्मादर्थात्सहीयते । ज्ञातारः
सन्तिमेत्युक्त्वादिशेत्युक्तोदिशेन्नयः । धर्मस्थःकारणैरेतैर्हीनन्तमपिनिर्दिशेत् । अदेश्यमनुपयोगासम्भवत्वादिनानिर्देष्टुमनर्हं
दिशतिकथयतियः । यश्चकथितमपिनमयेदमुक्तमित्यपलपति । यश्चाधरोत्तरानर्थान्पूर्वापराभिहितान्विगीतान्विरुद्धा
न्त्वेननावबुध्यते । यश्चापदेश्यंव्याजंपीडादिकमपदिश्योद्भाव्यापधावतिअपसरतिसभातः । यश्चसम्यक्प्रणिहितंसम्य
क्प्रणिधानेनाकलितमप्यर्थंपृष्टःसन्नाभिनन्दतिअनुवादप्रत्युत्तरदानादिनानाद्रियन्ते । मेधातिथिस्त्वदेशमि
तिपठित्वाभाषावादिलिखितदेशभिन्नमसम्भावितंवादेशम् । यद्वाभियोक्तादिशेद्देशमित्यत्रैवदेशशब्देनसाक्षिणोव्याख्याय
साक्षिनिर्देशअकालेअसम्भावितःसाक्षिणोनिर्दिशतिव्याचख्यौ । यश्चज्ञातारःसाक्षिणोमदुक्तेर्थेसन्तीतिसभायामुक्त्वाकेते
वदेत्युक्तोनवदेत्तान् । अपमामांज्ञातारः । यथार्थवाद्यहमितिजानानाःसाक्षिणइतियावत् । द्वितीयैकवचनान्तस्यास्म
च्छब्दस्यद्वितीयायाइत्यनेनमांइत्यस्यमाइत्यादेशः । ननुमेइतिषष्ठ्यन्तमेतत् । खलर्थमूनमितितन्निषेधात् । तेनमेतिसन्धि
रपिसमाहितइतिमेधातिथिः । आचार्यास्तु । व्याकरणाधिकरणेसन्धिकरणमत्रापशब्दइतिपूर्वपक्षप्रसङ्गेनवदन्तःव
र्ण्यंततामेवास्यमन्यंतेमेसन्तीतिसम्बन्धान्नतृतीयसम्बन्धप्रयुक्तषष्ठीप्रतिषेधावकाशइतितेषामभिसन्धिः । सन्तिज्ञातारइत्यु
क्तेतिकल्पतरुलिखितपाठस्तुनाकरएवाचार्यमेधातिथिभ्यामधृतत्वादितिध्येयम् । सिद्धान्तेत्वाचार्ययोर्यांछान्दसत्वमवसमा

धिरभिमतः। एतैःकारणैर्व्यस्तैःसमस्तैर्वावादिप्रतिवादिनोरन्यतरं हीनं निर्दिशेदित्यर्थः। हीनवादित्वाद्दण्डार्हता मात्वन्नप्रकृतार्थहानिरिति प्रमादपरिहारार्थमेवायम्प्रपञ्चः। छलन्निरस्येत्यादिवचनात्। अत एव नारदोपि। सर्वेष्वर्थविवादेषु वाक्छलेनावसीदति। परस्त्रीभूम्यृणादाने शास्योप्यर्थान्न हीयत इति। अस्यार्थः। अर्थविवादेषु सर्वेषु वाक्छलेप्रमादाभिधानेपूर्वं प्रपञ्चितेपि नावसीदति प्रकृतादर्थान्न हीयते। अत्रोदाहरणमात्रं परस्त्रीत्यादि। एतेषु प्रमादाभिधानेपि शास्योदण्ड्योपि यथा न प्रकृतार्थाद्धीयते। एवं सर्वेष्वर्थविवादेष्वित्यर्थः। अन्यथा परस्त्रीत्यादेरानर्थक्यमेव भवेत्। अर्थविवादोपादानान्मन्युकृतेषु प्रकृतार्थादपि हीयत इत्यर्थादुक्तम्भवति। यथाह मनेनपादेन शिरसि ताडित इत्यावेद्य भाषादिसमये हस्तेन पादेन ताडित इति वदन् दण्ड्यः पराजितश्च भवति। मन्युकृताक्षेपाद्य देवताडनादिकमयमस्मिन्नारोप्यावेदितवान् धर्माधिकरण इति प्रतीतेः। अत एव दोषानुरूपं संग्राह्यम्पुनर्वादो न विद्यत इति वार्हस्पत्यः पुनर्वादनिषेधोपि मन्युकृतव्यवहारविषय एव। ग्राह्योदण्डमित्यर्थात्। असम्भाष्ये सम्भाषमाणो नहैविज्जन इति यावत्। नेच्छेत् श्रुतमप्यश्रुतवत्कुर्य्यात्। राजकार्य्यादिव्याजमुत्पाद्य ग्रामान्तरङ्गच्छेत्। ब्रूहीत्यादिगतार्थम्। असन्देशमित्यादौ ब्रूहीत्यादौ चवकृतत्वोपि पथ्यम्वदितव्यमिति शावरभाष्ये। करोत्यास्मिन्प्रकरणे पुनरुक्तिर्न दोष इति भगवान्मेधातिथिराह। क्वचिदर्थविवादेप्यर्थहानिः। सन्दिग्धार्थमित्यनेन दर्शिता। नारदोप्याह। अनिवेद्यतु यो राज्ञे सन्दिग्धेऽर्थे प्रवर्त्तते। प्रसह्य स विनेयः स्यात् स चाप्यर्थो न सिध्यति। प्रवर्त्तने साधयति बलादिनेत्यर्थः। बृहस्पतिरपि। आहूतप्रपलायी च मौनी साक्षिपराजितः। स्ववाक्यप्रतिपन्नश्च हीनवादी चतुर्विधः। साक्षीपराजितः साक्षीवचनाद्यो पराजितः। स्ववाक्यप्रतिपन्नः स्वः प्रतिपद्युत्तरहीना। अनयोर्दृष्टान्तत्वेनोपादानम्। यथाऽनयोरविप्रतिपन्नार्थहानिस्तथान्ययोरपीत्यर्थः। अत्राप्युत्तरेणोत्तरहीनताधिक्यप्रतिपादनार्थं चतुर्विधग्रहणन्नपरिसंख्यार्थमन्यथान्येषान्तत्कथन्निरुध्येत। कस्मिन्कदाहीनकार्येमित्यत्र कालावधिरुक्तस्तेनैव। प्रपलायीचिप

क्षेपमौनहस्त्यप्रभिर्दिनैः। साक्षिभिन्नस्तथ्यायेन प्रतिपन्नस्य हीन इति। साक्षिभिन्नस्तथा पराजितः यस्य सामान्यः साक्षिणोनि
र्दिश्य पश्चाद्विमिथ्या निर्दिशत्मनुना ज्ञातार इत्यनेन हीनतयोक्तस्तत्रापि कालावधिं बृहस्पतिरेवाह। साक्षिणस्तु समुद्दि
श्य यस्तु तान्न विवादयेत्। त्रिंशद्रात्रिं पक्षाद्वा तस्य हानिः प्रजायत इति। दैविकराजिकान्तरायेणावध्यतिक्रमेपि न दोष इत्य
प्याह स एव। आचारकरणेदिव्ये कृत्वोपस्थानतिर्णयं। नोपस्थितो यदा कश्चिच्छलं तत्र न कारयेत्। दैवराजकृतो दोषस्त
स्मिन्काले यदा भवेत्। अवधिर्न्यागमात्रेण न भवेत्स पराजितः॥ इति आचारकरणे व्यवहारकरणे। छलं तत्र कारयेदिति
वदता यत्र वचनेनार्थहानिः प्रतिपादिता तत्रैव पुनर्विवादाभावोन्यत्र तु हीनतानिमित्तं दण्डं कृत्वा पुनर्वादः प्रवर्तनीय एवेति सू
चितं यत आह। कात्यायनः। पलायनानुत्तरत्वादन्यपक्षाश्रयेण वा। हीनस्य गृह्यते वादो न स्ववाक्यजितस्य चेति। स्ववाक्य
जितस्येति प्रकृतार्थहानिनिमित्तोपलक्षणं तेनैव विवृतमिदम्। योहीनश्चिह्नेन जितस्तस्योद्धारम्विदुर्बुधा। स्ववाक्यहीनोनाय
स्तु स्यात्तस्योद्धारो न विद्यत इति। उद्धारः पुनर्व्यवहारः। अत्रापि स्ववाक्यहीन इति प्रकृतार्थहानिनिमित्तोपलक्षणम्। विवा
दमुपक्रम्य राजानं वञ्चयित्वान्योन्यं यौ वादिप्रतिवादिनौ स्वयमेव विवादान्निवर्तेते तयोरुभयोरपि दण्डमाह बृहस्पतिः। पू
र्वोत्तरे सन्निविष्टे विचारे सम्प्रवर्त्तिते। प्रथमं ये मिथो यान्ति दाप्यस्ते द्विगुणं दमम्। मिथ इत्यनेन राज्ञोनिवेदनमकृत्वैवान्यो
न्यमित्युक्तेः राजवञ्चनमवगम्यते। कात्यायनस्तु स्पष्टमाह। आवेद्य प्रगृहीतार्थं प्रथमं यान्ति ये मिथः। सर्वे द्विगुणदण्डाः स्यु
र्विप्रलम्भान्नृपस्य त इति। द्विगुणो दण्डस्तु पराजयनिमित्तदण्डापेक्षया। ननु विवादास्पदीभूतद्रव्यापेक्षया अद्रव्यविवादेष्व
व्याप्तेः। राज्ञे निवेद्यान्योन्यं सम्यगासजात्तु संधत्ते नैव वा मध्ये करस्येतु न दण्ड इत्यर्थः। सिद्धं स्फुटीकृतं बृहस्पतिना। पूर्वोत्तरे
भिलिखिते प्रक्रान्ते कार्यनिर्णये। द्वयोरुत्तरयोः सन्धिः स्यादयः समदश्च वा रिव। साक्षिसभ्यविकल्पस्तु भवेत्तत्रोभयोरपि। दो
षायमानौ सन्धिं कुर्यातां तौ विचक्षणौ। प्रमाणसमता यत्र भेदः साक्षिचरित्रयोः। तत्र राजाज्ञया सन्धिरुभयोरपीष्यते।

धर्मार्थोपग्रहः कोऽभिभवेच्छान्येन भूतः। नक्लिश्यन्ते साक्षिसभ्यावैरङ्गविनिवर्तते। नियहानुग्रहन्दण्डं धर्मं प्राप्य यथोच
ः। विग्रहाज्जायते नृणां पुनर्दोषस्तथैव च। तस्मात्कुलगणाध्यक्षधर्मज्ञाः समदृष्टयः। अद्वेषलोभाद्यद्ब्रूयुस्तत्कर्तव्यं
विजानतेति। साक्षिसभ्यविकल्पइति। उभयोरर्थिप्रत्यर्थिनोः किमेते वक्ष्यन्तीति साक्षिसभ्यविषयको विकल्पो भवेत्तत्र
कार्य्यनिर्णये दोलायमानौ सन्देहदोलारूढौ यावदर्थिप्रत्यर्थिनौ सन्धिं कुर्यातान्तौ विचक्षणो चतुरो पराजयजनितापतिष्ठादि
तिरोधानादित्यर्थइति कल्पतरुः। रत्नाकरस्तु साक्षिणां सभ्यानाञ्च विकल्पः परस्परविरोधइत्याह। प्रमाणसमतेति। यत्र
सभ्यानां वादिद्वयपक्षे प्रमाणसाम्यं प्रतिभाति। यत्र च शास्त्रचरित्रयोर्भेदः शास्त्रेण शास्त्रान्तरेण चरित्रेव्यवहारे चरित्रान्तरे
णाभेदो विप्रतिपत्तिर्न तु शास्त्रव्यवहारयोः परस्परभेदइति व्याख्यानन्धर्मशास्त्रविरोधे व्यवहारस्यार्थशास्त्रत्वेन दुर्बलत्वात्।
तत्र राजाज्ञया सन्धिः कार्य्यत्वेन प्रशस्यते। धर्मार्थोपग्रहादिहेतुत्वात्। नियहानुग्रहाद्यव्यवस्थानिवर्तकत्वाच्च। तस्मादि
त्यादिना राजाज्ञैव केवलं न सन्धिहेतुः कुलगणाध्यक्षादिवचोऽपि राजवचनवत्तथैति प्रतिपाद्यते। एतच्च प्रत्याकलितं सभ्यैरवश्य
मादर्त्तव्यमित्याह नारदः। प्रमाणानि प्रमाणज्ञैः परिपाल्यानि यत्नतः। सीदन्ति हि प्रमाणानि प्रमाणैरव्यवस्थितैः। अ
स्यार्थः स्मृतिचन्द्रिकाकारेणैवमुक्तः। अव्यवस्थितैः प्रमाणैः प्रमाणानि प्रमाणां कर्त्तारः प्रमाणशब्देन लक्ष्यन्ते। ते सीदन्ति वि
नश्यन्ति निर्णयं नाप्नुवन्ति। अतः प्रत्याकलनकौशलेन प्रमाणज्ञैः सभ्यैर्यत्नतस्तानि प्रमाणानि परिपाल्यानि यथाव्यवस्था
दुःस्थितानि न भवन्ति तथा विवेचनीयानीत्यर्थइति। वयन्त्वव्यवस्थितैर्मूलशैथिल्यादिना दुःस्थितैः प्रमाणैः प्रमाणानुग्रा
हकैस्तर्कैः प्रमाणानि साक्ष्यादीनि सीदन्ति निर्णयाक्षमाणि भवन्ति हि यतोऽतः प्रमाणज्ञैः प्रमाणानि यत्नतः परिपाल्यानि स
तर्कपरिशुद्ध्यनुग्रहेण तत्त्वनिर्णयफलानि कार्य्याणीति व्याचक्ष्महे। अनयोश्च व्याख्यानयोस्तारतम्यन्तत्त्वविद्भिर्विवेचनी
यम्। इदञ्च प्रत्याकलितं व्यवहर्तृसम्बन्धाभावाद्व्यवहारदर्शिमात्रकर्तृकत्वान्न व्यवहारपादचतुष्टयान्तर्भूतमिति मिता॰

श्रुत्याकारस्य संमतं तन्नानुपादेयमेतदन्तरेणातृतीयक्रियापादानवतारात् । यथाहुः । कर्त्रभिधानानन्तरं मात्रियाप्रतिवादिनः
कस्य क्रिया का वा क्रियेति परामर्शं लक्षणस्य प्रत्याकलितत्वस्य योगीश्वरेण व्यवहारपादत्वेनानभिधानाच्च पदद्वयं विना त्रयाणामेवाभा
वानव्यवहारपादत्वमिति । अपरार्कस्तु । साध्यसिद्धिपदेन जयपराजयावधारणलक्षणप्रत्याकलितं योगीश्वरेण दर्शितमेव
हृदयया गृह्यत इति वदन् क्रियोपन्यासोत्तरकालीनविचारस्य सम्भवे क्रियमाणस्य प्रत्याकलितस्य ततामभिप्रैति । स्मृतिचन्द्रिकाकारस्तु
रेण क्रियापादे लापित्वयपराजयावधारणलक्षणप्रत्याकलितपादइति द्विपात्त्वमेवेति बुवाणो वाचस्पतिमिश्रप्रभृतीनामनुमतमित्याह । तदप्ययुक्तं
स्यात् स्मृतिचन्द्रिकाकारेमिताक्षराकारवदेवोत्तरत्वेन मानान्तरभावितानां हीनपरिज्ञानमधिकरणक्रियादानानां क्रिया
पादप्राग्भाविनां प्रत्याकलितत्वाभिधिनत्वात्तौ व्यवहारोपयोगित्वाद्व्यवहारस्यापि वचनात्प्रत्याकलितत्वस्यानुमतत्वाच्च व्यव
हारपादत्वम्परं तदनभ्युपगतमभ्युपगतवन्तौ क्रियापादप्राग्भावित्वमेव नु तस्य युक्तम् । ये मुनिष्ठनित्रकारणव्यादिनपत्रेभ्यः
व्यवहारपादत्वमस्तु नैवेत्यन्यदेतत् । यत्तु । साध्यसिद्धेर्व्यवहारफलत्वान्न व्यवहारपादत्वं युक्तमिति । तन्न । व्यवहार
भावनया फलापवर्गिण्याः फलनिरूप्यत्वेन फलस्य तदंशत्वेन तत्पादत्वे बाधकाभावात् । अत एव चत्वारः पादा इति मीमांसका
नामुद्घोषः । तत्पर्यपरिशुद्धावुदयनाचार्यस्तु प्रमाणोपन्यासमेव प्रत्याकलितमभिमन्यन्ते । नदाकुः । वस्तुविपरीतत्वसंभावना
नर्थादिप्रतिवादिनैवोक्तः । पृच्छोपक्रममात्रे वाद्वितीयोपयोगात् । सम्भवेऽपि तयोर्विषयोपस्थापनमात्रपर्यवसानात् तत्त्वे
वपरीक्षकत्वं तथापि पूर्वपक्षोत्तरपक्षप्रत्याकलितनिष्कर्षभेदेन चतुष्पाद्व्यवहारपूर्वप्रवर्तनात् फलतो न कश्चिद्विशेषः । एकक
र्तृकत्वेऽपि व्यवहारएव व्यापारकत्वापरस्य विचारे विभ्रमावसानात् । तस्मात्प्यनिपुणोदेशकस्यापि देशस्य सावगमभेदोस्ति । वस्तुत
स्तु न प्रमाणोपन्यासस्तेषाम्प्रत्याकलितत्वेनाभिप्रेतः । किन्तु सभिकक्रतः प्रमाणोपष्टम्भकरणकोटिपरामर्श एव । यतो वाद्य
त्तोयक्षयव्यवहारवत्पूर्वपक्षोत्तरपक्षौ स्वाभिमतसुदृढेनुकसाध्यनिर्देशमात्रपरौ किन्तु पूर्वपक्षिणा कथ्यमानोत्तरपक्षद्

यथा पुरस्सरं स्वपक्षे स्थिरीकृते सिद्धान्तवादिना तद्द्वयप्रतिक्षेपे पूर्वपक्षसाधकप्रमाणकप्रमाणप्रथमप्रस्थापनं क्रियते । त
तस्थेयैस्तदुभयविवेकाख्यप्रत्याकलिते वा विरुद्धार्थे एकतरपक्षनिर्द्धारणरूपः क्रियते तावता कथासमाप्तिर्वादे जल्पवितण्ड
योस्तु सभिकादीनामुत्तरेऽपि व्यापारो विद्यत इत्यादि वक्ष्यमाणाकरे । अथ भगुसाध्यादि विवरणसंमानमुत्तरभेदेनानियतम्प्रागु
पन्यासानर्हमिति तन्नपूर्वोत्तरपादान्तर्गतिसंस्थ । अत एव प्रत्याकलितस्यात्रोत्तरे वस्थ क्रियेत्यादि विमर्शस्य स्थेयकृतस्य प्रत्या
कलितस्य प्राचल्यम्प्रमाणोपन्यासात्तत्तु प्रतीत्यत्वमेव स्थेयकृतप्रमाणसाध्यसाधुत्वाविवेकत्वप्रमाणेत्यस्तु विस्तरः । एवम्प्रत्या
कलितमाकलितम् ॥ ● ॥ अधुना क्रियापादो विविच्यते । तत्र कात्यायनः । वादिना यद्भिप्रेतं स्वयं साधयितुं स्फुटम् । त
त्साध्यं साधनं येन तत्साध्यं साध्यते ऽखिलम् । सारभूतस्य पदस्य भुक्ता निःसारा निवृत्तिरपि । संसाध्यते क्रियया या तु ना क्रियाया
र्वर्जिताम् । पक्षद्वयं साधयेद्यात्ता न्नुत्वान्दूरतः क्रियाम् । क्रियां वलवतीमुक्त्वा दुर्बलां यो वलम्बते । स जयेऽवधृते सभ्यैः पुनः
स्तान्नाप्नुयात्क्रियामिति ॥ नाम्न वलवतीम् । तेन प्रागेव पूर्वं वलम्प्रमाणमुद्भाव्यं दुर्बलप्रमाणाङ्गं वनेन पक्षजितस्य पश्चात्प्रबलोप
प्रमाणोपन्यासावसरो नास्तीत्यर्थः ॥ अत एवाह नारदः । निर्णिक्ते व्यवहारे तु प्रमाणमफलम्भवेत् । लिखितं साक्षिणो वापि पू
र्वमावेदितं न चेत् । निर्णिक्ते शोधिते । अवधारकजयपत्रदानपर्यन्तं व्यवधारणं प्रापिते इति यावत् । पूर्वमेव दुर्वलप्रबलसकल
प्रमाणोपन्यासकृते तु सर्वप्रमाणानुसारेणैव निर्णयो नैकतरमात्रानुसारेण प्रबलनिरस्तेत्यभिधानात् । पश्चाद्दुद्भावितं तु लिखि
तसाक्ष्यादि शंकाकलंकितमित्यनुपादेयमेवेत्यर्थः । अत एव पूर्ववाक्येऽपि भूक्तौ निपुणैरिति निवोक्तम् । स एव यथा । पक्वे कुधान्येषु नि
ष्फला प्रावृषि गुणाः । निर्णिक्तव्यवहाराणाम्प्रमाणमफलन्तथेति । उत्तरे यत्र निवेशिते साध्यसिद्धेः साधनाय तत्साधननि
र्देशः कुर्यादित्यपेक्षिते याज्ञवल्क्य आह । ततोऽर्थी लेखयेत्सद्यः प्रतिज्ञातार्थसाधनम् । ततः उत्तरलिखनानन्तरमर्थी प्र
र्थ्यद्रव्यार्थः । साध्यं सास्यास्तीत्यर्थी साध्यवान् । सद्य एवाविलंबेन प्रतिज्ञातस्य प्रतिज्ञाविषयस्यार्थस्य साध्यस्य साधनम् ।

साध्यतेऽनेनेति साधनम्प्रमाणम् । साध्यादि लौकिकमलौकिकं वा लेखयेत् । लेखकद्वारा स्वयम्वा लिखेदित्यपि द्रष्टव्यम् ।
दृष्टार्थत्वात् । अत्र सद्य इति वदन्नुत्तराभिधाने कालविलंबनमप्यनुमन्यते । तच्च विशेषपरिभाषायां विवक्ष्यते । अर्थी लेख
येदित्यनेन संप्रतिपत्तौ न कस्याप्यर्थित्वमिति न कोऽपि साधनं लेखयेदिति पादद्वयेनैव व्यवहारनिर्वाहः । तथा चोक्तं द्विपात्सम्प्रति
पत्तिष्ठति मिथ्योत्तरे पूर्ववादिन एवार्थित्वात्स एव साधनं लेखयेत् । कारणोत्तरप्राङ्न्यायोत्तरयोस्तु प्रत्यर्थ्येव साध्यवान् कार
णप्राङ्न्याययोस्तस्यैव साध्यत्वादिति स एव लेखयेदित्युक्तम्भवति । तेन प्राङ्न्यायकारणोक्तौ तु प्रत्यर्थी निर्दिशेत्क्रियाम् । मिथ्यो
क्तौ पूर्ववादी तु प्रतिपत्तौ न सा भवेत् । मिथ्या क्रिया पूर्ववादे कारणे प्रतिवादिनि । प्राङ्न्याये पि तथैव स्यात्प्रतिपत्तौ न सा भवेदिति
व्यासादिस्मृत्युक्तौर्थ्यर्थिपदेन संक्षेपतः । सर्व एवोक्तो भवति । अत्र चण्डेश्वरः । साहसस्तेयपारुष्यगोभिशापात्यये स्त्रिया
म् । विवादयेत्सद्य एव कालोऽन्यत्रेच्छया स्मृत इत्यत्र सद्यो विवादयेदुत्तरन्दापयेदित्यनेन प्रत्यर्थिपक्षस्य लिखने विलंबप्राप्तौ
साहसादिषु तत्पक्षमपि सद्य एव लेखयेदित्ययोपवादः स यदि प्राग्भावावादिपक्षलिखने विलम्बोन्यार्थप्राप्तः । प्रत्यर्थिपक्ष
लिखनविलम्बः स्यात्तदैव घटते नान्यथेत्येतद्वाक्यव्याख्यानेयदर्थिपदेन प्रत्यवस्कन्दनप्राङ्न्याययोः प्रत्यर्थ्येवाऽर्थी जात इति स ए
व साधनं लेखयेदिति । प्रत्यर्थिनोऽपि ग्रहणमिति मिताक्षराकारैर्व्याख्यातन्तत्पूर्वापरविरोधान्मन्दमित्याह । तदतिसाहसम्
। भावोत्तरवादिपक्षमात्रलेखनपरत्वं यद्यनयोर्वाक्ययोस्तर्हि साधनपदान्वये समासानुपपत्तेः । सन्दर्भविरोधाच्च । साधन
लेखनस्यैवोत्तरलिखनोत्तरमाकांक्षितत्वात् । साहसादिष्वप्युत्तरभेदव्यवस्थयाद्वयोरपि पूर्ववाक्योपात्तसाधनलेखनसद्यस्त्व
र्थाक्षिप्तोत्तरलेखनविलंबापवादोपपत्तेः । नचोत्तरलेखनं सर्वत्र प्रत्यर्थिन एवेति तद्विलंबानुमतिविभक्तयोस्तत्प्रत्यर्थ्येव प्रतिपाद
नमर्हमिति वाच्यम् । एतावतापि क्रियोपन्यासप्रतिपादकवचनस्यार्थिपदेन भाषावादिमात्रग्रहणग्रहे नियामकाभावात् । प्र
त्युत मिथ्या क्रियेत्यादिवचनार्थसंग्रहाय द्वयोरपि ग्रहणमर्थिपदेनैतस्यैव युक्तत्वात् । एवं सति मिताक्षरायाम्पूर्वापरविरोधा

पादनमज्ञानविलसितमिवेत्यास्तांतावत् ॥ * ॥ बृहस्पतिः । द्विप्रकारा क्रियाप्रोक्ता मानुषी दैविकी तथा । एकैकानेकधा भिन्ना प्रो
क्ता तत्त्ववादिभिः । साक्षिलेख्यानुमानञ्च त्रिविधा मानुषी क्रिया ॥ साक्षिलेख्यानुमानमिति द्वन्द्वैकवद्भावः । साक्षी द्वादशभे
दस्तु लिखितन्दशधा स्मृतम् । अनुमानन्तु द्विविधन्नवधा दैविकी क्रिया । इदं संख्याभिधानन्न नियमाय भेदान्तराणामपि प्र
माणप्रकरणे वक्ष्यमाणत्वात् । कात्यायनः । लिखितं साक्षिणो भुक्तिः प्रमाणन्त्रिविधं विदुः । लेशोद्देशस्तु युक्तिः स्याद्दिव्यानी
ह विषादयः । लेशोऽन्यथानुपपन्नो धर्मस्तस्योद्देशो विमर्शो युक्तिरित्यर्थः । पूर्ववादे पि लिखितेयथाक्षरमशेषतः । अर्थी तु
तीयपादे तु क्रियया प्रतिपादयेत् । पूर्ववादो भाषा लिखितम्पूर्वपक्षतया लिखितं उत्तरमिति यावत् । तृतीयपादः प्रत्याकलि
तार्ख्यः तस्मिन्नपि क्रियया प्रमाणेन प्रतिपादयेत् साध्यमिति शेषः । भाषोत्तरप्रत्याकलिताख्यपादत्रये सति क्रियया स्वकार्य्य
मर्थी साधयेदिति नारदपठितार्थः । कार्य्यं क्रियाणां द्वैविध्यमाचष्टे व्यासः । कार्य्यं हि साध्यमित्युक्तं साधनन्तु क्रियोच्यते । द्विभेदा सा
पुनर्ज्ञेया मानुषी दैवकी तथेति । साधनम्प्रमाणम्प्रत्याकलितस्य तृतीयव्यवहारपादत्वमभ्युपगच्छतां स्मृतिचन्द्रिकाकारे
णैवमिदम्वचो व्याख्यातं । मिताक्षराकारमते तु तृतीयपादः क्रियये तिसंमुखएवार्थः । साक्षी द्वादशभेद इत्यादि प्रमाणप्रकरणे
प्रपञ्चयिष्यामः । याज्ञवल्क्यः । प्रमाणं लिखितम्भुक्तिः साक्षिणश्चेतिकीर्त्तितम् । एषामन्यतमाभावे दिव्यान्यतममुच्यत इ
ति । दिव्येष्वन्यतममित्यर्थः । कात्यायनः । यद्येको मानुषीं ब्रूयादन्यो ब्रूयात्तु दैविकीं । मानुषीन्तत्र गृह्णीयान्न तु दैवीं क्रियान्नृ
पः । यद्येकदेशप्राप्तापि क्रिया विद्येत मानुषी । सा ग्राह्या न तु पूर्णापि दैविकी वदतान्नृणाम् । एकदेशप्राप्ता साध्यैकदेशवि
षया । अत्र यद्येको वादी मानुषीं स्वपक्षसाधकतया न्यतमां क्रियां स्वपक्षसाधकतयोपन्यस्यत्यपरस्तु तत्प्रतिपक्षतया दैविकीन्तदैवादि
तरवादिपक्षसिद्धसिद्ध्योः स्तुल्यभवत्वेन न दिव्यापेक्षेति प्रथमवचनार्थः । एवमेकोपि वादी साध्यानेकत्वे साध्यैकदेशमपि यदि
प्रमाणेन साधयति तदैकदेशविभावितन्यायेनैकदेशान्तरस्यापि सिद्धेर्वक्ष्यमाणत्वान्न दिव्यावसर इति द्वितीयवाक्यार्थः । दि

व्यवहारूपप्रमाणयोरागमैकगम्यत्वान्मानुषप्रमाणासम्भवस्थले दिव्यस्य प्रामाण्यमिति मुनिवचनानि च विषयव्यवस्थैव न त्ववगम्यते।
अन्यान्यपि कात्यायनवचनानि मानवप्रमाणसम्भवाभिप्रायेण व्यवस्थापकानि वचनान्यनुमीमांस्यया । तथा न दैविकी क्रिया
विद्यमानेषु साक्षिषु । लेख्ये च सति वादेषु न स्याद्दिव्यं न साक्षिणः । निकाशायनः । उभयमाह । स्थावरेषु विवादेषु दिव्यानि परि-
वर्जयेत् । साक्षिभिर्लिखितेनाथ भुक्त्या चैतान्प्रसाधयेत् । इदमपि स्थावरादिविषयस्य स्थावरविषयविवादे भुक्त्यनुभवे प्रमाणसम्भव
एव मानुषमेव कार्यमित्येवम्परं न सर्वथा दिव्यपरिहारपरम् । सर्वेषामेव स्थावरव्यवहारे दिव्यासम्भवे निर्णयाभावप्रसङ्गा-
त् । कात्यायनः । दत्तादत्तेषु भृत्यानां स्वामिनां निर्णये सति । विक्रीयादानसम्बन्धे क्रीत्वा धनमनिच्छति । द्यूते समाह्वये चैव
विवादे समुपस्थिते । साक्षिणः साधनं प्रोक्तं न दिव्यं न च लेख्यकम् । पूगश्रेणीगणादीनां या स्थितिः परिकीर्तिता । तस्यास्तु
साधनं लेख्यं न दिव्यं न च साक्षिणः । द्वारमार्गक्रियाभोगजलवाहादियु क्रिया । भुक्तिरेव तु गुर्वी स्यान्न दिव्यं न च साक्षिणः ।
दत्तादत्ते प्रतिश्रुत्याप्रदाने दत्वा पुनः भृत्यवृत्त्यप्रदाने वा दत्ताप्रदानिके विवादपदे इत्यर्थः । भृत्यानां मिथ्यादिना वेतनादा-
ने । विक्रीयादाने स्वादिनाक्रय विक्रयानुशयेऽद्भुतरक्रमम् । दत्तादत्तादिषु वृत्तानां लिखितकरणाप्रसिद्धेर्भुक्तेरसम्भवा-
त्साक्षिण एव ना दृष्टविषये मनुष्यप्रमाणसम्भवे च दिव्यासम्भवाद्दिव्यं न च लेख्यकमित्युक्तम् । पूगादीनां व्यवस्थि-
तुव क्रकर्तृकायां लिखितं विना न निर्वाहः । सर्वेषां च बहूनां तत्रोदासीनसाक्षिसम्भवे मानुषसत्त्वे च दिव्यानवकाश इत्यभि-
प्रायाभिहितं न दिव्यं न च साक्षिण इति । द्वारमार्गादिष्वपि गमनागमनादिरूपभोगस्यैव परं भावाल्लेख्यस्य चाप्रसिद्धेर्मानुषा-
भाव एव न दिव्यावकाशान्न दिव्यमित्यादि भुक्तिरेव तु गुर्वी त्युक्तम् । एवं सर्ववचनानि विवेचनीयानि । अन्यत्र तु रत्नेति
कानेश्वायत्तं विस्रम्भ विवादे । स्यात्पापत्त्वमेवं च दिव्यासम्भवनिश्चयेन नारदेन । सम्भवतीत्युक्तं स एव । यदा साक्षी न
विद्येत विवादे वदतां नृणाम् । तदा दिव्यैः परीक्षेत शपथैश्च पृथग्विधैः । स्त्रीषु ग्रामीणानियोगे च साहसेषु वाद्ययोरपि । एष यदे

वविधिर्दृष्टः सर्वार्थेषु सर्वेषु चेति । कात्यायनः । गूढसाहसिकानां तु प्राप्तं दिव्यैः परीक्षणम् । युक्तिलेशेङ्गिताकारवाक्यप्र
क्षेपितैर्नृणाम् । अन्वेषणं साक्षिके दैर्घ्ये व्यवहारे विनिर्दिशेत् । दैवसाध्ये पौरुषेयीं न लेख्यं वा प्रयोजयेत् । बृहस्पतिः । मणि
मुक्ताप्रवालानां कूटकृन्न्यासहारकः । हिंसकोऽन्याङ्गनासेवी परीक्ष्यः शपथैः सदा । महापापाभिशापेषु निक्षेपहरणे तथा ।
दिव्यैः कार्यं परीक्षेत राजा सत्स्वपि साक्षिषु । चिरंतनोपांशुकृते चिरनष्टेषु साक्षिषु । प्रदुष्टेषु समानेषु दिव्यैः कार्यं विशो
धयेत् । अत्र सत्स्वपि साक्षिष्वित्यनेनैव बाहुल्यविषये साक्षिणः दूषिता वा न सम्भवन्ति । सम्भवन्तोऽपि वा कथञ्चित्कूटतया प्राप्य प्रदु
ष्टा इति विवक्षितं न तु यथाश्रुतम् । चिरन्तनकृतेऽपांशुकृते रहसि कृते इत्यनेनैव स्यात्तु सम्भवमेवोपलक्षयति । अत एवा
ह चिरनष्टेषु प्रदुष्टेषु समानेष्वित्यनेनासाक्षिविनिमिश्रानुपक्षिमवान् । व्यासः । प्रथमे पक्षिभिर्मुक्ते साक्षिणस्तु तथा प
रे । परेभ्यस्तु तथान्येभ्यस्तं वादं शपथैर्नयेत् । भिद्यन्ते विप्रतिपद्यन्ते । कात्यायनः । समकं साक्षिणां यत्र दिव्यैस्तत्रापि शोध
येत् । प्राणान्तिकविवादेषु विद्यमानेषु साक्षिषु । दिव्यमालम्बते वादी न पृच्छेत्तत्र साक्षिणः । साक्षिषु विद्यमानेष्वपि नवदो
षावष्टम्भेन दिव्यमाश्रयतः इत्यर्थः । समकं साक्षिणां यत्रेति । कर्तव्यमर्थिप्रत्यर्थिभ्यामुपन्यस्तानां साक्षिणां गुणतः संख्या
तश्च तुल्यत्वमित्यर्थः । व्यासः । न मर्यैव न कुर्वीत लेख्यं कूटमेतेन कारितम् । अधरीकृत्य तत्पत्रमर्थे दिव्येन निर्णयः । लेख्यदोषा
धनेन लेख्येन निर्णयाक्षमे तदा कूटसाक्षिषु सत्सु नतत्तद्वा पूर्वकन्यायेन दोषोद्भावनात्प्रागुपसम्भवे दिव्येन निर्णयः कार्य इत्यर्थः
। प्रजापतिः । यत्र नामगोत्रैश्चर्यं लेख्यं तु लेख्यं क्वचिद्भवेत् । अगृहीतधनेनैव कार्यं दिव्येन निर्णयः । मूललेख्येन नामगो
त्रैस्तुल्यं लेख्यान्तरं विपरीतार्थं यदा तदा तदग्रभागीकृत्य दिव्येन निर्णयः कार्य इत्यर्थः । कात्यायनः । यत्र स्यात्सोपधं लेख्यं त
द्ग्राह्येऽथ वितथं यदि । शोधयेत्तत्तु दिव्येन राजा धर्मासनस्थितः । सोपधं यत्र तत्तत्तं यत्र मिथ्योत्तरे पूर्ववादिनः क्रियादानं नो
त्तरवादिन इति प्रागुक्तत्वात्पूर्ववादिने मानुषप्रमाणसम्भवादुत्तरवादिनस्तु तदसम्भवान्मानुषसम्भवे च दिव्यानवसरा

दितिन्यायोमूलमिति । यदि तत्रापिभाषावादिनोदिव्यभिन्नप्रमाणाभावस्तदानकश्चिदभियोक्तारन्दिव्येषुविनियोजयेत् ।
अभियुक्तायदातव्यन्दिव्यन्दिव्यविशारदैरितिकात्यायनीयादुत्तरवादिनएवदिव्यन्देयम् । पूर्वार्द्धेनार्थिनादिव्यनिषेधात्प्र
त्यर्थिनोर्थात्सिद्धेःपुनःपरार्धेनतद्विधानस्यसिद्धेस्वारम्भोनियमार्थेतिन्यायेननिषेधदार्ढ्यार्थत्वात् । प्राङ्न्यायकारणोत्तर
योःक्रियापदमुभयक्रियापरमपिमिथ्योत्तरेमानुषमात्रपरंकात्यायनीयानुरोधात् । नचैवमनुषङ्गानुपपत्तिः । तदर्थकतयो
भयान्वयस्यानुषङ्गहेतुत्वन्नत्वनयावदर्थकत्वस्यविरुद्धार्थकत्वेव्यवायवत्सन्निधिबाधेनानुषङ्गस्यतुल्ययोगितानिबन्धनस्यभङ्गः
। किञ्चिदर्थानन्वयेपितुल्ययोग्यतायाःसत्वात्तदभङ्गात् । यदातुप्रत्यर्थीसन्दिहानस्तदातस्याधिकारनिश्चयाभावान्मानु
षप्रमाणाभावेपिनदिव्यंकिन्त्वर्थिनोधिकारनिश्चयादितिध्येयम् । नचनकश्चिदितिकात्यायनवचनविरोधः । अधिकारनि
श्चयेतत्प्रवृत्त्यसम्भवात् । धनन्धनीसाधयतीतिलोकप्रवादोपोद्बलितस्यथाभिप्रायकएव । यत्रविवादविषयेप्रत्यर्थीसन्दिहा
नस्तत्रतस्योत्तरानर्हतयेतिव्यवहारतत्वलिखनन्त्वतत्त्वमेव । अज्ञानरूपमिथ्योत्तरत्वात् । अज्ञानस्यनिश्चयाभावरूपस्यस
न्देहेपिसम्भवात् । प्रत्यर्थिनएवसर्वत्रोत्तरकर्तृत्वाच्च । यदातुद्वयोरपिमानुषप्रमाणाभावोदिव्यानध्यवसायश्चतदानिर्ण
योपायमाह । पितामहः । लेख्यंयत्रनविद्येतनभुक्तिर्नचसाक्षिणः । नचदिव्यावतारोस्तिप्रमाणन्तत्रपार्थिवः । निश्चेतुंयेन
शक्याःस्युर्वादाःसन्दिग्धरूपिणः । तेषांनृपःप्रमाणंस्यात्सर्वस्यप्रभुरिष्यतइति । तादृग्व्यवहारेन्नृपेणैवोभयापीडयास्वेच्छ
याकाचनव्यवस्थाकल्पनीयासोभाभ्यान्नातिक्रमणीयेत्यर्थः । दिव्यावान्तरभेदादिस्सर्वंदिव्यप्रकरणेवक्ष्यामः ॥ ● ॥ अथ
निर्णयापरपर्य्यायःसिद्धिपादः । येषांप्रत्याकलितंव्यवहारपादइत्यभिमतन्तेषांसिद्धेःफलत्वाद्व्यवहारपृथग्भावोऽन्येषा
म्प्रत्याकलितस्यचतुष्पात्त्वमेवतुसर्वंमतेव्यवहारस्य । याज्ञवल्क्यः । नत्सिद्धौसिद्धिमाप्नोतिविपरीतमथोन्यथेति । तस्य
प्रमाणस्यसिद्धौनिःशङ्कप्रामाण्यव्यवस्थितौसत्यांप्रमाणोपन्यासकर्त्तासिद्धिञ्जयलक्षणामाप्नोति । अन्यथाप्रामाण्यसिद्धौवि

परीतमर्थिकृम्पराजयलक्षणमाप्नोति । नारदः । सारस्तुव्यवहाराणां प्रतिज्ञासमुदाहृता । तद्धानौहीयतेवादीतरंस्ता मुत्तरोभवेत् ॥ तरन्निर्वाहयन् । उत्तरःउत्कृष्टोविजयीतियावत् । निर्णयप्रकारमाह । व्यासः । प्रमाणैर्हेतुचरितैःश पथेनन्टपाज्ञया । वादीसंप्रतिपत्त्यावानिर्णयोऽष्टविधःस्मृतः ॥ विवृतवानेतत्सएव । लिखितंसाक्षिणोभुक्तिःप्रमाणंत्रिविधंस्मृ तम् । अनुमानंविदुर्हेतुस्तर्कश्चेतिमनीषिणः । देशस्थितिःपूर्वकृताचरितंसमुदाहृतम् । अर्थानुरूपाश्शपथाःस्मृताःसत्य घटादयः ॥ तेषामभावेराजाज्ञांनिर्णयन्तुविदुर्बुधाः । इतिप्रमाणत्रयंसतर्कोपष्टभ्मनुमानञ्चरितादिचतुष्टयमित्यष्ट विधहेतुकत्वान्निर्णयस्याप्यष्टविधत्वंयद्यपिभुक्तिरप्यनुमानमेव । तथापिप्रत्याकलितकालीनेसभ्यानामनुमानमिहानु मानपदेनविवक्षितम् । धर्मेणव्यवहारेणचरित्रेणन्टपाज्ञया । चतुःप्रकारोभिहितःसन्दिग्धेर्थेविनिर्णयइतिवृहस्पत्यु क्तानान्धर्मादीनांनिर्णयहेतुत्वंप्रागेवतत्रसत्येस्थितोधर्मइत्यादिनातेनैवविवृतंप्रागेवनिरूपितंसएव । एकैकोद्विविधःप्रो क्तःक्रियाभेदान्मनीषिभिः । क्रियाभेदान्मानुषदैविकक्रियाभेदात् । धर्मनिर्णयस्यद्वैधमाहसएव । सम्यग्विचार्यकार्य्य न्नुयुक्त्यासम्परिकल्पितम् । परीक्षितन्तुशपथैःसज्ञेयोधर्मनिर्णयः । प्रतिवादीप्रपद्येतयत्रधर्मःसनिर्णयः । दिव्यैर्विशो धितःसम्यक्द्वितीयःसमुदाहृतः । प्रतिवादीप्रपद्येतेत्यस्यकाकाक्षित्वतुभयत्रसम्बन्धः । यत्रप्रतिवादीयुक्त्यासम्यग्विचार्य सम्परिकल्पितन्निर्धारितम्पुनःशपथैःपुत्रशिरःस्पर्शादिभिःपरीक्षितंकार्यम्प्रपद्येतांगीकुर्य्यात्सआद्योधर्मनिर्णयःदिव्यैर्धटा दिभिर्विशोध्यतःप्रतिवादीयत्रकार्य्यम्प्रपद्येतसद्वितीयोधर्माख्योनिर्णयइत्यर्थः । व्यवहारनिर्णयस्यापिद्वैविध्यमाहसएव । प्रमाणैर्निश्चयोयस्तुव्यवहारःसउच्यते । वाक्छलानुसारत्वेनद्वितीयःपरिकीर्त्तितः । प्रमाणपदेनात्रसाक्षिणोलिखित ञ्च । व्यक्त्यभिप्रायेणचवक्तृवचनम् । भुक्तेरनुमानत्वाद्दिव्यस्यधर्मनिर्णयान्तर्भावात् । वाक्छलानुसारत्वेन । वाक्छले नानुसारत्वेनयोनिश्चयोद्वितीयोव्यवहारसइत्यर्थः । चरित्रनिर्णयस्यापिभेदद्वयन्तेनैवाभिहितम् । अनुमानेननिर्णी

नच्चरित्रमितिकीर्त्तितम्। देशस्थित्यादिर्नीयन्तु शास्त्रविद्भिस्तदाहृतम्। अनुमानेनभुक्तिमुक्तिसरूपेणयोनिर्णयस्तदेकचरित्रम्। देशस्थित्यायोनिर्णयस्तद्वितीयच्चरित्रमित्यर्थः। राजाज्ञानिर्णयस्यापिद्विभेदताभिहितास्तेनैव। प्रमाणसहितान्युस्तुराजाज्ञानिर्णयःस्मृतः। शास्त्रसभ्यविरोधेचतथान्यःपरिकीर्त्तितः। प्रमाणसहितोराजाज्ञाआद्योनिर्णयइत्यन्वयः। शास्त्राणांसभ्यानाञ्चविरोधेपरस्परंविप्रतिपत्तौयाराजाज्ञासद्वितीयोराजाज्ञारूपोनिर्णयइत्यर्थः। ननुशास्त्राणांसभ्यानाञ्चविरोधस्यवासम्भवोस्मृत्यपेतादिकारिणांसभ्यानामदण्ड्यत्वात्। नचशास्त्राणाम्परस्परविरोधेसभ्यानाञ्चेत्यर्थइतिवाच्यम्। सभ्यविरोधोपन्यासानर्थक्यात्। शास्त्रविरोधेन्यायोपलब्धशास्त्रानुसारेणनिर्णयःकार्यइत्यस्यार्थस्यस्मृत्योर्विरोधेन्यायस्तुबलवान्व्यवहारतः। धर्म्मशास्त्रविरोधेतुयुक्तियुक्तोविधिस्मृतः। केवलंशास्त्रमाश्रित्यनकर्त्तव्योहिनिर्णयः॥ युक्तिहीनविचारेहिधर्म्महानिःप्रजायते। न्यायाधिगमेतर्कोऽभ्युपायस्तेनाभ्यूह्ययथास्थानंगमयेदित्यादियोगीश्वरनारदबृहस्पतिगौतमादिवचोभिर्निर्धारितत्वात्। तादृशविषयेराजाज्ञानवसरात्। अनीदृशेराजाज्ञायानिषिद्धत्वाच्चेतिचेत्। उच्यते। यत्रशास्त्रविरोधेसत्यान्यायेनान्यतरार्थविनिगमकःसभ्यप्राड्विवाकस्यसमापतेन्नैहृदयमारोहतिचिरन्तरंमीमांसितोऽपितादृशशास्त्रविरोधेनसभ्यानांकेवासमाधेयेसभ्यविरोधेराजाज्ञातद्व्यवस्थावादिप्रतिवादिभ्यांमन्तव्येत्येतदर्थकमिदंवचनम्। अतएवपितामहः। वचनंप्राग्लिखितम्भिन्नंतुयेनशक्याःस्युरित्यादि। धर्मादीनाञ्चतुर्णाम्पूर्वस्योत्तरेणतपेक्षयादुर्बलत्वमाहनारदः। धर्मश्चव्यवहारश्चचरित्रंराजशासनम्। चतुष्पाद्व्यवहारोऽयमुत्तरःपूर्वबाधकइति। व्यवहारस्यधर्मबाधकतामाह। बृहस्पतिः। शास्त्रंकेवलमाश्रित्यक्रियतेयत्रनिर्णयः। व्यवहारःसविज्ञेयोधर्मस्तेनावहीयते। शास्त्रशब्देनशास्त्रोक्तसाक्ष्यादिप्रमाणमात्रेणयोनिर्णयःक्रियतेसव्यवहारः। तेनधर्मःशपथादिकृतोनिर्णयोवहीयतेबाध्यते। मानुषप्रमाणेसतिदिव्यानवसरात्। अतएवहिकात्यायनः। युक्तियुक्तानुकार्य्येऽस्मिन्दिव्यंयत्रविवर्ज्जितम्। धर्म्मस्तुव्यवहारेणबाध्यतेतत्रनान्यथा। चरित्रंव्यवहा

रबाधकतामाह । बृहस्पतिः । देशस्थित्यानुमानेन नैगमानुमतेन वा । क्रियते निर्णयस्तत्र व्यवहारस्तु बाध्यते । नैगमाः पौ
रवासिनः । नैगमानुमतेनानुमानेनेति सम्बन्धः सामानाधिकरण्येन । बाध्यते देशस्थित्यपेक्षः । अमुमेवार्थं स्फुटयति कात्या
यनः । प्रतिलोमप्रसूतेषु तथा दुर्गनिवासिषु । विरुद्धं नियतं प्रोक्तं तं धर्मं न विचालयेत् । निर्णयन्तु यदा कुर्य्यात्तेन ध
र्म्मेण पार्थिवः । व्यवहारश्चरित्रेणात्तदा तेनैव बाध्यते इति । स्मृतिविरुद्धमपि नियतं तन्न विचालयेद्राजा । एवमाचारस्य
चरित्रबाधकमाह । बृहस्पतिः । विहाय चरितं चारं यत्र कुर्यात्पुनर्नृपः । निर्णयं सा तु राजाज्ञा चरित्रं बाध्यते तयेति । चरि
त्राचारं पूर्वपूर्वाचरितमाचारम् । यद्यपि तत्र धर्मं न विचालयेदित्युक्तं तथापि विहाय चरितं चारमित्युच्यते । तेन विरोधः प्रतिभा
ति । तथापि यदि तद्विचालने पुरराष्ट्रादिक्षोभो न भवति । तदा स्मृत्यादिविरुद्धत्वात् दूरीकृत्य स्मृत्याद्यविरोधी राजाज्ञयानि
र्णयः कार्य्य इति तात्पर्यम् । अत एव पुरराष्ट्रस्य विरुद्धस्य विवादस्यामादं यत्समुक्तम् । पुरराष्ट्रक्षोभापादकतया । तदना
पादकतया तु स्मृत्याद्यनुरोध एव कार्य्यो राज्ञेति । अत एवाह कात्यायनः । विरुद्धं न्यायतो यत्तु चरित्रं कल्प्यते बुधैः । एवन्त
न्निरस्येत चरित्रमनुत्पाद्ययेति । अपेक्ष्या च विरुद्धचरित्रं न यत्स्मृतिमिति कल्प्यते । तत्रानुपादयात्रचरित्रं निरस्येत वा
अनड्यर्थः । यथोक्तप्रकारान्तरिक्तप्रकारेणैवान्याय्यबाधकताकल्पने दोषमाह । कात्यायनः । अनेन विधिना युक्तमन्याय्यं
हृदुत्तरम् । अन्यथा बाधनं यत्र तत्र धर्मो विहन्यते इति । इति निर्णयपादः ॥ ● ॥ पुनर्न्यायः यद्यपि निर्णयानन्तरं न्यायप
चेदन्ते पराजितस्य दण्डादिप्रान्तं यापि यदि स पराजितमपि स्वयमपराजितमेवमनुते पूर्वव्यवहारे कुदृष्टबुध्यानार्हे द्विगुणं दं
डमभ्युपगम्य राज्ञा सभ्यान्तरोपादानेन पुनर्व्यवहारः स्यादित्याह नारदः । तीरितं चानुशिष्टं च यो मन्येत विध
र्मतः । द्विगुणं दण्डमादाय पुनस्तत्कार्यमुद्धरेत् । तीरितं समापितं निर्णयपर्यन्तं प्रापितमिति यावत् । पारतीरकर्म समाप्ता
विव्यस्थनिष्ठान्तं रूपम् । अनुशिष्टमर्थिप्रत्यर्थिनोः प्रतिकथितञ्च यपराजयपत्रे वारोपितम् । विधर्मतो धर्मविपरीतं कुदृष्ट

मितियावत् । योर्थिप्रत्यर्थिनोरन्यतरो मन्येत स पराजयनिमित्तं दण्डं द्विगुणमादायांगीकार्य तत्कार्यम्पुनरुद्धरेत् । यत्तु
पश्चाद्व्यवहारप्रवर्त्तनेन निर्णाययेत् । याज्ञवल्क्यः । दुर्दृष्टांस्तु पुनर्दृष्ट्वा व्यवहारान्नृपेण तु । सभ्याः सजयिनो दण्ड्या विवा
दाद्द्विगुणन्दमम् । योमन्येताजितोस्मीति न्यायेनापि पराजितः । सभायान्तं पुनर्जित्वा दापयेद्द्विगुणन्दमम् । अस्यापवादमा
ह । मनुः । तीरितञ्चानुशिष्टञ्च यत्र क्वचन यद्भवेत् । कृतन्तद्धर्मतो विद्यान्न तद्भूयो निवर्त्तयेत् । धर्मतः कृतं न्यायेनैव कृतमेव विद्या
दित्यर्थः । नारदः । साक्षिसभ्यावसन्नानां दूषणे दर्शनम्पुनः । स्वचर्यावसितानान्तु प्रोक्तः पौनर्भवो विधिः । साक्षिसभ्यावस
न्नानां साक्षिद्वारेण सभ्यद्वारेण वावसन्नानाम्पराजितानां दूषणे साक्षिषु सभ्येषु वा दोषोद्भावने ऽन्यतरेणाकृते पुनर्दर्शनं व्यवहार
दर्शनम् । राज्ञा कार्य्यमिति शेषः ॥ स्वचर्यावसितानां स्वचर्यया स्वव्यापारेण पूर्वापरविरुद्धभाषणादिना ऽवसितानाम्पराजि
तानान्तु पौनर्भवः पुनरुद्भवः पुनर्भवः पुनर्व्यवहारप्रवृत्तिरिति यावत् । तत्सम्बन्धिविधिर्नोक्तः कर्त्तव्यत्वेनाभिहितो मुनिभिरि
त्यर्थः ॥ बृहस्पतिः । पलायनानुत्तरत्वादन्यपक्षाश्रयेण च । हीनस्य गृह्यते वादो न स्ववाक्यजितस्य तु । वादो गृह्यते पुनर्न्यायो
भवतीत्यर्थः । स्ववाक्येन पूर्वापरविरुद्धेनोत्तरापरिस्फुर्त्त्या स्खलितेन वा यो जितस्तस्य तु न भवतीत्यर्थः ॥ बृहस्पतिकात्यायनौ । कु
लादिभिर्निश्चितेपि सन्तोषं न गतस्तु यः । विचार्य तत्कृतं राजा कुकृतं पुनरुद्धरेत् । बृहस्पतिः । निश्चित्य बहुभिः सार्धं ब्राह्म
णैः शास्त्रपारगैः । दण्डयेज्जयिना सार्धं पूर्वसभ्यांस्तु दोषिणः । जयिना पूर्वव्यवहारजयिना । नारदः । दुर्दृष्टे व्यवहारे
तु सभ्यास्तन्दण्डमाप्नुयुः ॥ नहि जातु विना दण्डङ्कश्चिन्मार्गे वतिष्ठते । मनुः । अमात्यः प्राड्विवाको वा यत्कुर्य्युः कार्यमन्यथा । तं
सर्वं नृपतिः कुर्य्यात्तान्सहस्रन्तु दण्डयेत् । सहस्रपणान्दण्डं व्यवहारे ऽनुक्तसंख्यया संख्यायाः पणगतत्वेन परिभाषितत्वात्
। एतच्च दण्डनिरूपणप्रस्तावे विवेचयिष्यामः । यत्तु द्विगुणो दण्डः सहस्राधिकस्तत्रामात्यप्राड्विवाकयोरपि स एव । अन्य
त्र सहस्रमेव । अमात्यप्राड्विवाकयोर्मुख्यत्वेन दण्डाधिक्यस्योचितत्वात् । इति पुनर्न्यायः ॥ ● ॥ निर्णयानन्तरं जयपत्त्र

यिनेजयपत्रदानम्। पराजिताद्दण्डादानम्। सपणविवादेपणादानम्। धनिनेधनदापनञ्च। तथाचव्यासः। व्यवहा
रान्स्वयंदृष्ट्वाश्रुत्वावाप्राड्विवाकतः। जयपत्रन्ततोदद्यात्परिज्ञानायपार्थिवः॥ पुनर्न्न्यायादिप्रसक्तौप्राङ्न्यायपरिज्ञानाय।
बृहस्पतिः। प्रतिज्ञाभावनाद्वादीप्राड्विवाकादिपूजनात्। जयपत्रस्यचादानाज्जयीलोकैर्निगद्यते। योगीश्वरः। सपण
श्चेद्विवादःस्यात्तत्रहीनन्तुदापयेत्। दण्डञ्चस्वपणञ्चैवधनिनेधनमेवच॥ बृहस्पतिः। अपराधानुरूपश्चदण्डोत्रपरिक
ल्पितइतितत्रजयपत्रप्रकारंलेख्यप्रस्तावे। दण्डपणादानेदण्डनिरूपणेधनिनेधनदानमृणादानप्रकरणेवक्ष्यामः॥
● ॥ अथसभ्यःप्राड्विवाकसहितस्यसभापतेरन्यथाव्यवहारदर्शनेसर्वथादर्शनाभावेचदोषकथनम्। तत्रान्यथादर्शनेदो
षमाह। मनुः। यस्त्वधर्मेणकार्य्याणिमोहात्कुर्य्यान्नराधिपः। अचिरात्तंदुरात्मानंवशेकुर्वन्तिशत्रवः॥ कात्यायनः। अस
र्ग्योलोकनाशायापरानीकभयावहा। आयुर्बीजहरीराज्ञामस्तिवाक्येस्वयंकृतिः॥ तस्माच्छास्त्रानुसारेणराजाकार्याणिसा
धयेत्। वाक्याभावेतुसर्वेषांदेशदृष्टेनसंनयेत्॥ अदर्शनेदोषमाह। महाभारतेकृष्णद्वैपायनः। अर्थिनामुपसन्नानां
यस्तुनोपैतिदर्शनम्। सुखेषुसक्तोन्टपतिःसतप्येतन्टगोयथेति। न्टगोनामराजा। रामायणेवाल्मीकिः। पौरकार्याणिहियो
राजानकरोतिसमास्थितः। व्यक्तंसनरकेघोरेपच्यतेनात्रसंशयइति। समास्थितःसुस्थितः। अनेनदुःस्थितस्यादर्शनेन
दोषइतिसूचितम्। अतएवानुकल्पतयादुःस्थितस्यस्वप्रतिनिधिप्राड्विवाकनियोगःप्रागुक्तः। प्राड्विवाकस्यसभ्यानाञ्चा
न्यथादर्शनादर्शनयोर्दोषइतिप्रागेवप्रपञ्चितंव्यवहारदर्शनविधिविचारप्रस्तावे। सम्यग्व्यवहारदर्शनेफलमप्याह
मनुः। कामक्रोधौतुसंयम्ययोर्थान्धर्म्मेणपश्यति। प्रजास्तमनुवर्त्तन्तेसमुद्रमिवसिन्धवः। इदंदृष्टफलम्। अदृष्टमपि
फलमाहनारदः। एवंपश्यन्सदाराजाव्यवहारान्समाहितः। वितन्येहयशोलोकेवृक्षःप्राप्नोतिविष्टपम्॥ बृहस्पतिः। एवं
शास्त्रोदितंराजाकुर्वन्निर्णयपालनम्। वितन्येहयशोलोकेमहेन्द्रसचिवोभवेत्। फलान्तरण्यपिव्यवहारदर्शनविधिप्र

स्तावेभिहितानि ॥ ● ॥ अथकृतनिवृत्तिः । तत्रमनुविष्णू । यस्मिन्यस्मिन्विवादेतुकौटसाक्ष्यंकृतम्भवेत् । तत्तत्कार्य्यंनिवर्त्ते
तकृतंचाप्यकृतम्भवेत् ॥ नारदः । स्त्रीषुरात्रौबहिर्ग्रामादन्तर्वेश्मन्यरातिषु । व्यवहारःकृतोप्येषुपुनःकर्त्तव्यतामियात् ॥ मनु
नारदौ । सत्यानभाषाभवतियद्यपिस्यात्प्रतिष्ठिता । बहिश्चेद्भाष्यतेधर्म्मान्नियताद्व्यवहारिकात् ॥ नियताद्व्यवहारिकात् ।
नियतव्यावहारिकधर्मबाह्यविषयायाभाषायायद्यपिप्रतिष्ठितासाक्षिलेख्यादिप्रमाणवतीभवतितथापिसत्याग्राह्यानभवति
। यथापुत्राद्यन्वयोपेतंकश्चिदभियुङ्क्तेसर्वस्वंमह्यमनेनप्रतिश्रुतमिदानींनददातीति । मनुः । योगाधमनविक्रीतंयोगदान
प्रतिग्रहम् । यत्रवाप्युपधिम्पश्येत्तत्सर्वंविनिवर्त्तयेत् ॥ बलाद्दत्तम्बलाद्भुक्तम्बलाद्यच्चापिलेखितम् । सर्वान्बलकृतानर्थानकृ
तान्मनुरब्रवीत् । योगश्छद्म । आधमनमाधीकरणम् । उपधिश्छलम् । पूर्वोत्तरश्लोकाभ्याञ्छलकृतस्यसर्वव्यवहाराणांनिवर्त्तनं
सार्वत्रिकमित्युक्तम्भवति । एवमुत्तरश्लोकेपिबलकृतसर्वव्यवहाराणामपि । योगीश्वरः । मत्तोन्मत्तार्त्ताध्यधीनैर्बालेनस्थ
विरेणवा । असम्बद्धकृतश्चैवव्यवहारोनसिध्यति । अध्यधीनोदासः । अधिकमधीनइत्युत्पत्तेः । असम्बद्धेनवादीप्र
तिवादीवासम्बद्धेनकृतस्तत्प्रतिनिधिभूयसम्पादितः । समासान्तर्गतमपिकृतपदम्प्राकृतन्तृतीयान्तैरपिबुध्यानिष्कृष्यसम्बन्धनी
यम् । नारदः । यद्बालःकुरुतेकार्यमस्वतन्त्रस्तथैवच । अकृतन्तदपिप्राहुःशास्त्रेशास्त्रविदोजनाः । स्वतन्त्रोपिहियत्का
र्य्यंकुर्य्यादप्रकृतिङ्गतः । तदप्यकृतमेवाहुरस्वतन्त्रःसहेतुतः ॥ कामक्रोधाभिभूतार्त्तभयव्यसनपीडिताः । रागद्वेषपरीता
श्चज्ञेयास्त्वप्रकृतिङ्गताः ॥ तथादासकृतङ्कार्य्यमकृतम्परिचक्षते । अन्यत्रस्वामिसंदेशान्नदासःप्रभुरात्मनः । पुत्रेणचकृतं
कार्य्यंयत्स्यादच्छंदतःपितुः ॥ तदप्यकृतमेवाहुर्दासःपुत्रश्चतौसमौ ॥ कात्यायनः । नक्षेत्रगृहदासानांदानाधमनविक्र
या । अस्वतन्त्रकृताःसिद्धिम्प्राप्नुयुर्नानुवर्णिताः । नानुवर्णिताःस्वतंत्रेणपित्रादिनानानुमताः । अनुमतास्सिद्ध्येयुरेवेत्यर्था
दुक्तम्भवति । अतएवाह । सएव । प्रमाणंसर्वएवैतेपण्यानांक्रयविक्रये । यदिसंव्यवहारन्तेकुर्वन्त्यनुमोदिताः ॥ क्षे

त्रादीनान्तथैवाप्सुभ्रातामातृसुतःसुतः। निसृष्टाःकार्यकरणेगुरुणायदिगच्छता। निसृष्टार्थस्तुयोयस्मिंस्तस्मिन्नर्थेप्रभु
स्तुसः। तद्गुरुणातत्कृतंकार्येनान्यथाकर्तुमर्हति। बृहस्पतिरपि। यःस्वामिनानियुक्तस्तुधनायव्ययपालने। कुसीदकृषिवा
णिज्येनिसृष्टार्थस्तुसःस्मृतः॥ प्रमाणान्तत्कृतंसर्वंलाभालाभव्ययोदयम्। स्वदेशेवाविदेशेवास्वामीतन्नविसंवदेत्। अनुम
त्यभावेपिकुटुम्बभरणार्थमस्वतंत्रकृतमष्टगुणादिव्यवहारंस्वतंत्रोननिवर्तयेदित्याह। मनुः। कुटुंबार्थेप्यधीनोपिव्यवहा
रंयमाचरेत्। स्वदेशेवाविदेशेवातंस्वामीनविचालयेत्। अध्यधीनःपुत्रभ्रातृपुत्रदासादिः॥ * ॥ अथस्वतंत्रास्वतंत्रलक्ष
णम्। तत्रनारदः। स्वातन्त्र्यंतुस्मृतंज्येष्ठेज्यैष्ठ्यंगुणवयःकृतम्। तथा। अस्वतंत्राःप्रजाःसर्वाःस्वतन्त्रःपृथिवीपतिः। अस्वतं
त्रःस्मृतःशिष्यआचार्येतुस्वतंत्रता॥ अस्वतंत्राःस्त्रियःपुत्रादासादयश्चपरिग्रहः। गर्भस्थैःसदृशोज्ञेयःआष्टमाद्वत्सराच्छि
शुः। बालआषोडशाद्वर्षात्पौगण्डश्चेतिशब्द्यते। परतोव्यवहारज्ञःस्वतंत्रःपितरावृते। जीवतोरस्वतंत्रःस्याज्जरयापि
समन्वितः। तयोरपिपिताश्रेयान्बीजप्राधान्यदर्शनात्। अभावेबीजिनोमातातदभावेतुपूर्वजः। कात्यायनः। पितास्वतं
त्रःपितृमान्भ्राताभ्रातृव्यएवच। कनिष्ठोवाऽविभक्तस्वोदासःकर्मकरस्तथा। पितृमान्पिताधस्वतंत्रइत्यर्थः। अविभक्तस्यःअ
विभक्तधनः। हारीतः। दानार्थेवाधनार्थेवाधर्मार्थेवाविशेषतः। आदानेवाविसर्गेवानस्त्रीस्वातन्त्र्यमर्हति। नारदः। स्वतं
त्राःसर्वएवैतेपरतन्त्रेषुनित्यशः। अनुशिष्टौविसर्गेचविक्रयेचेश्वरामताः। एतेपूर्वोक्ताराजादयः। स्वतंत्रस्यपित्रादेरपिवि
षयविशेषेणस्वातन्त्र्यमित्याह। कात्यायनः। सुतस्यसुतदाराणांवशित्वमनुशासने। विक्रयेचैवदानेचवशित्वन्नसुतेपितुः
। एतदप्यनापदीतिवक्ष्यते। इतिसामान्यपरिभाषा॥ ● ॥ अथविशेषपरिभाषा। तत्रयाज्ञवल्क्यः। अभियोगमनिस्ती
र्यैनंप्रत्यभियोजयेत्। अभियुक्तश्चनान्येनतोक्तंविप्रकृतिंनयेत्॥ अभियुज्यतइत्यभियोगोऽपराधःऋणादिस्तमदीयंगृहीत्वान
प्रत्यर्पयत्ययमित्यादिरर्थिनोपन्यस्तस्तमनिस्तीर्यापरिहृत्यैनमभियोक्तारन्नप्रत्यभियोजयेत्। युगपद्व्यवहारस्यप्रतिज्ञाभे

देनासम्भवात्। प्रत्यभियोगानर्थक्यात्। इत्ययम्प्रत्यभियोगानर्थक्यादित्ययम्प्रत्यर्थिनंप्रत्युपदेशोन्यवादित्वेनहीनतापरि
हारार्थः। यद्यपिप्रत्यवस्कन्दनंप्रत्यभियोगरूपमेव। तथापिस्वापराधपरिहारार्थत्वादनेनप्रतिषिध्यते। अन्येनाभियुक्तंचा
निस्तीर्णतदीयाभियोगमर्थीनाभियुञ्जीत। अन्याभियोगापेक्षयात्रप्रत्यभियोगशब्दोनुवादत्वेनयथाकथंचिन्नेयः। अयम
पियुगपद्व्यवहारासम्भवनिबन्धनोर्थिनम्प्रत्युपदेशः। किञ्चउक्तमावेदनसमयेयदुक्तन्तद्विप्रकृतिंविरुद्धस्वभावतांननयेत्।
नप्रापयेत्। यद्वस्तुयत्प्रकारेणावेदनसमयेनिवेदितन्तत्तथैवतद्भाषायांलेखनीयंनान्यथेत्ययमप्यर्थिनएवान्यवादित्वनिब
न्धनहीनतापरिहारार्थएवोपदेशः। यद्यपियथावेदितमर्थिनेत्यचैवेदमुक्तमितिपुनरुक्तमाभातितथापितद्वस्त्वंतरावेदनप्र
तिषेधकमिदन्तुपदान्तरसंक्रमनिषारकमित्यपुनरुक्तता। तद्यथारूपकशतंमदीयम्बृद्ध्यानुगृहीत्वानप्रयच्छतीत्यावेद्य
भाषायांवस्त्रशतंबृद्ध्यागृहीत्वानप्रयच्छतीतिलेखनादानपदएववस्त्वंतरगमनम्। रूपकशतंवृद्ध्यागृहीत्वामदीयेनप्रय
च्छतीत्यावेद्यभाषायांरूपकशतंमदीयम्बलादपहृतवानितितस्मिन्नेववस्तुसाहसाख्यंविवादपदंलेखयतीति। तत्रयथाश्र
ष्टोपादानाद्वचविप्रकृतिपदोपादानात्। वस्त्वन्तरगमनेह्येकस्मैवविवादपदेप्रकारभेदमात्रंप्रकारवाचिथाल्प्रत्ययेनप्र
त्याय्यते। पदान्तरसंक्रमेतुविरुद्धस्वभावताव्यक्तेतिभावः। अभियोगमनिस्तीर्य्येत्यस्यापवादमाहसएव। कुर्यात्प्रत्यभियो
गन्तुकलहंसाहसेषुच। कलहेवाग्दण्डपारुष्यरूपे। साहसेषुच। विषशस्त्रादिकृतप्राणव्यापादनादिषुयदिसम्भवति
प्रत्यभियोगस्तदास्वाभियोगमनिस्तीर्य्यापिप्रत्यभियोक्तारम्प्रत्यभियोजयेत्। ननुप्रतिज्ञान्तरत्वापत्तेर्युगपद्व्यवहारासम्भवस्य
प्रत्यभियोगप्रतिषेधबीजस्यात्रापितौल्यात्कथन्तत्प्रतिप्रसवः। प्राङ्न्यायप्रत्यवस्कन्दनयोस्तुपूर्वपक्षोपमर्दकत्वेनोत्तरत्वश्च
यालक्षितयोःप्रत्यभियोगत्वेपिनप्रतिज्ञान्तरापत्त्यायुगपद्व्यवहारासम्भवदोषइतिवैषम्यम्। अन्यथातयोरुत्तरत्वमेवनस्यात्त
थैवैतत्प्रतिषेधस्यस्तत्वादितिचेन्नयद्यप्यत्रापियुगपद्व्यवहारासम्भवस्तुल्यस्तथापिन्यूनदण्डप्राप्त्यर्थेधिकदण्डनिवृत्तयेचक

लहंसाहसयोःप्रत्यभियोगः ॥ सार्थकोन्यत्रनिरर्थकइतिप्रतिप्रसवोपदेशः ॥ तथाहि । अनेनाहंत्ताडितःशप्तोवापूर्वमयं मत्प्राणव्ययायव्यापारंकृतवानित्यभियुक्तोयद्ब्रूयात् । सत्यमेतत्तथापिमत्तःपूर्वतरमयन्ताडनादिममकृतवानितिप्रत्यभियोगेतस्मिंश्चसाधितेदण्डाल्पत्वम्प्रत्यभियोक्तुःफलम् । तथाचनारदः । पूर्वमाक्षारयेद्यस्तुनियतंस्यात्सदोषभाक् । पश्चाद्यःसोप्यसत्कारीपूर्वेतुविनयोगुरुरिति । विनयोदण्डः । यदातुयुगपद्द्वयोस्ताडनादिषुप्रवृत्तिस्तत्राधिकदण्डनिवृत्तिःप्रत्यभियोगफलम् । तदप्याहसएव । पारुष्येसाहसेचैवयुगपत्सम्प्रवृत्तयोः । विशेषश्चेन्नलभ्येतविनयःस्यात्समस्तयोरिति । तेनायमत्रतात्पर्यार्थः ॥ पूर्वपक्षोपमर्दनरूपप्रत्यभियोगस्यप्रतिज्ञोत्तरत्वेनयुगपद्व्यवहारासम्भवरूपप्रत्यभियोगस्यप्रतिज्ञोत्तरत्वेनयुगपद्व्यवहारासम्भवोरूपदोषाभावादेवाप्रतिषिद्धत्वम् । कलहादिषुयुगपद्व्यवहारासम्भवेसत्यप्यर्थवान्प्रत्यभियोगःक्रियमाणोनदुष्यति । पूर्वपक्षानुपमर्दनरूपोनर्थकश्चप्रत्यभियोगोनकार्य्यःऋणादानादिषुविवादेष्विति । यथायंमदीयमृणमियदियत्यावृद्ध्यागृहीत्वानप्रयच्छतीत्यभियोगेमह्यमप्ययंधारयतीतिप्रत्यभियोगोनकार्य्योनिष्प्रयोजकत्वात्प्रतिज्ञान्तरत्वाच्चेति । इतिप्रत्यभियोगनिर्णयः ॥ ॥ अथनिह्नवादिविधिर्निह्नवादिविवेचनञ्च । तत्रयाज्ञवल्क्यः । निह्नुतेलिखितंनैकमेकदेशविभावितः । दाप्यःसर्वंनृपेणार्थेनग्राह्यस्त्वनिवेदितः । नैकमनेकं । निषेधार्थनकारस्यासमासत्वान्नलोपोनञ्इतिनकारलोपाभावेनैकधेतिवद्रूपम् । अर्थिनाभियुक्तंसुवर्णरजतवस्त्रादिवस्तुभाषालियांखितमुत्तरलेखनवेलायाम्प्रत्यर्थीयःसर्वमेवनिह्नुतेमिथ्यैतदित्यपलपति । सोर्थिनैकदेशेप्रतिज्ञाविषयभूतकतिपयवस्तुनिभाविते लिखितंसाक्ष्यादिप्रमाणवलादङ्गीकारितःसर्वमप्यर्थिप्रतिज्ञातंनृपेणदाप्यर्थिनेदापनीयः । यस्त्वर्थीर्थिनैवव्यामोहप्रमादादिनाभाषापत्रशोधनावधिननिवेदितःपश्चान्निवेद्यतेप्राक्प्रमादादिनाविस्मृतमयेदमितिसन्नृपेणनग्राह्योनादत्तव्यःप्रमाणादिप्रत्याकलनेनेत्यर्थः । ननुछलंनिरस्यभूतेनव्यवहारान्नयेन्नृपइत्यनेनविरुद्धमिदम् । तथाहि । भूतन्तत्त्वार्थयुक्तंयत्प्रमादाभिहितंछलमित्युक्तेभूतेन

वस्तुतत्त्वानुसरणेन छलप्रमादामर्षाद्यभिहितं निरस्य व्यवहारान्नृपो नयेन्निर्णयपदवीं तं प्रापयेत्। तस्माद्यद्यर्थिप्रत्यर्थिनौ स्वयमेव निवेदयतः। साक्ष्यादिनैरपेक्ष्येण स्वयमेव साक्ष्यादयोपि शपथादिभिर्भाविता स्वत्वमेव प्रतिपादयन्ति तथा सभ्येन सभापतिना यतितव्यमिति भावः। एवञ्चैकदेशस्य प्रमाणसिद्धावप्येकदेशान्तरस्य सिद्धिः कुतस्त्या अन्यविषयप्रमाणेनान्यविषयसिद्धेरसम्भवात्। छलप्रसक्तेर्दुर्वारत्वात्। एवं प्रमादादिविस्मृतस्य प्रामाणिकस्यार्थस्यानादरे छलं व्यक्तमेव। कात्यायनवचनविरोधश्चैवं सति। यदाह। अनेकार्थाभियोगेपि यावत्संसाधयेद्धनी। साक्षिभिस्तावदेवासौ लभते साधितं धनमिति साक्षिग्रहणं लेख्याद्युपलक्षणम्। अत्रापरार्कः। अपह्नववादिनः सावष्टम्भयन् मिथ्योत्तरत्वाद्विषयं निह्नुत इत्यादि। यथा ह्यर्थिनाभियुक्तः प्रत्यर्थ्येवमुत्तरयति भवदभियुक्तानामर्थानां मध्ये यद्येकमपि भवान्साधयति तदा सर्वमहं दास्यामीति छलोदाहरणत्वादस्य कात्यायनवचनस्य सावष्टम्भमिथ्योत्तरविषयत्वेनासाधितांशेऽर्थिना प्रमाणान्तरमुपादेयं तदभावेपि साधितमात्रलाभेन सन्तोष्टव्यम्। अनेकार्थाभियोगे तु सर्वार्थापलापिना। विभाविते कदेशेन देयं यदभियुज्यत इति नारदवचोपि सावष्टम्भमिथ्योत्तरविषयमेवेत्याह। तदनुपपन्नम्। सपणश्चेद्विवादः स्यादित्यनेनास्य गतार्थतापत्तेः। ईदृशावष्टम्भस्य पणादनतिरेकात्। न च पणस्य राजग्राह्यत्वमस्य त्वर्थिने इति भेद इति वाच्यम्। एतादृशभेदस्याप्रयोजकत्वात्। स्वपणान्द्वापयेदित्येतावन्मात्रस्यैव तदर्थत्वात्। प्रतिज्ञानुरोधित्वात्पणत्वस्य निह्नवमात्रस्यात्र प्रतीतेः सावष्टम्भनिह्नवविषयत्वाकल्पनाया अप्रमाणकत्वाच्च। एवं नारदवाक्येपि न च तत्र व्यपलायिनेति विशेषोपादानादवष्टम्भसहितनिह्नवप्रतीतिरिति वाच्यम्॥ अन्यथापि तत्तात्पर्यग्राहकाभावे सावष्टम्भत्वरूपविशेषपरत्वस्यानियतत्वात्। वाचस्पतिचण्डेश्वरौ त्वाहतुः। यत्रैकदेशसिद्धिरेकदेशान्तरसिद्ध्यविनाभूता तद्विषयं योगीश्वरनारदयोर्वचनं तदतिरिक्तविषयं तु कात्यायनीयमिति। तदप्यसत्। निह्नवोपादानवैयर्थ्यात्। अनिह्नवेपि तस्य युक्तियुक्तत्वात्। प्रत्यवस्कन्दनप्राङ्न्यायोत्तरयोरप्येकदेशे कारणादिसाधने तद्विनाभूतैकदेशान्त

रेकारणादिविरुद्धेर्वैरत्वात् ॥ यत्तु वाचस्पतिनाऽपसव्यापेत्यादिनासपश्चेदित्यादितन्त्रयोगीश्वरवचनएवसर्ववादि
मन्तेनस्पष्टमेवगतार्थत्वंप्रदर्शितमितिमहान्प्रमादः विज्ञानयोगिनस्त्वाहुः। यथाभूतानुसरणेनच्छलनिरासेनचव्यवहारनिर्ण
योभवतितथाविधेयमितिमुख्यःकल्पः। नत्वहेतुः। भूतमप्यनुपन्यस्तंहीयतेव्यवहारतइतितस्यायमर्थः। यतोभूतंवस्तुतत्त्वम
प्यनुपन्यस्तमकथितंवादिप्रतिवाद्यन्यतरेणसाक्ष्यादिनाचानन्तव्यवहारतोव्यवहाररीत्याहीयते। यद्यपिपश्चात्प्रमाणेनसाध्य
तेप्रमाणंविनैवचैकदेशविभावनेनतथापिवादिप्रतिवादिसम्बन्धत्वेनहीनम्भवति। पश्चाद्वादिनाप्रमाणान्तरेणसाधितमपिप्रा
क्प्रतिज्ञाकालेननिवेदितत्वेनलभ्यते। तथासर्वोपह्नवकारिणाकतिपयानिवस्तूनिसाक्ष्यादिभिरङ्गीकारितेनान्यपिसाक्ष्यात्प्र
माणेनासाधितान्यप्यभियोक्त्रादातव्यतयाप्रतिवादिनःसकाशाल्लभ्यतइति। तस्माद्वादीप्रतिवादिनःसाक्ष्यादिषुवादिगूढ
ह्यतनाकूटकारित्वादिनायदाभूतानुसरणमशक्यंतदाचतुष्पाद्व्यवहारमार्गेणप्रवर्तितेव्यवहारेभूतानुसरणाभावेपिसत्य
भ्यसभापतेर्दोषलेशोनास्तिरागलोभादिभिरन्यथाशास्त्रकारित्वाभावादित्यर्थः। अत्रोदाहरणं। निह्नुतेलिखितंनैकमिति
। एकदेशेप्रत्यर्थिनामिथ्यावादित्वेनिश्चितेऽन्यविषयेपिमिथ्यावादित्वसम्भवात्। अर्थिनश्चैकदेशेसत्यवादित्वनिश्चयेऽन्य
विषयेपिसत्यवादित्वसम्भवादितीदृशसम्भावनात्मकतर्कानुगृहीतादस्मादेववचनात्पूर्वमर्थिनेप्रत्यर्थीसर्वंदापनीयः। प्रति
ज्ञाकालेवानिवेदितमिदानीमुपन्यस्तमेकदेशविभावनानिमित्तान्यथाभेनेदानीमुपन्यस्ततीतिसम्भावनारूपतर्कानुगृहीतमे
तदेववचनमनिवेदितस्यादापनेप्रमाणमित्येतत्तर्कोवाक्यानुसारेणसभ्येनसभापतिनानिर्णयेक्रियमाणेयदिसहस्रशतमे
प्यंशेवस्तुनोन्यथात्वम्भवति। तर्हितस्यनदोषइतितात्पर्यमेतदभिप्रायकमेवगौतमवचनम्। न्यायाधिगमेतर्कोभ्युपायस्ते
नाभ्यूह्ययथास्थानंगमयेदिति। अयेचतेनैवोपसंहृतंतस्माद्राज्ञाचार्य्येणवनिर्ज्ञावितितच्चैकदेशविभावितप्रागनिवेदितनिवे
दकयोर्वादिप्रतिवादिनोर्हीनतामात्रप्रतिपादकमिदंयाज्ञवल्क्यादिवचनमितिवाच्यम्। सर्वदापोनयाह्यःदेयंयदभि

युज्यतइतिवचनात्। हीनतामात्रप्रतिपादनपरत्वेतदभिधानानर्थक्यात्। कात्यायनवचनन्तु। यत्रपित्र्यादिगृहीतबह्वर्थविषयाभियोगःपुत्रादेस्तद्रिक्थहरस्यक्रियते। सचाभियुक्तोऽहन्तावदत्रकिमपिनजानामियावत्प्रमाणेनायंसाधयतितावद्दास्यामीत्युत्तरयति। तत्रासौनिह्नववादीनभवति। तेनैकदेशविभावितोपिनकश्चिदप्यसत्यवादीतिपूर्वोक्तनकानवनाशान्तदनुगृहीतमेतद्वचनमत्रनप्रवर्त्ततइतिसामान्यविषयत्वान्निह्नवोत्तरमपहायाज्ञानोत्तरईदृशेप्रवर्त्ततइतिनतेनसहास्यविरोधःभिन्नविषयत्वात्। ननुऋणादिषुविवादेषुस्थिरप्रायेषुनिश्चितम्। ऊनेवाभ्यधिकेवार्थेप्रोक्तेसाध्यन्नसिध्यति। अर्थिनायावानर्थोभाषायांलिखितस्ततोन्यूनेऽधिकेवार्थेसाक्षिभिःप्रोक्तेसर्वमेवसाध्यंनसिध्यतीतिप्रतिज्ञाप्रमाणयोर्विसंवादित्वयर्थकेनानेनकात्यायनवचनेनप्रत्युतसाध्यादिविभावितैकदेशस्याप्यसिद्धिरायाति। तत्सिद्धान्तदविभावितैकदेशसिद्धिदूरपास्ता। उच्यते। यत्रवादीसकलप्रतिज्ञातार्थसाधनत्वेनसाक्षिलेख्यादिकमुपन्यस्यति। ततश्चन्यूनोधिकोवार्थोविभाव्यते। तत्रकूटसम्भावनयाकृत्स्नसाध्यासिद्धिः। तत्रापिनिश्चितंनसिध्यतीतिवचनात्संशयनादवस्थेप्रमाणान्तरेणसम्भवतानिर्णयःकार्य्यः। छलन्निरस्येतिनियमात्। इतिकात्यायनीयस्यास्यवचनस्यार्थः। यत्रतुवाद्येवम्वदति। एतावत्यंशेममैतेसाक्षिणोलेख्यंवास्ति। अन्यमंशमलौकिकप्रमाणेनविभावयिष्यामीतितत्रोक्ततर्कानुगृहीतान्नित्याह्नुतइत्यादियोगीश्वरनारदवचनादेकदेशविभावनेपिकृत्स्नसाध्यसिद्धिर्न्नालौकिकप्रमाणंप्रतीक्षेतयोगीश्वरवचनस्यअज्ञानोत्तरेतुयावानंशोलौकिकेनप्रमाणेनप्रमितस्तावानेवततोनिर्धार्य्यान्यस्तुदिव्यान्तदसम्भवेनसिध्यत्येव। अनेकार्थाभियोगेपीतिवचनात्। अतएवाभिप्रायात्। प्रागुपन्यस्तंवचनम्। यद्येकदेशव्याप्तापिक्रियाविद्येतमानुषी। साग्राह्यानतुपूर्णापिदैविकीवदतांन्नृणामिति। कात्यायनीयन्तेननकापिविरोधलेशइति। वयन्तुछलंनिरस्यैव्यस्यविधेहेतुरयंभूतमप्यनुपन्यस्तमित्युपेद्गलकः। यतोभूतन्तत्त्वमप्यनुपन्यस्तंव्यवहारतोहीयतेवादिप्रतिवादिभ्यामनुपन्यस्तम्प्रमाणतोसाधितंहीयतेहानिमाप्नोतिव्यवहारतोव्यवहाररीत्येतितस्यार्थः

। तदुपपादनंनिह्नुतेविलिखितंनैकमित्यादि तस्यायमर्थः । वादिनः कतिपयांशे सत्यवादिनोन्यांशेपिसत्यवादित्वसम्भवा
त्प्रतिवादिनश्च सर्वापह्नववादिनः कतिपयांशे मिथ्यावादित्वनिश्चयादन्यांशेपि तत्सम्भवात्सर्वमर्थेन्दपेणार्थिनेदापयितु
यितुंयोग्योभवति । निरुत्तरत्वात् । एवंप्रागनिवेदितोर्थिनार्थोभूतोपि प्रामाणिकोपि नग्राह्योयद्दणादीनियदितवाय
मर्थः सत्यः स्याद्भाषायामेवनिवेदितःस्यादित्याक्षेपेऽर्थिनोपिनिरुत्तरत्वात् । तस्मादुत्तरदानसमयेप्रत्यर्थिभिरजादि
भिरेवंबोधनीयोयावन्त्यंशेनवमिथ्यात्वनिश्चयस्तावदेवापह्नोतव्यमन्यत्सम्प्रतिपत्तव्यम् । कचिदप्यंशेनेनभवदुपरिसा
धितेनत्वनिरुत्तरत्वापत्तेः । एवंवादिप्रतिभाषासमयेसावधानेनत्वयास्वीयंयावदस्तिसाध्यमेतदुपरितन्सर्वं स्मारंस्मारंलेखनी
यमन्यथातदंशेनिरुत्तरतानवापद्येतेतिबोधनीयः । एवंसाक्षिणोपिप्रमादादिभ्यःप्रत्यावनीयाः । तथासत्यनायासेनतत्त्वा
नुसरणम्भवति । नन्वावश्यकमन्यथादित्यादिनातत्त्वानुसरणांकर्तव्यंस्यादितिसर्वथातत्त्वानुसरणेनैवव्यवहारपर्य्यवसानंवि
धेयमितिकथंनिरस्येत्यस्यैवविधेःसर्वांशयोनस्तत्त्वाविधियैनदापनंसर्वस्यविधीयतेश्चनिवेदितग्रहणंवाप्रतिषिध्येत ।
नारदवाक्येपिदेयन्दातुयोग्यमित्येवार्थः । नचैवंदाप्यइत्यादीनामानर्थक्यमेवस्यादितिवाच्यम् । यतोलौकिकव्यवहारापर्ष्ट
भेनैवमेवंप्रतिभातितस्मात्तत्त्वानुसरणायान्यतरस्मादोष्टृशिविषयेदित्यमेवग्राह्यमित्यत्रतात्पर्य्यात् । कात्यायनादिवचनाना
मप्यत्रैवतात्पर्य्यम् । चतुष्पादिषुविवादेष्वित्यतोप्ययमेवार्थोदृढतामुपैति । यतःप्रमाणप्रतिज्ञाविसम्वादिमतेनिश्चयाभाव
स्तत्तत्त्वानुसरणायप्रमाणान्तरादरश्चावश्यकइति । अतएवाहसाहसादौप्रतिज्ञार्थैकदेशविभावनेपिनैकदेशेप्रमाणान्त
रानुसरणेसाहसिनोहितजदसडमाचनप्रत्यर्पणांकस्मैचिद्व्यपिचौर्य्यंप्रत्यर्पणमस्ति । तथापिकतिपयचौरःसर्वंदाप्यतइ
तिलोकेप्रसिद्धतरत्वाद्वृद्धिमद्दृष्टान्तावदियचौर्य्यं सागतमस्यचसविधेप्रमाणमितमियदस्तीतिचौराभियोक्तासाधयतितदा
तएवसर्वंलभ्यते । यदित्वनष्टमपिकियन्नष्टसाधनावष्टम्भेनलघुमुपन्यस्यतितर्हिमिथ्यावादित्वान्नाष्टिकएकदण्ड्योभवति

इत्यपि लोके प्रसिद्धतरम् । अनेनैवाभिप्रायेणाह कात्यायनः । साध्यार्थांशेऽपि गदिते साक्षिभिः सकलं भवेत् । स्त्रीसङ्गे सा
हसे चौर्य्ये यत्साध्यम्परकीर्त्तितमिति । तत्त्वानुसरणं स्मृत्योर्विरोधे कथं स्यादित्यपेक्षायामाह । स्मृत्योर्विरोधे न्यायस्तु बलवान्
व्यवहारत इति । व्याख्यातश्चैतत्प्रागेव । अर्थशास्त्रधर्मशास्त्रयोर्विरोधे धर्मशास्त्रानुसरणेनैव तत्त्वानुसरणमित्याह । अर्थशा
स्त्रात्तु बलवद्धर्मशास्त्रमिति स्थितिरिति । इदमपि प्रपञ्चितम्प्राक् । तस्मादस्मन्मते छलं निरस्येत्याद्येतदन्तप्रघट्टकेन छलं
निरासतत्त्वानुसरणावश्यम्भावप्रतिपादनमेवैकवाक्यतया लभ्यत इति भूमः । इति निह्नववादिविचारः ॥ ● ॥ अथोत्तरदानेवि
लम्बाविलम्बव्यवस्था । तत्रोक्तं योगीश्वरेण । ततोऽर्थी लेखयेत्सद्यः प्रतिज्ञातार्थसाधनमिति क्रियोपन्यासे सद्यस्त्वं विदधतोत्तरदा
ने विलम्बोऽप्यनुमत इति प्रतीयते । तदाह बृहस्पतिः । आलीनत्वादुत्तरत्वात्प्रत्यर्थी स्मृतिविभ्रमात् । कालम्प्रार्थयते यत्र तत्रै
ष लब्धुमर्हति । एकाहन्त्र्यहम्पञ्चाहं सप्ताहम्पक्षमेव वा । मासं ऋतुत्रयं वर्षं लभतेऽप्यपेक्षयेति । कात्यायनः । समहत्सु का
र्येषु सद्य एव विवादयेत् । कालातीतेषु वा कालं दद्यात्प्रत्यर्थिने प्रभुः । प्रभुर्विचारकः । श्रुत्वा लेखयतां ह्यर्थम्प्रत्यर्थी कारणा
द्यदि । कालं विवादं याचेत तस्य देयो न संशयः । सद्यो वैकाहपञ्चाहौ त्र्यहं वा गुरुलाघवात् । लभेतासौ त्रिपक्षं वा सप्ताहं वा
कटादिषु । अत्र व्यवस्था तेनैवोक्ता । सद्यःकृते सद्य एवादः समातीते दिनं क्षिपेत् । षडह्निके मिश्रवत्तु सप्ताहं द्वादशाह्नि
के । विंशत्यहे दशाहे तु मासार्द्धं वा लभेत सः । मासं विंशत्समातीते त्रिपक्षम्परतो लभेत् । कालं शक्तिं विदित्वा तु कार्याणाञ्च ब
लाबलम् । अल्पं वा बहु कालं वा दद्यात्प्रत्यर्थिने प्रभुः । यो वा यस्मिन्समाचारः पारम्पर्य्यक्रमागतः । तम्प्रतीक्ष्य यथान्यायं दाप
येदुत्तरं नृपः । मूलं वा साक्षिणो वापि परदेशस्थिता यदा । तत्कालो भवेत्तेषां स्वदेशे वक्तुमागमान् । दिनमासार्द्धमासम्वा च
तुःसंवत्सरोऽपि वा । क्रियास्वप्यनुरूपस्तु देयः कालः परेण तु । लेखयतः अर्थिन इति शेषः । अर्थं श्रुत्वेत्यन्वयः । कालो देयोऽ
स्तीति शेषः । समातीते संवत्सरातीते । यस्मिन्देशकुलादौ मूलग्रहेन विवादास्पदीभूतधनममुष्मात्पुरुषाल्लब्धव्यमिति वादी

र्थं कथयति स उच्यते । तत्र विषयेषु सामूलभूतानां साक्षिणां वा स्वदेशे आगमात् आगमनावधिपक्षमुत्तरं दद्यादुक्तो भवेत् । दात-
व्य इत्यर्थः । अत्रापवादमाह याज्ञवल्क्यः । साहसस्तेयपारुष्यगोभिशापात्यये स्त्रियाम् । विवादयेत्सद्य एव कालोऽन्यत्रेच्छ-
या स्मृतः ॥ साहसं विषशस्त्रादिभिः प्राणव्यापादनमित्यादि । सहसा बलावष्टम्भेन पाकृतम् । गौर्दोग्ध्री । अभिशापः पातका-
भिशंसनं । अत्ययः प्राणधनातिपातः । द्वन्द्वैकवद्भावादेकवचनं । स्त्रियां कुलस्त्रियां चारित्रविषये विवादे । दास्यां स्त्रियां स्वत्व-
विवादे कर्मकरणकालातिपातविषये विवादे । सद्य एव प्रागुक्तकालप्रतीक्षामकृत्वैव विवादयेदुत्तरं दापयेत् । अन्यत्रैत-
द्भिन्नक्षेत्रादिविवादे कालस्तूत्तरदानकाल इच्छया अर्थिसभ्यसभापतीनामनुमत्या स्मृत उक्तो मन्वादिभिः । अत्ययो विवादवि-
षयीभूतवस्तुविनाश इति । कल्पतरौ साहसादिषूत्तरकालदानविलम्बेऽन्यतरस्य क्षतिरवश्यंभाविनीति सद्य एवोत्तरलेखन-
मृणादिषु विलम्बेऽपि न क्षतिस्तथेति सोऽप्यनुमतः । सर्वैकाद्यादिरूपेण प्रागुक्तवचनैर्विवक्षितो यत्र तु नवापनिकी व्यवस्था तत्का-
र्याऽदीक्षयेति तात्पर्यम् । अत एवाह नारदः । गहनत्वाद्विवादानामसामर्थ्यात्स्मृतेरपि । ऋणादिषु हरेत्कालं कामं तत्त्व-
बुभुत्सयेति । नारदः । गोभूहिरण्यस्त्रीस्तेयपारुष्यात्ययिकेषु च । साहसेष्वभिशापे च सद्य एव विवादयेत् ॥ अभिशापः
पापाभिशंसनम् । तस्य पारुष्यशब्देन ग्रहणेऽप्यादरार्थं पुनर्वचनम् । आत्ययिकश्चात्ययनेनोक्तम् । अपैति गौरवं यत्र विना-
शः स्यात्स एव च । कालं तत्र न कुर्वीत कार्यमात्ययिकं हि तदिति । अन्यत्रापि सद्य एवोत्तरदानमाह । कात्यायनः । धेनावनडु-
हि क्षेत्रे स्त्रीषु प्रजनने तथा । विनाशे याचितके दत्ते तथैव क्रयविक्रये । कन्यायां दूषणे चैव कलहे साहसे निधौ । उपधिकौट-
साक्ष्ये च सद्य एव विवादयेत् । प्रजननमत्र विवाहः । अन्यत्र विवादासम्भवात् । उपधिः कूटगणकादिकृतव्यवहारः ।
विनाशे त्याग इति न सामानाधिकरण्ये । किन्तु विनाशे सति यत्र त्याग एव सम्पद्यत इत्यर्थं नैकएव विषय इति कल्पतरौ कर-
कौ । तन्न । सति सप्तम्यनुषङ्गयोः प्रतीतिविपरीतयोः कल्पतानुपपत्तेर्वा शब्दस्वरसाच्च पृथग्विषयतायाएवाचित्यात् । वस्तु

मस्तु विनाशस्त्याग एव वेति प्रथमान्त एव पाठस्तथाचायमर्थः । यत्रोत्तरदानविलम्बे सति गौरवं वस्तुनो मूल्यादि हतं व्यपे
ति वस्तु नश्यत्येव वा विनाशो ध्वंसः त्यागः प्रत्यवायो भवति तत्रोत्तरदानकालमेकाहादिरूपं न कुर्वीत सद्य एवोत्तरं दापयेदित्यभिप्रा
यः । बृहस्पतिकात्यायनौ । साहसस्तेयपारुष्यगोऽभिशापे तथात्यये । भूमौ विवादयेत्क्षिप्रमकालेऽपि बृहस्पतिः ॥ अभिशापो
नोद्बन्धेकवन्धावः । अकालेरात्र्यादावपि । बृहस्पतिरिदमाहेत्यर्थः । इत्युत्तरदाने विलम्बाविलम्बव्यवस्था समाप्ता चविशे
षपरिभाषा ॥ ● ॥ इति श्रीमत्सकलसामन्तचक्रचूडामणिमञ्जरीधिमञ्जरीनीराजितचरणकमलश्रीमन्महाराजाधिराज
प्रतापरुद्रतनूजश्रीमन्महाराजमधुकरसाहसूनुश्रीमन्महाराजाधिराजचतुरुदधिजलवलयवसुन्धराहृदयपुण्डरी
कविकाशदिनकरश्रीवीरसिंहदेवोद्योगितश्रीहंसपण्डितात्मजश्रीपरशुरामसूनुसकलविद्यापारावारपारीणधुरीण
जगद्दारिद्र्यमहागजपारीन्द्रविद्वज्जनजीवातुश्रीमन्मित्रमिश्रकृते श्रीवीरमित्रोदयाभिधनिबन्धे व्यवहारप्रकाशे परिभाषा
परिष्काराख्यं व्यवहारमातृकापरपर्यायम्प्रथमप्रकरणम् ॥ १ ॥ ● ॥ ● ॥ ● ॥ ● ॥ ● ॥ ● ॥ ● ॥ ● ॥ ● ॥ ● ॥
॥ अथ प्रमाणनिरूपणाख्यं द्वितीयम्प्रकरणमारभ्यते । तत्र प्रमाणभेदप्रमाणविषयव्यवस्थे क्रियापादप्रस्तावे विविक्ते । अ
धुना साक्ष्यादिप्रमाणानामवान्तरभेदः प्रस्तूयते । तत्र साक्षिस्वरूपमाह मनुः । समक्षदर्शनात्साक्ष्यं श्रवणाच्चैव सिध्यतीति
। समक्षदर्शनस्य साक्ष्यहेतुत्वम्पाणिनिरपिस्मरति । साक्षाद्द्रष्टरि संज्ञायामिति । तन्न व्युत्पत्तिमात्रमव्यापकत्वात् । श्रुत
साक्ष्यादीनामपि साक्षिव्यवहारविषयत्वात् । अत एव श्रवणादित्युपलक्षणम्प्रमाणमात्रस्य विवादविषयप्रमाता साक्षीति वि
वक्षितम् । साक्षीप्रयोजनमाह । नारदः । सन्दिग्धेषु तु कार्येषु द्वयोर्विवदमानयोः । दृष्टश्रुतानुभूतत्वात्साक्षिभ्यो व्यक्तिदर्श
नमिति । दृष्टश्रुताभ्यामनुभूतत्वादित्यर्थः । यद्वा । दृष्टत्वात् श्रुतत्वादनुभूतत्वाच्चेत्यर्थः । अनुभूतत्वादित्यनेन चगो वृषन्यायेन प्रमाणान्तरजन्योऽनुभवो गृह्यते । व्यक्तिदर्शनं विवेकज्ञानम् । कात्यायनः । अर्थिप्रत्यर्थिसान्निध्यादनुभूतन्तु यद्भवेत् । मद्वा

ह्यं साक्षिणो वाक्यमन्यथा न बृहस्पतिः । अर्थिप्रत्यर्थिसान्निध्यादनुभूतं मिथो मिथः कल्पः । तस्य सान्निध्येऽपि यच्चादिना सा
क्ष्यस्य वचनाकारैरनुमन्तव्यात् । तच्च साक्षिभूतं निरूपणे यत्नीभविष्यति । गौतमः । विप्रतिपत्तौ साक्षिनिमित्ता व्यवस्थेति ॥ १
॥ स च साक्षी प्रथमं द्विविधः । कृतोऽकृतश्च । साक्षित्वेनार्थिप्रत्यर्थिभ्यां निरूपितः कृतः । अनिरूपितोऽकृतः । पुनश्च कृतस्य पञ्च
विधत्वादकृतस्य षड्विधत्वादेकादशविधः । यथाह नारदः । एकादशविधः साक्षी शास्त्रे दृष्टो मनीषिभिः । कृतः पञ्चविधस्तेषां
षड्विधोऽकृत उच्यते । लिखितः स्मारितश्चैव यदृच्छाभिज्ञ एव च । गूढश्चोत्तरसाक्षी च साक्षी पञ्चविधः कृत इति । पत्रारूढतया लिखि
तत्वेनैव [illegible] लिखितम् । अर्थिना स्वयमानीतो यो लेख्ये संनिवेश्यते । स साक्षी लिखितो नाम स्मारितः पत्रकादृत इति ।
स्मारितः पत्रकादृते इत्यपि विवृतमनेनैव । यस्तु कार्यप्रसिद्ध्यर्थं दृष्ट्वा कार्यं पुनः पुनः । स्मार्यते ह्यर्थिना साक्षी स स्मारित इहो
च्यते । दृष्ट्वेति दर्शयित्वेत्यन्तर्भावितण्यर्थम् । कार्यं व्यवहारपदं दर्शयित्वा प्रमापय्य कार्यप्रसिद्ध्यर्थं कालान्तरे व्यवहा
रनिर्णयसिद्ध्यर्थम्पुनः पुनः स्मार्यते कार्यं तेन विस्मरणनिरासाय यः स स्मारितो नाम साक्षीत्यर्थः । यस्तु कृत्यप्रसङ्गा
दागतस्तत्र साक्षी भवति साक्षित्वेनानिरूपितः स यदृच्छाभिज्ञः स्मारितस्यास्य च [illegible] भेदः । स
ऽप्यनेनैव विवृतः । प्रयोजनार्थमानीतः प्रसङ्गादागतश्च यः । द्वौ साक्षिणौ त्वलिखितौ पूर्वपक्षस्य साधकाविति । गूढमा
ह । अर्थिना स्वार्थसिद्ध्यर्थं प्रत्यर्थिवचनं स्फुटम् । यः श्राव्यते स्थितो गूढो गूढसाक्षी स उच्यत इति ॥ उत्तरसाक्षिस्वरूप
माह । साक्षिणामपि यः साक्ष्यमुपर्युपरि भाषते । श्रवणाच्छ्रावणाद्वापि स साक्ष्युत्तरसंज्ञित इति । षड्विधस्याकृतस्य भेदो
नारदेनैव दर्शितः । ग्रामश्च प्राड्विवाकश्च राजा च व्यवहारिणाम् । कार्येष्वधिकृतो यः स्यादर्थिना प्रहितश्च यः । कुल्याः
कुलविवादेषु विज्ञेयास्तेऽपि साक्षिणः । प्राड्विवाकग्रहणं लेखकसभ्योपलक्षणम् । लेखकः प्राड्विवाकश्च सभ्याश्चैवानुपूर्वशः ।
नृपे पश्यति तत्कार्यं साक्षिणः समुदाहृता इति वचनान्तरात् । बृहस्पतिस्तु लेखितमधिकमाद्यैतानेव द्वादश साक्षिण आह ।

लिखितो लेखितो गूढः स्मारितः कुल्यदूतकौ । यादृच्छिकश्चोत्तरश्च कार्यमध्यगतोऽपरः । नृपोऽध्यक्षस्तथा ग्रामः साक्षी द्वादशधा स्मृत इति । तल्लक्षणान्यपि कानिचिद्विलक्षणानि कानिचित्पूर्वसंवादीन्याह स एव । प्रभेदमेषां वक्ष्यामि यथावदनुपूर्वशः आनीतानामभिलिखितं येन स्वं पित्र्यमेव च । [illegible] विज्ञेयः साक्षिलिखितसंज्ञकः । अर्थिना च क्रियाभेदे [illegible] दिकम् । [illegible] विख्यातो यस्तु लेखितः स उदाहृतः ॥ कुड्यव्यवहितो यस्तु [illegible] भाषितम् । विनिह्नुते यथा [illegible] क्षी स कीर्तितः ॥ आहूय यः कृतः साक्षी [illegible] वादिके । स्मार्यते यो मुहुश्चैव स्मारितः सोऽभिधीयते । विभागदाननि [illegible] निर्णयो यो दृश्यते । द्वयोः समानो धर्मज्ञः स कुल्यः परिकीर्तितः । अर्थिप्रत्यर्थिवचनं शृणुयात्प्रेषितस्तु यः । उभयोः [illegible] साधुर्दूतकः स उदाहृतः । क्रियमाणे च कर्तव्ये यः कश्चित्स्वयमागतः । अत्र साक्षी भव [illegible] यादृच्छिकस्तु सः । [illegible] साक्षी दिगन्तरं गच्छन्मुमूर्षुर्वा यथाश्रुतम् । अन्यं संश्रावयेत्तं तु विद्यादुत्तरसाक्षिणम् । [illegible] अभूतम् । अवणाच्छ्रावणाद्वापि स साक्ष्युत्तरसंज्ञितः ॥ उभाभ्यां यस्य विश्वस्तं कार्यं वापि निवेदितम् । गूढचारी [illegible] कार्यमध्यगतस्तु सः । अर्थिप्रत्यर्थिनोर्वाक्यं यच्छ्रुतं भूभुजा स्वयम् । स एव तत्र साक्षी स्याद्विसंवादे द्वयोरपि । [illegible] सेतुप्रमर्यादो [illegible] भवेत् । अध्यक्षः सभ्यसहितः साक्षी स्यात्तत्र नान्यथा । दूषितं ज्ञानितं यत्र ग्रामो यामस्तु स मतः । [illegible] विभ्रमे साक्षी ग्राम स तत्र न संशय इति । लिखितलेखितयोः स्वपरलिखितमात्रभेदादेकादश द्वादश संख्ययोरविरोधः । सर्वं च यथासम्भवं दृष्टश्रुतरूपद्विविधसाक्षिभेदाद्वेयाः । [illegible] प्रत्यर्थिनः । [illegible] यद्यात्र यथासम्भवं सर्वविवादपदनिदर्शनम् । कुड्यव्यवधायकोपलक्षणम् । विनिह्नुते इति भावे क्तः निह्नवे सम्भावि तइति शेषः । इत्युक्तइतीति शेषाध्याहारः । दिगन्तरं देशान्तरं तत्त्वमन्यमित्यर्थः । उभाभ्यामर्थिप्रत्यर्थिभ्यां यस्य विश्वस्तं यदी यो विश्वासः कृत इति सम्बन्धसामान्यविवक्षया षष्ठीभावेन [illegible] पर्यवसानेवम् । गूढचारी कार्यमध्यगत [illegible]

ष्ट्य मितिहाद ग्रा विशेषः। दूतयद्दर्शाने लेखकस्यापि प्रदर्शनार्थम्। न कायटिकायाद्यादि नि वृहस्पतिवचनात्। मयह [illegible]

[illegible] तसाक्ष्युपवक्ष्याम्। येनयोर्थः प्रमितस्तत्र साक्षिवेन प्राग निरूपितोपि पश्चात्साक्षित्वेन विज्ञायेपयास्तः। [illegible]

यो [illegible] दातुमर्हतीतिपक्षितोर्थः। इत्तरथामे ननादानादिषु [illegible] सम्भवे [illegible]। [illegible]

[illegible]मनुः। यवातिवक्त्रोपीक्षेतमृणुयाद्वापिकिञ्चन। पृष्टस्तत्रापितद्ब्रूयाद्यथादृष्टं यथाश्रुतं। [illegible]

[illegible] नरयोरर्थिकियांनियाभेदैरितिपक्षिनन्नार्थिकियामर्थि [illegible] हारेणियाभेदैः प्रमा [illegible]

[illegible] तर्थवन्धितया व धाष्ट्येनदृष्टादि केविवादविषयेयः प्रत्यक्षम्प्रत्यर्थं समर्थं करोति अर्थमेयपीत्। [illegible]

यं। कालदावकधिपिसाक्ष्ये साक्ष्यते। [illegible] साक्षिमाहुर्बुधान्। [illegible]

येत्। [illegible] कुर्यादितिशेषः। [illegible] मनोनिवेश्यम्॥ ७॥ [illegible]

[illegible] नसाक्षीत्रिकालेनापिसिद्धिः [illegible] माहुर्याद्रियर्थः। [illegible]। [illegible]

तु। नचेश्वर्यमभिजानीयात्तत्सहसोऽप्रसाधयेत्। नारदः। आष्टमाद्वत्सरादर्वाक्स्मादिनरस्य हसाक्षिणः। [illegible]

[illegible] दृच्छेपम [illegible]। [illegible] नृगोपिकेनावयीमिद्धि गुरुस्य साक्षिणः। [illegible] मनुवदत्तु नरसाक्षिवाद्गि नि। इद द्वप्रा

योवादेयस्य [illegible]। अथवाचावनियमोनदृष्टः साक्षिणः प्रति। [illegible] समाभा [illegible] विदेशगमाः॥ [illegible]

हता बुद्धिः [illegible]। [illegible] सर्वे साक्षित्वमर्हन्ति। तेचसाक्षिणः कीदृशाः कार्याइत्यपेक्षायामाह मनुः।

यादृशा धनिभिः कार्या व्यवहारेषु साक्षिणः। तादृशान्सम्प्रवक्ष्यामि यथा वाच्यमृतं च तैः। गृहिणः पुत्रिणो मौलाः क्षत्रविट्शूद्र

योनयः। अर्थ्युक्ताः साक्ष्यमर्हन्ति न ये केचिदनापदि। आप्ताः सर्वेषु वर्णेषु कार्याः कार्येषु साक्षिणः। सर्वधर्मविदोऽलुब्धा विपरीतांस्तु

तु वर्जयेत्। [illegible] प्रख्यातकुलोद्भवाइतिकल्पतरौ। मूलम्पूर्वं [illegible] दन्तीतिमोचा। [illegible] ॥ [illegible]

ते । वक्ष्यमाणयाज्ञवल्क्यवचनसंवादात्साक्षित्वेनैव पूर्ववृत्तान्तवेदित्वाज्ज्ञेया इत्यर्थकमेतत्पदार्थप्रसङ्गात्कल्पतरुव्याख्यानमेव सम्यक् । रत्नाकरेऽपि मौलाः कुलीना इत्येवं व्याख्यानम् । मूलं प्रतिष्ठा सा येषामस्ति ते मौलाः अर्थकथनमेतत् । तद्धितस्तु भवार्थ एव कर्तव्यः यो हि यत्र भवः सोऽपि तस्यास्तीत्यविरुद्धमिति वदन्मेधातिथिरपीममर्थमनुमन्यते । प्रतिष्ठानार्थस्य साक्षि[illegible]पर्यालोचनम् । पृथगादित्रैविध्यस्य पदान्तरैरेव सिद्धत्वात् । अत्र [illegible] भवन्त्येव । अतएव [illegible] प्रकारद्वयं विधिरूपमनुमतं [illegible] । [illegible] सन्तीति निर्दिष्टानन्तु [illegible] साक्षिणः स्युरिति वदन्नाह । याज्ञवल्क्यः । तपस्विनो दानशीलाः कुलीनाः सत्यवादिनः । धर्मप्रधाना ऋजवः पुत्रवन्तो धनान्विताः । त्र्यवराः साक्षिणो ज्ञेयाः श्रौतस्मार्तक्रियापराः । यथाजाति यथावर्णं सर्वे सर्वेषु वा स्मृताः । त्र्यवरास्त्रिभ्यो न्यूना न भवन्ति परन्तु यथेच्छं भवन्तीत्यर्थः । जातयो मूर्धावसिक्ताद्याः । वर्णा ब्राह्मणाद्याः । यथा च मूर्धावसिक्तादयो मूर्धावसिक्तादीनां ब्राह्मणादयो ब्राह्मणादीनां साक्षिणो भवेयुः । असंभवे तु सर्वे सजातीयाः सर्वे कुलीनेषु वादिप्रतिवादिषु साक्षिणो ग्राह्या इत्यर्थः । व्यासः । धर्मज्ञाः पुत्रिणो मौलाः कुलीनाः सत्यवादिनः । श्रौतस्मार्तक्रियायुक्ता विगतद्वेषमत्सराः । अविद्यानपराधीनास्तद्देशसमवासिनः । युवानः साक्षिणः कार्या ऋणादिषु विजानतेति । कात्यायनः । स्वजाति[illegible]वर्जिताः । [illegible]मसंशयम् । [illegible] यादृक्स्वदृष्टे संभावयेत् । [illegible] साक्षिभिर्भाव्य इति । [illegible] । [illegible] मतिशुद्धिः [illegible] । [illegible] वादिनो विभाज्यो [illegible] प्रतिवादी । [illegible] । यादृक्प्रतिवादि [illegible]

यैरेव भावयेत्। वादयेत्युपलक्षणम्। वाद्यपि प्रतिवादिना तज्जातीयैरेव विभाव्यः। तथा च नारदः। श्रेणीषु श्रेणिपुरुषाः स्वे
षु वर्गेषु वर्गिणः। बहिर्वासिषु बाह्याः स्युः स्त्रियः स्त्रीषु च साक्षिण इति। मनुरपि। स्त्रीणां साक्ष्यं स्त्रियः कुर्य्युर्द्विजानां सदृशा
द्विजाः। शूद्राश्च सन्तः शूद्राणामन्त्यानामन्त्ययोनयः॥ श्रेणिपुरुषाणां सत्यपि वर्गित्वे पृथङ्निर्देशो गोवृषन्यायेन। प्रयोज
नञ्चात्राप्यभ्यर्हितत्वबोधनम्। वर्गिणश्च दर्शिताः। कात्यायनेन। लिङ्गिनः श्रेणिपूगाश्च वणिग्व्रातास्तथापरे। समूहस्था
श्च ये चान्ये वर्गास्तानब्रवीद्भृगुः॥ दासचारणमल्लानां हस्त्यश्वायुधजीविनाम्। प्रत्येकैकसमूहानां नायका वर्गिणः स्मृताः॥
तेषां वादः स्ववर्गेषु वर्गिणस्तेषु साक्षिणः। अत्र सर्वत्र न्यूनाधिकविशेषणोपादानमदोषाय अन्तभावयाभीरुत्वसत्यवदन
शीलत्वस्य च साक्षित्वप्रयोजकस्योपलक्षणार्थत्वात्तेषां॥ ●॥ ते च साक्षिणः कियत्संख्याकाः कुत्र ग्राह्या इत्यपेक्षायामाह। वृहस्प
तिः। नवसप्तपञ्च वा स्युश्चत्वारस्त्रय एव वा। उभौ वा श्रोत्रियौ ख्यातौ नैकं पृच्छेत्कदाचन॥ लिखितादिषु स एवाह। लिखितौ
द्वौ तथा गूढौ त्रिचतुष्पञ्च लेखिताः। यदृच्छास्मारिताकुल्यास्तथा चोत्तरसाक्षिणः॥ दूतकः खटिकाग्राही कार्य्यमध्यगतस्तथा।
एकएव प्रमाणं स्यान्नृपो ध्यक्षस्तथैव च। खटिकाग्राहीगणकः एक एवेत्येवकारो बाद्यपेक्षया नैकं पृच्छेत्कदाचनेत्यनेनोक्ताया
अनावश्यकत्वार्थो न नियमार्थोऽदृष्टार्थत्वप्रसंगात्। व्यवहारः साक्षिणो ज्ञेया इति योगीश्वरीयमप्येतदभिप्रायकमेव लिखितादी
नामुभयानुमतत्वया ह्यत्वमेकस्यापीत्याह योगीश्वरः। उभयानुमतः साक्षी भवत्येकोपि धर्मवित्। यद्यपि श्रौतस्मार्त्तक्रियापरा
धर्मप्रधानाद्व्यादिविशेषणोपादानात् व्यवहाराणामपि धर्मवित्त्वं समानन्तथापि तेषामुभयाननुमतानामपि भवत्येव साक्षित्वं द्वयो
रेकस्य चोभयानुमत्यैवेति भेद इति मिताक्षरा। नारदोपि। उभयानुमतो यः स्याद्द्वयोर्विवदमानयोः। स साक्ष्येकोपि साक्षित्वे
प्रष्टव्यः स्यात् संसदि। आप्तत्वेन राजादिभिरवधारितोप्येकः साक्षीत्याह व्यासः। शुचिः क्रियश्च धर्मज्ञः साक्षी यस्त्वनुभूतवाक्।
प्रमाणमेकोपि भवेत्साहसेषु विशेषतः। इति। अनुभूता यथार्थत्वेन प्रमिता वाग्यस्येत्यनुभूतवाक्। कात्यायनः। अभ्यन्तरस्तु

निःक्षेपेष्वाढ्यमेकोपि याच्यते । अर्थिना प्रहितः साक्षी भवेदेकोपि याचिते ॥ याचितइति निःक्षेपविशेषणं । न्यायतोऽवादस्य
अपीति वाचस्पतिः । मदनरत्ने तु याचितं विवाहाद्यर्थं याचित्वा गृहीतमाभरणादिकं याचितकमिति यावदित्याह । निःक्षेपविशे
षणवैयर्थ्याद्याचिते तस्मिन्नभ्यन्तरस्यैकस्यापि साक्षित्वप्रसङ्गाद्बहिर्मान्वयप्रसक्तेश्चाम्बरे व्याख्या प्रत्याख्याता । एकपक्षविवादे
न निर्मितो नैकोपि साक्षी स्यादित्याह । स एव । संस्कृतं येन यत्पण्यं तत्तेनैव विभावयेत् । एक एव प्रमाणं स विवादे तत्र कीर्तितः ॥ इदञ्च
बहूनामसंभवे सत्यवादिनोर्द्वयोरेकस्य वानुमतिप्रदर्शनार्थं न नियमार्थम् । अदृष्टार्थप्रसङ्गादिति ध्येयम् ॥ ● ॥ अथासाक्षि
साक्ष्यसम्भवे प्रतिषेधरहितानां साक्ष्यमुक्त्वा तत्पनाद्यु वयितुमसाक्षिणोपि स्मृतिषूक्ताः । [illegible] प्रतिषिद्धानु
मन्यैश्चाह केचन निषेधवत् । नारदः । असाक्ष्यपि हि शास्त्रेषु दृष्टः पञ्चविधो बुधैः । वचनाद्दोषतो भेदात्स्वयमुक्तिर्मृतान्त
र इति । श्रोत्रियाद्यास्तु वचनात्स्तेनाद्या दोषदर्शनात् । भेदाद्विप्रतिपत्तिः स्याद्विवादे यत्र साक्षिणाम् ॥ स्वयमुक्तिरनिर्दिष्टः
स्वयमेवैत्य यो वदेत् । सूचीत्युक्तः स शास्त्रेषु न स साक्षित्वमर्हति ॥ मृतान्तरोऽर्थिनि प्रेते मुमुर्षुश्राविताद्दृते । वचनादसाक्षिणः
श्रोत्रियाद्यानाह । स एव । श्रोत्रियास्तापसा वृद्धा ये च प्रव्रजितादयः । असाक्षिणस्ते वचनान्नात्र हेतुरुदाहृत इति । तापसा
वानप्रस्थाः प्रव्रजितादय इत्यादिशब्देन शङ्खेनैकयोग्योपात्ताः पित्राविवदमानादयो गृह्यन्ते । तथा च शङ्खः । पित्रा विवदमा
नगुरुकुलवासिपरिव्राजकवानप्रस्थनिर्ग्रन्थाश्चासाक्षिण इति । पित्राविवदमाननिर्ग्रन्थयोर्दोषादप्यसाक्षित्वसम्भवेऽपि वचन
दप्यसाक्षित्वेन विरोधः । दोषादसाक्षिणोऽपि तेनैव दर्शिताः । स्तेनाः साहसिकाश्चण्डाः कितवा वञ्चकास्तथा । असाक्षिणस्ते दु
ष्टत्वात्तेषु सत्यं न विद्यते । चण्डाः कोपनाः । कितवा द्यूतकृतः । योगीश्वरस्त्वसाक्षित्वमात्रविवक्षया सर्वानेतानेकीकृत्याह ।
स्त्रीबालवृद्धकितवमत्तोन्मत्ताभिशस्तकाः रङ्गावतारिपाखण्डिकूटकृद्विकलेन्द्रियाः ॥ पतिताप्तार्थसम्बन्धिसहायरिपुतस्कराः ।
साहसी दृष्टदोषश्च निर्धूताद्यास्त्वसाक्षिण इति । अत्र वृद्धग्रहणं श्रोत्रियादीनां वचनादसाक्षित्वान्नारदोक्तानामुपलक्षण

म् । स्त्रीबालादिग्रहणमन्येषामपि दोषात्साक्षित्वासंभवं तत्र भिहितानाम् । आद्यग्रहणाद्भेदात्साक्षित्वासत्यमुक्तेभ्यो नान
रस्य ग्रहणम् । न च स्त्रिया असाक्षित्वं स्त्रीकृतव्यवहारातिरिक्ते स्त्रीणां साक्ष्यं स्त्रियः कुर्युरिति वचनात् । बालोऽप्राप्तव्यवहारः
वृद्धोऽशीतिकावधिः मत्तो मदनीयद्रव्येण । उन्मत्तो ग्रहाद्याविष्टः । अभिशस्तो महापातकाभिशस्तः । स्तावकः । रङ्गावता
रीचारणः । पाषण्डिनो निर्ग्रन्थप्रभृतयः । कूटकृत्कूटलेख्यादिकारी । विकलः श्रोत्रेन्द्रियादिदोषवान् । पतितो निश्चितब्रह्म
हत्यादिः । आप्तः सुहृत् । अर्थसम्बन्धि विप्रतिपद्यमानार्थसम्बन्धी । सहाय एककार्यकारी । रिपुः शत्रुरन्यतरस्य । साहसी
बलावष्टम्भेन कार्यकारः । दृष्टदोषो दृष्टासत्यवचनः । निर्धूतो बन्धुभिस्त्यक्तः । भेदात्साक्षित्वं च संख्यागुणसाम्ये । अन्यथा
द्वैधे बहूनां वचनं समेषु गुणिनां वचः । गुणिद्वैधे तु वचनं ग्राह्यं ये गुणवत्तमाः । बहुत्वं परिगृह्णीयात्साक्षिद्वैधे नराधिपः । स
मेषु च गुणोत्कृष्टान् गुणिद्वैधे द्विजोत्तमानिति याज्ञवल्क्यमन्वादिवचनविरोधापत्तिः । मनुना साक्षिणां लिखितानामुक्तनिर्दिष्टा
नामस्वादिनाम् । तेषामेकोऽन्यथाभूते भेदात्सर्वे एव साक्षिण इति । कात्यायनेनैकस्यान्यथावादित्वे सर्वेषामेव भेदात्साक्षि
त्वमुक्तं तद्विरोध इति चेन्न । त्रयाणां साक्षिणामेकस्यान्यथावादे द्वितीयस्य तनुत्वस्य संप्रतिपत्तिस्तत्त्वानृतीयस्य चैकतरस्याप्यसा
क्षिणो न निर्णय इत्युच्यते कात्यायनाभिप्रायात् । संप्रतिपन्नानां वादिनाममात्मनैकत्वेन न एव निर्णय इत्यवगम्यते वाक्यमात्पर्या
न् । मूलभूतन्यायविरोधेऽनयोर्वचनयोरेवमवश्यं संकोचनादिति वाचस्पतिः । पञ्चषष्ठोऽपि साक्षिष्वधिकगुणस्यैकस्याप्यन्य
थावादित्वे तद्विरुद्धार्थाभिधायिनां सर्वेषामन्येषाममसाक्षित्वम् । अधिकगुणस्याप्येकस्य बहुवाक्यविरुद्धाभिधानादसाक्षित्व
मिति सर्वैर्विपि तेन साक्षिण इति न मन्वादिविरोध इति मदनरत्नकारः । वयन्तु गुणवत्स्वेव न मध्यमानां न पञ्चमिरेकेना
पि बहूनां प्रतिबन्धावेध्यादिन्यायेन प्राधान्यात् गुणवतः साम्ये वादिनिर्दिष्टानामेकस्याप्यन्यथावादित्वे संख्याधिक्येऽपि गुणव
त्तरत्वाभावे सर्वेषां साक्षित्वं द्वैधे बहूनामित्यत्रापि विनिगमकान्तराभावे बहुत्वमेव विनिगमकमतः एव संख्यानपेक्षमेव गुणवत्त

मध्यमात्रं याह्यवचनत्वे हेतुमाहेति ब्रूमः । स्वयमुक्तेरसाक्षित्वमपि विवृतं कात्यायनेन । यः साक्षी नैव निर्दिष्टो नाहूतो नैव देशितः । ब्रूयान्मिथ्येति तथ्यं वा दण्ड्यः सोऽपि नराधम इति । अयमत्र साक्षीति ज्ञानवानान्तरोऽर्थिप्रत्यर्थिनोरन्यतरः समृतोय स इति मृतान्तरस्य साक्षित्वमपि सहेतुकं विवृतं नारदेनैव । योऽर्थः श्रावितव्यः स्यात्तस्मिन्नसति चार्थिनि । कृतं तद्वदनुसाक्षित्वमित्यसाक्षी मृतान्तर इति । येनार्थिना प्रत्यर्थिना वा योऽर्थः स्वीयः श्रावयितव्यः स्याच्छ्रावणीयत्वेनाभिमतो भवेत्तस्मिन्नर्थिप्रत्यर्थिनोरन्यतरस्मिन्नसति मृते प्रोषिते वाऽभिमतार्थे वा निरूपिते स साक्षित्वं कस्मिन्नर्थे वदतु कस्य वा कृते वदत्वित्यर्थः । सामान्यतो यश्श्रावयोः कश्चिद्व्यवहारसम्बन्धोऽस्ति तन्मत्वं साक्षित्वाभाव्यमित्येतावान्मात्रमुक्तं विशिष्य च व्यवहारविषयो न तस्मै श्रावितः श्रावयिता च नास्ति स पृष्टोऽपि विशिष्य विषयाज्ञानादसाक्षीति यावत् । इदमेवाभिप्रेत्योक्तं मुमूर्षुः श्रावितादूर इति । मुमूर्षुग्रहणमश्रावणप्रयोजकाभावपरम् । तथा च स एव । श्रावितोऽनातुरेणापि यस्त्वर्थो धर्मसंहितः ॥ मृतेऽपि तत्र साक्षी स्यात्षट्सु चान्वाहितादिष्वित्याह । अत्र श्रोत्रियादयो न साक्षिणः कार्यास्तेषां रागादिशून्यानां सत्यवादित्वातिशयेऽपि तपःस्वाध्यायाग्निहोत्रादिव्यासङ्गेन श्रावितार्थविस्मरणसम्भवात् निपूज्यानां धर्माधिकरणप्रवेशाह्वानाद्यनौचित्याच्चेत्यर्थः । अहतास्तु तत्त्वं जानन्तो भवन्त्येव साक्षिणः । अत एवोक्तं मुभौ तु श्रोत्रियौ ग्राह्यौ विद्यादि । अन्यथा सर्वथा साक्षित्वनिषेधे तद्विरोधः स्यात् । तथा च नात्र हेतुः रसत्यवादित्वप्रयोजको हेतुः स्तेमत्वादिनोदाहृत इत्यर्थः । वचनादिव्यस्यापि साक्षित्वकरणनिषेधकवचनादित्यर्थः । एकोऽलुब्धस्तु साक्षी स्याद्बह्व्यः शुच्योऽपि न स्त्रियः । स्त्रीबुद्धेरस्थिरत्वाच्च दोषैश्चान्येऽपि ये वृताः इति मनुः । अलुब्ध एकोऽपि पुमान्साक्षी भवति बह्व्यः शुच्यो लोभादिदोषरहिता अपि स्त्रियः साक्षिण्यो न भवन्ति तत्र हेतुः स्त्रीबुद्धेरिति । एकोऽलुब्धस्तु साक्षीति मेधातिथिनाऽन्याभिमतत्वेन सम्पाठमभिप्रेत्यान्येन कार प्रश्ने वेणालुब्धोऽप्येको न साक्षी किमु तर्हि लुब्ध इत्येवं व्याख्यायते । तथा द्वयोरभ्युज्ञानम्भवति । स्त्रियस्त्वलुब्धा बह्व्योऽपि न साक्ष्यर्हाः किमुताशुचय इति भणितम् । तत्रान्ये

विप्रस्वर सबीजमेकस्य प्रागेव निरस्तत्वात् साक्षी साक्ष्यपर्युदासाद्यानुवादे तु यथोक्तगणनेष्वुपपन्ने सत्यत्रैकस्याबुधस्य पुंस्त्वेन प्रतिप्रसवपूर्वकं स्त्रीणां सर्वथा निषेधपरत्वे सन्दर्भसामञ्जस्यमिति। अलुब्धइत्यकार प्रश्लेषं विनैव पूर्वपाठएव लुब्धश्चेदेकोन साक्षी अलुब्धस्त्वेकोऽपि पुमान्साक्षीति जीमूतवाहनेनैवं व्याख्यानम्। तत्रलुब्धानां बहूनामप्यसाक्षित्वे एकपदवैयर्थ्यमिति व्यवहारतत्त्वे टूषणमुक्तं तदप्युत्तरवाक्यशेषत्वात् स्यनस्यागतिद्रष्टव्यम्। शुच्यमितिङीप्छान्दसो गुणवचनादुकारान्तादेव वोतोगुणवचनादितितद्विधानात्तत्कृदिकारादक्तिनइतिवासमर्थनीयम्। अन्योऽपिस्त्रीव्यतिरिक्तोऽपि रागद्वेषादिदोषायेवृनाऽऽन्यान्तर्भिन्नास्तेऽपि न साक्षिणः। यद्यपि केषाञ्चनप्तावसाक्षितया पृथगप्युक्तास्तथापि सर्वेषां पृष्ठाकोटेनवकुमध्येतयाऽनुक्तत्वं च स्पष्टार्थमिदमुक्तम्। अतएव मेधातिथिः। सामान्यविशेषाभिधानं हि सर्वैर्यन्थकारैरमन्यन्त इत्याह। मनुरेव। नार्थसम्बन्धिनो नाप्ता न सहाया न वैरिणः। न दृष्टदोषाः कर्तव्या न व्याध्यार्ता न दूषिताः। न साक्षी नृपतिः कार्यो न कारुककुशीलवौ। न श्रोत्रियो न लिङ्गस्थो न सङ्गेभ्यो विनिर्गतः। नाध्यधीनो न वक्तव्यो न दस्युर्न विकर्मकृत्। न वृद्धो न शिशुर्नैको नान्त्यो न विकलेन्द्रियः। नार्त्तो न मत्तो नोन्मत्तो न क्षुत्तृष्णोपपीडितः। न श्रमार्त्तो न कामार्त्तो न क्रुद्धो नापि तस्कर इति। अत्र सर्वविशेषणैरसम्यसंभावना विस्मरणादिकमसाक्ष्यनिमित्तमुपलक्ष्यते। अतएव वृद्धविकलेन्द्रियविकर्मकृत्तस्करादीनां गोवृषन्यायेन पुनरुपादानं स्पष्टार्थमित्यपि स्पष्टार्थाः। अन्ये मेधातिथ्यनुसारेणाविव्रियन्ते। अर्थसम्बन्धिनउत्तमर्णाधमर्णाद्याः उत्तमर्णो ह्यधमर्णवचनेन पराजीयमानस्तदानीमेव शेषाविष्टो धमर्णाद्दुर्गाप्रत्यादातुम्प्रयततइतितत्त्वितानुवृत्तिरधमर्णस्य तदनुगुणकौटसाक्ष्यहेतुत्वेन संभाव्यते। उत्तमर्णो निर्धनेऽधमर्णे स्वसाक्षितया धनं प्राप्य स्वस्मै तद्दर्पयिष्यतीति बुद्ध्या तदनुगुणवादी सम्भाव्यते। न यार्थः प्रयोजनन्तत्सम्बन्धिनो वादिप्रतिवादिनोरन्यतरस्माद्येषां प्रयोजनं सिसाधयिषितन्तेऽप्युपकारगन्धान्नसाक्ष्यार्हा इत्यादि सर्वत्र कौटसाक्ष्यसम्भावनोन्नेया दृष्टदोषा अन्यत्र कृतकौटसाक्ष्याः। व्याध्यार्त्ता वचनविसंवादापादकव्याधिपीडा

वन्तः । दूषिता अभिशस्ताः । नृपतेरसाक्षित्वं कृत्याभिप्रायेणातो न प्रागुक्तनारदोक्तिविरोधः लिंगस्योपपत्यादिः । संगेभ्यो विनि
र्गतः परित्यक्तः पित्रादिगुरुजनसंसर्गात् वृद्धानुपसेवनादस्यासत्यसम्भवना । अध्यधीनो बन्धकीकृतः । तस्य तदाज्ञावशवर्त्ति
त्वात् । वक्त्यो निन्दास्पदम् । विकर्मकृत् अधर्माभीरुः । वृद्धविकलेन्द्रिययोर्वार्द्धक्यस्वभावहेतुकेन्द्रियवैकल्येन भेदः ।
आर्त्तः शोकेन । नारदोऽपि । दासनैःकृतिकाश्राद्ध वृद्धस्त्रीबालचाक्रिकाः । मत्तोन्मत्तप्रमत्तार्त्तकितवग्रामयाजकाः । महापथि
कसामुद्रवणिक्प्रव्रजितातुराः । व्यङ्गैकश्रोत्रियाचारहीनक्लीबकुशीलवाः । नास्तिकव्रात्यदाराग्निप्यागिनोऽयाज्ययाजकाः । ए
कस्थालीसहायारिचरज्ञातिसनाभयः । प्रागदृष्टदोषशैलूषविषजीव्याहितुण्डिकाः । गरदाग्निदकीनाशश्शूद्रापुत्रोपपातिताः ।
क्लान्तसाहसिकाश्रान्तनिर्धूतान्यावसायितः । भिन्नवृत्तासमावृत्तजडतैलिकमूलिकाः । भूताविष्टनृपद्विष्टवर्धनक्षत्रसूचकाः ।
अघशंस्यात्मविक्रेतृहीनाङ्गभगवृत्तयः । कुनखिश्यावदन्मित्रध्रुक्शठशौण्डिकाः । ऐन्द्रजालिकलुब्धोग्रश्रेणीगणवि
रोधिनः । वधकश्चित्रकृत्त्रंखःपतितः कूटकारकः । कुहकः प्रत्यवसितस्तस्करो राजपूरुषः । मनुष्यपशुमांसास्थिमधुक्षीराम्बु
सर्पिषाम् । विक्रेता ब्राह्मणश्चैव द्विजो वार्धुषिकश्च यः । च्युतः स्वधर्मात्कुलिकः सूचको हीनसेवकः । पित्रा विवदमानश्च
भेदकृच्चेत्यसाक्षिणः । श्रेण्यादिषु तु वर्गेषु कश्चिच्चेद्द्वेष्यतामियात् । तस्य तेभ्यो न साक्ष्यं स्याद्द्वेष्टारः सर्व एव ते । नैःकृतिकः प
रापकारशीलः । चाक्रिकस्तैलिकः । प्रमत्तः सदाऽनवहितः महापथिको महापथगामी । सामुद्रवणिग्वहित्रवाही एकः श्रो
त्रियो द्वयोरनुमतेः । एकः श्रोत्रिय इति पृथग्वा प्राय श्रोतृकं च प्रागेवमत् । अपरार्के तु युग्मैके तिपठित्वा युग्मौ द्वौ विनिव्याख्या
तम् । एकस्थाली सहाय एकपाकभोजीति । सहायोऽन्यतरसाहाय्यकारी मिश्रचाण्डेश्वरौ । मदनरत्नकारस्तु । ए
कस्थाली सहाय इति विशेषणद्वयम्पृथक्कृत्य एकस्थाली स्थाल्यधिकरणकः पाको लक्ष्यते । स एको यस्येत्येकस्थालीति व्याच
ख्यौ । समासान्तविधेरनित्यत्वादेकस्थालीत्यत्र न दृतत्वेति नकप् । अर्द्धपिप्पलीत्यादिवन्न ह्रस्व इति च समादधे । अरिश्च

रः भूतपूर्वः शत्रुः। भूतपूर्वं चरट्। कल्पतरौ त्वरिधर इति पठित्वा शस्त्रधर इति व्याख्यातम्। ज्ञातयः सगोत्राः स्वनाभयो मातुल
तत्सुतमातृष्वस्रीयादयः। शैलूषः स्त्रीणां नर्त्तयिता। कुशीलवस्तु रंगोपजीवी नट इति भेदः। बीमजीवी विषकृषजीवीति
मदनरत्ने। विषवैद्य इति जीवी रत्नाकरे। आहितुण्डिकः। सर्पक्रीडोपजीवी व्यालग्राही। कीनाशः कर्कशः क्षुद्रो वा। रूपग्र
इति तु मदनरत्ने। उपपातित उपपातकीति कल्पतरुः। मदनरत्ने तूपपातक इति पठितम्। उपसमीपम्पातकं यस्येति
विगृह्य पातकयुक्त इति व्याख्यातञ्च। क्लान्तो निर्खिन्नः अश्रान्तोऽनवरतकर्मकारीति मदनरत्ने। अशान्त इति पठित्वाऽयोग्य
कर्मकारीति रत्नाकरे। निर्द्धूतो बान्धवैस्त्यक्त इति मदनरत्ने। ग्रामराजकुलश्रेण्यादिभिर्निस्सारित इति रत्नाकरे। लो
कभयशून्य इति भवदेवः। मूलं विप्रलंभस्तत्कारीति कल्पतरुः। मूलकर्म तु कार्म्मणमित्यमरकोशात्तत्कारीति तु युक्तम्। अ
परार्केणा तु पैपिक इति पठित्वा पैपिकपूपादिविक्रयीति व्याकृतम्। वर्षसूचको वृष्टीशकुनवेदी। नक्षत्रसूचको ज्यौतिषि
कः। अघशंसी परकीयपापप्रकाशकः। हीनाङ्ग उचितपरिमाणान्न्यूनाङ्गः। व्यङ्गस्तु छिन्नाङ्गस्त्यादिरिति भेदः। भग
वृत्तिर्भार्यादास्यादिसम्भोगशुल्कोपजीवी शङ्कुः वृषभनर्त्तनजीवीति मदनरत्नरत्नाकरयोः। कुहको दाम्भिकः। प्रव्रवसितः प्र
व्रज्यादिच्युतः। कुलिको राज्ञा व्यवहारपरिच्छेदकतया नियुक्तः। अस्य च साक्षित्वकरणे निषेधो विधिस्त्वकृतसाक्ष्य इति क
ल्पतरुः। मदनरत्ने तु कुलं ब्राह्मणादिगणास्तदधिकारी कुलिक इति व्याख्यानम्। सूचको राज्ञा परदोषान्वेषणपूर्वकं तस्मै त
न्निवेदने नियुक्तः। भेदकृन्मित्रादिप्रीतिभङ्गकर्ता। श्रेण्यादिष्विष्यस्याय मर्थः। येषु श्रेण्यादिषु यस्यैकापि द्वेष्यतां स तु ता
मापन्नस्तदीयविवादे तच्छ्रेण्यादिनिविष्टाः सर्व एव न साक्षिणस्तत्र हेतुर्द्वेष्टारः सर्व एव त इति। तच्छ्रेण्यान्तर्गतैकद्वेष्यनुरोधक
तवैरनिर्य्यातनार्थमन्यथावादित्वसम्भवात्। अत एव नारदः। बालोऽज्ञानादसत्यात्स्त्री पापाभ्यासाच्च कूटकृत्। विब्रूयाद्बा
न्धवस्नेहाद्वैरनिर्य्यातनादरिरिति। कात्यायनः। तद्वृत्तिजीविनो ये च तत्सेवाहितकारिणः। तद्वन्धुसुहृदो भृत्या आप्ता

तुनसाक्षिणः । मातृष्वसुः सुताश्चैव पितृष्वसृसुतास्तथा । मातुलस्य सुताश्चैव सोदर्य्यसुतमातुलाः ॥ एते सनाभयः प्रोक्ताः
साक्ष्यन्तेषु न योजयेत् । कुल्याः सम्बन्धिनश्चैव विवाह्यो भगिनीपतिः । पिता बन्धुः पितृव्यश्च श्वशुरो गुरवस्तथा ॥ तथा बृहस्प
तिः । मातुः पिता पितृव्यश्च भार्याया भ्रातृमातुलौ । भ्राता सखा च जामाता सर्ववादेष्वसाक्षिणः । परस्त्रीपानसक्ताश्च कितवाः सर्व
दूषकाः । उन्मत्तार्त्ताः साहसिका नास्तिकाश्च न साक्षिण इति । अत्र मातृष्वस्रादिशब्दानां संबंधिशब्दत्वादर्थेनोरन्यतरस्य एता
दृश संबन्धिनो न साक्षिणः सम्बन्धिनि स्नेहादन्यत्र वैरसम्भवादिति ध्येयं ॥ शंखलिखितौ । शुल्कगुल्माधिकृतौ दूतो वेष्टितशिराः
स्त्रियः कुलवासिनः परिव्राजकवाणप्रस्थतिर्य्यग्याः संख्यातयाश्चिया इति असाक्षिण इति प्रकृतं शुल्काधिकृतः शुल्कग्रहण
स्थानाधिकारी । गुल्मः स्वस्थाननिवेशितः पदातिसमूहस्तदधिकृतः वेष्टितशिराः उद्धतवेषो मूर्द्धव्याध्यभिभूतो वा इतरे प्र
सिद्धा व्याख्यातनराश्च । अनेन प्रपञ्चेन लोभादिकमसाक्षित्वनिमित्तमेव व्यक्तीकृतम् । यथाह मनुः । लोभान्मोहाद्भयात्क्रो
धान्मैत्र्यात्कामात्तथैव च । अज्ञानाद्बालभावाच्च साक्षी वितथ उच्यत इति ॥ ● ॥ असाक्षित्वेनोक्तानां क्वचित्प्रतिप्रसवमाह
नारदः ॥ असाक्षिणो ये निर्दिष्टा दासनैष्कृतिकादयः । कार्य्यगौरवमासाद्य भवेयुस्तेपि साक्षिणः । स्त्रियाप्यसम्भवे का
र्य्यं वालेन स्थविरेण वा । शिष्येण बन्धुना वापि दासेन भृतकेन वा । मनुरप्येवमेव द्वितीयं वचनम्पठितवान् । इदञ्चासत्य
वादित्वनिश्चयाभावे साक्ष्यन्तरस्य तद्गुणविशिष्टस्यासम्भवे बोध्यम् । स्त्रीसंग्रहणादिषु योगीश्वरः । सर्वः साक्षी संग्रहणे
चौर्यपारुष्यसाहसे । अत्र च मनुष्यमारणाद्यैर्म्परदाराभिमर्शनम् । पारुष्यमुभयञ्चेति साहसं स्याच्चतुर्विधमिति वच
नात्स्त्रीसंग्रहणादीनां सत्यपि साहसत्वे बलात्कारभ्भेन क्रियमाणानान्तेषामसाहसत्वात्संग्रहार्थन्ततः पृथगुपादानं । उ
शना । दासोन्धो वधिरः कुष्ठी स्त्रीबालः स्थविरादयः । एतेप्यनभिसम्बन्धाः साहसे साक्षिणो मताः । अनभिसम्बन्धा विवाद
गोचरीभूतार्थासम्बन्धिनः । अपक्षपातिन इति मदनरत्ने । मनुनारदौ । साहसेषु च सर्वेषु स्तेयसंग्रहणेषु च । वाग्दण्ड

योऽप्यपारुष्येन परीक्ष्येत साक्षिणः । मनुः । अनुभावी तु यः कश्चित्कुर्यात्साक्ष्यं विवादिनाम् । अन्तर्वेश्मन्यरण्ये वा शरीरस्या
पि वात्यये । अनुभावी तदर्थानुभवशीलः । यत्तु । स्तेयादिषु परीक्ष्येत साक्षिणः स्थिरकर्मसु । साहसात्ययिके चापि परीक्षा कुत्र
चिन्मृतेति । परीक्षाभिधानन्तस्यस्पष्टासत्यवादिदोषविषयमत एव कुत्रचिदित्युक्तं । अस्मिंश्च प्रघट्टके प्रकटदोषानभिधङ्गे
कचित्कविसम्वादादिदोषपुरस्कारेण सहसादिसाक्षितानकथाकरणीयेत्यत्र तात्पर्यं । अत एव विज्ञानयोगिनोक्तं । दोषाद
साक्षिणो भेदात्साक्षिणः स्वयमुक्तिश्चात्रापि न साक्षित्वे भवति सत्याभावादिनिहेतोरनपगमादिति । अपसर्कोपि सर्वानगुण
वानेवेत्यर्थः । दोषवांस्तत्रापि परिहरणीय एव । वक्तृदोषाणां वचनप्रामाण्यहेतुत्वादित्याह । तस्यापि सर्वदोषाभावेन तात्पर्ये
प्रतिप्रसवानुपपत्तेः । यत्तु केनचिदुक्तं साक्षिगुणदोषप्रतिप्रसवा यथाश्रुता एव ग्राह्या अन्यथा तत्र तत्र तत्तद्विशेषणोपादानमन
र्थकमुपलक्षणं वा प्रसज्येतेति । तद्बालिश्यम् । न्यायमूलकत्वान्नैवान्तद्विरोधेनैव नेयत्वात् । अत एव न्यूनाधिकविशेषणो
पादानमविरुद्धम् । अदृष्टार्थत्वे तद्विरोधो दुष्परिहरः स्यात् ॥७॥ एवमन्यतरेण साक्षिषूपन्यस्तेषु सत्सु तद्दोषेष्वपरस्तामुप
न्यस्तेऽसदुद्भावने दण्डं ह्याह । बृहस्पतिः । साक्षिणोर्थी समुद्दिष्टान्यस्तु दोषैर्दूषयेत् । अदुष्टान्दूषयन्वादी तत्समन्द
ण्डमर्हति । तत्समं विवादविषयसमं मितिवह्वन्त्यविषयविवादेष्वव्यापकमिति तत्समं कूटसाक्षिदण्डसममिति व्याख्येयम्
। साक्षिदूषणेऽन्यतरेणोद्भाविते प्रत्यक्षेषु वान्यादिदूषणेषु तेनैव निर्णयः । अयोग्येषु लोकप्रसिद्ध्यादिना न साक्ष्यन्तरेणा
नवस्थापत्तेः । तथा च व्यासः । सभासदां प्रसिद्धं यल्लोकसिद्धमथापि वा । साक्षिणां दूषणं ग्राह्यमसाध्यं दोषवर्जनात् ॥ अर्थे
षु साक्षिभिः साध्ये दूषणे पूर्वसाक्षिणाम् । अनवस्था भवेद्दोषस्तेषामप्यन्यसम्भवादिति । असाध्यं लोकादिसिद्धत्वात्साधना
र्हं यत इति हेतुगर्भमिति । दोषवर्जनादनवस्थादोषाभावादित्यर्थः । यद्यपि लोकसभ्यप्रसिद्धिरपि साक्षिप्रसिद्धिरेव पर्य
वस्यति । तथापि तत्र साक्षित्वोद्भावनानपेक्षत्वान्नानवस्था । अत एवातिगूढवादिप्रतिवादिमात्रविदितदूषणं साधनमन्यत

रेणालौकिकप्रमाणेन क्रियमाणं न दुष्यतीत्यभिप्रायः । नच साक्षिदूषणविभावनं व्यवहारान्तरत्वादयुक्तमिति वाच्यम् । प्रकृतोपयोगित्वेनार्थान्तरत्वानापत्तेः । कात्यायनः स्फुटमेतदेवाह । प्रत्यर्थिनार्थिना वापि साक्षिदूषणसाधने । प्रस्तुतार्थोपयोगित्वाद्व्यवहारान्तरं न चेति । अविद्यमानदोषोद्भावनेऽर्थिप्रत्यर्थिनोर्वैकल्पिकौ हानिदण्डौ अन्यतरज्ञाताराज्ञा सभ्यैरेव वाज्ञातास्साक्षिदोषास्तदा तैरेव साक्षित्वेनोपादेया इति । स एवाह । नानर्थेन प्रमाणान्तु दोषेणैव तु दूषयेत् । मिथ्याभियोगे दण्ड्यः स्यात्साध्यार्थाच्चापि हीयते । प्रमाणस्य हि ये दोषा वक्तव्यास्ते विवादिना । गूढास्तु प्रकटाः सभ्यैः काले शास्त्रप्रदर्शनादिति । ये गूढाः प्रत्यर्थिनाऽनज्ञातास्ते काले साक्षिवादात्पूर्वकाले कार्य इति शेषः । शास्त्रप्रदर्शनात् । दुष्टानां शास्त्रे साक्षित्वेनानुपादेयत्वदर्शनात् । छलं निरस्येति च छलं निरासस्यावश्यकत्वादिति तात्पर्य्यार्थः । साक्षिभिरुक्ते शास्त्रे दोषोद्भावनन्तेषां न कार्यमित्याह । बृहस्पतिः । लेख्यदोषास्तु ये केचित्साक्षिणाञ्चैव ये स्मृताः । वादकाले तु वक्तव्याः पश्चादुक्तान्न दूषयेत् ॥ न दूषयेद्दोषत्वेन नोपाददद्यात्सभ्यो राजेत्यर्थात् । पश्चादुक्तौ दण्डमथाह । कात्यायनः । उक्तेऽर्थे साक्षिणो यस्तु दूषयेत्प्रागदूषितान् । न च तत्कारणं ब्रूयात्प्राप्नुयात्पूर्वसाहसम् ॥ तच्च दण्डनिरूपणप्रस्तावे विवेचयिष्यामः । अन्यतरोद्भाविता दोषाः स्वीयास्तैरेव यः साध्युद्भावयितान चाह विष्णुः । लेख्यं वा साक्षिणो वापि विवादे यस्य दूषिताः । तस्य कार्यं न सिध्येत यावत्तन्न विशोधयेत् । पत्रेभिर्लिखितान्स्ववीन्दोषान्प्रतीते साक्षिणां उत्तरम्परिहारं वाच्याः । वाचनीया इति पूर्ववचनार्थः । यस्य साक्षिणो लेख्यं वा यदुद्भावितम्परेण दूषितं स यावत्तन्न विशोधयेत्तद्दोषरहितन्न कुर्यात्तावत्तत्र प्रमाणाभासत्वसाक्षीवनपातेन प्रमाणेन तत्स्य तत्कार्य्यं न सिद्ध्येदिति द्वितीयवचनार्थः । इदञ्च सभाक्षोभादिना साक्षिणां स्वदोषपरिहाराक्षमतायां द्रष्टव्यम् । तदिति लेख्यञ्च साक्षिणश्चेति द्वन्द्वे नपुंसकमनपुंसकेनैकवच्चास्यान्यतरस्यामिति नपुंसकैकशेषैकवद्भावौ । अन्यतरः साक्षिदोषमुद्भाव्य यदि तम्भावयितुन्न शक्नोति तदा स दण्ड्यः । साधिते तु दोषेत्याज्या । अर्थ्यपि प्रमाणान्तरमनुपन्यस्यन्पराजीयत इत्येतदाह व्यासः । असाधयन्दमन्दाप्योदूष

णांसाक्षिणांस्फुटम्। भाविते साक्षिणो वर्ज्याः साक्षिधर्मनिराकृताः॥ जितः सविनयं दाप्यः शास्त्रदृष्टेन कर्मणा। यदि वादी निरा
कांक्षः साक्षिसत्वे व्यवस्थित इति। विनयं दण्डं स वादी। मदनरत्ने तु सविनयं विनयः शिक्षा तत्सहितं यथा तथा दाप्यो विवादविष
यीभूतधनमिति शेष इति व्याख्यातं तत्तज्जित इत्यनेनैव साधितधनदानस्यार्थसिद्धत्वेन निरर्थकाध्याहारदोषापत्तेः क्लिष्टत्वाच्चो
पेक्ष्यम्। यस्तु विवादविषयीभूतार्थानभिज्ञान्विपरीताभिज्ञान्वा भयलोभादिप्रदर्शनेन स्वानुकूलं वादयति। तस्य दण्डमाह
। कात्यायनः। येन कार्यस्य लोभेन निर्दिष्टाः कूटसाक्षिणः। गृहीत्वा तस्य सर्वस्वं कुर्यान्निर्विषयं तत इति। सर्वस्वमिति गुरु
लघ्वपराधानुसारेण दण्डतारतम्योपलक्षणम्। निर्विषयं विवादविषयीभूतार्थशून्यं। ततः कूटसाक्ष्यकरणात्। साक्षी दो
षानुद्भावनेपि सभ्ये न सभापतिना चैते परीक्ष्योपादेयाः। तथा च कात्यायनः। उपस्थितान्परीक्ष्येत साक्षिणो नृपतिः स्वयम्
। बृहस्पतिरपि। उपस्थिताः परीक्ष्याः स्युः स्वरवर्णेङ्गितादिभिरिति। स्वरवर्णेङ्गितानि मनुयोगीश्वरोक्तानि हीननिरूप
णाविवृतानि। नारदोप्याह। यस्त्वात्मदोषदुष्टत्वादस्वस्थ इव लक्ष्यते। स्थानात्स्थानान्तरं गच्छेदेकैकं चानुधावति।
काशत्यकस्माच्च भृशमभीक्ष्णं निःश्वसत्यपि। विलिखत्यवनीं पद्भ्यां बाहुं वासश्च धूनयेत्। भिद्यते मुखवर्णोस्य ललाटं स्विद्य
ते तथा। शोषमागच्छतश्चोष्ठावूर्ध्वं तिर्यक् च वीक्ष्यते। त्वरमाण इवाबद्धमपृष्टो बहु भाषते। कूटसाक्षी स विज्ञेयस्तं पापं वि
नयेद्भृशम्। अबद्धमसम्बद्धम्। विनयेच्छोधयेद्यथा कौटसाक्ष्याद्विभेतीत्यर्थः। न तु दण्डयेदित्यर्थः। प्राकृतिवैदिकवि
कारविवेकस्य दुःखशकत्वात्। सम्भावनामात्रेण च दण्डनस्यान्याय्यत्वादिति तत्त्वम्। मदनरत्ने त्वाविद्धमिति पठित्वा कुलमि
ति व्याख्यातम्। शंखलिखितावपि मन्त्रिभिः शास्त्रसामर्थ्याद्दुष्टलक्षणं याह्यानि तिर्यक्प्रेक्ष्यते समन्तादेवावलोकयति। अकस्मान्मू
त्रपुरीषं विसृजति देशाद्देशं गच्छति पाणिना पाणिम्पीडयति नखान्निकृन्तति मुखमस्य विवर्णतामेति प्रस्विद्यति चास्य ललाट
मपशुष्यते च वाचम्प्रति पूजयत्यकस्माद्दानि प्रशंसति पुनः पुनरन्यमपवदति बहिर्निरीक्षते श्लक्ष्णं परामृशति शिरः प्रकम्पयो

यो निर्भुजति हस्तकाणोपरि लेटि अतिविस्मितः कर्म्मस्वमहस्त्वपि भुवौ संहरति स्थूलौ ध्यायति पूर्वान्नरविरुद्धं व्याहरति एव
मादिदुष्टलक्षणांकुलस्य च स्वामिनोन्यत्र प्रकृतिशीलादिति। अकस्मादिति तूष्णीमिति च यथायोगमनेकत्र सम्बंधनीयम्।
अन्यत्र प्रकृतिशीलादिति। प्रकृत्या स्वभावेन शीलन्ति यत्क्प्रेक्षणादिधर्म्मा यस्य स तथोक्तस्ततोन्यत्रैतानि दुष्टकुलक्षणानि
एतेषामांतरवैलक्षण्यस्य दुर्ज्ञेयत्वादित्यवधानेन परीक्ष्य वस्तुतत्त्वानुसरणं कर्णीयमिति सूचितम्। एवं गुणवत्तया दोषा
भाववत्तया च परीक्षितान्साक्षिणो विवादास्पदीभूतमर्थं पृच्छेदित्याह। कात्यायनः। देवब्राह्मणसान्निध्ये साक्ष्यम्पृच्छेदृते द्वि
जान्। उदङ्मुखान्प्राङ्मुखान्वा पूर्वाह्णे वा शुचिः शुचीन्॥ सभांतः साक्षिणः प्राप्तानर्थिप्रत्यर्थिसन्निधौ। प्राड्विवाको नियुञ्जीत
विधिनानेन सान्त्वयन्। यद्द्वयोरनयोर्वेत्थ कार्येस्मिंश्चेष्टितं मिथः। तद्ब्रूत सर्वं सत्येन युष्माकं ह्यत्र साक्षिता। अर्थिप्रत्यर्थि
सन्निधिवद्गवाश्वादिगोचरविवादेषु केषुचित्तत्सान्निध्यमपेक्षितव्यमित्यप्याह। स एव। अर्थिप्रत्यर्थिसान्निध्ये साध्यार्थस्य च
सन्निधौ। प्रत्यक्षं वादयेत्साक्ष्यं न परोक्षे कथञ्चन। अर्थस्योपरि कर्त्तव्यं तयोरपि विना क्वचित्। चतुष्पादेषु धर्म्मोयं द्विपात्स्था
वरेषु च। तौल्यं गणिमं मानार्हं अभावेपि हि वादयेत्। क्रियाकारकेषु सर्वेषु साक्षित्वं नत्वतोन्यथा। तयोर्वादिनोर्विनापीति स
म्बन्धमात्रविवक्षया षष्ठी अपि शब्दात्कैमुतिकन्यायेन तदुभयसन्निधानेन नान्वयः। किन्तु साध्यार्थसान्निध्यावश्यकतायाम्। य
द्वोभयासन्निधिप्रत्यर्थ्यसान्निध्यानुमान्यर्थः। तेन कथञ्चित्प्रत्यर्थ्यसंनिधानेपि साक्षिप्रश्ने न दोषः। क्वचिदित्यस्यैव विवरणं चतु
ष्पादेष्वित्यादि। तौल्यं तोलनार्हं सुवर्णादिः। गणिमं गणनार्हं वराटकादि मेयं मानार्हं गोधूमादि। अभावेपि साध्यार्थसानि
ध्याभावेपि क्रियाकारकव्यवहारास्तेषु वधरूपविवादपदे साक्षिणः शिवलिङ्गप्रतिमादिसन्निधाने प्रष्टव्या इत्यथाह। स एव।
वधे च प्राणिनां साक्ष्यं वादयेच्छवसन्निधौ। तदभावे तु चिह्नस्य नान्यथैव प्रवादयेत्। चिह्नस्य वधचिह्नस्याभियोज्यसम्बंधिनो
ऽभावे तत्साक्ष्यं वादयेत्। अन्यथा तत्सद्भावेनैव वादयेत्साक्ष्यं वधचिह्नेनैव निर्णयसम्भवादित्युत्तरार्थानुवादः। विधेयस्तु पूर्वा

र्थः । स तु दृष्ट एवं उपस्थापिताः साक्षिणोऽविलम्बेन प्रष्टव्या इत्यपुक्तमनेनैव । न कालहरणं कार्य्यं राज्ञा साक्षिप्रभाषणे ।
महान्दोषो भवेत्कालाद्धर्मव्यावृत्तिलक्षणः ॥ ते च साक्षिणः शपथैः पूर्वकं प्रष्टव्या इत्याह नारदः । आहूय साक्षिणः पृच्छे
न्नियम्य शपथैर्भृशम् । समस्तान्विदिताचारान्विज्ञातार्थान्पृथक्पृथगिति । न च साक्ष्यं क्वचिद्विषये मिलितैर्वक्तव्यं क्वचित्पृथ
कमित्याह वसिष्ठः । समवेतैस्तु यद्दृष्टं वक्तव्यन्तु तथैव तत् । विभिन्नेनैव यत्कार्य्यं वक्तव्यन्तत्पृथक्पृथक् ॥ भिन्नकाले तु यत्का
र्य्यं विज्ञातं यत्र साक्षिभिः । एकैकं वादयेत्तत्र विधिरेषः प्रकीर्त्तितः । यत्कार्य्यं दृष्टमनुषङ्गः । यत्तु गीतमेमोक्तम् । नासमवे
ताः पृष्टाः प्रब्रूयुरिति तदपि वसिष्ठोक्तिसमवेतसाक्ष्यविषयम् । हरदत्तस्तु नासमवेताः पृष्टाः प्रब्रूयुरिति पाठं मत्वा समवेता
अपृष्टा अपि न ब्रूयुरिति व्याचख्यौ पूर्वपाठस्तु मिताक्षरापाठधृते सम्यगिति । धर्म्मोपवृद्धिनैरधर्म्मगर्हावचनैस्तेऽन्तमायया
श्रावयीयादित्याह । नारदः । पौराणैर्धर्मवचनैः सत्यमाहात्म्यकीर्त्तनैः । अनृतस्यापवादैश्च भृशमुत्त्रासयेदपि । शपथे
च विशेषो दर्शितो मनुना । सत्येन शापयेद्विप्रं क्षत्रियं वाहनायुधैः । गोवीजकाञ्चनैर्वैश्यं शूद्रं सर्वैस्तु पातकैरिति ॥ अन्य
था ब्रुवतः सत्येन सत्यं नश्यतीति ब्राह्मणो शपथो देयः । क्षत्रियेवाहनायुधानि तैर्विफलतामेष्यन्तीति । वैश्ये गोवीजकाञ्चनानि
नाशमुपयास्यन्तीति । शूद्रेन्यथावादिनः सर्वपातकानि भविष्यन्तीत्यर्थः । ब्राह्मणविशेषस्यापवादं वृहस्पतिराह ।
गोरक्षकान्वाणिज्यकांस्तथा कारुकुशीलवान् । प्रेष्यान्वार्द्धुषिकांश्चैव विप्रान्शूद्रवदाचरेत् । इति विप्रग्रहणं क्षत्रियवै
श्ययोरपि तद्वृत्तिजीविनामुपाधेस्तुल्यत्वात् । विशेषान्तरमनुक्तं साक्षिणां श्रावणविधाय श्रावणीयमाह याज्ञवल्क्यः । साक्षि
णः श्रावयेद्वादिप्रतिवादिसमीपगान् । येपातककृतां लोका महापातकिनां तथा । अग्निदानाञ्च ये लोका ये च स्त्रीबालघा
तिनाम् ॥ स तान्सर्वानवाप्नोति यः साक्ष्यमनृतं वदेत् । सुकृतं यत्त्वया किञ्चिज्जन्मान्तरशतैः कृतम् । तत्सर्वं तस्य जानी
हि यं पराजयसे मृषा । शूद्रं सर्वैस्तु पातकैरिति मानवसंवादात्पातकश्रावणं शूद्रविषयकमिति मिताक्षराकारपरार्कौ । अ

पथदामश्ववर्णविधिभेदान्मानवेचशपथदानस्वतन्नियमादस्यसर्वविषयतामनुयुक्तामुन्नयामः । मनुरपि । नत्रप्रवि
ड्विवाकोनुयुञ्जीतेत्यादिसार्धश्लोकःकात्यायनीयःपूर्वलिखितएव । सत्यंसाक्ष्येब्रुवन्साक्षीलोकानाप्नोतिपुष्कलान् । इह
चानुत्तमांकीर्तिंवागेषाब्रह्मपूजिता ॥ साक्ष्येऽनृतंवदन्साक्षीपाशैर्बध्येतवारुणैः । विवशःशतमाजातीस्तस्मात्साक्ष्येवदेदृ
तम् । सत्येनपूयतेसाक्षीधर्मःसत्येनवर्धते । तस्मात्सत्यंहिवक्तव्यंसर्ववर्णेषुसाक्षिभिः । आत्मैवह्यात्मनःसाक्षीगतिरात्मात
थात्मनः । मावमंस्थाःस्वमात्मानंनृणांसाक्षिणमुत्तमम् । मन्यन्तेवैपापकृतोनकश्चित्पश्यतीतिनः । तांस्तुदेवाःप्रपश्य
न्तिस्वस्यैवान्तरपूरुषः । द्यौर्भूमिरापोहृदयञ्चन्द्रार्काग्नियमानिलाः । रात्रिःसंध्येचधर्मश्चवृत्तज्ञाःसर्वदेहिनाम् । अजातौ
रजननानिजन्मानोतियावत् । वृहस्पतिरपि । आजन्मनश्चामरणात्सुकृतंयदुपार्जितम् । तत्सर्वंनाशमायातिअनृ
तस्यानुशंसनात् । वसिष्ठोपि । अथचेदनृतंब्रूयात्सर्वतोमिथ्यलक्षणाम् ॥ मृतोनरकमायातितिर्य्यग्गच्छत्यसंशयम् । सूक
रोदशवर्षाणिदशवर्षाणिगर्दभः ॥ श्वाचैवदशवर्षाणिभासोवानिजविंशतिम् । कृमिकीटपतङ्गेषुचत्वारिंशत्तथैवच ।
मृगस्तुदशवर्षाणिजायतेमानवस्ततः । मानुष्यन्तुयदाप्नोतिमूकोन्धस्तुभवेद्द्विधः । पामरोजायतेपश्चात्सपरित्यक्तबान्ध
वः । पंग्वन्धवधिरोमूकःकुष्ठीनग्नःपिपासितः । बुभुक्षितश्शत्रुगृहेभिक्षतेभार्ययासह । ज्ञात्वैतानन्ततेदोषानक्षान्त्वासत्येच
सद्गुणान् । श्रेयस्करमिहान्यत्रसत्यंसाक्ष्येवदेदतः । बौधायनः । त्रीनेवचपितॄन्हन्तित्रीनेवप्रपितामहान् । सप्तजा
तानजातांश्चसाक्षीसाक्ष्यमृषाब्रुवन् । मनुनारदौ । यावतोबान्धवान्यस्मिन्हन्तिसाक्ष्येऽनृतंवदन् । तावतःसंख्ययातस्मिन्
शृणुसौम्यानुपूर्वशः । पञ्चपश्वनृतेहन्तिदशहन्तिगवानृते । शतमश्वानृतेहन्तिसहस्रंपुरुषानृते । हन्तिजातानजा
तांश्चहिरण्यार्थेऽनृतंवदन् । सर्वंभूम्यनृतेहन्तिमास्मभूम्यनृतंवदेः । अप्सुभूमिवदित्याहुःस्त्रीणांभोगेचमैथुने । अब्जे
षुचैवरत्नेषुसर्वेष्वश्ममयेषुच । पशुवत्क्षौद्रघृतयोर्यानेषुचतथाप्नुयात् । गोवद्रजतवस्त्रेषुधान्येब्रह्मणिचैवहि । ए

तान्दोषानवेक्ष्य त्वंसर्वानन्हतभाषणो। यथाश्रुतंयथादृष्टं सत्यमेवाञ्जसावदेत्। अक्षेषुरत्नेषुमुक्ताफलादिषु। ब्रह्माणि
वेदे। अत्रहरदत्तेनक्षुद्रपश्वनृतेदशहन्तिगोश्वपुरुषभूमिषुदशगुणोत्तरमितिगौतमवचनव्याख्यानेमनुवचः। पञ्च
पश्वनृतेहन्तिइत्याद्युपन्यस्यपञ्चसंख्याहननदोषोत्पन्नक्षुद्रपशुविषयइतिगौतमवचोविरोधम्परिहृत्ययद्विषयमनृतसा
क्ष्यंदत्तंतत्प्राणिनान्दशादिसंख्यकानांहननेयोदोषस्तमाप्नोति। भूम्यनृतेतुयदीयाभूमिस्तज्जातीयलक्षहननदोषः। सर्वे
प्राणिहननदोषोवेतिव्याख्यातन्तनु यावतोवान्धवानितिमानवोपक्रमानालोचननिवंधनमित्युपेक्ष्यम्। तस्मात्साक्षिसम्बन्धि
पित्रादिगतसंख्यापरतयैवव्याख्यानंस्मुचितम्। गौतमीयमपिमानवसम्वादेनैवव्याख्येयमेकमूलकल्पनालाघवाय। त्रीने
वचपितॄनहन्तीत्यादिवौधायनादिवचनसंवादोप्येवं ॥ ● ॥ भूयस्तुजानन्नपिदौरात्म्यात्साक्षित्वमेवनाङ्गीकुरुतेतम्प्रत्याह।
योगीश्वरः। नददातीहयःसाक्ष्यंजानन्नपिनराधमः। सकूटसाक्षिणाम्पापैस्तुल्योदण्डेनचैवहि। पृष्टाःसाक्षिणोयेनविधि
नाब्रूयुस्तमाह। वृहस्पतिः। विहायोपानदुष्णीषंदक्षिणम्पाणिमुद्धरन्। हिरण्यगोसकृद्दर्भान्समादायनृतम्वदेत्। सा
क्ष्यभिहितस्यवचनस्यपरीक्षाविधानमप्याह। वृहस्पतिः। देशकालवयोजातिसंज्ञाद्रव्यप्रमाणतः। अन्यूनञ्चेन्निगदितंवि
ध्यंसाध्यंविनिर्दिशेत्। तत्रनारदः। निर्दिष्टेष्वर्थजातेषुसाक्षीचेत्साक्ष्यमागतः। नब्रूयादक्षरसमंनतन्निगदितम्भवेत्। दे
शकालवयोद्रव्यप्रमाणकृतिजातिषु। यत्रविप्रतिपत्तिःस्यात्साक्ष्यंतदपिकुत्सितं। ऊनमप्यधिकंवापिप्रब्रूयुर्येचसाक्षिणः। तद
प्यनुक्तंविज्ञेयमेषसाक्ष्यविधिःस्मृतइति। नचाधिकाभिधानमसंभवि वादिनःप्रतिवादिनोवाश्रुतेऽदृष्टेवानुभवमूलकसंस्का
राभावेनास्मृततत्प्रतिपादनासम्भवादितिवाच्यम्। करणापाठवादिनाश्रुतिदृष्ट्योरुभयोरपिसम्भवात्। अतएवभ्रान्तिमू
लत्वेनाप्रामाण्यात्। तदुक्तमप्यनुक्तमित्युक्तं। नचतथाप्यूनाभिधानेकुतोक्तिः। साक्षिवचनात्तावतःसिद्धावेकदेशविभावितन्या
येनान्यांशस्यापिसिद्धेर्ज्जयफलकतयान्यूनतोक्तेरदुष्टत्वादितिवाच्यम्। प्रतिज्ञातसकलसाध्यसाधकतयोद्दिष्टेषुन्यूनमभि

हितवत्त्वनूनतत्त्यायावसर इति प्रागावेदितत्वात् । साक्ष्यमनित्यश्रावणविधिना श्रावितश्चेन्नाभिधत्ते । तदा किं कर्त्तव्यमित्य
त आह । प्रोक्षिते याज्ञवल्क्य आह । अब्रुवन्हि नरः साक्ष्यमृणं सदशबन्धकम् । राज्ञा सर्वं प्रदाप्यः स्यात्षट्चत्वारिंशके
ऽहनि । सर्वं सवृद्धिकं सदशबन्धकं राजदेयदशमांससहितं । एतच्चांशदानमृणादानप्रस्तावे वक्ष्यते । षट्चत्वारिंशकेऽह
नि इत्यभिधानात्ततो वीग्नदाप्यः । तदपि व्याध्याद्युपद्रवरहितत्वे । यदाह मनुः । त्रिपक्षादब्रुवन्साक्ष्यमृणादिषु नरोऽगदः । त
दृणम्प्राप्नुयात्सर्वं दशबन्धश्च सर्वतः इति राजदैवोपद्रवविरहस्याप्युपलक्षणम् । साक्षिवचनाज्जयपराजयव्यवस्थां स्पष्ट
माह । योगीश्वरः । यस्योचुः साक्षिणः सत्याम्प्रतिज्ञां स जयी भवेत् । अन्यथावादिनो यस्य ध्रुवन्तस्य पराजय इति । उत्तरा
र्धापवादमुखेन कूटसाक्षिणामाह स एव । उक्तेऽपि साक्षिभिः साक्ष्ये यद्यन्ये गुणवत्तमाः द्विगुणा वान्यथा ब्रूयुः कूटाः स्युः पूर्वसाक्षि
ण इति ॥ अन्यथा अन्यतरप्रतिज्ञातार्थविपरीतम् । यद्यप्यर्थिप्रत्यर्थिसभ्यसभापतिभिः परीक्षितैः साक्षिगुणवत्त्वे साक्षिवच
नानंतरप्रमाणान्तरान्वेषणमेवानर्हमनवस्थाप्रसङ्गात् । निर्णीतेव्यवहारे न्यादिप्रागुक्तनारदवचनविरोधाच्च । तथापि वादि
प्रतिवाद्यन्यतरस्य स्वोक्तार्थे तत्सम्मतसाक्षितयानद्विसंवादिवचनसाक्षिषु यदि दोषाध्यवसायस्तदा प्रमाणांतरान्वेषणम्वारयितु
मशक्यमत एव तदादिव्येनान्यतरेण स्वसाध्ये साधिते साक्षिणः कूटत्वेन दण्ड्या इति वक्ष्यते । अर्थे विसम्वादिनि चक्षुरादेः स्पष्ट
दोषादर्शनेऽपि यथा तज्जनितज्ञानाप्रमाण्यमेवं दोषकल्पकं तथात्रापि । यथाहुः । यस्य च दुष्टं करणं यत्र च मिथ्येति प्रत्ययः स एव
वासमीचीनः प्रत्यय इति । अत एव साक्षिपरीक्षातिरेकेण तद्वाक्यपरीक्षोपदेशोऽपि घटते । साक्षिभिर्भाषितम्वाक्यं सह सभ्यैः प
रीक्षयेदिति । कात्यायनोऽप्याह । यदा शुद्धा क्रिया न्यायात्तदा तद्वाक्यशोधनम् । शुद्धाच्च वाक्याद्यः शुद्धः स शुद्धोऽर्थ इति स्थि
तिरिति क्रिया साक्षिरूपा न्यवार्थिसम्बन्धिनो नाम्नाइत्युक्तं साक्षिदोषराहित्यलक्षणाद्बाह्यशुद्धिः सा पुनः साइत्याद्युक्तसाक्षिगुण
साहित्यलक्षणा वाक्यशुद्धिस्तदा शुद्धा परीक्षिता भवति तदा तद्वाक्यस्य साक्षिवाक्यस्य शोधनं कार्यमिति शेषः । वाक्यशुद्धिश्चार्थः

विसम्वाद एव। सत्येन शुद्ध्यते वाक्यमिति स्मरणात्। एवं क्रियावाक्याभ्यामुभाभ्यां शुद्धाभ्यां सकाशाद्यः शुद्धः साधुरवगतोऽर्थः स शुद्धस्तात्त्विक इति स्थितिर्मर्य्यादा इति कात्यायनवचनार्थः। कारणादौ च बाधकप्रत्ययप्रत्यार्थे तथाभूत एवार्थ इति तात्पर्य्यम्। नारदवचनं तु जयावधारणोत्तरमप्रमाणान्तरपरिग्रह इत्येतत्परं निर्णिक्तपदोपादानात्। ततः प्रागुक्तप्रमाणान्तरान्वेषणेन क्षतिरिति तत्र नाद्विरोधः। एवं च सति दत्तनिगदेभ्यः साक्षिभ्योऽन्ये गुणवत्तमा द्विगुणा वा पूर्वनिर्दिष्टास्तदभावे पूर्वानिर्दिष्टा अपि साक्षिण एव वादिना वादनीया तद्दिव्यमप्यवलंवनीयं संभवे साक्षिणां प्राड्वो दैविकीं वर्जयेत्क्रियामिति वचनात् यदा तु तदसम्भवस्तदा दिव्यमप्यवलम्बनीयं संभव इति वचनात्। यदि दिव्येऽपि वादिनोऽपरितोषस्तदा प्रमाणान्तरस्यावाचनिकत्वात्सभ्यैः समापनीयो व्यवहारः। यदि तु वाद्युद्भावितसाक्षिभिस्तदनुगुणेऽभिहिते प्रत्यर्थिन एव स्वप्रत्ययविसंवादेन न तेषु दोषाध्यवसायस्तदा प्रत्यर्थिनः क्रियावसराभावाद्दैविकराजिकयोर्महाव्यसनयोः सप्ताहाभ्यन्तरोपनिपातेन तत्परीक्षणीयाः। यथाह मनुः। यस्य दृश्येत सप्ताहादुक्तवाक्यस्य साक्षिणः॥ रोगोऽग्निर्ज्ञातिमरणमृणं दाप्यो दमं च स इति। दमं कौटसाक्ष्ययुक्तन्दण्डम्। असति सप्ताहाभ्यन्तरव्यसनोपनिपाते प्रत्यर्थिना तावता सन्तोष्टव्यं दिव्यं वा सत्याध्यवसायमवलम्बनीयमित्यर्थसिद्धम्। यत्तु। केचिदुक्तेऽपीत्यादिवचनमर्थिनिर्दिष्टसाक्षिभिस्तदनुगुणेऽभिहितेऽपि प्रत्यर्थिनिर्दिष्टा यद्यन्ये ततो गुणोत्तमा द्विगुणा वान्यथा वादयन्ते तदा पूर्ववादिनः साक्षिणः कूटा इति व्याख्यानं तदयुक्तम्। किमिदं मिथ्योत्तरविषयं कारणाद्युत्तरविषयम्वानाद्यः। तत्र प्रत्यर्थिनः क्रियोपन्यासानवसरात्। अभाववादित्वात्। अभावस्य च भावज्ञानसापेक्षत्वाद्भावाभावयोर्भावस्यैव साध्यतौचित्यात्। अत एव मिथ्योक्तौ पूर्ववादिक्रियां निर्दिशेदित्युक्तम्। न चैकस्मिन्विवादे तु क्रिया स्याद्वादिनो द्वयोरिति वचनादेकस्मिन्व्यवहारेऽर्थिप्रत्यर्थिनोर्द्वयोः क्रियोपन्यासानुपपत्तिश्च। न द्वितीयः ततोऽर्थी लेखयेदित्यनेन पौनरुक्त्यात्। अर्थं तद्यर्थः साध्यं सोऽस्यास्तीत्यर्थी साध्यवान्प्रतिज्ञातार्थसाधनं साध्यतयोपन्यस्तस्यार्थस्य साद्भूतप्रमाणं लेखयेदि

तिप्राङ्न्यायकारणोत्तरयोस्तयोरेवसाध्यत्वात्। प्रत्यर्थ्यर्थिनोर्वार्थीसम्पन्नइतिसएवक्रियांनिर्दिशेदिति । स्पष्टीकृतञ्चाय
मर्थःस्मृत्यंतरे। प्राङ्न्यायकारणोक्तौतुप्रत्यर्थीनिर्दिशेत्क्रियाम् । मिथ्योक्तौपूर्ववादीतुप्रतिपत्तौनसाभवेत्। इतिउक्तेपी
त्यादिसङ्गतेश्च। प्राङ्न्यायादौहितस्यैवसाक्षिणइत्यन्यइत्यसङ्गतमेवभवेत्। अन्येतुयत्रद्वावपिभावप्रतिवादिनौनावपिच्छि
विधौकेचित्पूर्वोत्तरकालभेदेनप्रतिजानातेएकोवदति । इदंक्षेत्रंमयापूर्वंप्रतिग्रहादिनालब्ध्वाकियत्कालम्भुक्त्वादेशान्त
रंसकुटुम्बेनगतं। अन्यस्तुवदतिसत्यमनेनपूर्वम्प्रतिग्रहादिनालब्धम्परन्तुपश्चादितएवराज्ञाक्रीत्वामह्यन्दत्तमन्येनवास्मा
त्प्रतिगृह्यक्रीत्वावामह्यन्दत्तमित्यादि। केचित्तुपूर्वोत्तरकालभेदम्भिन्नैववदन्तः। तत्रप्रथमौसाक्षिषूभयतःसत्सुसाक्षिणः
पूर्वपक्षेऽधरीभूतेभवत्युत्तरवादिनइत्यस्ययाज्ञवल्क्यवचनस्यविषयौ। पूर्वकालंममेदमितियोवदतिसपूर्ववादीतस्यसाक्षि
णःप्रमाणतयाङ्गीकार्य्याः। तदीयस्वत्वानपगमेऽन्यस्यप्रतिग्रहादिस्वत्वोपायासम्भवादितितत्रोपपत्तिः। तस्यक्रयादिनास्व
त्वापगमेऽन्येनोपन्यस्तेतत्पक्षोधरीभूतइत्युत्तरकालंममेदमितियोवदतिसउत्तरवादी। तस्यसाक्षिणोङ्गीकार्य्याःपूर्ववादी
स्वत्वस्यसापवादत्वादितिमिताक्षराकारोक्तनदर्यात्। ननुपूर्वंयोनिवेदयतिसपूर्ववादीप्राङ्न्यायकारणोत्तराभ्यांतत्पक्षेधरीभू
तेउत्तरवादिनःप्रतिवादिनइतिव्याख्येयम्। तन्नार्थीलेखयेदित्यनेनैवास्यार्थस्योक्तत्वात्पौनरुक्त्यापत्तेः। नचैकस्मिन्नियादि
निषेधाद्वादिद्वयस्यक्रियोपन्यासानुपपत्तेश्च। यत्तत्रपरार्केणोक्तंसम्भवत्येवक्वचित्प्रत्यवस्कन्दनप्राङ्न्यायोत्तरवत्यपिन्याये
वादिद्वयस्यक्रियोपन्यासावसरेयत्रप्रतिवादीसत्यन्त्वदीयमृक्थंधारितवानहंकिन्तुप्रत्यर्पितवान्किन्तूत्तरयति। तत्रवादी
चेत्प्रत्युत्तरयतिसत्यन्त्वयार्पितन्ततुप्रयोगान्तरेणास्मिन्प्रयोगइतितदातत्साधनायद्वयोरपिसाक्ष्युपन्यासासम्भवः। पर
स्परोपमर्दकत्वेनयुगपद्व्यवहारासम्भवस्यैकविवादेद्वयोःक्रियानिषेधबीजस्याभावात्। एवम्प्रतिवादिनाप्राङ्न्यायोत्तरेद
त्तेयदिवादीतद्वैववदतिन्यायान्तरेत्वयाब्रह्मसजितोनास्मिन्न्यायइति। तदापिपूर्वाकारीत्याद्वयोःसाक्षीसम्भवः। तत्रोच

साक्षिसत्त्वे पूर्ववादिनः साक्षिणः प्रथमं स्वीकार्य्याः । प्राग्वादिनो निरुत्तरीभावेन पूर्वपक्षे धरीभूते ऽत्तरवादिनः प्रत्यवस्क
न्दनप्राङ्न्यायसाधकसाक्षिण इति न विरोध इति तत्रापि वक्तव्यम् । तादृशविषयेऽपि प्रत्यवस्कन्दनप्राङ्न्याययोरसाध्यतया प्रा
ग्वादिन एवार्थित्वमिति त्रिजाते तस्य निरुत्तरतायाम् अनुप्रत्यर्थिन एवेति पिष्टं धापितं तेनोर्थी लेखयेदित्यनेन गतार्थतास्य नापैति ॥ मि
ताक्षराव्याख्यने तु द्वयोरपि भाववादितयार्थित्वसाम्येन तेनोर्थी लेखयेदित्येतद्वचनाविषयत्वात् कस्यात्र क्रियेत्यपेक्षायामेतद्वचना
रम्भो घटते । तथा च मिताक्षरायामुक्तमेतस्य सर्वव्यवहारविलक्षणत्वान्नारदेनोपन्यास इति । नारदेन तु स्पष्टमेवायमर्थ उक्तः
। मिथ्याक्रियापूर्ववादे कारणे प्रतिवादिनि । प्राङ्न्यायविधिसिद्धौ तु जयपत्रं क्रिया भवेदिति । इत्युक्त्वा द्वयोर्विवदतोर्युक्ते द्व
यो सन्तु च साक्षिषु पूर्वपक्षो भवेद्यस्य भवेयुस्तस्य साक्षिण इत्यभिधानात् । द्वितीयो ह्यपीत्यस्य वचनस्य विषयो । पूर्वोत्तरवादि
नोः समगुणेषु समसंख्येषु च साक्षिषु सत्सु पूर्ववादिनः साक्षिणोऽभ्युपेयाः । यदा तूत्तरवादिनो गुणवत्तमा द्विगुणा वा तद्विपरी
तमभिदधति तदा त एव पूर्ववादिनस्तु साक्षिणः कूटा विज्ञेया इति चन्द्रार्थः । एवं वा नाभावस्य साध्यतापत्तिर्द्वयोरपि भा
ववादित्वात् । चतुर्विधोत्तरविलक्षणत्वाच्च नात्र मिथ्याक्रियापूर्ववाद इत्याद्युक्ता क्रियाव्यवस्था यथावात एव तथा चैकस्य क्रिया
द्वयप्रतिषेधो न प्रवर्त्तते तथा ममापि द्वयोः क्रिया प्रतिषेध इति वदन्ति तदप्यायातमनोहरम् । उक्तोपीत्यादिवचनादेतावतोर्थ
स्य च शब्दतः प्रकरणादर्थाद्वाऽनवगमात् । साक्षिषूभयतः सत्सु यस्य योगीश्वरवचनस्य द्वयोर्विवदतोरित्यादि नारदवचनस्य
स्वंपूर्वापपादितरीत्या पूर्वापरकालालिङ्गितभावावादि विषयत्वे तदनालिङ्गितविषयस्यास्य तदपवादत्वासंभवाच्च । तथान्यम
तेऽपरार्कादिमतवत् तयोरपि वादिविषयत्वमेवास्त्विति वाच्यम् । तस्योक्तदूषणत्वात् । ईदृश्यापि विषये वादिप्रतिवाद्यन्यतरस्यो
क्तौ मिथ्यात्वकारणान्यतरपर्यवसानावश्यंभावे चतुर्विधोत्तरविलक्षणत्वासम्भवाच्च । द्वयोरपि भाववादितयार्थित्वसाम्यमेव केव
लं व्यवहारान्तरवैलक्षण्यमस्य विधा चतुष्कभिन्नविधोत्तरासम्भवाच्च । ननु कात्यायनेनाप्युपन्यस्तसाक्षिभिस्तदनुगुणैर्भिद्वि

तेप्रत्यर्थी यदि ततो गुणवत्तमान्वकुधान्यथावादयति तदा वादिनः साक्षिणः कूटा इति स्फुटमुक्तम्। यथाह। यत्रवै भावितं
कार्य्यं साक्षिभिर्वादिनां भवेत्। प्रतिवादी यदा तत्र वादयेत्कार्य्यमन्यथा। बहुभिस्तत्कुलीनैर्वा कूटाः स्युः पूर्वसाक्षिण इति।
तत्कार्यमिति सम्बन्धः। बहुभिरिति पूर्वसाक्ष्यपेक्षया बहुत्वं कुलीनैरित्यनेन तदपेक्षया गुणवत्तरत्वं विवक्षितम्। अपरं कर्म
दनरत्नकराभ्यामेतत्संवादादेव योगीश्वरवचोप्युक्तेपीत्यादिकमेतदर्थकतयैव व्याख्यातम्। नचकथमेकविवादे द्वयोः क्रिये
तिवाच्यम्। यतस्तुल्यवदुभयोर्मास्तु क्रियाप्राप्तिर्युगपद्व्यवहारासम्भवात्। यदा शास्त्रतः प्राप्तक्रियेसैव क्रियोपन्यासे कृते परे
ण तद्दूषणायैव क्रियान्तरमुपन्यस्यते तदा को दोषः। अनवस्थाप्रसङ्गेषु संख्यागुणसाम्येमनुद्वैषम्येतेन जयावधारणात्प्रा
ग्यथैकस्य क्रियाद्वयमेवं द्वयोरपि क्रियाद्वयेन विरोध इत्यपरार्केण समाहितमिति उच्यते। अस्तु वचनात्कात्यायनीयादेवमपि
। योगीश्वरवचस्तु ततोर्थी लेखयेदिति तद्वचस्येव सर्वस्यार्थस्य सह सम्भवाद्गतार्थविज्ञानयोगिव्याख्ययैव सङ्गच्छते। साध
नपदेन साधनक्षममेवोच्यते। प्रतिवादिना तस्मिन्नाभासीकृते साधनत्वमेव तस्याप्यनर्मितिते नैव तदर्थलाभात्। अतएवाह।
स एव तत्सिद्धौ सिद्धिमाप्नोतिविपरीतमतोन्यथेति। कूटसाक्षिणो दण्डार्हाः प्रायश्चित्तार्हाश्च। तथा च याज्ञवल्क्यः। पृथक्
पृथक् दण्डनीयाः कूटकृत्साक्षिणस्तथा। विवादाद्द्विगुणं दण्डम्विवास्यो ब्राह्मणः स्मृतः। नारदः। अवीचीनरके कल्पं वसेयुः
कूटसाक्षिणः। बृहस्पतिः। कूटसाक्षी ब्रह्महा च समाः स्मृताः। मनुस्तु। उक्त्वा चैवानृतं साक्ष्ये कृत्वा च स्त्रीसुहृद्
धनमित्यादिना कूटसाक्षिणां ब्रह्महत्याप्रायश्चित्तमाह। तत्रैव विवेचयिष्यामः। दण्डस्तत्र विविच्यते। विवादात्तत्पराजयनि
मित्तदण्डात्। ननु विवादास्पदीभूता। अवधनव्यवहारेष्वव्याप्तेः। कूटः कृत्यो लोभभयादिप्रदर्शनेन साक्षिणः कूटात्क
रोति ननु सुवर्णादिकूटकृदत्र गृह्यते। अप्रकृतत्वात् विवास्योराष्ट्रात्। एतच्च लोभादिकारणविशेषाज्ञानेऽनभ्यासे च वे
द्यम्। लोभादौ ज्ञातेऽभ्यासे तु मनूक्तम्। लोभात्सहस्रन्दण्ड्यः स्यात्मोहात्पूर्वं तु साहसम्। भयाद्द्वे मध्यमौ दण्डौ मैत्र्यात्पूर्वं च

णुणम् । कामाद्दशगुणम्पूर्वं क्रोधात्तु त्रिगुणम्परम् । अज्ञानाद्द्वे शते पूर्णे बालिश्याच्छतमेव त्विति । तत्र मोहो विपर्ययज्ञानं
अज्ञानमस्फुटज्ञानम् । तात्कालिको भ्रम इति कल्पतरुः । बालिश्यं ज्ञानानुत्पाद इति तेषां भेदः । स्फुटमन्यत् । यो बस्य
निबन्धेषु रत्नाकरादिषु बालभावबालिश्यपदार्थत्वेन तथैव तेनोन्नेयप्राप्नोमद इति व्याख्यातम् । तदश्रद्धार्थत्वादसन्दर्भे विशेषाच्चो
पेक्ष्यम् । सहस्रादिसंख्येयास्ताम्रिकाःपणा व्यवहारविषये तथैव परिभाषणात् इति मिताक्षराकारः । आहापरार्कः । नेयं
व्यवस्था युक्ता लोभादिनिमित्तकमेव हि कौटसाक्ष्यमुपन्यस्तं मनुना तान च सम्भवत्यन्यत्र निमित्तम् । यथाहतुः । लोभान्मोहा
द्भयान्मैत्र्यात्कामात्क्रोधात्तथैव च । अज्ञानाद्बालभावाच्च साक्ष्यं वितथमुच्यते । अज्ञानं किञ्चिज्ज्ञानम् । बालभावोऽपरिपूर्णत
नम् । तस्माद्योगीश्वरोक्तो दण्डः स्वल्पेऽपराधेऽनभ्यासे च ज्ञेयः । गुर्वेपराधेऽभ्यासे च मनूक्त इति व्याख्या व्यवस्थेति । तन्ने
दृन्वाच्यम् । लोभादौ सहस्रादिदण्डस्य मानवस्य विवादपराजयहेतुकद्विगुणदण्डाद्याज्ञवल्कीयाधिक्यनियमो येन गुर्वे
पराधविषयताभ्यासविषयता वा कल्प्येत क्वचिद्वैपरीत्यस्यापि सम्भवात् । न च कौटसाक्ष्ये लोभाद्यतिरिक्तकारणासम्भवान्म
नुनापि तावतामेव परिगणनात्तन्नकारणभेदेन कृता व्यवस्था सुस्थेति वाच्यम् । वस्तुतो हेत्वन्तरासम्भवेऽपि हेतुविशेषपरिज्ञानत
दज्ञानयोः सम्भवात्तत्कृतव्यवस्थायामदोषात् । अत एव मिताक्षरायां लोभादिविशेषज्ञानाज्ञाने एव व्यवस्थापकत्वेनोक्ते
ननु लोभादितद्भिन्नहेतुसत्त्वासत्त्वे यानुमिताक्षराकृताभ्यासानभ्यासकृता व्यवस्थोक्ता सा क्वचित्तथापि सम्भवतीत्याशयेन । ज्ञा
नाज्ञानकृतैव तु तात्त्विकी अत एव मदनरत्नकृतापि सैवादृता । तथा नु मरेव । कौटसाक्ष्यं तु कुर्वाणांस्त्रीन्वर्णान्धार्मिको नृ
पः । प्रवासयेद्दण्डयित्वा ब्राह्मणं तु विवासयेत् ॥ ब्राह्मणभिन्नांस्त्रीन् क्षत्रियादीन् गुरुदण्डेन दमयित्वा प्रवासयेन्मारयेत्
। प्रपूर्वस्य वसतेरर्थे शास्त्रे मारणे प्रयोगात् । प्रवासनमप्यपराधानुरोधेनोष्ठच्छेदजिह्वाच्छेदप्राणवियोजनरूपं बोध्यम्
। ब्राह्मणं विवासयेत् विवासनमपि राष्ट्रान्निष्कासनम् । विगतवासा विवासास्तं करोतीति व्युत्पत्या नग्नीकरणं । वस्त्यस्मिन्नास्तीग

हंतद्द्वियुक्तंकरोतीतिशुल्काया गृहभंगकरणंवाकौटसाक्ष्यविषयानुसारेणगुणागुणद्रव्यानुबन्धानुसारेणचार्थदण्डसहितंय
थायथंविज्ञेयम्। दण्डयित्वेत्यंशस्याप्यनुषङ्गात्। एतच्चाभ्यासविषयम्। कुर्वाणानितिवर्त्तमाननिर्देशात्। नचवर्त्तमाननि
र्देशादतीतादिव्यावृत्तिमात्रंव्यवसीयतेनत्वभ्यासइतिवाच्यम्। तद्व्यावृत्तेरनुपयोगात्प्रत्युतकौटसाक्ष्यमभ्यासेनकृत्वोपरतस्य
पश्चादेतद्दण्डाभावप्रसङ्गात्तस्मात्कौटसाक्ष्यमत्यजतइत्यर्थकतयाभ्यासावगतिः। नचदण्डयित्वेत्यस्याचानुषङ्गेप्रमा
णाभावानुषङ्गवशाच्चविवासनमेवकूटसाक्षित्वाभ्यासकारिणोब्राह्मणस्यदण्डोनत्वर्थदण्डइतिवाच्यम्। नजातुब्राह्मणंह
न्यात्सर्वपापेष्वपिस्थितम्। नशारीरोदण्डोब्राह्मणस्येत्यादिवचनैः। शारीरदण्डनिषेधादर्थदण्डस्याप्यभावेस्वल्पविषयेपि
कौटसाक्ष्याभ्यासेनिर्वासननग्नीकरणगृहभङ्गादिप्रसङ्गात्। दण्डाभावस्यचाप्रसक्तेःतत्रतत्रार्थदण्डस्यब्राह्मणविषयस्यापि
वक्ष्यमाणत्वाच्च। तुशब्दस्यप्रधानविषयप्रवासनक्रियामन्वाद्यभिप्रायकत्वेनाप्यविरुद्धः। याज्ञवल्क्यः। यःसाक्ष्यंश्रावितो
ऽन्येभ्योनिह्नुतेतत्तमोवृतः। सदाप्योऽष्टगुणन्दण्डंब्राह्मणन्तुविवासयेत्। यःसाक्ष्यमंगीकृत्यअन्यैःसाक्षिभिःसहसाक्ष्यंश्रावि
तःसन्निगदसमयेतमोगुणेनावृतोरागद्वेषाद्याक्रान्तचित्तस्तत्साक्ष्यमन्येभ्योनिह्नुतेनाहमत्रसाक्ष्यंस्वीकरोतिप्रकाशयति। य
थातेनतदनुरोधात्तत्स्वीकुर्वतेकूटतांवाकुर्वन्तिसविवादपराजयनिमित्तकदण्डापेक्षयाष्टगुणदण्डन्दाप्योपराधमहत्त्वात्।
अन्येभ्यइतिश्रीमतःभगवतःपाणिनेःसूत्रेणाकेनइत्याहश्लाघह्नुङ्स्थाशपांज्ञीप्स्यमानइत्यनेनसम्प्रदानसंज्ञायाञ्चतुर्थीति
नपूर्वोक्तार्थलाभः। ब्राह्मणन्तुतथाकुर्वाणंविवासयेत्। विवासनञ्चव्याख्यातरीत्यादेशनिर्वासननग्नीकरणगृहभंगान्यत
ररूपमनुबन्धाद्यपेक्षयाव्यस्तसमस्तविधयाज्ञेयम्। यत्तुमिताक्षराकृताष्टगुणदण्डदानासमर्थमितिव्याख्यातन्तत्प्रधानक्रि
यानिरूपितस्यैलक्षण्यप्रतिपादकतुशब्दविरोधादुपेक्ष्यम्। नचैवमल्पविषयेपिविवासनमदण्डतावाप्रसज्येतेतिवाच्यम्।
वचनोपात्तविषयस्यैवदण्डस्ययुक्तत्वात्। अतएवाहनारदः। श्रावयित्वाततोन्येभ्यःसाक्षित्वंयोविनिह्नुते। सविनेयोभृश

नरं कूटसाक्ष्यधिको हि स इति । तथा चापरः कोऽपि । ब्राह्मणस्त्वेवंविधस्तु विवासयेन्न तु दण्डयेदित्येवं व्याचख्यौ । क्षत्रियादी नां तु दण्डदानासामर्थ्ये स्वजात्युचितकर्म्मकरणनिगडबंधनकारागृहनिरोधनादिना तावद्द्रव्यसमीकरणानुरूपं वोढ्यम् । सर्वेषा मपि निह्नवकारित्वे समानदोषत्वात्सर्वेऽपि प्रत्येकमष्टगुणान्दण्ड्याः । प्रागन्यथेत्वा पुनरन्यथेत्येतत्कात्यायनश्चाह । उक्त्वान्य था ब्रुवाणाश्च दण्ड्याः स्युर्वाक्छलान्विताः । अनुबन्धादितारतम्येनात्र दण्डतारतम्यं कल्पनम् । अन्यतरेणोपन्यस्ताः साक्षि णोऽन्येन यदि रहसि संवादयन्तेऽन्यद्वारेण भेदयन्ते वा तदा प्रकृतार्थहानिस्तस्येत्याह नारदः । न परेण समुद्दिष्टमुपेयात्सा क्षिणं रहः । भेदयेच्चैव नान्येन हीयेतैवं समाचरन्निति ॥०॥ साक्षिणामवचनानृतवचने प्रतिषिद्धे क्वचित्प्रतिप्रसवमाह । याज्ञवल्क्यः । वर्णिनां तु वधो यत्र तत्र साक्ष्यनृतं वदेदिति । साक्षिणा सत्ये उक्ते यत्र वर्णिनां ब्राह्मणादीनां राजदण्डरूपो वध आपद्यते तत्र वधप्रयोजकतारूपमहादोषपरिहाराय साक्ष्यनृतं वदेत् । सत्यं न वदेदित्यर्थः । तथा चावचनानृतवचनयोर्द्व योरप्यभ्यनुज्ञा लभ्यते शंकाभियोगादिस्थले साक्षिसत्यवचनेन यद्यभियुक्तस्य वधः प्रसज्यतेऽभियोक्तुश्च शङ्काभियोगकारि त्वान्न तत्प्रसक्तिस्तत्रानृतवचनाभ्यनुज्ञा तत्त्वाभियोगादौ च सत्यासत्यवचने यत्रान्यतरवधप्रसक्तिः परिहार्य्या तत्र तूष्णीम्भावो ऽभ्यनुज्ञायते । यदि तु राजा कथञ्चिदप्यकथनं नानुमन्यते तदा साक्षिणा सम्पादनीयेऽर्थे विरुद्धम् । तदसम्भवे सत्यमेवाभिधे यं वर्णिवधप्रयोजकत्वदोषपरिहारेऽनृतवचनदोषस्वीकारस्यानुचितत्वात्प्रायश्चित्तद्वयप्रसक्तेः । वर्णिवधप्रायश्चित्तपरं यथाशास्त्रमादरणीयमिविज्ञानयोगिनः । मनुरपि । शूद्रविट्क्षत्रविप्राणां यत्रर्त्तोक्तौ भवेद्वधः । तत्र वक्तव्यमनृतं तद्धि स त्याद्विशिष्यत इति । इदमपि योगीश्वरवचनवद्विशिष्टाभावपरतया व्याख्येयमवचनानृतवचनाभ्यनुज्ञाभावाय सत्याद्वि शिष्यत इत्यस्यायमर्थः । ब्राह्मणादिवधप्रयोजकतानिबन्धनाधिकदोषपरिहाराय वचनानृतवचनप्रयुक्ताल्पदोषस्वीकार उचित एवेति प्रशंसार्थम् । यद्यपि न जातु ब्राह्मणं हन्यात्सर्वपापेष्वपि स्थितम् । राष्ट्रादेनं बहिः कुर्यात्समग्रधनमक्षतम् ।

न ब्राह्मणवधाद्भूयानधर्मो विद्यते क्वचित् । तस्मादस्य वधं राजा मनसापि न चिन्तयेत् । इत्यादिमन्वादिवाक्यैर्ब्राह्मणवधद
ण्डनिषेधाद्विप्रग्रहणमनर्थं तथापि तस्य वधस्थानीयदण्डप्रसक्तेस्तत्परिहारायैवावचनानृतवचनाभ्यनुज्ञा । तथा च मनुः ।
मौण्ड्यं प्राणान्तिको दण्डो ब्राह्मणस्य विधीयते । इतरेषान्तु वर्णानां दण्डः प्राणान्तिको भवेदिति । स्मृत्यन्तरेऽपि । ब्राह्मण
स्य वधो मौण्ड्यं पुरान्निर्वासनं तथा । ललाटे चाङ्ककरणं प्रयाणं गर्दभेन चेति । न च वधग्रहणेनार्थद्वयपरिग्रहे वैरूप्यम् ।
निमित्तांशप्रतिनियतप्रसक्तावपि विधिवैषम्याप्रसक्तेः । यत्तु गोरक्षकान्वाणिजकांस्तथा कारुकुशीलवान् । प्रेष्यान्वार्धुषि
कांश्चैव विप्रान्शूद्रवदाचरेदिति मानवात्तेषां शूद्रवद्वधाभ्यनुज्ञाप्रतीतेस्तत्परं विप्रग्रहणं । तन्न वधपदमुभयत्र मुख्यार्थ
कमेव । अयन्तु पराकोक्तसमाधिरनुपादेयः तत्समानवस्तुप्रकरणात्कपथपरत्वेन दण्डविषयत्वाभावात् । सर्वपापे
ष्वपि स्थितम् । तस्मादस्य वधं राजा मनसापि न चिन्तयेत् इत्यादिश्रवणाद्विप्रवधमात्रस्यैव परिहरणीयत्वप्रतीतेश्च अथवा
यच्च क्रोधाद्यावेशवशेनातिक्रम्य निषेधं विप्रस्यापि राज्ञा स्वेच्छादिना वा वधदण्डः कर्तव्य इति संभावनात्तच्चैवेदं मस्तु यथा क
थञ्चित्प्रसक्तमुपजीवकत्वादस्य राज्ञोऽस्तु परं दोषः । पापीयस्त्वश्रवियाद्वैधप्रसक्तावपि नोभयाभ्यनुज्ञेत्याह गौतमः । ना
नृतवचने दोषो जीवनञ्चेत्तदधीनं न तु पापीयसो जीवनमिति । न चैवमवचनानृतवचनयोरभ्यनुज्ञानात्प्रत्यवाय एव नत्र
सर्वथा नास्तीति स्मृत्यन्तरप्रायश्चित्तस्मरणात् । तथा च याज्ञवल्क्यः । तत्पावनाय निर्वाप्यश्चरुः सारस्वतो द्विजैरिति । मनुर
पि । वाग्दैवत्यैश्च चरुभिर्यजेरंस्ते सरस्वतीम् । अनृतस्यैनसस्तस्य कुर्वाणा निष्कृतिं पराम् । कूष्माण्डैर्वापि जुहुयाद्घृत
मग्नौ यथाविधि । उदित्यृचा वा वारुण्या तृचेनाब्दैवतेन वेति । तेइति प्रक्रमाज्जुहुयादिति छान्दसो वचनव्यत्ययः । उदुत्तम
मिति पाठे उदुत्तमं वरुणपाशमिति ऋक् । तदित्यृचेति पाठे तत्त्वायामि ब्रह्मणेति वारुणी ज्ञेया । न चाभ्यनुज्ञावचः सार्थकत्वाय प्रत्य
वायाभावकल्पनमावश्यकमिति प्रायश्चित्तविधानं नैमित्तिकं श्राद्धमवत्यादिवत्पुंश्चलीवानरदंष्ट्रादिनिमित्तकद्वादशरात्रादिवदुद्दे

ति वाच्यम्। तत्पावनायैतेन सस्वस्य कुर्वीतानिष्कृतिम्प्रामित्यस्य वैयर्थ्यापत्तेः। नचैवम्प्रतिप्रसववैयर्थ्यापत्तेः। यतोऽनृत
वचनप्रतिषेधो द्विविधः पुरुषमात्रसाधारणः साक्ष्यप्रयुक्तश्चेतत्प्रकरणात्साक्ष्यप्रयुक्तप्रतिषेधनिबन्धनप्रत्यवायस्य प्रतिप्र
सवाद्भावेनानुसाधारणनिषेधनिबन्धनप्रत्यवायस्यापीति प्रायश्चित्तविधिबलात्कल्प्यते। यद्यपि भूयसः साक्ष्यनृतप्रभ
वप्रत्यवायस्यापगमेऽल्पस्यानृतमात्रप्रभवस्य तस्याभावोऽप्यविनाभावादानुषङ्गिकोऽवश्यम्भावी। ब्रह्मवधसुरापानादिप्रभ
वप्रत्यवायनाशकद्वादशाब्दादिना गोवधादिप्रभवतन्नाशवत्। तथाप्यत्राभ्यनुज्ञाया प्रायश्चित्तविरहे द्वोरुभयोरपि सार्थक्या
य भूयोनिवृत्तेरल्पानुषङ्गिकोऽप्यविनाभूतोऽपि स्वल्पोऽपि न निवर्तत इति गम्यते। अत्र च चरुरिति योगीश्वरवचनमेकवचना
द्वैवतैक्याच्चमानवेषचरुभिरिति बहुवचनं कर्तृबहुत्वेऽप्याप्तबहुत्वानुवादकम्। द्विजग्रहणान्नशूद्रस्यैतत्प्रायश्चित्तमित्युक्तम्
म्। तथा च विष्णुः। तत्पावनाय कूष्माण्डीभिर्द्विजोऽग्निं जुहुयात्। शूद्रस्त्वैकाह्निकं गोदशकस्य ग्रासन्दद्यादिति। एका
ह्निकमेकाहभक्ष्यपर्याप्तम्। यत्तु तत्पावनाय अष्टतश्चैन सत्यस्येत्यादियोगीश्वरमन्वादिवचनेषु तच्छब्दोपादानात्साक्ष्य
नृतपातकमेव गृह्यते तन्निरसनायैवेदं प्रायश्चित्तम्। न च तस्याभ्यनुज्ञावचनेनाभावावगमात्क्वयमेतदिति वाच्यम्। वर्णिवध
दोषापेक्षया साक्षिवितथवचनदोषस्याल्पस्य सद्भावे तद्विषयत्वादित्युच्यत इति वाच्यं शेषपर्यालोचनेन तस्य तात्पर्यात्। अत ए
वावचनदोषपरिहारोऽप्यनेन प्रायश्चित्तेन सामान्यतः साक्षिभिन्नस्यावचनदोषाभावात्। न चाब्रुवन्विब्रुवन्वापीति वचनमवचने
सामान्यतो दोषप्रतिपादकमिति वाच्यम्। तस्य प्रकरणात्सम्भावनाप्रवेष्टव्योऽनिवाक्यशेषाच्च सभ्यपरत्वात्। अत एव साक्षिणां
पृथग्वचने दोषवचनं सफलम्। न च साक्षिणामवचनानृतवचनयोर्दोषाधिक्यादिदमल्पप्रायश्चित्तमनुचितमिति वाच्यम्।
अभ्यनुज्ञाविधेरस्मिन्विषयेऽल्पदोषपरत्वस्योक्तत्वात्। एतेन भूयोदोषनिवृत्तावल्पदोषनिवृत्तिरविनाभावादन्यत्र नानुविधि
द्वयसाफल्यायमन्तव्येत्यपि कल्पनया स्तनश्चवर्णिवधप्रसक्तौ साक्षिणोऽप्यनृतं वचनावचनयोर्वधप्रयोजकतादोषापेक्षयाल्पो

दोषस्तत्रचेदम्प्रायश्चित्तन्तेनचततो। ऽल्पस्यासामान्यान्यवचनप्रतिषेधातिक्रमनिबन्धनो दोषः स्यु तस्य मुपैतितात्पर्यमितिवृ मद्
निसाक्षिनिरूपणं ॥ ● ॥ अथलेख्यंनिरूप्यते। तत्रबृहस्पतिः। साक्षिणामेषनिर्दिष्टः संख्यालक्षणनिश्चयः। लिखितस्याधुना
वच्मिविधानमनुपूर्वशः ॥ षाण्मासिकेपिसमयेभ्रान्तिः सञ्जायतेनृणाम्। धात्राक्षराणिसृष्टानिपत्रारूढान्यतःपुरा ॥ राज
लेख्यं स्थानकृतं स्वहस्तलिखितन्तथा। लेख्यन्तुत्रिविधम्प्रोक्तंभिन्नन्तद्बहुधापुनः ॥ भागदानक्रियाधानसंविद्दासऋणादिभिः
सप्तधालौकिकंलेख्यन्त्रिविधंराजशासनम् ॥ मरीचिरपि। स्थावरेविक्रयाधानेविभागेदानएवच ॥ लिखितेनाप्नुयात्सिद्धिम
विसंवादमेवच। भागोदानाधानमाधीकरणम्। संविन्नियमः। ऋणादिग्रहणेनविशुद्ध्यादिग्रहणम्। भागपत्रादीनांस्वरूप
माहबृहस्पतिः। भ्रातरः संविभक्तायेस्वरूच्यातुपरस्परम्। विभागपत्रंकुर्वन्तिभागलेख्यन्तदुच्यते ॥ भूमिन्दत्त्वातुयत्पत्रंकुर्या
च्चन्द्रार्ककालिकम्। अनाच्छेद्यमनाहार्यन्दानलेख्यन्तुतद्विदुः ॥ गृहक्षेत्रादिकंक्रीत्वातुल्यमूल्याक्षरान्वितम्। पत्रंकारय
तेयत्तुक्रयलेख्यन्तदुच्यते। जङ्गमंस्थावरम्बन्धंदत्त्वालेख्यङ्करोतियः। गोप्यभोग्यक्रियायुक्तमाधिलेख्यन्तदुच्यते ॥ ग्रामो
देशश्चयत्कुर्य्यात्सत्यलेख्यम्परस्परम्। राजाविरोधिधर्मार्थंसंवित्पत्रंवदन्तितत् ॥ वस्त्रान्नहीनःकान्तारेलिखितंकुरुतेतुयः
। कर्माणितेकरिष्यामिदासपत्रन्तदुच्यते ॥ धनंवृद्ध्यागृहीत्वातुस्वयंकुर्याच्चकारयेत्। उद्धारपत्रन्तत्प्रोक्तमृणलेख्यंमनी
षिभिरिति। विशुद्धिपत्रमुक्तङ्कात्यायनेन। अभिशापेसमुत्तीर्णेप्रायश्चित्तेकृतेबुधैः। विशुद्धिपत्रकन्देयन्तेभ्यःसाक्षिसमन्वि
तम्। सन्धिपत्रमप्याह। सएव। उत्तमेषुसमस्तेषुअभिशापेसमागते। वृत्तानुवादलेख्यंयत्तज्ज्ञेयंसन्धिपत्रकम्। अन्याधि
पत्रमाह। प्रजापतिः। धनीधनेनतेनैवपरमाधिन्नयेद्यदि। कृत्वातदाधिलिखितम्पूर्वंवास्यसमर्पयेत् ॥ पूर्वमाधिपत्रम्। सी
मापत्रमप्याह। कात्यायनः। सीमाविवादेनिर्णीतेसीमापत्रंविधीयतइति। ऋणशोधनेकृतेऋणपत्रनाशादौसतिप्राप्तिप
त्रमुत्तमर्णेनाधमर्णायदेयमित्याहयाज्ञवल्क्यः। दत्त्वर्णम्पाटयेल्लेख्यंशुद्ध्यैवान्यत्तुकारयेत्। अत्रलौकिकंसप्तविधलेख्यंस्व

मान्यकृतभेदेन द्विविधन्नारदेनोक्तम् । लेख्यन्तु द्विविधं प्रोक्तं स्वहस्तान्यकृतन्तथा । स्वकृते साक्ष्यनियमो न्यकृते तन्नियम इष्यते । असाक्षिमत्साक्षिमच्च सिद्धिर्देशस्थितेस्तयोरिति । असाक्षिमदपीत्यर्थः । तथा च याज्ञवल्क्यः । विनापि साक्षिभिर्लेख्यं स्वहस्तलिखितञ्च यत् । तत्प्रमाणं स्मृतं सर्वं बलोपधिकृतादृते । इत्यपि स्पष्टः प्रागुक्तबलोपधिकृतत्वपर्युदासः सर्वलेख्यविषयो न स्वकृतमात्रविषयः । तथा च मनुः । बलाद्दत्तं बलाद्भुक्तं बलाद्यच्चापि लेखितम् । सर्वान्बलकृतानर्थानकृतान्मनुरब्रवीत् ॥ नारदोऽपि । मत्ताभियुक्तस्त्रीबालबलात्कारकृतञ्च यत् । तदप्रमाणं लिखितम्भयोपधिकृतन्तथेति । अन्यकृते विशेषान्तरमाह । योगीश्वरः । यः कश्चिदर्थो निष्णातः स्वरुच्या तु परस्परम् । लेख्यन्तु साक्षिमत्कार्यन्तस्मिन्धनिकपूर्वकम् । समामासतदर्द्धाहर्नामजातिस्वगोत्रकैः । सब्रह्मचारिकात्मीयपितृनामादिचिह्नितम् । धनिकनामपूर्वकमित्यनेनोत्तमर्णनामोपरि लेख्यमधमर्णनाम तदध इत्यर्थः । एतच्च मर्ष्ट्यपत्रादिविषयमन्यथा सम्भवात् । समामासादि यथासम्भवमन्यथापि सब्रह्मचारिकम्बह्वृचादिशाखाप्रयुक्तगुणानामबह्वृचः कठ इत्यादि । वसिष्ठोऽपि । कालं निवेश्य राजानं स्थानन्निवसनन्तथा । दायकं ग्राहकञ्चैव पितृनाम्ना च संयुतम् ॥ जातिङ्गोत्रञ्च शाखाञ्च द्रव्यमाधिं ससंख्यकम् । वृद्धिं ग्राहकहस्तञ्च विदितार्थौ च साक्षिणौ ॥ स्थानं जनपदः । निवसनं पुरग्रामादिकं ग्राहकोऽधमर्णः ग्राहकहस्तसंनिवेशनप्रकारमाह योगीश्वरः । समाप्तेऽर्थे ऋणी नाम स्वहस्तेन निवेशयेत् । मतं मेऽमुकपुत्रस्य यदत्रोपरि लेखितमिति । साक्षिणावित्यनेन द्वयोरभ्यनुज्ञानात् । अपरत्वनियमो नात्रेत्युक्तमेकस्तु न भवत्येवेति अत्र साक्षिलेखकस्वहस्तचिह्नद्वार्थ्यमित्यप्याह । स एव । साक्षिणश्च स्वहस्तेन पितृनामकपूर्वकम् । अत्राहममुकः साक्षी लिखेयुरिति ते समाः ॥ उभयाभ्यर्थितेनैतन्मया ह्यमुकसूनुना । लिखितं ह्यमुकेनेति लेखकोऽन्ते ततो लिखेत् । समा इत्यनेन गुणसाम्यं संख्यासाम्यञ्च वैषम्यान्नियमाय विवक्षितम् । असमा इत्यकारप्रश्लेषस्तु वैषम्यस्यान्यत एव साक्षिषु प्राप्तेर्नोपादेयः । ऋणिसाक्षिणोः सर्वथा लिप्यनभिज्ञत्वे नारद आह । अलिपिज्ञ ऋणी यः स्यात्स्वमतं स तु

लेखयेत्। साक्षीवासाक्षिणान्येन सर्वं साक्षीसमीपतइति। त्रिविधं राजशासनमित्युक्तम्। त्रैविध्यं विविनक्ति बृहस्पतिः। दत्वाभू
म्यादिकं राजाताम्रपट्टे पटेथवा। शासनं कारयेद्धर्म्यं स्थानवंश्यादिसंयुतम्। मातापित्रोरात्मनश्च पुण्यायामुकसूनवे। द
त्तम्मयामुकायाद्य दानं सब्रह्मचारिणे। चन्द्रार्कसमकालीनम्पुत्रपौत्रान्वयानुगम्। अनाच्छेद्यमनाहार्य्यं सर्वभागविवर्जित
म्। दातुःपालयितुःस्वर्गं हर्तुर्नरकमेवच। षष्टिं वर्षसहस्राणि दानोच्छेदफलं लिखेत्। ज्ञातम्मयेति लिखितं सन्धिविग्रह
लेखकैः। समुद्रं वर्षमासादिधनाध्यक्षाक्षरान्वितम्। एवंविधं राजकृतं शासनं समुदाहृतम्। देशादिकं यस्य राजा लिखितेन प्र
यच्छति। सेवाशौर्य्यादिनातुष्टः प्रसादलिखितन्तथा। पूर्वोत्तरक्रियावादनिर्णयान्ते यदा नृपः। प्रदद्याज्जयिने लेख्यञ्जयप
त्रं तदुच्यते। सब्रह्मचारिणे। अमुकशाखाध्यायिने। सर्वभागविवर्जितम्। सकलराजपुरुषादिदेयांशरहितम्। योगी
श्वरः। शासनमाह। भूमिन्दत्वा निबन्धं वा कृत्वा लेख्यन्तु कारयेत्। आगामिभद्रन्नृपतिपरिज्ञानाय पार्थिवः। पटे वा ताम्रपट्टे
वा स्वमुद्रोपरिचिह्नितम्। अभिलेख्यात्मनो वंश्यानात्मानञ्च महीपतिः। प्रतिग्रहपरीमाणं दानच्छेदोपवर्णनम्। स्वहस्तका
लसम्पन्नं शासनं कारयेत्स्थिरमिति। इयंतिपर्णकमुकभारटावियन्ति पर्णकमुकादीन्यस्मै देयानीति राज्ञा नियतदानाज्ञानि
बन्धं कारयेत्संधिविग्रहाद्यधिकारिद्वारेणेत्यर्थात्। तथाच व्यासः। राज्ञा तु स्वयमुद्दिष्टः सन्धिविग्रहलेखकः। ताम्रपट्टे पटे वापि प्र
लिखेद्राजशासनमिति। प्रतिगृह्यतइतिप्रतिग्रहो भूम्यादिस्तत्परीमाणम्प्रतिग्रहपरीमाणं उपसर्गस्य दीर्घो वा कुलकः। दीय
तइति दानम्। भूम्यादि तस्यच्छेदः क्षेत्रादेर्मर्य्यादा तदुपवर्णनन्तन्निर्देशम्। आत्मवंश्यादीनभिलिख्येत्यन्वयः। इह
च साधुशब्दैरेव लेखनीयं न लौकिकषत्सदनियमः। तथाच संग्रहकारः। राजा स्वहस्तचिह्नेन राजादेशेन संयुतम्। युक्तं राजा
भिधानेन मण्डितं राजमुद्रया। सुलिप्यनपशब्दोक्तिसम्पूर्णावयवाक्षरम्। शासनं राजदत्तं स्यात्सन्धिविग्रहलेखकैः। अ
न्तिमपदोत्तरं लिखितायेतिशेषः। तस्मिन्निव लौकिके देशभाषादिप्रतिषेधो नेत्याह नारदः। देशाचाराविरुद्धं यद्व्यक्ताधि

विधिलक्षणम्। तत्प्रमाणं स्मृतं लेख्यमविलुप्तक्रमाक्षरमिति ॥ शासने राज्ञा स्वहस्तेनैव स्वसम्मतं लेख्यमित्यप्याह व्यासः। स्वं निवेशं प्रमाणञ्च स्वहस्तेन लिखेत्स्वयम् । मतम्मेऽमुकपुत्रस्य अमुकस्य महीपतेः ॥ सन्निवेशम्प्रमाणञ्चेत्यस्य पूर्ववाक्ये प्रलिखेदित्यत्रान्वयः। तयो राजस्वहस्तलिखनानियमात्। इदञ्च राज्ञा प्रतिगृहीत्रे समर्प्पणीयमित्याह विष्णुः। पटे वा ताम्रपट्टे वा लिखितं स्वमुद्राङ्कमागामिन्तृपतिपरिज्ञानार्थं दद्यादिति । अत एव दत्तापहारदोषप्रतिपादनमपि भाविन्तृपप्रख्यापनार्थं तत्रावश्यकमित्यप्याह । व्यासः । षष्टिवर्षसहस्राणि दानाच्छेदफलन्तथा । आगामिन्तृपसामन्तबोधनायाभिलेखयेदिति । षष्टिवर्षसहस्राणीत्यादिपुराणवचनप्रसिद्धन्दानाच्छेदयोः दानापहारयोः स्वर्गादिनरकादिफलं लेखयेदित्यर्थः ॥ ● ॥ । जयपत्रे विशेषमाह व्यासः ॥ व्यवहारान् स्वयं दृष्ट्वा श्रुत्वा वा प्राड्विवाकतः । जयपत्रन्ततो दद्यात्परिज्ञानाय पार्थिवः ॥ जङ्गमं स्थावरं येन प्रमाणेनात्मसात्कृतम् । भागाभियोगपसन्दिग्धे यः सम्यग्विजयी भवेत् ॥ तस्मै राज्ञा प्रदातव्यञ्जयपत्रं सुनिश्चितम् । पूर्वोत्तरक्रियापादन्तात्प्रमाणं परीक्षणम् ॥ निगदस्मृतिवाक्यञ्च यथासभ्यं विनिश्चितम्। एतत्सर्वं समासेन जयपत्रेऽभिलेखयेदिति प्रमाणस्य पृथक्‌ग्रहणात्क्रियापदेन प्रत्याकलितमवगृह्यते । परिज्ञानाय प्राड्न्यायस्य बोधनाय । भागेऽभियोगे वा सन्दिग्धे । विवादपदमात्रोपलक्षणम्। एतेन विवादविषये योयत्र विवादे स तत्र लेखनीयः। जयपत्रं राजमुद्राङ्कितङ्कार्यमित्याह । वृद्धवसिष्ठः। यथोपन्यस्तसाध्यार्थसंयुक्तं सोत्तरक्रियम्। सावधारणकञ्चैव जयपत्रकमुच्यते ।। प्राड्विवाकादिहस्ताङ्कं मुद्रितं राजमुद्रया । अथ चराहः सभ्यानाञ्च स्वहस्तोऽप्यपेक्षित इत्याह । कात्यायनः । सिद्धेनार्थेन संयोज्यो वादी सत्कारपूर्वकम् । लेख्यं स्वहस्तसंयुक्तं तस्मै दद्यात्तु पार्थिवः ॥ सभासदश्च ये तत्र स्मृतिशास्त्रविदः स्थिताः । यथालेख्यविधौ तत्र स्वहस्तन्दद्युरेव ते ॥ कचित्पश्चात्कारश्चोऽपि जयपत्रभेदमुक्तस्तेनैव । अनेन विधिना लेख्यम्पश्चात्कारं विदुर्बुधाः । निरस्ता तु क्रिया यत्र प्रमाणेनैव वादिना ॥ पश्चात्कारो भवेत्तत्र न सर्वासु विधीयते । अन्यवाद्यादिहीनेभ्य इतरेषां प्रदीयते ॥ वृत्तानुवाद

संदिग्धमनयस्याज्ञयपत्रकमिति ॥ वसिष्ठे राजपत्रस्य लक्षणाभिधानापूर्वकमास्य चातुर्विध्यमुक्तं। राज्ञः स्वहस्तसंयुक्तं स्वमु
द्राचिह्नितं तथा। राजकीयं स्मृतं लेख्यं सर्वेष्वर्थेषु साक्षिमत्। शासनं प्रथमं ज्ञेयं जयपत्रं तथापरम्। आज्ञाप्रज्ञापनापत्रं
राजकीयं चतुर्विधमिति ॥ ● ॥ आज्ञाप्रज्ञापनापत्रयोः स्वरूपमुक्तमनेनैव। सामन्तेष्वथ भृत्येषु राष्ट्रपालादिकेषु च। कार्य्य
मादिश्यते येन तदाज्ञापत्रमुच्यते। ऋत्विक्पुरोहिताचार्य्यमान्येष्वभ्यर्चितेषु तु। कार्य्यं निवेद्यते येन पत्रं प्रज्ञापनाय तदिति
॥ ● ॥ लेख्यप्रयोजनमाह। मरीचिः। स्थावरे विक्रयाधानविभागे दान एव च। लिखितेनाप्नुयात्सिद्धिमविसंवादमेव
च ॥ सिद्धान्ते वाचिकोऽप्याधिः स्थावरे षट्प्राहिकः ॥ प्रतिग्रहे च क्रीते च न लेख्यं सिध्यति क्रियेति। पूर्वलेख्ये कथञ्चन व्यवहा
राक्षमतामुपगते नष्टे वा परं लेख्यमथ मषीमलिनमषीपादि लिखितवादेयम्। आधानादौ तथाभूते तज्ज्ञादिद्वारा सम्यक्कारणीय
मित्याह योगीश्वरः। देशान्तरस्थे दुर्लेख्ये नष्टोन्मृष्टे हृते तथा। भिन्ने दग्धे तथा छिन्ने लेख्यमन्यत्तु कारयेत्। सर्वैरेतैर्वि
शेषणैर्व्यवहाराक्षमता विवक्षिता। दुष्टलिप्यक्षरपरिलोपेनावाचकतया वा यल्लेख्यमनुपयुक्तं दुर्लेख्यं। नष्टं सर्वथा नाशमुपगतं उन्मृ
ष्टं मषीदोषादिनामृदितलिप्यक्षरम्। यद्यपि दग्धमपि नष्टमेव तथापि कालान्तरभवनाशीर्णता नष्टपदेनात्र विवक्षिता। प
त्रान्तरकरणस्य स्वार्थप्रत्यर्थिनोः परस्परसम्प्रतिपत्तौ। विमतौ तु देशान्तरस्थस्यानयनाय कालावधेयोऽपेक्ष्य व्यवहारो वा प्रव
र्तनीयः। दुर्लेख्यादौ तु सम्प्रतिपत्तौ पत्रान्तरकरणम् अन्यथा व्यवहारदृष्टवृत्तिरेव व्यवस्थेयं साक्षिभिस्तत्तु नैरेव निर्णयः। तथा च नार
दः। लेख्ये देशान्तरस्थे तु शीर्णे दुर्लिखिते हृते। सतस्तत्कालकरणमसतो दृष्टदर्शनमिति ॥ सतो विद्यमानस्य लेख्यस्यानय
नाय कालकरणम्। असतः नष्टस्य नादरेखष्टी। तद्दिमापीत्यर्थः। द्रष्टारः साक्षिणस्तैर्दर्शनं निर्णयः कार्यः। तच्च लेख्यं परिच्छे
दप्रमाणीकरणीयमित्याह कात्यायनः। राजा क्रियां समाहूय यथान्यायं विचारयेत्। लेख्याचारेण लिखितं साक्ष्याचारेण सा
क्षिणः॥ दर्पणस्थं यथा बिम्बमसत्सदिव दृश्यते। तथा लेख्यस्य बिम्बानि कुर्वन्ति कुटिला नराः। व्यासः। लेख्यमालेख्यवत्के

चित्कुर्वन्ति कुशलानशः । तस्मान्न लेख्यसामर्थ्यात्सिद्धिरैकान्तिकी मता । बृहस्पतिः । आत्मादेशं चकाराज्ञ कुशलाः कूटका
रकाः । कुर्वन्ति सदृशं लेख्यं तस्मान्नैनं विचारयेत् ॥ स्त्रीबालानां लिपिज्ञानां स्वबन्धुर्यान्ति स्वबान्धवाः । लेख्यं हृत्वा स्वनामाङ्कं हि
थं युक्त्यागमैस्ततः ॥ कात्यायनः । साक्षिदोषाद्भवेद्दुष्टं पत्रं वै लेखकस्य च । धनिकस्यापि वै दोषात्तथा धारणिकस्य च ॥ दु
ष्टैर्दुष्टं भवेल्लेख्यं शुद्धैः शुद्धं विनिर्दिशेत् । तत्पत्रमुपधादुष्टैः साक्षिलेखककारकैः ॥ उपधावद्दुष्टान्तःकरणता ।
स एव । धनिकेन स्वहस्तेन लिखितं साक्षिवर्जितम् । भवेत्कूटं कृतं चेत्तत्कृतं हीनं विभावयेत् । देशाचारविरुद्धं यत्स
न्दिग्धं क्रमवर्जितम् । कृतं स्वामिनायत्तसाध्यहीनं च दुष्यति । नैवेद्यादेरयमर्थः । कर्मालिखनकर्ता धनिका
धमर्णसम्प्रतिपत्त्या मयैतल्लिखितमिति वदेन्न विभावयेत्तदा तत्पत्रं कूटं भवेत् प्रामाण्यशंकास्पदं तत्स्यादिति । व्यासः । अ
दृष्टश्राविते लेख्यं प्रमीतधनिकर्णिकम् । अबन्धलग्नकस्यैव च कुकालं न सिध्यति ॥ एतदपवादमाह बृहस्पतिः । उन्मत्त
जडबालानां राजभीतिप्रवासिनाम् । अप्रगल्भभयार्तानां न लेख्यं हानिमाप्नुयात् ॥ उन्मत्तादीनां लेख्यमदर्शनादिना
पि हानिं नाप्नुयादित्यर्थः । बृहस्पतिः । दूषितो गर्हितः साक्षी यत्र कोपि निवेशितः । कूटलेख्यं तु तत्प्रोक्तं लेखको वापि तद्विधः
। कात्यायनः । न लेखकेन लिखितं न दृष्टं साक्षिभिस्तथा । एतत्प्रत्यर्थिनो लेख्यं कूटं लेख्यप्रकीर्तितमिति ॥ कूटमप्रामाण्यशंका
कलंकितमित्यर्थः । तस्माद्दुष्टलेख्यपरीक्षाऽवश्यापेक्षणीयेत्यभिप्रायः ॥ ● ॥ परीक्षाप्रकारमाह । कात्यायनः । विविधस्या
पि लेख्यस्य भ्रान्तिः सञ्जायते यदा । धनिकसाक्षिलेखकानां हस्तो यत्साधयेत्ततः ॥ स एव । अथ पत्रमानपन्नो लेख्यकः स्वहस्त
क्षिभिः । तत्स्वहस्तादिभिस्तेषां विशुद्धिः स्यान्न संशयः ॥ व्यासो स्वहस्तसंदेहे जीवितो वा मृतस्य वा । तत्स्वहस्तकृतैरन्यैः पत्रै
स्तल्लेख्यनिर्णयः । याज्ञवल्क्यः । सन्दिग्धे लेख्यशुद्धिः स्यात्स्वहस्तलिखितादिभिः । युक्तिप्राप्तिक्रियाचिह्नसम्बन्धागमहेतुभिः
। एतद्देशकालयोरस्येदं द्रव्यं घटमइ शियुक्त्या प्राप्तिर्युक्तिप्राप्तिः क्रियासाक्ष्यादिभिः । चिह्नं मत्स्याकारं यन्त्रस्य च श्रीकारादि

। सम्बन्धपूर्वमपिपरस्परविश्वासकृतस्तयोर्दानग्रहणादिसम्बन्धः। आगमएतावतार्द्रव्यस्यास्मिन्देशेकालेऽस्यसम्भावितः
प्राप्त्युपायः। एतैर्हेतुभिःहेतुरसाधारणोन्योगोबृषनयेनपृथगेववा। प्रतिवादिनालेख्यदोषउद्भावितेवादिनातत्पुत्रेणवातदु
द्धारःकरणीयइत्याह। वृहस्पतिः। उद्धरेल्लेख्यमाहर्त्तातत्पुत्रोभुक्तिमेवतु। अभियुक्तःसभीतश्चेत्तत्पुत्रोपिनदुनदुद्धरे
त्। यत्तुकात्यायनः। साक्षिलेखककर्त्तारःकूटतांयान्तितेयथा। तथादोषाःप्रवक्तव्याःदुष्टैर्लेख्यम्प्रदुष्यति। आहर्त्ताभुक्तियु
क्तोपिलेख्यदोषान्विशोधयेत्। तत्सुतोभुक्तिदोषांस्तुलेख्यदोषानवाप्नुयात्॥ तदनभियुक्तपितृमरणेवेदितव्यम्। दोषानु
द्धारेदण्डमाह। कात्यायनः। कूटोक्तौसाक्षिणांवाक्याल्लेखकस्यचपञ्चकम्। नयेच्छुद्धिन्नयेत्कूटंसदाप्योदममुत्तममि
ति। उत्तमंसाहसमितिशेषः। राजशासनेनिर्णयप्रकारमाह। प्रजापतिः। कार्योयत्नेनमहतानिर्णयोराजशासनात्। रा
ज्ञःस्वहस्तेनमुद्रालेखकाक्षरदर्शनात्। मुद्रालेखकाक्षरयोर्दर्शनान्निर्णयाद्राजस्वहस्तश्चनिर्णयइत्यर्थः। स्थावरविक्र
यबन्धकादौकूटत्वेनलेख्यंदूषयतोऽसाधयतश्चदोषंशारीरंदण्डमाह। व्यासः॥ स्थावरेविक्रियाधानेलेख्यंकूटंकरोतियः।
ससम्यग्भावितःकार्योजिह्वापाण्यंघ्रिवर्जितः। सम्यग्भावितःप्रमाणेनसल्लेख्यत्वमंगीकारितः। अनेनकूटलेख्यकर्त्तुर्नायन्द
ण्डःकिन्तुकूटत्वोद्भावनकर्त्तुरितिगम्यते। तथाचलेख्यंपरकीयंयःकूटंकरोतिकूटमेतदितिवदतीत्यर्थः॥ कूटलेख्यकर्त्तुस्तुद
ण्डान्तरंवक्ष्यते। ऋणादानादावपिलेख्यदोषोद्भावयितुस्तदसाधयतोविषयानुबन्धानुरोधेनदण्डःकल्प्यः। लेख्यप्राबल्य
मथाह। वृहस्पतिः। कुलश्रेणिगणादीनांयथाकालम्प्रदर्शयेत्। श्रावयेत्स्मारयेच्चैवयथास्याद्दृढवत्तरम्। नारदः। ये
दर्शितम्प्रतिकालंयच्छ्रावितंस्मारितञ्चयत्। लेख्यंसिध्यतिसर्वत्रमृतेष्वपिहिसाक्षिषु॥ कात्यायनः। दृष्टेपत्रेस्फुटन्दो
षन्नोक्तवान्नृणिकोयदि। ततोविंशतिवर्षाणिस्थितंपत्रंस्थिरम्भवेत्। ऋणिकग्रहणम्प्रतिवादिमात्रोपलक्षणम्। सएव। शक्त
स्यसन्निधावर्थोयस्यलेख्येनभुज्यते। विंशद्वर्षाण्यतिक्रान्तंतत्पत्रन्दोषवर्जितम्। अथविंशतिवर्षाणिआधिर्भुक्तःसुनिश्चि

नः। तेन लेख्येन तत्सिद्धिर्लेख्यदोषविवर्जिताः॥ सीमाविवादे निर्णीते सीमापत्रं विधीयते। तस्य दोषाः प्रवक्ष्यामि यावद्दूषयति स्थि विंशतिः॥ प्राप्नुवात्तेन नैतेकिञ्चिद्देयं वाथनिरूपितम्। विनापि मुद्रया लेख्यं प्रमाणं मृतसाक्षिकम्॥ अपिशब्दो मृतसाक्षिकमि त्यत्राप्यन्वेति। व्यासः। स्वहस्तकाज्ज्ञानपदं तस्मानुन्हपशासनम्। प्रमाणान्तरमिष्टं हि व्यवहारार्थमागतम्॥ द्विज लिपिहस्तकं तमन्यल्लिख्येतयुक्तितः। कुर्य्याद्धि सदृशं लेख्यं तस्माज्जानपदं शुभम्॥ अप्रकाशात्मसाक्षिद्युतं लेखकाक्षरमु द्रितम्। लोकप्रसिद्धं स्वकृताद्द्वरमन्यकृतं शुभम्॥ देशाध्यक्षादिलिखितं तच्चजानपदं स्मृतम्। सम्यक्स्वम्पक्षिदर्शनात्स साहितं शुभम्॥ सम्वर्तः। लेख्ये लेख्यक्रिया प्रोक्ता वाचिके वाचिकी मता। वाचिकी न तु विच्छेत्ता लेख्यस्योपरि या क्रिया॥ लेख्य स्योपरि यत्साक्ष्यं कूटं तद्‌भिधीयते॥ अधर्मस्य हि तद्द्वारमतो राजा विवर्जयेत्। वाचिकी यदि सामर्थ्यमक्षराणां विहन्यते। क्रियाणां सर्वनाशः स्यादनवस्था च जायते। अस्यार्थः। लेख्ये सति लेख्यक्रिया प्रोक्ता सैव बलीयसीत्यर्थः। वाचिके साक्षिल ये प्रमाणे सति वाचिकी क्रिया साक्षिरूपा क्रिया सैव मता बलीयसी। लेख्यस्योपरि या वाचिकी साक्षिरूपा क्रिया लेख्या नारूढेति यावत्। न तत्साक्ष्येन। लेख्यस्योपरि यत्साक्ष्यं लेख्यसाधकतयोपन्यस्तमित्यर्थः। अधर्मस्य च तद्द्वारमित्यत्र हेतुर्वाचिकी ति। तथापि हेतुः क्रियाणामिति। तत्राप्युपपत्तिरनवस्थेति। प्रमादपरिहारमतियत्नेन कृत्वापि हि प्रायशो लेख्यं भवति तेन तत्राप्यप्रामाण्यशङ्कापि साक्षिभिर्नोचिता। साक्ष्यादावपि तत्सम्भवादिति तात्पर्य्यम्। ननु सर्वथा तत्साक्ष्यादिनिवर्त्तनमभि प्रेतं लेख्यपरीक्षोपदेशविरोधात्। इति संक्षिप्तनिरूपणम्॥ ● ॥ अनयोश्च साक्षिलेख्ययोः शब्दानिबद्धकत्वाच्छब्दप्रमाणे न्तर्भावः। तथाहि। यथोक्तगुणवतां दोषरहितानां साक्षिणामाप्तवाक्यावश्यम्भावात्। आप्तवाक्यस्य च प्रामाण्यात्। नतु भयविशेषावन्निर्धारणायैव साक्षिपरीक्षोपदेशः। आप्तवाक्यस्य च वक्तृज्ञानुमापकत्वेन स्वातन्त्र्येण वा प्रामाण्यमित्यन्य देतत्। लेख्यन्तु स्वहस्तकारित्वेन स्मृतिनान्तरीयकत्वात् तद्वचनाभिव्यञ्जकमित्याप्तवाक्यमेव तत्रापि प्रमाणम्। अत एव तत्रानाम

कच्छलहतनवशंकानिरसायञ्जन्मनादेः सहितानभिज्ञानयास्वस्मिन्नप्यनाप्तत्वाच्छङ्कानिरासाय चलेख्यपरीक्षोपदेशोप्यर्थ
वान् ॥ ० ॥ अथभुक्तिः । इयञ्च याज्ञवल्क्यादिभिरेकैव त्रिविधमानुषप्रमाणान्तर्गततयोक्ता । प्रमाणं लिखितं भुक्तिः साक्षि
णश्चेतिकीर्त्तितम् । एषामन्यतमाभावे दिव्यान्यतममुच्यते ॥ इत्यादिवचनैः वृहस्पत्यादयः मानुषप्रमाणभेदतयोपन्यस्त
भुक्ते द्वैविध्यं भुक्तियुक्तिचोदनाऽप्रतिकालाख्यानवन्तः । साक्षीद्वादशभेदन्तु लिखितन्दशधास्मृतम् । अनुमानं त्रिधाभिन्नं
नवधा दैवकीक्रिया ॥ इत्युक्ता भुक्तियुक्तिचोदनाऽप्रतिकलान्वृहस्पतिर्विवृतवान् । तत्रयुक्तिचोदनाऽप्रतिकालयोः प्रमाणान्त
रसहकारितयैव प्रमाण्यं भुक्तेष्ववक्ष्यमाणविशेषणवत्याः स्वत्वहेत्वविनाभावात्स्वत्वानुमापकत्वं स तत एवाभिसन्धाय योगीश्वरा
दिभिर्भुक्तिरेव प्रमाणतयोक्ताऽन्यैस्तु यथाकथञ्चिदनुमापकतामभिसन्धाय युक्तिचोदनाऽप्रतिकालसंग्रहायानुमानत्वेनैव
सोक्तेति सौकर्याय त्रयमपि निरूपयामः । तत्र कचित्सागमाया भुक्तेः प्रामाण्यमनभिसन्दधानः । सप्तस्थावरागमोपायान्प्रद
र्शयंस्तत्र भुक्तेः प्रामाण्यमाह वृहस्पतिः । एतद्विधानमाख्यातं साक्षिणां लिखितस्य च । साम्प्रतं स्थावरे प्राप्ते भुक्तेश्च विधिरुच्य
ते ॥ विद्यया क्रयबन्धेन शौर्यभार्यान्वयागतम् । सपिण्डस्याप्रजस्यांशं स्थावरं सप्तधा हृतम् ॥ पित्र्ये लब्धः क्रयाधानैरिक्थशौ
र्यप्रवेदनात् । प्राप्ते सप्तविधे भोगः सागमः सिद्धिमाप्नुयात् । स्थावरग्रहणमत्र भुक्तेरवश्यकत्वसूचनाय न तु तत्रैव भोगस्य
प्रामाण्यनियमाय जङ्गमेपि तत्सम्भवात्तदेतदुत्तरत्र विवेचयिष्यामः । विद्यया प्रतिग्रहादिकप्रयोजकतया स्वत्वोपायक्रयप्र
सिद्धः । बन्धो बन्धकं सोपाधिकं स्वत्वहेतुर्नेष्टाधिविधेयात्यन्तिकस्वत्वहेतुस्तदप्युत्तरत्र विवेचनीयम् । क्रयबन्धेनेति समाहार
द्वन्द्व एकत्वं । शौर्यागतं युद्धार्जितम् ॥ भार्यागतं विवाहकालप्राप्तम् । अन्वयागतं पित्रादिक्रमोपात्तम् । अप्रजस्य सपिण्डस्यां
शं रिक्थहरान्तराभावे पिण्डदानाद्यधिकारितया प्राप्तं । पित्र्य इत्यादिना प्रागुक्तानेव सप्तस्थावरागमोपायाननूद्य तत्र भोगस्य प्रा
माण्यं विधीयते । तत्र प्रवेदनं विवाहः स एव । क्रमागतः शासनिकः क्रयाधानागमान्वितः । एवंविधस्तु यो भोगः स तु सिद्धिमवा

भुयात्। संविभागक्रयप्राप्तम्पितृलब्धञ्चराजतः। स्थावरंसिद्धिमाप्नोतिभुक्त्वाहानिमुपेक्ष्यया। प्राप्तमात्रंयेनभुक्तंस्तोकमप्याप
रिपन्थिनः। तस्यतत्सिद्धिमाप्नोतिहानिश्चोपेक्ष्यातथा॥ अध्यासनसमारम्भभुक्तिर्यस्याविघातिनी। चिरञ्चर्ष्यविछिन्नातस्य
तांनविचालयेत्॥ अपरिपन्थिनं। विरोध्यप्रतिबद्धम्। अध्यासनात्परिग्रहात्। नारदः। आगमेनविशुद्धेनभोगोयातिप्र
माणताम्। अविशुद्धागमोभोगःप्रामाण्यन्नैवगच्छति॥ आगमस्याविशुद्धत्वंविरोध्यास्कन्दनम्भवेत्। व्यासः। सागमोदीर्घ
कालश्चविच्छेदोपरवोज्झितः। प्रत्यर्थिसन्निधानश्चपरिभोगोपिपञ्चधा॥ विच्छेदान्तरायःउपरवआक्रोशस्ताभ्यामुज्झितो
रहितः। यद्वाछेदोव्यवधानन्तद्विगमवान्विच्छेदोनिरन्तरइतियावत्। अपरवोवर्जनविषयोरवः। मदीयंक्षेत्रादित्वयाकि
मितिभुज्यतइतिप्रतिषेधः। अपशब्दस्यवर्जनार्थत्वात्। तेनोज्झितः। नारदः। संभोगंकेवलंयस्तुकीर्तयेन्नागमंक्वचित्।
भोगच्छलापदेशेनविज्ञेयःसतुतस्करः। इदंसागमत्वविशेषणन्तदनुपन्यासेदूषणञ्चस्मरणञ्चस्मरणायोग्यतायत्रागम
स्यतत्रकालेवोद्धव्यम्। सचकालःशतवर्षावधिकःशतायुर्वैपुरुषइतिश्रुतेरितिविज्ञानयोगिनः। पुत्रादिक्रमेणापिस्मर
णासम्भवात्प्रावर्तिकालेस्मरणन्तावानेवविवक्षितोस्मार्त्तइतितुवयम्। अनेनाभिप्रायेणाहसएव। स्मार्त्तेकालेक्रियाभुक्तेः
सागमाभुक्तिरिष्यते। अस्मार्त्तेऽनुगमाभावात्क्रमात्त्रिपुरुषागतेति। भुक्तिःप्रमाणमितिशेषः। अनुगमआगमाभावनिश्च
यः। कल्पतरुकारस्त्वनुगमआगमानुसंधानमितिव्याचख्यौ। तत्वागमाभावनिश्चयस्यवाधत्वेनानुमितिप्रतिवंधकस्याभाव
वचनस्यावश्यकत्वादागमानुसन्धानस्यचभोगेनैवक्रियमाणत्वेनतदभावासम्भवाच्चहेयम्। याज्ञवल्क्यः। आगमोभ्यधिकोभो
गविनापूर्वक्रमागतात्। पूर्वेषांत्रयाणांक्रमेणागतोस्मार्त्तकालइतियावत्। तस्माद्भोगाद्विनास्मार्त्तकालाद्भोगादागमोदानक्र
यादिरूपःस्वत्वहेतुरभ्यधिकउपजीव्यत्वात्। आगमंविनाभोगमात्रात्स्वत्वानुत्पत्तेः। स्मरणयोग्येचकालेस्मार्त्तेव्यास्मरण
रूपयायोग्यानुपलब्ध्यातदभावनिश्चयेभोगेनानुमित्यसम्भवात्। अस्मार्त्तेतुतदभावनिश्चयाभावेनिःप्रतिपक्षेणानैरन्त

व्यादिविशेषणवताभोगेन स्वत्वहेत्वाक्षेपद्वारा स्वत्वाक्षेप इति तात्पर्य्यम् । अनेनैवाभिसन्धिनाह । नारदः । अन्यायेनापि य
द्भुक्तं पित्रा पूर्वतरैस्त्रिभिः । न तच्छक्यमपाहर्तुं क्रमात्त्रिपुरुषागतम् । पूर्वतरैस्त्रिभिः सह पित्रा भुक्तमन्यायेनापि यदि किमु
तन्न्यायानिश्चयेन तदपहर्तुमशक्यमर्थिना स्वाध्यर्थं निराकोऽयं निरन्तरोपभोगे सति तस्य निरन्तरत्वात् । अत्र च सर्ववचने
षु त्रिपुरुषागतत्वं भोगस्य स्मार्त्तकालीनत्वोपलक्षणं न तु यथाश्रुतं स्मरणयोग्येऽपि द्वितीयादिवर्षरूपे काले पुरुषत्रयाव्यस
म्भवात् । तत्र च बाधेनानुमित्यर्थापत्त्योरनुदयात् । इदमेवाभिप्रेत्याह । व्यासः । पितापितामहो यस्य जीवेच्च प्रपिताम
हः । त्रयाणां जीवतां भोगो विज्ञेयस्त्वेकपूरुषः ॥ पितामहेन यद्भुक्तं तत्पुत्रेण विना च तम् । तौ विना यस्य पित्रा च तस्य भो
गस्त्रिपूरुषः । कात्यायनोऽपि । मुख्या पैतामही भुक्तिः पैतृकी चापि संमता । त्रयोपेतैरविच्छिन्ना स्थिरा षष्ट्याब्दिका मता । व्या
स एव । वर्षाणि विंशतिं भुक्ता स्वामिनाऽव्याहता सती । भुक्तिः सा पौरुषी भूमेर्द्विगुणा च द्विपौरुषी । त्रिपौरुषी च त्रिगुणा न
तत्रान्वेष्य आगमः ॥ भुक्ता भुक्तिः पाकं पचतीतिवत्प्रत्ययार्थानुयायिधातुरनुवादः । तत्रागमस्तादृशभोगेनैवाक्षिप्यते । आगमा
भावनिश्चये तु सर्वेण भोगो निष्फल एव । अनागमं तु यो भुङ्क्ते बहून्यब्दशतान्यपि । चौरदण्डेन तं पापं दण्डयेत्पृथिवीपतिः । न
च यो भुङ्क्ते इत्येकवचनश्रवणादेकपुरुषोपभोगे एतद्दण्डविधानमनेकपुरुषोपभोगे तु भोगस्य प्राबल्यमिति वाच्यम् । द्वितीयापृ
थिवीपतिः न च यो भुक्त इत्यादावप्यागमाभावनिश्चये भोगस्याप्रयोजकत्वात् । इदमेवाभिप्रेत्याह नारदः । आदौ तु कारणं दा
नं मध्ये भुक्तिस्तु सागमा । कारणं भुक्तिरेवैका सन्तता या चिरन्तनी । यदपि वचनं यद्विनागममत्यन्तं भुक्तं पूर्वैस्त्रिभिर्भवेत् । न
तच्छक्यमपाहर्तुं क्रमात्त्रिपुरुषागतमिति । तदप्युत्पन्नमुपलभ्यमानं आगमं विना आगमाभावनिश्चयाभाव इति व्याख्येयम् । न
नु स्मार्त्तकाले आगमस्य भुक्तिविशेषणमसंबद्धम् । सिद्धं प्रमाणान्तरादागमे तेनैव स्वत्वसिद्धौ भोगस्य विशेष्यांशस्यानुमाना
र्थापत्त्योरनुपयोगात् । असिद्धे विशेषणासिद्धिरिति चेन्न । प्रमाणान्तरसिद्धागमसहित एव विशेषणान्तरविशिष्टो भोगः ।

कालान्तरे स्वत्वमवगमयति भोगरहितोऽवगतोप्यागमः साक्ष्यादिभिन्नकालान्तरे स्वत्वमवगमयितुमाचष्टे मध्ये दानक्रयादि
नास्वत्वापगमसम्भवादिति विशेषणविशेष्ययोर्द्वयोरपि नानर्थक्यमसिद्धिर्वा इदमिदानीं ममस्वमिति साध्ये स्वत्वभागे आगमे
आगमस्तत्र तस्येदानीमप्यर्थन्तमननुवृत्तौ भोग इति निगर्वः । याज्ञवल्क्यादिभिः सर्वप्रकारकानुपभोगे पूर्णस्वत्वोत्पादकता
दानाद्यागमस्य नास्तीत्युक्तम् । आगमेपि बलं नैव भुक्तिः स्तोकापि यत्र नो । बलम्पूर्णता । नारदः । विद्यमानेपि लिखिते जीव
त्स्वपि हि साक्षिषु । विशेषतः स्थावराणां यन्न भुक्तं न तत् स्थिरम् । दानविक्रयादेरुपभोगनिरपेक्षस्यैव स्वत्वोत्पादकत्वात्किमि
ति भोगसवोप्यवश्यन्तत्रापेक्ष्य नइत्याशङ्कायामुपपत्तिरुक्ता विज्ञानेश्वराचार्यैः । दानादेः परस्वत्वापादनम्परकर्तृकस्वीका
रापेक्षावश्यम्भावनीयः स्वीकारश्च त्रिविधो मानसो वाचिकः कायिकः । ममेदमित्यध्यवसायो मानसः । ममेदमित्याद्यभिला
पो वाचिकः । उपादानाभिमर्शनादिरूपोनेकप्रकारकः कायिकः । तत्र मानसं विना स्वत्वासम्भवान्मानसावश्यक एव । दा
नविशेषपुरस्कारेण शब्दप्रयोगविशेषनियमपादस्पर्शनादिचेष्टाविशेषनियमाच्च वाचिककायिकावप्यावश्यकाविन्यव
सीयते तत्र हिरण्यवस्त्रादौ दातृकर्तृकत्यागादनन्तरमेव प्रतिग्रहीतुरुपादानादिसम्भवात्त्रिविधोपि व्यापारः सम्पद्य
ते । क्षेत्रादौ तु फलोपभोगं विना कायिकस्वीकारासम्भवादल्पेनाप्युपभोगेनावश्यम्भवितव्यमन्यथा दानक्रयादेः सम्पूर्णतान
भवत्युत्तरकालीकाराभावात् । तेन तत्त्वविचारादागमान्तराद्विकल आगमो दुर्बलो भवति । एतच्चद्वयोरागमयोः पूर्वापरभावान
वगमे तदवगमे तु स्वल्पभोगविकलोपि प्रक्रान्तएवागमो बलवान् । पूर्वेणादानादिना स्वत्वागमे दानाद्यन्तरासम्भवात् । न चैव
न्तस्य क्षेत्रादेर्मध्यक्रत्वापत्तिः । पूर्वस्यापागमादुत्तरस्याम्यानुत्तरश्चेति वाच्यम् । प्रतिश्रुतन्यायेनावेक्षणीयस्वत्वस्य स्वाम्यन्तु
पूर्वस्याभ्यसत्त्वेपि तत्र प्रतिगृहीत्रादेः कायिकस्वीकारस्यानिःप्रतिपक्षस्य सम्पादनीयत्वात् । अथवा साक्ष्यादेर्बानेनयोगोक्त
रवचनेन साक्ष्यादीनां युक्तानां मानुषप्रमाणानां बलाबलमुच्यते । पूर्वव्याख्याने वार्थिकम् । द्वितीयव्याख्याने चेत्थम् । आद्ये

पुरुषे साक्षिलेख्याभ्यां विगतस्यागमे भोगादभ्यधिको बलवान्। तेन भुक्तिः साक्षिलेख्ययोरत्र बलवन्मुक्ता भवति। पूर्वक्रमागतस्तु भोगो विनापि भावितादागमाच्चतुर्थेवर्षे पुरुषेऽधिको मध्यमे तु पुरुषे भोगरहितादागमात्स्तोकभोगसहितो प्यागमो बलवानिति निस्पष्टच्छेदमादौ तु कारयन्दानमित्युदाहृतेनारदवाक्ये। प्रथमपुरुषेपि स्वाम्यनुपभोगेन समक्षनिराक्रोशपरोपभोगेन क्षेत्रादिभूमेर्हिरण्यादेर्वा क्रियता चिरकालेन स्वाम्यहानिः पूर्वस्वामिन आह। याज्ञवल्क्यः। पश्यतोऽब्रुवतो भूमेर्हानिर्विंशतिवार्षिकी। परेण भुज्यमानस्य धनस्य दशवार्षिकी। मनुनारदौ॥ यत्किञ्चिद्दशवर्षाणि सन्निधौ प्रेक्षते धनी। भुज्यमानम्परैस्तूष्णीं न स तं लब्धुमर्हति। व्यासः॥ उपेक्षिता यथा धेनुर्विना पालेन नश्यति। पश्यतोऽन्यैस्तथा भुक्ता भूमिः कालेन हीयते। वर्षाणि विंशतिर्यस्य भूर्भुक्ता तु परैरिह। सति राज्ञि समर्थस्य तस्य सेह न सिध्यति। नारदः। भुज्यमानान्परैरर्थान्यस्तान्मोहादुपेक्षते। समक्षञ्जीवतो यस्य तान्भुक्तिः कुरुते वशम्। पश्यतोऽब्रुवत इत्यादि यस्य नादरे। बृहस्पतिः। पश्यतोऽविभवापरैर्द्रव्यं समक्षं यस्य दीयते। अन्यस्य भुञ्जतः पश्चान्न स तल्लब्धुमर्हति। पश्यतोऽन्यस्य दद्यतः क्षितिं यो न निवारयेत्। स तापि लेख्येन भुवं न पुनस्तां समाप्नुयात्। एतेषु वचनेषु विंशतिवर्षावधिकस्वामिसमक्षनिराक्षेपभोगनिबन्धना भूमेर्हानिर्दशवर्षावधिकतादृशपरोपभोगनिबन्धना च हिरण्यादिधनस्य हानिरित्यर्थः प्रतीयते सा न तावत्स्वत्वहानिः दर्शनकालीनप्रतिषेधदानादिवत्स्वत्वनिवर्तकत्वस्य लोकाप्रसिद्धत्वात् उपभोगस्य च तादृशस्य स्वत्वप्रतिप्रमाणत्वेन प्रमाणस्य प्रमेयप्रतिज्ञापकत्वेन स्वत्वरूपाजनकतया स्वत्वोत्पादकत्वाभावात् स्वत्वस्य तदुत्पत्तिनिवृत्तिहेतू नाम्ना। लौकिकत्वस्य दायभागप्रस्तावे विस्तरेणोपपादयिष्यमाणत्वात्। गौतमादिभिस्तदुभयकथनस्य लोकप्रसिद्ध्यनुवादात्। अनागमभोगस्य नारदवचनेन पूर्वोदाहृतेनानागमन्त्वित्यादिना स्वत्वहेतुताया निरस्तत्वाच्च। अत्राहापरार्कः। व्यवहारस्थितिमाश्रित्येदमुच्यते न धर्मगतिमिति परस्वापरस्वापहारप्रत्यवायभीरुणा परेण पूर्वस्वामिने तदर्पणीयं सभापतिसभ्यादीनां व्यवहाररीत्या तत आच्छिद्य न दद्यानेपि

नश्यति। अत एवमनुः। अजडश्चेदपोगण्डो विषये चास्य भुज्यते। भग्नं तद्व्यवहारेण भोक्ता तद्द्रव्यमर्हति। व्यवहारेण भोक्तार्हतीति व्यवहारस्थितिमेवोक्तवान्। वृहस्पतिरपि स्वतापितेत्यनेनाह। अनागममित्यादिनारदवचनमप्युक्तं तत्र ध नभूमिविषयमेकपुरुषनियमाभावनिश्चयं वा। अत एव योगीश्वर आगमस्तु कृतो येनेत्युक्तवान्। तस्माल्लिखितमित्या दिवचने यथायथापेक्षिततर्कसहकृतैकदेशसाधनेन्नैकदेशापादानेऽनिवेदितैकदेशापादानेऽनिवेदितैकदेशस्यप्रागनि वेदितस्यादापनेऽपि व्यवहारदर्शनादोषस्तथाप्यपीमितद्युक्तम्। एवं निरस्येत्यादिना व्यवहारदर्शनानर्थेनादृष्टविषयेष्टो पयावर्जनीयत्वात्। निह्नुतद्व्यादिवचनसतर्काभावाच्च अस्मादुपपादनरीत्या तत्रापि तथानभ्युपगमाच्च तत्र प्रायश्चित्तं विशेष परीभाषाप्रभाप्रस्तावे। एवंविधा हि भुक्तिस्तूष्णीभूतस्य पश्यतः स्वामित्वे सति न घटते किन्तु भोक्तुरेव स्वामित्वे सति युज्यत इति भवति न च भुक्तिः प्रमाणमिति पूर्वेस्वयमेव स्वामित्वहानिपरत्वेनोत्पत्तिपरत्वव्याख्यानेनास्य विरोधाच्च। न च नदर्थेन तदनुग्राह कतर्कप्रदर्शनेन व्यवहारस्थितिपरमेव न वस्तुगतिपरं व्यवहारहानिश्च। भोक्ता यद्येवमुपन्यस्यति अजडोऽयमपोगण्डो यस्मे तत्क्षमक्षं मया भुज्यमानं क्षेत्रादि यद्येतद्दायमनेन कुतोऽविघातिवर्षावधि न प्रतिषिद्धं अस्मिंश्चार्थे गुणोपेता बहवः साक्षिणः स न्तीति तथोपन्यस्ते चायं निरुत्तरोऽवश्यम्भवतीत्येवमिति वाच्यम्। अस्य सत्तर्कत्वाभावात् आगमप्रमाणानुपन्यासेन मूलभैषि स्यात्। उपेक्षाहेतुभावकृतव्यवहारहानावपि वस्त्वनुसरणस्यावश्यकत्वात्। तथा च नारद उपेक्षाविज्ञाभावकृतामेव व्यव हारहानिमाह न वस्त्वभावकृतान्। उपेक्षां कुर्वतस्तस्य तूष्णीम्भूतस्य तिष्ठतः। काले विपन्ने पूर्वोक्ते व्यवहारो न सिध्यतीति। न च निरुत्तरताप्रयुक्तव्यवहारहानिशङ्कानिरासाय प्रत्यक्षं स्वीयेवस्तुनि परेण भुज्यमाने तूष्णीं न स्थेयमित्युपदेशार्थमिदं वचनं दीना दिलक्षणवदिति वाच्यम्। विंशत्यादिग्रहणस्यैवमानर्थक्यप्रसङ्गात्। ततोर्वागपि व्यवहारनिःशङ्कायास्तुल्यत्वात्। तेषदो योद्भावनमुत्तरकालेन कायन्ततोर्वक्तुकार्यमित्येतदर्थं तद्ग्रहणमिति चेन्न। आद्यादिष्वपि विंशत्याद्युत्तरकालेतदनुद्भाव

नश्यतुल्यतयैतदपवादत्वेनोत्तरवाक्यासंगतोतश्चलेख्यप्रस्तावेभिहितम्। अत्र मिताक्षराकाराः। नवस्तुहामिनेव्यवहारहानि
रनेनवचनेनप्रतिपाद्यते। किन्तु परकृतसमक्षभोगेऽप्रतिषेधलक्षणस्यापराधप्रयुक्ताक्षेपाद्युत्पन्ननष्टफलानिविद्यमानफ
लेपितदीयस्वत्वानपगमात्परस्वत्वानुत्पादाच्चन्यायतस्तद्वस्तुविद्यमानफलसहितमेवलभतेयद्यपिस्वामीतथापिनष्टेफले
धर्मिनाशादेवस्वत्वापगमान्निष्क्रयद्वारेणचौरादिवभोक्तुःसकाशात्तद्ग्रहणप्राप्तमुपेक्षारूपापराधान्नभवतिपरस्वोपभोगलक्ष
णापराधनिबन्धनोराजदण्डस्तुनवादाद्भोक्तुर्भवत्येव। अनागमंत्वित्यादिनारदवचनात्। परोक्षभोगेसापेक्षासमक्षभोगेचन
ष्टमपिफलन्निष्क्रयरूपेणस्वामिलभतएव। पश्यतोब्रुवतइतिवचनात्। विंशतिवर्षेभ्योभूमेर्दशवर्षेभ्यश्चप्राग्धनस्यनष्ट
मपिफलन्तन्निःक्रयरूपेणप्राप्नोति। विंशतिदशशब्दोपादानादितिश्चेदंवक्तव्यम्। नष्टफलालाभेप्रतिषेधरूपापराधएव
बीजंवचनस्यानाद्यः। विंशत्यादिवर्षोपभोगवत्ततःप्रागपिसमक्षभोगेऽप्रतिषेधापराधस्यतुल्यत्वात्तत्कृतनष्टफलालाभप्रसङ्गे
विंशत्यादिग्रहणाविवक्षाप्रसङ्गदोषसाम्यात्। तत्परिहारायप्राचनिकत्वंयदिनष्टफलालाभस्यतर्हियथाश्रुतभूम्यादिस्वत्वहा
निरेववचनार्थोऽस्तु। किन्नष्टफलपरतयालाक्षणिकत्वाश्रयणेनएवकल्पतरुरत्नाकरस्मृतितत्त्वस्मृतिचन्द्रिकाकरादिभिर्वचनस्व
रसायातएवार्थोभ्युपगतः। अत्रब्रूमः। यावताविनावचनमनुपपन्नंतावदेववचनमस्त्वकेकल्प्यमतएवयथाश्रुतार्थग्रहणेसम
क्षभोगापेक्षायांस्वत्वनाशकत्वमुपभोगस्यपरकृतस्यानुक्तकालीनस्यस्वत्वोत्पादकत्वमलौकिकंवचनान्तरविरुद्धञ्चकल्प्यमस्मा
भिस्तुनष्टफलेधर्मिनाशात्स्वत्वनाशःकृप्तएवपरस्वत्वोपभोगेचौरादिवन्निःक्रियरूपेणतात्पर्यंपरमपिलोकप्रसिद्धत्वात्प्र
सक्तंविंशतिवर्षाद्युत्तरमपराधविशेषात्स्वामिनस्तदलाभमुखेनप्रतिषिध्यतेसएवचास्यदण्डः। इतरत्त्वेववचनान्तरसिद्ध
मेवेति। भवदेवंस्तु। किमयंविंशतिवर्षादूर्ध्वंछिन्नोप्रतिरोधभोगोवचनात्ततोभोक्तुःस्वत्वंजनयतिप्रमापयतिवा। नाद्यःअज्ञा
नादिवदस्यस्वत्वजनकत्वस्यलोकशास्त्रयोरप्रतीतत्वात्। नापिद्वितीयः। विज्ञातयावाप्रमापकत्वमनुपपन्नतयावा। तद्रूपस्य

पिर्इंदृष्टभोगस्यस्वत्वेनसहकुत्रापिव्याप्तेरगृहीतत्वात् । अतएवनतस्यस्वत्वेनविनानुपपत्तिरपि । तस्यान्यथापिव्याप्यत्वायोपजी
वितत्वात् । किञ्चानेनप्राचीनस्वत्वस्यसत्तएवप्रमाणमागमानुमानद्वारान्तन्निरपेक्षतयावा । नतावत्प्रथमःस्मार्त्तकालीनस्यागमा
भावनिश्चयेनतदनुमापकत्वस्यबाधेनासम्भवात् । प्रमाणान्तरेणागममनिश्चयेऽस्यासिद्धसाधनेनानुमापकत्वाक्षेपकत्वयोरसंभ
वात् । नद्वितीयः । व्यभिचाराच्च । अन्यायेनापियद्भुक्तमितिवचनविरोधाच्चस्वस्यान्यायेनभोगासम्भवात् । किञ्चेयमनुपपन्न
तास्त्रीराजादिधनगोचरापिसम्भवतीतितत्रनकदाचिदपिभोगःप्रमाणमितिकुतःतस्मादेवंवाच्यम् । यद्यंयथोक्तोभोगःपू
र्वस्वामिनोभोक्तुर्देशेनत्यागात्तत्स्वत्वध्वंसंसमर्थापयतिअनुमापयतिवानहिस्वम्भवतितन्नजहाति । परभोगश्चेद्दृष्टंतस्मिन्वस्तुनि
क्षम्यतइति । तथाचतद्देशेनत्यक्तंतत्परिग्रहादेवपरस्यतत्रस्वत्वमप्युत्पद्यते । यथासर्वभूतोद्देशेनत्यक्तंतोयादीतिनियमात्त
दपिभोक्तुःस्वीभवति । स्त्रीराजधनादौतुनैवं । स्त्रीणामस्वातन्त्र्यात्प्रागल्भ्याद्राजधनस्यबहुजनतयाजडादेरप्रागल्भ्याच्चनियस्य
बहुकालीनाध्यापनादिव्यग्रतयाचउपनिधौसीमादीनामाधिक्याद्वितरएवस्वत्वध्वंसजनकपूर्वस्वामीत्यागाकल्पकत्वात् । अतोभू
म्यादौविंशतिवार्षिकेगवादौदशवार्षिकोभोगःपूर्वस्वामिनःस्वत्वध्वंसेचप्रमाणंयच्चकालवैषम्यंतद्भूम्यादेर्महाफलत्वेनतच्चि
रकालेनैवस्वत्वहानिकल्पनस्योचितत्वाद्गवादावल्पफलत्वात्स्वल्पकालेनापिस्वत्वहानिकल्पनायाउचितत्वादौचित्यासिद्धम्
। यच्चभूम्यादावेवकालवैषम्येणभोक्तुःस्वत्वजननंतदपिवचनादेवयुक्तंयथातदेवजन्मपुत्रस्यपितृधनेस्वत्वजनकमनुपुत्र्याइ
तिश्रुतप्रदीपकृतः । यत्रहिमत्कृत्येदानींनाप्यफलसम्भावनातदधुनातावत्परएवभुङ्क्तांपश्चादेतत्सकाशात्सफलोपभोगंभुवंग्र
हीष्यामीत्याशयेनभिसम्बन्धायभूम्यादिस्वामीतत्रपरोपभोगंक्षमतेतत्रापिविंशत्याद्यधिकोभोगोऽस्तिस्वामिनस्तदुद्देशेनत्यागश्चनास्ती
तिव्यभिचारान्नैवदृष्टभोगस्यपूर्वस्वामिस्वत्वत्यागेप्रामाण्यम् । तथाचसर्वस्वामिनास्त्रीधनाभावप्रतिज्ञायद्दियद्भार्यैतत्तत्रचतद्
द्दृष्टात्यागनिर्णयेपरिग्रहात्परस्यस्वत्वंनिर्बाधमितिवाच्यम् । यत्तत्त्वथापिपूर्वभोगसिद्धस्यपूर्वस्वामिपरिग्रहस्यत्यागानवधारणका

धीनत्वेन भोक्तुः स्वत्वाजनकतया तद्द्वैयर्थ्यात्। किञ्च भूस्वामी सचेतनः किमिति वृथैव तत्र स्वत्वं जह्यात्। न ह्यत्र दृष्टमुद्देश्यमन्ना
प्यदृष्टं धर्मशास्त्रेणोक्तेतिकर्तव्यताविरहात्। महेच्छत्वसुशीलत्वदयालुत्वादिनापि न त्यागसम्भवः। सत्यजन्नपि तैरेव हेतुभिः
क्षमत इत्यस्यापि सम्भवात्। नापि यदुद्देशेन यत्त्यज्यते तत्तस्य स्वमिति नियमः। उद्देश्येनागृहीते व्यभिचारात्। अपि च। त्या
गाद्भोक्तुः स्वत्वं स्वरूपसतो ज्ञानाद्वा नाद्यः। अदृष्टचरत्वात्। द्वितीये च तज्ज्ञानं भोक्तुः स्वामिवचनात्स्यात्तथा च त्वदुद्देशेन मये
दं त्यक्तमिति स्वामिनस्तदभिसन्धिपूर्वकं वचनं ज्ञापकं दानमेवेति तत एव स्वामिनः स्वत्वध्वंसे कृतमुपेक्षानुसरणेन न च यथोक्तक्षम
यैव त्यागानुमानं अन्यकृतेऽपि सौशील्यादीनां क्षमासम्भवात्। न चैवं यथोक्तक्षमया भोक्तुः स्वत्वानुमानमपि न स्यात्। पूर्वस्वामिनः स्व
त्वसत्त्वेऽपि सौशील्यादिना तस्य अन्यथासिद्धत्वादिति वाच्यम्। तावत्कालं सौशील्यादिना क्षमायाः असम्भवसहकृतो भोगो भोक्तुः स्व
त्वप्रमापक इति स्मृतिवचनबलादवगतम्। न च स्वत्वं पूर्वागमाद्वोत्पद्यते स्वामिनो भोक्तुद्देशेन तद्वस्तुत्यागाद्वेत्यत्र ततो ग्रह इति
। अत्र वदामः। प्रदीपकृद्भिर्यत्सिद्धान्तितं क्षमायास्तावत्कालीनायाः सौशील्यादिहेतुकत्वासम्भवेन सहकृतो भोगो भोक्तुः स्व
त्वं प्रमापयतीति तच्च भोक्तुः पूर्वागमाद्वोत्पद्यतां भोक्तुद्देश्यकस्वामिकृतत्यागाद्वेत्यत्र ततो ग्रह इति तत्र प्रष्टव्यम्। भोक्तुः स्वत्वोत्पादकौ
पूर्वागमस्वामिकृतभोक्तुद्देश्यकत्यागौ प्रमाप्य तावत्कालीनो भोगो भोक्तुः स्वत्वमनुपाययन्न प्रमाप्यवानाद्यः। भोक्तुः पूर्वागमसिद्धौ
सम्प्रति तत्त्वस्वामिनः। स्वाम्यासम्भवेन तदीयाप्रतिरववींशत्यादिवर्षकालीनभोगोपन्यासवैयर्थ्यात्। तेनैव तदनुमानान्न
द्वैयर्थ्यमिति चेत् न तत्र व्यभिचारेणानुमानासम्भवात्। भोक्तुद्देश्यकत्यागप्रमापकत्वेऽपि तद्दूषणानपगमात्। न द्वितीयः पूर्वस्व
त्वध्वंसानवगमे भोगसहस्रेणापि स्मार्तकालीनेन भोक्तुः स्वत्वानुमानं वानुमानबाधात्। स्मार्तत्वास्मरणरूपयोग्यानुपलब्धेर्भोग
रूकत्वात्। यच्चात्र ततो ग्रह इत्यनास्थावादः सोऽप्ययुक्तः पूर्वागमभोक्तुद्देश्यकस्वत्वत्यागयोः फलभेदेन तत्त्वनिर्णयफलकेनि
र्धारेऽन्यतरनिर्द्धारणस्यावश्यकत्वात्। पूर्वागमो हि यदि भोक्तुरेव सम्प्रति स्वामिनमन्यस्य भोक्तुर्मिथ्याभियोगनिबन्धनोद्ध

गडोपि स्यान्न केवलम्भूधनहानिः । तस्य स्वत्वस्यागमसिद्धौ तदपलापदण्डमात्रं न मिथ्याभियोगित्वनिमित्तो द्विगुणो दण्डः स्वत्व
हानिरुभयपक्षे तुल्या विंशत्यादिग्रहणाविवक्षाप्रसक्तिश्चोभयपक्षेपि कक्षाकरणीया । भोक्तृपूर्वागमपूर्वस्वामिकर्तृकभोक्तु
द्देश्यकत्यागस्य द्वित्रादिवर्षोपभोगस्थलेपि सिद्धौ भोक्तृस्वत्वस्यावारणीयत्वात् । भवदेवमनाद्यभवन्मतस्य नातीव भेदः यथोक्त
भोगे भोक्तृद्देश्यकपूर्वस्वामिकर्तृकत्यागकल्पनं तत्स्वत्वध्वंसे सति परिग्रहाद्भोक्तुः स्वत्वोत्पत्तिं निर्वाधामादधातीतिमन्यथेमि
दं वचनं बोधयतीति तन्मतं तच्चास्माभ्यमभ्युपगतं तावत्कालीनभोगस्य सौशील्यादिहेतुकत्वासम्भवेन पूर्वस्वामिन इदानीन्त
नभोगकर्तृद्देशत्यागं विना तदीयपूर्वागमं विना सम्भवाद्भोक्तुः स्वत्वनिमित्तत्वेन तदुभयान्यतरानास्थावादमभ्युपगच्छता त
थाचयत्तन्मते नैकान्तिकत्वन्तयादूषणमापादितं तत्तद्वन्मतेपि तुल्यं । यच्च सौशील्यादिहेतुकत्वं तावत्कालीनक्षमायां न स
म्भवतीत्युक्तं तन्मतेपि समाधानक्षममेवेति । वस्तुतस्तु तावत्कालीनक्षमायाः सौशील्यादिहेतुकत्वासम्भवोपि न नियतः ।
अतिसुशीलतादिस्वभावानामाजन्माप्युपेक्षायाः सम्भवात् । वचनमस्तकेति गौरवञ्चोभयमतेतुल्यम् । विज्ञानेश्वरमतेत्वति
लाघवमुपपादितमेव । किञ्चस्मार्तैः कालेस्मर्तृत्वास्मरणरूपयायोग्यानुपलब्ध्या भोक्तुरागमाभावनिश्चयेपूर्वस्वामिनस्त्यागाभा
निश्चयेन तदीयपरिग्रहकृतस्वत्वोत्पत्तिपूर्वस्वामित्वध्वंसावुभावपि कल्पयितुमशक्याविति मतद्वयमपीदमत्ययुक्तम् । यच्च परम
तप्रदीपकृद्भिरुक्तम् । आधेरनुपभोगेन यत्राविद्धिस्तद्विषयम्पश्यतो ब्रुवत इत्यादिवचनं । तेन यत्राधिग्रहीत्राधेयम्भूम्या
दिर्न भुज्यते । किन्त्वाध्यत्रचिरम्भुक्तान्यत्राधीयते तत्रोत्तरस्याधिगृहीतस्तत्र भूम्यादौ प्रभुत्वं न तु प्रथमस्येत्याधौ प्रतिग्रहे क्री
ते पूर्वानुबलवत्तरेत्येतदपवादार्थमिदमीदृशे विषये वचनं तेनात्र द्वितीयस्यैवाधिः सिध्यति । यद्वा हानिपदमुपेक्षितकोटौ वि
चारकाणामुपेक्षानिमित्तान्यूनताप्रतिभातीति संशयता दवस्थ्य परत्वन्तु हानिर्भङ्ग एव । तथा सति हीनस्य गृह्यते नादृश इत्यादि
वचनं सिद्धन्दण्डमन्तरेणैव पुनर्व्यवहारदर्शनं न घटत इति पुनर्विचारेणैवात्रापीति निर्णयः । अत एवोपेक्षितायथाधेनुः व

यौगिविंशतिर्यंवेत्यादिव्यासवचनयोः पश्यन्तमनादृत्यैव यदीयं भूमिधनं परैरुपभुज्यते तदीयत्वेन ततो हीयते न निश्चीयते इति व्याख्यानं रत्नाकरकृतापि हतम्। किञ्च यदि विंशतिवार्षिकी भुक्तिः स्वतो मानं तु स्वत्वे प्रमाणान्तरं हि तस्य वसनाद्यप्रसिद्धेः। अनसन्निधावर्थ इत्यादिकात्यायनवचनेन यद्भोगस्य लेख्यादौ वनिराकरणार्थमुक्तं तदपार्थकं स्यादिति तदपि चिन्त्यम्। तस्यैतादृगाधिविषयत्वं न प्रकरणाद् यतः शङ्कितो वावगम्यते। अस्य चाधिविशेषविषयतायामाधिसीमेत्यस्यैतदपवादस्यैतादृगाधिभिन्नाधिविषयतापत्त्या शास्त्रीकल्प्याधौ प्रतिग्रह इत्यादेरयमपवाद इत्ययुक्तमतिव्यवहितस्य तस्यात्रानुपस्थितेः। विंशत्यादिवर्षात्प्रागपि चैतादृगाधिभोगे परक्रियायाः प्राबल्यस्याप्रतिहतेर्विंशत्यादिग्रहणाविवक्षाप्रसक्तिः॥ वचनन्तावत्कालीनेतादृगाधिभोग एव न येति यदि तर्हि श्रुतभूमिधनसामान्यातिक्रमेणैतादृगाधिकल्पने द्विविषयत्वस्याग्राह्यस्य कल्पनमुचितमेव। उपेक्षानिमित्तकविचारकसंशयनादवस्थायाः पुनर्विचारः कर्तव्य इत्येतन्मात्रपरमिदं वचनं न तु सर्वथा भङ्गरूपहानिपरमिति यद्दस्य वचनस्य तात्पर्यान्तरवर्णनं तत्रापि विंशत्यादितः प्रागपि तादृगुपेक्षाहेतुकसंशयनादवस्थापरिहारात्पुनर्व्यवहारप्रवृत्त्यावश्यकत्वे विंशत्यादिपदार्थाविवक्षाप्रसक्तिर्दुर्वारा। प्रत्युत विंशत्यादिवर्षानन्तरं तादृगुपेक्षायाः पुनर्विचारः पुरःसरं निर्णयः कर्तव्यः प्राक्तनेष्वनौचित्यापत्तिस्थानप्राज्ञोपेक्षकमोटिन्यूनताप्रतिभामार्गाश्चरतोपेक्षायास्तावदेकः सङ्गतिशक्यम्। सत्यां सामग्र्यां प्रागपि तस्य वारयितुमशक्यत्वात्सत्यानृतं मपि तदसम्भवात्। कालविशेषनियमानुपपत्तेः। हानिपदस्यानिश्चयपरता च वक्तृषु वचनेष्वयुक्तास्मिन्पक्षे प्रसज्यते। यच्चोक्तं तावत्कालीनभोगस्य भोक्तृस्वत्वोत्पत्तिहेतुत्वस्य यथाश्रुतस्याग्रयणे शक्तस्य सन्निधावर्थ इत्यादिवचनोक्तलेख्यादिप्रमाणान्तरस्वत्वसाधकस्य दोषनिराकरणमपार्थकं नावद्भोगादेव स्वत्वसिद्धेरिति तादृग्वचनतात्पर्यबीजं तदप्यमूलकं विज्ञानयोगिव्याख्याने तदनभ्युपगमात्। वाचस्पतिस्तु हानिबोधकस्मृतीनां प्रमाणपरिपालनकर्तव्यताविधिशेषत्वम्। यस्मादुपेक्षायां हानिशङ्का भवति तस्मात्स्वपरिमाणं सर्वथा परिपालनीयं न तु तत्रोदसितव्यमिति तात्पर्यम्।

अत एवं कल्पतरौ हानिवचनानि लिखितप्रमाणपरिपालनमुपसंहृतमित्याहुस्तदपियुक्तमदः। विंशत्यादिग्रहणाविवक्षा प्रसक्तिताद्वस्थ्यात्। ततः प्रागपि प्रमाणपरिपालनस्यावश्यकत्वात्। हानिशङ्काप्रसक्तेस्तौल्यात्। प्रदेशान्तरस्थविधिशेषत्वा नुपपत्तेरत्र च तद्विधिश्रवणात्। अन्यत्र स्पष्टत्वात्तद्विधिसत्त्वेन तदनुवादमस्याप्यनुपयोगात्। हानिपदेनानत्फलकप्रमाणपा रिपालनलक्षणया तत्प्रतियोगिभूतप्रमाणपरिपालनकर्तव्यतापरत्वेऽयं तत्क्लिष्टत्वापत्तेश्च। तस्मात्समस्तदोषशून्या विज्ञान योगिव्याख्यैवास्य वचसो ज्यायसी। ननु अध्यासनात्समारभ्य भुक्तिर्यस्याविघातिनी। त्रिंशद्वर्षाण्यविच्छिन्ना तस्य तां न विचालये दिति बृहस्पतिवचने त्रिंशद्वर्षभुक्तेर्हान्यापादकत्वोक्त्या विंशतिवर्षभुक्तेस्तन्न्यूनवर्षभुक्तेरिव हान्यनापादकत्वमर्थसिद्धमिति योगीश्वरव्यासादिवचनैरस्य विरोधः। नैवम्। योगीश्वरादिवचनेषु ब्रुवत इत्येतावन्मात्राभिधानादत्र विरुणांवाऽऽत्रमपि भू मिस्वामिनो नास्ति तत्र विंशतिवर्षभोग एव हानिकारणम्। बृहस्पतिवचने तु अध्यासनाद्भूमिपरिग्रहादारभ्य यस्य भुक्तिरवि घातिनी यदप्रयोगाद्विघातस्य च कलहताडनादिरूपत्वेन लोके प्रसिद्धेर्बाध्यात्र विप्रतिपत्तौ सत्यामपि यत्र भोक्तुः सह पूर्वस्वामि नात् भोगप्रतिरोधकं कलहताडनादि नाचरितं तत्र त्रिंशद्वर्षभोगस्यादृष्टो हान्यापादकप्रतिवचनस्वरसेनैव विरोधपरिहा रात् मम मनुप्रतिभाति। विंशतिवार्षिकोऽध्यादिहानिविशेषणाद्भूम्याद्युत्पन्ननष्टफलस्य विंशतिवार्षिकादेर्हानिस्तावत्कालीननन्त ष्टफलमपेक्षालक्षणादपराधात् प्राप्नोति। विंशतिदशवर्षेभ्यः प्रागुक्तभोगकालगणनयात्तदुत्पन्नं नष्टमपि फलं निष्क्रय रूपेण लभत एव विंशत्यादिशब्दोपादानात्। अन्यथा यावत्कालीनपरकृतभोगोपेक्षा तावत्कालीननष्टफलहानिमेव सा मान्येन वदेत्। एतावता विंशत्यादिग्रहणार्थकत्वे विंशत्यादिग्रहणवर्षीयफलहानिर्दण्डरूपिकया सिध्यति भुक्तिविशेषणता यामिव विंशत्यादिसंख्यायां तथैवं वचनान्तरसंवादाय तद्भुक्तिविशेषणत्वव्याख्यानोऽस्य व्याख्यानस्य न फलतो विशेष इति वाच्यम्। यतो विंशत्यादिग्रहणस्य भुक्तिविशेषणत्वे कियत्कालीननष्टफलहानिरिति साकांक्षमेति। अत एवापराधाभावाद्द्याद्दीन

तद्धानिरपीत्याह योगीश्वरः ॥ ● ॥ आधिसीमोपनिक्षेपजडबालधनैर्विना । तथोपनिधिराजस्त्रीश्रोत्रियाणां धनैरपि ॥ भो
ग्याधेर्भोगार्थमेवाधीकरणादुपेक्षायामपि न स्वामिनोऽपराधः । गोप्याधौ स्वाम्यनुमतिमन्तरेण भोक्तुमपराधातिशयमापादयतुमेनो
पेक्षोपपत्तिः । जडबालयोस्त्वज्ञत्वादेवोपेक्षा । उपनिध्योपनिक्षेपयोरपि भुक्तेः प्रतिषिद्धत्वात्तदतिक्रमे चोपनिक्षेपे पुरुषार्थनिधानु
त्र सेद्य तल्लाभादुपेक्षा । राज्ञोऽनेकराजकार्यव्यग्रत्वात्स्त्रीणामप्रागल्भ्यानभिज्ञत्वाभ्यां श्रोत्रियस्याध्ययनाध्यापनतदर्थवि
चारश्रौतस्मार्तकर्मानुष्ठानव्यस्ततयेति सर्वत्र यथायथमपराधविशेषसमाधानमहकृतादस्माद्वचनाद्वकदाचिन्न
ष्टोपचयहानिरपि भवतीत्यर्थः ॥ अत एवाध्यादिभोगे दण्डमधिकमाह स एव । आध्यादीनां विहर्तारं धनिने दापयेद्धनम्
। दण्डञ्च तत्समं राज्ञे शक्त्यपेक्ष्यमथापि वा ॥ एतत्प्रस्तावे विवेचयिष्यामः । क्वचिदन्यत्रापि नष्टफलहान्यपवादो मनुनो
क्तः । सम्प्रीत्या भुज्यमानानि न नश्यन्ति कदाचन । धेनुरुष्ट्रो वहन्नश्वो यश्च दम्यः प्रयुज्यते । दम्यो दमनार्थं यः प्रयुज्यते ।
मनुनारदौ । आधिः सीमा बालधनं निक्षेपोपनिधिः स्त्रियः । राजस्वं श्रोत्रियस्वञ्च न भोगेन प्रणश्यति ॥ नारदः अन्वाहितं
हृतं न्यस्तं बलावष्टम्भयाचिते । अप्रत्यक्षञ्च यद्भुक्तं निक्षेपोपनिधी स्त्रियः । अन्वाहितमेकत्राहितमन्यत्र पुनराहितम् ।
बलावष्टम्भराजादिबलावष्टम्भेन स्थापितम् । इतरत्प्रसिद्धम् । बृहस्पतिः । भुक्तिस्त्रैपुरुषी सिद्ध्येदपरेषां न संशयः ।
अनिवृत्ते सपिण्डत्वे सकुल्यानां न सिद्ध्यति । अस्वामिना तु यद्भुक्तं गृहक्षेत्रापणादिकम् । सुहृद्बन्धुसकुल्यस्य न तद्भोगेन ही
यते । विवाह्यश्रोत्रियैर्भुक्तं राजामात्यैस्तथैव च । सुदीर्घेणापि कालेन तेषां सिद्ध्येन्न तद्धनम् । चित्तापनयनेषु च । बालश्रोत्रि
यवित्ते च प्राप्ते च पितृनः क्रमात् । नोपभोगे बलं कार्यमाहर्त्रा तत्सुतेन वा । पशुस्त्रीपुरुषादीनामिति धर्मो व्यवस्थितः । भो
गं न कल्पयेत्प्रमाणत्वेन नाद्रियेतेत्यर्थः । गौतमः । अजडापोगण्डधनं दशवर्षभुक्तं परैः सन्निधौ भोक्तुः अश्रोत्रियप्रव्रजित
राजपुरुषैः । पशुपुरुषस्त्रीणामनतिभोगः अतिभोगेन हानिरेवेत्यर्थः । कात्यायनः ॥ स्वजातिभिर्बान्धवैश्च भुक्तं यत्स्वजनैस्त

था । भोगात्तत्र न सिद्धिः स्यादागममन्येषु कल्पयेत् । अन्येष्वसंबद्धेषु ॥ सर्वत्रैवोपभोगे स्वकृत्यत्वानुरोधेन शीलादेरुपेक्षाहे-
तोः सम्भवान्न भोगस्यान्यथोपपन्नस्य स्वत्वहेतुकल्पनाद्वारा स्वत्वसाधकत्वं नाप्युपचयहानिहेतुत्वमिति तात्पर्यम् । क्वचिदेकदेशो-
पभोगेन समस्तसिद्धिमाह बृहस्पतिः । यद्येकशासनेग्रामे क्षेत्रारामाश्च लेखिताः । एकदेशोपभोगेपि सर्वे भुक्ता भवन्ति ते । आ-
गमेपि बलं नैव भुक्तिस्तोकापि यत्र नो । इत्यस्यायमपवादः । एकशासनपत्रारूढेषु किञ्चिदुपभोगेपि शासनारूढभोगस्या-
नपेतत्वान्न प्रत्येकभोगापेक्षेत्याशयः ॥ ● ॥ विच्छिन्नभोगनिर्णयोपायमाह । बृहस्पतिः । छिन्नभोगे गृहक्षेत्रे संदिग्धं यत्र जा-
यते । लेख्येन भोगवृद्धैर्वा साक्षिभिः शुद्धिमाहरेत् । नामघाटागमं संख्यां कालं दिग्भागमेव च । भोगच्छेदनिमित्तं च ये वि-
दुस्ते च साक्षिणः । तदुत्पन्नाश्च सामन्ता ये ऽन्यदेशे व्यवस्थिताः । मौलास्ते तु समुद्दिष्टाः प्रष्टव्याः कार्यनिर्णये । अदृष्टास्ते तु य-
द्ब्रूयुः सन्दिग्धे समदृष्टयः । तत्प्रमाणं प्रकर्तव्यमेवं धर्मो न हीयते । स्थावरेषु तदाख्यातं लाभभोगप्रसाधनम् । प्रमाणहीन-
वादे तु निर्दिश्याद्दैविकीं क्रियेति । सीमाविवादनिर्णयमेतत्प्रपञ्चं विवेक्ष्यामः । एवं भुक्तिर्निरूपिता ॥ ● ॥ युक्तिस्वरूपमा-
ह । कात्यायनः । लिंगोद्देशस्तु युक्तिः स्यादिति । लिङ्गस्याग्निदत्वाद्यव्यभिचारिणा उल्काहस्तत्वादेरुद्देशो निश्चयः तेन चा-
ग्निदत्वाद्यनुमानम् । यद्यपि भुक्तिरपि निरन्तरत्वनिराक्रोशत्वादिप्रागुक्तविशेषणोपहितानुमानविधया र्थापत्तिविधया वा
साधिका तत्र चापि लक्षणमिदमतिप्रसक्तमेव वक्ष्यमाणचोदनाप्रतिकालेपि तथा सम्प्रसिद्धिवत्वाद्गोवृषवत्तद्भिन्नलिंगोद्देश
एव युक्तिरूपत्वेन लक्ष्यः । अत एव तत्प्रवृत्तिस्थलत्वादृष्टमेवाह नारदः । असाक्षिप्रत्ययास्त्वन्ये षड्विवादाः प्रकीर्तिताः । ल-
क्षणान्येव साक्षित्वे तेषामाहुर्मनीषिणः । उल्काहस्तोग्निदो ज्ञेयः शस्त्रपाणिश्च घातकः । केशाकेशिगृहीतश्च युगपत्पारदा-
रिकः । कुद्दालपाणिर्विज्ञेयः सेतुभेत्ता समीपगः । तथा कुठारहस्तश्च वनच्छेत्ता प्रकीर्तितः । समीपग इत्यत्रापि सम्बंध्यते । न
त्वविनाभावापादकविशेषणान्तरोपलक्षणम् । प्रत्यक्षचिह्नैर्विज्ञेयो दण्डपारुष्यकृन्नरः । असाक्षीप्रत्यया ह्येते पारुष्ये तु

परीक्षणम्। साक्षित्वे साक्षिकार्य्ये प्रत्यक्षचिह्नैः शोणिताक्तखड्गादिभिः। पारुष्ये वाक्पारुष्ये परीक्षणं साक्षिगवेषणम्। यद्य

पि तत्रापि गालिदानादिश्रवणं प्रत्यक्षचिह्नं सम्भवति। तथापि प्रथमप्रवृत्त्यादिनिश्चयाय साक्ष्याद्यपेक्षेति ध्येयम्। शङ्खलिखि

तौ। केशाकेशिग्रहणात्पारदारिकः। उल्काहस्तोऽग्निदः। शस्त्रपाणिर्घातकोलोप्त्रहस्तश्चौरः। केशाकेशिग्रहणादिति

स्त्रीसंग्रहणे वक्ष्यमाणानामन्येषामपि चिह्नानामुपलक्षणम्। लोप्त्रं चौर्यप्राप्तं वस्तु। वृहस्पतिः। असाक्षिके चिरकृते पृच्छे

द्दुत्तरसाक्षिणः। शपथैर्वानुयुञ्जीत उपधां वा प्रयोजयेत्। उपधा युक्तिरिति कल्पतरौ। शपथाभ्यनुज्ञानमन्यथासिद्ध्यु

पायाभावे ज्ञेयमत एव नारदः। युक्तिष्वप्यसमर्थासु शपथैरेवमर्दयेत्। अर्दयेत्पीडयेत्। पराजयेतियावदितियुक्तिः॥ ●

॥ चोदनाप्रतिकालस्वरूपन्तु चोदनायाधनदानादिविषयकप्रेरणायाप्रतिकालोप्रतिषेधः। सोपियद्युत्तरदानादिस

म्बन्धीनस्याद्बाध्यमानएनं निराकुर्याद्दनिराकरणादस्यस्यानेन सम्बन्धइत्यर्थोपत्तिविषयाऽनुमानविषयावाक्षणादिस

म्बन्धं साधयन्भवति प्रमाणम्। इदमेवाभिप्रेत्याह कात्यायनः। अर्थिनाभ्यर्थितो यस्तु विघातन्न प्रयोजयेत्। त्रिचतुःपञ्चक

त्वोवापरतस्तदृणी भवेत्। नारदोपि। अभीक्ष्णञ्चोद्यमानोपि प्रतिहन्यान्नतद्वचः। त्रिश्चतुःपञ्चकृत्वोवापरतोर्थं सदाप्नु

ते। परतस्तदूर्ध्वम्। चोदनाप्रतिकालस्यशीलादिप्रयुक्तस्यापि सम्भवाद्युक्त्यादिसहकार्य्यपक्षमाह। नारदः। चोदना

प्रतिकालश्चयुक्तिलेशस्तमन्वयात्। देशकालार्थसम्बन्धपरिमाणक्रियादिभिः। अत एव तस्यविषयमप्याह। स एव। प्रमा

णाद्धनिनोयत्र न स्याल्लेख्यं न साक्षिणः। अर्थश्चापह्नुते वादी तत्रोक्तस्त्रिविधो विधिः। चोदनाप्रतिकालश्चयुक्तिलेशस्तथैव च

। तृतीयः शपथः प्रोक्तस्तैरेवं साधयेत्क्रमात्। कात्यायनः। दानं प्रज्ञापनाभेदः सम्प्रलोभक्रियाचया। चिन्तापनयनश्चैव हेत

वो हि विभावकाः। एषामन्यतमो यत्र वादिना भावितो भवेत्। मूलक्रियातु तन्न स्यात् द्भाविता वादिनिह्नवे। दानं उक्तो च दानं

। प्रज्ञापनाभेदः प्रज्ञापकस्य हस्तचिह्नाद्यन्यथाकरणम्। सम्प्रलोभक्रियाः साक्षिसभ्यादिभ्यो लोभप्रदर्शनं चिन्तापनयनं चित्तगोप

नम् । एषामन्यतमोहेतुर्यत्र वादिना प्रतिवादिना धर्मार्थादेः परिभावितः प्रमाणेन साधितो भवेत् तदा मूलक्रियाच्छायापहरत्वा
दिरूपात्तदुपरि सिद्धेव । एषान्तर्दत्विनाभवादिति भावः । एवं साक्षिलेख्यभुक्तिरूपं त्रिविधं मानुषं प्रमाणं निरूपितं ॥ ● ॥
अथ दिव्यान्युच्यन्ते । तत्र दिव्यानां मानुषप्रमाणाभावएव प्रवृत्तिर्या यकन्तदुच्यते । यत्तु स्मृतिर्न तत्त्वे । एवकारस्येवापिशब्द
त्वामानुषप्रमाणसत्त्वेपि यत्र दिव्याङ्गीकारस्तत्रापि तद्भवतीति प्रयोजनमुत्तरत्र वक्ष्यम् । एषामन्यतमाभावे दिव्यान्यतममिति
वदत्याज्ञवल्क्येन प्रमाणहीने वादे मुनिर्दैवकिं कियेति वदता बृहस्पतिना च युक्तिष्वप्यसमर्थासु शपथैरेनमर्दयेदिति
नारदेनापि मानुषप्रमाणासत्त्वे एव दिव्यस्य विधानात् । तत्र बृहस्पतिः दिव्यभेदानाह । घटोग्निरुदकञ्चैव विषं कोशस्तु पञ्चमः
। षष्ठन्तु तण्डुलाः प्रोक्ताः सप्तमन्तप्तमाषकं । अष्टमं फालमित्युक्तं नवमं धर्मजन्तथा । दिव्यान्येतानि सर्वाणि निर्दिष्टानि स्व
यम्भुवेति । नारदः । युक्तिष्वप्यसमर्थासु शपथैरेनमर्दयेत् । अर्थकालबलापेक्षमग्न्यम्बुसुकृतादिभिः । घटोग्निरुदकञ्
चैव विषं कोशस्तु पञ्चमः । उक्तान्येतानि दिव्यानि विशुद्ध्यर्थं महात्मभिः ॥ सन्दिग्धेऽर्थेऽभियुक्तानाम्परीक्षार्थं महात्मनाम् । प्रो
क्तानि नारदेनेह सत्यान्वृतविभक्तये इति । मर्दयेत्पीडयेत् । अर्थापेक्षत्वं स्वल्पार्थविषयितार्थस्याल्पत्वमहत्त्वानुरूपमित्यर्थः
। नन्वेषामपि शपथानां मानुषप्रमाणाभावएव निर्णायकत्वेन दिव्यवत्कथं दिव्यानिनवेत्यभिधानं । तथा च शङ्खः । तत्र दिव्यानां
मनुसाधारणविधाशमनमप्सुप्रवेशो लोहधारणमिष्टापूर्तप्रदानमन्यांश्च शपथान्कारयेदिति । तांश्च शपथानाह बृहस्प
तिः । सत्यवाहनशस्त्राणि गोबीजकनकानि च । देवब्राह्मणपादांश्च पुत्रदारशिरांसि च ॥ एते च शपथाः प्रोक्ताः स्वल्पार्थे सु
करासदेति । नारदोपि । सत्यवाहनशस्त्राणि गोबीजकनकानि च । देवतापितृपादांश्च दत्तानि सुकृतानि च ॥ स्पृशेच्छि
रांसि पुत्राणान्दाराणां सुहृदान्तथा । अभियोगेषु सर्वेषु कोशपानमथापि वा । इत्येते शपथाः प्रोक्ता मनुना स्वल्पकारणाद्
इति । सत्यम् । अत्र समनन्तरभाविनिर्णयनिमित्तत्वाद्दिव्यत्वेन विवक्षितत्वात् । अतएव घटादीनामेव न तु शपथानान्तो

J 2

यंकालान्तरभाविनिर्णयनिमित्तत्वात्। नन्वेवंकोशस्यकथन्तेषुग्रहणमितिचेत्सत्यम्। तस्यतेषुपाठोमहाभियोगविषय
त्वसाम्यात्सावष्टंभाभियोगविषयत्वसाम्याच्च। वस्तुतस्तुशपथानामपिनारदादिवचनानुसरणाद्गोबलीवर्दन्यायेनदिव्यत्वाभ्यु
पगमेननवशब्दस्योपलक्षणत्वात्। तथाचनारदः। युक्तिष्वप्यसमर्थासुशपथैरेनमर्दयेत्। अर्थकालबलापेक्षमग्न्यम्बु
सुकृतादिभिः॥ धटोग्निरुदकञ्चैवविषंकोशश्चपञ्चमः। उक्तान्येतानिदिव्यानिविशुद्ध्यर्थंमहात्मभिः। दिव्यंनामतुलारोह
णम्। विषाशनमप्सुप्रवेशोलोहधारणमिष्टापूर्त्तप्रदानमन्याश्चशपथान्कारयेत्। मनुः। असाक्षिकेषुत्वर्थेषुमिथोविवद
मानयोः। अविदंस्तत्त्वतस्सत्यंशपथेनापिलम्भयेत्॥ अग्निंवाहारयेदेनमप्सुचैनन्निमज्जयेत्। पुत्रदारस्यवाप्येनंशिरांसि
स्पर्शयेत्पृथक्॥ यस्माद्देवैःप्रयुक्तानिपुष्कलार्थेमहात्मभिः। परस्परविशुद्ध्यर्थन्तस्माद्दिव्यानिनामतः॥ असाक्षिकेष्वितिमा
नुषप्रमाणरहितेष्वित्यर्थः। उद्दिष्टानांदिव्यानांमध्येतुलादीनिमहाभियोगेप्रयोक्तव्यानि। तथाचयाज्ञवल्क्यः। तुलाग्न्या
पोविषंकोशोदिव्यानीहविशुद्धये। महाभियोगेष्वेतानिशीर्षकस्थेभियोक्तरि॥ रुच्यावान्यतरःकुर्य्यादितरोवर्त्तयेच्छिरः
। अत्राग्निशब्देनतप्तायःपिण्डादयोगृह्यन्ते। शीर्षकंलक्षणयाजयपराजयनिमित्तोदण्डःतत्प्रयुक्तदण्डभागीत्यर्थः। रुच्या
इच्छया। इतरःअभियुक्ताभियोक्त्रोरन्यतरः। इतरःशिरोवर्त्तयेत्। दण्डंस्वीकुर्यादित्यर्थः। ननुकोशमल्पेपिदापयेत्।
इतिस्वल्पाभियोगेपिकोशस्यविधानात्कथंमहाभियोगेष्वेतानीतिचेन्न। तस्यतुलादिषुपाठःसावष्टम्भाभियोगेपिप्राप्त्यर्थः।
ननुमहाभियोगेष्वेवेतिनियमार्थः। अन्यथाकोशस्यशंकाभियोगएवप्राप्तिःस्यात्। अवष्टंभाभियुक्तानान्धटादीनिविनिर्दि
शेत्। तण्डुलाश्चैवकोशश्चशंकास्वेतौनियम्यचेतिपितामहस्मरणात्। अवष्टम्भःशीर्षकस्थः। अवष्टम्भोत्रनिश्चयइति
स्मृतितत्त्वे। यदाशीर्षकस्थोभियोक्तानस्यात्तदाएतानिदिव्यानिनस्युरिति। तथाचनारदः। शिरोवर्त्तीयदानस्यात्तदादिव्यं
नदीयतइति। इतिदिव्यदानेनियममाह। पितामहः। अभियोक्ताशिरस्थानेदिव्येषुपरिकीर्त्यते। अभियुक्तायदातव्यन्दि

व्यं श्रुतिनिदर्शनात्। इति कात्यायनोपि। न कश्चिदभियोक्तारन्दिव्येषु विनियोजयेदिति। अभियुक्ताय दातव्यमित्यस्यापवादस्सच वान्यतरः इत्यनेनाह याज्ञवल्क्यः। नारदोपि। परियोक्ता शिरःस्थाने सर्वत्रैकः प्रकल्पितः। इच्छयाचितरः कुर्यादितरो वर्त्तयेच्छिर इति। क्वचिद्विषयविशेषे विरोधिनापि दिव्यन्देयमित्याह। याज्ञवल्क्यः। विनापि शीर्षकात्कुर्यान्नृपद्रोहेथ पातक इति। शीर्षकाद्विनापि पराजयप्रयुक्तदण्डभागिनोभियोक्तुरभावेपि। पातके ब्रह्महत्यादौ। कात्यायनोपि। पार्थिवैः शङ्कितानाञ्च निर्दिष्टानाञ्च दस्युभिः। आत्मशुद्धिपराणाञ्च दिव्यन्देयं शिरो विनेति॥ कालिकापुराणेपि। परदाराभिशापे च चौर्य्यागम्यागमेषु च। महापातकशंसे च स्यादिव्यं न्तपसाहसे। विप्रतिपत्तौ विवादेऽवर्णास्थापने कृते॥ तत्रैव स्थापयेद्दिव्यं शिरः पूर्वम्महीपतिः। परदाराभिमर्षे च वहवोय च वादिनः॥ शिरोहीनम्भवेद्दिव्यमात्मनः शुद्धिकारणादिति॥ विप्रतिपत्तौ परधारगमनाद्यभियोगरूपायां विवादे च ऋणादानादि विषये त्ववर्णोऽपवादः। परदाराभिमर्षे चेति चौर्य्यादीनामप्युपलक्षणं। विष्णुः। राजद्रोहे साहसे च विना शीर्षप्रवर्त्तनादिति। विषयविशेषेषु दिव्यविशेषानाह संग्रहकारः धटादीनि विधानानि गुरुष्वर्थेषु दापयेत्। पितामहोपि। अवष्टंभाभियुक्तानां धटादीनि विनिर्दिशेत्। तण्डुलाश्चैव कोशश्च शंकास्वेतानि योजयेत् इति। कात्यायनः। शङ्काविश्वाससन्धाने विभागे रिक्थिनां सदा। क्रियासमूहकर्तृत्वे सम्भूयैकक्रियाकारित्वे। पितामहोपि। विश्रंभे सर्वशंकासु सन्धिकार्ये तथैव च। एषु कोशः प्रदातव्यो नित्यं चित्तविशुद्धये॥ शिरस्थापि विद्वीनानि दिव्यादीनि विवर्द्धयेत्। धटादीनि विषांतानि कोश एको शिरः स्मृत इति। तण्डुलानां विषयं स एवाह। चौर्य्ये तु तण्डुलादेया नान्यत्रेति विनिश्चय इति। अन्यत्र स्त्रीसंग्रहादौ न तु दत्तापन्हवे। तदर्धार्द्धस्य तण्डुला इति वक्ष्यमाणकात्यायवचनेन तण्डुलदिव्यविधानात्। एतदल्पचौर्य्यशङ्कायां वेदितव्यम्। चौर्य्ये भिशंकायुक्तानान्त प्तमाषो विधीयत्। इति महाचौर्य्यशंकायां तप्तमाषस्य तेनैव विधानात्। द्रव्यसंख्यादि व्यविशेषानाह विष्णुः। अथ शपथक्रिया राजद्रोहादिषु यथाकामं निक्षेपर्णस्तेयेष्वर्थप्रमाणादिति।

शपथो दिव्यम्। राजद्रोहादिषु यथाकामं राजेच्छानुरोधाद्दिव्यं निक्षेपादिषु धनतारतम्यादित्यर्थः। वस्त्रादिविषयविचारे तु तन्मूल्यद्रव्यपरिमाणं ग्राह्यम्। बृहस्पतिरपि। विषं सहस्रेऽपहृते पादोने च हुताशनः। त्रिभागोने च सलिलमर्धे देयो घटः सदा। धनुःशताभियोगे तु दातव्यस्तप्तमाषकः। त्रिंशते तण्डुला देयाः कोशश्चैव तदर्द्धके। शते हृतेऽपहुते च दातव्यं धर्मशोधनम्। गोचरस्य प्रदातव्यं सद्यःकालावलेहनम्। एषा संख्या निकृष्टानां मध्यानां द्विगुणा स्मृता। चतुर्गुणोत्तमानां च कल्पनीया परीक्षकैरिति धर्मशोधनम्॥ धर्मजन्यद्रव्येण शोधनम्। निकृष्टामाषात्रिगुणा धर्मेभिः मध्यमत्वमुत्तमत्वं च तैरेव। यत्तु। नासहस्राद्धरेत्फालं न विषं न तुलां तथेति याज्ञवल्क्यवचनं तन्मध्यमोत्तमपुरुषविषयम्। यत्तु सहस्रे तु घटं दद्यात्सहस्रार्द्धे तथायसम्। अर्द्धस्यार्द्धे तु सलिलं तस्यार्द्धे तु विषं स्मृतमिति। यत्पितामहवचनं तद्धनाल्पद्रव्यापहारे पानीयं भवति तद्विषयम्॥ ● ॥ एतत्स्तेयसाहसविषयं द्रव्यापह्नवे तु। कात्यायनः। द्रव्यापह्नवे यत्र प्रमाणं तत्र कल्पयेत्। स्तेयसाहसयोर्दिव्यं स्वल्पेप्यर्थे प्रदापयेत्। सर्वद्रव्यप्रमाणं तु ज्ञात्वा हेम प्रकल्पयेत्। हेमप्रमाणयुक्तं तु तदा दिव्यं प्रयोजयेत्। ज्ञात्वा संख्यां सुवर्णानां शतनाशे विषं स्मृतं। अशीतेस्तु विनाशे वै दद्याच्चैव हुताशनम्। षष्ट्या नाशे जलं देयं चत्वारिंशति वै घटं। विंशद्दशविनाशे तु कोशपानं विधीयते। पञ्चाधिकस्य वा नाशे तदर्द्धार्द्धस्य तण्डुलाः। ततोऽर्द्धार्द्धविनाशे हि स्पृशेत्पुत्रादिमस्तकान्। ततोऽर्द्धार्द्धविनाशे तु लौकिकस्य क्रिया स्मृता। एवं विचारयन् राजा धर्मार्थाभ्यां न हीयत इति। अत्र सुवर्णशब्दः षोडशमाषात्मकः। वाशब्दोऽपह्नवः। विंशद्दशविनाशे विंशतेर्वा दशानां वेत्यर्थः। विंशद्दशविनाशे विंशद्विनाशनमिति स्मृतिचन्द्रिकायाम्। पञ्चाधिकस्य पञ्चभ्योऽधिकस्य षट्प्रभृतेरित्यावत्। तदर्द्धार्द्धस्य तु सुवर्णप्रभृतेः। ततोऽर्द्धार्द्धस्यार्धमाषोनसुवर्णार्द्धप्रभृतेः। ततोऽर्द्धार्द्धस्य विनाशे सार्द्धसप्तमाषोनसुवर्णार्द्धप्रभृतेर्विनाशे। लौकिकास्तु क्रियाः। अपह्नवेन वदाम्यग्रगुणो द्रव्यनाशो भविष्यतीत्यादिकाः। पञ्चशब्दः स्वार्थे शपथवचनार्थः। अत एवाह विष्णुः। सर्वेष्वेवार्थजातेषु मूल्यं कनकं कल्पयेत्। तत्र कृष्णलोने शूद्रं दूर्वाकरं शापयेत्। द्वि

हस्तलोनेनतिलकरम्। त्रिहस्तलोनेनजलकरश्चतुःहस्तलोनेसुवर्णकरम्। पञ्चहस्तलोनेसीरोद्धृतमहीकरम्। नवसुव
र्णाद्धैनेकोशोदेयःशूद्रस्यतनःपरंयथार्हेन्धटाम्बुदकविषाणामन्यतमंद्विगुणार्थेयथाभिहितासमयक्रिया। वैश्यस्यत्रिगुणे
र्थेराजन्यस्यकोशवर्जंचतुर्गुणेर्थेब्राह्मणस्यकोशवर्ज्यत्वात्। अन्यत्रागामिकालसमयनिबन्धनक्रियातःकोशस्थानेब्राह्मणस्यसीरोद्धृ
तमहीकरमेवशापयेत्। प्राग्दृष्टदोषंस्वल्पेप्यर्थेदिव्यानामन्यतममेवकारयेत्। सत्वंप्रथितंसच्चरितंनमहत्यर्थेपीति। सी
रोद्धृतमहीकरंलाङ्गलोद्धृतलोष्टहस्तमित्यर्थः। अनयहणामधिकेशापनिवृत्त्यर्थेशापेतुविशेषमाहमनुः। सत्येनशापयेद्वि
प्रंक्षत्रियंवाहनायुधैः। गोबीजकाञ्चनैर्वैश्यंशूद्रंसर्वैस्तुपातकैरिति। यत्तुहमर्थापह्नवोस्यात्तदासत्याभिधानधर्मोममनि
ष्फलःस्यादितिशपथकारिणंब्राह्मणंवाचयेत्। एवंक्षत्रियादीनांवाहनादीनिनिष्फलानिस्युरित्यादीत्यर्थः। पादस्थादी
नांविशेषःस्मृत्यन्तरेदर्शितः। निष्केतुसत्यवचनंद्विनिष्केपादलम्भनम्। ऊर्ध्वंत्रिकेतुपुष्पंस्यात्कोशपानमतःपरमिति।
अत्रनिष्कशब्देनकर्षचतुर्थांशोमुद्रामुद्रितःप्रतिपाद्यते। क्वचिद्देशेतत्रापिनिष्कव्यवहारात्। ननुमनूक्तोनिष्कः। तस्यरा
जतपलात्मकत्वेनमूलकाञ्चनकर्षादधिकत्वात्। तत्रसत्यवचनविधौचतुर्गुणेऽर्थेब्राह्मणस्येतिविरोधःस्यात्। दिव्येदण्डेचम
नूक्तंयाह्यंपरिमाणम्। याह्यमितिवृहस्पतिराह। संख्यारश्मिरजोमूलामनुनासमुदाहृता। कार्षापणान्तासादिव्येनियो
ज्याविनयेतथेति। संख्यापरिमाणंरश्मिरजोमूलात्त्र्यसरेण्वादिका। विनये। दण्डे। तच्चपरिमाणम्प्रतिज्ञापूर्वकंमनुराह। लो
कसंव्यवहारार्थेयाःसंज्ञाःप्रथिताभुवि। ताम्ररूप्यसुवर्णानांताःप्रवक्ष्याम्यशेषतः॥ जालान्तरगतेभानौयत्सूक्ष्मंदृश्यतेर
जः। प्रथमन्तत्प्रमाणानांत्र्यसरेणुम्प्रचक्षते॥ त्र्यसरेणवोऽष्टौविज्ञेयालिक्षैकापरिमाणतः। ताराजसर्षपस्तिस्रस्तेत्रयोगौ
रसर्षपः॥ सर्षपाःषड्यवोमध्यस्त्रियवन्त्वेककृष्णलं। पञ्चकृष्णलकोमाषस्तेसुवर्णस्तुषोडश॥ पलंसुवर्णाश्चत्वारःपलानिध
रणन्दश। द्वेकृष्णलेसमधृतेविज्ञेयोरौप्यमाषकः॥ तेषोडशःस्याद्धरणम्पुराणश्चैवराजतः॥ धरणानिदशज्ञेयःशतमान

स्तु राजतः॥ कार्षापणस्तु विज्ञेयः कार्षिकस्ताम्रिकः पणः। चतुःसौवर्णिको निष्को विज्ञेयस्तु प्रमाणत इति॥ अत्र ताम्ररूप्यसु वर्णानामिति ताम्ररूप्ययोरल्पत्वात्प्राक्प्रयोगेनानुक्रमप्रदर्शनार्थः। पलानि धरणं दशेत्यन्तं सुवर्णपरिमाणाभिधानम्। चतुःसौवर्णिको निष्क इत्युक्तं रूप्यपरिमाणाभिधानम्। अवशिष्टेन ताम्रपरिमाणाभिधानम्। जालान्तरप्रविष्टे सूर्यरश्मौ यत्सूक्ष्मं रजो दृश्यते तत्त्रसरेणुसंज्ञकं अष्टौ त्रसरेणवो लीक्षा राजसर्षपः। त्रयो राजसर्षपाः गौरसर्षपः। षड्गौरसर्षपा मध्यमो यवो नातिसूक्ष्मो नातिस्थूल इति। मध्यमयवस्य परिमाणमुक्तमिताक्षरायाम्। मध्यशब्दः पादपूरणार्थः। तथा च संपूर्णयवपरिमाणमुक्तमिति मनुभाष्ये। त्रयो यवाः कृष्णलं। माषः पञ्चकृष्णलानि। सुवर्णः षोडशमाषाः। पलं सुवर्णाश्चत्वारः॥ धरणं दशपलानि। रूप्यमाषो द्वे कृष्णले। रजतस्य धरणं षोडश रूप्यमाषाः। अस्य च पुराण इति संज्ञान्तरं। शतमानः राजतदशधरणानि राजतपलसंज्ञाप्यस्य भवति। शतमानं तु दशभिर्धरणैः पलमेव त्विति याज्ञवल्क्यस्मरणात्। पूर्वोक्तसुवर्णचतुष्टयपरिमित एको राजतनिष्कः। कार्षिकः कर्षसंमितः ताम्रिकस्ताम्रविकारः कार्षापणो विज्ञेयः। पण इति च संज्ञा अस्यैव विज्ञेयेत्यर्थः। चशब्दो अध्याहार्यः। अत एव बृहस्पतिः। निष्कं सुवर्णाश्चत्वारः कार्षिकस्ताम्रिकः पणः। ताम्रकर्षकृता मुद्रा विज्ञेयः कार्षिकः पणः॥ स एव चान्द्रिका प्रोक्ता तासां तत्र सुधानकाः॥ तासां द्वादशसुवर्णस्तु दीनाराख्यः स एव त्विति। कर्षः पलचतुर्थांशः। तेषोडशाक्षः कर्षोऽस्त्री पलं कर्षचतुष्टयमित्यमरसिंहेनाभिधानात्। ते माषाः षोडशाक्षः कर्ष इति च संज्ञे त्यर्थः। तेनाक्षकर्षशब्दयोः सुवर्णपरिमाणवचनत्वमित्यवगम्यते। याज्ञवल्क्यः। पलेविकल्पमाह। पलं सुवर्णाश्चत्वारः पञ्च वापि प्रकीर्तितमिति। तस्य चतुर्थांशो विंशतिमाषाः तत्परिमितः कार्षापणः। अत एव कात्यायनः। माषो विंशतिभागस्तु ज्ञेयः कार्षापणस्य तु। काकिणी तु चतुर्भागा माषकस्य पणस्य चेति। राजतोऽपि कार्षापणोऽस्तीत्याह नारदः। कार्षापणो दक्षिणस्यां दिशि रौप्यः प्रवर्तत इति। व्यासस्तु। निष्कस्य प्रमाणमाह। पलान्यष्टौ सुवर्णास्तु ते सुवर्णाश्चतुर्दशः। एतं निष्कप्रमाण

न्नुव्यासेनपरिकीर्त्तितमिति ॥ ● ॥ वर्णभेदेनदिव्यव्यवस्थामाहनारदः । ब्राह्मणस्यघटोदेयःक्षत्रियस्यहुताशनः । वैश्यस्यसलिलन्देयंशूद्रस्यविषमेवतु । साधारणाःसमस्तानांकोशःप्रोक्तोमनीषिभिः । विषंविनाब्राह्मणस्यसर्वेषांवातुलास्मृता इति । अनित्याचेयंव्यवस्था । राजन्येग्निघटंविप्रेवैश्येतोयंनियोजयेत् ॥ सर्वेषुसर्वदिव्यंवाविषवर्जंद्विजोत्तमे ॥ इतिकात्यायनस्मरणात् । व्यवस्थापक्षेवयोविशेषादिनाव्यवस्थापनीयम् । तदाहनारदः । क्लीवान्तुरान्सत्वहीनान्परितश्चार्दितान्नरान । बालवृद्धातुरांस्त्रींश्चपरीक्षेतघटंसदा । स्त्रीणान्तुनविषंप्रोक्तंनवापिसलिलंस्मृतम् । घटकोशादिभिस्तासामन्तस्तत्त्वंविचारयेत् । नाग्नीनान्तोयशुद्धिःस्यात्नविषम्पित्तरोगिणाम् । श्वित्र्यन्धकुनखादीनांनाग्निकर्मविधीयते । नमज्जनीयाःस्त्रीबालाधर्मशास्त्रविचक्षणैः । रोगिणोयेचवृद्धाःस्युःपुमांसोयेचदुर्बलाः । निरुत्साहान्व्याधिक्लिष्टान्नार्तांस्तोयेनिमज्जयेत् ॥ सद्योम्रियन्तेमज्जन्तःस्वल्पप्राणाहितेस्मृताः । साहसेप्यागतानेतान्नैवतोयेनिमज्जयेत् । नचापिहारयेदग्निन्नविषेणविशोधयेत् ॥ याज्ञवल्क्यः । तुलास्त्रीबालवृद्धान्धपंगुब्राह्मणरोगिणाम् । अग्निर्जलम्वाशूद्रस्ययवाःसप्तविषस्यचेति ॥ । स्त्रीमात्रजातिवयोवस्थाविशेषानादरेण । बालश्चाषोडशाद्वर्षाज्जातिविशेषानादरेण । वृद्धोशीतिकावरः । अन्धोनेत्रविकलः । पंगुःपादविकलः । ब्राह्मणोजातिमात्रम् । रोगीव्याधितः । एतेषांशोधनार्थंसर्वदिव्यसाधारणेषुमार्गशीर्षचैत्रवैशाखेषुस्त्र्यादीनांसर्वदिव्यप्रसक्तौतुलैवेतिनियम्यतेनतुसर्वकालंस्त्रीणांतुलानियमःकोशादिविधानात् । अग्निःफाल्गुनमाघयोःक्षत्रियस्य । जलमेववैश्यस्य । यवाएवार्थेशूद्रस्यविषस्यसप्तैवयवाउक्तप्रमाणलक्षणाभवन्तीत्यर्थः । ब्राह्मणस्यतुलाविधानात् । शूद्रस्यविषविधानात् । अग्निर्जलंवेतिक्षत्रियवैश्यविषयमित्यवगम्यते । अतएवपितामहः । ब्राह्मणस्यघटोदेयः क्षत्रियस्यहुताशनः । वैश्यस्यसलिलम्प्रोक्तंविषंशूद्रस्यदापयेदिति ॥ कात्यायनोपि । नलोहशिल्पिनामग्निःसलिलंनाम्बुसेविनाम् । मन्त्रयोगविदाञ्चैवविषन्दद्यात्तुनकचित् ॥ तण्डुलैर्नैनियुञ्जीतव्रतिनंमुखरोगिणामिति । व्रतिनम्पयोव्रतादिनियम

स्थं। हारीतोपि॥ कुष्ठिनां वर्जयेदग्निं सलिलं श्वासकासिनां। पित्तश्लेष्मवतां नित्यं विषं च परिवर्जयेदिति। विष्णुरपि। नश्लेष्म
कारिणां व्याधितानां भीरूणां श्वासकासिकानामम्बुसेविनामुदकं हेमन्तशिशिरयोश्चेति। पितामहोपि। कुष्ठिनां वर्जयेदग्निं स
लिलं श्वासकासिनाम्। पित्तश्लेष्मवतां नित्यं विषन्तु परिवर्जयेत्॥ मद्यपस्त्रीव्यसनिनां कितवानान्तथैव च। कोशः प्राज्ञैर्न दा
तव्यो ये च नास्तिकवृत्तय इति। यत्तु पितामहेनोक्तम्। सव्रतानां भृशार्त्तानां व्याधितानान्तपस्विनाम्। स्त्रीणाञ्च न भवेद्दिव्यं य
दि धर्मस्त्वपेक्ष्यत इति। तुलेतरविषन्तादिति केचित्तदयुक्तम्। घटकोशादिभिस्तासामन्तस्तत्वं विचारयेदिति पूर्वोदाहृ
तनारदवचनेन स्त्रीणां कोशादिविधानात्। तदन्यन्तु विषयमित्युक्तं विद्यारण्यश्रीपादैः। विज्ञानेश्वराचार्यस्तु। पुंस्त्रियोर्विवादे
तु च्यावान्यतरः कुर्यादित्यनेन पक्षे स्त्रीणामपि दीव्यप्रसक्तौ पुरुषस्यैव दिव्यं न स्त्रीणामित्येतत्परमिदं। अन्यथा सर्वथा तासां दि
व्यनिषेधे घटकोशादिभिस्तासामन्तस्तत्वं विचारयेदित्यनेन विरोधः स्यादिति प्राहुः। कात्यायनः। गोरक्षकान्वाणिजकांस्तथा
कारुकुशीलवान्। प्रेष्यान्वार्द्धुषिकांश्चैव ग्राहयेच्छूद्रवद्द्विजान्। कालिकापुराणेपि। वर्णान्त्यस्य सदा देयं माषकं तप्तहेमजमि
ति। वर्णानामन्त्यः शूद्रः तस्येत्यर्थः। नारदोपि। महापराधे निर्धर्मे कृतघ्ने क्लीबकुत्सिते। नास्तिके दृष्टदोषे च शपथानान्ते विव
र्जयेदिति। कात्यायनोपि। मातापितृद्विजगुरुवृद्धस्त्रीबालघातिनाम्। महापातकयुक्तानां नास्तिकानां विशेषतः॥ लिं
गिनाम्प्रमदानाञ्च मन्त्रयोगक्रियाविदाम्। वर्णसङ्करजातानाम्पापाभ्यासप्रवर्त्तिनाम्। एतेष्वेवाभियोगेषु निंद्येष्वेवं प्र
वर्त्तितः। दिव्यम्प्रकल्पयेन्नैव राजा धर्मपरायणः। एतैरेव नियुक्तानां साधूनान्दिव्यमर्हति। नसन्ति साधवो यत्र तत्र शोध्याः
स्वकैर्नरैरिति। साधूनान्दिव्यमर्हति। राजा कल्पयितुमिति शेषः। प्रतिनिधिद्वारा एतैर्दिव्यङ्कारणीयमिति द्रढयितुमाह स
एव। महापातकयुक्तेषु नास्तिकेषु विशेषतः। न देयन्तेषु दिव्यन्तु पापाभ्यासरते भृगुः। येषु पापेषु दिव्यानि कर्त्तव्यानि प्रयत्न
तः। तारयेत्सज्जनैस्तानि नाभिशस्तं त्यजेन्नर इति। तारयेत् शोधयेत्। अभिशोधन प्रतिनिधिद्वारा शोधनमकारयित्वान

य्यजेदित्यर्थः। यमुनेनैवोक्तं। अस्पृश्याधमदासानां म्लेच्छानां पापकारिणां। प्रातिलोम्यप्रसूतानां निश्चयो न तु राजनि। तत्प्र
सिद्धानि दिव्यानि संशये तेषु निर्दिशेदिति। तन्नैर्नियुक्तानां साधूनामभावे विज्ञेयम्। तत्प्रसिद्धानि सर्पघटादीनि इति स्मृ
तिनञ्चे साधूनामप्यसामर्थ्ये प्रतिनिधिमभ्युपजानाति स एव। कालदेशाविरोधेन तु यथायुक्तं प्रकल्पयेत्। अन्येन हारयेद्दिव्यं
विधिरेष विपर्ययः॥ सामर्थ्याभावे सर्ववर्णविषये विशेषमाह हारीतः। राजन्योऽग्निं घटं विप्रे वैश्ये तोयं नियोजयेत्। न विषं
ब्राह्मणे दद्याद्विषमन्यवर्णान्तरे स्मृतम्॥ कोश न तण्डुलधर्म्मांस्तु धर्मसम्भवमेव च। पुत्रदारादिशपथान् सर्ववर्णे प्रयोजयेदिति
॥ ॥ अथ दिव्यकालः। तत्र पितामहः। यो यस्य विहितो कालो विधिर्यस्य चयो यथा। तम्प्रवक्ष्यामि तत्त्वेन वाध्दिनञ्च बलाबलं
॥ चैत्रो मार्गशिरश्चैव वैशाखश्च तथैव च। एते साधारणा मासा दिव्यानामविरोधिनः॥ धटः सर्वर्तुकः प्रोक्तो वाते वाति विवर्जयेत्।
अग्निः शिशिरहेमन्तवर्षासु परिकीर्तितः॥ शरद्ग्रीष्मे च सलिलं हेमन्ते शिशिरे विषमिति॥ विष्णुरपि। स्त्रीब्राह्मणविकलाऽसमर्थ
रोगिणां न तुला देया न वाति वायौ न कुष्ठ्यसमर्थलोहकाराणामग्निर्देयः शरद्ग्रीष्मयोश्च न कुष्ठिपैत्तिकब्राह्मणानां विषन्देयम्प्रावृषि च
। न श्लैष्मिकाणां व्याध्यर्दितानां भीरूणां श्वासकासिनामम्बुजीविनामुदकं हेमन्तशिशिरयोश्चेति। हेमन्तनिषेधोऽत्र पौषमा
घविषय एव न तु मार्गशीर्षविषयोपि। मार्गशीर्षस्य चैत्रो मार्गशिर इति पूर्वोदाहृतपितामहवचनेन सकलदिव्यसाधारणा
भिधानात्। नारदोपि। विचार्य धर्मनिपुणैर्धर्मशास्त्रविशारदैः। धर्म्मं सर्वर्तुकम्प्रोक्तम्पण्डितैर्घटधारणम्॥ वर्षासु
समये वह्निर्हेमन्ते शिशिरे तथा। ग्रीष्मे सलिलमित्युक्तं विषं काले तु शीतले॥ न शीते तोयशुद्धिः स्यान्नोष्णकालेऽग्निशोधनम्। न
प्रावृषि विषं दद्यात्प्रवाते न तुलां तथा॥ नापराह्णे न सन्ध्यायां न मध्याह्ने कदाचनेति। मध्याह्ने दिव्यनिषेधो जलव्यतिरिक्तविष
यः। अत एव पितामहः। पूर्वाह्णेऽग्निपरीक्षा स्यात्पूर्वाह्णे च घटो भवेत्। मध्याह्ने तु जलं देयं धर्मतत्त्वमभीप्सता॥ दिवसस्य तु पू
र्वाह्णे कोशशुद्धिर्विधीयते। रात्रौ तु पश्चिमे भागे विषं देयं सुशीतलमिति॥ अत्र विशेषतो वर्षासु निषेधात्। सिंहरवावेवपरीक्षा

मात्रनिषेधाच्च दिव्यान्तरं सिंहेतरवर्षोष्वपि कुर्वन्ति । अतो याम्यायने हरौ सुप्ते सर्वकर्मणि वर्जयेदिव्यस्यानक्रियं । तथा चज्यो
तिषे । सिंहस्थे मकरस्थे च जीवे चास्तमिते भृगौ । मलमासेन कर्त्तव्या परीक्षा जयकांक्षिणा । तथा । रविशुद्धौ गुरौ चैव न
भुक्ते स्नाते पुनः । सिंहस्थे च रवौ नैव परीक्षा शस्यते बुधैः ॥ नाष्टम्यां न चतुर्दश्यां प्रायश्चित्तं न निरीक्षणे । न परीक्षा धिवा
गनिभौमदिने भवेदिति ॥ रविशुद्धौ गुरौ चेद्दिव्यत्रयस्य तदितिशेषः । तथा च दीपिकायाम् । नशुक्रास्ते ष्टमे केन्द्रे गुरुसहितरवौ
जन्ममासे ष्टमे ऽष्टे विष्टौ मासे मलाख्ये कुजशनिदिवसे जन्मताराशुभा च । नाडीनक्षत्रहीने गुरुरविरजनीनाथताराविशुद्धे ।
प्रातःकार्या परीक्षा ह्विनतु चरयशांशोदये शस्तलग्ने इति । यद्यपि दिव्ये वारविशेषविधानाभावस्तथापि शिष्टाचारादिव्यवारे दि
व्यानि दातव्यानीति मिताक्षरायां ॥ अथ दिव्यदेशाः । तत्र पितामहः । प्राङ्मुखो निश्चलः कार्यः शुचौ देशे धटः सदा । इन्द्रस्थाने
सभायां वा राजद्वारे चतुष्पथे इति । धटग्रहणं दिव्यान्तरस्याप्युपलक्षणम् । इन्द्रस्थानग्रहणञ्च प्रसिद्धदेवतायतनानामप्यु
पलक्षणम् । अत एव दिव्यमात्रमुपक्रम्य नारदः । सभाराजकुलद्वारे देवायतनचत्वरे इति । विषयविशेषेण इन्द्रस्थाना
दीनां व्यवस्थामाह । कात्यायनः । इन्द्रस्थाने ऽभिशस्तानां महापातकिनां न्हणाम् । नृपद्रोहप्रवृत्तानां राजद्वारे प्रयोजयेत्
॥ प्रातिलोम्यप्रसूतानां दिव्यं देयं चतुष्पथे । अतो ऽन्येषु तु कार्य्येषु सभामध्ये विदुर्बुधा इति । इन्द्रस्थाने इन्द्रध्वजपूर्वस्थाने ।
दिव्यदेशादनादरे दिव्यं विसंवदतीत्याह । नारदः । अदेशकालदत्तानि निर्बहिर्वासकृतानि च । व्यभिचारं सदर्थेषु कुर्वन्ती
ह न संशयः ॥ वासो जननिवासस्तस्माद्बहिः कृतानि निर्जनप्रदेशकृतानीति यावत् । अत एव पितामहः । प्रत्यक्षं न्हपतेर्दिव्यं
जावाधिकृते ऽपि वा । ब्राह्मणानां श्रुतवतां प्रकृतीनां तथैव चेति ॥ ब्राह्मणानां प्रकृतयो ऽमात्यास्तेषाञ्च समन्वयः ॥०॥ अथ दिव्य
साधारणविधिस्तत्र बृहस्पतिः । स्नेहात्क्रोधाल्लोभतो वा भेदमायान्ति साक्षिणः । विधिदत्तस्य दिव्यस्य न भेदो जायते क्वचिदिति
। विधिश्च पितामहेन दर्शितः । दिव्येषु सर्वकार्य्याणि प्राड्विवाकः समाचरेत् । अध्वरेषु यथाध्वर्युः सोपवासो न्हपाज्ञया । ततस्त्वावाह

येद्देवान्विधिनानेनधर्म्मवित्। वादित्रनृत्यघोषैश्चगन्धमाल्यानुलेपनैः॥ प्राङ्मुखःप्रांजलिर्भूत्वाप्राड्विवाकस्ततोवदेत्। एह्ये
हिभगवन्धर्म्मअस्मिन्दिव्येसमाविश। सहितोलोकपालैश्चवस्वादित्यमरुद्गणैः। आवाह्यतुघटेधर्म्मपश्चादङ्गानिविन्यसेत्। स
र्वकार्य्याणिसाधारणानिअसाधारणानिचततस्तदुपयोगिसामग्रीसंघाटनानन्तरमित्यर्थः। घटग्रहणमत्रदिव्यमात्रोपलक्षणं
। अस्मिन्दिव्यइतिमंत्रलिङ्गादेतेषान्धर्म्माणान्दिव्यमात्रसाम्यस्य। इमंमंत्रविधिंसम्यक्सर्वदिव्येषुयोजयेत्। आवाहनन्तुदेवाना
न्तथैवपरिकल्पयेदित्युपसंहरतावेवोक्तत्वाच्च। अंगानिकानीत्याकांक्षायांवत्सएवाह। इन्द्रंपूर्वेतुविन्यस्यप्रेतेशन्दक्षिणेतथा
। वरुणम्पश्चिमेभागेकुवेरश्चोत्तरेतथा। अग्न्यादिलोकपालांश्चकोणभागेषुविन्यसेत्। इन्द्रःपीतोयमःश्यामोवरुणःस्फटि
कःप्रभः। कुवेरस्तुसुवर्णाभअग्निश्चैवसुवर्णाभः। तथैवनिर्ऋतिःश्यामोवायुर्धूम्रःप्रशस्यते। ईशानस्तुभवेद्रक्तएवंध्यायेत्क्र
मादिमान्। इन्द्रस्यदक्षिणेपार्श्वेवसून्संस्थापयेद्बुधः। धरोध्रुवस्तथासोमआपश्चैवानलोनिलः। प्रत्यूषश्चप्रभासश्चवसवोऽष्टौ
प्रकीर्त्तिताः। देवेशेशानयोर्मध्येआदित्यानान्तथायनं। धातार्य्यमामित्रश्चवरुणोंशोभगस्तथा। इन्द्रोविवस्वान्पूषाचपर्ज्ज
न्योदशमःस्मृतः। ततस्त्वष्टाततोविष्णुरजघन्योजघन्यजः। इत्येतेद्वादशादित्यानामभिःपरिकीर्त्तिताः। अग्नेःपश्चिमभागेतु
रुद्राएकादशाःस्मृताः। वीरभद्रश्चशम्भुश्चगिरिशश्चमहायशाः। अजैकपादहिर्बुध्न्यःपिनाकीचापराजितः। भुवनाधीश्वर
श्चैवकपालीचविशाम्पतिः। स्थाणुर्भवश्चभगवान्रुद्रास्त्वेकादशाःस्मृताः। प्रेतेशरक्षोमध्येचमातॄस्थानप्रकल्पयेत्। ब्राह्मी
माहेश्वरीचैवकौमारीवैष्णवीतथा। वाराहीचैवमाहेन्द्रीचामुण्डागणसंयुता। निर्ऋतेरुत्तरेभागेगणेशायतनंविदुः। वरुण
स्योत्तरेभागेमरुतांस्थानमुच्यते। गगनःस्पर्शनोवायुरनिलोमरुतस्तथा। प्राणःप्राणेशजीवौचमरुतोऽष्टौप्रकीर्त्तिताः। ध
टस्योत्तरभागेतुदुर्गामावाहयेद्बुधः। एतासांदेवतानांतुस्वनाम्नापूजनंविदुः। भूषावसानंधर्मायदत्वाचार्घादिकंक्रमात्। अ
र्घादिपश्चादङ्गानाम्भूषान्तमुपकल्पयेत्। गन्धादिकांनिवेद्यान्तांपरिचर्य्याप्रकल्पयेत्। चतुर्दिक्षुतथाहोमःकर्त्तव्योवेदपा

रगैः। आज्येनहविषाचैवसमिद्भिर्होमसाधनैः। सावित्र्याप्रणवेनाथस्वाहान्तेनैवहोमयेत्। अङ्गानाइन्द्रादिदुर्गान्तानाम्
। अर्घाद्युपकल्पनञ्चनकाण्डानुसमयेन। तथात्वेप्रयोगवचनावगताङ्गसहभावबाधापत्तेः। किंतुपदार्थानुसमयेनतथाच
दुर्गायैभूषणान्तन्त्वाधर्मस्येन्द्रादिदुर्गाणांनामाद्यगंधादिपरिचर्यंविप्रकल्पयेदितिगायत्र्याप्रणवादिकामुच्चार्यपुनःप्रणवस्वाहा
कारान्तमुच्चार्यसमिदाज्यचरुभिःप्रत्येकमष्टोत्तरशतंजुहुयात्। अनुक्तसंख्यायत्वात्शतमष्टोत्तरंस्मृतमितिस्मरणादि
त्यर्थः। होमानन्तरकर्तव्यमपआह। यमर्थमभियुक्तःस्यात्तंलिखित्वातन्तुपत्रके। मन्त्रेणानेनशिरसितन्तत्कार्यंस्यशिरोगतम्।
मन्त्रश्च आदित्यचन्द्रावनिलानलौचद्यौर्भूमिरापोहृदयंयमश्च। अहश्चरात्रिश्चउभेचसंध्येधर्मश्चजानातिनरस्यवृत्तमिति॥
एतत्सर्वंपूर्वाह्णेकर्तव्यम्। तस्यप्रधानकालत्वाच्च। तथाचनारदः। अहोरात्रोपोषितेस्नातेआर्द्रवाससिमानवे। पूर्वाह्णेसर्वं
दिव्यानाम्प्रदानमनुकीर्तितमिति॥ एतत्प्राड्विवाकेनोपवासादिनियमपूर्वकङ्कर्तव्यम्। तथाचनारदः। प्राड्विवाकस्ततोवि
प्रोवेदवेदाङ्गपारगः। श्रुतवृत्तोपसम्पन्नःशान्तचित्तोविमत्सरः॥ सत्यसन्धःशुचिर्दक्षःसर्वप्राणिहितेरतः। उपोषितस्त्वार्द्र
वासाःकृतदन्तानुधावनः॥ सर्वेषांदेवतानाञ्चपूजांकृत्वायथाविधिः। इतिकर्तुरुपवासादिकमाह। त्रिरात्रोपोषितायेस्युरेक
रात्रोपोषितायथा। नित्यंदेयानिदिव्यानिशुचयेसार्द्रवाससेइति। याज्ञवल्क्योऽपि। सचैलंस्नातमाहूयसूर्योदयउपोषितं।
कारयेत्सर्वदिव्यानिनृपब्राह्मणसन्निधाविति॥ अत्रसूर्योदयपदेनपूर्वाह्णएवग्राह्यः। पूर्वाह्णेसर्वदिव्यानाम्प्रदानमनुकी
र्तितमितिनारदवचनानुरोधात्। त्रिरात्रैकरात्रपक्षयोःशक्ताशक्तविषयत्वेनव्यवस्थाज्ञेयादिव्यप्रयोगानन्तरन्दक्षिणादानं
उक्तेनविधिनादिव्यप्रयोगङ्कारयितुःराज्ञःफलञ्चाहपितामहः॥ सद्भिःपरिवृतोराजाशुद्धिमेताम्प्रपूजयेत्। ऋत्विक्पुरो
हिताचार्यान्दक्षिणाभिस्तुतोषयेत्॥ एवंकारयिताराजाभुक्त्वाभोगान्मनोरमान्। महतींकीर्तिमाप्नोतिब्रह्मभूयायकल्पत
इतिभयस्यविधिः। सर्वदिव्यसाधारणाङ्ग्याहसएव। इमंमन्त्रविधिंकृत्स्नंसर्वदिव्येषुयोजयेत्। आवाहनञ्चदेवानांतथै

वपरिकीर्त्तितमिति। सर्वदेवावाहनादिसंशोध्यशिरश्विपत्रारोपणान्तं सर्वदिव्यसाधारणमित्यर्थः। इति दिव्यमातृका ॥ ० ॥
अथ घटविधिः। तत्र पितामहः। विशालमुच्छ्रितं शुभ्रान्घटशालान्तु कारयेत्। यत्रस्थो नोपहन्येत श्वभिश्चाण्डालवायसैः ॥
कपाटवीजसंयुक्ताम्परिचारकरक्षिताम् ॥ पानीयादिसमायुक्तामभ्यून्याङ्कारयेन्नृप इति। वीजानि यवव्रीह्यादीनि। घटा
र्थानि काष्ठानि नारद आह ॥ खादिरं कारयेत्तत्र निर्व्रणं शुष्कवर्जितम्। शांशपन्तदभावे वा शालं वा कोटरैर्विना ॥ अर्ज्जु
नन्तिन्दुकीसारन्तिलिसोरक चन्दनम्। एवंविधानि काष्ठानि घटार्थम्परिकल्पयेत्। अर्जुनस्तिलकोशीकतिलिशोरकच
न्दनइति माधवीयेपाठः ॥ शांशपमिति पठित्वा व्याख्यानं शांशपं शिंशपावृक्षसम्बन्धि। देविकाशिंशपेति पाणिनिस्मरणा
द्विकारस्याकारः। एवंविधानीत्यन्यस्यापीदुम्बरदेर्यज्ञियस्यकाष्ठस्य ससारस्य ग्रहणम्। अत एव पितामहः। छित्वातु य
ज्ञियं काष्ठं यूपवन्मन्त्रपूर्वकम्। प्रणम्य लोकपालेभ्यस्तुला कार्य्या मनीषिभिः ॥ मन्त्रश्चैव वानस्पत्यः छेदने जप्य एव चे
ति। यूपवन्मन्त्रपूर्वकमित्यनेन ओं ओषधे त्रायस्वैनमित्यादिच्छेदनमन्त्रप्रयोगादिकमुक्तम्। वानस्पत्यः वनस्पते शतवल्शो
विरोहेति मन्त्रः। छेदने हत इति शेषः। वानस्पत्यच्छेदनानन्तरम्प्रयोगे यूपवदित्यतिदेशात्सिद्धेपि पुनर्विधानं सौपदेशिक
स्य सोमदैवत्येनातिदेशिकस्य तस्य बाधनिवृत्त्यर्थम्। अत्र जप्य एव चेति चशब्दः स्यवानस्पत्येत्यनेनान्वयात् तस्य च समुच्चयद्यो
तकत्वात्समुच्चय इति केचित्। सौम्यवानस्पत्ययोरेकार्थत्वात्। तुल्यार्थेस्तु विकल्पेरन्नित्यनेन मायेन व्रीहियवादिकल्प इत्यप
रे। पितामहः। प्राङ्मुखो निश्चलः कार्य्यः शुचौ देशे घटः सदा। इन्द्रस्थाने सभायां वा धर्मस्थाने चतुष्पथ इति। घटनिर्मा
णप्रकारन्तत्प्रमाणञ्चाह पितामहः। चतुर्हस्ता तुला कार्य्या पादौ कार्य्यौ तथाविधौ। अन्तरन्तु तयोर्हस्तौ भवेदध्यर्द्धमेव चे
ति ॥ पादौ तुलाधारकाक्ष नामककाष्ठधारणार्थौ स्तम्भौ तथाविधौ चतुर्हस्तौ। अन्तरं मध्यम्। अध्यर्द्धं सार्धहस्तद्वयम्। अ
क्षकाष्ठस्य प्रमाणम्पादस्तम्भमध्यप्रमाणाभिधानेनैव सूचितमिति न पृथगुपन्यस्तम्। अन्तरालप्रमाणपर्य्यालोचनया ततः

किञ्चिदधिकमष्टकाष्ठं कर्तव्यम्। पादस्तम्भयोर्मस्तकप्रदेशाद्यावद्बहिर्निःसरति तथा मध्यकाष्ठं कार्यमिति स्मृतिचन्द्रिका
याम्। अत्र निखातभागपरित्यागेन पादस्तम्भयोश्चतुर्हस्तत्वाभिधानं ज्ञेयम्। अत एव पितामहः। हस्तद्वयं निखेयन्तु पाद
योरुभयोरपीति। व्यासोऽपि। हस्तद्वयं निखेयन्तु प्रोक्तं मुण्डकयोर्द्वयोः। षड्ढस्तन्तु तयोः प्रोक्तं प्रमाणं परिमाणतः॥ इ
ति मुण्डकौ पादस्तम्भौ। हस्तप्रमाणन्दर्शितं कालिकापुराणे। यवास्त्वष्टाणुभिरेकमंगुलन्त्वष्टभिर्भवेत्। अदीर्घैरमितैर्हि
हस्तस्तु चतुर्विंशतिरंगुलैः॥ इति स्मृत्यन्तरेऽपि। तिर्यग्यवोदराण्यष्टावूर्ध्वा वा व्रीहयस्त्रयः। प्रमाणमंगुलीयं हि वितस्तिर्द्वाद
शांगुलः॥ शारदातिलके। चतुर्विंशत्यंगुलाढ्यं हस्तं तन्त्रविदो विदुः। यवानामष्टभिः क्लृप्तं मानांगुलमितीरितमिति॥ ह
स्तो वितस्तिद्वितयमिति। हस्तो वितस्तिद्वितयो चतुर्विंशत्यंगुलो हस्त इत्यर्थः॥ यवानां यवमध्यानामित्यर्थः। यवान्नामपह्नु
वेरिति स्मरणात्। तुलायाविशेषान्तरमाह पितामहः। चतुरस्रा तुला कार्या दृढा रज्ज्वी तथैव च। कटकानि च देयानि त्रि
षु स्थानेषु यत्नतः इति। कटकानि लोहमयानि वलयानि। त्रिषु स्थानेषु अन्त्ययोर्मध्ये। कटकग्रहणं चोक्तकीलादीनामुपयु
क्तानामुपलक्षणम्। नारदोऽपि। रज्ज्वी घटतुला कार्या खादिरी तैन्दुकी तथा। चतुरस्रा त्रिभिः स्थानैर्घटकर्कटकादिभि
रिति॥ घटो मध्यम्। कर्कटकौ अन्त्यौ पादस्तम्भादीनां सूत्रतानुविशेषानभिधानात्॥ यावती स्थौल्ये दार्ढ्यं भवति तावत्ये
व कार्या। शिष्टाचाराद्विशेषो ज्ञेयः। पादस्तम्भावुदग्दक्षिणसंस्थानौ कृत्वा तुला प्राग्भागा कार्या। पश्चिमे तोलयेत्कर्तॄन
न्यस्मिन्मृत्तिकामिति पितामहस्मरणात्॥ पूर्वपश्चिमसंस्थानौ कृत्वोदग्याम्यौ वा कार्याः। धारयेत्तु नरे पार्श्वे पुरस्तद्दक्षिणो
शिखामिति नारदस्मरणात्। घटाङ्गत्वेन तोरणादिकं कार्यमित्याह पितामहः। तोरणौ तु तथा कार्यौ पार्श्वयोरुभयोरपि।
घटादुच्चतरौ स्यातां नित्यं दशभिरंगुलैः॥ अवलम्बौ तु कर्तव्यौ तोरणाभ्यामधोमुखौ। मृण्मयौ सूत्रसम्बद्धौ घटमस्तकचुम्बि
नाविति ॥०॥ घटारोहणमाह नारदः। शिक्यद्वयं समासज्य घटकर्कटयोर्दृढम्। एकस्मिंस्तु पुरुषमन्यत्र तुलयेच्छिलां। धा

रयेदुत्तरे पार्श्वे पूर्वस्य दिक्षु शिलाम् । पिटकं पूरयेत्तस्मिन्निष्टकापांसुलोष्टकैरिति । इष्टकाभिर्ग्रावभिः पांसुभिर्लोष्टैर्वा
र्थः । माषसंज्ञिभिरपि पिटकं पूरयेत् । माषसंज्ञिमथापि वेत्ति स्मृत्यन्तरवचनात् । पितामहोऽपि । शिक्यद्वयं समासज्य पार्श्व
योरुभयोरपि । प्राग्यानं कल्पयेद्धीमान्सर्वविप्रसमाहितः । पश्चिमे तोलयेत्कर्तॄन्नन्यस्मिन्मृत्तिकां शुभाम् ॥ इष्टकाभस्मपा
षाणकपालास्थिविवर्जितामिति ॥ अत्रेष्टकापाषाणयोर्वैकल्प्योक्तिः । समुच्चयनिराकरणार्था न तु विकल्पनिराकरणार्था ॥
॥ पूर्वोदाहृतनारदवचनेन तयोरपि विधानात् । एतेन मृत्तिकापाषाणादीनां सम्भूय तोलनकर्तृत्वमिति मतमपास्तम् । मृत्तिका
शिलेष्टकादीनामेकार्थत्वान्मुख्यार्थास्तु विकल्पे स्थिति न्यायेन विकल्प इति मिताक्षरायाम् । विष्णुरपि । अथैकस्मिन्पुरुषमा
रोपयेत् । द्वितीये प्रतिमानं शिलादीनीति । समतानिरीक्षणार्थैरष्टानह्निष्टो नियोक्तव्याः । तथा च पितामहः । परीक्षकानि
योक्तव्यास्तुलामानविशारदाः ॥ वणिजो हेमकाराश्च कांस्यकारास्तथैव चेति । नियुक्तांश्च नियोक्तॄनभिप्रायाह नारदः । सुवर्ण
कारवणिजाः कुशलाः कांस्यकारकाः । तान्तुलामन्ववेक्षेरन्न तुलाधारणादिकमिति । निरीक्ष्याप्यब्रवीत्पितामहः । का
र्यः परीक्षकैर्नित्यमवलंबः समो घटः । छेदकञ्च प्रदातव्यं घटस्योपरि पण्डितैः ॥ यस्मिन्नलम्बनेनायं विज्ञेयः समो घट इ
ति । अवलंबसमः तोरणयोर्लम्बमानो यो मृण्मयोऽवलम्बस्तयोः समः । नारदोऽपि । प्रथमां लेखयेत्तत्र प्रमाणं सन्निपुणैः सह । तु
लाशिरोभ्यां तु तुल्यं तु तोरणाभ्यां तु लक्षणामिति । तोलनानन्तरं कर्तव्यं पितामह आह । तोलयित्वा नरं पूर्वं पश्चात्तमवतार्य तु ।
घटं तु कारयेन्नित्यं पताकाध्वजशोभितम् ॥ ततस्त्वाह्वयेद्देवान्विधिनानेन मन्त्रवित् । वादित्रतूर्यनिर्घोषैर्गन्धमाल्यानुले
पनैः । प्राङ्मुखः प्राञ्जलिर्भूत्वा प्राड्विवाकस्ततो वदेदिति । विवादानुरूपं प्रश्नं पृच्छतीति प्राट् तद्विवेचयतीति विवाकः प्राट्
चासौ विवाकश्च प्राड्विवाकः । ततोऽभियुक्तं तोलयित्वाऽवतार्य धर्मावाहनादारभ्याभियुक्तशिरसि पत्रबन्धनमात्रं व्यापारं वि
धिं कुर्यात् । घटपूजायां गन्धादिविशेषं नारद आह । गन्धैर्माल्यैश्च धूपैश्च दध्याज्यपायसादिभिः । अर्चयेत्तु घटं पूर्वं तत

शिष्टांस्तुपूजयेदिति। शिष्टानवशिष्टानिन्द्रादीन्। पत्रबन्धनानन्तरंमंत्रयेतप्राड्विवाकइत्याहपितामहः। धटमामंत्र
येच्चैवविधिनानेनशास्त्रवित्। विधिनामन्त्रेणशास्त्रवित्प्राड्विवाकःमंत्रश्चतेनैवदर्शितः। त्वंधटब्रह्मणासृष्टःपरीक्षार्थंदुरा
त्मनाम्। धकाराद्धर्ममूर्तिस्त्वंटकारात्कुटिलंनरम्। धृतोधारयसेयस्माद्धटस्तेनाभिधीयसे॥ त्वंवेत्सिसर्वभूतानांपापानि
सुकृतानिच। त्वमेवदेवजानीषेनविदुर्यानिमानवाः। व्यवहाराभिशस्तोयंमानुषःशुद्धिमिच्छतीति। शोध्यस्याभिमन्त्रण
माह। याज्ञवल्क्यः। तुलाधारणविद्वद्भिरभियुक्तस्तुलाश्रितः। प्रतिमानसमीभूतोरेखांकृत्वावधारितः॥ त्वंतुलेसत्यधा
मासिपुरादेवैर्विनिर्मिता। तत्सत्यंवदकल्याणिसंशयान्मांविमोचय। यद्यस्मिपापकृन्मातस्ततोमान्त्वमधोनय। शुद्धश्चेद्गम
योर्द्ध्वंमांतुलामित्यभिमन्त्रयेदिति। तुलाश्रितःतुलामारूढः। प्रतिमानसमीभूतः। प्रतिमानेनमृदादिनासमीकृतः। रेखांकृ
त्वावतारणेसाम्यचिह्नंकृत्वाभिमंत्रणमेवावतारणानन्तरंकार्यंअवतारितइतियत्कदर्शनात्ततःप्राड्विवाकःतुलाधारकंश
पथैर्नियम्यशिरोगतपत्रकम्पुनर्धटमारोपयेत्। अतएवनारदः। समयैःपरिगृह्याथपुनरारोपयेन्नरम्। निर्वातेवृष्टि
रहितेशिरस्यारोप्यपत्रकमिति॥ समयैःशपथैःपरिगृह्यनियम्य। तेचविष्णुनादर्शिताः। ब्रह्मघ्नायेस्मृतालोकायेलो
काःकूटसाक्षिणः। तुलाधारस्यतेलोकास्तुलांधारयतोमृषेति। पुनरारोहणकालेऽभिमंत्रणमाहनारदः। त्वंवेत्सिसर्वभू
तानाम्पापानिसुकृतानिच। त्वमेवदेवजानीषेनविदुर्यानिमानवाः। व्यवहाराभिशस्तोयंमानवस्तोल्यतेत्वयि। तदेनंसंश
यारूढंधर्मतस्त्रातुमर्हसि॥ देवासुरमनुष्याणांसत्येत्वमभिधीयसे। सत्यसन्धोसिभगवन्शुभाशुभविभावने। आदित्यच
न्द्रावनिलोनलश्चद्यौर्भूमिरापोहृदयंयमश्च। अहश्चरात्रिश्चउभेचसंध्येधर्मश्चजानातिनरस्यवृत्तमितिमन्त्रोच्चारणानन्त
रङ्कर्तव्यम्पितामहआह। ज्योतिर्विदब्राह्मणश्रेष्ठःकुर्यात्कालपरीक्षणम्। विनाड्यःपञ्चविज्ञेयाःपरीक्षाकालकोविदैः। सा
क्षिणोब्राह्मणाःश्रेष्ठाःयथादृष्टार्थवादिनः। ज्ञानिनःशुचयोलुब्धानियोक्तव्यान्नृपेणतु। यंसंतिसाक्षिणःश्रेष्ठाःशुद्ध्यशुद्ध्यान्नृपे

नदेति। दशगुर्वक्षरोच्चारणकालः प्राणः तेषट् विनाडिकाः। तथाचस्मृत्यंतरम्। दशगुर्वक्षरः प्राणः षट्प्राणाः स्याद्विनाडि
केति। विष्णुधर्मोत्तरेपि। लघ्वक्षरसमामात्रानिमेषः परिकीर्त्तितः। अतः सूक्ष्मतरः कालोनोपलभ्योभृगूत्तमः॥ द्वौनिमेषौ
त्रुटिर्ज्ञेयाः प्राणोदशत्रुटिःसमः। विनाडिकास्तुषट्प्राणास्तत्षष्ट्यानाडिकाः स्मृताः॥ अहोरात्रंतुतत्षष्ट्यानित्यमेवप्रकीर्त्तित
मिति॥ कानिपुनर्जयपराजयचिह्नानीत्यपेक्षायामाहनारदः। तुलितोयदिवर्द्धेतविशुद्धः स्यान्नसंशयः। समोवाहीयमा
नोवानविशुद्धोभवेन्नरइति॥ वर्द्धेतउपरिगच्छेत्। हीयमानः अधोगच्छेत्। यत्पुनरुक्तंपितामहेन। तुलितोयदिवर्द्धेत
शुद्धोभवतिधर्मतः। हीयमानोनशुद्धिः स्यादेकेषान्तुसमोशुचिः॥ अल्पपापःसमोज्ञेयोबहुपापस्तुहीयतइति। अल्पत्वं
व्यभिचारेसमालिङ्गनादिनाचौर्येतद्देशगमनादिनातत्रएकेषामितिपूजार्थेनतुस्वमतेसमस्याशुचित्वद्योतनार्थे अल्पपा
पिनोप्यशुचित्वात्। तेनहीयमानसमयोर्नकश्चिद्विशेषः। दण्डंप्रायश्चित्तेपरविशेषस्तयोर्द्दोषानुसारित्वात्। यत्तुकैश्चि
देकेषांतुसमोशुचिरितिवचनम्। अल्पपापःसमोज्ञेयइतिवचनंसाम्येसंशयपरमेवेत्युक्तन्तत्क्लिष्टकल्पनयाव्याख्यानाज्जेवा
त्तैरुपेक्षणीयम्। यत्पुनरुक्तंवृहस्पतिना। धटेभियुक्तस्तुलितोहीनस्त्वेद्धानिमाप्नुयात्। तत्समस्तुपुनस्तोल्योवर्द्धितोवि
जयीभवेदिति। अयमर्थः। पुनर्देवतावाहनाद्यंगसहितंसर्वकर्मविधानात्तोलनीयइतिसमस्याशुचित्वनिश्चयोनप्रथ
मतोलनपर्यायेकार्यः। किंतुपुनस्तोल्यमानस्यसमत्वेवयदिभवतितदाअशुद्धिरवधारणीयेत्यर्थइतिस्मृतिचन्द्रिकायाम्
। यत्तुकैश्चित्तस्मिन्नेवप्रयोगेतोलनमुक्तंप्रधानावृत्तावङ्गावृत्तिरितिन्यायेनतोलनस्यफलसम्बन्धेनप्रधानत्वात्तदावृत्तौदेवताबा
हनाद्यङ्गानामप्यावृत्तेरेवोचितत्वात्। शिक्यादिच्छेदेपिपुनःसमीकृत्यतोलनीयइत्याह। कात्यायनः। शिक्यच्छेदेतुलाभङ्गेत
थाचापिगुणस्यवा॥ शुद्धेस्तुसंशयेचैनम्परीक्षेतपुनर्नरमिति॥ शुद्धिसंशयकारिण्याहनारदः। तुलाशिरोभ्यामुद्भ्रान्तविच
लंन्यस्तलक्षणं। यदावायुप्रणुन्नत्वात्तदानैकतरन्वदेदिति। अयमर्थः। यदातुलांतौतिर्यक्चलितौयदाचसमताज्ञानार्थ

न्यस्तं चिह्नमयेति यदा च वायुना प्रेरितानुलाऊर्ध्वमधश्च कम्पते तदा जयमपराजयश्च नवदेदिति । व्यासोऽपि । कक्षच्छेदे तुलाभङ्गे घटकर्कटयोस्तथा । रज्जुच्छेदेऽक्षभंगे वा दद्याच्छुद्धिं पुनर्न्नृपः इति । कक्षं शिक्यतलं कर्कटौ तु तोपानस्यैव शिक्याधारवंशबद्धौ कर्कटशृंगसन्निभौ लोहकीलकौ । अक्षः पादस्तंभयोरुपरि निहितस्तुलाधारपट्ट इति मिताक्षरा । दार्ढ्यं प्रयोजकः कोऽपि इति तुलायुधः । यत्तु बृहस्पतिवचनं । कक्षच्छेदे तुलाभङ्गे घटकर्कटयोस्तथा । रज्जुच्छेदेऽक्षभंगे च तथैवाशुद्धिमाप्नुयादिति । तदाकस्मिककक्षच्छेदादि विषयं । कात्यायनवचनं तु दृश्यमानकारणकशिक्यच्छेदादिविषयमिति विज्ञानेश्वराचार्यादयः ॥ इति घटविधिः ॥७॥ अथाग्निविधिः । तत्र पितामहः । अग्नेर्विधिं प्रवक्ष्यामि यथावच्छास्त्रचोदितं । कारयेन्मण्डलान्यष्टौ पुरस्तान्नवमं तथा ॥ आग्नेयं मण्डलं त्वाद्यं द्वितीयं वारुणं तथा । तृतीयं वायुदैवत्यं चतुर्थं यमदैवतम् ॥ पञ्चमं त्विन्द्रदैवत्यं षष्ठं कौबेरमुच्यते । सप्तमं सोमदैवत्यमष्टमं सर्वदैवतं ॥ पुरस्तान्नवमं यत्तु तन्महत्पार्थिवं विदुः । गोमयेन कृतानि स्युरद्भिः पर्युक्षितानि चेति । सावित्रं त्वष्टमं तथा । नवमं सर्वदैवत्यमिति दिव्यविदो विदुरिति मिताक्षरायां पाठः । प्रख्यातदेवतायतनादि पूर्वोक्तदिव्यप्रदेशभूमुखिं सम्पाद्य तत्र प्राड्विवाकः सोपवासोऽन्यपाक्षयाप्रवृत्तो नव मण्डलानि कुर्यात् । तानि च प्राक्संस्थानि कर्त्तव्यानि । पुरस्तान्नवममित्यष्टानां मण्डलानां पूर्वभागेन नवममण्डलस्य कर्त्तव्यताभिधानात् । पश्चिमे मण्डले स्थित्वेति वक्ष्यमाणवचनविज्ञानाच्च ॥ तानि चाष्टौ क्रमेणाग्न्यादिदैवत्यानि । नवमं महत् मण्डलान्तरापेक्षयाऽधिकपरिमाणमपरिमितांगुलं पार्थिवं पृथिवीदैवत्यं न तु मण्डलानामग्न्यादिदैवत्यत्वं न सम्भवति । तत्प्रकाशकत्वाभावात् । तदुद्देशेन त्यज्यमानत्वाभावाच्चेति चेन्न प्रैतुचेोतुत्वमसः ब्रह्मगाइनिष्ठायेन आग्नेय्यादिदेवतानाङ्कितत्वात्तल्लक्षणानां समसंख्यावत्त्वेनाग्न्यादिदेवतापूजनस्थानत्वेनाग्न्यादिदैवत्यसम्भवात् । अतस्तेष्वग्न्यादिदेवतापूजनं कार्यं । मण्डलपरिमाणं स एवाह । द्वात्रिंशदङ्गुलं प्राहुर्मण्डलं मण्डलान्तरम् । अष्टभिर्मण्डलैरेवमंगुलानां शतद्वयं ॥ षट्पञ्चाशत्समधिकं भूमेस्तु परिकल्पनेति ॥ मण्डलान्तरं अन्यमण्डलं सामाराखमेकैक

मण्डलं द्वात्रिंशदंगुलं । एवञ्चान्तरालसहितैरष्टभिर्मण्डलैरंगुलानां षट्पञ्चाशदधिकं शतद्वयं भवति नवममण्डलस्यापरिमितांगुलकत्वाद्गणनामण्डलं सान्तरालं द्वात्रिंशदङ्गुलं । नवमण्डलं षोडशाङ्गुलन्तदन्तरालन्तथा च याज्ञवल्क्यः । षोडशाङ्गुलकं ज्ञेयं मण्डलं तावदन्तरमिति ॥ तावत्षोडशांगुलं चान्तरं मध्यम् । यत्तु नारदवचनं । अतः परं प्रवक्ष्यामि विधिमग्नेर्यथोदितम् । द्वात्रिंशदंगुलं प्राक्तु मण्डलं मण्डलान्तरं ॥ अष्टाभिर्मण्डलैरेवमंगुलानां शतद्वयम् । चत्वारिंशत्समधिकं भूमेरंगुलमानतः इति ॥ तत्र नवमाष्टमयोरङ्गुलयोर्यदन्तरालं षोडशाङ्गुलं तस्यागणनत्वात्तदन्तराभावेनांगुलानाम्परिगणनमिति न कश्चिद्विरोधः । यत्तु कल्पतरुकारेणैतदेव चाष्टचतुर्विंशतिसंख्याना भूमेस्तु परिकल्पनेति पठितन्तत् षोडशांगुलस्य प्रथमावस्थानं मण्डलत्वसंगत्वेन तदप्यनन्तर्भावगम्यभूमेरंगुलानाम्परिगणनविषयमिति न कश्चिद्विरोधः ॥ यदा तु दिव्यकर्तुः पदं षोडशांगुलादधिकन्तदा तत्पदसंमितं मण्डलं चाष्टविंशिष्टांगुलमन्तरालमित्येवं द्वात्रिंशदंगुलता सम्पादनीया । तथा च नारदः । मण्डलस्य प्रमाणं तु कुर्यात्तत्पदसंमितमिति । पितामहोऽपि । कर्तुः पदसमं कार्यं मण्डलन्तु प्रमाणत इति । अंगुलप्रमाणं तु तिर्यग्यवोदराण्यष्टावित्यादिना षड्विधप्रकरणोदर्शितं । यत्तु विष्णुवचनं । षोडशांगुलन्तावदन्तरं मण्डलसप्तकं कुर्यादिति । तदन्त्यमण्डलविषयम् । स तमादाय सप्तैव मण्डलानि शनैर्व्रजेदिति याज्ञवल्क्यवचनेन समानार्थकं ज्ञेयम् । यत्तु रत्नाकरे एतच्च मण्डलसप्तकं मण्डलाष्टकलङ्घनासामर्थ्ये इत्युक्तं तदयुक्तं । पश्चिमे मण्डले स्थित्वा प्राङ्मुखः प्राञ्जलिः शुचिरिति वचनेनाष्टमं मण्डलं गत्वा नवमे निःक्षिपेद्बुध इति वचनेन च मण्डलसप्तकलङ्घनस्यैवोक्तत्वेन मण्डलाष्टकलङ्घनस्यानुक्तत्वात् । प्रोक्षितेष्वेतेषु प्रागग्राः कुशाः प्रसारणीयाः । तथा च पितामहः । मण्डले मण्डले देयाः कुशाः शास्त्रप्रचोदिताः । विन्यसेच्च पदङ्कृत्वा तेषु नियमितस्थितिरिति । ततः प्राड्विवाकः प्रथममण्डलाद्दक्षिणतो लौकिकमग्निं प्रतिष्ठाप्य शांतिहोमं कुर्यात् शांत्यर्थं जुहुयादग्नौ घृतमष्टोत्तरं शतमिति स्मरणात् । होममन्त्रश्चाग्नये स्वाहा पावकाय स्वाहेत्यनेन मन्त्रेण कुर्यादित्युक्तं व्याख्यातृभिः । ततस्तस्मिन्नग्नौ लोहकारस्पिंडन्ताप

येत्। तथाचनारदः। आग्नेयलोहकारेयःकुशलश्चाग्निकर्मणि। दृष्टप्रयोगश्चान्यत्रतेनाग्नेयोग्निप्रतापयेत्। अग्निवर्णमयःपिंडं सस्फुलिंगंसुरक्षितमिति॥ सुरक्षितश्चाण्डालादिस्पर्शाद्यथानसम्पद्यतेतथारक्षितामयःपिण्डस्यपरिमाणादिकम्पितामहआह। अव्रणहीनसमंकृत्वाअष्टांगुलमयोमयं। पिण्डंतुतापयेदग्निपञ्चाशत्पलिकंसममिति। समम्व्रणहीनं। समन्ततःकोणरहितंसमवृत्तमितियावत्। अष्टांगुलंअष्टांगुलविस्तारम्पञ्चाशत्पलिकम्पञ्चाशत्पलपरिमितंसमन्तापयेदित्यन्वयः। सर्वतस्तापयेदित्यर्थः॥ यत्तु। शतार्द्धपलिकंवृत्तंद्वादशांगुलमायतं। लोहमग्निमयंध्वान्तंदेयंराज्ञाभिशापिनइतिकालिकापुराणेलोहपिंडस्यद्वादशांगुलायामत्वमुक्तन्तदष्टांगुलेनसहविकल्पितंज्ञेयं। यत्तुशंखलिखिताभ्यां। अथवासप्तानामश्वत्थपत्राणामुपरिषोडशपलमपिअग्निवर्णलोहपिण्डमञ्जलिमादायसप्तमपदमर्यादङ्गच्छेदितिपिण्डस्यषोडशपलत्वमुक्तन्तदपिवैकल्पिकम्। सप्तमपदमपीदंसप्तममण्डलंयावत्। अभिविधिपरोत्रमर्यादाशब्दः। केचित्तुषोडशपलसंख्याअसामर्थ्यइतिप्राहुः। इदञ्चपिंडप्रतापनन्त्रिःकर्त्तव्यम्। अग्निवर्णमयःपिण्डंसस्फुलिङ्गंसुरक्षितं। पञ्चाशत्पलकम्भूयःकारयित्वाशुचिर्द्विजः॥ तृतीयतापेतप्यन्तंब्रूयात्सत्यपुरस्कृतमितिनारदवचनेनतृतीयतापेनतप्यन्तमितिलिङ्गात्। सुतप्तमयःपिण्डमुदकेनिःक्षिप्यपुनःसन्ताप्योदकेनिःक्षिप्यपुनःप्रतापनम्। तस्मिन्कालेप्राड्विवाकोधर्मावाहनादिशोध्यशिरःपत्रारोपणान्तंसाधारणंविधिंकुर्यात्। वह्निपूजायाञ्चन्द्रनादिविशेषम्पितामहआह। तत्रपूजांकृताशस्यकारयेन्मनुजाधिपः। रक्तचन्दनमाल्यैश्चरक्तपुष्पैस्तथैवचेति। तत्राचार्यःपिण्डाग्नौकृताशस्यआवाहितस्यधर्मरूपस्याग्नेःततःशोध्यकर्त्तव्यमाहहारीतःप्राङ्मुखस्तुततस्तिष्ठेत्प्रसारितकरांगुलिः। आर्द्रवासाःशुचिश्चैवशिरस्यारोप्यपत्रकमिति। अवस्थितिश्चप्रथमेमण्डलेकर्त्तव्येत्याहपितामहः। प्रथमेमण्डलेतिष्ठेत्प्राङ्मुखःप्राञ्जलिःशुचिरिति। तत्रस्थितस्यकरौशोधनीयावित्यप्याहसएव। लक्षयेयुःक्षतादीनिदुस्तपोस्तस्यकारिणामिति॥ कारिणःनियुक्ताःपुरुषाः। नारदोपि। लक्षयेत्तस्यचिह्नानिहस्तयोरुभयोरपि। प्राक्तनानीवगूढानिसत्र

धान्यपृष्ठानि चेति। शोधनप्रकारं विष्णुराह। करौ विमृदितव्रीहीन् तस्मादावेव लक्षयेदिति। विमृदिता व्रीहयो याभ्यां तौ व्रीहि
मर्द्दनकर्त्तारौ यथावस्थितरूपज्ञानार्थं एवं शोधितयोर्व्रीह्यादि चिह्नेषु तत्तत्प्राक्स्थितत्वज्ञानार्थं मलकादिरसेन तेषाञ्चिह्नकूर्म
ण्यमिति नारद आह। हस्तक्षतेषु सर्वेषु कुर्य्याद्भूसंपदानि तु। तान्येव पुनरालक्ष्येद्धस्तौ विन्दुविचित्रिताविति। तानि प्राक्कृत
चिह्नानि पिण्डधारणानन्तरम्। ततः प्राड्विवाकहस्तयं याज्ञवल्क्य आह। करौ विमृदितव्रीहेर्लक्षयित्वा ततो न्यसेत्। सप्ताश्वत्थ
स्य पत्राणि तावत्सूत्रेण वेष्टयेदिति॥ तावत्कृत्वः सप्तकृत्वः सूत्रेण वेष्टयेदिति तावदित्यस्य क्रियाविशेषणमङ्गीकृत्योक्तो
ऽयं मिताक्षरायां त्वावतां सूत्राणां समाहारः सप्तावत्सूत्रं तेन सप्तभिस्सूत्रैर्वेष्टयेदित्यर्थः। सप्तभिः सूत्रतन्तुभिरिति वह्वमात्र
नारदादिवचनसम्वादो प्रतिभाति तावच्छब्दः संख्यावाची तेन समाहारे द्विगुः स्त्रीलिङ्गत्वाभावाच्च नङीप् त्रिभुवनमितिवत्। स
प्तकृत्वो वेष्टनं तु वचनाभावेऽपि शिष्टाचारतः कर्त्तव्यमिति मदनरत्ने वेष्टनं त्वाश्वत्थपत्रयोः हस्तयोः सूत्रसप्तकमित्याह। ना
रदः। वेष्टयीत सितैर्हस्तौ सप्तभिः सूत्रतन्तुभिरिति। अश्वत्थपत्राणि सप्तापि समानानि तथा च स्मृतिः। पत्रैरञ्जलिमापूर्य
आश्वत्थैः सप्तभिः समैरिति। शमीपत्रादीन्यप्यश्वत्थपत्राणामुपरि स्थापयेत्। तथा च स्मृतिः। सप्तपिप्पलपत्राणि शमीपत्रा
ण्ययाक्षतान्। दूर्वायाः सप्तपत्राणि दद्यात्तान्साक्षतान्यसेदिति। पुष्पाणि च तत्र स्थापनीयानि। तथा च पितामहः। सप्त
पिप्पलपत्राणि अक्षतान् सुमनो दधि। हस्तयोर्न्निःक्षिपेत्तत्र सूत्रेणावेष्टनं तथेति। सूत्रेणावेष्टनं तथेति सुमनसः कुसुमानि
। सूत्रेणेति जातावेकवचनं यत्तु स्मृत्यन्तरं। अयस्तप्तं तु पाणिभ्यामर्कपत्रैस्तु सप्तभिः। अन्तर्हितं हरन् शुद्धस्त्वदग्धः सप्तमे पद
इति। तदश्वत्थपत्राभावेऽर्कपत्रविधायकं ज्ञेयं। अश्वत्थपत्राणां पितामहप्रशंसावचनेन मुख्यत्वावगमात्। पिप्पलाज्जायते व
ह्निः पिप्पलो वृक्षराट् स्मृतः। अतस्तस्य तु पत्राणि हस्तयोर्न्निःक्षिपेद्बुध इति। ततस्तप्तलोहपिण्डे प्राड्विवाकस्तत्राग्निमावाह्याग्नि
मभिमन्त्रयेत्। त्वमग्ने वेदा इत्यनेन मन्त्रेणेत्याह पितामहः। तापिते तु ततः पश्चादग्निमावाहयेच्छुचिः। आवाहनन्तु देवानां

त्वापूर्वविधानवित् ॥ त्वमग्ने वेदाश्चत्वारस्त्वं च यज्ञेषु हूयते । त्वं मुखं सर्वदेवानां त्वं मुखं ब्रह्मवादिनाम् ॥ जठरस्थो हि भूतानां
ततो वेत्सि शुभाशुभं । पापात्पुनासि वै यस्मात्तस्मात्पावक उच्यते । पापेषु दर्शयात्मानमर्चिष्मान्भव पावक । अथवा शुद्धभावेन
शान्तो भव हुताशन ॥ त्वमग्ने सर्वभूतानामन्तश्चरसि साक्षिवत् । त्वमेव देव जानीषे न विदुर्यानि मानवाः ॥ व्यवहाराभिशस्तोऽयं
मानुषः शुद्धिमिच्छति । तदेनं संशयादस्माद्धर्मतस्त्रातुमर्हसि इति । विष्णुस्तु । त्वमग्ने सर्वभूतानामित्यादि धर्मतस्त्रातुमर्हसि
इत्यन्तम्पितामहवचनवदेवाभिमन्त्रमाह । तदस्य मन्त्रस्य समर्चनाभिमन्त्रणसाधनत्वं न तु विकल्पनेन प्रार्थनीयार्थस्य शोध्य
व्यक्तिविशेषनिष्ठतया प्रकाशनेन भिन्नकार्यत्वात् । पितामहेन एकवाक्यतया पठनाच्च । यत्तु । तृतीयतापेतपर्यन्तं ब्रूयात्सत्यपुर
स्कृतम् । शृणिवमम्मानवं धर्मे लोकपालैरधिष्ठितं । त्वमग्ने सर्वदेवानाम्पवित्रं परमं मुखं । त्वमग्ने सर्वभूतानां हृदिस्थं वेत्सि चेष्टि
तं । सत्यान्ते च जिह्वायास्त्वत्तः समुपलभ्यते । वेदादिभिरिदम्प्रोक्तं नान्यथा कर्तुमर्हसि । अनेनादाविदम्प्रोक्तं मिथ्या चेदमसौ
वदेत् । सर्वथा च यथा मिथ्या तथाग्निं धारयाम्यहम् । स एष त्वां धारयति सत्येनानेन मानवः । सत्यवाक्यस्य चास्य त्वं शीतो भव हुता
शन । मृषावाक्यस्य चास्य त्वं दह हस्तौ च पापिन इति नारदोक्तमभिमन्त्रणं विष्णुपितामहाभ्यामुक्तेनाभिमन्त्रणेनैकार्थत्वाद्वि
कल्प्यते । तुल्यार्थास्तु विकल्पेरन्निति न्यायात् । यदा नारदोक्ताभिमन्त्रणं क्रियते तदा तदनन्तरं कर्त्तव्यमाह । स एव । अमुम
र्थं शपथस्य मभियुक्तं यथार्थतः । संश्राव्य मूर्द्धि तस्यैव अयदेयो यथाक्रियमिति । पूर्वोक्ताभिमन्त्रणमन्त्रार्थं शिरसि निहितप
त्रस्य मन्त्रार्थं संश्राव्य तत्पत्रं यथास्थानं निधाय यथायलोहपिण्डो देय इत्यर्थः । यदा तु विष्णुपितामहोक्तान्यभिमन्त्रणं क्रिय
ते तदा तस्मिन् कृते किं कर्त्तव्यमाहतुः । पितामहः । ततस्तं समुपादाय राजा धर्मपरायणः । सन्देशेन नियुक्तो वा हस्तयोस्तस्य निः
क्षिपेदिति । नियुक्तः प्राड्विवाकः सन्देशेन तं लोहपिण्डं समुपादाय गृहीत्वा तस्य शोध्यस्य हस्तयोर्निःक्षिपेदित्यर्थः । निःक्षेपणा
त्प्राक्तनपक्षद्वयेऽपि शोध्यः । अभिमन्त्रयेत् अभिमन्त्रितवन्तं अन्तस्य हस्तयोरुपरि लोहपिण्डं स्थापयेत् । तथा च याज्ञवल्क्यः ।

त्वमग्ने सर्वभूतानामन्तश्चरसि पावक। साक्षिवत्पुण्यपापेभ्यो ब्रूहि सत्यं करे मम॥ तस्मै युक्तवते लोहम्पञ्चाशत्पलिकं समम्। अ
ग्निवर्णं न्यसेत्पिण्डं हस्तयोरुभयोरपि। स्यप्तोपेपञ्चमी। पुण्यपापानि पर्यालोच्येत्यर्थः ब्रूहि दर्शय इत्युक्तवन्तः। पूर्वोक्तमन्त्रे
णाग्न्यभिमन्त्रणं कृतवतस्तस्य हस्तयोरश्वत्थपत्रादिसहितयोः सूत्रैर्वेष्टितयोरित्यर्थः। गृहीतलोहपिण्डस्य शोध्यस्य कर्त्तव्यमा
ह स एव। स तमादाय सप्तैव मण्डलानि शनैर्व्रजेदिति। अस्यार्थविवरणपुरस्सरम्विष्णुरपि। ततस्ताग्निवर्णं लोहपिण्डं
पञ्चाशत्पलिकं समन्द्धात् तं समादाय नातिद्रुतन्न च विलम्बितं मण्डलेषु पदन्यासं कुर्वन्व्रजेत्। ततः सप्तममण्डलमतीत्य भू
मौ लोहपिण्डं पातयेदिति मण्डलेषु द्वितीयादिमण्डलेषु सप्तमं मण्डलमतीत्य सप्तमं मण्डलमतिक्रम्य अष्टमं मण्डलं गत्वेति या
वत्। भूमौ शुष्काभिनवतृणपुञ्जान्वितायां नवममण्डलरूपायामित्यर्थः। वक्ष्यमाणकालिकापुराणवचनानुरोधात्। नारदो
पि। हस्ताभ्यां तं समादाय प्राड्विवाकसमीरितः। स्थित्वैकस्मिंस्ततोन्यानि व्रजेत्सप्त च विह्वलः॥ असंभ्रान्तः शनैर्गच्छेदकुब्ज
सो न लंघति। न पातयेन्नाम प्राप्य या भूमिः परिकल्पिता। न मण्डलमतिक्रामेन्न चार्वाक् स्थापयेत्पदं। मण्डलं चाष्टमं गत्वा ततो
ऽग्निं विसृजेन्नर इति। एकस्मिन्प्रथमे मण्डले। विसृजेन्नवममण्डल इति शेषः। अत एव पितामहः। त्वरमाणो न गच्छेत्तु स्थी
गच्छेच्छनैः शनैः। न मण्डलमतिक्रामेन्नान्तरा स्थापयेत्पदम्॥ अष्टमं मण्डलं गत्वा नवमे निःक्षिपेद्बुध इति। नवमे मण्ड
ले नूतनतृणसमन्विते अग्निविसर्गः कर्त्तव्यः। तथा च कालिकापुराणे। मण्डलानि तथा सप्त षोडशांगुलमानतः। तावदन्त
रतो गच्छेद्गत्वा नवतृणे क्षिपेदिति। निःक्षेपानन्तरम्परीक्षकस्य कर्त्तव्यमाह नारदः। तस्यैवमुक्तपिण्डस्य कुर्यात्करनिरी
क्षणमिति शुद्ध्यशुद्धपरिज्ञानार्थमिति शेषः। तत्राशुद्धिप्रत्यायकानि लक्षणानि स एवाह। पूर्वदृष्टेषु चिह्नेषु ततोन्य
त्रापि लक्षयेत्। मण्डलं रक्तसंकाशं यच्चान्यद्दाग्निसम्भवम्। सोविशुद्धस्तु विज्ञेयो सत्यधर्मव्यवस्थित इति। यस्य करतलयो
र्मध्ये यत्र क्वचिदग्निकारितं स्फोटाद्युपलभ्यते तमशुद्धं विजानीयादित्यर्थः। यस्य पुनर्नोपलभ्यते स शुद्धो ज्ञेयः। अत एव वि

स्तुः। योहस्तयोःक्वचिद्दग्धस्तमशुद्धं विनिर्दिशेत्। नदग्धःसर्वथायस्तु सविशुद्धो भवेन्नर इति दग्धादग्ध सन्देहेनारद
आह। यदातुनविभाव्येतेदग्धाविनिकरौतदा। व्रीहीनतिप्रयत्नेनसप्तवारांस्तु मर्दयेत्। मर्दितेर्यदिनोदग्धःसम्यैरेवंविनि
श्चितः। शोध्यःशुद्धःससंस्कृत्यदग्धोदण्ड्योयथाक्रममिति। नविभाव्येतेननिश्चीयेते। व्रीहियवयोर्मर्दनेविकल्पमाहपि
तामहः। ततस्तद्धस्तयोःप्रास्येद्व्रीहीन्वायदिवायवान्। निर्विशंकेननेयान्तुहस्ताभ्यां मर्दनेकृते। निर्विकारेदिनस्यान्तेशु
द्धिन्तस्यविनिर्दिशेदिति। प्रास्येत्प्रक्षिपेत्। निर्विकारेदिनस्यान्तेशुद्धिन्तस्यविनिर्दिशेत्। निर्विकारेकरतलद्वयेस्थि
तेसायंकालेशोध्यस्यशुद्धिंनिर्दिशेदित्यर्थः। केचिन्निर्विकारौयदाहस्ताइतिपठन्तितन्मतेमर्दनानन्तरमेवशुद्धिरवधारणी
या। सायंकाललक्षणकालबोधकवचनाभावात्। ननुदिनस्यान्तइतिपाठेमुक्त्वाग्निंमृदितव्रीहिरित्यादियाज्ञवल्क्यवचनेन
विरोधः। तत्रानन्तर्यवाचिक्त्वाप्रत्ययस्यमुक्त्वेतिप्रयोगेनहस्तव्रीहिमर्दनयोःकरयोर्विकारस्यादर्शनेतप्तलोहपिंडन्यासानन्तर
मेवशुद्धेरवधारणीयत्वोक्तेरितिचेन्न। समानकर्तृकयोःपूर्वकालइतिपाणिनीयवचनेनक्त्वाप्रत्ययस्यपूर्वकालवाचित्वावधारणा
त्। हरियोजनयागस्यसंस्रावस्तुग्विमोकाभ्यांव्यवधानेनपरिधिप्रहरणानंतर्याभावेपिवेदेप्रहृत्यपरिधीन्जुहोतीतिक्त्वा
प्रत्ययदर्शनात्। लोकेपिस्त्वपवेशनक्रियांतरव्यवधानेनगमनस्यभोजनानन्तर्याभावेपिभुक्त्वाव्रजतीतिक्त्वादर्शनाद्धातीनान्तर्य
वाचकत्वंक्त्वाप्रत्ययस्य। किञ्चक्त्वाप्रत्ययस्यानन्तर्यवचनत्वेबृहस्पतिसवाधिकरणविरोधःस्यात्। तत्रापिक्त्वाप्रत्ययस्यपूर्वकाल
वचनत्वाभिधानात्। तथाहि। वाजपेयेनेष्ट्वाबृहस्पतिःसवेनयजेतेतिश्रूयते। तत्रसंशयः। सकिंवाजपेयेशरदिवाजपेयेन
यजतेत्यनेनविहितोयःशरत्कालस्तस्मिन्कर्तव्यः। आहोस्विदन्यकालेवसन्तेकर्तव्यः। तत्रबृहस्पतिवचनस्यागमत्वंतावत्पूर्वमु
क्तं। तथांगंअङ्गिकालेअङ्गिनासहप्रयोगव्यंइतरेषामङ्गानामङ्गिकालेऽनुष्ठीयमानत्वादितिपूर्वःपक्षः। सिद्धान्तस्तुपूर्वकालवा
चिक्त्वाप्रत्ययेनसांगेवाजपेयेनिर्वृत्तेसतिपश्चात्कर्मान्तरत्वेनबृहस्पतिसवस्यविहितत्वात्। यद्यंगिनासहैकप्रयोगःस्यात्। तदा

क्त्वाप्रत्ययप्रापितः पूर्वोत्तरकालविभागो बाध्येत न ह्यङ्गिना सह प्रयोक्तव्यानामङ्गानां वाजपेये निवृत्ते पश्चात् विधानं श्रुतं । ततः प्रयोगे वश्यंभाविनि सति स्वस्वचोदकप्रापितकाले तदनुष्ठानं युक्तं । बृहस्पतिसवस्य ज्योतिष्टोमविकारत्वाद्वसन्तकालश्चोदकप्राप्तः वाजपेयेन सह प्रयोगैक्ये शरदि वाजपेयस्य विहितत्वाद्बृहस्पतिसवो ऽपि शरदि प्रसज्येत । तथा च वाजपेये वृत्ते कर्तव्यो बृहस्पतिसवस्तदनन्तरङ्कालातिक्रमकारणस्यातिदेशकृतस्य वसन्तकाललक्षणाङ्गोपसंहारस्य सत्त्वात्तदुत्तरवसन्तकाले कर्तव्यः । क्त्वा पूर्वकालतायां स्मर्यते नानन्तर्यं ननु सर्वे ह्यामी पूर्वे प्रधानाः पूर्वे ऽनुष्ठेयतव्यं रहतु पूर्वकालीनेन साङ्गप्रधानानुष्ठानेन फलापूर्वस्य निष्पन्नत्वादुत्तरकालीनमङ्गं निरर्थकमेव स्यादिति चेन्न । तस्यैवापूर्वस्यामेनातिनप्राबल्यदशायाः कल्पनीयत्वात् । तस्मात्त्वाङ्गिनः काले ऽनुष्ठानं किंतु स्वकाल एवेति स्थितं । तदनेन विरोधवारणाय पूर्वकालत्वमेवार्थः । तथा च न को ऽपि विरोध इति सर्वं च सुस्थं । केषुचिन्निमित्तेषु पुनरग्निधारणं कर्तव्यं । तथा च याज्ञवल्क्यः । अन्तरा पतिते पिण्डे सन्देहे वा पुनर्हरेदिति । यदा गच्छतोन्तराष्टमण्डलाद्वाक् पिण्डः पतति दग्धादग्धत्वे वा सन्देहस्तदा पुनर्हरेदित्यर्थः । इदन्तु यदि हस्तयोर्न दाहस्तदा वेदितव्यं । दाहे त्वशुद्धिरेव तथा च नारदः । यस्त्वन्तरा वा पतति दग्धस्तु तद्विभाव्यते । पुनस्संहारयेदग्निं स्थितिरेषा दृढीकृतेति । हस्तयोरन्यत्र दग्धविभावने ऽपि पुनर्धारणं कार्यमित्याह । कात्यायनः । प्रस्खलत्यभियुक्तश्चेत् स्थानादन्यत्र दह्यते । न तं दग्धं विदुर्देवास्तस्य भूयो ऽपि दापयेदिति । भूयो ऽपि पुनरपीत्यर्थः । इत्यग्निविधिः ॥ ● ॥ अथ जलविधिस्तत्र पितामहः । तोयस्यातः प्रवक्ष्यामि विधिं धर्म्यं सनातनं । मण्डलं धूपदीपाभ्यां कारयेत्तु विचक्षणः ॥ शरान् संपूजयेद्वा क्वा वैणवं च धनुस्तथा । मङ्गलैः पुष्पधूपैश्च ततः कर्म समाचरेदिति । धूपदीपाभ्यां शरान् संपूजयेदित्यन्वयः । जलसमीपे संस्कृतायां भुवि मण्डलं कृत्वा तत्र शरादिकं संपूज्य प्रयोगारम्भः कार्य इत्यर्थः । धनुषः प्रमाणमाह नारदः । क्रूरं धनुः सप्तशतं मध्यमं षट्शतं स्मृतं । मन्दं पञ्चशतं ज्ञेयमेष ज्ञेयो धनुर्विधिरिति ॥ सप्तशतं सप्ताधिकशतांगुलं । एवं षट्शतं पञ्चशतं च । लक्ष्यस्थानं चास एवाह । मध्यमेन तु चापे

Digitized by Google

नप्रक्षिपेच्छरत्रयं। हस्तानान्तु शतेसार्द्धे लक्ष्यंकृत्वाविचक्षणः॥ न्यूनाधिकेतु दोषःस्यात्क्षिपतःसायकांस्त्रयेति। शरस्थानाय
सायावैणावाश्चकर्त्तव्याइत्याहकात्यायनः। शरांस्थानायसायांस्तु प्रकुर्वीतविशुद्धये। वेणुकाण्डमयांश्चैवक्षेप्तातुसुदृढंक्षिपे
दिति॥ क्षेप्ताचक्षत्रियस्तद्वृत्तिर्ब्राह्मणोवाकार्यइत्याह। पितामहः। क्षेप्ताचक्षत्रियःकार्यस्तद्वृत्तिर्ब्राह्मणोथवा। अक्रूरहृद
यःशान्तःसोपवासस्तथाशुचिरिति। शोध्यकर्णप्रमाणोच्छ्रितंतोरणमण्डलंसमीपेकार्यमित्याहनारदः। गत्वातुतज्जलस्था
नन्तटेतोरणमुच्छ्रितं॥ कुर्वीतकर्णमात्रंतुभूमिभागेसमेशुचाविति॥ उपादेयानुपादेयजलेविविनक्तिपितामहः। स्थिरतोयेनि
मज्जेत्तुनग्राहिणिनचाल्पके। तृणशैवालरहितेजलौकामत्स्यवर्जिते॥ देवखातेषुयत्तोयंतस्मिन्कुर्याद्विशोधनं॥ आहा
र्यंवर्जयेन्नित्यंशीघ्रगासुनदीषुच॥ आविशेदमलेनित्यमूर्मिपङ्कविवर्जिते। याहिंस्रयाहास्यजलजन्तुयुक्ते। आहार्येणत्वा
दितआहृत्यमहतिकटाहादौआहृत्यस्थापितं। नारदः॥ नदीषुनातिवेगासुतडागेषुसरःसुच। ह्रदेषुस्थिरतोयेषुकुर्या
त्पुंसांनिमज्जनमिति॥ नातिवेगासुअतिगासुअवस्थित्ययोग्यासु। विष्णुः पङ्कशैवालदुष्टग्राहमत्स्यजलौकादिविवर्जितेम्भ
सीइति। तत्रउदकेप्राड्विवाकोवरुणंपूजयेदित्याह। सएव। गन्धमाल्यैःसुरभिभिर्मधुक्षीरघृतादिभिः। वरुणायप्रकु
र्वीतपूजामादौसमाहितइति॥ ततोदृढकायःकश्चित्पुरुषोनाभिमात्रजलेस्थापनीयइत्यपिसएवाह। ब्राह्मणःक्षत्रियोवै
श्योरागद्वेषविवर्जितः। नाभिमात्रेजलेस्थाप्यःपुरुषःस्थाणुवद्दृढी। तस्योरूप्रतिसंगृह्यनिमज्जेदभिशापवानिति। पितामहो
पि। स्थापयेत्प्रथमन्तोयेस्तम्भवत्पुरुषंनृपः। आगतम्प्राङ्मुखंकृत्वातोयमध्येतुकारिणमिति॥ स्तंभवत्पुरुषंस्तम्भसमन्वितंपूरु
षंकारिणंदिव्यकारिणंशोध्यमितियावत्। अनेनपुरुषेणयष्टिर्यज्ञियवृक्षजातान्धर्मस्थूणामवष्टभ्यस्थातव्यंतथाचस्मृतिः। उद
केप्राङ्मुखस्तिष्ठेद्धर्मस्थूणांप्रगृह्यचेति। ततःप्राड्विवाकोधर्मावाहनादिहोमान्तंकृत्वाशोध्यशिरसिचपत्रारोपणंविधायजला
भिमन्त्रणंकुर्यात्। तथाचपितामहः। ततस्त्वावाहयेद्देवान्सर्वांश्चानुमन्त्रयेदिति। देवतावाहनम्पूर्वोक्तस्थलदिव्यसा

Digitized by Google

धारणस्य प्रतिज्ञापत्रबन्धनान्तस्य कर्मजातस्योपलक्षणं । सलिलयहणं सलिलदेवताभूतस्य वरुणस्याप्युपलक्षणम् । अत्राभिम न्त्रणमन्त्रं विज्ञराह । त्वमम्भः सर्वभूतानामन्तश्चरसि साक्षिवत् । त्वमेवाम्भो विजानीषे न विदुर्यानि मानवाः ॥ व्यवहाराभिशस्तो ऽयं मानुषस्त्वयि मज्जति । तदेनं संशयादस्माद्धर्मतस्त्रातुमर्हसीति । पितामहोऽपि । तोयत्वम्प्राणिनाम्प्राणाः सृष्टेराद्यन्तु नि र्मितम् । शुद्धेस्त्वं कारणम्प्रोक्तं द्रव्याणां देहिनान्तथा । अतस्त्वं दर्शयात्मानं शुभाशुभपरीक्षणे इति । अनयोर्मन्त्रयोर्विकल्प स्तुल्यार्थत्वात् । वरुणाभिमन्त्रणमन्त्रः शङ्खलिखिताभ्यां दर्शितः । सदसत्त्वमेव वरुणाउभयोः प्रतिष्ठितस्त्वयि सत्यं विदन्देव वरुणात्वमेवतद्ब्रूहि वरेण्यतदादिशस्त्वेति । नारदोऽपि । सत्यानृतविभागस्य तोयाग्निस्पष्टकारमौ । अन्नाद्याद्यग्निरभूद्यस्माताम्मा नोऽये विशेषतः । क्रियते धर्मतत्त्वज्ञैर्दूषितानाम्विशोधनं । तस्मात्सत्येन भगवन्जलेशत्रातुमर्हसीति । अनयोरपि विकल्पः । ततः प्राड्विवाकेऽभिमन्त्रिते जले शोध्यम्प्रवेशयेदित्याह कालिकापुराणे व्यासः । त्राह्यनन्तरमात्त्वं च यस्मादेवाभिशापनः ॥ मु ञ्चस्वेति कारुण्याद भिमंत्र्य जले क्षिपेदिति । त्राह्यनमित्यादिनाऽनिकारुण्यादित्यन्तेन मन्त्रेणाभिमन्त्र्य जले पुरुषं प्रवेश येदित्यर्थः । अयञ्चमन्त्रः पूर्वोक्तेन जलाभिमन्त्रणावैकल्पिकः ॥ शोध्योऽपि कृताभिमन्त्रणो जलम्प्रविशेत् । तथा च याज्ञवल्क्यः । सत्येन माभिरक्ष त्वं वरुणेत्यभिशाप्य कम् । नाभिदघ्नोदकस्थस्य गृहीत्वोरू जलं विशेदिति ॥ हे वरुण मां त्वं सत्येनाभिरक्षे त्यनेन मन्त्रेण कमुदकं अभिशाप्य अभिमन्त्र्य नाभिदघ्नोदकस्थस्य नाभिप्रमाणोदकस्थितस्य पुरुषस्योरू गृहीत्वा शोध्यो जलं विशेत् । जलेनिमज्जेदित्यर्थः । ततः पूर्वोक्तेलक्ष्यस्थाने शरत्रयं प्रक्षिपेदित्याह । बृहस्पतिः ॥ अप्सु प्रवेशपुरुषं प्रेषयेत्साय कं त्रयमिति कालविशेषे देशविशेषे च शरप्रक्षेपनिषेधमाह स एव ॥ इषून्न निःक्षिपेद्विद्वान्मारुते वाति वै भृशं । विषमे भूप्रदे शे च वृक्षस्थाणुसमाकुले । तृणगुल्मलतावल्लीपङ्कपाषाणसंयुत इति । तदनन्तरकृत्यमाह याज्ञवल्क्यः ॥ समकालमिषुम्मु क्तमानीयान्यो जवीनरः ॥ गते तस्मिन्निमग्नाङ्गम्पश्येच्चेच्छुद्धिमाप्नुयात् । इति त्रयमर्थः । निषुशरेषु मुक्तेषु एको वेगवान्

मध्यमशरपातस्थानङ्गत्वातमादायतत्रैवतिष्ठतिअन्यस्तुपुरुषोवेगवान्शरमोक्षस्थानेतोरणमूलेतिष्ठति । एवंस्थितायां
न्तृतीयस्यांकरतालिकायांशोध्यःनाभिप्रमाणोदकस्थितस्यपुरुषस्योरुगृहीत्वानिमज्जति । तत्समकालमेवतोरणमूलस्थितोपि
द्रुततरंमध्यमशरपातस्थानङ्गच्छतिशरग्राहीचतस्मिन्प्राप्तेद्रुततरन्तोरणमूलम्प्राप्यान्तर्जलगतंशोध्यंयदिनपश्यति
तदाशुद्धोभवतीतितथाचकात्यायनः । क्षिप्तेषुमज्जनञ्चार्थेगमनंसमकालिकमिति । एतदेवस्पष्टीकृतम्पितामहेन । श
रान्तुक्षेपिकर्तुश्चसमङ्गमनमज्जनम् ॥ गच्छेत्तोरणमूलान्तुलक्ष्यस्थानञ्जवीनरः ॥ तस्मिन्गतेद्वितीयेनुवेगमादायसा
यकम् ॥ गच्छेत्तोरणमूलन्तुयतःसपुरुषोगतः । आगतस्तुशरग्राहीनपश्यतियदाजलम् । अन्तर्जलगतंसम्यक्तंदाशु
द्धिंविनिर्दिशेत्इति ॥ नारदोपि ॥ शरप्रक्षेपणस्थानाद्युवाजवसमन्वितः । गच्छेत्परमयाशक्त्यायत्रासौमध्यमःशरः
। मध्यमंशरमादायपुरुषोन्यस्तथाविधः ॥ प्रत्यागच्छेत्तुवेगेनयतःसपुरुषोगतः । अयंपितामहवद्देवकचित्पितामहवा
क्यमपिशरप्रक्षेपणादिनारदवदेववदन्ति । विष्णुमुक्तेषुमध्यमःशरोग्राह्यः । तथाचस्मृतिः । तेषान्तुप्रेषितानान्तुशराणांशा
स्त्रचोदनात् । मध्यमस्तुशरोग्राह्यःपुरुषेणबलीयसेति । तत्रापिपतनस्थानादानेतव्योनसर्पणस्थानात् । तथाचपितामहः
॥ शरस्यपतनंग्राह्यंसर्पणन्तुविवर्जयेत् । सर्पन्सर्पन्शरोयायाद्दूराद्दूरतरंयतइति । स्थानान्तरगमनेचाशुद्धिःतथाचनार
दपितामहौ । अन्यथानविशुद्धःस्यादेकाङ्गस्यादर्शनात् । स्थानाद्वान्यत्रगमनायस्मिन्पूर्वंनिवेशितइति । एकाङ्गस्यापिद
र्शनादितिकर्णाद्यभिप्रायेण । तथाचकात्यायनः । शिरोमात्रन्तुदृश्येतनकर्णौनापिनासिका । अप्सुप्रवेशनेयस्यशुद्धन्तमपि
निर्दिशेत्इति ॥ इत्युदकविधिः ॥७॥ अथविषविधिः ॥ तत्रनारदः । अतःपरम्प्रवक्ष्यामिविषस्यविधिमुत्तमम् । यस्मिन्का
लेयथादेयंयादृशम्परिकीर्तितम् । यावन्मात्रंसमुद्दिष्टन्धर्मतत्त्वानुवेदिभिः । तोलयित्वेप्सितञ्चालेदेयमेतद्धिमागमे ॥ ना
पराह्णेनमध्याह्नेसंध्यायाञ्चविवर्जयेत् । शार्ङ्गंहैमवतंशस्तंगन्धवर्णरसान्वितम् । अकृत्रिममसंमूढममन्त्रोपहतञ्चयत् ।

षर्षैश्चतुर्थंवामात्रायीष्मेपञ्चयवास्मृता॥ हेमन्तेसासप्तयवाशरद्युल्पाततोपिहीति। हिमागमेहेमन्तशिशिरयोःशार्ङ्गंशृङ्गोद्भ
वं। हैमवतंहिमालयोद्भवम्। हेमन्तइतिहेमन्तशिशिरयोर्ग्रहणम्। हेमन्तशिशिरयोःसमासेनेतिश्रुतेः। वसन्तस्यसर्व
साधारणत्वात्। तत्रापिसप्तयवाशरदितितोप्यल्पावहृयवेत्यर्थः॥ वत्सनाभेपियाह्यइत्याहपितामहः॥ यवाःसप्तप्रदा
तव्याःशुचिहेतोर्नसंशयः। शृङ्गिणोवत्सनाभस्यहिमजस्यविषस्यचेति॥ यवाःसप्तेतिशीतलकालविषयंरात्रौतुपश्चिमेभागे
विषन्देयंसुशीतलमितिपूर्वोदाहृतवचनात्। वर्ज्यविषमाहपितामहः॥ चारितानिचजीर्णानिकृत्रिमाणितथैवच॥ भूमि
जानिचसर्वाणिविषाणिपरिवर्जयेत्इति। नारदोपि। भृष्टञ्चारितञ्चैवधूपितंमिश्रितन्तथा। कालकूटमलाबुञ्चविषंयत्ने
नवर्जयेत्इति। वत्सनाभस्वरूपमाहकात्यायनः॥ वत्सनाभनिभम्पीतंवर्णहानेननिश्चितम्। शुक्तिशृङ्गाकृतिभङ्गेविद्यात्मद्व
त्सनाभकम्॥ मकक्षीरसमायुक्तंस्वच्छंकुर्वीततत्क्षणात्। वाह्यमेवंसमाख्यातंलक्षणन्धर्मसाधकैरिति॥ शार्ङ्गस्वरूपमाहसए
व। अजाशृङ्गनिभंश्यामंसुपीतंशृङ्गसम्भवम्॥ भृङ्गेचशृङ्गवेराभंख्याततत्त्वछार्ङ्गिणांविषम्॥ रक्तस्यमसितंकुर्यात्कठिनञ्चैव
तत्क्षणात्। अनेनविधिनाज्ञेयंविषन्दिव्यविशारदैरिति। शृङ्गवेराभंआर्द्रकतुल्यम्। भङ्गेआर्द्रकतुल्यंसुपीतमित्यन्वयः। शा
र्ङ्गिणांशृङ्गिणांसम्बन्धि। इणान्यनपत्यइतिप्रकृतिवद्भावान्नटिलोपः। यद्रक्तस्यतल्लक्षणाद्रक्तमसितंकुर्यादितिसम्बन्धः।
विषञ्चघृतप्लुतन्देयमित्याहनारदः। विषस्यपलषड्भागाद्भागोविंशतिमस्तुयः। तमष्टभागहीनन्तुशोध्येदद्यात्घृतप्लुत
मिति॥ पलञ्चात्रचतुःसुवर्णिकन्तस्यषष्ठोभागोदशमाषादशयवाश्चभवन्ति। त्रियवन्त्वेकक्षत्ञ्जलम्। पञ्चकृष्णलको
माषइत्येकोमाषः। पञ्चदशयवाभवन्ति। पञ्चदशानांमाषाणांयवाःसार्द्धशतम्भवन्ति। पूर्वैचदशयवाइतिषष्ठ्याधिक
शतंयवाःपलस्यषष्ठोभागस्तस्माद्विंशतितमोभागोष्टौयवाःतस्याष्टमभागहीनःएकयवहीनःतंविंशतितमम्भागंसप्तयवंघृ
तप्लुतन्दद्यादित्यर्थः। घृतञ्चविषात्त्रिंशद्गुणंयाह्यमित्यप्याहनारदः। पूर्वाह्णेशीतलेदेशेविषन्देयन्तुदेहिनाम्। घृतेनयो

जितं श्लक्ष्णां पिष्टं त्रिंशद्गुणान्वितम् ॥ कात्यायनोपि । पूर्वाह्णे शीतले देशे विषन्देयन्तु देहिनाम् ॥ विषेणायोजितं श्लक्ष्णम्पिष्टं त्रिंशद्गुणान्वितमिति । एतच्च विषं सोपवासेन प्राड्विवाकेन पूर्वोक्तदिव्यदेशकाले देवद्विजसन्निधौ शिवपूजां कृत्वा तत्पुरतो विषं स्थापयित्वा धर्मावाहनादि शोध्यशिरसि प्रतिज्ञापत्रन्निधाय विषमभिमंत्र्य दक्षिणाभिमुखाय उदङ्मुखेन प्राङ्मुखेन वा देयमित्याह नारदः । दद्याद्विषं सोपवासो देवब्राह्मणसन्निधौ । धूपोपहारमन्त्रैश्च पूजयित्वा महेश्वरम् ॥ द्विजानां सन्निधावेव दक्षिणाभिमुखे स्थिते ॥ उदङ्मुखः प्राङ्मुखो वा दद्याद्विप्रः समाहित इति । अभिमन्त्रणमन्त्रमाह विष्णुः । विषत्वाद्विषमत्वाच्च क्रूरत्वात्सर्वदेहिनाम् । त्वमेव विष जानीषे न विदुर्यानि मानवाः । व्यवहाराभिशस्तोयं मानुषः शुद्धिमिच्छति ॥ तदेनं संशयात्तस्माद्धर्मतस्त्रातुमर्हसीति । नारदोपि । विषत्वं ब्रह्मणः पुत्रः सत्यधर्मे व्यवस्थितः । शोधयैनं नरम्पापात्सत्येनास्यामृतम्भवेति । अनयोरेकार्थाद्विकल्पः । शोध्यस्याभिमन्त्रणमन्त्रमाह याज्ञवल्क्यः । विषत्वं ब्रह्मणः पुत्रः सत्यधर्मे व्यवस्थितः । त्रायस्वास्मादभीशापात्सत्येन भव मेऽमृतम् । इति पितामहोपि । दीयमाने करे कृत्वा विषन्तु परिभापयेत् । विषत्वं ब्रह्मणा सृष्टम्परीक्षार्थं दुरात्मनाम् । पापेषु दर्शयात्मानं शुद्धानाममृतम्भव ॥ अनयोरपि विकल्पः । अभिमन्त्रणानन्तरकर्तव्यमाह याज्ञवल्क्यः । एवमुक्त्वा विषं शार्ङ्गं भक्षयेद्धिमशैलजमिति ॥ शुद्धिप्रकारमाह बृहस्पतिः । विधिदत्तं विषं येन जीर्णमव्यौषधैर्विना । सशुद्धः स्यादन्यथा तु दण्ड्यो दाप्यश्च तद्धनमिति ॥ याज्ञवल्क्योपि ॥ यस्य वेगैर्विना जीर्येच्छुद्धिं तस्य विनिर्दिशेत् इति ॥ वेगो नाम धातोः धात्वंतरप्राप्तिः । धातोर्द्धात्वंतरप्राप्तिर्विषवेग इति स्मृत इति वचनात् । धातवश्च त्वगादयः सप्त त्वगसृङ्मांसमेदोऽस्थिमज्जाशुक्राणि धातव इति वचनात् । विषवेगाश्च सप्त तेषां लक्षणानि विषतन्त्रे दर्शितानि । वेगो रोमाञ्चमाद्यो रचयति विषजः स्वेदवक्त्रोपशोषौ तस्योर्द्धं तत्परौ द्वौ वपुषि जनयतो वर्णभेदप्रवेपौ । यो वेगः पञ्चमोसौ नयति विवशतां कण्ठभंगं च हिक्कां । षष्ठो निश्वासमोहौ वितरति च मृतिं सप्तमो भक्षकस्येति । शोध्यश्च कुक्कुटकादिभ्यो रक्षणीयः । अत एव पितामहः । त्रिरात्रं पञ्चरात्रं वा पू

ख्यैःस्वैरधिष्ठितं । कुहकादिभयाद्राजाधारयेत्कुहकारिणं ॥ श्रोषधीमन्त्रयोगांश्च मणीनथविषापहान् । कर्तुःशरीरसंस्थां
श्च गूढोत्पन्नान्परीक्षयेदिति । दिनान्तपर्यन्तंविषवेगराहित्येशुद्धिरवधारणीयेत्याहविष्णुः । विषवेगक्रमातीतंसुखेनयदि
जीर्यते । विशुद्धमितितंज्ञात्वादिवसान्तेविसर्जयेत् ॥ पितामहोपि । भक्षितेयदिसःसुस्थोमूर्च्छाछर्दिविवर्जितः ॥ निर्विका
रोदिनस्यान्तेशुद्धंतमपिनिर्दिशेदिति । नारदोपि ॥ छायानिवेशितोरक्ष्योदिनशेषमभोजनं । विषवेगक्रमातीतःशुद्धोसौ
मनुरब्रवीदिति । मिताक्षरायांतुपञ्चनालशतंकालंनिर्विकारोयदाभवेत् । तदाभवतिसःशुद्धस्ततःकुर्याच्चिकित्सितमितिनार
दवाक्यंपठित्वाविषेपीतेयावत्करतालिकाशतपञ्चकंक्रियतेतावत्कालंनिर्विकारश्चेच्छुद्धःअनन्तरंतु चिकित्सनीयः । यानितु
दिनान्तावधिबोधकानिपितामहादिवचनानितान्यल्पमात्रविषयाणीत्युक्तम् । इतिविषविधिः ॥०॥ अथकोशविधिः । तत्रनार
दः । अतःपरंप्रवक्ष्यामिकोशस्यविधिमुत्तमम् । शास्त्रविद्भिर्यथाप्रोक्तंसर्वकालाविरोधिनम् ॥ पूर्वाह्णेसोपवासस्यस्नातस्यार्द्रप
टस्यच ॥ सशूकस्याव्यसनिनःकोशपानंविधीयते । इच्छतःश्रद्दधानस्यदेवब्राह्मणसन्निधाविति । सशूकस्यभ्रष्टत्वेनदिव्यक
रणेऽनिष्टशङ्कायुक्तस्यकोशपानम् । उग्रदेवतास्नानोदकपानंदेवतास्नानोदकञ्चप्रसृतित्रयंग्राह्यमित्याहविष्णुः ॥ उग्रान्दे
वान्समभ्यर्च्यतत्स्नानोदकात्प्रसृतित्रयम्पिबेदिदम्मयानकृतमितिव्याहरन्देवताभिमुखइति । याज्ञवल्क्योपि । देवानुग्रान्सम
भ्यर्च्यतत्स्नानोदकमाहरेत् । संश्राव्यपाययेत्तस्माज्जलात्तुप्रसृतित्रयमिति । उग्रान्देवान्दुर्गादित्यादीन् । तेषामन्यतमंदेवम्प्रा
ड्विवाकःसोपवासोगन्धपुष्पादिभिःसम्पूज्यस्नापयित्वातत्स्नानोदकन्दिव्यदेशन्नयेदित्यर्थः । नीत्वाचतत्रनिधायधर्मावाहनादि
शोध्यशिरसिपत्रारोपणान्तंसर्वंदिव्यसाधारणविधिम्विधायदेवतायतनसमीपेमण्डलंचविधायतत्रशोध्यंप्राङ्मुखंस्थापयित्वात
मभ्यनैतद्दिव्यकरणेऽनिष्टंसंश्राव्यजलविधावुक्तेनतोयत्वंप्राणिनाम्प्राणइत्यादिनामन्त्रेणाभिमन्त्र्यपूर्वंनिहितोदकात्प्रसृति
त्रयम्पाययेत् । शोध्यश्चजलविधावेवोक्तेनसत्यान्तविभागस्त्वेत्यादिनामन्त्रेणाभिमन्त्र्यपिबेत् । तथाचनारदः । तमाहूयाभि

शस्त्रंतुमण्डलाभ्यंतरेस्थितम्। आदित्याभिमुखंकृत्वापाययेत्प्रसृतित्रयमिति। पितामहोपि। प्राङ्मुखंकारिणंकृत्वापाययेत्प्र
सृतित्रयं। पूर्वोक्तेनविधानेनस्नानमात्रंचरंशुचिमिति॥ कारिणंदिव्यकारिणंशोध्यमितियावत्। पूर्वोक्तेनसकलदिव्यसा
धारणतयाप्रागुक्तेनेत्यर्थः। नारदोपि। अर्चयित्वातुतंदेवम्प्रक्षाल्यसलिलेनतु। एनमश्रावयित्वातुपाययेत्प्रसृतित्रयमिति
। एनःपायम्। तच्चतत्प्रलापाभिधानमुखेनतेनैवदर्शितः। स्वेच्छयायःपिबेत्कोशन्नकचिद्दूषितोनरः। नसंवदेन्नरोलोभाच्छ्रत्री
भवतिदुर्मतिः। जानानःकामकारेणकोशम्पीत्वाविसंवदेत्। दरिद्रोव्याधितोमूर्खःसप्तजन्मनिजायतइति। सशिरस्कोभियो
गेऽभियोक्तुःआत्मनिष्टमप्याहसएव। बलात्कोशंहियोदत्वाहितमिच्छेतचात्मनः। सविनाशीभवेत्तस्यतच्चकार्यंनसिद्ध्यतीति
। एवंयस्यकस्यचिदुग्रदेवस्यस्नानोदकमाहृत्यकोशानुष्ठानेप्राप्तेनियमार्थमाहपितामहः। भक्तोयोयस्यदेवस्यपाययेत्तस्यत
ज्जलमिति। समभावेतुदेवानामादित्यस्यतुपाययेत्। दुर्गायाःपाययेच्चौरान्येचशस्त्रोपजीविनः। भास्करस्यतुयत्तोयंब्राह्म
णंतत्रपाययेदिति। उग्रदेवतायुधानिस्नापयित्वातदुदकंस्वल्पेपराधेपाययेत्। तथाचकात्यायनः। स्वल्पेपराधेदेवानाम्पा
ययित्वायुधोदकं। पाय्योविकारेचाप्युक्तोनियम्यश्चिरन्त्यर्थेति। पाय्यःपाययितव्यः। नियम्योदण्ड्यः। आयुधग्रहणंताम्रा
दिनिर्मितादित्यमण्डलस्याप्युपलक्षणम्। अतएवबृहस्पतिः। यद्भक्तःसोभियुक्तःस्यात्तद्देवायुधमण्डलम्। प्रक्षाल्यपाययेत्त
स्माज्जलात्तुप्रसृतित्रयमिति। अत्रविशेषमाहपितामहः॥ दुर्गायाःपाययेच्छूलमादित्यस्यतुमण्डलम्। अन्येषामपिदेवानां
स्नापयेदायुधानित्विति। कृतकोशपानस्यकिंतत्कालमेवशुद्धिर्नेत्याहकात्यायनः। अथदैवविसंवादात्त्रिसप्ताहन्तुदापयेत्
। अभियुक्तंप्रयत्नेनतमर्थन्दण्डमेवचेति। दैवविसंवादःदैविकव्याध्युद्भवः। दैविकंव्याध्यादयोपिसएवदर्शयति। ज्वरातिसा
रविस्फोटाःशूलास्थिपरिपीडनम्॥ नेत्ररुग्भालरोगश्चतथोन्मादःप्रजायते। शिरोरुग्भुजभङ्गश्चदैविकाव्याधयोनृणामिति
शुद्धिकालावधिंविष्णुराह। यस्यपश्येद्द्विसप्ताहात्त्रिसप्ताहादथापिवा। रोगोग्निर्ज्ञातिमरणंराजदण्डमथापिवा॥ तमशु

द्धं विजानीयात्तथाशुद्धं विपर्ययेण । द्वितीयेचशुद्धं पुरुषं सत्कुर्य्याद्धार्मिको नृपइति । पितामहोऽपि । त्रिरात्रात्सप्तरात्राद्वा द्विस
प्ताहादथापिवा । वैकृतं यस्य दृश्येत पापकृत्स तु मानवः ॥ तस्यैकस्य न सर्वस्य जनस्य यदि तद्भवेत् । रोगोग्निर्ज्ञातिमरणं सैव तस्य वि
भावनेति ॥ तद्रोगादि वैकृतं कृतकोशपानस्यैकस्य यदि भवेत्तदैव स पापकृदिति न किन्तु तदीय सर्वस्य जनस्य मध्येपि यदि क
स्यचिद्भवेत्तदापीत्यर्थः । अत एव बृहस्पतिः । सप्ताहाद्वा द्विसप्ताहाद्यस्यार्त्तिर्न प्रजायते । पुत्रदारधनानाञ्च स शुद्धः स्यान्न
संशयइति । याज्ञवल्क्योऽपि । अर्वाक्चतुर्दशादह्नो यस्य नो राजदैविकम् । व्यसनञ्जायते घोरं स शुद्धः स्यान्नसंशयइति । एतेषा
ञ्च त्रिरात्रादीनाम्पक्षाणां अभियोगाल्पत्वमहत्त्वाभ्यां व्यवस्था ज्ञातव्या अवधेरूर्द्धं तु रोगाद्युद्भवेपि न पराजयः । तथाच नारदः ।
ऊर्द्धं यस्य द्विसप्ताहाद्वैकृतन्तु महद्भवेत् । नाभियोज्यस्तु विदुषा कृतकालव्यतिक्रमादिति । अत्र द्विसप्ताह इत्यवधिकालमा
त्रोपलक्षणम् । कृतकालव्यतिक्रमहेतोरभिधानात् । तेनैकविंशतिरात्रस्यावधिकालत्वात्त्र्यहस्य चतुर्दशरात्रादूर्द्धमपि वैकृते तस्य
नैव पराजयः एवं त्रिरात्रसप्तरात्रात्प्रागपि वैकृतोत्पत्तौ न पराजयइति सिद्धम् । इति कोशविधिः ॥●॥ अथ तण्डुलविधिः । तत्र पि
तामहः । तण्डुलानाम्प्रवक्ष्यामि विधिम्भक्षणचोदितं । चौर्ये तु तण्डुला देया नान्यत्रेति विनिश्चयइति । चौर्यग्रहणमर्थविवादप्र
दर्शनार्थं । तदर्द्धार्द्धस्य तण्डुलाइति धनविवादे कात्यायनेनोक्तत्वात् । पूर्वद्युर्यत्कर्त्तव्यं तत्स एवाह । तण्डुलान्कारयेच्छुक्लान्
शालेर्नान्यस्य कस्यचित् । मृन्मये भाजने कृत्वा आदित्यस्याग्रतः शुचिः ॥ स्नानोदकेन सम्मिश्रान्रात्रौ तत्रैव वासयेत् । आवाहनादि
पूर्वन्तु कृत्वा रात्रौ विधानतइति ॥ शुचिः प्राड्विवाकः सूर्यस्याने धर्मावाहनादि होमान्तं सर्वं दिव्यसाधारणविधिं कृत्वा आदित्यस्ना
नोदकेन शुक्लान् शालितण्डुलानाप्लाव्य सर्वावेक्षणात्तथैव प्रातःकालपर्य्यन्तं स्थापयेदित्यर्थः । स्नानोदकं देवतायाइत्याह । का
त्यायनः ॥ देवतास्नानपानीयं दिग्धतण्डुलभक्षणइति । प्रातःकर्त्तव्यमपि स एवाह । प्रभाते कारिणे देया आदित्याभिमुखायवि
ति । कारिणे शोध्याय । देयाः तण्डुला इत्यनुषङ्गः । भक्षणं च सोपवासेन सूर्याभिमुखमेव कर्त्तव्यमित्याह बृहस्पतिः । सोप

वासःस्वयं ग्रहेतस्तण्डुलान्भक्षयेच्छुचिरिति । शोध्यानुष्ठेयमनुवादव्याजेन दर्शयति पितामहः । प्राङ्मुखोपवेशितं स्नातं शिरोरो
पितपत्रकम् । तण्डुलान्भक्षयित्वा तु पत्रे निष्ठीवयेत्ततइति ॥ भक्षयित्वा भक्षणं कारयित्वा । हेतुमत्र णिजन्तस्य भक्षेरयम्प्रयो
गः ॥ पत्रे विशेषं स एवाह । भुर्जस्यैव तु नान्यस्य अभावे पिप्पलस्य त्विति । शुद्ध्यशुद्ध्यवधारणोपायं स एवाह । शोणितं दृश्यते
यस्य हनुस्तालु च शीर्यते । गात्रञ्च कम्पते यस्य तमशुद्धं विनिर्दिशेत् इति ॥ बृहस्पतिरपि । शुद्धः स्यात्कुशलं निष्ठीवी रक्तमिश्रे
तु दोषभागिति । कात्यायनोपि ॥ अशक्तनिष्ठीवनात्कुद्धो नियम्योऽशुचिरन्यथेति । इति तण्डुलविधिः ॥०॥ अथ तप्तमाषविधिः
॥ तत्र पितामहः । तप्तमाषस्य वक्ष्यामि विधिमुद्धरणे शुभम् । कारयेदायसम्पात्रन्ताम्रं वा षोडशाङ्गुलम् ॥ चतुरङ्गुलखातन्तु
मृन्मयं वापि मण्डलम् । कर्षषोडशांशप्रमितं मण्डलं सूर्यमण्डलाकारं वर्तुलमिति यावत् । एतादृशं पात्रं घृततैलाभ्यां पूरये
दित्याह स एव । पूरयेद्घृततैलाभ्यां पलैर्विंशतिभिस्तु तत् । सुवर्णमाषकन्तस्मिन्सुतप्ते निःक्षिपेत्ततः । अङ्गुष्ठाङ्गुलिमूलेन तप्तमा
षकमुद्धरेत् इति । सुवर्णमाषकं कर्षषोडशांशप्रमाणम् । सुवर्णग्रहणं रूप्यमाषनिवृत्यर्थम् । तन्मात्रपरिमितं हिरण्यखण्डं
स्वं वापिण्डीकृत्य निःक्षिपेत् । अङ्गुष्ठाङ्गुलिमूलेन अङ्गुष्ठतर्जनीमध्यमाभिरित्यर्थः । इदञ्च तप्तमाषोद्धरणम् । प्राड्विवाकेन घृ
ततैलयोस्तापे समारब्धे धर्मावाहनादिशोध्यशिरःपत्रारोपणान्तं सर्वसाधारणं कर्म विधाय त्वमग्ने वेदाश्चत्वार इत्यादिना अग्नि
दिव्यप्रकरणोक्तेन मन्त्रेणाभिमन्त्र्य कारयितव्यं शोध्यस्तु याज्ञवल्क्योक्तेन त्वमग्ने सर्वभूतानामित्यादिमन्त्रेणाभिमन्त्र्य तप्तमाषमुद्धरे
त् । अत एव बृहस्पतिः । समुद्धरेत् तैलघृतात्तु तप्तात्तप्तमाषकमिति । कल्पान्तरमाह स एव । सौवर्णे राजते ताम्रे आयसे मृन्म
ये पि वा । गव्यं घृतमुपादाय तदग्नौ तापयेच्छुचिः । सौवर्णीं राजतीं ताम्रीमायसीं वा सुशोभनाम् । सलिलेन सकृद्धौतां प्रक्षिपेत्त
त्र मुद्रिकाम् । भ्रमद्वीचितरङ्गाढ्ये ह्यनखस्पर्शगोचरे । परीक्षेताद्रपर्णेन चटत्कारं सघोषकमिति । ततः प्राड्विवाको धर्मावाहना
दिपत्रारोपणान्तं साधारणं कर्म कृत्वा घृतमभिमन्त्रयेत् । मन्त्रस्तु तेनैव दर्शितः । ततस्तानेन मन्त्रेण सकृदभिमन्त्रयेत् । परं

पवित्रममृतंघृतत्वंयज्ञकर्मसु। दहपावकपापंत्वंहिमशीतोशुचेर्भवेति। ततःप्राड्विवाकःशोध्येनत्वमग्नेसर्वभूतानामित्यादिम
न्त्रेणाभिमन्त्रणंकारयित्वामुद्रिकांग्राहयेदित्याहसएव। उपोषितन्ततःस्नातमार्द्रवाससमागतम्। ग्राहयेन्मुद्रिकांतान्तुघृतम
ध्यगतन्तथा॥ प्रदेशिनींचतस्याथपरिक्षेयुःपरीक्षकाइति। अत्रतर्जन्यैवमुद्रिकोद्धरणंकार्यंतस्याःपरीक्षाभिधानात्पक्षद्वये
पिमुद्रावधारणोपायंबृहस्पतिराह। कराग्रंयोनधुनुयात्विस्फोटोवानजायते। शुद्धोभवतिधर्मेणपितामहवचोयथेति। का
लिकापुराणेपि। नधुनेयुःकराग्रंतुयस्यरक्तंनजायते। विस्फोटाद्वैस्तथादोषैःसशुद्धोयस्यचोप्सितमिति। रक्तंरक्तवर्णं। यस्य
कराग्रंविस्फोटाद्यैरुद्धीर्तमित्यन्वयः॥ पितामहोपि। यस्यविस्फोटकानस्युःशुद्धोसावन्यथाशुचिरिति। इतितप्तमाषविधिः॥
०॥ अथायसविधिःआयसंद्वादशपलङ्घटितन्फालमुच्यते। अष्टांगुलंभवेद्दीर्घंचतुरंगुलविस्तृतमिति। एवंविधंफालम्प्रत
प्तेऽग्नौप्रक्षिप्यप्राड्विवाकोधर्मावाहनादिशोध्यशिरःपत्रारोपणान्तंसाधारणंकर्मकृत्वात्वमग्नेइत्यादिनाप्रागुक्तमन्त्रेणाभिम
न्त्र्यशोध्येनत्वमग्नेसर्वभूतानामित्यादिनाप्रागुक्तमन्त्रेणाभिमन्त्रणंकारयित्वालेहयेत्। तथाचसएव। अग्निवर्णंततस्तत्तुजिह्वया
लेहयेत्सकृत्। नदग्धश्चेच्छुद्धिमियादन्यथातुसहीयतइति। इतिफालविधिः॥०॥ अथधर्मजविधिः। तत्रपितामहः। अधुना
सम्प्रवक्ष्यामिधर्माधर्मपरीक्षणं। हन्तृणांयाचमानानाम्प्रायश्चित्तार्थिनांनृणामिति॥ साहसाभियोगेषुयाचमानानामित्यर्था
भियोगेषुप्रायश्चित्तार्थिनांनृणामितिपातकाभियोगेष्वेतद्दिव्यंभवतीतिसूचितम्। धर्माधर्मप्रकारमाहसएव। राजतञ्चार
येद्धर्ममधर्मंसीसकायसम्। लिखेद्भूर्जेपटेवापिधर्माधर्मौसितासितौ॥ अभ्युक्ष्यपञ्चगव्येनगन्धमाल्यैःसमर्चयेत्॥ सितपुष्प
स्तुधर्मःस्यादधर्मोसितपुष्पधृक्। एवंविधायोपलिप्यपिण्डयोस्तौनिधापयेत्। गोमयेनमृदावापिपिण्डौकार्य्यौसमन्ततः।
मृद्भाण्डकेऽनुपहतेस्थाप्यौचानुपलक्षितौ। उपलिप्तेशुचौदेशेदेवब्राह्मणसन्निधौ। आवाहयेत्ततोदेवान्लोकपालांश्चपूर्ववत्
।धर्मावाहनपूर्वन्तुप्रतिज्ञापत्रकंलिखेत्। यदिपापविमुक्तोहन्धर्मस्त्वायातुमेकरे। इतिमन्त्रंशोध्यब्रूयात्। अहमितिमन्त्र

लिंगात्। वृहस्पतिरपि। पत्रद्वयेलेखनीयौधर्माधर्मौसितासितौ। जीवदानादिकैर्मन्त्रैर्गायत्र्याद्यैश्चसामभिः॥ आमंत्र्यपू
जयेद्गंधैःकुसुमैश्चसितासितैः। अभ्युक्ष्यपञ्चगव्येनमृत्पिण्डांतरितौततः॥ समौकृत्वानवेकुम्भेस्थाप्यौचानुपलक्षितौ। ततःकु
म्भात्पिण्डमेकम्प्रगृह्णीतानुयाचितः। धर्मेगृहीतेशुद्धःस्यात्संपूज्यश्चपरीक्षकैरिति। जीवदानादिकैर्मन्त्रैर्माप्रणामयथोवय
मित्यादिसूक्तपठितत्र्यङ्मन्त्रैः अन्यैर्वा आगमोक्तैःप्राणप्रतिष्ठामन्त्रैरित्यर्थः॥ तेचशारदातिलकेउक्ताः॥ पाशांकुशपटःशक्ति
र्वामाक्षीविन्दुविभूषितः। पाद्याःसप्तसकारान्ताःव्योमसत्यंदुसंयुतम्॥ तदन्तेहंसमन्त्रःस्यात्ततोमुख्यपदम्भवेत्। प्राणाइतिव
देत्पश्चादिहप्राणास्ततःपरम्। अमुख्यजीवइहतुस्थितोमुख्यपदम्भवेत्। सर्वेन्द्रियाण्यमुख्यांतेवाङ्मनश्चक्षुरन्ततः। श्रो
त्रघ्राणपदेप्राणाइहागत्यसुखंचिरम्। तिष्ठन्त्वग्निवधूरन्तेप्राणमन्त्रोयमीरितः। प्रथमुख्यपदात्पूर्वंपाशाद्यानिप्रयोजयेत्
। प्रयोगेषुसमाख्यातःप्राणमन्त्रोमनीषिभिरिति॥ इतिधर्मजविधिः॥●॥ अथशपथविधिः। तत्रमनुः। महर्षिभिश्चदेवैश्च
कार्य्यार्थेशपथाःकृताः। वसिष्ठश्चापिशपथंशपथेजवनेन्पइति॥ नारदोपि। शपथाअपिदेवानामृषीणांचमहात्मनां। व
सिष्ठःशपथंलेभेयातुधानेतुशङ्कितः॥ महर्षयस्तथेन्द्रश्चपुष्कारार्थेनिबोधिताः। शेपुःशपथमव्यग्राःपरस्परविशुद्धयेइति॥
शपथेविशेषमाह। मनुः। सत्येनशापयेद्विप्रंक्षत्रियंवाहनायुधैः। गोबीजकाञ्चनैर्वैश्यंशूद्रंसर्वैस्तुपातकैरिति। व्याख्यात
मेतत्पूर्वमेव। वृहस्पतिरपि। सत्यवाहनशस्त्राणिगोबीजकनकानिच। देवब्राह्मणपादांश्चपुत्रदारशिरांसिच॥ एतेचश
पथाःप्रोक्ताःमुनिभिःस्वल्पकारणइति। पुत्रदारादीनांशिरःस्पर्शःकार्यः। तथाचमनुः। पुत्रदारस्यचाप्येनंशिरांसिस्पर्श
येत्पृथक्इति। स्पर्शनञ्चदक्षिणकरेणकुर्यात्। तथाचकात्यायनः॥ यत्रोपदिश्यतेकर्मकर्तुरंगंननूच्यते। दक्षिणस्तत्रवि
ज्ञेयःकर्मणांपारगःकरइति। शपथेकृतेकियताकालेनशुद्धिरवधारणीयेत्याकांक्षायांशुद्धिप्रकारमाहसएव। आचतुर्दश
कादह्नोयस्यनोराजदैविकम्। व्यसनञ्जायतेघोरंसज्ञेयःशपथेशुचिरिति। व्यसनमापन्घोरंअतिपीडाकरम्। अथ

स्यशरीरधर्मत्वात् । तच्च प्रागुक्तरोगादिस्रवाहोदिवसस्ययोयश्चतुर्दशभागस्तस्माद्वाग्व्यसनंनजायते सशपथेष्वपिचिरित्यर्थः
। कर्त्तव्यस्यशपथस्यस्वल्पविषयत्वेनबहुवधेरनुचितत्वात् । यमिद्धोनदहत्यग्निरापोनोन्मज्जयन्तिच । नचार्त्तिमृच्छतिक्षिप्रं
सज्ञेयःशपथेष्वपिचिरिति ॥ मनुनाशीघ्रमेवश्रुचेरभिधानाच्चमिथ्याशपथकरणेदोषमाहयमः । हत्वामृषातुशपथंकीटस्यवधसं
युतम् । अन्तेतेनचयुज्येतवधेनचतथानरः ॥ तस्मान्नशपथंकुर्यान्नरोमिथ्यावधेप्सितमिति । कीटस्येतियज्जंतुवधेऽल्पदे।
यस्तस्योपलक्षणम् ॥ तेनात्यन्तानुपयुक्तकीटादीनामपिवधसंयुक्तःशपथोऽनर्थहेतुःतद्वधपापेनमृषाशपथकर्तायुज्यत
इत्यर्थः । यत्तुस्मृतितत्त्वेप्राणिमात्रोपलक्षणमित्युक्तम् । तदयुक्तंब्राह्मणादीनाम्प्राणित्वेनसंग्रहान्मिथ्याशपथकरणेतद्व
धदोषजनितप्रसङ्गात् । मनुरपि । नवृथाशपथंकुर्य्यात्स्वल्पेप्यर्थेनरोबुधः । वृथाहिशपथंकुर्वन्प्रेत्यचेहचनश्यतीति
। अत्रशपथानामपिदिव्यत्वाद्दुपवासादिसाधारणदिव्यविधिरत्रातिदेष्टव्यः । यत्तुस्मृतितत्त्वव्यवहारचिन्तामणिकाराभ्यां।
शपथानान्दिव्यभेदेनोपन्यासाद्धटादिमध्येपरिगणनाभावाच्चनदिव्येतिकर्त्तव्यतयाअतिदेशइत्युक्तम् । तदप्यसत् । पू
र्वनारदादिवचनैःशपथानामपिदिव्यत्वस्योक्तत्वात् । धटादिपरिगणनवाक्यस्योपलक्षणत्वेनव्याख्यातत्वाच्च । किञ्चतदुक्त
दिव्यलक्षणस्यापिसत्त्वाच्चत्वयापितेषान्दिव्यत्वमङ्गीकर्त्तव्यम् ॥ अन्यथातल्लक्षणमव्याप्तंस्यात्तस्मात्शपथानामपिदिव्य
त्वात्स्यैवदिव्यधर्मातिदेशइत्यलम् ॥ इतिशपथविधिःसमाप्ता ॥ इतिश्रीमत्सकलसामन्तचक्रचूडामणिमञ्जरीधिमञ्जरी
नीराजितचरणकमलश्रीमन्महाराजाधिराजप्रतापरुद्रतनूजश्रीमन्महाराजमधुकरसाहसूनुश्रीमन्महाराजाधिराजचतु
रुदधिवलयवसुंधराहृदयपुण्डरीकविकासदिनकरश्रीवीरसिंहदेवोद्योजितश्रीहंसपण्डितात्मजश्रीपरशुराममिश्रसू
नुसकलविद्यापारावारपारीणधुरीणजगद्दारिद्र्यमहागजपारीन्द्रविद्वज्जनजीवातुश्रीमन्मित्रमिश्रकृतेवीरमित्रोदया
भिधनिबन्धेव्यवहारप्रकाशेप्रमाणनिरूपणाख्यंद्वितीयम्प्रकरणम् ॥ * ॥ * ॥ * ॥ * ॥ * ॥ * ॥ * ॥ * ॥ * ॥

एवं लौकिकालौकिकेषु प्रमाणेषु निरूपितेषु प्रमेयाणि व्यवहारपदानि निरूप्यन्ते। तृतीये प्रकरणे तेषामुद्देशो व्यवहार
भेदप्रदर्शनप्रस्तावे ऋणादानं ह्युपनिधिरित्यादिना नारदवचनेन दर्शितः। मनुरपि। तेषामाद्यमृणादानं निक्षेपोऽस्वामिवि
क्रयः। सम्भूय च समुत्थानं दत्तस्यानपकर्म च॥ वेतनस्यैव चादानं संविदश्च व्यतिक्रमः। क्रयविक्रयानुशयो विवादः स्वामि
पालयोः॥ सीमाविवादधर्मश्च पारुष्ये दण्डवाचिके। स्तेयञ्च साहसञ्चैव स्त्रीसंग्रहणमेव च॥ स्त्रीपुंधर्मो विभागश्च द्यूतमाह्व
य एव च। पदान्यष्टादशैतानि व्यवहारस्थिताविह इति। यद्यपि नारदवचने द्यूतं प्रकीर्णकञ्चैवेत्यष्टादश पदान्युक्तानि।
तथापि प्रकीर्णकपदेनोपयुक्तशेषाभिधानाद्राज्ञैव स्वाज्ञातिक्रमादौ परेण कृते प्रतिवादित्वमास्थाय स्वयं निर्णेतव्यं। यत्तु कात्यायनादिषु
पूर्वोक्तव्यवहारपदेष्वनुक्तं तत्सर्वं प्रकीर्णकमिति नारदेनैव तल्लक्षणकरणाद्बहूनां सम्बन्धनियमाभावान्मनुना प्रकीर्णक
स्य व्यवहारपदत्वानुक्तिरिति ध्येयम्। द्यूतसमाह्वययोस्तु अप्राणिपाशादिकृतत्वप्राणिमल्लमेषादिकृतत्वमात्रभेदादेकपद
त्वविवक्षयाऽष्टादशसंख्योपपादनीया। अन्यथैनयोर्विंशतिसंख्यत्वापत्तेः। यथा सपणक्रीडनत्वेन तयोरभेदविवक्षैवमुक्त
न्तथा पारुष्यरूपेण वाग्दण्डपारुष्ययोरप्येकविवक्षासम्भवति तथापि तत्र विवक्षितं स्वतन्त्रेच्छस्य पर्यनुयोगानर्हत्वात् मनु
नाद्विवचनप्रयोगान्नारदादिनिबन्धनेषु पृथगुद्देशाच्च नानुपारुष्यद्वयस्य वक्ष्यमाणसाहसविशेषत्वात्पदान्तरत्वोक्तिर्युक्ताय
न्यम्। बलावष्टम्भेन क्रियमाणस्य तस्य साहसत्वं छलेन तस्य तु साहसलक्षणाभावात्पदान्तरत्वम्। तथा चाह नारदः। तस्यैव
भेदः स्तेयं स्याद्विशेषस्तत्वनूच्यते। आधिः साहसमाक्रम्य स्तेयमाधिश्छलेन तु। तस्येति पूर्वोक्तं साहसं सम्प्रसमृष्टं आधिर्बाह
रणाद्वा क्रियमाणः परस्य मानसंक्षोभः। पुंस्याधिर्मानसी व्यथेति कोशात्। स चाक्रम्य बलावष्टम्भेन विधीयमानः साहस
मित्युच्यते। छलेन तु विधीयमान आधिः। स्तेयमित्युच्यत इत्यर्थः। नन्वनेन स्तेयस्य साहसाद्भेदे पृथगुद्दिष्टस्य पारुष्यद्वयस्य
स्तु तदन्ततः सत्वेनैतु न पृथक्पदमित्यभिप्रायो नारदस्य तदुक्तं संग्रहकारेणापि। मनुष्यमारणादीनि ह्युक्तानि प्रसभं यदि। साह

सानीति कथ्यन्ते यथाख्याम्यन्यथापुनः । अन्यथापुनर्येत्तु प्रसभं हृतानि तदा यथाख्यानि साहसाख्यानि स्तेयस्त्रीसंग्रहवाक्पा
रुष्यदण्डपारुष्यसंज्ञकानि भवन्तीत्यर्थः । अत एव मनुना स्तेयस्त्रीसंग्रहणे अपि व्यवहारपदत्वेन साहसात्पृथगुद्दिष्टे । ना
रदेन तु तयोः प्रायेण लोके च्छन्नेनैव क्रियमाणत्वात्पदान्तरत्वं स्फुटमित्यनुक्त्वा साहसत्वमस्फुटयितुं तदेवोक्तम् । वाक्पारुष्यदण्ड
पारुष्ययोस्तु विपरीतम् । प्रायेण ते प्रसभमेव क्रियमाणे लोके दृश्येते । छलेन तु तयोः करणं साहसभेदापादकमस्फुटमिति
न तन्नीकरणापत्तेरेव साहसात्पृथगुपदिष्टे । अत एव तेनापि प्राणिप्राणिहननविशेषापुरस्कारेण समाह्वयोपि द्यूतत्वेनैवोद्दिष्ट
इति ध्येयम् । यद्यप्युपनिधिनिक्षेपयोरपि तत्प्रकरणावक्ष्यमाणरीत्यावान्तरभेदोस्ति तथापि तमविवक्षित्वान्मनुनारदाभ्यां
पर्यायत्वेनैव द्वयं विवक्षितं । एतयैव दिशा स्मृत्यन्तरयोरप्यविरोध ऊह्नेयः । एवं व्यवहारपदानामपि तिस्रिकामिलक्षणानि तद
वान्तरभेदाश्च तत्तत्स्थाने व्यक्तीकरिष्यामः । बृहस्पतिः । पदान्यष्टादशैतानि धर्मशास्त्रोदितानि तु । मूलं सर्वेविवादानां ये
विदुस्ते परीक्षका इति । यत्तु नारदेन एषामेव प्रभेदोप्यः शतमष्टोत्तरं स्मृतम् । क्रियाभेदान्मनुष्याणां शतशाखो निगद्यत इत्यु
क्तम् । यच्च कात्यायनेन अष्टादश क्रियाभेदाद्भिन्नान्यष्टसहस्रश इति । तत्र क्रियाभेदान्नाद्यभेदादित्यर्थः । तद्द्वयमप्यवान्त
रभेदभूयस्त्वाभिप्रायेण प्रकीर्णप्रकारप्राचुर्याभिप्रायेण चेत्यष्टादशत्वाविघातः । अत एवाष्टोत्तरशतसंख्यत्वाष्टोत्तरसहस्रत्वं
त्र्यन्वयोरपि नारदकात्यायनोक्तयोः प्रकारभूयस्त्वमात्रपरत्वादविरोध इति व्यवहारपदानामुद्देशः ॥ ● ॥ एषां सामान्यल
क्षणं तु स्मृत्याचारव्यपेतेनेत्यादियोगीश्वरवचनेन व्यवहारसामान्यलक्षणप्रस्तावप्रदर्शितेन प्रकटितम् । व्यवहारस्य चतुष्पा
द्व्यवहारस्य पदं विषय इति योगव्युत्पत्त्यापि तदेव पर्यवस्यति । यत्तु बृहस्पतिना । पदाङ्गसहितस्त्वेष व्यवहारः प्रकीर्तितः । वि
वादकारणान्यस्य पदानि शृणुताऽधुनेति । विवादकारणत्वं लक्षणमुत्तरमपि विषयस्यापि कारणत्वादविरुद्धमिति अथ क्रमप्राप्तं ऋ
णादानादीनि अष्टादश व्यवहारपदानि निरूपयिष्यता प्रथमं तावत् ऋणादानाख्यमाद्यं पदं निरूप्यते । तत्र बृहस्पतिः । पदाङ्गस

हितस्तेषुव्यवहारः प्रकीर्त्तितः। विवादकारणान्याहपदानिशृणुतानितु। ऋणादानेद्रुहादीनिद्युताह्वानान्तिकानिच। क्रमशः सम्प्रवक्ष्यामिक्रियाभेदांश्चतत्त्वतइति॥ तस्यसप्तविधत्वंदर्शयन्स्वरूपमाह। नारदः। ऋणन्देयमदेयञ्चयेनयत्रयथाचयत्। दानग्रहणधर्माश्चऋणादानमितिस्मृतिमिति। तत्राधमर्णेपञ्चविधम्। ईदृशमृणंदेयंईदृशमदेयं। अनेनाधिकारिणादेयम्। अस्मिन्समयेदेयम्। अनेनप्रकारेणदेयमिति। उत्तमर्णेद्विविधन्दानविधिरादानविधिश्चेति। एवंसमुदितंसप्तप्रकारंयस्मिन्विवादविषयेतदृणादानाख्यव्यवहारपदमित्यर्थः। तत्रेतरेषान्दानविधिपूर्वकत्वादादौदानविधिरुच्यते। तत्रबृहस्पति॥ परिपूर्णंगृहीत्वाधिंबन्धंवासाधुलग्नकम्। लेख्यारूढंसाक्षिमद्वाऋणन्दद्याद्धनीसदेति। परिपूर्णंसवृद्धिकमूलद्रव्यपर्याप्तम्। आधिर्बन्धकम्। तद्विषयेविशेषोग्रेवक्ष्यते। नन्वाधिबन्धयोरेकार्थत्वेनलोकप्रसिद्धत्वात्कथंबन्धंवेत्युक्तिरित्याशंक्याहतत्रविवक्षितमन्बन्धशब्दस्यार्थमाह। नारदः। निक्षेपोमित्रहस्तस्थोबंधोविश्वासकःस्मृतइति। उत्तमर्णस्यविश्वासहेतुस्तन्मित्रहस्तस्थोनिक्षेपएवबन्धशब्देनोच्यतइत्यर्थः। तत्रापिविशेषोग्रेवक्ष्यते। लग्नकःप्रतिभूः। तथाचायमर्थः॥ उत्तमर्णःपरिपूर्णमाधिंबन्धंवासमीचीनलग्नकंवाधमर्णहस्तलिखितंसाक्षियुक्तंवापत्रंगृहीत्वाऋणन्दद्यादिति। ऋणशब्दसमानार्थकस्यकुसीदशब्दार्थप्रदर्शनव्याजेनतत्प्रयोजनमाहनारदः। स्थानलाभनिमित्तंयद्दानग्रहणमिष्यते। तत्कुसीदमितिज्ञेयन्तेनवृत्तिःकुसीदिनामिति। स्थानंमूलधनस्यावस्थितिःलाभोवृद्धिः। तन्निमित्तन्तत्प्रयोजनमित्यर्थः। कुसीदशब्दस्यावयवार्थन्दर्शयति। बृहस्पतिः॥ कुत्सितात्सीदतश्चैवनिर्विशंकैःप्रगृह्यते। चतुर्गुणंवाष्टगुणंकुसीदाख्यमृणान्तनः। कुत्सितात्सीदतइत्येतेधमर्णविशेषणे। वृद्धिप्रकारान्सएवाह। वृद्धिश्चतुर्विधाप्रोक्तापञ्चधान्यैःप्रकीर्त्तिताः। षड्विधान्यैस्समाख्यातातत्त्वतस्तांविबोधतइति। षड्विधामेइंतिक्वचित्पाठःतत्रमेमते। तान्प्रकारान्सएवाह। कायिकाकालिकाचैवचक्रवृद्धिरतोपरा। कारितासशिखावृद्धिर्भोगलाभस्तथैवचेति। एतेषांस्वरूपमाह। कायिकाकर्मसंयुक्तामासग्राह्या

नुकालिका । वृद्धेर्वृद्धिश्चक्रवृद्धिः कारिता चर्णिणा कृता ॥ प्रत्यहं गृह्यते या तु शिखावृद्धिस्तु सा स्मृता । गृहाद्यो यः फलं क्षेत्राद्भोगलाभः प्रकीर्तित इति ॥ कायिका कर्मसंयुक्ता यथा बन्धकीकृतस्य गवाश्वादेर्दोहनवाहनादिकं कर्मैव वृद्धित्वेन परिकल्पितमतएव सा कायिकेत्यर्थः । तथा च व्यासः । दोह्यवाह्यकर्मयुता कायिका समुदाहृतेति । मदनरत्ने तु भोग्याधितया स्थापितस्य यो दोहनवाहनादिकर्मरूपो भोगस्तन्मात्रसहिता या वृद्धिः सा कायिकेत्युक्तम् । मासग्राह्या तु कालिका । प्रतिमासं लभ्या या वृद्धिः सा कालिकेत्यर्थः । प्रतिमासं स्रवन्ती या वृद्धिः सा कालिका मतेति नारदवचनात् । वृद्धेर्वृद्धिश्चक्रवृद्धिः । वृद्धेरपि प्रतिमासं मूलभावेन पुनर्वृद्धिश्चक्रवृद्धिरित्यर्थः । वृद्धेरपि पुनर्वृद्धिश्चक्रवृद्धिरुदाहृतेति नारदवचनात् । कारिता चर्णिणा कृता । चर्णिनाऽधमर्णेन स्वेच्छया कृता वृद्धिः कारितेत्यर्थः । वृद्धिः सा कारिता नाम याऽधमर्णेन स्वयं कृतेति नारदवचनात् । अधमर्णकारितैव वृद्धिर्देया नोत्तमर्णकारिता । तथा च बृहस्पतिः । चर्णिकेन तु या वृद्धिरधिका सम्प्रकल्पिता । आपत्कालकृता नित्यं दातव्या सा तु कारिता । अन्यथा कारिता वृद्धिर्न दातव्या कथञ्चनेति । उत्तमर्णप्रलोभनार्थं आपत्काले ग्रासलोभात् अधिका स्वयं कल्पिता कारिता या सा वृद्धिर्दातव्या न पुनरेवंविधा धनिकेन कारिता दातव्येत्यर्थः । प्रत्यहं गृह्यते या तु शिखावृद्धिस्तु सा स्मृता । प्रतिदिनग्राह्यत्वात् शिखासादृश्यात् शिखावृद्धिरिति व्यपदिश्यत इत्यर्थः । किं पुनः शिखासादृश्यं वृद्धेरित्याकांक्षायां बृहस्पतिरेवाह । शिखेव वर्द्धते नित्यं शिरश्छेदान्निवर्त्तते । मूले दत्ते तथैवैषा शिखावृद्धिस्तु सा स्मृतेति । प्रत्यहं गृह्यत इति अधमर्णप्रतिश्रुतदिनसंख्यया वृद्धिग्रहणस्य कालोपलक्षणम् । तथा च कात्यायनः । प्रतिकालं ददात्येव शिखावृद्धिस्तु सा स्मृतेति । गृहाद्यो यः फलं क्षेत्राद्भोगलाभः प्रकीर्तितः । बन्धकीकृताद् गृहान्निवासादिजनितः सन्तोषः । क्षेत्रात् शस्यादिफलञ्च भोगलाभो वृद्धिप्रकार इत्यर्थः । गृहक्षेत्रग्रहणं स्थावरात्मकभोग्याधेरुपलक्षणार्थम् । अतएव कात्यायनः । आधिभोगस्त्वशेषो यो वृद्धिस्तु परिकल्पितः । प्रयोगे यत्र चैवं स्यादाधिभोगः स उच्यत इति । यस्मिन् मूलादानप्रयोगे स्थावराधित्वेन परिकल्पिताया वृद्धिस्तत्रा

वृद्धिरधिभोगइत्युच्यतइत्यस्यार्थः । अपरार्कादौगृहान्मासेमःशतदःश्चेवादितिपाठः । सोमोभागएकइतिकल्पतरौ ॥
शतदःशतस्यादिफलम् । वृद्धेःपरिमाणन्दर्शयतिमनुः । वसिष्ठविहितांवृद्धिंसृजेद्वित्तविवर्द्धिनीम् । अशीतिभागंगृह्णी
यान्मासाद्वार्धुषिकःशतइति । निष्कशतेप्रयुक्तेमासस्यसपादनिष्कपरिमितांवृद्धिंवार्धुषिकोवृध्यर्थंगृह्णीयादित्यर्थः
एतत्सम्बन्धकविषयम् । अतएवयाज्ञवल्क्यः । अशीतिभागोवृद्धिःस्यान्मासिमासिसबन्धके । वर्णक्रमाच्छतंद्वित्रिचतुःप
ञ्चकमन्यथेति ॥ सबन्धकेप्रयुक्तस्यद्रव्यस्याशीतितमोभागोवृद्धिःपणशतेप्रयुक्तेसपादःप्रतिमासम्भवतइत्यर्थः । अन्य
थाबन्धकरहितेवर्णक्रमात्ब्राह्मणादिवर्णक्रमेणद्वित्रिचतुःपञ्चकंशतन्धर्म्यंभवति । द्वौवात्रयोवाचत्वारोवाइतिद्वित्रिचतु
पञ्चाअस्मिन्शतेवृद्धिर्दीयतेइतिद्वित्रिचतुःपञ्चकंशतं । तदस्मिन्वृद्ध्यायलाभशुल्कोपदादीयतइतिकन् । तथाचायम
र्थः । बन्धकरहितेपणशतम्प्रतिमासंब्राह्मणात्पणद्वयंक्षत्रियात्पणत्रयंवैश्यात्पणचतुष्टयंशूद्रात्पणपञ्चकंग्राह्यम् । यत्तु
मनुनोक्तम् । द्विकंशतंवागृह्णीयात्सतान्धर्ममनुस्मरन्नितितद्व्यवस्थितविकल्पविषयम् । अतएवव्यासः । सम्बन्धेभागआशी
तःषष्ठोभागःसलग्नके । निराधानेद्विकशतंमासलाभउदाहृतइति । सम्बन्धेआधिसहिते । आशीतःअशीततमः । षष्ठः
षष्ठितमः । सलग्नकःप्रतिभूः । निराधानेबन्धकरहिते । आधानग्रहणम्प्रतिभुवोरप्युपलक्षणम् । कल्पतरौसाष्टभागइति
पठित्वासलग्नकेअशीततमोभागः । स्वकीयाष्टमभागसहितोमासवृद्धिरित्युक्तम् । द्विकन्त्रिकञ्चतुष्कञ्चपञ्चकञ्चशतंस
मम् । मासस्यवृद्धिंगृह्णीयाद्वर्णानामनुपूर्वशइति ॥ द्विकंद्वेवृद्धिर्दीयतेयस्मिन्मूलधनेतत्तथा । एवंत्रिकादयोपिसममा
सम्प्राप्यनाधिकम् । विष्णुरपि । अथोत्तमर्णोधमर्णाद्यथादत्तमर्थंगृह्णीयात् । द्विकन्त्रिकञ्चतुष्कंपञ्चकंशतंवर्णानुक्रमे
णप्रतिमासमिति । अधमर्णविशेषेप्याहयाज्ञवल्क्यः । कान्तारगास्तुदशकंसामुद्राविंशकंशतमिति । धनंगृहीत्वाकान्तारम्म
हावनमत्तद्गच्छन्तीतिकान्तारगाःदुर्गस्थलगन्तारोवस्त्रादिक्रयकारिणः । पणशतस्यदशकम्प्रतिमासन्दशपणान्दद्युरित्युत्तर

वाक्यस्यस्यानुषङ्गः । समुद्रंतरन्तीतिसामुद्राःसमुद्रगन्तारःप्रतिमासंविंशकंशतन्दद्युरित्यर्थः । कारितायान्तुननियमइत्या
ह । सएव । दद्युर्वासकृतांवृद्धिंसर्वेसर्वासुजातिष्विति । सर्वेब्राह्मणादयोधमर्णाःसवन्धकेऽवन्धकेवासर्वासुजातिषूत्तमर्ण
भूतासुस्वयमङ्गीकृतांवृद्धिन्दद्युरित्यर्थः ॥●॥ द्रव्यविशेषेवृद्धिविशेषमाहसएव । सन्ततिस्तुपशुस्त्रीणांरसस्याष्टगुणापरा ।
वस्त्रधान्यहिरण्यानाञ्चतुस्त्रीद्विगुणापरेति । पशुस्त्रीणांमहिषीस्त्रीणांप्रभृतीनांवृद्ध्यर्थम्प्रयुक्तानान्तदीयासन्ततिरेववृद्धिः ।
रसस्यघृतादेरष्टगुणा । वस्त्राणाञ्चतुर्गुणाधान्यानान्त्रिगुणा । हिरण्यानांद्विगुणापरेतिप्रत्येकंसंवध्यते । परापरमा । अतःप
रमधिकावृद्धिर्नास्तीत्यर्थः । नचगवादीनांदृतत्वेनदामन्नसम्भवतीतिवाच्यम् । तत्पोषणाद्युपक्रतस्यतत्पुष्टिसन्तत्याद्यर्थिनो
दानसंभवात् । यद्वणतुक्षीरवाहनसेवाद्यर्थिनः । वृहस्पतिरपि । हिरण्येद्विगुणावृद्धिस्त्रिगुणावस्त्रकुप्यके । धान्येचतुर्गुणा
प्रोक्ताशदवाह्यलवेषुच । उक्तापञ्चगुणाशाकेवीजेक्षैवइगुणास्मृता । लवणस्नेहमद्येषुवृद्धिरष्टगुणामता । गुडेमधुनिचै
वोक्ताप्रयुक्तेचिरकालिकेइति ॥ कुप्यंत्रपुसीसकादिकं । शदःक्षेत्रफलम् । तच्चगोवलीवर्दन्याबाह्यान्यव्यतिरिक्तम्पुष्पमूल
फलादिकम् । वाह्योऽश्वादिः । लवोमेषोर्णाचमरीकेशादिः । अत्रचिरकालशब्देनप्रतिश्रुतायाःअशीतिभागायाःवृद्धे
र्यस्मिन्समयेद्वैगुण्यादिप्रापकत्वम्भवति । ततोऽधिकस्ततोऽधिकःकालोगृह्यते । यत्तुधान्येशदेलवेवाह्येनेत्यादिमनुनो
क्तन्तत्प्रत्यर्पणसमयेसमृद्धाधमर्णविषयम् । षाड्गुण्यनिषेधपरमितिमदनरत्ने । यत्तुवसिष्ठवचनम् । द्विगुणंहिर
ण्यन्त्रिगुणन्धान्यन्धान्येनैवरसाव्याख्याताः । पुष्पमूलफलानिचतुलाधृतमष्टगुणमितितत्त्रिगुणमेवधान्यादिकन्दातव्यमि
तियत्रदेशेस्थितिस्तद्विषयम् । दरिद्राधमर्णविषयंवा । एवमन्यत्रापिन्यूनाधिकपरमवृद्धिप्रतिपादकानिवचनानिदेशवि
शेषविषयतयादरिद्रादिविषयतयावाव्यवस्थापनीयानि । व्यासोपि । वदन्त्यष्टगुणान्कालेमद्यस्नेहरसासवानितिस्नेह । ह
स्तैलादिः । रसक्षीरादिः । कात्यायनोपि । तैलानाञ्चैवसर्वेषांमद्यानामथसर्पिषाम् । वृद्धिरष्टगुणाज्ञेयागुडस्यलवण

स्य चेति । विष्णुरपि । हिरण्यस्य द्विगुणा वृद्धिस्त्रिगुणा वस्त्रस्य धान्यस्य चतुर्गुणा रसस्याष्टगुणा सन्ततिस्त्रीपशूनामिति यासोपि ॥ शाकपाषाणवीजेक्षौषद्गुणा परिकीर्तितेति । वशिष्ठोपि । वज्रमुक्तिप्रवालानां हेमस्वरजतस्य च । द्विगुणा चिष्यते वृद्धिः कृतकालानुसारिणीति । मुक्तिशब्देनात्र मुक्ताफलं लक्ष्यते । वज्रसाहचर्यात् । अत एव कात्यायनः । मणिमुक्ताप्रवालानां सुवर्णरजतस्य च । तिष्ठति द्विगुणा वृद्धिः फलकेटाविकस्य चेति । कैटः कीटोद्भवम् । पट्टसूत्रादि । आविकं कम्बलादिकम् । वसिष्ठोपि । ताम्रायःकांस्यरीतीनां त्रपुणः सीसकस्य च । त्रिगुणा तिष्ठते वृद्धिः कालाचिरकृतस्य चेति । रीतिरारकूटम् । देशभेदेन परां वृद्धिं दर्शयति नारदः ॥ कृष्णानां सार्वभौमोयं विधिर्वृद्धिकरः स्मृतः । देशाचारस्थितिस्त्वन्या यत्रर्णमवतिष्ठते । द्विगुणं त्रिगुणं चैव तथान्यस्मिंश्चतुर्गुणं । तथाष्टगुणमन्यस्मिन्देशेऽवतिष्ठत इति । यत्र वृद्धिविशेषो न श्रूयते तत्र द्विगुणैव ग्राह्येत्याह विष्णुः । अनुक्तानां द्विगुणेति अयं च द्वैगुण्यादिरूपो वृद्ध्युपरमः । सकृत्प्रयोगे सकृदाहरणे वेदितव्यः तथा च मनुः । कुसीदवृद्धिर्द्वैगुण्यं नात्येति सकृदाहितेति । उपचयार्थं प्रयुक्तं द्रव्यं कुसीदं तस्य वृद्धिः कुसीदवृद्धिः द्वैगुण्यं नात्येति नातिक्रामति । यदि सकृदाहिता सकृत्प्रयुक्ता पुरुषान्तरसंक्रमणादिना प्रयोगान्तरकरणेन तस्मिन्नेव वा पुरुषे रेकसेकाभ्यां प्रयोगान्तरकरणे द्वैगुण्यमतिक्रम्य पूर्ववद्वर्द्धत एवेत्यर्थः । द्वैगुण्यग्रहणं त्रैगुण्यादीनामुपलक्षणम् । सकृदाहृतेति पाठे यदि प्रतिमासं प्रतिवत्सरं वा न गृह्यते किन्तु सकृद्गृह्यते तदा द्वैगुण्यं नातिक्रामतीत्यर्थः । गौतमोपि । चिरस्थाने द्वैगुण्यं प्रयोगस्येति । प्रयोगस्येत्येकवचननिर्देशात्प्रयोगान्तरकरणे द्वैगुण्यातिक्रमः चिरस्थान इति निर्देशात् शनैः शनैर्वृद्धिग्रहणे द्वैगुण्यातिक्रमो भवतीति सूचितम् । उक्तस्य वृद्ध्युपरमस्य क्वचिद्द्रव्यविशेषेऽपवादमाह बृहस्पतिः । तृणकाष्ठेष्टकासूत्रकिण्वचर्मास्थिवर्मणाम् । हेतिपुष्पफलानाञ्च वृद्धिस्तु न निवर्त्तत इति । किण्वं सुराद्रव्योपादानकारणभूतो मलविशेषः । चर्मेश्वरादिनिवारकः फलकः सुराद्रव्योपादानकारणञ्च मेहरकमित्यपराः वर्म कवचम् । हेतिरायुधम् । पुष्पफलयोर्वृ

द्धिरनिवृत्तिः । प्रतिदानमेवाचायामनन्तसमर्थोऽधमर्णो विवादेषु विशेषविषया वेदितव्याः । अन्यथा त्रिगुणवृद्धिप्रतिपादकव्यासवचनविरोधः स्यात् । विष्णुरपि । किण्वकार्पाससूत्रचर्मायुधेष्टकाङ्गाराणामक्षयेति । कार्पासेतु पञ्चगुणवृद्धिविधायकव्यासवचनविरोधः पूर्ववत्परिहरणीयः । वसिष्ठोऽपि । दन्तचर्मास्थिशृङ्गाणां मृन्मयानान्तथैव च । अक्षया वृद्धिरेतेषाम्पुष्पमूलफलस्य चेति ॥ अक्षया मूलप्रतिपादनाभावेऽनन्तगुणापि वर्द्धतएवेत्यर्थः । शिखावृद्ध्यादीनामनुपरममाह । वृहस्पतिः । शिखावृद्धिङ्कायिकाञ्च भोगलाभन्तथैव च । धनी तावत्समादद्याद्यावन्मूलमशोधितमिति ॥ नशोधितमप्रतिदत्तम् । मूल्येनेत्यर्थः । क्वचिदनङ्गीकृतापि वृद्धिर्भवतीत्याह विष्णुः । यो गृहीत्वा ऋणं पूर्वं दास्यामीति सामकम् । नदद्याल्लोभतः पश्चात्तदा वृद्धिमाप्नुयादिति । अद्य नि प्रतिश्रुतस्य प्रतिदानकालावधेरुपलक्षणम् । सममेव सामकं अवृद्धिकमिति यावत् । योऽमुकस्मिन्दिने सममेवाहन्तु दास्यामीति प्रतिज्ञाय ऋणं गृहीत्वा पश्चाल्लोभाद्विलम्बं कुर्यात्तदवधिदिनमारभ्य वृद्धिन्दद्यादित्यर्थः । कात्यायनोऽप्यनङ्गीकारे यागृहीतस्य धनस्य वत्सरात्पूर्वं वृद्धिर्भवतीत्याह नारदः । नवृद्धिः प्रीतिदत्तानां स्यादनाकारिता क्वचित् । अनाकारितमप्यूर्द्ध्वं वत्सरार्द्धाद्विवर्द्धते इति । अनाकारितमाननङ्गीकृता प्रीतिदत्तानामप्रतियाचनप्रतिदानादिननिर्देशशून्यानामिति शेषः । अनाकारितेत्यादेरयमर्थः । वृद्धिमकृत्वा गृहीतमपि वत्सरार्द्धादूर्द्ध्वं प्रीतिदत्तं वृद्धिं प्राप्नोतीति । प्रतियाचितस्य प्रतिदत्तस्यादाने वृद्धिविशेषमाह । कात्यायनः । प्रीतिदत्तं न वर्द्धेत यावन्न प्रतियाचितम् । याच्यमानमदत्तञ्चेद्वर्द्धते पञ्चकं शतमिति । पञ्चकम्पञ्चाधिकम् । प्रतियाचनदिनमारभ्य प्रत्यहं तस्य पणा पञ्चकम्प्रतिमासं वर्द्धेत इत्यर्थः । याचितकं गृहीत्वाऽप्रतिदायैव देशान्तरगमने विशेषमाह कात्यायनः । यो याचितकमादाय तमदत्वा दिशं व्रजेत् । ऊर्द्ध्वं संवत्सरात्तस्य तद्धनं वृद्धिमाप्नुयादिति । एतच्चाप्रतियाचितविषयम् । प्रतियाचिते याचितकमदत्वा यदि देशान्तरं गच्छति तदा विशेषमाह स एव । कृत्वोद्धारमदत्वा यो याचितस्तु दिशं व्रजेत् । ऊर्द्ध्वं मासत्रयात्तस्य तद्धनं वृद्धिमाप्नुयादिति । क-

त्वोद्धारं याचितकं गृहीत्वा याचितो यद्दद्यादित्यन्वयः । देशान्तरगमनाभावेतु याचितकालादारभ्य याचितकस्य वृद्धिविशेषमाह सएव । स्वदेशेपि स्थितो यस्तु न दद्याद्याचितः क्वचित् । तन्ततोकारितां वृद्धिमनिच्छन्तस्तु दापयेदिति । ततः प्रतियाचनकाला दारभ्येत्यर्थः । एतत्कञ्चिदवधिमपरिकल्प्य याञ्चाप्राप्तिविषयम् । अवधिस्त्वीकृत्य तदतिक्रमे त्वतिक्रमदिनमारभ्य तदूनस्य वृद्धिर्ज्ञेया । तदस्माद्वृद्धिमाप्नुयादिति न्यायसाम्यात् । गृहीतपण्यो मूल्यमनर्पयन्देशान्तरगमने वृद्धिविशेषमाह । पण्यं गृहीत्वा यो मूल्यमदत्त्वैव दिशं व्रजेत् । ऋतुत्रयस्योपरिष्टात्तद्धनं वृद्धिमाप्नुयादिति ॥ एतच्चाप्रतियाचितविषयम् । प्रतियाचनेन्त्वेतस्य निक्षिप्तवृद्धिविशेषयोस्त्वतद्दिनमारभ्य प्रतिमासं शतेपञ्चकं वर्द्धत इत्यप्याह सएव । निःक्षिप्तं वृद्धिशेषञ्च क्रयविक्रय एवच । याच्यमानमदत्तञ्चेद्वर्द्धते पञ्चकं शतमिति ॥ नन्वकृतायां वृद्धौ परिमाणविशेषस्यानुक्तेः किम्परिमाणं ग्राह्यमिति चेत् । अशीतिभागो वृद्धिः स्यादित्यादियाज्ञवल्क्याद्युक्तपरिमाणं ग्राह्यमिति ब्रूमः । अतएव विष्णुः । वृद्धिन्दद्युर्वत्सराक्रमेव यथाभिहितामिति । वत्सरातिक्रमइति यत्र यदतिक्रमे वृद्धिरुक्तातस्योपलक्षणम् । यथाभिहितान्धर्मशास्त्रइति शेषः । धर्मशास्त्रे यथोक्तान्तथाविधामित्यर्थः । ननु यथाभिहितामित्यस्यार्थः प्रत्यर्थिनोरन्यतरेण मध्यस्थेन वाभिहितान्दद्यादित्यर्थः । कस्मान्न भवति अतिप्रसङ्गापत्तेः । कृतानुसारादधिका व्यतिरिक्ता न सिद्ध्यति । कुसीदपथमाहुस्तम्पञ्चकं शतमर्हतीति मनूक्तेश्च । अस्यार्थः । शास्त्रविधिनियमितशास्त्रकृतवृद्ध्यनुसारेणयो वृद्धिग्रहणो लौकिकानां समाचारः सकृतानुसारः तस्मादधिका वृद्धिरुत्तमर्णादेरकृतवृद्धौ न सिद्ध्यति यतः सा व्यतिरिक्ता धर्मशास्त्रबाह्या । अतएव कुसीदपथमाहुस्तन्नधर्मपथमिति । पञ्चकं शतमर्हतीति प्रतियाचितविषयमिति स्मृतिचन्द्रिकायाम् । पूर्वोक्तात्कृतानुसारादधिकाऽधमर्णेनाकृता वृद्धिर्न सिध्यति । यतः कुसीदपथमाहुस्तम् । यदा तु व्यवहारावष्टम्भादुत्तमर्णोऽधिकमधमर्णेनाकारितं लाभमिच्छति तदा ब्राह्मणः पञ्चकं शतं गृह्णीतुमर्हतिन ततोधिकमधमर्णाकारितमित्यर्थमाह रत्नाकरः । अकृतवृद्धेरपवादमाह नारदः । पण्यमूल्यं भृतिन्यासोदण्डो यश्च

प्रकल्पितः। वृथादानाक्षिकपणावद्धं न्नेनाविवर्धितानीति। पण्यस्य वस्त्रादेर्मूल्यम्। भृतिर्वेतनम्। न्यासो निक्षेपः। वृथा दानं वेश्यादिभिः प्रतिश्रुतम्। आक्षिकपणो द्यूतद्रव्यम्। अविवर्धिताः। अत्र पण्यमूल्यस्य वृद्धेरभावोक्तिः प्रवासप्रतियाचनयोरभावे वेदितव्याः। अन्यथा पूर्वोक्तकात्यायनवचनेन विरोधः स्यात्। न्यासस्य च वृद्ध्यभाववचनम्प्रतियाचनाभावे। न वृद्धिः स्त्रीधने लाभे निःक्षिप्ते च यथास्थिते। सन्दिग्धे प्रातिभाव्ये च यदि न स्यात्स्वयंकृतेति॥ संवर्त्तवाक्ये यथास्थितमिति विशेषणोपादानाद्युक्त्यन्यथाकरणाभावे च ज्ञातव्यम्। तथा च निक्षिप्तं वृद्धिशेषञ्च व्यादिपूर्वोक्तकात्यायनवचनविरोधो नेति॥ कात्यायनोपि। वर्णग्रस्यासवद्यूते पण्यमूले च सर्वदा। स्त्रीशुल्केषु न वृद्धिः स्यात्प्रातिभाव्यागतेषु चेति। सर्वदेत्यनेन प्रतियाचनादेः परस्तादपि वृद्धिरकृतानां स्त्रीशुल्कम्। यद्यपि सर्वदेति सर्वशेषणात्पण्यमूल्येपि प्रतियाचनादेः परस्तादकृतवृद्ध्युपरमः प्रतिभाति। तथापि पूर्वोक्तकात्यायनवचनविरोधाय तच्छेषता सर्वदेत्यस्य। एवंच पूर्वोक्तस्य परिहारः। एवंवर्णेणापि वृद्ध्यभावोक्तिः। प्रतियाचनाभावे तथा चनतत्शेषतापि। एवंचूतपूर्वोक्ताक्षयवृद्धिप्रतिपादकवसिष्ठादिवचनविरोधः। अन्यथापि वृद्ध्यभावं व्यासश्चाह। प्रातिभाव्यमभुक्तबन्धमगृहीतञ्च दितनम्। न वर्धते प्रयत्नस्य दमः शुल्कं प्रतिश्रुतमिति। भुक्तबन्धमित्यनेन स्थापितस्य गृहादेरारामक्षेत्रादेरुपभोगे वृद्धिर्न भवतीत्युक्तम्। अत एव गौतमः। भुक्ताधिर्न वर्धते वस्त्रालङ्कारादेरिति। अगृहीतच्छन्दितमनद्गृतिदत्तः प्रतिदातुमिच्छोरधमर्णात् उत्तमो वृद्धिलोभादिवशान्न गृह्णाति तदा तस्य कृतापि वृद्धिर्दाहिनादारभ्य न देयेत्यर्थः। तथा च याज्ञवल्क्यः। दीयमानं न गृह्णाति प्रयुक्तं यत्स्वकं धनम्। मध्यस्थस्थापितन्तत्स्याद्वर्धते न ततः परमिति। मध्यस्थस्थापितमिति विशेषणेनाधमर्णो यदि स्वनिकटे स्थापयति तदा भवत्येव वृद्धिरिति तदेवम्प्रसङ्गागतासविशेषा वृद्धिर्निरूपिता॥●॥ इदानीमाधिर्निरूप्यते। तत्राधिर्नामाधमर्णेनोत्तमर्णविश्वासार्थं गृहीतद्रव्यनिमित्तं यत्तन्निकटे स्थाप्यते भूषणादि स उच्यते। आधिक्रियत इत्याधिरिति व्युत्पाद्यते। तत्स्वरूपमाह दक्षाद्बृहस्पतिः। आधिर्बन्धः समाख्यातः

॥वी०मि०॥ स च प्रोक्तश्चतुर्विधः। जङ्गमः स्थावरश्चैव गोप्यो भोग्यस्तथैव च॥ याज्ञवल्क्यः सावधिश्चैव कृतो वा सावधिर्मतम् इति। गोप्ये

॥ व्य० ॥ रक्षणीयः यदृच्छिकः कृतावधिः। सावधिः अमुकस्मिन्दिने धनं मया देयमिति वा प्रयुक्तः स्यादपरः। यत्तु प्रथमा

॥ ९४ ॥ धिरष्टविधो दर्शितस्तथापि गोप्यभोग्ययादृच्छिकसावधिरूपाया अस्यैव नानाविधप्रयोगतात्पर्यात्तिर्यक् यद्यपि विस्तारेणाधिस्तु

चतुर्विध एवेति स्मृतिचन्द्रिकायां। अवस्तुरूपप्रकारकाप्रमाणैश्चतुर्विधत्वात् स्वरूपं द्विविधं जङ्गमं स्थावरं भेदेन प्र

कारश्च द्विविधो गोप्यो भोग्यश्च कालश्च द्विविधः अवधिनियमानियमाभ्यां प्रमाणमपि वक्ष्यमाणभेदेन द्विविधमित्येवमष्टविधत्वमिति

कल्पतरौ। नारदोपि। आधिर्निक्षेपतेड्यधिः स विज्ञेयो द्विलक्षणः। कृतकालोपनेयश्च यावद्देयोद्यतस्तथा॥ स पुनर्द्वि

विधः प्रोक्तो गोप्यो भोग्यस्तथैव चेति। कृतकालः कृतावधिः। उपनेयः स्वसमीपे नेयो मोचनीय इति यावत्। यावद्देयोद्यतः याव

द्धनं दीयते तावत्स्थितः अवधिरहित इत्यर्थः॥ प्रकारान्तरेणाधेश्चातुर्विध्यं कात्यायनस्तु हारीतश्चाह। आधिस्तु त्रिविधः प्रोक्तो भोग्यो गो

प्यस्तथैव च॥ प्रत्ययप्रत्ययहेतुर्वै चतुर्थः स्यात्कृताकृतः। आधिस्तु पूर्वं लिखितो भोग्याधिः स उच्यते। गोप्याधिस्तु परेभ्यः स्वन्द

त्वा योगोप्यते गृहे। प्रत्ययप्रत्ययहेतुर्वै प्रत्ययाधिः स उच्यते। आज्ञाधिर्नाम यो राज्ञा संसदा वा कृतो यत इति। सर्वाधिर्नामादि

भिर्यथा विज्ञानेन भवति। न चापरिपालनीय इत्याह हारीतः। बन्धं यथास्थापितं स्यात्तथैव परिपालयेत्। अन्यथा नश्यमेवाभोग्यमू

लं वा नश्यति कर्मा दिति॥ यथाये प्रकारे च गोप्यत्वेन भोक्तृत्वेन स्थापितमाधिं तथैव गोप्यत्वेन भोग्यत्वेन वा पालयेत्।

अन्यथा वैपरीत्येन स्वसमयस्यातिक्रमात्स्वाभोक्तृत्वमूलद्रव्यं वा नश्यतीत्यर्थः। नारदोपि। उपचारस्तथैवास्य च भवति निर्वि

पर्यये। प्रमादाद्धनिनस्तद्वदाधौ विकृतिमागत इति। उपचारो रक्षणं अस्मिन् विपर्यये सति धनिनः प्रमादाद्विपर्यये नाशे विकृ

तिं वा गते आधौ लाभहानिर्भवतीत्यर्थः। बृहस्पतिरपि। अपहृत्य वासितं चैव गोप्यं पूर्वावधौ धनी। यो भुङ्क्ते वृद्धिकं लाभं स च लाभो

भवेत्पुनः। न्यासवत्परिपाल्यो हि वृद्धिर्नश्यति दापिते। अतो गोप्याधिः शान्तलाभो भवेद्यो भोक्तव्य इत्यभिप्रायः। आधिर्गोप्याधिर्भा

लाभेन भोक्तव्यः । इयन्तं समयेनायमस्मिन्धने भोक्तव्यमिति परिभाषितस्तु अवधेः पूर्वं भोक्तव्यः । अन्यथा यो भुङ्क्ते तस्य तल्लाभः पुनर्न भवेदित्यर्थः । असावाधिर्न्यासपर्यायः पालनीयो येन ह्रापनीयो येन न नाशनीयः । ह्रापिते तु वृद्धिर्नश्यतीत्यर्थः । केचित्तु तथा पूर्वं वधाविच्छयाकारप्रश्नेयं कृत्वा अवधावपूर्णे न भोक्तव्य इत्याहुः । याज्ञवल्क्योऽपि । गोप्याधिभोगे नो वृद्धिः सोपकारेऽथ ह्रापिते इति । गोप्याधेरल्पेऽपि भोगे महत्यपि भोगे महत्यपि वृद्धिर्न देया । सोपकारे भोग्याधौ ह्रापिते व्यवहारायोग्यतां प्रापिते वृद्धिर्न देयेत्यर्थः । मनुरपि । न त्वेवाधौ सोपकारे कौसीदीं वृद्धिमाप्नुयादिति ॥ ह्रापित इति शेषः । एतच्च बलात्कारविषयम् । नत्याथ मनुः । न भोक्तव्यो बलादाधिर्भुञ्जानो वृद्धिमुत्सृजेत् । मूल्येन तोषयेच्चैनमाधिस्तेनोऽन्यथा भवेदिति । अधमर्णेन भोगो न कर्तव्य इति निषिध्यमानस्य वचनमुल्लंघ्य भोगकर्तुरल्पभोगेऽपि सर्वे वृद्धिनाश इत्यर्थः । बलात्कारभावे तु स एवाह । यः स्वामिनाऽननुज्ञातमाधिं भुङ्क्ते विचक्षणः । तेनार्द्धवृद्धिर्मोक्तव्या तस्य भोगस्य निष्कृतिरिति ॥ अर्द्धं यत्तु अननुज्ञाताधिभोगानुसारेणाल्पत्वेपि नस्य वृद्धिभोगस्योपलक्षणार्थम् । अन्यथा महाभोगस्यार्द्धविसर्जनेन निष्कृतेरसम्भवात् भोगस्य निष्कृतिरिति वाक्यशेषविरोधः स्यात् । अयं विशेषपरिहारार्थमल्पभोगविषयमेवेदं कुतो न भवति तथा सत्यननुज्ञाता महाभोगविषये लाभहानिरनेनानुक्ता स्यात् । तच्चानेनानुक्तोऽपि गोप्याधिभोगे न वृद्धिरिति याज्ञवल्क्यवचनमेवाभलाभहानिविधायकं भविष्यति । न भविष्यति तस्य बलात्कृताल्पभोगविषयत्वात् तस्मादर्द्धं यत्र सोपलक्षणत्वमेव युक्तम् । यत्तु हारीतवचने मूल्यनाशाभिधानात् बलात्कृतबहुभोगविषयमिति स्मृतिचन्द्रिकायाम् ॥ ● ॥ आधिविनाशविषयमिति कश्चित् गोप्याधित्वेन स्थापितदास्यादेः कर्मणां कारणे विशेषान्तरमुक्तं कात्यायनेन । अकाममननुज्ञातमाधिं यः कर्म कारयेत् । भोक्ता कर्मफलं दाप्यो वृद्धिं वा न लभेत सः इति । अकाममिच्छारहितम् । कर्मफलं वेतनम् । दाप्यः अधमर्णाय सहेति शेषः । एवं गोप्याधितया स्थापितेऽश्वादौ तद्भाटकं दाप्यः । वृद्धिर्वा त्यजनीयेत्यर्थः । आहितदास्यादिपीडने स एवाह । यस्त्वाधिं कर्म कुर्वाणं बाधा

दण्डेनमर्मभिः। पीडयेद्धुत्तमर्णेचैवम्प्राप्नुयात्पूर्वसाहसमिति। आधावन्यथाकरणे याज्ञवल्क्यः। नष्टोदेयोविनष्टश्चदैव
राजकृताद्दृतेइति। नष्टः विकृतिङ्गतःपूर्ववत्कृत्वादेयः। विनष्टः आत्यन्तिकनाशम्प्राप्तःसोऽपिदेयोमूल्यादिद्वारेण। दै
वमग्न्युदकोद्देशोपप्लवादि तत्कृतान्नाशाद्विना। तथास्वापराधरहिताद्राजकृतादपिविनाशाद्विनेत्यर्थः दैवराजकृतेतु
नाशेसवृद्धिकम्मूलन्दाप्यं स्वधमर्णेनाध्यन्तरंवा। तथाचस्मृतिः। स्तेनस्वापहृतेक्षेत्रेराज्ञाचैवापहारिते। आधिरन्यो
ऽथकर्तव्योदेयंवाधनिनेधनमिति। तत्रस्तेनस्वापहृतइतिदैवकृतोपलक्षणम्। बृहस्पतिरपि। दैवराजोपघातेनयत्राधि
नाशमाप्नुयात्। तत्राध्यन्तरंदापयेद्दन्यंशोधयेद्वाधनंचर्णीति। राजोपघातोऽत्रउच्छृङ्खलेनराज्ञाहृतत्वरूपः। नतुधनिका
पराधनिमित्तकः। अतएवव्यासः। दैवराजोपघातेतुनदोषोधनिनःक्वचिदिति। कात्यायनोऽपि। नचेद्धनिकदोषेणविन
ष्टेद्वाम्रियेतवा। आधिमन्यंसदाप्यःस्याद्दृष्टान्मुच्येतनर्णिकइति॥ विनष्टेतन्नश्येत्। म्रियेतेतिपश्वाद्यभिप्रायेण। कदा
चनतस्माद्दृष्टान्मुच्यतेत्यर्थः। आधेर्विनाशेतन्मूल्यन्देयम्। तथाचव्यासः। गृहीतृदोषान्नष्टश्चेद्धन्योहेमादिकोभवेत्।
यदृणंसलाभंसंशोध्यतन्मूल्यन्दापयेद्धनीति। सलाभमृणंसंशोध्यसम्यग्विचार्यविनष्टाधेर्मूल्यन्दत्वासवृद्धिकन्धनंगृह्णी
यात्। अन्यथामूलनाशइत्यर्थः। अतएवनारदः। विनष्टेमूलनाशःस्याद्दैवराजकृताद्दृतइति। हारीतोऽपि। आधौ
नष्टेधनंनष्टंभवेत्धनिकस्याधिरेवचेति। भोगेनविकृतिङ्गतस्याधेस्तथैवापियोमूलनाशमाहबृहस्पतिः। भुक्त्वाऽसारतामाप्ते
मूलहानिःप्रजायतइति। वह्नमूल्याधिनाशेतुसलाभकरणाद्दुपरिआधिमूल्यमाधात्रेदेयम्। तथाचसएव। वह्नमूल्यो
ऽथवनष्टाश्चाधिकन्तत्रतोषयेत्इति। नचतोषयेदितिवचनाद्यावताधनेनाधातातुष्यतितावद्धनन्देयमितिशङ्कनीयम्। यत
आहमनुः। मूल्येनतोषयेच्चैनमाधिस्तेनोऽन्यथाभवेदिति। सलाभकरणापगतावशिष्टांशेनेत्यर्थः। यद्वाऽधमर्णःसलाभकरणा
गावशिष्टंमूल्यमधमर्णायदत्वाततोषयतितदाधिप्रत्यर्पणप्रतिभूर्मूल्येनाधमर्णन्तोषयेत्। तथाचहारीतः। स्वादकेऽपि

न हीनञ्चेल्लग्नकोविनिवार्य्यदि । मूल्यन्तत्सम्भवेद्देयंनवृद्धिं दातुमर्हतीति । आधिकृतस्यधनस्यप्रीतिदत्तधनस्यवाकारितवृद्धि
सम्भवादित्यभिप्रायः ॥ खादकोबन्धखादकः । आधिनाशकःतत्समर्थइतियावत् । लग्नकःप्रतिभूः । मूल्यंनाशितस्याधेर्मूल्यम् ।
यद्वाधमर्णोवत्सावृद्धिं गृह्णातितदागृहीतवृद्ध्यंशकेमहापराधानुसारन्दण्डन्दद्यात् । तथाचमनुः । द्विगुणांत्रिगुणांवापि
यःसाधयतिलग्नकम् । राजगामितुतद्द्रव्यंसाधकोदण्डमर्हतीति । यःसाधयतिलग्नकंलग्नकाद्यःसाधयतीत्यर्थः । लग्नक
ग्रहणमुत्तमर्णस्याप्युपलक्षणार्थं । अविद्यमानवृद्धिमाधनस्येत्वमर्णेऽपिसमानत्वात् । यत्तुउत्तमर्णेनाधिनाशेपिकृत्स्नापमूल्यकं
भेनाधमर्णादुद्धृतव्यमिष्टानिसोऽपिदण्डभागित्याचक्षाणाधनः । आधिदृष्ट्येनलेख्येनभुक्तेयद्द्विकाकृती । तत्पौतस्यम्प्रापतियनिता
आधिलेख्यमनुलमयेदिति ॥ ६ मन्दखं ॥ चरविकवृत्यभोगद्रव्यनिष्कृत्यर्थवृद्धिहानिरपुनर्येतिस्मृतिचन्द्रिकायाम् । सम्य
यह्स्यमाणस्याप्याधावसारताकृतेसतिचर्हाणकेनधनमाभ्यन्तरंवाउत्तमर्णायदेयमित्याहनारदः । रक्ष्यमाणोपियत्राधिः
कालेनेयादसारतां । सवृद्धिकमूल्यद्रव्यापर्याप्ततांकृचिदेकसंवत्सरभववृद्धिसहितमूलद्रव्यापर्याप्ततामसारतामाकृताधि
यम् । एतादृशविशेषविकल्पमेकारणाभावात् । याज्ञवल्क्योऽपि । आधेःस्वीकरणात्सिद्धीरक्ष्यमाणोऽप्यसारतां । यातश्चेद
न्यआधेयोधनभाग्वाधनीभवेदिति । आधेःस्वीकरणादुपभोगात्सिद्धिर्नलेख्यमात्रेणेत्यर्थः । एतदेवाभिप्रेत्याहनारदः ॥ आ
धिस्तुद्विविधःप्रोक्तोजङ्गमस्थावरस्तथा । सिद्धिरस्योभयस्यापिभोगोयद्यस्तिनान्यथेति । गोप्याधेर्भोगाभ्यस्वीकारःभोग्याधेः
फलभोगः । एतच्चाधेर्भोगात्सिद्धिप्रतिपादनम् । आधेःप्रतिग्रहक्रीतेपूर्वानुबलवत्तरेत्येवमादिवाक्योक्तनिर्णयार्थम् ॥ आनस
वहयोर्धनिकयोर्दुष्टाधमर्णिकेनएकस्यवस्तुनआधीकरणेभोगान्निर्णयइत्याहुर्विष्णुः । ययोर्निक्षिप्तआधिस्तौविवदेतांव
दानरौ । यस्यभुक्तिर्जयस्तस्यबलात्कारंविनाकृतेति । द्वयोरपिभोगस्यवैनिर्णयप्रकारमाहबृहस्पतिः । तुल्यकालेनिखृष्टानां
लेख्यानामाधिकर्मणि । येनभुक्तस्यवेत्पूर्वंतस्याधिर्बलवत्तरइति । निवृष्टानांकृतानांलेख्यानांमध्येप्रीतिशेषः । प्रथम

र्थः । तुल्यकालोपपन्नानां लेख्यानां सद्भावसाम्येऽपि भोग्यादि विशेषे भोगाधिक्ये कृष्टाकृष्टानां बलाबलधर्मे निबन्धनात् बलवत्तायुक्तेति ॥ बृहस्पतिः । क्षेत्रमेकं द्वयोर्वेत्ति लेख्यं तत्समकालिकम् । येन भुक्तं भवेत्पूर्वं तस्य तत् सिद्धिमाप्नुयादिति । क्षेत्रग्रहणमाधिमात्रोपलक्षणम् ॥*॥ यत्राधिविशेषे द्वयोरपि भोगाभावस्तत्र भोगार्थं द्वयमप्राप्तं तत्र निर्णयप्रकारमाह वसिष्ठः । यद्येकदिवसे तौ तु भोक्तुकामावुपागतौ । विभज्याधिः समन्तेन भोक्तव्य इति निश्चय इति । तेन ताभ्यामित्यर्थः ॥ द्वयोरेकमाधिं कुर्वतोऽधमर्णस्य दण्डमाह कात्यायनः । आधिमेकं द्वयोर्यस्तु कुर्यात्का प्रतिपद्भवेत् । तयोः पूर्वकृतं यात्स्यात्कर्त्ता चौरदण्डभागिति ॥ चटायत्रहस्तोपक्रमत्वादाधिक्रियाप्रतिपदिष्युच्यते । पूर्वकृतमपूर्वाद्युपादानादिनाविद्धं आधिविशेषे दण्डविशेषमाह विष्णुः । गोचर्ममात्राधिकामभुवं मन्यस्याधीकृता मन्यस्य यः प्रयच्छेत्स वध्यः ऊनां चेत्षोडश सुवर्णान्दण्ड्य इति । उपादानादियोगपद्यत्वाह बृहस्पतिः । तुल्यकालोपस्थितयोर्द्वयोरपि सम्भवेदिति उपस्थितयोरुपादानादिकं ज्ञेयमितिशेषः ॥७॥ साक्षिलेख्यसिद्धयोर्लेख्यसिद्धं बलवदित्याह । कात्यायनः । आधानं विक्रयो दानं लेख्यसाक्षिकृतं यदा । एकक्रियाविरुद्धं तु लेख्यं तावापहारकमिति । लेख्य साक्षिकृते । लेख्य साक्षिविरुद्धम् । अपहारकं बलवत् । लेख्य सिद्धस्याविशेषेऽपि बलाबलमाह स एव । अनिर्दिष्टं सुनिर्दिष्टमेकत्र यदि लेखितम् । विशेषलिखितं ज्यायइति कात्यायनोऽब्रवीत् इति । एकत्र धाधीकरणादौ । विशेषलिखितं निर्दिष्टं लिखितं अनिर्दिष्ट लिखितात्ज्यायोबलवदित्यर्थः । लेख्ये निवेशितं लिखितम् । अनिर्दिष्ट निर्दिष्ट पदयोरर्थमाह स एव । योऽविद्यमानमधनमनिर्दिष्ट स्वरूपकम् । आकाशभूतमाद्ध्यादादिष्टं नैव तद्भवेत् । यद्यनदास्यविद्योतनादादिष्टं विनिर्दिशेत् इति । प्रथमः पादपूरणार्थः । अनिर्दिष्ट स्वरूपकमनिरूपितस्वरूपकम् । आकाशभूतमविद्यमानस्वभावम् । अयमर्थः । आधातुरधीकरणकाले यद्धनं विद्यमानेन निरूपितस्वरूपं च तद्धनमाधित्वेनादिष्टं सन्निर्दिष्टमित्युच्यते । तद्विपरीतं तु धनमाधित्वेन कथ्यमानमनिर्दिष्टमिति । आधीकरणकाले विद्यमानत्वसाम्येऽप्याह । स ए

घ। यस्तु सर्वस्वमुद्दिश्य प्राक् पश्चान्नाम चिह्नितम्। आद्ध्यात्तत्र यत्तस्य चिह्नितं बलवत्तरमिति। यः पूर्वमविशेषेण सर्व
स्वमाधित्वेनोद्दिश्य कस्यचिद्धस्ताद्द्रव्यं गृहीत्वा पश्चाल्लेखनसमये विशेषेण क्षेत्रादिकमेव लेखयति तत्रोत्तरकालं विवादे सति
यावत्पश्चाल्लेखितन्तावदेव प्रमाणं नोद्दिष्टमित्यर्थः। चिह्नितमिति विशेष्यमुत्तरक्रियोपलक्षणार्थम्। तेन यदि प्रथममाधिमादा
य धनी धनन्दत्वा पश्चाद्बन्धकत्वं विज्ञाय आधिमन्तरेणैवातत्कर्तुं क्षयिकत्वमास्तामिति प्रकारान्तरेण पुनः क्रियाङ्करोति तत्र तदानिम
धिक्रिया बलवतीत्यवगन्तव्यम्। अत एवाह याज्ञवल्क्यः। सर्वेष्वर्थविवादेषु बलवत्युत्तरा क्रियेति। उत्तरा क्रिया पूर्वस्याः क्रियायाः
बाधिका भवतीत्यर्थः। निर्दिष्टत्वाविशेषेऽप्युत्तरक्रियाबलवत्त्वस्यापवादमाह स एव। आधौ प्रतिग्रहे क्रीते पूर्वा तु बलवत्तरेति।
एकमेव क्षेत्रमेकस्याधिं कृत्वा किमपि गृहीत्वा पुनरन्यस्याधिं कृत्वा किमपि गृह्णाति तत्र पूर्वस्यैव तत्क्षेत्रम्भवति नोत्तरस्येत्यर्थः। ए
वम्प्रतिग्रहे क्रये च योजनीयम्। स्वामित्वप्रतिबंधावगमाभ्याम्प्रागेव पूर्वस्याः क्रियायाः कृतत्वादिति भावः। एतदेवाभिप्रेत्य वसि
ष्ठोप्याह। यः पूर्वं तरमाधाय विक्रीणीते तु तम्पुनः। किमेतयोर्बलीयः स्यात्प्राक्तनम्बलवत्तरमिति। आद्यादीनां यौगपद्येप्याह
स एव। कृतं यत्रैकदिवसे दानमाधानविक्रयं। त्रयाणामिति सम्बन्धे कथं तत्र विधिं नयेत्। त्रयोपि तद्धनं स्वर्ग्ये विभजेयुर्यथां
शतः। उभौ क्रियानुसारेण त्रिभागेन प्रतिग्रहीति॥*॥ आधिकृतस्य धनस्य स्वत्वनिवृत्तिकालमाह याज्ञवल्क्यः। आधिः प्रणश्ये
द्द्विगुणे धने यदि न मोक्ष्यते। कालेकालकृतो नश्येत्फलभोग्यो न नश्यतीति॥ प्रयुक्ते धने स्वकृतया वृद्ध्या कालक्रमेण द्विगुणे जाते
ऽधमर्णेन तावद्धनन्दत्वा यदि न मोक्ष्यते तदासौ नश्येदधमर्णस्य स्वत्वं न भवेत्किन्तूत्तमर्णस्यैव भवेत्। यस्तु कालकृतः कृतकालः।
आहिताग्न्यादिषु पाठात्कालशब्दस्य पूर्वनिपातः। यद्वा जातिकालसुखादिभ्यः परा निष्ठा वाच्येत्यनेन वार्त्तिकेन निष्ठान्तस्य परनि
पातः। स यदि सम्प्रतिपन्ने कालेन मोक्ष्यतेऽधमर्णेन तदा सोपि पूर्ववन्नश्येत्। फलभोग्यः क्षेत्रादिः कदापि न नश्येत्किन्तूत्तम
र्णेन यावल्लब्धधनं न प्राप्यते तावदुत्पन्नफलमेव भोक्तव्यमित्यर्थः। अत्र काले कालकृतो नश्येदित्यनेन कृतकालस्योभयविधस्याधेस्त

त्कालातिक्रमेणाप्युक्तः । फलभोग्यो न नश्यतीत्यनेनाकृतकालस्य भोग्याधेर्नाशाभाव उक्तः । पारिशेष्याद्गोप्याधिः प्रयोगवृद्धिश्चेत्कृतकालगोप्याधिविषयमवतिष्ठते । द्वैगुण्यातिक्रमेण च विनाशे चतुर्दशदिवसप्रतीक्षा कर्तव्येत्याह तदुर्थास बृहस्पती । हिरण्ये द्विगुणीभूते पूर्णे काले कृतेऽवधौ । बन्धकस्य धनी स्वामी द्विसप्ताहं प्रतीक्ष्य तु । तदन्तरा धनं दत्त्वा ऋणी बन्धमवाप्नुयादिति । तत्र स्यात्कारणात् अन्तरा चतुर्दशदिवसमध्य इत्यर्थः । अत्र द्वैगुण्यग्रहणं त्रैगुण्यादीनामुपलक्षणार्थम् । बन्धामाया बृहस्पतिवचने शान्तलाभ इति सामान्येनैवाभिधानात् । नन्वाधेर्दानादिस्वत्वनिवृत्तिकारणस्य प्रतिग्रहादिस्वत्वापत्तिकारणस्य चाभावादाधिः प्रणश्येदित्ययुक्तमिति चेन्नैवम् । न केवलं दानादिरेव स्वत्वनिवृत्तिकारणं प्रतिग्रहादिरेव च स्वत्वापत्तिकारणं किन्तु द्वैगुण्येन निरूपितकालप्राप्तौ चकृत्याधानमपि । तथा याज्ञवल्क्यवचनेनैवाधमर्णोत्तमर्णयोः स्वत्वनिवृत्तिस्वत्वापत्तिकारणं किन्तु पक्षयोः कारणत्वावगमाल्लोकाच्च । न चानवाधेः कालसंरोधान्निसर्गोऽस्ति न विक्रय इति मनुवचनन्तस्यायमर्थः । कालेन संरोधः कालसंरोधः चिरकालावस्थानं तस्मात्कालसंरोधात् आधेर्न निसर्गोऽस्ति नान्यत्राधिकरणमस्ति न च विक्रय इति तेन विरोध इति वाच्यम् । तस्य बाधोऽसोपकार इत्याद्युपक्रम्य कथनेन तस्य भोग्याधिविषयत्वात् । यत्तु बृहस्पतिपूर्णावधौ शान्तलाभे बन्धे स्वामी धनी भवेत् । अनिर्गते दशाहे तु मूल्यं मोचयितुमर्हतीति दशदिवसप्रतीक्षणमुक्तं तद्द्रव्यादिविषयम् । हिरण्ये द्विगुणीभूत इत्यादि बृहस्पतिनैव विशेषोपादानाद्धिरण्यविषयम् । शान्तलाभे त्रैगुण्यादिपरमवृद्ध्यानिवृत्तलाभे । यत्तु पुनस्तेनैवोक्तं गोप्याधिर्द्विगुणादूर्ध्वं कृतकालस्तथावधेः । आवेद्य धनिनो गृह्य कुले भोक्तव्यस्तदनन्तरमिति । तत्तु लाभपर्यवसानोत्तरं चाधेर्भोगमात्रविधिपरं न पुनः स्वत्वापत्तिपरम् । तथा च नवाधेः संरोधवचनयोः परस्परं विरोधः नापि व्यासबृहस्पतिवचनयोः । यदा तु शान्तलाभे धने बन्धकस्य नयैवावस्थितस्य मोचनात्प्रागधमर्णस्य मरणादि भवेत्तदा किं कर्तव्यमिति परीक्षायामाह बृहस्पतिः । हिरण्ये द्विगुणीभूते मृते नष्टेऽधमर्णिके । द्रव्यं तदीयं संगृह्य विक्रीणीत ससाक्षिकम् ॥ रक्षेद्वा

तमूल्यन्तु दद्यादृणं सवृद्धि ॥ स्वरूपानुरूपमन्तरेणोपगृहीतानामनुवर्जयेदिति। हिरण्ये द्विगुणीभूते पश्चादाधिमोक्षणादर्वागि
ति शेषः। हिरण्यग्रहणं पश्वादीनामुपलक्षणम्। द्विगुणीभूत इति त्रैगुण्यादीनामुपलक्षणम्। नष्टे कुतश्चिद्दृते चिरमपि
ज्ञाने द्रव्यबन्धकीकृतन्द्रव्यम्। स्वरूपानुरूपं द्विगुणीभूतद्रव्यपर्याप्तम्। परतः द्रव्याद्यादृद्धं। अन्यमनुवर्जयेत्। स्वशिष्टं स्व
स्मिवाम्यवे तदभावे सर्वे समर्पयेदित्यर्थः। अतएव कात्यायनः। आधानाय च यैनस्याद्धनी बन्धं निवेदयेत्। राज्ञस्ततः स्वविज्ञा
तो विक्रेय इति धारणा। सवृद्धिकं गृहीत्वा तु शेषं राजन्यथार्पयेदिति। राजन्यथार्पयेदिति न्यायाप्राप्तस्याभावविषयम्। स
त्सद्भावे तत्रैवार्पणस्य न्याय्यत्वात्। यत्तु तेनार्पणं क्रियेते तेनैव यदि सवृद्धिकं बन्धनं नष्टं बन्धं गृह्णाते तदा न विक्रयः प्रयोजन
स्यासिद्धत्वात्। अस्मिन्विषयेऽन्यत्राधिकरणं न विरुद्धं दण्डापूपन्यायात् किंत्वन्यत्राधिं दत्वा मूल्यमात्रं गृहीतव्यम्। ननु स
सवृद्धिकम्। यदाह प्रजापतिः। धनी धनेन तेनैव परमाधिं नयेत्स्वादिति। कृत्वा तदाधिलिखितं पूर्वं वास्य समर्पयेदिति। य
द्धं धस्वामिभिर्धनम्प्रयुक्तं तस्यैव धनेन परस्य निकान्तरमाधिं नयेत् ननु सवृद्धिकेनेत्यर्थः। अयश्चाप्याधिर्धनस्य द्वैगुण्येन
तिप्रतिपन्नो नु द्वैगुण्यादर्वागपि द्रष्टव्यः। क्वचिद्गोप्याधे द्वैगुण्यातिक्रमेऽपि काले विकल्पस्य नाशो न भवतीत्याह याज्ञवल्क्यः।
चरित्रबन्धककृतं सवृद्ध्या दापयेद्धनं। सत्यङ्कारकृतं द्रव्यं द्विगुणं प्रतिदापयेदिति॥ चरित्रं शोभनचरितं तेन यद्बन्धकन्तच्चरि
त्रबन्धकं तेन यद्द्रव्यं स्वाधीनं कृतमपराधीनं वा कृतं तच्चारित्रबन्धकं कृतम्। अयमर्थः। अधमर्णमधनिनम्बुद्ध्वाम्न्काररानेन बहु
मूल्यमपि बन्धकीकृत्याल्पमेव धनं स्वाधीनं कृतं। यदि वा उत्तमर्णेनाधमर्णस्य निर्दोषतामवगम्याल्पमेव बन्धकं गृहीत्वा बहु धनम
धमर्णाधीनं कृतं तत्र दातव्यं धनं सवृद्धिकं वृद्धिसहितं दापयेन्न त्वाधिनाश इति। अथवा चरित्रं शोभनचरितं गङ्गास्नानादि अग्निहोत्रा
दिजनितापूर्वं तद्बन्धकीकृत्य गृहीतं चरित्रबन्धकीकृतमिति। एतादृशं बन्धकं द्विगुणीभूतेऽपि द्रव्येन नश्यति किन्तु द्विगुणीभूतं द्र
व्यमेव दातव्यमित्यभिप्रायः। तथा सत्यङ्कारकृतं। करणङ्कारः। भावे घञ्। सत्यस्य कारः सत्यङ्कारः। कारे सत्याऽगदस्येति मुम्

। तेनकृतंसत्यङ्कारकृतम् । तदपिद्विगुणमेवदेयन्नाधिनाशः । बन्धकार्पणसमयएवद्विगुणीभूतेपिद्रव्येमयाद्रव्यमेवद्विगुणं
न्दातव्यंनाधिनाशइतिसमयेकृतेद्विगुणीभूतन्द्रव्यमेवदातव्यंनाधिनाशइत्यभिप्रायः । क्रयविक्रयादिनिर्वाहाययदङ्गुलीयका
दिपरहस्तेसमर्पितन्तत्सत्यङ्कारकृतन्तच्चाङ्गुलीयकादिगृहीताथवस्यामतिक्रामन्तदेवाङ्गुलीयकादिद्विगुणम्प्रतिपादयेत् । इ
तरस्त्वदङ्गुलीयकादिकमेवजह्यात् । चरित्रबन्धादिस्थलेद्वैगुण्यादूर्ध्वमाधिनाशोनभवत्यतीतिबुद्ध्याऽधमर्णेनमोचनेविलं
बेनकार्यः । तथाचव्यासः । गोप्याधिंद्विगुणादूर्ध्वम्मोचयेदधमर्णिकइति । अस्मिन्नेवविषयेऽधमर्णासम्भवेसंनिधानेउत्तम
र्णेनाधिर्विक्रेतव्यः । तथाचयाज्ञवल्क्यः । विनाधारणकाद्वापिविक्रीणीतससाक्षिकमिति । धारणकात् अधमर्णात् । अयमर्थः । अ
सन्निहितेऽधमर्णेउत्तमर्णःसाक्षिभिस्तदाप्तैश्चसहतमाधिंविक्रीयधनंगृह्णीयादिति । वाशब्दोव्यवस्थितविकल्पार्थः । यदर्ण
दानकालेद्विगुणीभूतेपिद्रव्येद्रव्यमेवदेयम् । नाधिनाशइतिपरिभाषितन्तदाऽयम्पक्षः । इतरथाऽऽधिःप्रणश्येद्विगुणइत्य
नेनोक्तआधिनाशपक्षइति । यदिद्वैगुण्यावधिकालयोरर्वागेवाधिमोचनार्थमधमर्णःसमायातितदाउत्तमर्णेनमोक्तव्यो
नवृद्धिलोभेनस्थापनीयइत्याहबृहस्पतिः । धनंमूलीकृतन्दत्वायदाधिम्प्रार्थयेदृणी । तदैवतस्यमोक्तव्यस्त्वन्यथाऽदण्डभाग्ध
नीति । मूलीकृतं अधमर्णेनदेयन्धनम् । तच्चभोग्याधौमूलमात्रम् । गोप्याधौतुसवृद्धिकन्दत्वाऽधमर्णोयदाऽऽधिम्प्रार्थयतेतदा
धनिनासमोक्तव्यः । अन्यथादोषभाक्स्तेयदोषभागित्यर्थः । यदाहयाज्ञवल्क्यः । उपस्थितस्यमोक्तव्यआधिस्तेनोऽन्यथाभ
वेदिति । स्तेनःस्तेनवद्दण्ड्यइत्यर्थः । उत्तमर्णस्यासन्निधानेतदाप्तहस्तेधनन्दत्वाऽऽधिमधमर्णोगृह्णीयात् । तथाचसएव
। प्रयोजकेऽसतिधनंकुलेन्यस्याधिमाप्नुयादिति । प्रयोजकेउत्तमर्णेऽसतिसन्निहितेसतितत्कुलेतदाप्तहस्तेसवृद्धिकन्धनं
निधायाधमर्णःस्वीयमाधिंगृह्णीयादित्यर्थः । क्वचित्प्रयोजकोऽसतिकुलइतिपाठः ॥ तत्रप्रयोजकोधनप्रयोक्ताऽसतिधनि
कइतिशेषः । आप्नुयात्तदानीमेवेतिशेषः । तथाचउत्तमर्णेऽसन्निहितेतदाप्तहस्तेसवृद्धिकन्धनंनिधायप्रयोजकोधनप्र

थोक्ताऽधमर्णस्तदानीमेवलाधिमाप्नुयादित्यर्थः । यदितुतदाप्नोपिनसन्निहितःअधमर्णस्यचाधिविक्रयेणाग्रिमवृद्धिव्यवच्छेदायधनदानेच्छाभवतितदाकिंविधेयमितीक्षायामाधिमूल्यम्परिकल्प्यतद्गृहेएवाधिंस्थापयेत्तथाचस्थापनदिनमारभ्यतद्धनन्नवर्द्धतइत्याहसएव । तत्कालकृतमूल्योवातत्रनिष्ठेदवृद्धिकइति । निष्ठेदाधिरितिशेषः । तत्रोत्तमर्णान्तकुलेवा । एतच्चाधिमोचनंयदिभोग्याधिर्गोप्याधिश्चतावताकालेमोचनीयइत्यवधिंकृत्वास्थापितस्तदाधमर्णानावधेरर्वाग्लोभेननकर्तव्यं । इदमेवाभिप्रेत्यफलभोग्याधिविषयेव्यासआह । फलम्भोग्यम्पूर्णकालन्दत्वाद्रव्यन्तुसामकमिति । ऋणीबन्धमवाप्नुयादित्यनुषङ्गः । मूलमात्रन्दत्वापरिभावितकालमापन्नम्फलभोग्याधिमाप्नुयादित्यर्थः । फलभोग्यग्रहणमाध्यन्तरोपलक्षणम् । सामकग्रहणंसवृद्धिकस्याप्युपलक्षणं ॥ ● ॥ भोग्याधिविषयेकञ्चिद्विशेषमाहवृहस्पतिः । क्षेत्रादिकंयदाभुक्तमुत्पन्नमधिकन्ततः । मूलोदयम्प्रविष्टञ्चेत्तदाधिम्प्राप्नुयादृणी ॥ परिभाष्ययदाक्षेत्रम्प्रदद्याद्धनिकेऋणी । व्ययैतच्छान्तलाभेऽर्थेभोक्तव्यमितिनिश्चयः । प्रविष्टेसोदयेद्रव्येप्रदातव्यंपुनर्ममेति ॥ अधिकंमूलापेक्षयाऽधिकंक्षेत्राद्युत्थव्ययद्रव्यम् । ततःतस्मात्क्षेत्रादेःउदयोवृद्धिः । शान्तलाभेऽर्थेपरमवृद्धिसहितेमूलद्रव्ये । इयंनिमित्तसप्तमी । परमवृद्धिसहितंक्षेत्राद्युत्थव्ययसहितमेतन्मूलद्रव्यमस्मिन्क्षेत्रेउपभोक्तव्यम् । उपभोगेनचसवृद्धिकधनेप्रविष्टेत्वयैक्षेत्रम्भोक्तव्यमितिपरिभाष्ययदाक्षेत्रादिकंबन्धकीकुर्यात्तदाक्षेत्रादिफलभोगेनक्षेत्राद्युत्थव्ययसहितेसवृद्धिकेधनेप्रविष्टेऋणीकिमप्यदत्वातमाधिम्प्राप्नुयादित्यर्थः । एवंविधस्याधेःपूर्वगृहीतेऋणेकालक्रमेणपरांवृद्धिम्प्राप्तेसतितदनन्तरंयस्सवृद्धिकमूलद्रव्योपभोगार्थंक्षेत्रादिराधिःक्रियतेसक्षेत्राद्युत्थव्ययद्रव्यसहितसवृद्धिकमूलोपभोगानन्तरम्धनिकेनाधमर्णायप्रत्यर्पणीयः । तथाचयाज्ञवल्क्यः । यदातुद्विगुणीभूतमृणमाधौतदाखलु । मोच्यआधिस्तदुत्पन्नेप्रविष्टेद्विगुणेधनेइति । आधौतदात्तमइतिशेषः । अयमेवक्षयाधिरित्युच्यते । इत्याधिविधिः ॥ ● ॥ अथप्रतिभूः । तत्रप्रातिभाव्यंनामविश्वासार्थंपुरुषान्तरेणसहसमयः । त

ङ्गेदानाह बृहस्पतिः । दर्शने प्रत्यये दाने ऋणिद्रव्यार्पणे तथा । चतुःप्रकारः प्रतिभूः शास्त्रे दृष्टो मनीषिभिरिति ॥ प्रत्य
यो विश्वासः । दानं ऋणापाकरणार्थमर्थार्पणम् । ऋणिद्रव्यार्पणं ऋणिनो यद्द्रव्यं गृहोपकरणादि तदर्पणम् । चतुष्प्र
काराणां प्रतिभुवां प्रातिभाव्याङ्गीकारप्रकारं दर्शयति स एव । आहैको दर्शयामीति साधुरित्यपरोऽब्रवीत् । दाताहमेतद्द्रविण
मर्पयाम्यपरोऽब्रवीदिति ॥ एको दर्शनप्रतिभूरहमेनं पलायनप्रवृत्तं दर्शयिष्यामीत्याह । अपरः प्रत्ययप्रतिभूरेष साधुर्वि
त्वां प्रतारयिष्यति यतोऽयं श्रोत्रियपुत्रोऽस्य सर्वशस्यसम्पन्नो ग्रामोऽस्ति मत्प्रत्ययेनास्य द्रव्यं देहीति ब्रवीति । दानप्रतिभूर्यद्ययं
धनं न ददाति तदा सवृद्धिकमृणमहं दास्यामीति । अपरः ऋणिद्रव्यार्पणप्रतिभूर्यद्ययं न ददाति तदाहमेतदीयं गृहोपकरणा
दिकमर्पयिष्यामीति कथयतीत्यर्थः । दर्शनप्रतिभुवा यदा धनिकस्य धारणिकदर्शनापेक्षा तदैव स दर्शनीय इत्याह कात्याय
नः । दर्शनप्रतिभूर्यस्तु देशे काले च दर्शयेत् । यस्मिन्देशे काले च धनिकस्तद्दर्शनमपेक्षते तत्रैव दर्शयेत् अधमर्णमिति शेषः
। दर्शिते च तस्मिन्धनिकेन प्रातिभाव्यात्स मोक्तव्य इत्युत्तरार्द्धेनाह स एव । यद्यसौ दर्शयेत्तत्र मोक्तव्यः प्रतिभूर्भवेत् । एवम्प्र
त्ययादिप्रतिभुवोऽपि तदविसंवादे मोक्तव्याः । अन्यथा धारणिकं देयं धनं दाप्या इत्याहतुः कात्यायनबृहस्पती । यो यस्य प्रति
भूस्तिष्ठेद्दर्शनायेह मानवः । अदर्शयन्स तं तस्मै प्रयच्छेत्स्वधनादृणम् ॥ आद्यौ तु वितथे दाप्यौ तत्कालावेदितं धनम् । उत्त
रौ तु विसंवादे तौ विना तत्सुतौ तथा । यत्तु योगीश्वरेण प्रतिभुवां त्रैविध्यमेवोक्तम् । दर्शने प्रत्यये दाने प्रातिभाव्यं विधीयते । तद्दा
नार्पणयोरनतिभेदाभिप्रायेण । दाने आद्यौ तु वितथे दाप्यौ वितरस्य सुता अपि । वितथे । दर्शनप्रत्यये । दाने विसंवादे इतर
स्य सुता अपीति वचनात्पूर्वयोः सुता न दाप्याः । सुता इत्यभिधानात्पौत्रा इत्युक्तम्भवति दानं स्वधनार्पणं धनिकाय । अर्पणन्तु
धारणिकधनमानीय तस्यार्पणं धनिकस्य स्वधनलाभे उभयत्रानविशेषः । अत एव सूक्ष्मभेदविवक्षया पञ्चप्रकारा अपि प्रति
भुवो हारीतेनोक्ताः । अभये प्रत्यये दाने उपस्थाने प्रदर्शने ॥ पञ्चस्वेषु प्रकारेषु ग्राह्यो हि प्रतिभूर्बुधैः ॥ अभयमुपद्रववारणं

। उपस्थानमत्र धारणिकधनस्य धनिकायानीयार्पणं न दर्शनं तस्य पृथक्त्वं दर्शनात्। पञ्चस्वित्यनन्वयाच्च। व्यासस्तु। सप्तभि
र्विषयैः सप्तप्रकारं प्रतिभुवमाह। लेख्ये कृते च दिव्ये वा दानप्रत्ययदर्शने। गृहीतबन्धोपस्थाने वर्णिद्रव्यार्पणे तथा॥ प्रतिभू
र्ग्राह्य इत्यत्र प्रकृतं। कात्यायनेऽपि। दानोपस्थानवादेषु विश्वासशपथाय च। लग्नकं कारयेदेवं यथायोग्यं विपर्यये॥ वादो वि
वादस्तत्र प्रतिभूग्रहणम्। उभयोः प्रतिभूर्ग्राह्यः समर्थः कार्यनिर्णये इति योगीश्वरेणाप्युक्तं तच्च प्रागेव व्याख्यातं। दर्शनप्रत्य
यदानेषु यथायथं सर्वेषामन्तर्भावसम्भव इति परमार्थः। दर्शनप्रतिभुवे नष्टधारणिकान्वेषणाय कालावधिर्देय इत्याह बृहस्प
तिः। नष्टस्यान्वेषणे कालं दद्यात् प्रतिभुवे धनी। देशानुरूपतः पक्षं मासं सार्धमथापि वा॥ सार्धमासमिति परमावधिः। तथा च
कात्यायनः। नष्टस्यान्वेषणार्थं तु देयं पक्षत्रयं परम्। यद्यसौ दर्शयेत्तत्र मोक्तव्यः प्रतिभूर्भवेत्॥ काले प्रतीते प्रतिभूर्यदि तन्न
दर्शयेत्। स तमर्थं प्रदाप्यः स्यात् प्रेते चैष विधिः स्मृतः। परं परमावधिभूतम्। प्रतीते अन्वेषणाय परिकल्पिते प्रेते चैष विधिरिति
धारणिके मृते प्रतिभूस्तमर्थं प्रदाप्य इति विधिः। कालावधिविधेस्तत्रान्वयबाधात्। एतदपि दैवराजकृतप्रतिबन्धाभावे बोध्यम्
। अत एव कात्यायनः। दर्शनप्रतिभूर्यत्र देशे कालेन दर्शयेत्। निबन्धमावहेत्तत्र दैवराजकृतादृते॥ निबन्धमृणम्। दैवकृतो
दीर्घरोगमरणादिरूपः ऋणादानप्रतिबन्धः। राजकृतो बन्धनासेधदण्डादिरूपः। प्रतिभूभेदेन स्पष्टमाह नारदः। ऋणि
षु प्रतिकुर्वत्सु प्रत्ययेनाथ हापिते। प्रतिभूस्तद्धनं दद्यादनुपस्थापयंस्तथेति। ऋणिष्वधमर्णेषु प्रतिकुर्वत्सु असाध्येषु निर्धनत्वा
दिना ऋणमप्रत्यर्प्य यत्स्थितिः तदानप्रतिभूविषयम्। प्रत्यये विश्वासे हापिते विसंवादिते इति प्रत्ययप्रतिभूविषयम्। अनुपस्थाप
यन्नृणिनमदर्शयन्नृणिनः सकाशात् आधिमृणमप्यर्थी प्राप्नुवंस्तद्धनं बोत्तमर्णायानर्पयन्निति दर्शनद्रव्यार्पणप्रतिभूविषयमिति विवे
कः। हारीतः। विश्वासार्थं कृतस्त्वाधिर्न प्राप्तो धनिना यदा। प्रापणीयस्तदा तेन देयं वा धनिने धनम्॥ तेन बन्धकार्पणप्र
तिभुवा। तथा च पितामहः। आधिपालकृतस्त्वाधिर्भिन्नकार्योपलक्षणम्। न चेत्तद्धनिने दत्तस्तस्याधेस्तैः समर्पणम्॥ मै

राधिपालैराधिसमर्पणप्रतिभूर्मिः। बहुत्वमत्राविवक्षितम्। एवमभयाधिप्रतिभूष्वपितुल्यन्यायतयायोज्यम्। अभयप्रतिभूरधमर्णादुत्तमर्णस्यभयोपस्थितौतत्प्रतीकारमाचरेत्। तद्व्ययेनद्रव्यक्षतौतदीयन्तद्द्रव्यन्दद्यात्। प्रमाणप्रतिभूःप्रमाणप्रदर्शनङ्कारयेत्। अशक्तौविवादास्पदीभूतन्धनन्दद्यात्। वादप्रतिभूर्वादपराजितस्याधमर्णस्यदेयमुत्तमर्णायदद्यात्सराजपदाश्वराद्वइति। प्रतिभुविमृतेतत्पुत्रादीन्प्रत्याहयोगीश्वरः। दर्शनप्रतिभूर्यत्रमृतःप्रात्ययिकोपिवा। नतत्पुत्राऋणन्दद्युर्दद्युर्दानाययेस्थिता॥ दर्शनप्रत्ययेइत्यर्थस्यपूर्वश्लोकोक्तस्यैवस्पष्टीकरणमत्रेतिनपुनरुक्तिरितिमिताक्षरायामनरत्नेचोक्तं। वस्तुतस्तुतज्जीवतिसतिप्रतिभुविप्रेतेत्विदमितिनपौनरुक्त्याशङ्का। वितथइतितत्रात्रचमृतइत्युपादानात्स्मृतिचन्द्रिकाकारस्यापीदमेवाभिसंहितम्। प्रतिभूपुत्रादीनांविधिरितिप्रस्तावेलिखनात्। दानायथःस्थितप्रतिभूस्तत्पुत्रादद्युरित्यर्थः। वृहस्पतिरपि। आद्यौतुवितथेदाप्यौतत्कालावेदितन्धनम्। उत्तरौतुविसंवादेतौविनातत्सुतौतथेति। आद्यौदर्शनप्रत्ययदानविसम्वादे। उत्तरौदानर्णिद्रव्यार्पणप्रतिभुवौ। विसम्वादेद्वेषादिनाधनिकेनादानेतौविना। तयोर्देशगमनेमरणेच। अत्रतावितिद्विवचनान्तेनसर्वनाम्नादानर्णिद्रव्यार्पणप्रतिभुवोःपरामर्शः। सर्वनाम्नामसतिवाधकेसन्निहितपरामर्शकत्वात्। पूर्वोदाहृतदर्शनप्रतिभूर्यत्रेतियाज्ञवल्क्यवचनात्वतेनदर्शनप्रतिभूप्रत्ययप्रतिभूसुतैर्नतद्देयमितिवोद्धव्यम्। प्रतिभूपुत्रपौत्रयोर्मूलमात्रदानादानेत्वाह। कात्यायनः। प्रातिभाव्यागतम्पौत्रैर्दातव्यंननुतत्क्वचित्। पुत्रेणापिसमन्देयमृणंसर्वत्रपैतृकमिति। सर्वत्रप्रातिभाव्यागतमृणमित्यन्वयः। व्यासोपि। ऋणम्पैतामहम्पौत्रःप्रातिभाव्यागतंसुतः। समन्दद्यात्तत्सुतौतुनदाप्याविितिनिश्चयइति। पौत्रेणप्रातिभाव्यातिरिक्तम्पैतामहमृणंयावद्गृहीतमेवदेयम्। तथापुत्रेणप्रातिभाव्यागतम्पैत्र्यमृणंयावद्गृहीतमेवदेयम्। तयोःपौत्रपुत्रयोःसुतौप्रपौत्रपौत्रौयथाक्रममप्रातिभाव्यापात्तञ्चगृहीतधनैनदाप्याइत्यार्थः। यत्तुनारदवचनम्। खादकोवित्तहीनःस्याल्लग्नकोवित्तवान्यदि। मूलन्त

स्यभवेद्देयंनवृद्धिन्दातुमर्हतीति । तदपिखादकोऽधमर्णः । प्रतिभूर्यदि वित्तवान्मृतस्तदातत्पुत्रेणमूलमात्रन्देयंनवृद्धिरितिमृतपदाध्याहारेणव्याख्येयंविषयविशेषेदर्शनप्रत्ययप्रतिभुवोःपुत्रेणसवृद्धिकन्देयमित्याह । कात्यायनः । गृहीत्वा बन्धकंयत्रदर्शनेस्यस्थितोभवेत् । विनापित्राधनात्तस्माद्दाप्यःस्यात्तद्दृणंसुतइति । दर्शनग्रहणम्प्रत्ययस्योपलक्षणंसमानन्यायत्वात् । दर्शनेस्थितःदर्शनेप्रतिभूत्वेनस्थितइत्यर्थः । विनापित्रापितरिप्रेतेदूरदेशङ्गतेवेति । सुतग्रहणमुपलक्षणार्थम् । यस्यहस्तेवन्धकमायातितस्यसर्वस्यापितस्माद्बन्धकाप्रतिदानस्ययुक्तत्वादितिकेचित् । यत्तुदानप्रतिभुविप्रेतेदायादानपिदापयेदितिमनुवचनन्तत्रदायादशब्दोविशेषलक्षणयासुतविषयएवअन्यथासपिण्डमात्राभिधानेतत्सुतैर्नदाप्याविति निश्चयइत्यादिपूर्वोदाहृतवचनविरोधःस्यादिति । केचित्त्विदम्प्रतिभूवन्धकविषयम्पूर्वोदाहृतवचनानित्ववन्धकप्रतिभूविषयाणीतिविषयभेदान्नविरोधइत्याहुः । अनेकप्रतिभूदेयविषयेदानप्रकारमाहयोगीश्वरः । बहवःस्युर्यदिस्वांशैर्दद्युःप्रतिभुवोधनम् । एकच्छायाश्रितेष्वेषुधनिकस्ययथारुचीति ॥ एकच्छायाश्रितेषुएकस्याधमर्णस्यच्छायाम्प्रत्येकंसकलधनदायकत्वरूपसादृश्यमाश्रितास्तेषु । धनिकस्ययथारुचि । धनिकस्योत्तमर्णस्ययथारुचियथाकामंयमेवोत्तमर्णोयाचतेतमेवसर्वन्दद्यादित्यर्थः ॥ एचविशेषेतुसमंस्यादश्रुतत्वादितिन्यायेनात्रापियथांशमेवदद्युः ॥ एकच्छायाश्रितेषुत्वम्यकेषुयद्यन्यतरोदूरदेशङ्गतोमृतोवाभवतितत्रउत्तमर्णस्यचतस्मादेवग्रहणेच्छातदाप्रकारमाह । कात्यायनः । एकच्छायाप्रविष्टानान्दाप्योयस्तत्रदृश्यते ॥ प्रोषितेतत्सुतःसर्वम्पित्र्यमंशंमृतेतुसइति । प्रोषितेदेशान्तरगते । सर्वंसवृद्धिकमृणम् । मृतेतुपितुरंशंसवृद्धिकन्दद्यादित्यर्थः ॥ स्मृतिचन्द्रिकायान्तु । एकच्छायाश्रितेसर्वंदद्यात्तुप्रोषितेसुतः । मृतेपितरिपित्र्यंशंपरर्णेनवृहस्पतिरितिपठित्वाइत्थंव्याख्यातन्तथाहि ॥ सर्वम्परर्णमपिनपित्र्यंशमात्रमित्यर्थः ॥ ननुसर्वंसवृद्धिकमितिव्याख्येयम् । पुत्रेणापिसमन्देयमृणंसर्वन्तुपैतृकमितिवृहस्पतिस्मरणात् । समंमूलमात्रंएतच्चधनिकेच्छायाम्प्रोषितस्यपुत्रोमह्य

न्दद्यादित्येवमभिधायांसत्यंसर्वंदानविधानन्द्रष्टव्यं। असत्यान्धनिकेच्छायाम्पितं अप्रोषितपतिकेपुत्रोदद्यादितिवावगन्तव्यम्। परस्यपरस्यपितृव्यतिरिक्तस्यच्चर्णांपितरिमृतेतत्सुतःसत्यामपिधनिकेच्छायांसर्वन्नदातुमर्हतिकिन्तुपित्र्यंशमवृद्धिकमेवेतिब्रूतइत्यर्थइतिपरेणं अन्येषांप्रतिभुवामंशमितिमदनरत्नेप्रातिभाव्यापलापेदण्डमाह। योयस्यैवप्रतिभूर्भूत्वामिथ्याचैवतुगच्छति। धनिकस्यधनन्दाप्योराज्ञादण्डञ्चतत्समम्॥ कुर्याचेत्प्रतिभूर्वादमृषिकार्येऽर्थिनासह। सोपसर्गस्तदादण्ड्योविवादाद्द्विगुणन्धनमिति॥ उपसर्गोविप्लवकारीतिस्मृतिचन्द्रिकायाम्। प्रतिभूभ्योधनग्रहणेविशेषमाहवृहस्पतिः। नात्यन्तम्पीडनीयाःस्युर्दत्तान्दाप्याश्शनैश्शनैरिति॥७॥ अथप्रतिभूदत्तस्यप्रतिक्रियाविधिमाहकात्यायनः। यस्यार्थेयेनयद्दत्तंविधिनाभ्यर्थितेनतु। साक्षिभिर्भावितेनैवप्रतिभूस्तत्समाप्नुयादिति। यस्यप्रातिभाव्यकारयितुःकृतेयेनप्रतिभुवाधनिकादिभिर्याचितेनसाक्ष्यादिभिरङ्गीकारितेनयत्स्वकीयसुवर्णधान्यवस्त्रादिकन्धनिकादिभ्योदत्तन्तत्सकलमेवप्रातिभाव्यकारयितुःसकाशात्सममेवाप्नुयादित्यर्थः। यत्तु। प्रतिभूर्दापितोयत्तुप्रकाशन्धनिनाधनं। द्विगुणम्प्रतिदातव्यमृणिकैस्तस्यतद्भवेदितियाज्ञवल्क्यवचनन्तद्धनिकपीडितप्रतिभूविषयम्। यतआहनारदः। यश्चार्थम्प्रतिभूर्दद्याद्धनिकेनोपपीडितः। ऋणिकस्तम्प्रतिभुवेद्विगुणम्प्रतिदापयेदिति॥ एतद्द्विगुणदानन्त्रिपक्षानन्तरंबोध्यं। यतआहतुःकात्यायनवृहस्पती। प्रातिभाव्यञ्चयोदद्यात्पीडितःप्रतिभावितः। त्रिपक्षात्परतःसोर्थेद्विगुणन्दातुमर्हतीति॥ प्रातिभाव्यंप्रातिभाव्यागतंधनंप्रातिभावितःप्रतिभूत्वेनकृतः। अत्रवदन्ति। द्विगुणंप्रतिदातव्यमित्यादिभिर्वचनैर्द्वैगुण्यमात्रंप्रतिपाद्यतेतद्वैश्वानरंद्वादशकपालंनिर्वपेत्पुत्रेजातइतिविहितजातेष्टिर्यथाशुचित्वाद्यवाधेनैवप्रवर्ततेतथाइदमपिकालककालाक्रमावाधेनाप्युपपन्नम्भवतिएवञ्चपश्वादीनामपिसवृद्धिकमेवदानम्भविष्यतिअन्यथात्रिपक्षादूर्ध्वंसवृद्धिकदानपक्षेतेषांमूल्यदानमेवस्यात्सन्ततिसम्भवात्सन्ततेरेवतद्वृद्धित्वेनोक्तत्वादितितत्रसुन्दरंवचनानर्थक्यात्। कथमानर्थक्यम्। वस्त्रधान्यहिरण्यानाञ्चतुस्त्रिद्विगुणापरेत्यादिभिःकालक्रमेणद्वैगुण्यदान

स्यमिद्धत्वादिति गृह्याण। ननूक्तमेव जातेष्टिवदिति प्रत्युक्तमेव तद्वचनानर्थक्यादिति न हि तत्र वचनानर्थक्यमस्ति येन तथाऽऽक ल्प्येत। यत्तु पश्वादौ मूल्यदानमेव प्राप्नोति सद्यः सवृद्धिकदानपक्षे यत्र वापि समानं कालक्रमेण सन्तान्यजननपक्षेऽपि सवृद्धिक दानं कालान्तरे धमर्णेन सह सङ्कटे तेर्गर्भण्यादिनेऽश्वादावेवेति। ननु प्रायेण प्रीत्यैव प्रतिभूर्भवति अतः प्रतिभुवा दत्तं प्रीतिदत्त मेव न च तद्दत्तं तेयाचनात् प्राक्। प्रीतिदत्तं तु यत्किञ्चिद्दत्तं तेनत्वयाचितं। याचमानमदत्तं चेद्दत्तं तेप ञ्चकं शतमिति स्मरणात् । अतस्तेनास्य प्रीतिदत्तस्यायाचितस्यापि दानदिवसादारभ्य यावद्विगुणं कालक्रमेण वृद्धिरित्युच्यत इति चेन्न। वचनवलात्स र्वैद्विगुणं भविष्यति न च तस्याति माराऽस्तीति स्मृतिचन्द्रिकायां। तन्न। अस्यार्थस्यास्माद्वचनात् प्रतीतेरिति मिताक्षरायां। अयञ्च द्विगुणलाभो हिरण्यविषयः पश्वादौ तु सन्तानस्त्रीपशुष्वेव धान्यत्रिगुणमेव च। वस्त्रं चतुर्गुणं प्रोक्तं रसश्चाष्टगुणः स्मृत इति याज्ञव ल्क्येन द्वैगुण्यापवादस्योक्तत्वात्। दर्शनप्रतिभूर्यद्यङ्गीकृते काले अधमर्णं दर्शयितुमशक्तस्तदा तदन्वेषणार्थं पक्षत्रयं देयं। यदि तमदर्शयति तदा मोचनीयम्। अथ न दर्शयति तदा प्रयुक्तं धनं दाप्य इत्याह कात्यायनः। नष्टस्यान्वेषणार्थं तु देयं पक्षत्रय म्परम्। यद्यसौ दर्शयेत्तत्र मोक्तव्यः प्रतिभूर्भवेत्॥ काले व्यतीते प्रतिभूर्यदि तं नैव दर्शयेत्। निबन्धं दापयेत्तं तु प्रेते चैवं विधिः स्मृत इति। बृहस्पतिरपि। नष्टस्यान्वेषणे कालो देयः प्रतिभुवे धनी। देशानुरूपतः पक्षं मासं सार्द्धमथापि वा॥ नात्यन्तम्पीड नीयाः स्युर्वर्द्धमानाः शनैः शनैः। स्वसाक्ष्येण नियोज्याः स्युर्विधिः प्रतिभुवामयमिति। स्वसाक्ष्ये स्वयं समक्षदर्शने प्रातिभाव्ये निषे धमाह। कात्यायनः। न स्वामी न च वै शत्रुः स्वामिनाधिकृतस्तथा। निरुद्धो दण्डितश्चैव सन्दिग्धश्चैव न क्वचित्॥ नैव रिक्थी न मि त्रञ्च न चैवात्यन्तवासिनः। राजकार्ये नियुक्ताश्च ये च प्रव्रजिता नराः॥ नाशक्तो धनिने दातुं दण्डं राज्ञे च तत्समं। जीवन्वापि पिताय स्य तथैवेच्छाप्रवर्त्तकः॥ नाविज्ञातो ग्रहीतव्यः प्रतिभूः स्वक्रियाम्प्रति इति॥ सन्दिग्धोऽभिशस्तः। अत्यन्तवासिनो नैष्ठिकब्रह्मचा रिणः। नारदोऽपि। साक्षिणम्प्रातिभाव्यञ्च दानग्रहणमेव च। विभक्ता भ्रातरः कुर्युर्नाविभक्ताः परस्परमिति॥ याज्ञवल्क्योऽपि।

भ्रातॄणामथ दम्पत्योः पितुः पुत्रस्य चैव हि । प्रातिभाव्यमृणं साक्ष्यमविभक्तेन तु स्मृतमिति । ननु जायापत्योर्न विभागो विद्यत इत्या पस्तम्बेन विभागस्य निषिद्धत्वाद्दम्पत्योर्विभागात्प्राक्प्रातिभाव्यादिप्रतिषेधोऽनुपपन्न इति तदंशे विभागात्प्रागिति विशेषणानर्थक्य मिति चेन्न । अनेन वचनेन श्रौतस्मार्ताग्निसाध्येषु कर्मसु तत्फलेषु च विभागाभावस्योक्तत्वात् । यतो जायापत्योर्न विभागो विद्यत इ त्यभिसंधाय पाणिग्रहणाद्धि सहत्वं कर्मसु तथा पुण्यफलेषु चेति हेतुमुक्तवान् । हि यस्मात्पाणिग्रहणादारभ्य सहत्वं कर्मसु श्रूय ते । जायापती अग्निमादधीयातामिति तस्मादाधाने सहाधिकारात्तत्सिद्धाग्निसाध्येषु कर्मसु सहाधिकारः एवं विवाहसिद्धाग्नि साध्येष्वपि कर्मसु स्मार्तं वैवाहाग्नौ कुर्वीत प्रत्यहं गृहीति योगीश्वरेणाभिधानात् । तथा पुण्यफलेषु स्वर्गादिषु सहत्वं श्रूयते । दिविज्योतिरजरमारभेतामित्यादिषु येषु पुण्यकर्मसु सहाधिकारस्तेषाम्फलेषु सहत्वमित्यर्थः । तेन भर्त्रनुज्ञयानुष्ठितानां पूर्तानाम्फलेषु न सहत्वमिति । केचित्तु अनेनैव विभागात्प्राक् दम्पत्योः प्रातिभाव्यादि निषिद्धमभिदधता अनयोर्विभागोऽस्ती त्यर्थादुक्तम्भवतीति न चापस्तम्बवचनविरोधः ग्रहस्याग्रहणवत् विकल्पाङ्गीकरणादित्याहुः । तदेतत्फल्गुः शास्त्रार्थिकयोस्तु ल्यबलत्वाभावेन विकल्पानुपपत्तेः अत एव तुल्यार्थास्तु विकल्पेरन्निति भगवता जैमिनिनोक्तम्पाणिग्रहणाद्धि सहत्वं कर्मस्वित्या दौ कर्मादिग्रहणानर्थक्यापाताच्च । किञ्च पूर्वोक्तप्रकारेणैवोपपत्तौ सत्यामष्टदोषदुष्टविकल्पाङ्गीकरणस्याप्यनुचितत्वात् । न चैवं ग्रहणाग्रहणादावपि विकल्पो न स्यात् । तस्याद्युदिगत्यन्तरयुतत्वं स्यात् । न च तदस्तीत्यनन्यगतिकतया तस्याङ्गीकारा त् । ननु द्रव्यस्वामित्वेऽपि सहत्वं श्रूयते । द्रव्यपरिग्रहेषु च न हि भर्तुर्विप्रवासे नैमित्तिके दाने स्तेयमुपदिशन्तीति चेत्सत्यम् । अ नेनाविभागाभावेनोक्तः किन्तु पत्न्या द्रव्यस्वामित्वमुक्तम् । यतो द्रव्यपरिग्रहेषु चेत्युक्त्वा न हि भर्तुर्विप्रवासे नैमित्तिकेऽवश्यकर्त्तव्ये ऽतिथिभोजनादौ हि यस्मात्स्तेयमिति नोपदिशन्ति मन्वादयस्तस्माद्भार्याया अपि द्रव्यस्वामित्वमस्ति अन्यथा स्तेयं स्यादिति त स्माद्भार्याया अपि भर्तुरिच्छया द्रव्यविभागोऽस्ति न स्वेच्छया । अत एव याज्ञवल्क्यः । यदि कुर्यात्समानंशान्पत्न्यः कार्याः समांशि

काइ तिमह्मात्तु हृ ह्मस्माग्विभागाद्‌स्मयोनेप्रतिभाग्यादि्कमिति ॥●॥ अधमर्णप्रकारमाहबृहस्पतिः । प्रतिपन्नमृणान्दाप्यःसा
मादिभिरुपक्रमैरिति । प्रतिपन्नंचदणमभ्युगमनम्प्रतिपन्नम् । दाप्यःदानुमुन्मुखःकर्मबोधनिनेत्यर्थः । तथाचमनुः । यैर्यैरु
पायैरर्थंस्वम्प्राप्नुयाद्उत्तमर्णिकः । तैस्तैरुपायैस्संगृह्यदापयेदधमर्णिकं ॥ केतेउपायाइत्यपेक्षायांसएवाह । धर्मेणव्यवहारे
णच्छलेनाचरितेनच । प्रयुक्तंसाधयेदर्थंपञ्चमेनबलेनचेति ॥ बृहस्पतिरपि ॥ धर्मोपधिबलाचारैर्गृहसंरोधनेनचेति । गृह
संरोधनेनचाचरितास्योपायेन । कान्ताक्रन्नेपि । पीडनेनोपरोधेनसाधयेद्धर्मिकंधनी । कर्मणाव्यवहारेणसान्त्वेनादौविभा
वितम् । आदद्दीतार्थमेवन्तुव्याजेनाचरितेनच्चेति । धर्मादीनांस्वरूपमाह । सुहृत्संबन्धिसंदिष्टैःसामोक्त्यानुगमेनच । प्रा
येणधनहृत्तोदाप्योधर्मएषउदाहृतः ॥ छद्मनायाचितञ्चार्थमानीयव्यापिकाधनी । अन्वाहितादिसंगृह्यदाप्यतेयत्रसो
पधिः ॥ बध्वास्वगृहमानीयताडनाद्यैरुपक्रमैः । ऋणिकोदाप्यतेयत्रबलात्कारःसकीर्तितः । दारपुत्रपशून्बध्वाकृत्वाद्वा
रोपवेशनम् । यत्रर्णिकोदाप्यतेऽर्थन्तदाचरितमुच्यतइति । सुहृत्संबन्धिसन्दिष्टैः सुहृद्‌संबन्धिनाञ्चसंदेशैःसामोक्त्याप्रि
यवाक्येनअनुगमेनअनुसरणेनसम्प्रायेणप्रार्थनाकाठिन्येन । छद्मनाछलमात्रादिप्याजेनगृहीतंतदीयभूषणाद्युप्राव्यर्थेन
। अन्वाहितमन्यस्यैदातुमर्पितम् । आदिशब्दात्प्रकान्तरम्यापिप्रकारेणाधमर्णस्यभूषणादिस्वाधीनीकृत्यचसत्वदाप्यन्ता
प्यतेसउपधिरित्यर्थः ॥ दाप्यतेप्रतिदानोन्मुखीक्रियते । अर्थंस्वकीयमर्थम् । शेषंस्पष्टार्थंधर्मादयश्चोपायाः । पुरुषा
पेक्षयाप्रयोक्तव्याः ॥ यतआहकात्यायनः । राजानंस्वामिनंविप्रंसान्त्वेनैवप्रदापयेत् । रिक्थिनंसुहृदंवापिछलेनैवप्रसाध
येत् ॥ वणिजःकर्षकांश्चैवशिल्पिनश्चाब्रवीद्भृगुः । देशाचारेणदाप्याःस्युर्दुष्टान्सम्पीड्यदापयेदिति । सान्त्वेनसाम्नाधर्मा
ख्योपायेनेत्यर्थः । वणिगादयोदेशाचारानुसारेणदाप्याःस्युरित्यन्वयः । सम्पीड्योतिबलात्काराचरिताख्योपाययोर्ग्रहण
म् ॥ ● ॥ कःपुनर्दण्डाचारइत्याकाङ्क्षायांसएवाह । धार्यौबहुद्रव्यश्वाधिकःप्रकाश्यञ्जनसंसदि । यावन्नदद्यात्तद्देयन्देशा

Z 2

चारस्थितिर्यथेति । यत्र देशे धनिकेन स्वयमेव धार्य इत्याचारस्तत्र तथैव धार्यः । यत्र तु कोवादिनान्येनावरुद्ध धार्य इति दे
शाचारस्थितिर्वस्येत्यस्यार्थः । अवरुद्धस्य विण्मूत्रशङ्कायां तत्प्रतिषेधो न कार्य इति स एव दर्शयति । विण्मूत्रशङ्कायां तस्या
ह्वार्यमाणस्य देहिनः । इच्छतो वानुगन्तव्यो निबद्धं वा समुत्सृजेदिति । निबद्धमिति शृङ्खलादिना बद्धमेवमूत्राद्युत्सर्गार्थं मुञ्चये
दित्यर्थः । अत्र च अधमर्णिकविषये द्वितीयः पक्षः तदितरविषयस्त्वाद्यपक्ष इति व्यवस्था अवगन्तव्येति स्मृतिचन्द्रिकायाम् ।
दर्शनप्रतिभुवं भोजनादिकाले गृहीत्वाऽवरुद्धस्य मोक्षः करणीयः यत आह स एव । सकृतप्रतिभूश्चैवमोक्तव्यः स्याद्दिने दिने ।
आहारकाले प्राप्ते च निबन्धे प्रतिभूः स्थित इति । निबन्धे पलायनप्रतिबन्धे । यदा तु प्रतिभूर्न लभ्यते लब्धो वाऽधमर्णो न ददामी
ति वदति तदा पक्षद्वयमाह स एव । यो दर्शनप्रतिभुवं नाधिगच्छेन्न चाश्रयेत् । स चारके निरोद्धव्यस्थाप्यो वा वेद्म रक्षिणा इति ।
नाधिगच्छेन्न प्राप्नुयात् । नाश्रयेन्नाङ्गीकुर्यात् चारके कारागृहे । रक्षिणो रक्षकान् । रक्षणपुरुषान्नियुज्य प्रस्थाप्यो वेत्यर्थः ।
एतस्य प्रतिभूविशेषे प्रतिषेधमाह स एव । न चारके निरोद्धव्य आर्यः प्रात्ययिकः शुचिरिति । प्रात्ययिको विश्वास्यः । कथन्त
र्हि स मोचनीय इत्यपेक्षितेऽसावाह । सोऽनिबद्धः प्रयोक्तव्योऽनिबद्धः शपथेन चेति । अनिबद्धो रक्षकशून्यः । निबद्धो नियमि
तः स्वमूलधर्मादिप्रयोगेण साधयन्धनिको न निवारणीयो राज्ञेत्याह मनुः । यः स्वयं साधयेदर्थमुत्तमर्णोऽधमर्णिकात् न स राज्ञाऽ
भियोक्तव्यः स्वकं संसाधयन्धनमिति । विष्णुरपि । प्रयुक्तमर्थं यथाकथंचित्संसाध्यमानो न राज्ञो वाच्यः स्यादिति यथाकथञ्चिल्लो
काचारविरुद्धेन मार्गेण । याज्ञवल्क्योऽपि । प्रपन्नं साधयन्नर्थं न वाच्यो नृपतेर्भवेदिति । साध्यमानश्चेद्राजसन्निधिं गत्वा धनि
कं धारयति तदा स दण्ड्य इत्याह । स एव । साध्यमानो नृपं गच्छन्दण्ड्यो दाप्यश्च तद्धनमिति । तस्य धनिकस्य धनं तत्सममन्यद्द
ण्डं दाप्य इत्यर्थः । अत एव विष्णुः । साध्यमानश्चेद्राजानमभिगच्छेत्तत्समं दण्ड्य इति । तत्सममन्धनिकद्रव्यसमं । यत्तु मनुना
। यः साधयन्तं छन्देन वेदयेद्धनिकं नृपे । स राज्ञा तच्चतुर्भागं दाप्यस्तस्य च तद्धनमिति । स त्वपदण्डस्तन्मतः सदरिद्राधमर्णवि

यथः ब्राह्मणविषय इति केचित् छेदनस्येच्छया । स्मृतिचन्द्रिकायान्तु दण्ड इति सामान्याभिधानं च समर्थविषये स्वल्पोदण्डो ऽशक्तस्य पादिकेत्येवमर्थमिति व्याख्यायमनुवचनम्प्रमाणत्वेनोपन्यस्तम् । विप्रतिपत्तौ विशेषमाह । वृहस्पतिः प्रतिपन्नस्य धर्मोऽयं यस्य पत्रापि तु संसदि । लेख्येन साक्षिभिर्वापि भावयित्वा प्रदाप्यत इति ॥ अयम्पूर्वोक्तः अधमर्णेऽर्हतयासत्यां संप्रतिपन्नस्य धर्मो यस्य अनिकस्यापलापी तु अपह्नवी तु संसदि सभायाम्प्रमाणेनर्णं साध्यप्रतिदानेऽन्यु खड्गायेंइत्यर्थः । एवं पूर्वोक्तधर्मो व्यवहारे णाकृतेनापि तेन च प्रयुक्तं साधयेद् यम्पश्चिमेन बलेन च मनुवचनेऽव्यवहारेणेति व्यपदिश्य स्वयं इतरस्त्वसम्प्रतिपन्नविषयमिति बोद्धव्यम् । व्यवहारेण साध्यानुपन्यासेन अत एवासम्प्रतिपन्ने व्यवहारातिरिक्तोपायनिषेधमाह स एव । नरोऽर्थव्यः क्रियाद्यादीसन्दिग्धेऽर्थे कथञ्चन । आसेधयंस्त्वनासेध्यन्दण्ड्यो भवति धर्मत इति । नरोऽर्थव्यवहारातिरिक्तक्लाद्युपायोपन्यस्तम् । क्रियावादिसन्दिग्धपदयोरर्थमाह स एव । प्रदातव्यं यद्भवतीत्याय तस्वद्दाम्यहम् । एवं यथर्णिकोऽब्रूते क्रियावादी स उच्यते ॥ रूपसंख्यादि लाभेषु यत्र भ्रान्तिर्द्वयोर्भवेत् । देयानादेययोर्वापि सन्दिग्धोऽर्थः स कीर्तितः ॥ इति सन्दिग्धेऽर्थे धनग्रहणं कुर्वतोऽर्थहानिदण्डावाह स एव । अनावेद्य तु संशयः सन्दिग्धेऽर्थे प्रवर्तते । प्रसह्य स विनेयः स्यात् सचाप्यर्थान्न सिध्यतीति । कात्यायनोऽपि । पीडयेत्तु धनी यत्र ऋणिकं न्यायवादिनम् । तस्मादर्थात् स हीयेत तत्समं चाप्नुयाद् दममिति । सावधिकऋणमवधिप्राप्तौ निरवधिकं द्विगुणादि परमवृद्धेः प्राप्तौ कार्यविशेषोपन्यासात्प्रागपि पूर्वोक्तधर्मादिभिरुपायैः सवृद्धिकं ग्राह्यम् । यद्वा परमवृद्धिसहितं मूलं कृत्वा लेख्यान्तरं ग्राह्यम् । अथवा सवृद्धिकमूलोपभोग्याधियोर्ग्राह्यः । तथा च वृहस्पतिः । पूर्णावधौ शान्तलाभमृणमुद्ग्राहयेद्धनी । कारयेद्वान्तरीलेख्यं सवृद्धिकमवस्थया ॥ द्विगुणस्योपरि यथा चक्रवृद्धिः प्रगृह्यते । भोगलाभसुद्रातमूल्यात्सोदयमृणमिति शान्तलाभमृणमशान्तलाभस्योपलक्षणम् । उद्ग्रहणन्धर्माद्युपायेन साधनम् । यद्वा चक्रवृद्ध्या भोग्याधिर्वा गृह्यते तत्र सोदयं मूलमृणं स्यादित्यर्थः । मनुरपि । कृत्वान्दानुमथ

॥वी० मि०॥ लोयः कर्त्तुमिच्छेत्पुनः क्रियाम्। स्वदत्ता निर्जितां वृद्धिं करणस्थां परिवर्त्तयेत्॥ स्थिरं वापि चिरं वा लेख्यं परिवर्त्तयेत्। याव
॥ व्य० ॥ ती सम्भवेद्वृद्धिस्तावतीं दातुमर्हति॥ चक्रवृद्धिं समारूढो देशकालव्यवस्थितः। अतिक्रामन्देशकालौ न तत्फलमवाप्नुयादि
॥ १०४ ॥ ति। निर्जितां चक्रवृद्ध्या साधारणत्वं समापन्नां करणस्थां परिवर्त्तयेत्। स चक्रवृद्धिसमारूढप्रकारादि कुर्वीत। करणं स्थिरं चिरं वा स्थिरं तदीयमा
नमिति शेषः। तेन धनिने सर्वं सवृद्धिकमृणमदत्त्वेत्यर्थः। नवीकृतमृणं करणं परिवर्त्तयेत्। वाचिकमप्यस्मै त्वं दृष्ट्वा दत्ते तावदृणं
धमर्णो धारयामि। एतावती च वृद्धिरिति पत्रे चारोपयेदित्यर्थः। एतच्च चक्रवृद्धिर्यत्र सम्मुखमनेकशो निनीवद्वत्वा करणं परिवर्त्त
नमर्थम्। समारूढः प्रतिपन्नः अङ्गीकृतवानित्यावत्। तत्फलं चक्रवृद्धिफलम्। कात्यायनोऽपि। प्राप्तांश्च हि द्विगुणमृ
ण्यं प्रयुक्तं धनिना सदा। तमेवेतं द्विगुणं पुनर्वृद्धिं प्रकल्पयेदिति। प्रयुक्तस्य धनस्य दानाऽसमर्थे धनप्रकारमाह नारदः। अ
थ शक्तिविहीनः स्यादृणी कालविपर्ययात्। अल्पं प्रक्षेपं दाप्यः कालेकाले यथोदयमिति। यथोदयं यथाधनोत्पत्ति दाप्य
ह्याह इति शेषः। तथा च याज्ञवल्क्यः। हीनजातिं परिक्षीणमृणार्थं कर्म कारयेत्। ब्राह्मणस्तु परिक्षीणः शनैर्दाप्यो यथोदय
मिति। अत्र च हीनजातिग्रहणं सजातेरप्युपलक्षणम्। अत एव समानजातिमपि परिक्षीणं दापयेत्तदनुरूपं कर्म कारयेत्। ब्राह्मण
ग्रहणं च श्रेयो जातेरुपलक्षणम्। अतश्च क्षत्रियादिरपि परिक्षीणो यथोदयं वैश्यादेर्दाप्य इत्यर्थः। एतदेवाह स्पष्टमाह मनुः।
कर्मणापि समं कुर्याद्धनिकस्याधमर्णिकः। समोऽपकृष्टजातिस्तु दद्याच्छ्रेयांस्तु तच्छनैरिति। कर्मणापि समं कुर्यात् अधमर्णिक
धनेनोत्तमर्णाद्धरीभूतमात्मानं तावद्धनिकार्थे कर्मकरणेनापि समं कुर्यात्। अधमर्णत्वमपनयेदित्यर्थः। श्रेयान् उत्तमजाती
योऽगुणाधिकश्च। बृहस्पतिरपि। निर्धनं कर्म कारयेत् तत्कर्म गृह्णमानो ब्रकारयेत्। शौण्डिकाद्यं ब्राह्मणस्तु दापनीयः शनैः शनै
रिति। शौण्डिकाद्यं समोपकृष्टजातिम्। ब्राह्मणाय स्वमुत्कृष्टजातेरुपलक्षणार्थं। यत्तु कात्यायनवचनं। कर्षकान्क्षत्रवि
ट्शूद्रान्मन्यूनहीनांस्तु दापयेदिति। तत्र तेषां यथोदयं धनदानसामर्थ्यमन्तराम्। कल्पयेत्तु कर्म ब्राह्मणविप्रान्प्रज्ञान्नुमहीनां

स्तु दापयेत् इति पठितन्तत्र कर्मणा दापयेदित्यन्वयान्नकोपि विरोधः। कात्यायनोपि। धनदानासहं बुद्ध्वा स्वाधीनङ्कर्म कारयेदिति। कर्मकरणासहन्तु बन्धनागारे वासयेदित्याह। स एव। अशक्तौ बन्धनागारे प्रवेश्यो ब्राह्मणाद्दृते इति। अत्र कर्मकरणाशक्तौ बन्धनागारे प्रवेशाभिधानं सामर्थ्योत्पत्तौ कथञ्चिद्दृणप्राप्त्यर्थमित्यभिहितं स्मृतिचन्द्रिकायाम्। यस्तु पूर्वमनावेद्य अशुभङ्कर्म कारयति तत्रापि विशेषं स एवाह। यदि ह्यादावनादिष्टमशुभङ्कर्म कारयेत्। प्राप्नुयात्साहसम्पूर्वमृणान्मुच्येत च र्णिक इति। युगपदनेकोत्तमर्णसमवाये दानानुक्रममाह याज्ञवल्क्यः। गृहीतानुक्रमाद्दाप्यो धनिनामधमर्णिकः। दत्वा तु ब्राह्मणायैव नृपतेस्तदनन्तरमिति॥ नृपतेः क्षत्रियस्य समानजातीयेनूत्तमर्णस्य ग्रहणक्रमेण देयम्। विजातीयेषु तु ब्राह्मणादिवर्णक्रमेणेत्यर्थः। कात्यायनोपि। नानर्णसमवाये तु यद्यत्पूर्वं कृतम्भवेत्। तत्तदेवाग्रतो देयं राज्ञः स्याच्छ्रोत्रियानु चेति। श्रोत्रियानु ब्राह्मणानन्तरम्। एकदिनकृतनानर्णसमवाये युगपद्देयन्धनाल्पत्ववत्कृत्वयोस्तु तदनुसारेण भागम्परिकल्प्य दापनीयम्। तथा च कात्यायन एव। एकाहे लिखितं यत्र तत्र कुर्यादृणं समम्। ग्रहणं रक्षणं लाभमन्यथा तु यथाक्रममिति॥ ग्रहणं बन्धकदानम्। रक्षणं बन्धकपरिपालनम्। लाभं बन्धकभोगञ्च समं युगपदेव कुर्यात्। अन्यथा ग्रहभेदे तूक्रमेण कुर्यादित्यर्थः। अनेकर्णसमवायेपि अधमर्णो यदुत्तमर्णाद्द्रव्यं गृहीत्वा यज्ञविवाहादिकङ्करोति तस्मात्प्राप्तन्धनन्तदुत्तमर्णायैव दद्यान्नान्येषाम्। तथा च स एव। यस्य द्रव्येण यत्पण्यं साधितं यो विभावयेत्। तद्द्रव्यमृणिकेनैव दातव्यं तस्य नान्यथेति। एवकारस्तस्येत्यनन्तरं व्यत्यसनीयम्। अधमर्णाभावे तत्पुत्रेण सवृद्धिकमृणन्देयमित्याह बृहस्पतिः॥ याचमानाय दातव्यमप्रकालमृणं कृतम्। पूर्णावधौ शान्तलाभमभावे च पितुः सुतैरिति। अप्रकालं अदीर्घकालं निरवधिकमिति यावत्। निरवधि याचनानन्तरमेव देयम्। परमवृद्धौ जातायामिति मदनरत्ने। सावधि पूर्णे शान्तलाभं ग्राह्यनन्तरम्। ऋणग्रहीतुः पितुरभावे पितृकृतमृणम्पुत्रैरवश्यन्देयमित्यर्थः। आवश्यकदाने हेतुमाह नारदः। इच्छन्ति पितरः पुत्रान् स्वार्थहेतोर्यतस्तु

नः। उत्तमर्णाधमर्णाभ्यां मामयं मोचयिष्यति॥ अतः पुत्रेण जातेन स्वार्थमुत्सृज्य यत्नतः। ऋणात्पिता [illegible] यथा न नरकं
व्रजेत्॥ यतस्ततः येनकेनाप्युपायेन। उत्तममृणाज्जायमाने वैवाह्यात् [illegible] आदिते [illegible]। अ
धममृणं परहस्तात्कुसीदविधिना गृहीतं जातेन व्यवहाराभिज्ञतया निष्पन्नेनेत्यर्थः॥ अप्राप्तव्यवहार [illegible] तत्वेऽपि हिनर्थभा
क्। स्वातंत्र्यं हि स्मृतं ज्येष्ठे ज्यैष्ठ्यं गुणवयःकृतमिति स्मरणात्। अप्राप्तव्यवहारस्य [illegible] निषेधः स्मर्यते। अप्राप्तव्यव
हारश्च दूतो दानोन्मुखो व्रती। विषमस्थाश्च नासेध्या न चैतानाह्वयेन्नृप इति॥ कात्यायनोऽपि। पितृणां [illegible] दाने तै
वाधमाहृणात्। विमोक्षस्तु यतस्तस्मादिच्छन्ति पितरः सुतान्॥ नाप्राप्तव्यवहारैस्तु पितर्युपरते क्वचित्। कालेनु विधिनाऽऽदे
यं वसेयुर्नरकेऽन्यथेति। नाप्राप्तव्यवहारैः हेयोपादेयपरिज्ञानविशेषरहितैः षोडशवर्षैरित्यर्थः। षोडशवार्षिकस्य व्यवहार
ज्ञत्वमाह नारदः। गर्भस्थैः सदृशो ज्ञेय आष्टमाद्वत्सराच्छिशुः। बाल आषोडशाद्वर्षात्पौगण्डश्चेति शब्द्यते। परतो व्यवहार
ज्ञः स्वतन्त्रः पितरावृते इति। यस्य बहवः पुत्रास्तेषां विभक्ताविभक्तभेदेन दानप्रकारमाह नारदः। पितर्युपरते पुत्रा ऋणन्द
द्युर्यथांशतः। अविभक्ता विभक्ता वा यो वा तामुद्वहेद्धुरमिति। एतदुक्तम्भवति विभक्तैः स्वांशानुरूपन्देयम्। अविभक्तैरपि सम
प्रधानतयाऽवस्थाने सम्भूय समुत्थानेन देयम्। गुणप्रधानभावेनावस्थाने यो मुख्यस्तेन देयमिति पुत्रेण रिक्थ[illegible]ग्रहणयो
स्सवृद्धिकमेव देयं। पुत्राभावे पौत्रेण रिक्थग्रहणे सोदयन्देयं। अग्रहणे मूलमेव। प्रपौत्रेण तु रिक्थाग्रहणे मूलमपि न देयम्।
तथा च बृहस्पतिः। ऋणमात्मीयवत्पित्र्यम्पुत्रैर्देयं विभावितम्। पैतामहं समन्देयं न देयन्तत्सुतस्य त्विति। आत्मीयवत्सवृद्धि
कमित्यर्थः। तत्सुतस्यागृहीतधनस्य प्रपौत्रस्य। एतदेवाभिप्रेत्य नारदः। क्रमादव्याहतम्प्राप्तम्पुत्रैर्यन्नर्णमुद्धृतं। देयम्पैताम
हं पौत्रैस्तच्चतुर्थान्निवर्त्तत इति। कात्यायनोऽपि। पित्रभावे तु दातव्यमृणं पौत्रेण यत्नतः चतुर्थेन न दातव्यन्तस्मात्तद्विनिवर्त्तयेत
इति। देयमृणमनेन देयमस्मिन्काले देयमित्यपेक्षिते आह याज्ञवल्क्यः। पितरि प्रोषिते प्रेते व्यसनाभिप्लुतेऽपि वा। पुत्रपौत्रैर्ऋणं देयं

देयंनिह्नवेसाक्षिभावितमिति। यदिपितादातव्यंऋणमदत्वामृतोदूरदेशांतरङ्गतोऽचिकित्सनीयव्याध्युपभिभूतोवातदातत्कृ
तमृणंपुत्रेणतदभावेपौत्रेणदेयंइत्यर्थः। पुत्रेणवापह्नुतेऽर्थिनासाक्ष्यादिभिर्भावितमृणंदेयंपुत्रपौत्रैरित्यन्वयः। प्रोषितेयत्प्र
तिदानन्तत्प्रवासादारभ्यविंशतिवर्षादूर्ध्वमन्तव्यं। तथाचनारदः। नार्वाक्सम्वत्सराद्विंशात्पितरिप्रोषितेसुतः। ऋणन्दद्यात्पि
तृव्येवाज्येष्ठेभ्रातर्यथापिवेति कात्यायनोपि। विद्यमानेपिरोगार्त्तेस्वदेशात्प्रोषितेतथा। विद्यमानेपिकीवर्षाणि॥ विंशात्संवत्सरादू
र्ध्वमितिशेषः अतएवविष्णुः। धनग्राहिणिप्रेतेप्रव्रजितेद्विदशाःसमाःप्रोषितेवातत्पुत्रपौत्रैर्देयंनातःपरमनीप्सुभिरिति। प्रव्र
जितेसंन्यस्तेद्विदशाःसमाःविंशतिवर्षाणिअस्यप्रोषितइत्यनेनसंबन्धः। अतःपरंविंशतिवर्षादूर्ध्वमनीप्सुभिर्देयमित्यर्थः। एत
दुक्तम्भवति। पितरिमृतेप्रव्रजितेवापुत्रपौत्रैःप्राप्तव्यवहारैर्देयंप्रोषितेतुविंशतिवर्षादूर्ध्वमितिनातःपरमनीप्सुभिरिति। अपि
पाठस्तयस्यामर्थः। विंशतिवर्षादूर्ध्वंनविलम्बःकार्यःऋणप्रतिदानमभीप्सुभिरिति॥*॥ अदेयमृणमाहयाज्ञवल्क्यः। सुराका
मद्यूतकृतन्दण्डशुल्कावशिष्टकं। वृथादानन्तथैवेहपुत्रोदद्यान्नपैतृकमिति। सुरापानेनयत्कृतमृणं। कामकृतंस्त्रीव्यसनेस
कृतं। द्यूतेपराजयनिर्वृत्तम्। दण्डशुल्कावशिष्टकन्दण्डशुल्कयोरवशिष्टंवृथादानंबन्द्यादिभ्योयत्प्रतिज्ञातम्। धूर्त्तेवन्दि
निमल्लेचकुवैद्येकितवेशठे। चाटचारणचौरेषुदत्तम्भवतिनिष्फलमितिवचनात्। नचदण्डशुल्कावशिष्टकमित्यनेनावशेष
स्यदाननिषेधात्सर्वन्दातव्यमितिशङ्कनीयंयतआहोशना। दण्डंवादण्डशेषंवाशुल्कन्तच्छेषमेववा। नदातव्यन्तुपुत्रेणयच्च
नव्यावहारिकमिति। नव्यावहारिकंसुरापानादिनिमित्तमित्यर्थः। गौतमोपि। मद्यशुल्कद्यूतदण्डानपुत्रानध्यावहेयुरि
ति। नपुत्रस्योपरिभवन्तीत्यर्थः। वृहस्पतिरपि। सौराक्षिकंवृथादानङ्कामक्रोधप्रतिश्रुतम्। प्रातिभाव्यंदण्डशुल्कशेषंपुत्रान
दापयेदिति। प्रातिभाव्यम्प्रातिभाव्यागतं। कामक्रोधप्रतिश्रुतयोःस्वरूपन्दर्शयतिकात्यायनः। लिखितम्मुक्तकंवापिदेयंयत्तुप्र
तिश्रुतं। परपूर्वस्त्रियैतत्तुविद्यात्कामकृतंन्नृणां॥ यच्चहिंसासमुत्पाद्यक्रोधाद्द्रव्यंविनाश्यवा। तत्कृतन्तुष्टिकरन्तत्तुविद्यात्क्रो

धत्तन्नुतदिति ॥ मुक्तकंलेखनरहितम्। पित्रात्मादिकृतर्णसमवाये दानक्रममाह बृहस्पतिः। पित्र्यंपूर्वमृणन्देयम्पश्चादात्मीयमेवच। तयोःपैतामहंपूर्वंदेयमेवंऋणंसदेति। तयोस्ताभ्याम्पित्रात्मीयाभ्यामित्यर्थः। रिक्थग्रहाभावेपिपुत्रेणदेयमिति इत्याहकात्यायनः। पित्र्यर्णेविद्यमानेतुनचपुत्रोधनंहरेत्। देयंतद्धनिकेद्रव्यंमृतेपुत्रस्तुदाप्यतइति ॥ विभक्तःपुत्रोविभागानन्तरम्पितृकृतेऋणेतिष्ठतितस्मिन्मृतेतद्धनंनगृह्णीयात्किन्तुधनिकायदद्यात्। यदिकिञ्चित्ततोऽवशिष्टम्भवतितर्हिगृह्णीयात्। पितृधनाभावेरिक्थग्रहणरहित्येपिस्वधनन्दद्यादित्यर्थः। अत्रपुत्रग्रहणम्पौत्रस्याप्युपलक्षणम्। पुत्रपौत्रैर्ऋणंदेयमितिवचनेउभयोःसाम्येनग्रहणात्। पौत्रस्यावृद्धिकदानन्तुवार्चनिकमितिनतस्यानेनसाम्यपाठेननिवृत्तिः। अनेकऋणदातृसमवायेक्रममपाहयाज्ञवल्क्यः। रिक्थग्राहऋणन्दाप्योयोषिद्ग्राहस्तथैवच। पुत्रोनन्याश्रितद्रव्यःपुत्रहीनस्यरिक्थिनइति ॥ दायविभागक्रमेणप्राप्तंयद्द्रव्यंतद्रिक्थन्तद्योगृह्णातिसरिक्थग्राहोयदीयंद्रव्यंरिक्थरूपेणगृह्णातिसतत्कृतमृणन्दाप्यइत्यर्थः। योषितम्भार्यायोगृह्णातीतियोषिद्ग्राहोयदीयांयोषितंगृह्णातिसतत्कृतमृणन्दाप्यइत्यर्थः। पुत्रोनन्याश्रितद्रव्यः। अन्यंआश्रितन्द्रव्यंयस्यासौअन्याश्रितस्तम्। एतादृशंयद्द्रव्यम्परकीयन्द्रव्यंमातापितृसंबन्धिद्रव्यमितियावत्। अन्यशब्देनपित्रोर्विवक्षणात्। तन्मातापितृद्रव्यंयस्यनास्तिदायग्रहणायोग्यत्वात्सक्लीवादिःपुत्रोऽनन्याश्रितद्रव्यइत्यर्थः। पुत्रहीनस्यदायग्रहणार्हपुत्रहीनस्यरिक्थिनऋणन्दाप्याइत्यर्थः। एतेषांसमवायेपाठक्रमादेवदाप्याः। यत्तुसपुत्रस्यवाप्यपुत्रस्यरिक्थग्राहिणन्दद्यादितिविष्णुवचनम्। तद्दायानर्हपुत्रस्यसद्भावेप्यसद्भावेपिवातदनादरेणरिक्थग्राहीऋणंदद्यादित्येवपरम्। रिक्थग्राह्यभावेयोषिद्ग्राहोदाप्यअस्मिन्नर्थेविष्णुरपि। विधनस्यस्त्रीग्राहीति। विधनस्यरिक्थग्राहीरहितस्य। बृहस्पतिरपि। स्त्रीहारीचतथैवस्यात्दभावेधनहारिणइति। योषिद्ग्राह्यभावेदायभागानर्हः। पुत्रोदाप्याइत्यस्मिन्नर्थेनारदोपि। धनस्त्रीहारीपुत्राणामृणभाग्योधनंहरेत्। पुत्रासतोःस्त्रीधनिनोःस्त्रीहारीधनिपुत्रयोरिति। स्त्रीधनिनोरसतोःपुत्रस्

वक्ष्यमाणभागोऽन्वयः स्त्रीचधनञ्चस्त्रीधनेतद्वतोःस्त्रीहारिधनहारिणोरित्यर्थः। अत्रस्त्रीहारीधनिपुत्रयोरितिपुत्राभावेयोवि
द्ध्याहकस्यर्णदायित्वाभिधानन्दायार्हपुत्राभावेमन्तव्यं। सपुत्रस्यचेत्यनुवृत्तौविधनस्यस्त्रीहारीतिविष्णुनाभिधानात्। पुत्रो
सतोःस्त्रीधनिनोरितिस्वोक्तिविरोधाच। ननुरिक्थग्राहऋणन्दाप्यइतिवचनंएतेषांसमवायेक्रमविधायकंसएवतुनोपपद्यते
पुत्रेसत्यन्यस्यरिक्थग्राहित्वासम्भवात्नचपुत्रेसत्यपिपितृभ्रात्रोरिक्थहारित्वमितिवाच्यम्। नभ्रातरोनपितरःपुत्रारिक्थहरा
पितुरितिवचनेनपुत्रेसत्यन्यस्यरिक्थहारित्वनिषेधात्। योपिद्ग्राहोपिनसम्भवतिनद्वितीयश्चसाध्वीनांक्वचिद्भर्त्तोपदिश्यतेइ
तिवचनेनपत्यन्तरनिषेधात्पुत्रोनन्याश्रितद्रव्यइत्येतदपिनवक्तव्यम्। रिक्थग्राहऋणंदाप्यइत्यनेनगतार्थत्वात्नचरिक्थग्रा
हित्वाभावेपिपुत्रदातव्यमित्येतदर्थमिदम्। तथासत्यनन्याश्रितद्रव्यस्यवैयर्थ्यंस्यात्। पुत्रेसतिमातापितृद्रव्यस्यअन्यगामि
त्वासम्भवात्। नभ्रातरइतिपूर्वोदाहृतवचनात्। पुत्रहीनस्यरिक्थिनइत्येतदपिनवक्तव्यम्। रिक्थग्राहऋणंदाप्यइत्यनेन
सतिपुत्रेरिक्थहारिणएवऋणापाकरणाधिकारित्वस्याभिधानेसतिपुत्रेकैमुतिकन्यायेनतत्सिद्धेरितिचेत्। मैवंवादीः। स
त्स्वपिक्लीवादिषुपुत्रेषुअन्यायवर्तिषुचसवर्णापुत्रेषुपितृव्यादीनांरिक्थग्राहित्वासम्भवात्। क्लीवादीनांरिक्थग्राहित्वाभावं
दर्शयतिमनुः। अनंशौक्लीवपतितौजात्यन्धबधिरौतथा। उन्मत्तजडमूकाश्चयेचकेचिन्निरिन्द्रियाइति। याज्ञवल्क्येनापिक्ली
वादीनामनुक्रम्यभर्त्तव्यास्त्वनिरंशकाइत्युक्तमन्यायवृत्तस्यसवर्णापुत्रस्यरिक्थग्राहित्वाभावंदर्शयतिगौतमः। सवर्णापुत्रोप्य
न्यायवृत्तोनलभतेकेषामिति। तस्मात्पुत्रेसत्यपिरिक्थग्राह्यन्यःसम्भवतियोषिद्ग्राहित्वमपिरागकलुषीकृतचित्तस्यातिक्रान्तनि
षेधस्यसम्भवतितस्यऋणापाकरणेऽधिकारोभवत्येव। यश्चतसृणांस्वैरिणीनामंतिमांगृह्णातियश्चपुनर्भुवांतिसृणाम्प्रथमांत
थाचनारदः। अन्तिमास्वैरिणीनांयाप्रथमाचपुनर्भुवाम्। ऋणान्तयोःपतिकृतंदद्याद्यस्तेउपाश्नुते। अधनस्यह्यपुत्रस्यमृत
स्योपैतियःस्त्रियं। ऋणंवोढुःसभजतेतदेवास्यधनंस्मृतमिति। चतसृणाम्पुनर्भुवांयाप्रथमातयोःपत्याकृतमृणान्तेयेउपाश्नुते

पतित्वेनोपभुक्तेत्यादिदृष्टार्थः। अपेतिपतित्वेनोपभुक्ते पुनर्भूः स्वैरिण्यश्च दर्श्यन्ते तत्स्वरूपं च। पत्युः पूर्वाः स्वैरिण्यश्चतस्रः प्रोक्ता य
थाक्रमं। पुनर्भूस्त्रिविधा तासां स्वैरिणी तु चतुर्विधा ॥ कन्यैवाक्षतयोनिर्या पाणिग्रहणदूषिता। पुनर्भूः प्रथमा प्रोक्ता पुनःसंस्कार
कर्मणा ॥ देशधर्मानवेक्ष्य स्त्री गुरुभिर्या प्रदीयते। उत्पन्नसाहसान्यस्मै सा द्वितीया प्रकीर्तिता ॥ असत्सु देवरेषु स्त्री बान्धवै
र्या प्रदीयते। सवर्णाय सपिण्डाय सा तृतीया प्रकीर्तिता ॥ स्त्री प्रसूताऽप्रसूता वा पत्यावेव तु जीवति। कामात्समाश्रयेदन्यं स्वैरि
णी प्रथमा तु सा ॥ कौमारं पतिमुत्सृज्य या त्वन्यं पुरुषं श्रिता। पुनः पत्युर्गृहं यायात्सा द्वितीया प्रकीर्तिता ॥ मृते भर्तरि तु प्राप्तान्दे
वरादीनपास्य या। उपगच्छेत्परं कामात्सा तृतीया प्रकीर्तिता ॥ प्राप्ता देशाद्धनक्रीता क्षुत्पिपासातुरा तु या। तवाहमित्युपगता
सा चतुर्थी प्रकीर्तितेति ॥ उत्पन्नसाहसान्यस्मैत्यर्थेतिः। प्रौढेति यावत्। अन्यस्मै देवरस्य असत्सु देवरेष्विलयेऽभिधानात्।
कीदृशस्य योषिद्ग्राहस्यर्णदानेऽधिकार इत्यपेक्षिते स एवाह। या तु सप्रधनैव स्त्री सापत्या वान्यमाश्रयेत्। सोऽस्या दद्यादृणम्भ
र्त्तुरुत्सृजेद्वा तथैव तामिति। सप्रधना प्रभूतधनसहिता बहुधनेति यावत्। अस्य भर्तुर्देयमित्यादिरन्वयः। नन्वयोषिद्ग्रा
हस्यादानाधिकारशास्त्रीयान्यथानुपपत्त्या योषिद्ग्राहमपि पूर्वपतिकृतमृणमृणादानशास्त्रीयमिति शङ्कनीयम्। यतो यापूर्वेयोषिद्ग्रा
हस्यास्यावान्यथास्यानुपपत्तिः। अत एवाह संग्रहकारः। यत्तद्दद्याद्वृणं वोढा पुनर्भूस्वैरिणीपतिः। मतेनतदुपादानं शास्त्रेष
विहितम्भवेदिति ॥ तदुपादानं पुनर्भूवां स्वैरिणीमाश्रयहणं। ऋणं पुत्रो दाप्य इति पुनर्वचनं योषिद्ग्राहाभावेऽस्य ऋणादानेऽ
धिकारोऽनन्तरस्मिन्नस्तीति क्रमनिरूपणार्थं अनन्याश्रितद्रव्य इति नव्यर्थं पित्र्यरिक्थाभावेऽपि बहुषु पुत्रेषु सत्सु दायग्रहणायोग्येषु
स्वस्यैव ऋणदानेऽधिकारो न क्लीबादेर्दायानर्हस्येति प्रतिपादनार्थत्वात्। पुत्रहीनस्य रिक्थिन इत्येतदपि न व्यर्थं पुत्रग्रहणमुप
लक्षणार्थं पुत्रपौत्रहीनस्य येऽनन्तरं रिक्थग्राहित्वेन दायभागे निरूपिताः प्रपौत्रादायस्ते सर्वे दायभागोक्तक्रमेण दाप्याः यदि
रिक्थं गृह्णन्ति न चेन्न दाप्याः पुत्रपौत्रौ तु रिक्थग्रहणाभावेऽपि दाप्याविति पुत्रपौत्रापेक्षया प्रपौत्रादीनां वैषम्यप्रतिपादनार्थत्वात्।

पुत्रपौत्रयोः प्रपौत्रस्यापेक्षया वैषम्यं प्रदर्शयति नारदः । क्रमादभ्यागतं प्राप्तं पुत्रैर्यन्नर्णमुद्धृतं । दद्युः पैतामहं पौत्रास्तच्चतुर्थो

न्निवर्त्तते इति ॥ यद्वा योषिद्ग्राहाभावे पुत्रो दाप्य इत्युक्तं सैव चास्य धनं स्मृतमिति स्मरणात् । लक्षणया रिक्थशब्देन योषितमङ्गीकृत्य

पुत्राभावे योषिद्ग्राहो दाप्य इत्युच्यते पुत्रहीनस्य रिक्थिन इत्यनेन पुत्रहीनस्य सयोषित्कस्य ऋणं योषिद्ग्राहो दद्यादित्यर्थः । अ

स्मिन्पक्षे वक्ष्ये धनस्त्रीहारिणोन्तिमा स्वैरिणी प्रथमा पुनर्भूर्हारिणस्त्वभावे पुत्रो दाप्यः । पुत्राभावे निर्धननिरपत्ययोषिद्ग्राही दा

प्य इति व्यवस्था द्रष्टव्या अन्यथा योषिद्ग्राह पुत्राभावयोः पुत्रयोषिद्ग्राही दाप्यो विनिवाख्यानेऽभयसद्भावे कस्याप्यदानप्र

सङ्गः स्यात् । अत एव नारदः । धनस्त्रीहारी पुत्राणामृणभाग्यो धनं हरेत् । पुत्रोऽसतोः स्त्रीधनिनोः स्त्रीहारी धनपुत्रयोरि

ति । कस्मिंश्चित्स्त्रीहारिण्यसति पुत्रो दाप्यः पुत्रे निकश्चित्स्त्रीहारीत्यर्थः । अथवा । एते रिक्थप्राप्ताद्यः क्रमेण दाप्या इत्युक्ते

अस्यादाप्यादायपेक्षिते तद्भ्रमर्णा स्तत्तदभावे तत्पुत्रादेः तस्याप्यभावे कस्येत्यपेक्षिते आह । पुत्रहीनस्य रिक्थिन इति पुत्रान्वयही

नस्यो नमर्णस्य यो रिक्थी रिक्थग्रहणायोग्यः सपिण्डादिः स ऋणं दाप्य इत्यर्थः तथा च नारदः । ब्राह्मणस्य तु यद्देयं सान्वयस्य न चास्ति

सः । निर्वापयेत्सकुल्येषु तदभावेऽस्य बन्धुषु । इत्यभिधायाभिहितवान् । यदा तु न सकुल्याः स्युर्न च संबन्धिबान्धवाः । तदाद

द्याद्द्विजेभ्यस्तु तेष्वसत्स्वप्सु निक्षिपेदिति । विज्ञानेश्वरानुयायीयथा । अत्र कश्चिद्वादभयंकरः दाह । अहो वत जगत्ख्या

तं विज्ञानेश्वरयोगिनः । पूर्वापरविरोधेप्यनानुसंधानमद्भुतम् ॥ रिक्थग्रहस्य गृहीतरिक्थस्य पुत्रस्यान्येन रिक्थग्राहिणा स

ह कदा समावेशः सम्भवति । अपि च पुत्रहीनस्य रिक्थिन इति पदद्विभिरपि संबध्यते द्वाभ्यामेव वा प्रथमे पुत्र इति व्याघातस्य मु

ख्यमुदाहरणम् । द्वितीये भिन्नविषयतातेषामप्यसमावेश इत्येतदपीति तन्मन्दधियान्धंधनमात्रम् । रिक्थग्रहणार्हपुत्र

सत्त्वे एतद्वचनाप्रवृत्तेः पुत्रहीनस्येति त्रिभिरपि सम्बध्यते । न च पुत्रस्य हीनस्य पुत्र इति व्याघातः । पुत्रहीनस्य रिक्थग्रहणार्ह

पुत्रहीनस्य पुत्रो रिक्थग्रहणानर्हः पुत्र इत्यर्थस्योक्तत्वात् । वादभयङ्करकृतास्त्वयमित्थं व्याख्यातं तथा हि । यद्येतान्येषां पुत्रवता

मृणामनन्याश्रितद्रव्यः पुत्रो दाप्यस्तथैव पुत्रहीनस्य रिक्थिनः रिक्थग्राही दाप्यः । तदाह नारदः । अधनस्य ह्यपुत्रस्य
मृतस्योपैति यः स्त्रियम् । ऋणं वोढुः स भजते सैव चास्य धनं स्मृतमिति ॥ तथा । धनस्त्रीहारिपुत्राणामृणभाग्यो धनं हरेत् ।
पुत्रोऽसतोः स्त्रीधनिनोः स्त्रीहारी धनिपुत्रयोरिति ॥ ननु स्त्रीहारी धनहारिणोरसतोः पुत्रः धनहारिपुत्रयोरसतोः स्त्रीहा
रीत्युभयसद्भावे न कश्चिद्दाप्य इति विरोध इति चेन्न पुत्रपदस्य भ्रातृपुत्रपरत्वात् । तदाह मनुः । भ्रातॄणामेकजातानामेकश्चे
त्पुत्रवान्भवेत् । सर्वांस्तांस्तेन पुत्रेण पुत्रिणो मनुरब्रवीदिति । तदप्यसत् । कर्मण्यागमाभावात् । नारदवचनस्वरसान्न
तेऽप्यविरुद्धम् । किञ्च नारदवचनं पुत्रशब्दस्य मुख्येऽर्थे सम्भवति । गौणार्थग्रहणे प्रमाणाभावात् । न च भ्रातृपुत्रेऽपि मुख्यप्रयो
गः । पुत्रिणो मनुरब्रवीदिति स्मरणादिति वाच्यम् । वृद्धव्यवहारेण जन्यपुंसि मुख्यत्वनिर्णयात् । न च मनुवचनविरोधः
। गौणत्वेनाप्युपपत्तेः । न च शक्तिरेवास्तु । अन्याय्यश्चानेकार्थत्वमिति न्यायविरोधात् । न चैवं सैन्धवादिशब्दानामप्यनेकार्
थत्वं न स्यात् । तस्यादेव यदि विनिगमकं स्यान्न च तदस्तीत्यगत्याऽभ्युपगमादिति । दायभागानर्हस्यापि मूर्खव्यसनवत्त्वेऽपि
ऋणं तद्दाप्य इत्याह कात्यायनः । पूर्वं दद्याद्धनग्राहः पुत्रस्तस्मादनन्तरम् । योषिद्ग्राहः सुताभावे पुत्रो वाऽत्यन्तनिर्धनमि
ति ॥ पूर्वं रिक्थग्राहो दद्यात्तदभावे तदनन्तरं धनयुक्तो दायार्हः पुत्रो दद्यात्तस्याभावे योषिद्ग्राहो दद्यादित्यर्थः । सत्यपि दायार्हे पु
त्रे तस्य यदा दुश्चिकित्सरोगाद्युपद्रवेण बाल्येन वा ऋणदानासामर्थ्यं तस्यामवस्थायामपि पितृधनस्य समीपे यः स्थापयति पितृ
व्यादिः स ऋणं दद्यात्तस्याभावे योषिद्ग्राहो दद्यादित्याह स एव । ऋणं तु दापयेत्पुत्रं यदि स्यान्निरुपद्रवः । द्रविणार्ह
स्य धुर्यश्च नान्यथा दापयेत्सुतम् ॥ व्यसनाभिप्लुते पुत्रे बाले वा यत्प्रदृश्यते । द्रव्यग्रहो दापयेत्तन्नु तस्याभावे पुरंध्रिहृदिति ।
कुटुम्बार्थे पितृव्यादिना कृतमृणं कुटुम्बिना दातव्यम् । तथा च बृहस्पतिः ॥ पितृव्यभ्रातृपुत्रस्त्रीदासशिष्यानुजीविभिः । यद्गृ
हीतं कुटुम्बार्थे तद्गृही दातुमर्हतीति । शिष्यशब्देनान्तेवास्यपि गृह्यते । छात्रमात्रस्यापि विवक्षितत्वात् । गृहीत्यनेन गृही

मात्राभिधानम् । किन्तु कुटुम्बिनस्तस्यैव विवक्षितत्वात् अत एव नारदः । शिष्यान्तेवासिदासस्त्रीप्रेष्यात्यकरैश्च यत् । कुटुम्बहेतोरुत्क्षिप्तं दातव्यं तत्कुटुम्बिनेति । शिष्योऽत्र वेदविद्यार्थी । अन्तेवासी शिल्पविद्यार्थी । कुटुम्बहेतोः कुटुम्बार्थं उत्क्षिप्तमुत्थापितं कृतमिति यावत् । कुटुम्बिना कुटुम्बार्थे कृतमृणमसन्निधानादिना स्वानुज्ञानाभावेऽपि व्यवहारं समाचरेत् । तदर्थमनुराह । कुटुम्बार्थेऽध्यधीनोऽपि व्यवहारं समाचरेत् । स्वदेशे वा विदेशे वा तं विद्वान्न विचालयेदिति । अध्यधीनो दासादिः । अन्यदपि कुटुम्बकृतं कुटुम्बिना दातव्यमृणान्तरं दर्शयति कात्यायनः । कुटुम्बार्थमशक्तेन गृहीतं व्याधितेन वा । उपप्लवनिमित्तञ्च विद्यादापत्कृतं तु तत् ॥ कन्यावैवाहिके चैव प्रेतकार्येषु यत्कृतम् । एतत्सर्वं प्रदातव्यं कुटुम्बेन कृतं प्रभोरिति ॥ अशक्तेः कुटुम्बभरणासमर्थे कुटुम्बिनोऽर्थः । कन्यावैवाहिके कन्याविवाहनिमित्तम् । यत्कृतम् । येन धनेन यत्कृतम् । प्रभोः कुटुम्बिनः ॥ * ॥ कुटुम्बार्थव्यतिरिक्तऋणविषये याज्ञवल्क्य आह । न योषित्पतिपुत्राभ्यां न पुत्रेण कृतं पिता । दद्यादृते कुटुम्बार्थान्न पतिः स्त्रीकृतं तथेति । पतिपुत्राभ्यां कृतं ऋणं क्रमेण योषिद्भार्या माता च न दद्यात् । तथा पुत्रेण कृतं पिता न दद्यात् । तथा भार्याकृतं पतिः । कुटुम्बार्थादृते इति सर्वान्वयि । तथा च कुटुम्बिना कुटुम्बार्थे येन केनापि कृतं देयमित्यर्थः । नारदोऽपि । न स्त्री पतिकृतं दद्यादृणं पुत्रकृतं तथेति । विष्णुरपि । न स्त्री पतिपुत्रकृतं न स्त्रीकृतं पतिपुत्राविति । पुत्रेण कृतं पिता नेत्यस्यापवादं कञ्चिदाह बृहस्पतिः । ऋणं पुत्रकृतं पित्रा शोध्यं यदनुमोदितं । सुतस्नेहेन वा दद्यान्नान्यथा दातुमर्हतीति । कात्यायनोऽपि । ऋणं पुत्रकृतं पित्रा न देयमिति धर्मतः । देयं प्रतिश्रुतं यत्स्याद्यच्चस्यादनुमोदितमिति ॥ प्रतिश्रुतमनुज्ञातम् । अनुमोदितमृणकरणानन्तरमङ्गीकृतं यत्पुत्रेणापद्रक्षार्थं कृतं तदपि देयमित्याह नारदः । पितुरेव नियोगाद्वा कुटुम्बभरणाय वा । कृतं वापत्सु यत्कृच्छ्रे दद्यात्पुत्रस्य तत्पितेति ॥ न योषित्पतिपुत्राभ्यामित्यस्यापवादमाह कात्यायनः ॥ भर्त्रा पुत्रेण वा सार्द्धं केवलं वात्मना कृतम् । ऋणमेवंविधं देयं नान्यथा तत्कृतं स्त्रिय इति ॥ भर्त्रा पुत्रेण वा वा सार्धं कृतमृणं तत्तयोर्भार्यया देयम् ।

स्वयंकृतन्तयोर्भावेऽपि देयमित्यर्थः । अत एव स एवाह । देयम्भार्याकृतमृणम्भर्त्रा पुत्रेण मातृकं । भर्त्रा स्वार्थे कृतं यत्स्यादविधा
यगते दिशमिति । अविधाय अनपाकृत्य दिशङ्गते मृते सतीत्यर्थः । याज्ञवल्क्योऽपि । प्रतिपन्नं स्त्रिया देयम्पत्या वा सह यत्कृतं
स्वयंकृतं वा यदृणं नान्यत्स्त्री दातुमर्हतीति ॥ प्रतिपन्नन्देयत्वेनाङ्गीकृतम् । तद्रिक्थग्रहणेऽनङ्गीकृतमिति देयमित्याह । का-
त्यायनः । भर्तृकामेन या भर्त्रोक्ता देयमृणन्तया । अप्रपन्नापि साध्या स्याद्धनं यद्याश्रितं स्त्रिया इति ॥ न पतिः स्त्रीकृतन्तयेत्यस्या-
पवादमाह याज्ञवल्क्यः । गोपशौण्डिकशैलूषरजकव्याधयोषिताम् । ऋणन्दद्यात्पतिस्तासां यस्माद्वृत्तिस्तदाश्रयेति ॥ शैलू-
षो नटः । वृत्तिर्जीवनम् । गोपादिग्रहणम्परपुरुषाधीनजनानां तैलिकादीनामुपलक्षणम् । कात्यायनोऽपि । शौण्डिकव्याधरज-
कगोपनाविकयोषिताम् । अधिष्ठातार ऋणन्दाप्यास्तासाम्भर्तृक्रियासु तदिति । अधिष्ठाता अत्र पतिरेव । भर्तृक्रियासु तत् । य-
तो भर्तुः कर्तव्येषु प्रयोजनेषु तदृणमुत्पन्नं तासामित्यर्थः । भार्यया आपदुद्धारार्थं यत्कृतन्तदपि देयमित्याह । स एव । न च
भार्याकृतमृणं कथञ्चित्पत्युर्भवेत् । आपत्कृतादृते पुंसां कुटुम्बार्थे हि विस्तरः ॥ अन्यत्र रजकव्याधगोपशौण्डिकयोषिताम्
। तेषान्तु तत्परा वृत्तिः कुटुम्बञ्च तदाश्रयमिति । आपद्देयम्भवेदित्यर्थः । न स्त्री भर्तृकृतं ऋणन्दद्यादित्यस्यापवादमाह ।
नारदः । दद्यादपुत्रा विधवा नियुक्ता या मुमूर्षुणा । यावा तद्रिक्थमादद्याद्भर्तुरिक्थमृणन्तत इति । मातृकृतमृणम्पुत्रेण देय-
मित्याह विष्णुः । पैतृकमविभक्तमातृकञ्च । विभक्ताश्च दायानुरूपमिति । दद्युरित्यनुषङ्गः । मातुर्दैर्घ्येऽपि निर्धनायास्तस्याः
ऋणम्पुत्रेण दातव्यमित्याह नारदः । पुत्रिणी तु समुत्सृज्य पुत्रं स्त्री यान्यमाश्रयेत् । तस्या ऋणं हरेत्सर्वन्निःस्वायाः पुत्र एव
त्विति । अन्यम्भर्तारमिति शेषः । तस्या एव सधनत्वे कात्यायन आह । बालपुत्राधिकार्थाया भर्तारं यान्यमाश्रिता । आश्रित-
स्तदृणन्दद्याद्बालपुत्रा विधिस्मृतः । यदृणं कुटुम्बपोषणार्थमविभक्तैः कृतन्तत्तद्दानाधिकारिणि कुटुम्बिनि प्रेते देशान्तरगते
वा तद्रिक्थहरैर्देयमिति । याज्ञवल्क्य आह । अविभक्तैः कुटुम्बार्थे यदृणन्तु कृतम्भवेत् । दद्युस्तद्रिक्थिनः प्रेते प्रोषिते वा कुटु-

म्निनीति ॥ तत्रापि केषाञ्चिदभावे यस्तिष्ठति स एव दद्यात् । तथा च विष्णुः । अविभक्तैः कृतमृणं यस्तिष्ठति स दद्यादिति । अ
विभक्तैरिति वक्तव्ये वचनम्पूर्वत्राविवक्षितम् । तथा च नारदः । पितृव्येणाविभक्तेन भ्रात्रा वा यदृणं कृतम् । मात्रा वा यत्कुटुम्बार्थे
दद्युस्तत्सर्वे रिक्थिन इति । कर्तर्यसति प्रेते प्रोषिते वेति शेषः । तस्मिन्प्रधानभूते स्थिते सत्येतेषां गुणभूतानामृणादानानधिका
रात् । अत एव मनुः । गृहीत्वा यदि नष्टः स्यात्कुटुम्बार्थे कृतो व्ययः । दातव्यं बान्धवैस्तत्स्यात्प्रविभक्तैरपि स्वत इति ॥ ऋणस्य
गृहीता पितृव्यादिर्यदि नष्टः प्रोषितो मृतो वा स्यात् । तदा तद्रिक्थिभिर्विभक्तैस्तत्कुटुम्बव्ययकृतमृणन्दातव्यं स्वतः किमुताविभक्तै
रित्यर्थः । एवं वृत्तिकारेण व्याख्यातम् । अस्मिन्व्याख्याने वचनान्तरे पृथग्वा विभक्त यद्गृह्णीयादिति महाभाष्यकारेण प्रविभक्त
धनैः पितृव्यादिभिः स्वधनाद्दातव्यमित्यर्थः । कृतमिति स्मृतिचन्द्रिकायाम् । एतच्च कर्तुः प्रतिदातृसमर्थाभावे तत्पुत्रादिषु कर्तृ
ष्वन्तेवामभावे तत्सगोत्रेषु तेषामभावे तद्बन्धुषु मातुलादिष्वित्याह नारदः । ब्राह्मणस्य तु यद्देयं सान्वयस्य न चास्ति सः । निर्वपेत्त
त्सकुल्येषु तदभावेऽस्य बन्धुष्विति । ब्राह्मणार्थग्रहणमुत्तमर्णोपलक्षणार्थम् । अन्वयः पुत्रसन्ततिर्दुहितृसन्ततिश्च । बन्धू
नामभावे त्वाह स एव । यदा तु न सकुल्याः स्युर्न च सम्बन्धिबान्धवाः । तदा दद्याद्द्विजेभ्यस्तु तेष्वसत्स्वप्सु निःक्षिपेदिति । प्र
जापतिरपि । बंध्वभावे तु विप्रेभ्यो देयं क्षेप्यं जलेऽपि वा । जले क्षिप्तं तथाग्नौ च धनं स्यात्पारलौकिकमिति । अग्नौ हुतमिति शे
षः । ननु क्षिप्तमित्यस्यानुषङ्गः । अत एवोक्तं स्मृतिसंग्रहे । द्रव्यं यत्त्वधमर्णस्य कश्चिद्ब्राह्मणगम्भवेत् । सुतादिब्राह्मणा
न्तानां रिक्थभाजामसम्भवे ॥ पलाशस्य पलाशेन जुहुयान्मध्यमेन तु । यत्कुसीदमिति प्राप्य देयं वा वैश्वानरं हुतमिति । मध्य
स्य होमेनैव सम्बन्धो न तु प्रक्षेपेण मध्यमेन पर्णेन जुहुयात् । कुसीदमिति गोभिलेन होमसंबन्धित्वेनैव स्मृतत्वात् । यस्तु ऋ
प्रतिदानकाले समर्थं सवृद्धिकं मूलन्दातुमसमर्थस्तम्प्रत्याह याज्ञवल्क्यः । लेख्यस्य पृष्ठेऽभिलिखेद्दत्त्वा दत्त्वर्णिको धनम् । धनी
वोपगतन्दद्यात्स्वहस्तपरिचिह्नितमिति । अयमर्थः । यथाशक्त्या दत्त्वा दत्त्वैतावत्सवृद्धिकं मया दत्तमिति मूलपत्रस्य पृष्ठे लिखे

त्। यद्वाऽधमर्णः एतावन्मया लब्धमिति स्वहस्ताक्षरचिह्नितं यथा भवति तथा मूलपत्रे विलिखेत्। स्वहस्तलिखितमुपगताख्यम्प्र
वेशपत्रं वाऽधमर्णाय दद्यादिति। एतच्च प्रवेशपत्रदानं मूलपत्रासन्निधानविषयम्। अत एवाह विष्णुः। असमग्रदाने
लेख्यासन्निधाने चोत्तमर्णः स्वलिखितं दद्यादिति प्रवेशपत्रादाने चाह नारदः। गृहीत्वोपगतं दद्यादृणिकायोदयं धनी। अ
ददद्याच्यमानस्तु शेषहानिमवाप्नुयादिति॥ उदयं मूलिकं दत्तधनम्। उदयं गृहीत्वेत्यन्वयः। एतच्च शेषस्याल्पत्ववि
षयम्। बाहुल्ये तु धर्मादिनोद्ग्राह्यम्। ऋणं यस्तूपरि न लेखयेन्न चैवोपगतं दद्यात्तस्य तद्वृद्धिमाप्नुयात्। इति बृहस्प
त्युक्तोत्तमर्णस्य गृहीतांशवृद्धिदानमेव। उदयं गृहीत्वा ऋणमसमग्रमिति शेषः। ऋणाप्रतिदाने त्वनिष्टमाह। व्या
सः। तपस्वी चाग्निहोत्री वा ऋणवान् म्रियते यदि। तपश्चैवाग्निहोत्रं च सर्वं तद्धनिनो भवेदिति। तेनावश्यमृणमपाकर
णीयमित्याशयः। अनेनैवाशयेन कात्यायनोऽप्याह। उद्धारादिकमादाय स्वामिने न ददाति यः। स तस्य दासो भृत्यः स्त्री पशु
र्वा जायते गृह इति। आदिशब्देन निःक्षेपादीनां ग्रहणम्। स दासः क्रीतः। भृत्यो वेतनिकः। इति तयोर्भेदः। नारदोऽपि।
याच्यमानं न दद्याद्यदृणं वापि प्रतिश्रुतम्। तद्द्रव्यं वर्द्धते तावद्यावत्कोटिशतं भवेत्॥ ततः कोटिशते पूर्णे वेष्टितस्तेन कर्मणा
। अश्वः खरो वृषो दासो भवेज्जन्मनि जन्मनि इति। प्रतिग्रहः प्रतिश्रुतम्। लेख्यारूढप्रतिदानानन्तरकर्तव्यमाह याज्ञवल्क्यः
। दत्वर्णं पाटयेल्लेख्यं शुद्ध्यै वान्यत्तु कारयेदिति। लेख्यं मूलपत्रम्। शुद्ध्यै ऋणापाकरणार्थम्। अन्यद्विशुद्धिपत्रं वोत्त
मर्णाद्गृह्णीयादित्यर्थः। मूलपत्रासन्निधाने कथंचिद्विशुद्धिपत्रासम्भवे किं कर्तव्यमित्यपेक्षिते नारद आह। लेखं दद्या
द्विशुद्ध्यर्णे तदभावे प्रतिश्रवः। धनिकर्णिकयोरेवं विशुद्धिः स्यात्परस्परमिति। प्रतिश्रवः प्रतिदानं कृतमिति साक्षिभिः श्रा
वणं साक्षिमदृणप्रतिदानारम्भं त्वाह याज्ञवल्क्यः। साक्षिमच्च भवेद्यद्वा तद्दातव्यं ससाक्षिकमिति। ससाक्षिकमृणं पूर्वसाक्षिणां
समक्षं नो चाकथञ्चित्सम्भवे साक्ष्यन्तरसमक्षं वा दातव्यमित्यर्थः। उत्तमर्णेन साक्ष्यादिभिः साधितमृणं दापितवतो राज्ञोऽर्ध

मर्णाद्दण्डग्रहणमुत्तमर्णाद्भृतिग्रहणाच्चाह स एव । राज्ञाधमर्णिको दाप्यः साधिताद्दशकं शतम् । पञ्चकञ्च शतं दाप्यः प्राप्तार्थो
ह्युत्तमर्णिक इति । अधमर्णात्साधितार्थस्य यो दशमोंऽशस्तावद्द्रव्यं दण्डत्वेन गृह्णीयात् । उत्तमर्णात्तु साधितार्थस्य विंशतितमम
शं भृतित्वेनेत्यर्थः । अत एव विष्णुः । उत्तमर्णश्चेद्राजानमियात्तत्साद्विभाविते ऽधमर्णो राज्ञे धनदशमभागसमन्तं दण्डं दद्या
त् । प्राप्तार्थश्चोत्तमर्णो विंशतितममंशमिति तद्विभाविते उत्तमर्णेन साधिते सति । यत्तु मनुवचनं । योयावन्निह्नुवीतार्थं मिथ्या
यावतीवा वदेत् । तौ नृपेण ह्यधर्मज्ञौ दाप्यौ तद्द्विगुणं दमम् इति । तद्दक्षधनातिदुर्वृत्ताधमर्णोत्तमर्णविषयम् । यावन्निह्नुवीत
यावतीं मिथ्या वा वदेत्तमयैतावद्दत्तमित्यसत्यं वदेत्तावुभावपि तावतो धनस्य द्विगुणमेवनन्दद्याविति अर्थः । यत्पुनस्तस्यैव वचनं अर्थे
ऽपव्ययमानन्तु कारणेन विभावितम् । दापयेद्धनिकस्यार्थं दण्डलेशञ्च शक्तित इति । तद्दशमांशदानासमर्थस्य दुर्वृत्ताधमर्णवि
षयं । अपव्ययमानमपलपन्तं यस्तु प्रभुत्वाद्बलेपाद्वोत्तमर्णेन याचितस्तदा ऽसम्प्रतिपद्य राजसभायामानीतः स्वयमेव सम्प्रति
पद्यते सोऽभियुक्तार्थस्य विंशतितममंशं दण्डनीय इत्याह नारदः । ऋणिकः सधनो यस्तु दौरात्म्यान्न प्रयच्छति । राज्ञा दाप
यितव्यः स्याद्गृहीत्वांशन्तु विंशकमिति । मनुरपि । ऋणे देये प्रतिज्ञाते पञ्चकं शतमर्हति । अपह्नवे तद्द्विगुणन्तन्मनोरनु
शासनमिति । यः पूर्वमप्रतिपद्य राजसभायामानीतोऽधमर्ण ऋणं देयन्तया प्रतिजानीते सत्यमस्मै धारयामीति स पञ्चकं शत
मर्हति दातुमिति शेषः । यस्तु सभायामप्यपह्नुते नाहमस्मै धारयामीति पश्चादङ्गीकरोमीति स तद्द्विगुणं प्रतिपादितं पञ्चकश
ताद्द्विगुणं दशकं दण्डमर्हतीत्यर्थः । यस्तु याज्ञवल्क्यवचनेन निह्नवे भाविते दद्याद्धनं राज्ञे च तत्समम् । मिथ्याभियोगी द्विगु
णमभियोगाद्धनं हरेदिति । अपलपितुः समदण्ड उक्तः स द्विगुणधनदानासमर्थदुर्वृत्ताधमर्णविषयः । अन्यथा निह्नवे
द्विगुणदण्डप्रतिपादकयोर्यावन्निह्नुवीतार्थमिति पूर्वोदाहृतमनुवचनविरोधः स्यात् । अभियोगादभियुक्तधनात् । मिथ्याभि
योगी द्विगुणमभियोगाद्धनं हरेत् । कारणे विधिरेषः स्याज्जितस्यैकतरस्य तु ॥ प्राङ्न्यायवादे च तथा यश्चासत्येन युज्यत इति व्या

स्ववचनविरोधस्तुस्यात्। कारणेकारणोत्तरे। असत्येनमिथ्योत्तरेणप्रत्यवस्कन्दनेप्राङ्न्यायेमिथ्योत्तरेचवादिप्रतिवादिनोर्मध्ये यस्यैकरतस्यपराजयस्तस्यापिपूर्वोक्तेनद्विगुणोदण्डइत्यर्थः। यत्तुमिताक्षरायाम्। मिथ्योत्तरेऽपह्नोतुःपराजयेसमोदण्डः मिथ्याभियोक्तुर्द्विगुणोदण्डःएवम्प्राङ्न्यायेप्रत्यवस्कंदनेचार्थिनोऽपह्नववादित्वात्प्रत्यर्थिनाप्राङ्न्यायकारणसाधनेप्रकृतधनेप्रकृतधनएवदण्डःयदिप्रत्यर्थीप्राङ्न्यायकारणेनसाधयतितदार्थमिथ्याभियोग्येवेतितस्यद्विगुणोदण्डइत्युक्तन्तत्पूर्वोक्तस्वा स्ववचनविरोधाद्विभावनीयंविद्वद्भिरिति। इत्यृणादानाख्यव्यवहारपदम्॥ ● ॥ अथनिःक्षेपाख्यव्यवहारपदम्। तत्रनिःक्षेपोनामस्वद्रव्यस्यविश्वासेनपुरुषान्तरेस्थापनम्। तथाचनारदः। स्वद्रव्यंयत्रविस्रम्भान्निःक्षिपत्यविशङ्कितः। निःक्षेपोनामतत्प्रोक्तंव्यवहारपदंबुधैरिति॥ नचन्यासोपनिध्योरतिव्याप्तिस्तयोर्लक्ष्यत्वान्निःक्षेपएव॥ याज्ञवल्क्यःसमक्षंसमर्पितोन्यासइत्युच्यते। अतएववृहस्पतिः। राजचौरारातिकभयाद्दायादानाञ्चवञ्चनात्। स्थाप्यतेऽन्यगृहेद्रव्यंन्यासःसपरिकीर्त्तितइतिः। अयमेवागणितद्रव्यस्थापनेउपनिधिरित्युच्यते। तथाचनारदः। असंख्यातमविज्ञातंसमुद्रंयन्निधीयते तज्जानीयादुपनिधिंनिःक्षेपङ्गणितंविदुरिति। असंख्यातंअदर्शितंअविज्ञातंअनाख्यातम्। अतएववृहस्पतिः। अनाख्यातंव्यवहितमसंख्यातमदर्शितम्॥ मुद्राङ्कितञ्चयद्द्रव्यन्तदौपनिधिकंस्मृतमिति। व्यवहितंकरंडकादौप्रक्षिप्यापिहितम्। अतएवयाज्ञवल्क्यः। वासनस्थमविज्ञातंहस्तेऽन्यस्ययदर्प्यते। द्रव्यन्तदौपनिधिकम्प्रतिदेयन्तथैवतदिति॥ वासनंद्रव्याधारनीतंकरण्डकादितत्स्थंवासनस्थम्। हस्तयद्ग्रहणमुपलक्षणम्। अतएवनारदः। निःक्षिप्यतेपरगृहेतदौपनिधिकंस्मृतमिति। तथाचायमेतेषाम्भेदः। याज्ञवल्क्यसमक्षंगणयित्वास्थापितंनिःक्षेपः। गृहस्वामिनोऽसमक्षंगणितंवातत्सिद्धागतेएतद्दातव्यमित्युक्त्वाऽन्यस्यतत्पुत्रादेर्हस्तेदत्तंन्यासःमुद्राङ्कितंसमक्षमगणितंस्थापनमुपनिधिरिति। निःक्षेपादीनां स्थापनप्रकारमाहमनुः। कुलजेवृत्तसम्पन्नेधर्मज्ञेसत्यवादिनि। महापक्षेधनिन्यार्य्येनिःक्षेपन्निःक्षिपेद्बुधइति। महापक्षे

बकुतरवन्मुयुक्ते। निःक्षेपग्रहणमुपलक्षणम्। बृहस्पतिः। स्थानंगृहंस्वतद्दर्यौविधानस्वगुणंतथा। सत्यंशौचमन्युजनन्परीक्ष्यस्थापयेन्निधिमिति॥ निधिरूपनिधिः। एतदप्युपलक्षणम्। निःक्षेपादीनांरक्षणक्रमंव्यंयाहकेणाहबृहस्पतिः। ससाक्षिकंरहोदत्तंद्विविधंसमुदाहृतम्। पुत्रवत्परिपाल्यंतद्धिनश्यत्यनवेक्षणेइति। पालयितुःफलमपालयितुर्दोषमाह। ददतोयद्भवेत्पुण्यंहेमकूप्यांबरादिकम्। तत्स्यात्पालयतोन्यासंयथैवशरणागतम्॥ भर्तृद्रोहंयथानार्याःपुंसःपुत्रसुहृद्वधे। दोषोभवेत्तथान्यासेभक्षितेपेक्षितेन्टणाम्॥ न्यासद्रव्यंनगृह्णीयान्नाशसंशयशङ्करः॥ गृहीतम्पालयेद्यत्नात्समुद्याचितमर्पयेदिति। न्यासग्रहणमुपलक्षणम्। तेनफलभूम्यादिकंनिःक्षेपादिवयसाधारणमितिमन्तव्यम्। दैवराजोपघातेनाह कस्यनदोषइत्याहबृहस्पतिः। दैवराजोपघातेनयदितन्नाशमाप्नुयात्। गृहीतद्रव्यसहितंननद्दोषेणविद्युतइति। ग्रहीतुरितिशेषःउपेक्षादिद्रव्यदोषाभावादितिभावः। गृहीतद्रव्यसहितमित्युपेक्षाभावनिश्चयोक्तम्। तेनकथंचिन्निःक्षिप्तमात्रस्यविनाशेप्रमाणान्तरादुपेक्षाभावेनिश्चितेग्रहीतुर्दोषेणविद्युतइतिमन्तव्यं। दैवराजग्रहणमसमाधेयं। निमित्तोपलक्षणार्थंअतएवकात्यायनः। राजदैविकचौरैर्वानिःक्षिप्तंयत्ननाशितम्। ग्रहीतुःसहभाण्डेनदातुर्नष्टन्तदुच्यतइति॥ भाण्डेनसार्थेन। नारदोपि। ग्रहीतुःसहयोर्थेननष्टःएवसदायिनः॥ दैवराजकृतेतद्वन्नचेत्तज्जिह्मकारितमिति। तद्वदितिपदेनैकमुपमेयमन्यदुपमानमित्यवगम्यते। तेनैवयोजनायहीतुरर्थैसहयोनष्टस्सदायिनएवएवन्दैवराजकृतेयोनष्टःसोपिदायिनएवनष्टइतिदैवग्रहणान्तस्करोपलक्षणम्। अतएवयाज्ञवल्क्यः। नदाप्योपहृतन्तन्तुराजदैविकतस्करैरिति। दैविकपदस्यार्थौविवृतोमनुना। चौरैर्हृतंजलेनोढमग्निनादग्धमेववा। नदद्याद्यदितस्मात्संनसंहरतिकिञ्चनेति॥ यदितस्मान्निःक्षेपादल्पमपिधनन्नसंहरतिनगृह्णातितर्हिनदद्यादित्यर्थः। तथाचस्मरण। समुद्रेनाप्नुयात्किञ्चिद्यदितस्मान्नसंहरेदिति क्वचिद्येनकेनचिद्धेतुनानष्टमपियहीतामूल्यद्वारेणनदाप्यइत्याह। कात्यायनः। ज्ञात्वाद्रव्यवियोगन्तुदातायत्रविनिक्षिः

प्रेत्। सर्वैापायविनाशेपिग्रहीतानैवदाप्यतेइति। निःक्षेपग्रहीतारम्प्रत्याहकात्यायनः। निःक्षिप्तंयस्ययत्किंचत्प्रयत्नेनपाल येत्। दैवराजकृतादन्योविनाशस्तस्यकीर्त्यतइति। यस्यपार्श्वेयत्स्थापितन्तत्तेनावहितेनरक्षणीयं। यतोदैवराजकृतादन्यो विनाशस्तस्यग्राहकस्यदोषेणकृतत्वेनकीर्त्यतेइत्यर्थः। नकेवलन्दुष्कीर्त्तिरेवतस्यकिन्तुविनाशेजातेवस्तुगत्यादोषेणबह्वर्थ हानिस्तेनैवसहसएव। यस्यदोषेणयत्किञ्चिद्विनश्येत्ह्रियेतवा। तद्द्रव्यंसोदयन्दाप्योदैवराजकृताद्विनेति॥ दोषःउपेक्षा दिलक्षणः। बृहस्पतिरपि। भेदेनोपेक्षयान्यासंग्रहीतायदिनाशयेत्। याच्यमानोनदद्याद्वादाप्यस्तत्सोदयम्भवेदिति॥ कात्यायनोपि। न्यासादिकम्परद्रव्यंप्रभक्षितमुपेक्षितम्। अज्ञाननाशितञ्चैवयेनदाप्यःसएवतदिति॥ अत्रविशेषमाह तुर्यांशकात्यायनो। भक्षितेसोदयन्दाप्यःसमन्दाप्यउपेक्षिते। किञ्चिदूनम्प्रदाप्यंस्याद्द्रव्यमज्ञाननाशितमिति॥ किञ्चि दूनञ्चतुर्थांशन्यूनमितिमिताक्षरायाम्। याचनानन्तरमदत्तस्यपश्चाद्दैवराजकृतेपिविनाशेस्थापकंयन्मूल्यमात्रन्दातव्य मित्याहव्यासः। याचनानन्तरंनाशेदैवराजकृतेपिशः। ग्रहीताप्रतिदाप्यःस्यान्मूल्यमात्रन्नसंशयइति। प्रत्यर्पणविलं बमात्रापराधेसवृद्धिकदानस्यान्याय्यत्वात्। राज्ञेचतत्समोदण्डोदेयइत्याहनारदः। याच्यमानस्तुयोदातुर्निःक्षेपन्नप्रयच्छ ति। दण्ड्यःसराज्ञाभवतिनष्टेदाप्यश्चतत्सममिति। नष्टेदैवतोराजतोवेतिशेषः। याज्ञवल्क्योपि। भ्रंशश्चेन्मार्गितेऽदत्तेदा प्योदण्डश्चतत्सममिति। मार्गितयाचितेऽदत्तेसतियदिभ्रंशोदैवराजकृतोनाशोभवतितथापितद्द्रव्यंमूल्यपरिकल्पनेनध निनेग्राहकोदाप्योदण्डोराज्ञेचतत्समंदण्डमित्यर्थः। यःपुनस्थापकाननुज्ञयानिःक्षेपमुपभुंक्तेतस्यदण्डमाहनारदः। यस्त्वा र्थेसाधयेत्तेननिक्षेप्तुरननुज्ञया। तत्रापिदण्ड्यःसभवेत्तच्चसोदयमावहेदिति। दण्ड्यःसाधितद्रव्यानुसारेण। याज्ञवल्क्यो पि। आजीवन्स्वेच्छयादण्ड्योदाप्यस्तच्चापिसोदयमिति। आजीवन्भोगवृद्ध्यर्थंप्रयोगादिनाउपजीवन्स्वेच्छयास्वाम्यनमु ज्ञया। वृद्धिप्रमाणंचाहकात्यायनः। निःक्षेपंवृद्धिशेषञ्चक्रयविक्रयमेवच। याच्यमानंनचेद्दद्याद्वर्द्धतेपञ्चकंशतमिति।

निःक्षेपहर्त्तारमधिकृत्याह विष्णुः। निःक्षेपापहारी वृद्धिसहितं धनं धनिकस्य दाप्यः। राज्ञश्च तत्समं दण्डमाह मनुः। निःक्षेपस्यापहर्त्तारं तत्समं दापयेद्दमं। तथोपनिधिहर्त्तारमविशेषेण पार्थिवः। निःक्षेपापह्नवे कर्त्तव्यमाह व्यासः। निःक्षेपमपह्नुते यस्तु नरो यं धुर्तवर्त्तितः साक्षिभिर्वा यद्वशेषाद्विभाव्य प्रतिदाप्यते॥ दण्डमाह वृहस्पतिः। गृहीत्वापह्नुते यस्तु साक्षिभिः शपथेन वा। विभाव्य दापयेन्मासं तत्समं विनयं तथेति॥ विनयं दण्डं च साक्षिकनिःक्षेपादौ स्थापकस्यान्ततो वादित्वे साक्षिभ्यो यथास्थितमर्थं न वगम्य दण्डनीयः स इत्याह मनुः। निःक्षेपो यः कृतो येन यावांश्च कुलसन्निधौ। तावानेव स विज्ञेयो विब्रुवन् दण्डमर्हतीति॥ कुलं साक्षिवृन्दम्। असाक्षिकेऽप्याह वृहस्पतिः। रहो दत्ते निधौ यत्र विसम्वादः प्रजायते। विभावकं तत्र दिव्यमुभयोरपि च स्मृतमिति॥ उभयोर्मध्ये एकस्येत्यर्थः। उभयत्र ह यांत्यावाप्य नरः कुर्यादिव्यमेव पक्षाय यात्स्यादिति। गृहीतृस्थापकयोरन्ततया दिव्ये दण्डमाह मनुः। निःक्षेपस्यापहर्त्तारमनिःक्षेप्तारमेव च। सर्वैरुपायैरन्विच्छेच्छपथैश्चैव वैदिकैः॥ योनिःक्षेपं नार्पयति यश्चानिःक्षिप्य याचते। उभौ तौ चौरवच्छास्यौ दाप्यौ वा तत्समं दममिति। चौरवच्छास्यो चौरवद्दण्ड्यो चौरवद्दण्डेन दण्डयितव्यौ चेत्। दण्डस्य प्रमाणमाह स एव उक्तमनुवृत्तौ। यस्तु मत्स्यपुराणे॥ योनिःक्षेपं नार्पयति यश्चानिःक्षिप्य याचते। तावुभौ चौरवच्छास्यौ दाप्यौ वा द्विगुणं दममिति। द्विगुणो दण्ड उक्तः। बहुवर्णविषये ब्राह्मणातिरिक्तविषये वा। अन्यथा समदण्डप्रतिपादकमनुवचनविरोधः स्यादिति। निःक्षिप्तद्रव्यमकाले दत्तो द्विगुणो दमः इत्याह कात्यायनः। याच्यमानस्तूपनिधिः काले कालहीनमनुवर्जयेत्। कालहीने दद्याद्दण्डं द्विगुणस्य प्रदापयेदिति। याच्यः निःक्षेपकारिणा निःक्षेपः यद्वा याच्यः उपनिधिरन्यस्य हस्ते न्यस्तः तद्याती ते काले स याच्य इत्यर्थः। तद्याती ते तु काले स्वयमेव नायाचितमर्पणीयम्। स कश्चापि तमर्पयेदिति वृहस्पतिस्मरणात्। तद्येव वर्त्तमाने स्वयमेवायाचितमर्प्यमाणं कालहीनं तत्स्य दानन्दैच्छ्येनैवेति तद्दत्तो पि दण्डो युक्तः। प्राड्विवाकं प्रत्याह मनुः। योनिःक्षेपं याच्यमानो निःक्षेप्तुर्न प्रयच्छति। स याच्यः प्राड्विवाकेन तन्निःक्षेप्तुरसन्निधौ। स यदि प्रतिपद्येत यथान्यस्तं य

याश्रितम्। नतत्रविद्यतेकिञ्चिद्यत्परेणाभियुज्यतइति। यदातुनप्रतिपद्येतनतदाराजानम्प्रत्याहसएव। तेषांनदद्याद्यदितु
तद्धिरण्यंयथाविधि। इयन्निगृह्यदाप्यःस्यादितिधर्मस्यधारणा। निःक्षिप्तस्यधनस्यैवम्प्रीत्योपनिहितस्यच। राजाविनिर्णी
यंकुर्य्यादक्षिखन्न्यासधारिणमिति। तेषांअभियोक्तॄणाम्। द्वयंद्विगुणम्। निगृह्यदण्डयित्वाअक्षिखन्अनाडयन्।
निःक्षेपग्रहीतारम्प्रत्याहबृहस्पतिः। स्थापितंयेनविधिनायेनयच्चयथाविधि। तथैवतस्यतद्देयंनदेयम्प्रत्यनन्तरइति॥ स्थापि
तेतरस्ययस्यस्थापितद्रव्यस्वाम्यमस्तिसइहप्रत्यनन्तरउच्यतइतिस्मृतिचन्द्रिकायाम्प्रत्यनन्तरेपुत्रादावितिकल्पतरौस्थापक
म्प्रत्याहमनुः। योयथानिःक्षेपेद्धस्तेयमर्थंयस्यमानवः। सतथैवग्रहीतव्योयथादायस्तथाग्रहः। मिथ्यादायःकृतोयेनग्र
हीतोमिथएववा। मिथएवप्रदातव्योयथादायस्तथाग्रहः। समुद्रेनाप्नुयात्किञ्चिद्यदितस्मान्नसंहरेदिति। दायोदानं
स्थापनमितियावत्। ग्रहोग्रहणंमिथःअन्योन्यमेवएतदुक्तम्भवति। सन्याक्षिप्तेनस्थापितम्। साक्षिसाक्षिसमक्षंगृहीतव्य
म्। रहसिस्थापितंरहस्येवेति। समुद्रेमुद्रासहितेनिःक्षेपेमूषकादिनोपहृतेनिःक्षेपंस्थापयित्वानकिञ्चिद्दूषणमाप्नुयात्।
यदितस्मान्निःक्षेपात्प्रतिमुद्राश्रावणादिनानापहरेत्किञ्चिदित्यर्थः॥ स्थापयितुर्मरणेप्रत्यनन्तरेतद्देयमित्याहसएव। स्व
यमेवतुयोदद्यान्मृतस्यप्रत्यनन्तरे। नसराज्ञाभियोक्तव्योननिःक्षेप्तुश्चबन्धुभिरिति। अनेनवचनेनवचोभंग्यास्थापकेमृतेप्रत्य
नन्तरेप्रत्यर्पणंग्राहकेणकार्यमित्युक्तम्। स्वयमेवयाचनमन्तरेणेत्यर्थः। याचनमन्तरेणादानम्भयादिकालोपायेमन्तव्यम्
अन्यथादोषापत्तेः। प्रत्यनन्तरवक्तृत्वेतुनैकस्मिन्प्रत्यनन्तरेदेयंकिन्तुसर्वप्रत्यनन्तरसन्निधावितिननिःक्षेप्तृबंधुभिरभियो
क्तव्यइत्यनेनसूचयाम्बभूव। यदातुग्राहकःस्वयमेवनददातितदाप्रत्यनन्तरकर्तव्यमाहसएव। अच्छलेनैवचान्विच्छेत्तम
र्थंप्रीतिपूर्वकं। बिचार्य्यतस्यवावृत्तंसाम्नैवपरिसाधयेदिति। अन्विच्छेत्अवधारयेत्परिसाधनंग्राहकसकाशादादानन्तद्ग्राह
कवृत्तंविचार्यसतद्ग्राहकविषयेसाम्नैवकार्य्येनभयादिप्रदर्शनेन। दुर्वृत्तग्राहकविषयेतुऋणादानप्रकरणोक्तेनभयादिप्र

दर्शनाद्युपायान्तरेण छलादिना कार्य्यमित्यस्मादेव वचनादवगम्यते । तथा सद्वृत्तेर्विप्रतिपन्नेभूतानुसारेण साधयितुमशक्
क्येसाध्याद्यभावे प्रत्यनन्तरादिना साधयेत् । दुर्वृत्ते तु विप्रतिपन्ने छलादिनापरिहरेदिति वास्मादेव वचनादवगम्यते । स
द्वृत्ते छलादिप्रयोगवच्छपथेन शोधनस्याप्यनुचितत्वात् । ग्राहके तु मृते पश्चात्तदधीनान्निःक्षेपादि जायते तेनैव स्थापके प्रत्यन
न्तरे वा प्रत्यर्पणीयमित्यतिस्थूलत्वान्स्मृतिकारैरुपेक्षितमित्यस्मादृणाकारणमुन्नेयं यदि ग्राहकवत् सोस्वयं न ददाति तदा स्थाप
कः प्रत्यनन्तरो वा पूर्वोक्तमार्गेणान्विच्छेत्सम्प्रतिपन्नं पूर्वोक्तेन प्रकारेणापरियहं साधयेदित्येतदपि स्मृतिकारैरुपेक्षितं ज्ञातुमशक्य
त्वादिति स्मृतिचन्द्रिकायाम् । निःक्षेपेऽभिहितन्धर्मं याचितादिष्वतिदिशति नारदः । एष एव विधिर्दृष्टो याचितान्वाहिता
दिषु । शिल्पिषूपनिधौ न्यासे प्रतिन्यासे तथैव चेति ॥ याचितं उत्सवादिषु परकीयमलंकारादि याचित्वा समानीतम् । अन्वाहि
तं यस्मिन् स्थितम्परधनमन्यहस्ते दत्तं शिल्पिषु शिल्पिन्यासे कुण्डलादिकरणाय स्वर्णकारादिहस्तन्यस्तसुवर्णादा विन्यर्थः ।
प्रतिन्यासे मिथः कार्य्यापेक्षया त्वदीयमेतन्मया स्थाप्यते मदीयमेतत्त्वया स्थापनीयमिति स्थापितेनारदेन निःक्षेप एव विद्युप
देशादुपनिधिन्यासयोस्तदतिदेशः । याज्ञवल्क्योपि । याचितान्वाहितन्यासनिःक्षेपादिष्वयं विधिरिति । यद्यपि स्मृत्यंतरे न्यास
निःक्षेपयोर्विधिरुपदिष्टस्तथाप्यस्यां स्मृतौ नोपदिष्टाइत्युपनिधिधर्माणामतिदेशोयुक्तः । बृहस्पतिरपि । अन्वाहिते याचि
तके शिल्पिन्यासे सबन्धके । एष एवोदितो धर्मस्तथा चशरणागत इति ॥ अनेन याचितस्य शिल्पिन्यासस्य दैवादिनाशे स्वर्ण
कारप्रभृतिस्तं न दाप्या इत्युक्तं तस्य क्वचिदपवादमाह कात्यायनः । एतस्त्वसंस्थितेन्यासे दिवसैः परिनिष्ठितैः । तदूर्ध्वं स्था
पयंश्छिल्पी दाप्यो दैवाद्धतेपि निर्मिते । रजकस्य हस्ते नैमित्त्यार्थं दत्तस्य जीर्णवस्त्रादेर्यद्यवघातादिना नाशः अवघातादि न नैमि
त्त्याद्यर्थं स्तदा शिल्पिदोषाभावान्न शिल्पी न दाप्यः । नूतनादौ तु पटुतरावघातादिकत्वान्नाशस्य शिल्पिदोषकृतत्वान्मूल्यं दा
प्य इत्यभिसन्धायाह स एव । न्यासदोषाद्विनाशः स्याच्छिल्पिनं तन्न दापयेत् । दापयेच्छिल्पिदोषान्नत्यंस्कारार्थयदर्पितमि-

ति । शिल्पिदोषादिव्य विनाशः स्यादित्यनुषज्यते । यत्र तन्त्वादिकमादाय कुविन्दादेर्वस्त्रं घटपटादि स्वयं मध्यस्थपरिपू
र्णं दद्यात्तावता कुविन्दादिना दीयमानं स्वामिना न गृहीतं तच्च स्वामिनष्टं तत्राप्याहतुर्मनुकात्यायनौ । स्वल्पेनापि च यः कर्म मध्ये
भृतकस्तत्र । पथ्येन शिल्पिनस्तस्य विनष्टं मद्गृह्य इति । तत्कर्म वस्त्रनिर्माणादि स्वल्पेनापि कालविलम्बनादिना मा परिशिष्टं
स्वं चेत् भृतकस्य शिल्पिन एव नष्टम् । पुनर्वेतनग्रहणं विनैव वानादि क्रियां कुर्य्यादित्यर्थः । यदि स्वामी तस्यादिकं मुनर्वा
यति तद्दानाद्यभावे पि शिल्पिने दत्तं वेतनं स्वस्य भृतकपर्यागम्पारिपूर्णं वस्त्रादि कर्म दत्ते भृतकस्य यः स्वामी न स्यदीयमान मभ्यू
न स्मर्थमप्यप्र्रस्यतीत्यर्थः । एवं चात्र भृतको नष्टं न दाप्य इति पर्यवसितोऽर्थः । एवंविशिल्पन्यासविषये विवक्षाया त्रितकादिभ्यो
ऽप्याह स एव । यदि तत्कार्यमुद्दिश्य कश्चन्मपरिनियम्य वा । याचितोऽदत्त तार्यसमप्राप्ते न तु दाप्यत इति । तात्पर्यं तावदुच्य
ते । याच्यमानो न दद्याद्दातुम्फलं तस्य प्रयच्छेदित्यस्य धर्मो याचितके तिदेशप्राप्तो अनेन वचनेन कश्चित्प्रतिषिध्यते । प्रतिषेध
कवचनस्यायमर्थः । यद्दीर्घकालसाध्यं कार्य्यं तत्कार्य्यार्थं याचितं वदि यावदर्थं पर्य्यन्तं न्दीयताम् इत्येवं कार्यं परिनियम्य वा चित
तत्र कार्यमध्ये परिनियतकाल मध्ये वा प्रतियाच्यमाने याचितकं न ददाति स तस्मै न स दयं न दाप्यः । किन्तु कार्ये कृते परिनियतका
लात्यये वा याचितकमाचक्षद्याः इति । यदि तदाविवाचितं न ददाति तदा दैवादिना नाशे हरणे वा जाते तन्मूल्यमावहेद्यसि
न्नप्याह स एव । प्राप्तकाले कृते कार्य्ये न दद्याद्याचितो पि सन् । तस्मिन्नष्टे हृते वापि यथा हीतामूल्यमावहेदिति । कश्चित्कार्यम
ध्ये परिनियतकाल्यमध्ये वा याचितकं न दाप्य इत्याह स एव । अयकार्ये विपत्तिस्तु तस्यैव स्वामिनो भवेत् । अप्राप्ते वै स्वकाले तु दाप्य
स्तर्हि कृते पि न दद्यादिति । यदि याचितकप्रतिदानेन स्वामिनः कार्यनाशः सम्भाव्यते तदा दद्यादित्यर्थः । याचितकं च प्रतिदा
ने तु कर्तव्यमाह स एव । यो याचितकमादाय न दद्यात्प्रतियाचितः । स निगृह्य बलाद्दाप्यो दण्ड्यश्च न ददाति यदि इति । स बलाग्नि
गृह्य दाप्यो दाने त्वम्युपः कर्तव्यः । एवमपि येन ददाति स दण्ड्य इत्यर्थः । प्रकाशनार्थं नेजकहस्ते दत्तं यद्वस्त्रं तस्य तेन नाशे

हृतेतन्मूल्यं तस्माद्ग्राह्यमित्याह नारदः। मूल्याष्टभागो हीयेत सकृद्धौतस्य वाससः। द्विःपादस्त्रिस्तृतीयांशश्चतुर्धौतेऽर्द्ध-
मेव च। अर्द्धक्षयात्तु परतः पादांशापचयः क्रमादिति। सकृद्धौतस्य नाशेऽष्टमांशन्यूनं तन्मूल्यं ग्राह्यं द्विर्धौते चतुर्थांश-
न्यूनम्। एवं त्रिर्धौते तृतीयांशमित्येवमुत्तरत्रापि योज्यम्। वस्त्राणां प्रक्षालनं नेजकेन न पाषाणे कार्यं किन्तु सूक्ष्मे शाल्मले
फलके न च तेषां व्यत्यासः कार्यो न च तानि स्वगृहे रात्रौ स्थापनीयानीत्यमुमेवार्थमभिसन्धायाह मनुः। शाल्मले फलके श्लक्ष्णे नि-
र्ण्याद्वासांसि नेजकः। न च वासांसि वासोभिर्निर्हरेन्न च वासयेदिति। निर्ण्यात् प्रक्षालयेत्। अन्यवासांसि अन्यवासोभिर्न निर्ह-
रेत् न मेलयेदित्यर्थः। शिल्पिन्यासोपभोगादौ शिल्पिनो दण्डमाह। याज्ञवल्क्यः। वसानस्त्रीन्पणान्दण्ड्यो नेजकस्तु
परांशुकम्। विक्रयावक्रयाधानयाचितेषु पणान्दशेति। नेजको वस्त्रप्रक्षालकः। अवक्रयः कस्माच्चिद्भाटकं गृहीत्वा तस्यो-
पभोगार्थं कालकॢप्तिं विधाय समर्पणम्। आधानं बन्धकीकरणम्। याचितम्। स्वसुहृद्भ्यो याचितत्वेन दानं सुवर्णकारादिह-
स्ते कङ्कणादिनिर्माणार्थं यानि सुवर्णादीनि दत्तानि तेषाम्मध्ये सुवर्णं यत्परिमाणकं तत्परिमाणकमेव सुवर्णविकारः
शिल्पिनो ग्राह्यः। रजतादवस्तु किञ्चिन्न्यूनो ग्राह्यः। कम्बलादयस्तु ऊर्णाद्यपेक्षया किञ्चिदधिका ग्राह्याः। यद्येवं शि-
ल्पी न ददाति तदा राज्ञा दाप्यो दण्डनीयश्चेत्येतत्सर्वं मनसि निधायाह। स एव। अग्नौ सुवर्णमक्षीणं रजते द्विपलं शते। अ-
ष्टौ त्रपुणि सीसे च ताम्रे पञ्च दशायसि। शते दश पला वृद्धिरौर्णे कार्पाससूत्रके। मध्ये पञ्च पला वृद्धिः सूक्ष्मे तु त्रिपला मताः
। कार्मिके रोमबद्धे च त्रिंशद्भागः क्षयो मतः। न क्षयो न च वृद्धिस्तु कौशेये वल्कलेषु चेति। अग्नौ प्रताप्यमानमिति शेषः। श-
तपले प्रताप्यमाने पलद्वयम्। त्रपुणि सीसे च पलाष्टकम्। ताम्रे पलपञ्चकं लोहे पलदशकं क्षीयेतेत्यर्थः। कांस्यस्य तु
त्रपुताम्रप्रभवत्वात्तदनुसारेण क्षयः कल्पनीय इति पृथङ्नोक्तः। स्थूलेषु ऊर्णाकार्पाससूत्रेषु शतपलेषु पलदशकम्। अनति-
सूक्ष्मेषु तेषु पञ्चकम्। सूक्ष्मेषु पलत्रयं वर्धत इत्यर्थः। एतदक्षप्रक्षालितविषयमित्युक्तं मिताक्षरायाम्। कार्मिकम्।

चित्रेकर्मण्यानिर्मितं काम्मिकम् । यत्र निर्मिते पट्टे स्वस्तिकादि कास्त्रिभिः सूत्रैः क्रियत इत्यर्थः । यत्र घ्राणाद्वा रोमाणि वध्यन्ते स
रोमवन्धः । अनयोः स्वरूपापेक्षया त्रिंशत्संख्य इत्यर्थः । इति निःक्षेपाख्यव्यवहारपदम् ॥ ७ ॥ अथास्वामिविक्रयाख्यं व्यवहार
पदम् । तत्स्वरूपमाह नारदः । निक्षिप्तं वा परद्रव्यं नष्टं लब्ध्वापहृत्य वा । विक्रीयतेऽसमक्षं यत्स विज्ञेयोऽस्वामिविक्रय इति ॥ नि
क्षिप्तग्रहणं याचितादीनामुपलक्षणार्थम् । असमक्षं स्वामिन इति शेषः । अत एवाह व्यासः । याचितान्वाहितन्यासं हृत्वा वा
न्यस्य यत्कृतम् । विक्रीयते स्वाम्यभावे स ज्ञेयोऽस्वामिविक्रय इति । स्वाम्यभावे स्वाम्यसन्निधाने । अत्र विक्रयपदं दानबन्धक
योरप्युपलक्षणं वक्ष्यमाणकात्यायनवचने तयोरपि निवर्त्यत्वाभिधानात् । अस्वामिनं दर्शयति बृहस्पतिः । निक्षेपान्वाहि
तन्यासं हृत्वान्याचितबन्धकं । उपांशु येन विक्रीतमस्वामी सोऽभिधीयत इति । निक्षेपादिग्रहणं द्रव्योपलक्षणम् । उपांशु अ
प्रकाशम् । प्रनष्टाधिगतादेः परद्रव्यस्योपलक्षणम् । यत्त्वाह । मनुः । विक्रीणीते परस्य स्वं योऽस्वामी स्वाम्यसम्मत इति
। यो निःक्षेपादिकम्परद्रव्यम्प्रकटमेव विक्रीणीते तस्याप्यस्वामित्वारम्भस्वामिकस्य निवर्त्यत्वात्तदाह नारदः । अस्वामिना
कृतो यस्तु क्रयो विक्रय एव वा । अकृतः स तु विज्ञेयो व्यवहारेषु निश्चय इति । कात्यायनोऽपि । अस्वामिविक्रयं दानमाधिं वा विनि
वर्तयेदिति । अस्वामिविक्रयम् । अस्वामिना कृतं विक्रयम् । अस्वामिकृतत्वं दानाध्योरपि तत्साहचर्यात् अत एव यमः । अ
स्वामिनाकृतो यस्तु दायो विक्रय एव वा । अकृतः स तु विज्ञेयो व्यवहारेषु निश्चय इति दायो दानं । स्वामिनाऽस्वामी विक्रीतं स्वकी
यं वस्तु यत्समीपे दृष्टं तत्स्वामी ग्राह्यमित्याह नारदः । द्रव्यमस्वामिविक्रीतं प्राप्य स्वामी तदाप्नुयात् । प्रकाशक्रयतः शुद्धिः
क्रेतुः स्तेयं रहःक्रयादिति । याज्ञवल्क्योऽपि । स्वं लभेतान्यविक्रीतं क्रेतुर्दोषोऽप्रकाशिते । हीनाद्रहो हीनमूल्ये वेलाहीने च तस्
कर इति । स्वामी स्वसम्बन्धि द्रव्यमन्यविक्रीतं अस्वामिविक्रीतं यदि पश्यति तदा लभेत गृह्णीयात् । अस्वामिविक्रीतस्य हेतु
माभावात् । क्रेतुः पुनरप्रकाशिते गोपिते क्रये दोषो भवति हीनात् द्रव्यागमोपायहीनात् । रहसि एकान्ते । हीनमूल्ये ।

अल्पतरेणाद्रव्येणाधिकमूल्यक्रये । वेलाहीनेराच्यादौ कृते क्रये विक्रेता तस्करो भवति । तस्करवद्दण्डादिभाग्भवतीत्यर्थः ।
बृहस्पतिरपि । येन क्रीतन्तु मूल्येन प्राग्राज्ञे विनिवेदितम् । न तत्र विद्यते दोषस्तेनः स्यादुपधिक्रयादिति ॥ यत्र हीनमूल्येन
क्रीयमाणं क्रयात्प्रागेव राज्ञे निवेदितं तत्र वचनदोष इत्यर्थः । उपधिक्रयशब्दस्यार्थं दर्शयति स एव । अन्तर्गृहे वहिर्ग्रामान्निशा
यामसतो जनात् । हीनमूल्यश्च यत्क्रीतं ज्ञेयोसावुपधिक्रय इति । असतो जनात् चाण्डालादेरित्यर्थः । असच्छब्दं दासा
दीनामुपलक्षणार्थं । अत एव नारदः । अस्वाम्यनुमताद्दासादसतश्च जनाद्गृहः । हीनमूल्यमवेलायां क्रीणंस्तद्दोषभा
ग्भवेदिति । अस्वाम्यनुमतात्स्वाम्यनुमतिहीनात् । दासग्रहणं समानन्यायत्वात्स्वतंत्राणां बालादीनामुपलक्षणार्थम् । वि
ष्णुरपि । अज्ञानतः प्रकाशं यत्परद्रव्यं क्रीणीयात् । न तस्य दोषः स्वामी द्रव्यमवाप्नुयात् । यद्यप्रकाशं हीनमूल्यं वा क्रीणी
यात् । तदा क्रेता विक्रेता च चोरवच्छास्य इति । क्रेतुः प्रकाश्यविक्रयाद्यभावादस्वामित्वान्यप्रकाशयादौ तु तथाविधविक्रयस्य
विक्रेतृस्वामिवेदाभावान्नज्ञानमस्तीति दुष्टत्वात् क्रेतापि दण्ड्य इत्यर्थः । स्वामिना तु ज्ञानं ज्ञापयित्वैव तद्द्रव्यं ग्राह्यं अन्यथा चोरप्र
च्छादकत्वेन स दण्ड्य इत्याह याज्ञवल्क्यः । हृतं प्रनष्टं यो द्रव्यं परहस्तादवाप्नुयात् । अनिवेद्य नृपे दण्ड्यः स तु षण्णवतिं प
णानिति । यदा पुनः परहस्तादवाप्नुमसमर्थः स्वामी तदा न्वाह स एव । नष्टापहृतमासाद्य हर्तारं ग्राहयेन्नयम् । देशकाला
तिपत्तौ च गृहीत्वा स्वयमर्पयेदिति । विनष्टमपहृतं वा स्वकीयं द्रव्यमधिगन्तुरपहर्तुर्हस्ते वा दृष्ट्वा अधिगन्तारं अपहर्तारं वा राज
पुरुषादिभिर्ग्राहयेत् राज्ञो राजपुरुषाणां दूरदेशावस्थितौ तु विज्ञापनकालात्प्राक्पलायनादिशंकायां स्वयमेव गृहीत्वा राज्ञे स
मर्पयेदित्यर्थः । हर्तृशब्देनात्र क्रेता विवक्षितः न त्वात्मविशुद्ध्यर्थे राजदण्डाप्राप्त्यर्थश्चेति मिताक्षरायां विज्ञानेश्वरः । नष्ट
धनस्वामिना तद्धने परस्वत्वनिवृत्तिपूर्वकस्वस्वत्वसिद्ध्यर्थं प्रथमं साक्ष्यादिभिः प्रतिग्रहादिकं साधनीयमित्याह कात्यायनः । अ
भियोक्ता धनं कुर्यात्प्रथमं ज्ञातिभिः स्वकमिति । ज्ञातिभिः साक्षिभूतैरिति विशेषः । साक्ष्यादिभिः स्वस्वहेतुभूतप्रतिग्रहाद्यागमसाध

मेदस्त्वागमामाह व्यास एव । यदि स्वं नैव कुरुते ज्ञातिभिर्नोष्टिको धनम् । प्रसङ्गविनिवृत्त्यर्थं चौरवद्दण्डमर्हति । नाष्टिको मष्टधनस्वामी प्रसङ्गः खलु सन्देहः । व्यासोपि । वादी चेन्मार्गितं द्रव्यं साक्षिभिर्न विभावयेत् । दाप्यः स्याद्विगुणं दण्डं केतानद्द्रव्यमर्हतीति । साक्षिग्रहणं प्रमाणान्तरोपलक्षणार्थमिति केचित् । यत्तूक्तं साक्षिग्रहणं अस्वामिविक्रयविवादे स्वत्वसाधने प्रमाणान्तरनिवृत्त्यर्थमिति मदनरत्ने तदयुक्तम् । वस्तुतः स्वत्वहेतुभूतप्रतिग्रहादिस्वत्वे तत्साधकसाक्षिणामभावे दिव्यद्यावकाशस्याविद्यमानत्वात् । अलेख्यसाक्षिके दैवी व्यवहारे विनिर्दिशेदिति कात्यायनवचनविरोधापत्तेश्च । न च तत्र दिव्यनिषेधकस्मृत्यभावस्तत्र दिव्यविधायकं अन्यतु प्रकाशं चक्रयं कुर्यात्साधुभिर्ज्ञातिभिः स्वकैः । न तत्रान्यक्रियाप्रोक्ता दैविकी न च मानुषीति दिव्यनिषेधकस्मृतेः सत्वादिति वाच्यम् । एतद्वचनस्य क्रेत्रा क्रयसाधनं साक्षिसत्वे साक्षिभिरेव कर्तव्यं नान्यमानुषेण न दिव्येन वेत्येतत्परत्वात् । नन्वेतद्वचनस्यैतादृशविषयपरत्वे मानाभावः । न चालेख्यसाक्षिके दैवीमिति वचनविरोधो मानम् । तस्य सामान्यशास्त्रत्वेनैतद्वचनानुरोधेन तस्यैतदतिरिक्तविषयतायान्याय्यत्वादिति चेन्न । साक्ष्याद्यभावे दिव्यस्य च निषेधे अनिर्णयप्रसङ्गस्यैव मानत्वात् । अन्यथा स्थावरेषु विवादेषु दिव्यानि परिवर्जयेदिति वचनस्य साक्ष्यादिसत्वे दिव्यनिषेधपरत्वम्त्वदभिमतन्न सिद्ध्येत् । यत्तु तेनैव वक्ष्यमाणप्रमाणहीने पादे इति वचने प्रमाणहीनत्वापादानमपि अत्र दिव्याभावज्ञापकम् । दिव्याङ्गीकरणे प्रमाणहीनतया असम्भवादित्युक्तं तत्र तत्प्रमाणहीने मानुषप्रमाणहीने अन्यतरेण दिव्याङ्गीकरणहीने चेति व्याख्येयमन्यथा अनिर्णयः स्यात् । तस्मादन्यत्रापि साक्ष्याद्यभावे दिव्यम्भवत्येवेति । अत एव मिताक्षरायामिप्युक्तं यदा पुनः साक्ष्यादिभिर्दिव्येन वा क्रयं न भुङ्क्ते तिशोधयतीत्यादि । केचित्तु स्थावरविवादे स्थारेषु विवादेष्विति वचनाद्दिव्याभाव एव । एवं अत्रतेपि प्रमाणहीने पादे इति वचनाद्दिव्याभाव एव मनिर्णयप्रसंगानुरोधेन वचनान्यथाकरणस्यानुचितत्वाद्दिव्याङ्कस्त्वचिन्त्यम् । अदृष्टार्थत्वप्रसंगात् । याज्ञवल्क्योपि । आगमेनोपभोगेन नष्टम्भाव्यमतोन्यथा । पञ्चबन्धो दम

स्वस्य राज्ञे तेनाविभाविते इति । पञ्चबन्धः नष्टद्रव्यस्य पञ्चमांशसमानो दण्डः । अत्र दण्डविप्रतिपत्तिरपराधाल्पत्वमहत्त्वा
नुसारेण व्यवस्थापनीया । स्वत्वहेतवः पूर्वमेव निरूपिताः । कृतस्वकीयस्य धनस्य स्वकीयत्वानपगतिरपि दानविक्रयाभावे
साधनीयेत्याह कात्यायनः । नाष्टिकस्तु प्रकुर्वीत तद्धनं ज्ञातिभिः स्वकम् । अदत्तमथवा विक्रीतं कृत्वा स्वं लभते धनमिति ॥ अर्थे
नष्टं तं सम्प्रदानभूताय विद्युक्तप्रकारेण । व्यक्तपारितोषिकादिरूपेण । विक्रीतञ्च न भवतीति प्रमाणैः प्रसाध्य स्वकीयत्वञ्च नष्ट
स्वामी विक्रेत्रादेः सकाशाल्लभत इत्यर्थः । राजपुरुषानीतेन क्रेत्रा यत्कर्त्तव्यं तदाह दर्शयति बृहस्पतिः । पूर्वं स्वामी तु यद्द्रव्यं यदाग
म्य विचारयेत् । तत्र मूलं दर्शनीयं क्रेतुः शुद्धिस्ततो भवेदिति ॥ मूलमत्र यस्मात्क्रीतमसावुच्यते । शुद्धिर्योज्यत्वनिवृत्तिः अतएव
व्यासः । मूल्ये समाहृते क्रेता नाभियोज्यः कथञ्चन । मूल्येन सह वादस्तु नाष्टिकस्य विधीयते इति । समाहृते अस्मान्मया क्री
तमिति निर्दिष्टे । याज्ञवल्क्योऽपि । विक्रेतुर्दर्शनाच्छुद्धिः स्वामी द्रव्यं नृपो दमम् । क्रेता मूल्यमवाप्नोति तस्माद्यस्तस्य विक्रयी
॥ अत्र स्वामी द्रव्यमित्यभिधानं यदि विक्रेता नष्टधनस्वामिना सह विवादन्न कुर्य्याद्यदि वा कृते पराजयी स्यात्तदा नाष्टिकस्य स्व
त्वमवधारितमिति नाष्टिकादिभ्यो विक्रीतद्रव्यादीनि दातव्यानि नान्यथेति सूचनार्थं । अतएवाह बृहस्पतिः । विक्रेता दर्शि
तो यत्र हीयते व्यवहारतः । क्रेत्रे राज्ञे मूल्यं दण्डं प्रदद्यात्स्वामिने धनमिति ॥ यदा तु मूलभूतो विक्रेता देशान्तरं गतस्तदा कात्या
यन आह । मूलानयनकालस्तु देयो योजनसंख्यया इति । तत्र देयो ध्वसंख्ययेति मदनरत्ने पाठः । यदा तु बहुकालेनापि मूलं दर्श
यितुमक्षमस्तदा साक्षिभिः क्रयसाधनं कुर्य्यादित्याह नारदमनुः । असमाहार्य्यमूलस्तु क्रयमेव विशोधयेत् । विशोधिते क्रये
राज्ञा वक्तव्यः सन किञ्चनेति ॥ क्रये विशोधिते साक्षिभावेन प्रकाशिते सति राज्ञा न किञ्चन वक्तव्यो न दण्ड्य इत्यर्थः । यत्तु अभियो
क्ता धनं कुर्यात्प्रथमं ज्ञातिभिः स्वकम् । पश्चादात्मविशुद्ध्यर्थं क्रयं क्रेता स्वबन्धुभिरिति ॥ अभियोक्ता स्वत्वे साधिते सति पश्चात्क्रेता क्र
यसाधनं कर्त्तव्यमित्युक्तं तन्नैव मदसमाहार्य्यमूलविषयं यस्मादेव वचनान्मूलदर्शनाभावे मन्तव्यं । नष्टधनं स्वामी क्रीतं तु क्रे

वाक्रये साधिते ऽपि गृह्णीयादिति प्रदर्शयितुमाह मनुः । अथ मूलमनाहार्यम्प्रकाशक्रयशोधितम् । अदण्ड्यो मुच्यते राज्ञा
ष्टिको लभते धनमिति ॥ अनाहार्यमनानीयः । प्रकाशक्रयशोधितं नाष्टिको लभते । क्रेता ऽदण्ड्यो भूत्वा राज्ञो ऽपराधान्मुच्य
त इत्यर्थः । क्वचित्क्रेतुः सकाशाद्धनग्रहणं धर्ममूल्यं दत्त्वैवेत्याह कात्यायनः । वणिग्वीथीपरिगतं विज्ञातं राजपूरुषैः । अवि
ज्ञाताश्रयात्क्रीतं विक्रेता यत्र वा मृतः । स्वामी दत्त्वार्द्धमूल्यं तु प्रगृह्णीयात् स्वकन्धनमिति ॥ वणिग्वीथीपरिगतं वणिग्वीथ्याम्प्राप्त
म् । अनेन रहःक्रियो नास्तीति दर्शितम् । विज्ञातं राजपूरुषैरित्यनेनाप्रकाशक्रयो नास्तीति दर्शितम् । अविज्ञाताश्रयात् ।
अविज्ञातस्थानकात् । यद्रहःक्रयादिरहितं सद्विज्ञाताश्रयात् क्रीतं मृतं विक्रेतृकं वा तदर्द्धमूल्यं दत्त्वा ग्राह्यमित्यर्थः । उ
भयोरर्द्धहानौ कारणमाह स एव । अर्द्धं द्वयोरपहृतं तत्र स्याद्व्यवहारतः । अविज्ञातक्रयो दोषस्तथा चापरिपालनम् ॥
एतद्द्वयं समाख्यातं द्रव्यहानिकरं बुधैरिति । हृतं नाशितम् । व्यवहारतः स्वापराधात् अविज्ञातक्रयः अविज्ञातस्थानकात्क्र
यः अपरिपालनमरक्षणम् । उपेक्षेति यावत् मरीचिरपि ॥ अविज्ञातनिवेशात्तु यच्च मूल्येन लभ्यते । हानिस्तत्र समा कल्प्या
क्रेतृनाष्टिकयोर्द्वयोरिति । यत्र क्रेता मूलोपस्थापनं करिष्यामीत्युक्त्वा पश्चात् क्रयं साधयिष्यामीति वदति तत्र मूलोपस्थापनमे
वादरणीयं न क्रयसाधनमित्याह । कात्यायनः । यदा मूलमुपन्यस्य पुनर्वादी क्रयं वदेत् । अहरन्मूलमेवासौ न क्रयेण प्र
योजनमिति ॥ यदा मूलदर्शनं क्रयप्रकाशनं वा न करोति तदा दण्ड्यतामाह स एव । अनुपस्थापयन्मूलं क्रयं वाथ विशोधयन्
। यथाभियोगं धनिने धनं दाप्यो दमञ्च सः इति । यत्तु प्रकाशितेन क्रयेण क्रेतुः स्वत्वप्रतिपादकं मरीचिवचनं वणिग्वीथीपरि
गतं विज्ञातं राजपूरुषैः । दिवा गृहीतं यत्क्रेता स शुद्धो लभते धनमिति ॥ यच्च मनुवचनम् विक्रयाद्यो धनं किञ्चिद्गृह्णीयात्कुल
सन्निधौ । क्रयेण स विशुद्धो हि न्यायतो लभते धनमिति । तद्वचनद्वयमपि नाष्टिकस्वत्वसाधनाभावविषयं । अन्यथा अथ
मूलमनाहार्यमिति पूर्वोदाहृतमनुवचनविरोधः स्यात् । यदा तु क्रेता साक्ष्यादिभिः क्रयं न साधयति नाष्टिको वा स्वकीयत्वं तदा

निर्णयमाह बृहस्पतिः । प्रमाणहीने वादे तु पुरुषापेक्षया नृपः । समन्यूनाधिकत्वे च स्वयं कुर्याद्विनिर्णयमिति ॥ अस्वामिविक्रे
तुरिवास्वाम्यदत्तं स्वाम्यनुमतिमन्तरेणोपभुञ्जानस्य दण्डमाह नारदः । अदृष्टमेव भोक्तव्यं स्त्रीपश्वर्वसुधापि वा । अन
र्पितन्तु यो भुङ्क्ते भुक्तभोगं प्रदापयेत् ॥ अनुद्दिष्टं तु यद्द्रव्यं दासः क्षेत्रगृहादिकम् । स्ववत्वेनैव भुञ्जानश्चौरवद्दण्डमर्हति । अ
नड्वाहं तथा धेनुं नावं वा सन्तथैव च । अनिर्दिष्टं तु भुञ्जानो दद्यात्पणचतुष्टयम् ॥ दासीनौकां तथा धुर्यौ वत्सकांश्चोपभुञ्जते ।
उपभोक्ता तु यद्द्रव्यम्पण्येनैव विशोधयेत् ॥ दिवसे द्विपणान्दासीन्धेनुमष्टपणांस्तथा । त्रयोदशं त्वनड्वाहमश्वं भूमिश्च षोड
शः नौकामश्वाश्च धेनुश्च चाङ्गुलं कार्मिकस्य च । बलात्कारेण यो भुङ्क्ते दाप्यश्चाष्टगुणान्दिने । उलूखले पणार्द्धं तु मुसलस्य प
णद्वयं । शूर्पस्य च पणार्द्धं तु जैमिनिर्मुनिरब्रवीदिति । पण्येन पणसमूहेन त्रैकेधेनुश्छागामभिधत्ते । अपसे दोग्धीम
हिष्यादिकम् । कार्मिकस्य कर्मोपजीविनः । यद्विज्ञातस्वामिकं नष्टमपहृतं वा राजपुरुषैः कथंचित्प्राप्य राज्ञे समर्पितं स्व
स्वामी यदि वर्षमध्ये आगम्य स्वत्वं साधयति तदाप्नोतीत्याह याज्ञवल्क्यः । शौल्किकैः स्थानपालैर्वा नष्टापहृतमाहृतम् । अर्वाक्
संवत्सरात्स्वामी हरेत परतो नृपः इति । यत्तु मनुवचनम्प्रनष्टस्वामिकं द्रव्यं राजा त्र्यब्दं निधापयेत् । अर्वाक् त्र्यब्दाद्धरेत्स्वामी पर
तो नृपतिर्हरेदिति । तद्वृत्तश्रुतवृत्तसम्पन्नब्राह्मणविषयमिति । मदनरत्ने ब्राह्मणमात्रविषयमिति केचित् । इत्यस्वामि
विक्रयाख्यव्यवहारपदम् ॥ ● ॥ अथ सम्भूयसमुत्थानाख्यव्यवहारपदम् । तस्य स्वरूपमाह नारदः । वणिक्प्रभृतयो यत्र
कर्म सम्भूय कुर्वते । तत्सम्भूयसमुत्थानं व्यवहारपदं स्मृतमिति ॥ वणिक्प्रभृतय इत्यनेन चर्त्विङ्नटनर्तककर्षकादीनां ग्रहणं ।
यद्यपि लयभूतस्य स्वर्गस्य चर्त्विग्गामित्वाभावादात्मनेपदस्यानुपपन्नत्वेन प्रभृतिग्रहणेन चर्त्विक्ग्रहणमनुचितम् । तथापि आ
त्मनेपदाविवक्षयेदमुक्तं न च ऋत्विङ्मात्रे आत्मनेपदाविवक्षणे अन्यांशे विवक्षणे वैरूप्यप्रसंग इति वाच्यम् । सम्भूयकर्तृ
त्वमात्रस्य लक्षणत्वेनान्यत्र वास्तवतत्त्वेऽपि लक्षणावैयर्थ्यप्रसङ्गेनाप्रवेशात् । न चाचिन्तामणिकृता कर्त्रभिप्राय इत्यस्य कर्त्रभि

प्राय विषये कर्त्रभिप्राये च क्रियाफले इति व्याख्यानात् कर्त्तृगामिनि क्रियाफले आत्मनेपदं क्रियाफलस्य कर्त्तृगामित्वाभावे परस्मैपदम्। अत एव कर्त्तृगामिन्यपि फले परस्मैपदं भवत्येवेति। अनेन आत्मनेपदविवक्षायामपि काश्चिदिति वाच्यम्। कर्त्रभिप्राये कर्त्तृगामिनीत्यस्यैव व्याख्यानस्य महाभाष्यादौ अनेकग्रन्थसम्मतत्वेनान्यादृश व्याख्यानस्य महाभाष्यादिविरुद्धत्वात्। समवायेन वाणिज्यादि कर्म्मणि अधिकारिणो दर्शयति बृहस्पतिः। कुलीनदक्षानलसैः प्राज्ञैर्नाणकवेदिभिः। आयव्ययज्ञैः शुचिभिः शूरैः कुर्यात्सह क्रियामिति॥ क्रियां क्रतु कृषि शिल्प सेवा वाणिज्यरूपाम्। नाणकविज्ञानं वाणिज्यक्रियायामुपयुज्यते। आयव्ययज्ञानमप्यत्रैव कृषिक्रियायाम्। शिल्पिक्रियायां सङ्गीतक्रियायां च प्राज्ञत्वम्। क्रतौ कुलीनत्वप्राज्ञत्वशुचित्वानि। सेवायां तु शूरत्वमात्रमुपयुज्यते। दक्षत्वानलसत्वे सर्वत्रोपयुज्येते। अनलसवद् दक्षादीन्निषेधयति स एव। अशक्तालसरोगार्त्तमन्दभाग्यनिराश्रयाः। वाणिज्याद्याः सहैतैस्तु न कर्त्तव्या बुधैः क्रियेति॥ निराश्रयाः मूलधनरहिताः। ये तु सम्भूय वाणिज्यादि क्रियां कुर्वन्ति ते द्रव्यानुरोधेन लाभादिभाजो भवन्तीत्याह नारदः। समोऽतिरिक्तो हीनो वा तत्रांशो यस्य यादृशः। क्षयव्ययौ तथा वृद्धिस्तस्य तत्र तथाविधा इति। बृहस्पतिरपि। प्रयोगं कुर्वते ये तु हेमधान्यरसादिना। समन्यूनाधिकैरंशैर्लाभस्तेषां यथाविधः॥ समो न्यूनोऽधिको वांशो येन क्षिप्तस्तथैव सः। व्ययं दद्यात् कर्म कुर्याल्लाभं गृह्णीत चैव हीति। यत्र पुनरस्य द्वौ भागौ अस्य त्रय इति सम्विकृतास्तत्र तदनुरोधेन व्ययलाभौ प्रकल्प्याविन्याह याज्ञवल्क्यः। समवायेन वणिजां लाभार्थं कर्म कुर्वताम्। लाभालाभौ यथाद्रव्यं यथा वा संविदा कृताविति। सम्भूयकारिणां कर्त्तव्यमाह व्यासः। समक्षमसमक्षं वा वञ्चयन्तः परस्परम्। नानापण्यानुसारास्ते प्रकुर्युः क्रयविक्रयौ। अगोपयन्तो भाण्डानि दद्युः शुल्कं च तेष्वनिः। अन्यथा द्विगुणान्दाप्याः शुल्कस्थानाद्बहिः स्थिता इति। नारदोऽपि। भाण्डपिण्डव्ययोद्धारसारासारत्ववेक्षणम्। कुर्युस्तेऽव्यभिचारेण समये स्वे व्यवस्थिता इति। अथ वा सर्वानुज्ञया सर्वेषां कार्य्यमेक एव कुर्य्यात्। अत एव बृहस्पतिः। बहूनां सम्मतो यस्तु दद्यादेको धनं नरः। करणं कारयेद्वापि सर्वैरेव कृतं भवेदिति। करणं लेख्यादिकम्। सम्भूयकारिणां

मिथोविवादेनिर्णयप्रकारमाहसएव। परीक्षकाःसाक्षिणस्तएवोक्ताःपरस्परम्। सन्दिग्धेऽर्थेवञ्चनायानचेद्विद्वेषसंयु
ताइति। यदातुविद्वेषसंयुक्तास्तदाप्याहसएव। यःकश्चिद्वंचकस्तेषांविज्ञातःक्रयविक्रये। शपथैःसोपिशोध्यःस्यात्सर्वेवा
देष्वयंविधिरिति॥ सर्ववादेपिवचनरहितवादेपिवञ्चकत्वेसिद्धेसतिकिङ्कार्यमित्यपेक्षितेआह। याज्ञवल्क्यः। जिह्मंत्य
जेयुर्निर्लाभमिति। जिह्मंवञ्चकन्निर्लाभंकृत्वात्यजेयुर्वहिःकुर्युरितरेसम्भूयकारिणइत्यर्थः। सम्भूयकारिण्यसमर्थम्प्रत्याह
सएव। अशक्तोऽन्येनकारयेदिति। स्वांशानुरूपंकर्मेतिशेषः।देवराजहतद्रव्यहानिविषयेसर्वान्प्रत्याहवृहस्पतिः। द्रव्यहा
नियदातत्रदैवराजकृताद्भवेत्। सर्वेषामेवसाप्रोक्ताकल्पनीयायथांशतइति॥ सम्भूयकारिभिःसर्वैरितिशेषः। क्षयहानि
रितिपाठेक्षयायैवहानिःक्षयहानिरुपचयार्थव्यतिरिक्ताहानिरित्यर्थः। प्रातिस्विकदोषेणद्रव्यनाशेसएवाह। अनिर्दिष्टो
वार्यमाणःप्रमादाद्यस्तुनाशयेत्। तेनैवतद्भवेद्देयंसर्वेषांसमवायिनामिति। अनिर्दिष्टःसमवाय्यननुज्ञातःयाज्ञवल्क्योपि।
प्रतिषिद्धमनादिष्टम्प्रमादाद्यच्चनाशितम्। सतद्दद्यादिति। पालनेत्वाहसएव। विप्लवाच्चरक्षिताद्दशमांशभागिति। वृ
हस्पतिरिति। दैवराजभयाद्यस्तुस्वशक्त्यापरिपालयेत्। तस्यांशन्दशमंदत्वागृह्णीयुस्तेंशतोपरमिति। तस्यतस्मैदशम
मंशन्तेसमवायिनःपालयेत्। समवायिद्रव्यमितिशेषः। अतएवकात्यायनः। चौरतःसलिलादग्नेर्द्रव्यंयस्तुसमाहरेत्। त
स्यांशोदशमोदेयःसर्वद्रव्येष्वयंविधिरिति। समाहरेत्स्वशक्त्याप्रत्याहरेदित्यर्थः। नारदोपि। दैवतस्कररराजाग्निव्यसने
समुपस्थिते। यस्तत्स्वशक्त्यारक्षेत्तस्यांशोदशमःस्मृतइति। यस्तुसमवायिद्रव्यंसमवायिभिःसहप्रतियाचनादिनानसाधय
तितस्यलाभहानिरित्याहवृहस्पतिः। समवेतैस्तुयद्दत्तंप्रार्थनीयन्तथैवतत्। नयाचतेचयःकश्चिल्लाभात्सपरिहीयतइति॥
याचनग्रहणंयेनयत्कर्मस्वांशानुरूपंकर्तव्यन्तस्याप्युपलक्षणार्थंतेनतत्कर्माकरणेपिलाभहानिरित्यस्मादेववचनात्प्रतिपन्न
व्यमितिस्मृतिचन्द्रिकायाम्। सम्भूयकारिणांऋत्विजाङ्कर्तव्यमाहमनुः। ऋत्विजःसमवेतास्तुयथासत्रेनिमन्त्रिताः। कु

युर्यथार्हन्तत्कर्म गृह्णीयुर्दक्षिणान्तथेति॥ अत्र सर्वशब्दो यजमानमात्रविवक्षया प्रयुक्तो न पुनर्वेऋययजमानकसत्राख्ययज्ञविशेषाभि
वक्षया। तत्र यजमानानामेवाध्वर्य्वादिकर्मकारित्वे दक्षिणार्हाणामृत्विजामभावात्। तथा कर्मानुसारेण दक्षिणां गृह्णीयुरित्य
र्थः। तथाच स एव। संभूय स्वानि कर्माणि कुर्वद्भिरिह मानवैः। अनेन कर्मयोगेन कर्तव्यांशप्रकल्पनेति॥ स्वानि कर्माणि स्वयमन
न्यतिरिक्तानीति शेषः। इयं चांशकल्पना द्वादशशतं गावो दक्षिणेत्येवं क्रतुसम्बन्धित्वेन विधीयमानायां दक्षिणायामेवनत्व
त्विग्विशेषोल्लेखेन विहितायाः तद्विधायकश्रुतिविरोधापत्तेः अत एवाह तुमेनुबृहस्पतिः। रथं हरेद्वाध्वर्युर्ब्रह्माधानेवाजिनं
। होता निविद्वरं चाश्वमुद्गाता चाप्यनः क्रयेइति। निविद्वरं निविच्छंसनस्य वरं उद्गाता च यद्येनोद्गानं गवां मध्यस्थः सुब्रह्म
ण्योगृह्णातु इति मदनरत्ने अनः शकटम्। क्रये सोमक्रये। दक्षिणांशकल्पनायाः प्रकारमाह तुमेनुबृहस्पती। सर्वेषामर्द्धि
नो मुख्यास्तदर्द्धेनार्द्धिनोऽपरे। तृतीयिनस्तृतीयांशाश्चतुर्थांशाश्च पादिनइति। सर्वेषां षोडशानामृत्विजां मध्ये मुख्या गत्व
स्यायाः होता ब्रह्माऽध्वर्युरुद्गातारोऽर्द्धिनः उक्तदक्षिणायाः किञ्चिन्न्यूनमर्द्धं गृह्णीयुः। समपार्द्धं यह्नत्से वक्ष्यमाणविभागकल्पना
विरोधः स्यात्। अपरे द्वितीया मैत्रावरुणप्रतिप्रस्थातृब्राह्मणाच्छंसिप्रस्तोतारस्तदर्द्धं नमुख्यभागार्द्धं नार्द्धिनोर्द्धयाहिण्यः तृ
तीयिनोऽच्छावाकाग्नीध्रनेष्टृप्रतिहर्तारो मुख्यभागस्य तृतीयांशभाजः। पादिनोन्त्याः ग्रावस्तुन्नेतृपोतृसुब्रह्मण्यास्तु मुख्यभाग
स्य चतुर्थांशग्राहिणइत्यर्थः॥ मुख्यानां चतुर्णां मिथो विभागः समः एवं द्वितीयादीनामपि स एव विभागः तथाच गो शतं दक्षि
णेति पक्षमाश्रित्य कात्यायन सूत्रम्। द्वादशद्वादशेभ्यः षट्षट्द्वितीयेभ्यश्चतस्रश्चतस्रस्तृतीयेभ्यस्तिस्रस्तिस्र इतरेभ्यइ
ति। संगृहीतमेतद्बौधायनकारिकायामपि। पञ्चविंशतिधा चैवाद्वर्गीयाद्दक्षिणाक्रमात्। द्वादशैवाय षट्कं च तस्र एव चेति
। द्वादशाधिकगोशतरूपायाद्दक्षिणायाः प्रथमञ्चत्वारो भागाः कर्तव्याः। तत्रैको भागो होतृवर्गस्यापरो ब्रह्मवर्गस्यापरोऽध्वर्युवर्ग
स्यापर उद्गातृवर्गस्य। पुनरेकैकस्य भागस्य पञ्चविंशतिभागाः कर्तव्याः। तेष्वाद्यानां होत्रादीनां द्वादशभागाः द्वितीयिनां च

स्तृतीयानाश्चार्धस्तुर्यांनांत्रयइत्यर्थः। पञ्चवन्धादौतुविषमविभागानभिधानात्। समंस्यादश्रुतत्वादितिन्यायेनसमत्वेनै
वविभागइतिमन्तव्यम्। स्वकीयकर्मकत्वायांशकर्तृकत्वानुसारेणभागोदेयइत्याहमनुः। ऋत्विग्यदिवृतोयज्ञेस्वकर्मपरि
त्यापयेत्। तस्यकर्मानुरूपेणदेयोंशःसहकर्तृभिरिति। सहकर्तृभिःसम्भूयकारिभिरित्यर्थः। यद्वाकर्तृभिःसहदेयःदक्षि
णाकालेदेयोयजमानेनेत्यर्थः। अथवाकर्मपरित्यक्तंसकर्तृभिरित्यर्थः। यदानुऋत्विक्कर्मैकदेशंकृत्वादक्षिणादानानन्तरंव्याक
तितदाऽवशिष्टमन्तकृत्वावर्त्विजांमध्येसन्निहितेनेनान्येनकारयेदित्याहसएव। दक्षिणासुचदत्तासुस्वकर्मपरिहापयेत्। कृत्स्न
मेवलभेतांशमन्येनैवचकारयेदिति। कर्ममध्येऋत्विग्व्याधितःतत्कर्तव्यमाहनारदः। ऋत्विजोव्यसनेप्येवमन्येनकर्मनिस्तरेत्। ल
भेतदक्षिणादानंसतस्मात्संप्रकल्पितमिति। अन्येनस्वसगोत्रमध्यवर्तिनांमध्येप्रत्यासन्नेनयेनकेनचिदन्येनकार्यमासत्वा
ध्वर्य्वादिसमाख्यावाधापत्तेरितिध्येयम्। यत्तुशङ्खलिखितयोर्वचनम्। अथचेदनुप्राप्तेसवनेऋत्विक्म्रियतेतस्यसगोत्रो
पशिष्योवातत्कार्यमनुपूरयेत्। अथचेद्वान्यवस्तुतोन्यमृत्विजंवृणुयादिति। यच्चवृहस्पतिवचनम्। एवंक्रियाप्रवृत्तानां
यदाकश्चिद्विपद्यते। तदंशंधुनाक्रियाकार्यासर्वैर्वासहकारिभिरिति॥ तदेकान्तरगतयरहितर्त्विक्कर्तृकदर्शपूर्णमासादिया
गविषयमित्यभिहितंस्मृतिचन्द्रिकायाम्। औचित्येवनुऋत्विग्विजयजमानेनऋत्विगन्तरकरणेकस्यदक्षिणेतिवीक्षायामाह
शङ्खः। अथऋत्विग्जिवृतेपश्चादन्यंवृणुयात्पूर्वाहूतस्यैवदक्षिणापश्चादाहूतःकिञ्चिल्लभतइति। यदात्वन्तरयामृत्विग्या
ज्यन्त्यजतियाज्योवाऋत्विजंमादातयोर्दण्डमाहमनुः। ऋत्विजंयस्त्यजेद्याज्योयाज्यमृत्विक्त्यजेद्यदिति। शक्तकर्मैस्य
दुष्टस्तयोर्दण्डःशतंशतमिति। नारदोपि। ऋत्विक्कार्विविधोदृष्टःपूर्वैर्जुष्टःस्वयंकृतः। यदृच्छयाचयःकुर्यादार्त्विज्य
म्प्रीतिपूर्वकम्। ऋत्विग्याज्यमदुष्टंयस्त्यजेदनपकारिणम्। अदुष्टश्चर्त्विजंयाज्योविनेयौतावुभावपीति। येकविशाधनेस्व
समानास्तैःसहकर्षिकार्यैन्याहवृहस्पतिः। वाह्यकर्षकवीजाद्यैःक्षेत्रोपकरणेनच। येसमानास्तुतैःसार्द्धंकृषिःकार्याविजानन

नेति। वाह्याः लाङ्गलादिवाहकाः बलिवर्दाः। कृष्याः कर्षकाः कृष्यर्थे स्वीकृताः पुरुषाः आदिशब्देन कृषिसाधनानामन्येषांग्रह-
णम्। सम्भूयकारिणां कर्षकाणां कर्त्तव्यमाह बृहस्पतिः। पर्वते नगराभ्यासे तथा राजपथस्य च। ऊषरं मूषकव्याप्तं क्षेत्रं यत्नेन
वर्जयेदिति। पर्वते पर्वतसमीपे कल्पतरुकृतानुविवीत इति पठित्वा विवीतशब्देन यवसाद्यर्थं रक्षितः प्रदेश इति व्याख्यातम्। न
गराभ्यासे नगरसमीपे। राजपथस्य समीप इति शेषः। एतदुक्तं भवति। पर्वताद्यासन्नमनासन्नमपि ऊषरं मूषकव्याप्तञ्च
क्षेत्रं वर्जयेदिति। वाह्येष्वपि वर्जनीयानाह स एव। कृशातिवृद्धं क्षुद्रञ्च रोगिणम्प्रपलायिनम्। काणं खञ्जञ्च नादद्याद्वाह्य-
म्प्राज्ञः कृषीवल इति। काणः एकाक्षः खञ्जः भग्नचरणः कश्चिदत्रैकस्य हानिमाह स एव। वाह्यबीजात्ययाद्यस्य क्षेत्रहानिः प्रजा-
यते। तेनैव सा प्रदातव्या सर्वेषां कृषिजीविनामिति। सम्भूयकारिणामिति शेषः। वाह्यबीजग्रहणं कृषिसाधनानामुपलक्षणा-
र्थं। सम्भूयकारिणां शिल्पिनां स्वरूपन्दर्शयंस्तेषां लाभविभागांशपरिकल्पनाप्रकारमाह स एव। हिरण्यकुप्यसूत्राणां काष्ठपा-
षाणचर्म्मणाम्। संस्कर्त्ता तत्कलाभिज्ञः शिल्पी प्रोक्तो मनीषिभिः। हेमकारादयो यत्र शिल्पं सम्भूय कुर्वते। कर्मानुरूपं निर्वेशं
लभेरंस्ते यथांशत इति॥ कुप्यं हेमरूप्यव्यतिरिक्तं त्रपुसीसादिकं। हेमरूप्य इति प्रस्तुयनाभ्यां यदन्यत्तत्कुप्यमित्यमरसिंहेनो-
क्तत्वात्। निर्वेशो भृतिः॥ कात्यायनोऽपि। शिक्षकाभिज्ञकुशला आचार्याश्चेति शिल्पिनः। एकद्वित्रिचतुर्भागान्हरेयुस्ते यथोत्तर-
मिति हर्म्यादिनिर्माणेषां मध्ये मुख्ये भागद्वयमाह बृहस्पतिः। हर्म्यन्देवगृहं वापि वार्चिकोपस्कराणि च। संभूय कुर्वतान्तेषां प्रमुखो
द्व्यंशमर्हतीति। नर्त्तकेष्वपि मुख्यस्यांशद्वयभागित्वमतिदिशन्विशेषान्तरमप्याह स एव। नर्त्तकानामेष एव धर्मः सद्भिरुदाहृतः
तालज्ञो लभतेऽर्द्धं गायनास्तु समांशिन इति अर्द्धं अर्द्धाधिकमेकमंशं संभूयकारिणां चौराणां लाभभागांशपरिकल्पनाप्रकार-
माह कात्यायनः। परराष्ट्राद्धनं यत्स्याच्चौरैः स्वाम्याज्ञयाहृतं। राज्ञे दत्वांशमुद्धृत्य विभजेरन् यथाविधि। चौराणां मुख्यभूतस्तु च-
तुरोंशांस्ततो हरेत्। शूरोंशांस्त्रीन् समर्थो द्वौ शेषास्त्वेकैकमेव चेति। एतद्धनन्दुर्बलवैरिदेशादाहृतविषयम्। प्रबलतरवैरिदे-

आदाहमेवाह बृहस्पतिः । साम्याद्यातुयच्चौरैः परदेशात्समाहृतम् । राज्ञे दत्वा तु यद्भागमाजेयुस्तेयथांशतः ॥ चतुर्थे
ग्राम्भजेनु स्वं शूरःस्वामिमवाप्नुयात् ॥ समर्थे तुहरेन्मध्यांशं शेषांसल्लन्ये समांशिनइति ॥ समर्थः प्रभुः । एतेषां हानिरपये मे
क्याद्यकाद्यायन्तः । तेषां चेत्प्रसृतानामाङ्गं भवत्यां समवाप्नुयात् । तन्मोक्षसार्थे यद्दत्तं वहेयुस्ते यथांशतइति ॥ इयमंशपरिकल्प
नाचविभिन्नसम्भूयकारिणां समप्रयामावविषयाकेनतु समर्थेत द नुसारे सैव । अतएवोक्तेवीशम् । वणिजां कर्षकाणाञ्चे
वसर्वशिल्पिनान्तथा । अनियम्यांशकर्तृणां सर्वेषामेवनिर्णयइति । अनियम्यत्वमद्वयोः समयेसप्रतिपुरुषमंशमनियम्यर्थः
॥ ● ॥ इतिसंभूयसमुत्थानाख्यव्यवहारपदम् । अथदत्ताप्रदानिकाख्यव्यवहारपदम् । तत्रबृहस्पतिः । एषाऽखिलेनाभि
हितासंभूयोत्थाननिष्कृतिः । अदेयदेयदत्तानामदेयस्य च कथ्यतेइति । अदेयादीनां स्वरूपादिकमधुनाकथ्यतइत्यर्थः ।
तत्स्वरूपमाहनारदः । दत्वाद्रव्यमसम्यग्यःपुनराहर्तुमिच्छति । दत्ताप्रदानिकंनाम व्यवहारपदंहि तदिति ॥ अस्य
च चत्वारोऽन्यासाम्ययत्रोत्तेयाः । दानप्रकारसादेयादिमेदेनचतुर्विधस्तमाह स एव । अदेयमथदेयञ्चदत्तमदत्तमेव
व्यवहारेषु विज्ञेयो दानमार्गश्चतुर्विधइति । अत्रअदेयस्यस्वरूपमेदानाह बृहस्पतिः । सामान्यंपुत्रदाराधिसर्वस्वन्यास
याचितम् । प्रतिश्रुतमथान्यस्मैदेयंसप्तविधं स्मृतमिति ॥ सामान्यंसाधारणं प्रतिश्रुतंपरस्मैस्मृतम् । नारदोपि । अन्वाहितं
याचितकमाधिःसाधारणञ्चयत् । निक्षेपःपुत्रदारांश्च सर्वस्वञ्चान्वयेसति ॥ आपत्स्वपि हि कष्टासु वर्तमानेनदेहिना । अ
देयान्याहुराचार्या यच्चान्यस्मै प्रतिश्रुतमिति ॥ साधारणञ्च कुटुम्बस्वामिनोरितरस्यादिकं तत्त्वविभक्तस्वामिकंसुवर्णादिकन्तस्यावि
भक्तसर्वसम्मतौदेयत्वेनवक्ष्यमाणत्वात् । अत्रपुत्रादानमेकपुत्रविषयन्तद्दानेसन्ततिविच्छेदप्रसंगात् । अतएवविष्णुःअ
ऋशोणितसम्भवःपुरुषोमातापितृनिमित्तकस्तस्यप्रदानविक्रयपरित्यागेषुमातापितरौप्रभवतोनत्वेकम्पुत्रन्दद्यात्प्रतिगृह्णी
याद्वासहि सन्तानायपूर्वेषामिति । अतस्त्वसुतस्यसुतदारापांवशित्वमनुशासनं । विक्रयेचैवदानेचवशित्वंनसुतेपितुरि

ण्यादीनि स्मृत्यन्तरोक्तवचनानि सुतस्यादेयत्वप्रतिपादकानि एकपुत्रविषयाणीति ज्ञेयानि अनेकपुत्रेष्वपि मातापितृवियोगस
हनक्षम एव देयः। अत एव कात्यायनः। विक्रयं चैव दानं च न नेयाः स्युरनिच्छवः। दाराः पुत्राश्चेति यथा दाराः पुत्राश्च विक्रय
न्दानम्बा भर्त्रा न नयेत् तथा मातापितृभ्यां पुत्रोऽपि मातापितृवियोगानिच्छवो न नेया इत्यर्थ उक्तः स्मृतिचन्द्रिकायाम्। न नेयाः स्युर
निच्छव इत्येतदनापद्विषयं। आपत्काले तु कर्तव्यं दानं विक्रय एव वा। अन्यथा न प्रवर्तेत इति शास्त्रविनिश्चय इति॥ तानेवा
धिकृत्य तेनैवाभिधानात्। मात्रापि पत्यनुज्ञयादेयमित्याह विष्णुः। न तु स्त्री पुत्रं दद्यात् प्रतिगृह्णीयाद्वान्यत्रानुज्ञानाद्भर्तुरिति
। अन्वाहितादिवत्स्त्रीधनमदेयम्। अत एव दक्षः। सामान्यं याचितं न्यासमाधिर्दाराश्च तद्धनं। अन्वाहितञ्च निःक्षेपः सर्व
स्वं चान्वये सति॥ आपत्स्वपि न देयानि नव वस्तूनि पण्डितैः। यो ददाति स मूढात्मा प्रायश्चित्तीयते नर इति। अदेयदाने प्रति
ग्रहे च दण्डमाह मनुः। अदेयं यश्च गृह्णाति यश्चादेयं प्रयच्छति। तावुभौ चौरवच्छास्यौ दाप्यौ चोत्तमसाहसमिति। अदे
यग्रहणमदत्तस्याप्युपलक्षणार्थम्। अत एव नारदः। गृह्णात्यदत्तं यो मोहाद्यश्चादेयं प्रयच्छति। दण्डनीयावुभावेतौ ध
र्मज्ञेन महीक्षितेति॥ अदत्तादेयग्रहणाद्गृहीतस्य परावर्तनमपि कार्यमिति गम्यते। अदत्तग्रहणे दाने च दानसिद्ध्यभावा
त्परस्वत्वानुत्पत्तेरित्युक्तं स्मृतिचन्द्रिकायाम्। देयस्वरूपमाह स एव। कुटुम्बभरणाद्द्रव्यं यत्किंचिदतिरिच्यते। तद्देयमुप
हृत्यान्यन्न तद्दायमवाप्नुयादिति। अन्यदुपहृत्य भर्तव्यकुटुम्बमनवसाद्येत्यर्थः। उपरोधश्च भोजनाच्छादनादिराहित्यनिबन्ध
नतोऽत्राभिमतो न तु ताम्बूलादिभोगसाधनवैकल्यनिबन्धनः। अत एव बृहस्पतिः। कुटुम्बभक्तवसनाद्देयं यदतिरिच्यत इ
ति। भक्तं भोजनं वसनं चाच्छादनम्। भक्तवसनाद्यदतिरिच्यत इत्यन्वयः। याज्ञवल्क्योऽपि। स्वं कुटुम्बाविरोधेन देयं दारसुता
दृते इति। कुटुम्बाविरोधेन कुटुम्बानुरोधेन कुटुम्बाभरणावशिष्टं स्वं देयमित्यर्थः। स्थावरविषये देयमाहतुः प्रजापतिबृह
स्पती। स्वग्रामाद्गृहक्षेत्राद्यद्धस्थं न प्रदीयते। पित्र्यमाप्य स्वयं प्राप्तं तद्दातव्यं विवक्षितमिति॥ स्वग्रामात्पूर्वोक्तस्वग्रविधा

गमयुक्तात्। क्षेत्रगृहाणामुपलक्षणम्। पित्र्यं वंशपरंपरायातम्। स्वयम्प्राप्तं स्वयमर्जितम्। पित्र्यं स्वयम्प्राप्तयोरुपादानं की
लादीनामुपलक्षणार्थम्। पित्र्यं वा स्वयम्प्राप्तं वा यद्गृहक्षेत्रादिकम्प्रदीयते तत्सप्रागमान्विताद्गृहक्षेत्रादुद्धृत्य दातव्यमिति स्मृ
तिशास्त्रम्विवक्षितमित्यर्थः। अत्र सप्रागमाद्गृहक्षेत्रादित्यभिधानं गृहक्षेत्रादिदानं कुटुम्बपर्याप्तसागमके गृहक्षेत्राद्यन्तरे स
त्येव नान्यथेत्येवमर्थम्। अतएव कात्यायनेनोक्तं। सर्वस्वं गृहवर्ज्जं तु कुटुम्बभरणाधिकम्। यद्द्रव्यं तत्स्वकं देयमदेयं स्यादतोऽन्य
थेति। तद्गृहाद्यन्तराभावविषयम्। स्वकं स्वकीयम्। यथेष्टविनियोगार्हद्रव्यमिति यावत्। स्वयंप्राप्तं त्वविभक्तधनैर्भ्रातृभि
रननुज्ञातमपि देयम्। स्वेच्छादेयं स्वयंप्राप्तं बन्धाचारे न बन्धकमिति बृहस्पतिस्मरणात्। स्वेच्छादेयं भ्रात्राद्यनुज्ञामन्तरे
णापि देयम्। बन्धकं बन्धाचारेणाधिरूपेणादेयमित्यर्थः। यत्तु तेनैवोक्तं। विभक्ता अविभक्ता वा दायादाः स्थावरे समाः। एको
प्यनीशः सर्वत्र दानाधमनविक्रये इति। तत्समानाधिकाविभक्तस्थावरविषयम्। आधमनमाधीकरणं विभक्ता अपि स्थावरे स
माः किमुताविभक्ता इति दण्डापूपन्यायेन व्याख्येयम्। अन्यथा विभागो निरर्थकः स्यात्। अतश्च यदुक्तं स्मृत्यंतरे। एकोपि स्थाव
रे कुर्य्याद्दानाधमनविक्रयम्। आपत्काले कुटुम्बार्थे धर्मार्थे च विशेषत इति। तत्क्रमायातविभक्तस्थावरविषयं सप्तानधिकस्थावर
विषयं वेति मन्तव्यम्। स्वार्ज्जितमपि किञ्चित्प्राप्तव्यवहारेषु पुत्रेषु सत्सु तदनुमत्यैव दातव्यमित्यभिप्रेत्याह भगवान्व्यासः। स्था
वरं द्विपदञ्चैव यद्यपि स्वयमर्ज्जितं। असम्भूय सुतान्सर्वान्न दानं न च विक्रयः॥ ये जाता येऽप्यजाताश्च ये च गर्भे व्यवस्थिताः। वृ
त्तिञ्च तेऽभिकाङ्क्षन्ति न दानं न च विक्रय इति। अनेनापरपदम्पूर्वं प्रदर्शितवृहस्पतिवचनार्थस्य दण्डापूपन्यायप्रदर्शनेन दृ
ढीकरणार्थम्। किञ्चिद्द्रव्यमप्यननुज्ञातमेव देयम्। किञ्चित्तु स्वेनापि भ्रात्राद्यनुज्ञानमेव देयम्। तथा च बृहस्पतिः। सौदायिकं
क्रमायातं शौर्यप्राप्तं च यद्भवेत्। स्त्रीज्ञातिस्वाम्यनुज्ञातं दत्तं सिद्धिमवाप्नुयादिति। सौदायिकं वैवाहिकं श्वशुराः परिणयने तस्य
न्यस्याः श्वशुरैव दातव्यम्। क्रमायातम्पितृपितामहादिक्रमायातम्। स्त्रीज्ञात्यनुमतं न सकलं चन्देयम्। वैवाहिके क्रमायाते च

वेदानन्नविद्यानदत्तिनैवेत्यन्वयः । देयेतिप्रसङ्गेन प्रतिग्रहप्रकारविशेषसंग्रहस्तु यथा याज्ञवल्क्यः । प्रतिग्रहः प्रकाशः स्यात् स्थाव
रस्य विशेषत इति । प्रकाशः प्रकटः ससाक्षिक इति यावत् । पुनः प्रतिग्रहप्रकारविशेषः कात्यायनेनोक्तः । पुत्रं गृहीत्वा त्ववन्धुना
[illegible] अनिवार्येऽपि [illegible] मेकगृह्णीयादिति ॥ अदूरवान्धवं सन्निहि
तमातुलादिवान्धवं संनिहितं स्वसंनिहितमभ्रातृपुत्रादिदायादं समेव प्रतिगृह्णीयादित्यर्थः । प्रासङ्गिकमुक्त्वा प्रकृतमप्याह
याज्ञवल्क्यः । देयं प्रतिश्रुतञ्चैव दत्वा नापहरेत्पुनरिति । इह दत्तो दास्यामीति यत्प्रतिश्रुतं तदवश्यन्तस्मै दातव्यं यदि धर्मो प्र
च्युतो न भवति । प्रच्युते पुनर्न दातव्यं प्रतिश्रुत्यापि धर्मसंयुक्ताय न दद्यादिति गौतमस्मरणात् । दत्वा नापहरेत्पुनः । न्यायमा
र्गेण यद्दत्तं सप्तविधमपि पुनर्नापहर्तव्यम् । किन्तु तथैवानुमन्तव्यमित्यर्थः । यः पुनः प्रतिश्रुतं न ददाति दत्तं वाऽपहरति तस्य
दोषमाह हारीतः । प्रतिश्रुत्याप्यदाता यो दत्वा च्छेदयते च यः । विविधान्नरकान्याति तिर्यग्योनौ च जायते । वाचैव यत्प्रति
ज्ञातं कर्मणा नोपपादितं । ऋणं तद्धर्मसंयुक्तमिह लोके परत्र चेति । यद्धर्मसंयुक्तं प्रतिगृहीतुः प्रवृत्तधर्मसम्पन्नाय
वाचा प्रतिज्ञातं तत्पश्चादर्पितं तन्नादिह परत्र च ऋणवदनपैतीत्यर्थः । प्रतिश्रुतमदद्याज्ज्ञानवाप्तो दण्ड्यश्चेत्याह कात्यायनः । स्वे
च्छया यः प्रतिश्रुत्य ब्राह्मणाय प्रतिग्रहम् । न दद्यादृणवद्दाप्यः प्राप्नुयात्पूर्वसाहसमिति ॥ मत्स्यपुराणेऽपि । प्रतिश्रुत्याप्रदाता
रं सुवर्णं दण्डयेन्नृप इति । अनयोर्दण्डयोरपराधानुसारेण व्यवस्था । दत्तं सप्तविधमदत्तं षोडशप्रकारमित्याह नारदः ।
दत्तं सप्तविधं प्रोक्तमदत्तं षोडशात्मकमिति । तत्र दत्तभेदानाह स एव । पण्यमूल्यं भृतिस्तुष्ट्या स्नेहात्प्रत्युपकारतः । स्त्रीशुल्का
नुग्रहार्थञ्च दत्तं सप्तविधं विदुरिति । पण्यमूल्यं क्रीतद्रव्यस्य मूल्यम् । भृतिस्वरूपं व्याख्यानेन दर्शितम् । अविज्ञातोपलब्ध्य
[illegible]पितम् । उपकारक्रियायाः [illegible] भृतिः परिकीर्तितेति । प्रयोजनक्रियासम्पादनं भृतिरिष्यत इत्यर्थः । तु
ष्ट्या परितोषेण [illegible] प्रभृतिभ्यो दत्तमिति शेषः । स्नेहात्पुत्रादिभ्यो दत्तम् । प्रत्युपकारतः कृतोपकाराय प्रत्युपकारित्वा

द्दत्तम्। तत्प्रदर्शनार्थमाह कात्यायनः। भयत्राणोपरक्षार्थं तथा कार्यप्रसाधनात्। अनेन विधिना लब्धमभयत्राणादिकं धनं।
उपकारकरणेन लब्धमित्यावत्। स्त्रीशुल्कं विवाहार्थं कन्यायै बन्धुभ्यो दत्तं। अनुग्रहार्थे परोपकारः कर्तव्य इति विधिबलात्प्रत्य
कृत्याप्यनुग्रहार्थं दत्तं सफलं भवतीति दर्शयितुं नारद आह। मातापित्रोर्गुरौ मित्रे विनीते चोपकारिणि। दीनानाथविशिष्टे
भ्यो दत्तं तु सफलं भवेदिति॥ उपकारिणि परोपकारे सफलं फलातिशयोपेतमित्यर्थः। तदेतत्पण्यादि सप्तविधं दत्तमेव दान
विदो विदुः अप्रत्यावर्तनीयमिदं विदुरित्यर्थः। वृहस्पतिरपि। भृतिस्तुष्ट्या पण्यमूल्यं स्त्रीशुल्कमुपकारिणे। श्रद्धानुग्रहसंप्रीत्या द
त्तं सप्तविधं विदुरिति॥ अदत्तानि दर्शयति नारदः। अदत्तन्तु भयक्रोधशोकवेगरुगन्वितैः। तथोत्कोचपरीहासव्यत्यासच
लयोगतः। बालमूढास्वतन्त्रार्तमत्तोन्मत्तापवर्जितं। कर्ता ममायं कर्मेति प्रतिलाभेच्छया च यत्। अपात्रे पात्रमित्युक्ते कार्ये वाधर्म
संहिते। यद्दत्तं स्यादविज्ञानाददत्तमिति तत्स्मृतमिति। रुक् उपतापः भयादिकृतोपतापस्तदन्वितैरित्यन्वयः। अपवर्जि
तन्दत्तं मत्तादिभिरपवर्जितमित्यन्वयः। एतदुक्तं भवति भयोपनम्रेन बन्दिग्राहादिभ्यो दत्तं क्रोधोपनम्रेन क्रोधविषयीभूताना
म्पुत्रभ्रातादीनां व्ययं कर्तुमितरेभ्यो दत्तम्। पुत्रादिवियोगजनितशोकवेगादुपनम्रेन किं स्थितेन धनेनेति नास्तिकतया वुद्ध्या
दत्तम्। उत्कोचेन राजकीयादिभ्यो दत्तम्। उपहासेन दत्तम्। व्यत्यासेन एकः स्वद्रव्यमन्यस्मै ददाति अन्योऽपि स्वीयन्तस्मै
ददातीति दानव्यत्यासेन दत्तं। छलयोगतः शतदानमभिसन्धाय सहस्रमिति परिभाष्य दत्तम्। बालेनाप्राप्तव्यवहारेणाद्दत्तम्। मू
ढेन लोकवेदानभिज्ञेन दत्तं। अस्वतन्त्रेण दासादिना दत्तं। आर्तेन रोगोपहतेन दत्तं। मत्तेन धुस्तूरादिभक्षणादिना मत्तेन दत्तं।
उन्मत्तेन वातपित्ताद्युद्रेकादिना चलितधिया दत्तम्। अयं मदीयं कर्म करिष्यतीति प्रतिलाभेच्छया प्रतिलाभमकुर्वाणाय द
त्तं। अपात्रायायोग्याय योग्योऽहं इत्युक्तिमात्रेण दत्तं। यज्ञादिं करिष्यामीत्युक्त्वा धनं गृहीत्वा द्यूतादिकर्मणि विनियुञ्जानाय
दत्तं इत्येवं षोडशप्रकारमपि दत्तम्पुनः प्रत्याहरणीयत्वाददत्तमुच्यत इत्यर्थः। पुनः प्रत्याहरणीयत्वमेव विधानमाह का

त्यार्थनः । कामक्रोधाभ्यस्वतन्त्रार्त्तक्लीबोन्मत्तप्रमोहितैः । व्यत्यासपरिहासाय यद्दत्तं तत्पुनर्हरेत् ॥ यानु कार्यप्रसिद्ध्यर्थमुत्को
चास्यात्प्रतिक्रिया । तस्मिन्नपि प्रसिद्धेऽर्थे न देयास्यात्कथञ्चन ॥ अथ प्रागेव दत्तास्यात्प्रतिदाप्यस्तनो बलात् । दण्डं चैकादश
गुणमाहुर्गार्गीयमानवाइति ॥ उत्कोचास्वरूपमाह स एव । स्तेयसाहसिकोद्वृत्तपारदारिकशंसनात् । दर्शनाद्वृत्तनष्टस्य
तथासत्यप्रवर्त्तनात् । प्राप्तमेतैस्तु यत्किञ्चिदुत्कोचाख्यन्तदुच्यते । नदातातत्र दण्ड्यः स्यात्मध्यस्थश्चैव दोषभागिति ॥ एतदु
क्तम्भवति यदि मह्यंनप्रयच्छसि तदा त्वत्कृतं स्तेयादिकथयामीति भीतिमुत्पाद्य स्तेयादिकर्तृसकाशाद्धनमादत्ते । तथा त्वं यदि
न मह्यन्नप्रयच्छसि तदा पलायमानं त्वां दर्शयामीति भीतिमुत्पाद्य पलायिनः सकाशाद्यत्किञ्चिदादत्ते । तथानवसत्यमपि स्वामि
निकटेऽसत्यमिति वदिष्यामीत्युक्त्वा यत्किञ्चिदादत्ते तदुत्कोचाख्यं तद्दाताद्रव्यदाता वेदाप्यं उत्कोचापादकयाहकोच दण्डनीया विति
। पुनः प्रत्याहरणीयमिति बृहस्पतिरप्याह । प्रतिलाभेच्छयादत्तमपात्रे पात्रशङ्कया । कार्य्ये वाधर्म्मसंयुक्ते स्वामीतत्पुनराप्नुया
दिति । आर्त्तेदत्तस्यादत्तत्वन्धर्म्मकार्यव्यतिरिक्तविषयम् । तथा च कात्यायनः । स्वस्थेनार्त्तेन वा दत्तं श्रावितं धर्मकारणात् । अ
दत्वा तु मृते दाप्यस्तत्सुतो नात्र संशय इति । मनुरपि सोपाधिकदानादेर्निवर्त्तनमाह । योगाधमन विक्रीतं योगदानप्रतिग्रह
म् । यस्य वाप्युपधिम्पश्येत्तत्सर्वं विनिवर्त्तयेदिति । योगउपाधिः येनागामिनोपाधिविशेषेणाधि विक्रयादानप्रतिग्रहाः कृता
स्तदुपाधिविगमे तं सर्वंपि निवर्त्तंरन्नित्यर्थः ॥ इति दत्ताप्रदानिकाख्यव्यवहारपदम् ॥ ● ॥ अथाभ्युपेत्याशुश्रूषाख्यव्यवहा
रपदम् । तस्य स्वरूपमाह नारदः ॥ अभ्युपेत्य च शुश्रूषां यस्तान्नप्रतिपद्यते । अशुश्रूषाभ्युपेत्यैतद्विवादपदमुच्यत इति ॥
शुश्रूषामाज्ञाकारित्वम् । तत्र पञ्चविधः शुश्रूषकः । शिष्यः अन्तेवासी भृतकः अधिकर्म्मकृत् दासश्चेति । तेषाम्मध्ये दासभिन्नाः
कर्म्मकराः । ते च शुभकर्मकृतः । दासाः पुनः पञ्चदशविधा गृहजातादिभेदनतेत्वशुभकर्म्मकृतः । तदेतत्सर्वं मनस्विनि
धायसएवाह । शुश्रूषकः पञ्चविधः शास्त्रे दृष्टो मनीषिभिः । चतुर्विधः कर्मकरस्तेषान्दासास्त्रिपञ्चकाः ॥ शिष्यान्तेवासिभृ

तकाश्चतुर्थस्त्वधिकर्म्मकृत् । एतेकर्मकराज्ञेयादासास्तुगृहजादयः ॥ सामान्यमस्वतन्त्रत्वमेषामाहुर्म्मनीषिणः ॥ जाति
कर्मकृतस्तूक्तोविशेषोवृत्तितस्तथा । कर्म्मापिद्विविधंज्ञेयमशुभंशुभमेवच । अशुभन्दासकर्म्मोक्तंशुभङ्कर्मकृतांस्मृतम् ॥ गृ
हद्वाराशुचिस्थानरथ्यावस्करशोधनम् । गुह्याङ्गस्पर्शनोच्छिष्टविण्मूत्रग्रहणोज्झनम् ॥ इच्छतःस्वामिनश्चाङ्गैरुपस्थान
मथान्ततः । अशुभङ्कर्मविज्ञेयंशुभमन्यदतःपरमिति ॥ तेषामितिनिर्द्धारणेषष्ठी । त्रिपञ्चकाःपञ्चदश । शिष्योवेदवि
द्यार्थी । अन्तेवासीशिल्पशिक्षार्थी । मूल्येनयःकर्म्मकरोतिसभृतकः । अधिकर्म्मकृत् । कर्मकुर्वतामधिष्ठाता । वृत्तितः
जीवनोपायतः । अशुचिस्थानमुच्छिष्टप्रक्षेपणार्थंगर्त्तादिकम् । अवस्करोगृहमार्जितपांश्वादिनिचयस्थानम् । चतुर्भिर
पिगृहद्वारादिभिःशोधनपदंसम्बध्यते । उज्झनन्त्यागः । अन्ततःस्वामिनः । इच्छतःस्वाम्यनुज्ञयामूत्रपुरीषादिस्थलेनिर्म्मा
र्जनार्थमङ्गैरुपस्थानंहस्ताद्युपर्पणंतेषांकर्मकराणान्दासानाञ्चास्वतन्त्रत्वलक्षणन्धर्ममनीषिणःसाधारणमाहुः । जाति
कर्म्मकृतःकर्मकृतोवृत्तिकृतश्चविशेषःशिष्यान्तेवासिनामेवोक्तइत्यर्थः । तत्रशिष्याणान्त्रैवर्णिकान्यतमत्वलक्षणोजातिकृतो
विशेषोवसन्तेब्राह्मणोग्नीनादधीतेत्यादिशास्त्रसिद्धोवगन्तव्यः । कर्मकृतविशेषन्त्वाहवृहस्पतिः । विद्यात्रयीसमाख्याता
ऋग्यजुःसामलक्षणा । तदर्थंगुरुशुश्रूषाम्प्रकुर्याच्छास्त्रचोदितामिति ॥ शिष्यइतिशेषः । तथाचनारदः । आविद्याग्रह
णाच्छिष्यःशुश्रूषेत्प्रयतोगुरुम् । तद्वृत्तिर्गुरुदारेषुगुरुपुत्रेतथैवचेति । वृत्तितोविशेषमाहसएव । समावृत्तश्चगुरवेप्र
दायगुरुदक्षिणाम् । प्रतीयात्स्वगृहानेषाशिष्यवृत्तिरुदाहृतेति । वृत्तिरत्रधर्मः । मनुरपि । प्रतिगृह्येप्सितन्दण्डमुपस्था
यचभास्करम् । प्रदक्षिणम्परीत्याग्निञ्चरेद्भैक्षंयथाविधि ॥ भवत्पूर्वञ्चरेद्भैक्षमुपनीतोद्विजोत्तमः । भवन्मध्यन्तुराजन्यो
वैश्यस्तुभवदुत्तरमिति ॥ कःपुनरन्तेवासिनांजातिकर्मकृतोविशेषइत्यपेक्षितेवृहस्पतिराह । विज्ञानमुच्यतेशिल्पंहेमकुप्यादि
संस्कृतिः । नृत्यादिकञ्चतत्प्राप्तुङ्कुर्यात्कर्मगुरोर्गृहइति । कङ्कणकटकादिनिर्माणविषयंनृत्यगीतादिकरणविषयञ्च

दिशद्वात्सम्भकुम्भादिविरचनविषयम् । विज्ञातशिल्पविज्ञानमुच्यते तत्प्राप्त्यर्थं अन्तेवासी गुरोर्गृहे कण्डनकरणादिकं
कुर्यादित्यर्थः । अनेनहेमकारादिजातितः कण्डनकरणादिकर्मकृतस्य विशेषोऽन्तेवासिनां दर्शितः । तेषाङ्कर्मकृतं वृत्तिकृ
तस्य विशेषं दर्शयति नारदः । स्वशिल्पमिच्छन्नाहर्तुं बान्धवानामनुज्ञया । आचार्यस्य वसेदन्तेकालं कृत्वा सुनिश्चितमिति
॥ अन्ते समीपे कृत्वा सुनिश्चितं एतावन्तङ्कालं मत्समीपे स्थातव्यमित्याचार्येण कालपरिमाणं सुनिश्चितं कृत्वेत्यर्थः ॥ आचार्य
स्यापि कर्त्तव्यमाह स एव । आचार्यः शिक्षयेदेनं स्वगृहे दत्तभोजनम् । न चान्यत्कारयेत्कर्म पुत्रवच्चैनमाचरेदिति । अन्य
च्छिल्पकर्मव्यतिरिक्तं कर्म । एवञ्चान्तेवासिना कण्डनकरणादिकर्म फलार्प्यमाणमाचार्यशुश्रूषाकार्यत्वेनावगन्तव्यम् । स्वगृहे द
त्तभोजनमिति वृत्तिर्दर्शिता । अन्यत्कर्मकारकमाचार्यम्प्रत्याह कात्यायनः । यस्तु न ग्राहयेच्छिल्पं कर्माण्यन्यानि कारयेत्
। प्राप्नुयात्साहसम्पूर्वं तस्माच्छिष्यो निवर्त्तत इति । शिष्यश्चान्तेवासी । परिभावितकालात्प्रागेव विद्याप्राप्तावपि परि
भावितकालसमापनङ्कार्यमित्याह नारदः । शिक्षितोऽपि कृतं कालमन्तेवासी समापयेत् । तत्र कर्म्म च यत्कुर्यादाचार्यस्यै
व तत्फलमिति ॥ याज्ञवल्क्योऽपि । कृतशिल्पोऽपि निवसेत्कृतकालं गुरोर्गृहे । अन्तेवासी गुरुप्राप्तभोजनस्तत्फलप्रद इति
। दुष्टमन्तेवासिनं प्रत्याह नारदः । शिक्षयन्तमदुष्टञ्च यस्त्वाचार्यं परित्यजेत् । बलाद्वासयितव्यः स्याद्वधबन्धौ च सोऽर्हतीति
। वासयितव्यः स्थापनीयः । आचार्यपार्श्वे इति शेषः । वधोऽत्र ताडनं न प्राणच्छेदः । अपराधस्याल्पत्वात् । शुश्रूषासमा
प्त्यनन्तरमन्तेवासिनः कृत्यमाह स एव । गृहीतशिल्पः समये कृत्वाचार्यं प्रदक्षिणाम् । शिक्षितश्चानुमान्यैनमन्तेवासी निवर्त्तेत
इति ॥ भृतकानान्त्वन्तेवासिवन्न जातितो वृत्तितो वा विशेषः । किन्तु भृतितः कर्मतः कालतश्च विशेषः । तदेतदाह बृह
स्पतिः । यो भुङ्क्ते परदासीन्तु स ज्ञेयो बडवाभृतः । कर्म्म तत्स्वामिनः कुर्याद्यथान्योऽर्थभृतो नरः । बलदुधार्थकृतः प्रोक्तस्तथा भाग
भृतोऽपरः । हीनमध्योत्तमत्वञ्च सर्वेषामेव चोदितम् । दिनमासार्द्धषण्मासत्रिमासाब्दभृतस्तथा । कर्म्म कुर्यात्प्रतिज्ञातं लभते प

रिभाषितमिति। अयमर्थः। यःपरदारेषूपभोगेन तत्स्वामिनःकर्म्म करोति स वनिताभृतः। योधनग्रहणेन कर्म करोति स अर्थभृतः।
यःपरिकल्पितांशग्रहणेन कर्म्म करोति स भागभृतः। एतावन्तं कालं मे तत्कर्म्म करिष्यामीति प्रतिज्ञातं कर्म तावन्तं कालं कुर्व्वा
न् एवअपरिकल्पितां भृतिं लभत इति। अर्थभृतस्य बहुविधत्वमर्थाल्पत्वमहत्त्वाभ्यां ज्ञेयम्। तेचाल्पत्वमहत्त्वे शक्तिभक्त्यनुसा
रेण द्रष्टव्ये। भृतकस्त्रिविधोज्ञेय उत्तमोमध्यमोऽधमः। शक्तिभक्त्यानुरूपास्यादेषांकर्माश्रयाभृतिरितिनारदस्मरणात्। भा
गभृतकस्य विभागमाह स एव। द्विप्रकारोभागभृतः कृषिगोवीजिनांस्मृतः। जातशस्यात्तथाक्षीरात्स लभेतनसंशय इति॥ हीनमध्यो
त्तमत्वलक्षणः कर्मकृतोभेदोरक्षणादिकर्म्म निबन्धन इत्याह स एव। आयुधीतूत्तमःप्रोक्तोमध्यमस्तु कृषीबलः। भारवाहोऽध
मःप्रोक्तस्तथा च गृहकर्म्मकृदिति। कृषीबलःकर्षकः। अधिकर्म्मकृतस्तु स्वरूपमाह नारदः। सर्वेष्वधिकृतोयःस्यात्कुटुम्ब
स्य तथोपरि। सोधिकर्म्मकृतोज्ञेयः स च कौटुम्बिकःस्मृत इति॥ सर्वेषु भृतकेषु अधिकृतस्तु परिकृतोऽधिष्ठातृत्वेन कृत इतियाव
त्। अर्थेष्वधिकृत इति केचित्पठन्ति। अर्थेषु क्षेत्रहिरण्यादिषु अधिकृतःपालकत्वेन नियुक्त इति। कुटुम्बस्योपरीत्यत्राधिकृ
त इत्यनुषंगः। सर्वभृतकेष्वधिष्ठातृत्वेन नियुक्तोयःसोधिकर्मकृतोज्ञेयः। कुटुम्बरक्षणाय व्ययकारीचिन्तस्यापितोयःस तु कौटु
म्बिक इत्यर्थः। शिष्यान्तेवासिभृतकाधिकर्म्मकरेभ्योदासानाम्भेदं दासत्वशब्दव्युत्पत्तिप्रदर्शनमुखेनाह कात्यायनः। स्वतन्त्रस्या
त्मनोदानाद्दासत्वं दारवद्भृगुरिति। यथा भर्त्तुःसम्भोगार्थे स्वशरीरदानाद्दारत्वम्। तथा स्वतन्त्रस्यात्मनःपरार्थत्वेन दानाद्दास
त्वमिति भृगुराचार्यो मन्यत इत्यर्थः। अनेनात्यन्तपारार्थ्यमासाद्य शुश्रूषकादासाः। पारार्थ्यमात्रमासाद्य शुश्रूषकास्तु कर्म्मकरा
इति भेदोप्युक्त इत्यवगन्तव्यम्। अत्यन्तपारार्थ्यं तु तेषाम्भवति येःस्वपुरुषार्थवृत्तिनिरोधेन परार्थत्वमाश्रितमिति स्मृतिचन्द्रिकाया
म्। दासत्वम्ब्राह्मणव्यतिरिक्तेष्वेव। त्रिषु वर्णेषु विज्ञेयं दास्यं विप्रस्य न क्वचिदिति तेनैवाभिधानात्। अनेन दासानां जातितो भे
द उक्तः। विप्रेतरेष्वपि दास्यमानुलोम्येनैव भवति। वर्णानामानुलोम्येन दास्यन्न प्रतिलोमतः। राजन्यवैश्यशूद्राणान्त्यजताञ्च

स्वतंत्रतामितितेनैवोक्तत्वात् । स्वतंत्रतांगच्छताम् । अन्यत्र पारार्थ्यं भजतामित्यर्थः । नप्रातिलोम्यन्तु निःसृतधर्मोपरि स्वामिनो व
तिभ्योऽपिऽन्यत्रत्यक्तस्वधर्मस्य एव नारदः । वर्णानां प्रातिलोम्येन दासत्वं न विधीयते । स्वधर्मत्यागिनोऽन्यत्र दारवद्दासता मतेति ।
यथोत्तमवर्णं प्रतिहीनवर्णा सवर्णा वा भार्या भवति न पुनर्हीनवर्णमप्युत्तमवर्णा तथैव दासोऽपि भवेदित्यर्थः । एतच्च प्रव्रज्यावसितो
हीनवर्णस्यापि दासो भवतीत्यभिधानं क्षत्रियवैश्यप्रव्रज्यावसितविषयं न तु ब्राह्मणप्रव्रज्यावसितविषयम् । तस्य निर्वासनाभि
धानेन दासत्वाभावात् । तस्य निर्वासनन्दर्शितं कात्यायनेन । प्रव्रज्यावसिता यत्र त्रयो वर्णा द्विजातयः । निर्वासं कारयेद्विप्रं दा
सत्वं क्षत्रविड्भृगुरिति । कारयेद्राजेति शेषः । क्षत्रञ्च विट् च क्षत्रविट् । सर्वो द्वन्द्वो विभाषैकवद्भवतीति विकल्पादेकवद्भावः ।
निर्वासनञ्च स्वपदेनाङ्कयित्वा कर्तव्यमित्याहतुर्दक्षनारदौ । पारिव्राज्यं गृहीत्वा तु यः स्वधर्मे न तिष्ठति । श्वपदेनाङ्कयित्वा तं राजा
शीघ्रं प्रवासयेदिति ॥ न चैवं सति राज्ञ एव तु दासः स्यात्प्रव्रज्यावसितो नरः । न तस्य प्रतिमोक्षोऽस्ति न विशुद्धिः कथञ्चनेति नार
देन प्रव्रज्यावसितो राज्ञ एव दासो नान्यस्येत्यभिधानात् स्वधर्मत्यागिनोऽन्यत्रेति यत्तेनैवोक्तं तत्किंविषयमिति निरवद्यम् । यतोऽत्रैव
धिकरणन्यायेन क्षत्रियमात्रवचनेनापि राजशब्देनात्र लक्षणया प्रजापालकस्य ग्रहणात् प्रजापालकत्वस्य चाधिकरणेन वैश्यादावपि
सम्भवाद्यः क्षत्रियः प्रव्रज्यावसितः स हीनवर्णस्यापि प्रजापालकस्य वैश्यस्य दासो भवतीति प्रतिपादनार्थत्वात् । केचित्तु प्रव्रज्यावसि
तस्य ब्राह्मणस्य दासत्वनिर्वासनयोर्विकल्पमाहुः तन्न पूर्वोक्तप्रकारेण सम्भवन्त्यां गतौ अष्टदोषदुष्टविकल्पाङ्गीकारस्यान्या
य्यत्वात् । दास्यन्तु विप्रस्य न क्वचिदिति निषेधाच्च । दारवद्दासतेति वचनाद् ब्राह्मणस्य सवर्णं प्रति दासत्वं प्राप्तं तन्निषेधार्थमाह
कात्यायनः । सवर्णेऽपि हि विप्रं तु दासत्वं नैव कारयेदिति । यदि ब्राह्मणः स्वेच्छया दास्यं भजते तदाशुभकर्म न कुर्यादित्या
ह स एव । शीलाध्ययनसम्पन्ने तद्भूनं कर्म कामतः । तत्रापि नाशुभं कर्म प्रकुर्वीत द्विजोत्तम इति । यस्मात्स उपकारः कर्तव्य इ
ति विधिः तस्माद्धीनं कर्म मध्यमोत्तमव्यतिरिक्तमपि कर्म कामतो वेतनमन्तरेण स्वेच्छया परोपकारार्थं कुर्यादित्यर्थः पूर्वार्द्ध

स्य। तथापि तेष्वपि हीनकर्म्मसु यदशुभकर्म्म गृहद्वारशोधनादिकं तन्न कुर्यादित्युत्तरार्द्धार्थः। क्षत्रियवैश्यविषये स्वामि
नः कर्त्तव्यमाह मनुः। क्षत्रियञ्चैव वैश्यञ्च ब्राह्मणो वृत्तिकर्षितौ। बिभृयादानृशंस्येन स्वानि कर्म्माणि कारयन्निति। आनृशंस्ये
नाक्रौर्य्येण। अयमर्थः। वृत्तिकर्षितं क्षत्रियं वैश्यञ्च दासीभूतमक्रौर्य्येण स्वानि कर्म्माणि कारयन् स्वामी पोषयेदिति। अत्र
स्वामीत्यनेन न सम्बन्धिजनकर्म्माणि कारयेदित्याह। कर्म्माणीति सामान्याभिधानेन जघन्यकर्म्माण्येव कारयितव्यानीति नि
यमो नास्तीति सूचयति। वृत्तिकर्षिताविर्त्यनेन तदन्यतराभावे एव क्षत्रियवैश्ययोर्दासत्वाङ्गीकारः कार्य्यो न तु गत्यन्तरसम्भवे इति
दर्शयति। बलाद्दासीकरणे दण्डमाह मनुः। दास्यन्तु कारयंल्लोभाद्ब्राह्मणः संस्कृतान् द्विजान्। अनिच्छतः प्राभवत्याद्रा
ज्ञा दाप्यः षट्शतानि दण्डमिति। प्रभवतो भावः प्राभवत्यं तस्मात् प्रभुत्वादित्यर्थः। साधारणादिभ्यः स्वार्थेऽञ् वक्तव्य इति वार्त्तिका
दत्व। द्विजातिपदस्य दण्डः शूद्रविषय इति दर्शयति। मनुरेवाह। शूद्रन्तु कारयेद्दास्यं क्रीतमक्रीतमेव वा। दास्यायैव
हि सृष्टोऽसौ ब्राह्मणस्य स्वयम्भुवेति। स च दासः पञ्चदशप्रकार इत्याह नारदः। गृहजातस्तथा क्रीतो लब्धो दायादुपागतः।
अनाकालभृतस्तद्वदाहितः स्वामिना च यः॥ मोक्षितो महतश्चर्णात् युद्धप्राप्तः पणे जितः। तवाहमित्युपगतः प्रव्रज्यावसितः कृ
तः। भक्तदासश्च विज्ञेयस्तथैव बडवाहृतः। विक्रेता चात्मनः शास्त्रे दासाः पञ्चदश स्मृता इति। गृहजातः स्वगृहे दास्यां जातः।
क्रीतो मूल्येन स्वाम्यन्तरात् प्राप्तः। लब्धः तत एव प्रतिग्रहादिना। दायादुपागतः रिक्थग्राहित्वेन लब्धः। अनाकालभृतः दुर्भिक्षे यो म
रणाद्दासत्वाय रक्षितः। आहितः स्वामिना ऋणग्रहणादाधितामानीतः। ऋणमोचनेन दासत्वमभ्युपगतो ऋणदासः। युद्धप्रा
प्तः समरे विजित्य गृहीतः। पणे जितः दास्यपणके द्यूतादौ जितः। तवाहमित्युपगतः तवाहमस्मीति स्वयमेवोपगतः।
प्रव्रज्यावसितः प्रव्रज्यातश्च्युतः। कृतः एतावत्कालं त्वद्दासो भवामीत्यभ्युपगतः। भक्तदासः सर्वकालं भक्तार्थमेव दासत्वमभ्यु
पगम्य यः प्रविष्टः। भक्षितं यावत्तन्मूल्यद्वारेण यद्दासी तावद्दासत्वमभ्युपगत इति स्मृतिचन्द्रिकायां। बडवाहृतः बडवा गृहदा

शीतयाहृतस्तल्लोभेनमामुद्वाह्यदासत्वेनप्रविष्टः। यश्चात्मानम्विक्रीणीते अत्रचात्मविक्रेतेत्येवंरूपमेशाखेदासभेदाःपञ्चदश प्रकाराःस्मृताइत्यर्थः। अत्राद्यानांगृहजातक्रीतलब्धदायागतानाञ्चतुर्णांदासत्वापगमःस्वामिप्रसादादेवनान्यथेत्याहसएव। तत्रपूर्वश्चतुर्वर्गोदासत्वान्नविमुच्यते। प्रसादत्स्वामिनोन्यत्रदास्यमेषांक्रमागतमिति॥ आत्मविक्रेतुरपिदासत्वंस्वामिप्रसादादन्यतोनापैतीत्याहसएव। विक्रीणीतेस्वतंत्रःसन्यआत्मानन्नराधमः। सजघन्यतमस्तेषांसोपिदास्यान्नमुच्यतइति। अत्रप्रसादात्स्वामिनोऽन्यत्रइत्यनुषज्यते। ततश्चायमर्थः। आत्मविक्रेतापिगृहजातादिवत्स्वामिप्रसादंविनादास्यान्नविमुच्यतइति। एवञ्चगृहदासादयोप्यात्मविक्रेतृपञ्चमाःस्वामिप्रसादादकालभृताइवदासत्वान्मुच्यन्तइतिवचोभंग्यादर्शितमितिमन्तव्यम्। स्वामिप्राणरक्षणादगृहजातादयोऽकालभृताश्चसर्वेपिदास्यान्मुच्यन्तइत्याहसएव। यश्चैषांस्वामिनंकश्चिन्मोचयेत्प्राणसंशयात्। दासत्वात्सविमुच्येतपुत्रभागंलभेतचेति। एषामितिनिर्द्धारणेषष्ठी। पञ्चदशानांमध्येअन्यतमइत्यर्थः। यत्तु। ध्वजाहृतोभक्तदासोगृहजःक्रीतदत्त्रिमौ। पैत्रिकोदण्डदासश्चसप्तैतेदासयोनयरितिमनुवचनेसप्तविधत्वमुक्तन्तत्तेषांदासत्वप्रतिपादनार्थंनपरिसंख्यार्थम्। ध्वजागृहदासीएतच्चस्वामिप्रसादात्प्राणरक्षणाद्वादास्यापगमनम्प्रव्रज्यावसितभिन्नदासेषुद्रष्टव्यम्। तस्यदासत्वोन्मोकाभावात्। अतएवयाज्ञवल्क्यः॥ प्रव्रज्यावसितोराज्ञोदासआमरणान्तिकरिति। राज्ञोदासःपार्थिवस्यैवदासोनान्यस्येत्यर्थः। अनाकालभृतादीनांप्रव्रज्यावसितात्मविक्रेतृव्यतिरिक्तानान्नवानान्दास्यापमयनप्रकारमाहनारदः। अनाकालभृतोदास्यान्मुच्यतेगोयुगन्ददत्। आहितोपिधनंदत्वास्वामीयद्येनमुद्धरेत्। ऋणंतुसोदयंदत्वाऋणीदास्यात्प्रमुच्यते। तवाहमित्युपगतोयुद्धप्राप्तःपणोजितः। प्रतिशीर्षप्रदानेनमुच्येरंस्तुल्यकर्मणा। कृतकालव्यपगमात्कृतोदासोविमुच्यते। भक्तस्योत्क्षेपणात्सद्योभक्तदासःप्रमुच्यते। नियहाद्वडवायास्तुमुच्यतेवडवाभृतइति। एतदुक्तंभवतिदुर्भिक्षेपोषणेनकारितोदासोगोयुगार्पणात्मुच्यते। आहितदासस्तुस्वामिनागृहीतऋणेप्रत्यर्पितेवतिउत्तमर्णदास्याद्विमुच्यते

। ऋणदासस्तु स्वकृतमृणं येभ्योऽनमर्णीययावद्धनं दत्त्वा पाहृतं तावद्धनं सवृद्धिकं दत्त्वा विमुच्यते । तवाहमित्युपगतादय
स्तु ये दासाः स्वनिर्वर्त्यावश्यकीयव्यापारनिवर्तकदासान्तरप्रदानाद्विमुच्यन्ते । कालकृतस्तु दासो दास्यावधित्वेन परिभावितकाल
स्यातिक्रमणाद्विमुच्यते । भक्तदासस्तु भक्तस्योत्क्षेपणाद्दुर्भिक्षितभक्तमूल्यसमर्पणाद्विमुच्यते । गृहदासी लोभेन दासत्वम्प्राप्तस्त
त्सम्भोगत्यागाद्विमुच्यत इति । दासाभासानाम्मोक्षमाह याज्ञवल्क्यः । बलाद्दासीकृतश्चौरैर्विक्रीतश्चापि मुच्यत इति । अपिश
ब्देन दत्ताहितौ गृह्येते । तत्रायमर्थः । बलात्कारेणायो दासीकृतः यश्च चौरैरपहृत्य दासत्वेन विक्रीतश्चाहितो दत्तो वा सयत्स्व
पार्श्वे दासभावे न तिष्ठति तेन प्रागुक्तमोचनहेतुमन्तरेणैव शीघ्रं मोचनीय इत्यर्थः । यदि तेन लोभादिवशाद्दासो न मुक्तस्तदा राज्ञा
मोचयितव्य इत्याह नारदः । चौरापहृतविक्रीता ये च दासीकृता बलात् । राज्ञा मोचयितव्यास्ते दास्यं तेषु हि नेष्यत इति । चौरा
पहृताश्च ते विक्रीताश्चेति विकर्मधारयः । यस्त्वेकस्य दासः स्यात्पूर्वमङ्गीकृत्यापरस्यापि दासत्वमङ्गीकरोति स्वभावपरेणापि विक्रे
नीय इति वचः स एवाह । तवाहमिति चात्मानं योऽस्वतन्त्रः प्रयच्छति । न स तम्प्राप्नुयात्कामं पूर्वस्वामी लभेत तमिति ॥ अस्वतं
त्रः परदासत्वेनास्वतन्त्रः । कामं नूनं स्वामिदास्यं काम्यमानं इतरदासीभवन्तं दासं पूर्वस्वामी गृह्णीयादित्यर्थः । एवं यदेतद्दा
सत्वमधिकृत्योक्तं तत्सर्वं दास्यामपि समानन्यायत्वाद्योजनीयम् । दासीस्वामिनमधिकृत्य विशेषमाह कात्यायनः । स्वां दासीं य
स्तु संगच्छेत्प्रसूता च भवेत्ततः । अवेक्ष्य बीजं कार्या स्याददासी सान्वया तु सेति । स्वकृतगर्भाधानमनुसन्धाय सा दासी सन्तानस
हिता दासत्वविमोकविधिना स्वकृतगर्भादेर्दासत्वपरिहारार्थं अदासीत्वेन कार्या स्यादित्यर्थः । कः पुनर्दासत्वविमोचको विधिरि
त्याकाङ्क्षायामाह नारदः । स्वन्दासमिच्छेद्यः कर्तुमदासं प्रीतमानसः । स्कन्धादादाय तस्यासौ भिन्द्यात्कुम्भं सहाम्भसा । साक्ष
ताभिः सपुष्पाभिर्मूर्ध्न्यद्भिरवाकिरेत् । अदास इति चोक्त्वा त्रिः प्राङ्मुखन्तमथोत्सृजेदिति । अत्रापि दासशब्देन दासस्या अपि
ग्रहणम् । लिङ्गस्योद्देश्यविशेषणत्वेन ग्रहाधिकरणन्यायेनाविवक्षितत्वात् । एवमुत्सर्गे सति यद्भवति तद्दासस्यैव । ततः प्र

भृतिवक्तव्यः स्वाम्यनुग्रहपालितः ॥ भोज्यान्नोऽप्यप्रतिग्राह्यो भवत्यभिमतः सतामिति ॥ स्वाम्यनुग्रहे यदा स्वापाकरणरूपेण वक्त
व्यः सम्भाषणार्हः । अदास्यामपि दासेन परिणीतायां सा दासीत्वमेव भवतीत्याह कात्यायनः । दासेनोढा त्वदासी या साऽपि दासी
त्वमाप्नुयात् । यस्माद्भर्त्ता प्रभुस्तस्याः स्वाम्यधीनः प्रभुर्यत इति ॥ दासधनस्यापि तत्स्वामिधनत्वमित्याह स एव । दासस्तु धर्म्म
यत्स्यात्स्वामी तस्य प्रभुः स्मृत इति । ब्राह्मण्यादिषु दासीकरणे दण्डमाह कात्यायनः । यादृच्छ्या ब्राह्मणीं यस्तु विक्रीणीते नयेत वा
च । राज्ञा तद्दण्डनं कार्य्यं दण्ड्याः स्युः सर्व एव ते ॥ कामानुसंश्रितां यस्तु कुर्य्याद्दासीं कुलस्त्रियम् । संक्रामयन्वाऽन्यत्र दत्त्वा
स्तत्वाच्छनम्भवेत् । या स्वामी सह दासीत्वं दासीमिव भुनक्ति यः । परिचारकपत्नीं वा प्राप्नुयात्पूर्वसाहसमिति । तत्कार्ये प्रवर्त्त
निवर्त्तनीयमित्यर्थः । येन राज्ञा दण्ड्याः स्युरित्यन्वयः । विष्णुरपि । यस्तूत्तमवर्णं दास्ये नियोजयति तस्योत्तमसाहसो दण्ड इ
ति । क्वचिद्दासीविक्रये दण्डमाह कात्यायनः । विक्रोशमानां यो भक्तां दासीं विक्रेतुमिच्छति । अनापदिस्थः शक्तः सन् प्राप्नु
याद्द्विशतं दममिति । द्विशतं पणानामिति शेषः । भक्तामित्यनेन दुष्टाया विक्रये दण्डाभाव इति दर्शितमिति ॥ ● ॥ इति
अभ्युपेत्याशुश्रूषाख्यव्यवहारपदं ॥ अथ वेतनानपाकर्म्माख्यव्यवहारपदम् । तत्र मनुः । अतः ऊर्द्ध्वं प्रवक्ष्यामि वेतनस्याऽन
पक्रियामिति । तत्स्वरूपमाह नारदः । भृतानां वेतनस्योक्तो दानादानविधिक्रमः । वेतनस्यानपाकर्म्म तद्विवादपदं स्मृतमि
ति । वेतनं कर्म्ममूल्यं तस्यानपाकर्म्म भृत्याय समर्पणं समर्पितस्य वा पुनर्ग्रहणम् । तत्र समर्पणविशेषमाह स एव । भृताय वेतन
न्दद्यात्कर्म्मस्वामी यथाक्रमम् । आदौ मध्येऽवसाने तु कर्म्मणो यद्विनिश्चितमिति । तुभ्यमेतावद्दद्यात्स्वामी नियुक्तेनान्यत्परिमा
णेन निश्चितं तत्त्रिधा विभज्य कर्म्मण आदिमध्यान्तेषु त्रिषु कालेष्वन्यतमकाले दद्यादित्यर्थः । एतच्चैतावद्वेतनं दास्यामीति निभा
षायाः सत्त्वे । असत्त्वे त्वाह स एव । भृतावनिश्चितायां तु दशभागमवाप्नुयुः । लाभगोवीर्य्यशस्यानां वणिग्गोपकृषीवलाः इति ।
दशभागं दशमम्भागं क्षीरवीर्य्यं पाल्यमानगवादिभवम्पयोदध्यादि । यदि कर्म्मस्वामी भृत्याय दशमम्भागं न प्रयच्छति तदा

मौराद्धाद्दाप्य इत्याह याज्ञवल्क्यः ॥ दाप्यस्तु दशमम्भागं वाणिज्यपशुशस्यतः । अनिश्चित्य भृतिं यस्तु कारयेत्स महीक्षिता ।
यस्तु स्वामी वेतनपरिच्छेदमकृत्वैव भृत्यं कारयति स तस्माद्वाणिज्यपशुशस्यलक्षणात्कर्मणः सकाशादुत्पन्नधनात्स दशमम्भा-
गम्भृत्याय महीक्षिता राज्ञा दापनीय इत्यर्थः । यत्तु त्रिभागम्पञ्चभागम्वा गृह्णीयात्सीरवाहकः इति बृहस्पतिवचनं । तद्भक्ताया
ससाध्याकृष्टक्षेत्रविषयम् । व्यवस्थितविकल्पश्चायम् । कथमनयोर्व्यवस्थेत्याकांक्षायामाह स एव । भक्ताच्छादभृतः सीराद्भागं
गृह्णीत पञ्चमम् । जातशस्यात्त्रिभागन्तु प्रगृह्णीयाद्यथाभृत इति । अशनाच्छादनाभ्यांभृतः कृषीवलो गवाविकृष्टं क्षेत्रजा-
तशस्यात्पञ्चमम्भागं गृह्णीयात् । ताभ्यामभृतस्तु तृतीयम्भागमित्यर्थः । अथ वायमेतावद्दास्यामीति नास्ति परिभाषा तत्र बृह-
मनूक्तं द्रष्टव्यम् । समुद्रयानकुशला देशकालार्थदर्शिनः । नियच्छेयुर्भृतिं यान्तु सा तस्मात्प्रागकृतायदीति । एतावद्दास्यामीति
परिभाषितेऽपि कश्चिच्छनाद्यूनमपि स्वबुद्धिमात्रपरिकल्पितन्देयं कश्चिन्नतोऽधिकमपि देयमित्याह याज्ञवल्क्यः । देशं कालञ्च योऽ-
तीयात्लाभं कुर्याच्च योऽन्यथा । तत्र स्यात्स्वामिनश्छन्दोऽधिकन्देयं कृतेऽधिके इति । यो भृत्यः स्वाम्यनुज्ञां विना स्वातन्त्र्येण वाणिज्या-
दिकर्मणः फलसाधकत्वापादकं देशं कालं चातिक्रामति लाभं वा बहुतरं व्यसनेन स्वल्पं करोति तस्मै पूर्वपरिभाषितभृतिमध्ये स्वामी
स्वेच्छानुसारेण किञ्चिद्दद्यात् । यस्तु स्वातन्त्र्येण बहुलाभं करोति तस्मै परिभाषितमूल्याधिकं किञ्चिद्देयं स्वामिना पारितोषिक-
मित्यर्थः । अनेकभृत्यसाध्यकर्मणि वेतनार्पणप्रकारमाह स एव । यो यावत्कुरुते कर्म तावत्तस्य तु वेतनम् । उभयोरप्यसाध्यं
चेत्साध्ये कुर्याद्यथाश्रुतमिति । उभयोरपीत्यपि बहूनामुपलक्षणं गृहादौ कृते भवतामेतावद्दास्यामीति परिभाषिते द्विब-
हुभिरारब्धं कर्म यदि व्याध्यादिवशान्न समापितं तदा तेषु यो यावत्कर्म करोति तस्मै तत्कर्मानुसारेण मध्यस्थपरिकल्पितं वेतन-
न्देयं । न तु साम्येन दानं न च परिसमाप्त्यभावाददानं । यदि तैः समापितं तदा यथापरिभाषितन्देयं न तु प्रत्येकं कृतत्वन्तदल्पमा-
पि कर्मानुसारेण परिकल्प्य दातव्यमित्यर्थः । यस्तु वेतनं गृहीत्वा समर्पितकर्म न करोति तं प्रत्याह बृहस्पतिः । गृहीत्वा वेतनं कर्म

न करोति यदा भृतः। समर्थश्चेद्दमं दाप्यो द्विगुणं तच्च वेतनमिति॥ दमं शक्त्यनुसारेण राज्ञे दद्यात्। गृहीतं च वेतनं द्विगुणं स्वामिने दद्यादित्यर्थः। नारदोऽपि। भृतिं गृहीत्वाऽकुर्वाणो द्विगुणां भृतिमावहेदिति। याज्ञवल्क्योऽपि। गृहीतवेतनः कर्म त्यजन् द्विगुणमावहेदिति। अस्मिन्नेव विषये वेतनायहस्तेनाह स एव। अगृहीते समं दाप्य इति यावता वेतनेन भृत्यत्वमङ्गीकृतं तावद्वेतनं स्वामिने देयात्तनु राज्ञे दण्डमित्यर्थः। यद्वाङ्गीकृतां भृतिं दत्वा बलात्कारयितव्य इत्याह नारदः। कर्माकुर्वन् प्रतिश्रुत्य कार्यो दत्वा भृतिं बलादिति। प्रतिश्रुत्येति प्रारम्भस्याप्युपलक्षणार्थम्। अत एव कात्यायनः॥ कर्मारम्भं तु यः कृत्वा सिद्धं नैव तु कारयेत्। बलात्कारयितव्योऽसावकुर्वन् दण्डमर्हतीति॥ कियद्द्रव्यं दण्ड्य इत्यपेक्षायामाह तत्र वृद्धमनुबृहस्पती। प्रतिश्रुत्य न कुर्याद्यः स कार्यः स्याद्बलादपि। स चेन्न कुर्यान्नाकर्म प्राप्नुयाद्द्विशतं दममिति। द्विशतं तत्कार्षापणद्विशतमित्यर्थः। यत्तु मनुवचनं भृतो नार्तो न कुर्याद्यो दर्पात्कर्म यथोदितम्। स दण्ड्यः कृष्णलान्यष्टौ न देयं तस्य वेतनमिति॥ तदल्पद्रव्यसाध्यागारसिद्धिविषयमिति स्मृतिचन्द्रिकायाम्। अल्पन्यूनकर्मकरणविषयमिति मदनरत्ने। किंचिन्न्यूनकर्मकरणे त्वाह स एव। यथोक्तमार्तः सुस्थो वा यस्तत्कर्म न कारयेत्। न तस्य वेतनं देयमल्पोनस्यापि कर्मण इति॥ सुस्थो वा कर्म कारयेदिति वदता सुस्थेऽपि स्वयं कर्तृत्वनियमो नास्तीति दर्शयति। आर्तो यदि व्याध्युपशमानन्तरं स्वाङ्गीकृतं कर्म करोति तदा तेन दीर्घकालतया कालक्षेपेऽपि भृत्यदोषाभावाद्वेतनमसौ निर्विवादं लभत इत्याह स एव। आर्तस्तु कुर्यात्सुस्थः सन्यथाभाषितमादितः। सुदीर्घस्यापि कालस्य तल्लभेतैव वेतनमिति। आदितः आदौ यथाभाषितं यथाप्रतिज्ञातं तथा कुर्यादित्यर्थः। सुदीर्घस्यापि कालस्यात्ययेऽपीति शेषः। यस्तु कालविशेषावधिकं कर्म प्रतिज्ञाय तत्कालापूर्तावेव कर्म त्यजति तमप्याह नारदः। कालेऽपूर्णे त्यजन् कर्म भृतेर्नाशमवाप्नुयादिति। अत ऊर्ध्वं दण्डमप्याह विष्णुः। भृतकश्चापूर्णे काले त्यजन् सकलमेव मूल्यं जह्यात् राज्ञे च पणशतं दद्यादिति। मूल्यं वेतनम्। स्वामिदोषात्त्यागे तु यावति काले कर्म कृतं तत्कालानुसारेण कल्पितं वेतनं लभत इत्याह नारदः। स्वामिदो

याद्यप्यकामन्याचकृतमवाप्नुयादिति॥ स्वामिदोषेविनापराधंनिष्ठुरभाषणादिः। अत्रदण्डमप्याहविष्णुः। स्वामीचेद्भृतकमपूर्णेकालेजह्यात्तस्यसर्वमेवमूल्यन्दद्यात्पणशतंचराजन्यत्रभृतकदोषादिति। स्वामिद्रव्यस्यभृत्यदोषेणनाशेयत्कर्मैवन्तदाहसएव। तद्दोषेणयद्विनश्येत्तत्स्वामिनेदेयमन्यत्रदैवोपघातादिति। दैवोपघातोराजकृतस्याप्युपलक्षणम्। स्वामिनेदेयंमूल्यद्वारेणेतिशेषः। अत्रदासविशेषाद्विशेषमाहबृहन्मनुः। प्रमादान्नाशितन्दाप्यःसमंद्विर्द्रोहनाशितमिति। प्रमादान्नाशितमनवधाननाशितंसममेवदद्यात्। द्रोहनाशितन्तीव्रप्रहारादिनाद्रोहेणनाशितंद्विर्दाप्योद्विगुणन्दाप्यइत्यर्थः। भृत्यदोषाभावेयदन्यतएवनष्टन्तन्नदेयमित्याहसएव। नतुदाप्योहृतञ्चौरैर्दग्धमूढञ्जलेनवेति। ऊढंनीतं। यस्तुवाहकोवाह्यन्द्रव्यम्प्रज्ञाहीनत्वादिनास्वदोषेणनाशयतितम्प्रत्याहनारदः। भाण्डंव्यसनमागच्छेद्यदिवाहकदोषतः। दाप्योयत्तत्रनश्येत्तुदैवराजकृताद्दृतइति। भाण्डंवहनीयंद्रव्यंमुक्तादि। व्यसनन्नाशम्। अत्रभाण्डवाहकयोर्ग्रहणकर्मणावजीवद्रेकृषीवलयोरुपलक्षणमितिमदनरत्ने। अत्रापिप्रमादान्नाशितंदाप्यःसमंद्विर्द्रोहनाशितमितिवृद्धमनूक्तोविशेषोऽवगन्तव्यः। यस्तुवाहकःस्वदोषेणप्रस्थानविघ्नङ्करोतीतिसद्विगुणांभृतिन्दाप्यइत्याहकात्यायनः। विघ्नंयोवाहकोदाप्यःप्रस्थानेद्विगुणाम्भृतिमिति। विघ्नंकरोतीतिशेषः। वाहकग्रहणंप्रदर्शनार्थंनतुविवक्षितन्तेनायुधीयादिविघ्नकारिणोप्येतदितिमन्तव्यम्। अतएवनारदः। द्विगुणांतुभृतिन्दाप्यःप्रस्थानेविघ्नमाचरन्नितिसामान्येनोक्तवान्। याज्ञवल्क्योपि। प्रस्थानविघ्नकृच्चैवप्रदाप्योद्विगुणांभृतिमिति। एतच्चभृत्यन्तरसम्पादनकालासम्भवविषयम्। अंगीकृतकर्माकरणस्यापियदासहायान्तरलाभेनप्रस्थानविघ्नानापादकत्वन्तदाआहसएव। प्रक्रान्तेसप्तमम्भागञ्चतुर्थम्पथिसन्त्यजन्। भृतिमर्द्धपथेसर्वाम्प्रदाप्यस्त्याजकोपिचेति। प्रक्रान्तेकर्मणिस्वांगीकृतङ्कर्मत्यजन्भृत्योभृतेःसप्तमम्भागन्दाप्यः। गमनेप्रारब्धेपथिचत्यजन्भृतेश्चतुर्थंभागम्। अर्द्धपथेत्यजन्सर्वांभृतिमित्यर्थः। त्याजकोपिचेत्यस्यायमर्थःगमनारम्भानन्तरंस्वामीयदित्याजयतितदापूर्वो

क्रमेणाभृत्याय सप्तमभागादिकं दापनीय इति । एतच्चाव्याधितादिविषयम् । व्याधितस्यापराधाभावात् । यत्र स्वामिनाध्वम
ने चतुर्थभागदापनमुक्तं तद् विक्रीतभाण्डस्वामिविषयम् । विक्रीतभाण्डस्वामिनायकर्मचनदाह वृद्धमनुः । पथि विक्री
यतद्भाण्डं वणिक्भृत्यं यज्जेद्यदि । अथ तस्यापि देयं स्याद्भृतेरर्द्धं लभेत स इति । पथि भाण्डस्य चौरादिभिः । प्रतिरोधे राजादिभि
रपहृते स्वामिनः कर्त्तव्यमाह कात्यायनः । यदा च पथि तद्भाण्डं माहात्म्येन ह्रियेत वा । यावानध्वा गतस्तेन प्राप्नुयात्तावतीं भृतिम्
। भारवाहकस्त्रीहृते नयानादिना भाण्डनेतारं प्रत्याह नारदः । अनयन् भाटयित्वा तु भाण्डवान् यानवाहनं । दाप्यो भृतिं चतुर्भागं
सर्वामर्द्धपथे त्यजन्निति । यानं शकटादि वाहनं अश्वादि इत्यर्थः । यो यानादिना भाण्डनयनं कर्त्तुम्परकीयं यानादिकं भाटयि
त्वा प्रापणादिकार्यौपाधिकं परित्यज्य अन्यत्रैव नयति स यानस्वामिने परिकल्पितस्य भाटकस्य चतुर्थांशं दाप्यः । यस्तु तद्गमा
र्द्धमार्गे त्यजति स सर्वां भृतिं दाप्य इति । यस्तु शकटादिकं भाटयित्वा तमेवोपकारमूल्यमादाय देशान्तरं गच्छति भाटकं च
न प्रयच्छति तं प्रत्याह वृद्धमनुः । यो भाटयित्वा शकटं नीत्वा चान्यत्र गच्छति । भाटं न दद्यात् दाप्यः स्यादनूढस्यापि भाटकमिति
। अनूढस्यापि अकृतोपकारस्यापीत्यर्थः । यस्तु कृते कार्ये समनन्तरं वाहनादेः समर्पणं न करोति तस्य समर्पणपर्यन्तं भाटकदा
नमाह कात्यायनः । हस्त्यश्वगोखरोष्ट्रादीन् गृहीत्वा भाटकेन यः । नार्पयेत् कृतकार्यः सन् स तं दाप्यः सभाटकम् । गृहवार्याप
णादीन् गृहीत्वा भाटकेन यः । स्वामिने नार्पयेद्यावत्तावद्दाप्यः सभाटकमिति । वारि शब्देन तदाधारभूतं पात्रं लक्ष्यते । ना
र्पयेत् कृतकार्यः सन्नित्यनुषङ्गः । परभूमौ गृहं निर्माय भाटकदातारं प्रत्याह नारदः । परभूमौ गृहं कृत्वा स्तोमं दत्त्वा वसेत्तु यः
स तद्गृहीत्वा निर्गच्छेत् तृणकाष्ठेष्टकादिकमिति । स्तोमं भाटकं स्तोमाप्रदाने त्वाह स एव । स्तोमाद्विना वसित्वा तु परभूमाव
निश्चितः । निर्गच्छंस्तृणकाष्ठानि न गृह्णीयात् कथञ्चन ॥ यान्येव तृणकाष्ठानि निश्चितकानि निवेशिताः । विनिर्गच्छंस्तु तत्सर्वं भू
मिस्वामिनि वेदयेदिति । स्वामिने निवेदयेदित्यर्थः । अनिश्चित इति वदता तृणकाष्ठादि ग्रहणाग्रहणपरिमाणविहीन विष

थमेतद्विनिदर्शितम्। परिभावयितुं विषयेतु यथापरिभावितङ्कर्तव्यम्। भाटकेगृहीतानां जलपात्रादीनां भंगेनाशेचविशेष मा
ह सएव। सोमवाहीनिभाण्डानिपूर्णकालान्युपानयेत्। गृहीनुशभवेद्भग्नंनष्टञ्चान्यत्रसंप्लवादिति। सोमवाहीनिभाटक
गृहीतानिपूर्णं परिभावितभाटकालानितत्स्वामिनम्प्रापयेदितिपूर्वार्द्धार्थः। भग्नमेकदेशेनविकृतम्। नष्टम्। कात्स्न्येन
विकृतम्। संप्लवः परस्परसंघर्षःतद्भिन्नप्रकारेण यद्भग्नंनष्टञ्चतद्भाटकगृहीतुर्भवति। संप्लवेनतुयद्भग्नंनष्टञ्चतद्भाटक
दाचापूर्ववत्कृत्वामूल्यद्वारेणचादेयमित्यर्थः। व्याधितस्यभृत्यस्यस्वामिनापथ्यागेदण्डमाह कात्यायनः। त्यजेत्पथिसहा
यंयःश्रान्तंरोगार्तमेववा। प्राप्नुयात्साहसंपूर्वंग्रामेच्यहमपालयन्निति। स्वाम्यनुज्ञातेनभृत्येनापराधेकृतेसोऽपराधःस्वामिन
एवेत्याहबृहस्पतिः। प्रभुणाविनियुक्तःसन्भृतकोविदधातियः। तदर्थमशुभङ्कर्मस्वामीतत्रापराध्नुयादिति। स्वामीकृतक
र्म्मणोभृतकायदिनवेतनन्ददातितदाऽसौराज्ञादापनीयः। इत्याह सएव। [illegible] पनइति। वेश्यातदुपभोक्तृविषयेनारदआह। शुल्कंगृहीत्वापण्यस्त्रीनेच्छन्तीद्विगुणांव
[illegible] [illegible]। [illegible] शुल्कदातापिशुल्कहानिमवाप्नुयादिति। एतदव्याधितादिविषयम्। व्याधितादिविषयेत्वाहबृहस्पतिः
[illegible] राजकार्यपरायणा। आमन्त्रिताचनागच्छेदवाच्यावडवास्मृतेति। आमन्त्रिताआहूता। वडवादा
। व्याधितास्रमाव्ययाराजकार्यपरायणा [illegible] प्रदर्शनार्थम्। उपभोक्तारम्प्रत्याहनारदः। अप्रयच्छन्तथाशुल्कमनुभूयपुमान्स्त्रियम्। अक्र
सीतद्विगुणमत्रपण्यस्त्रीप्रदर्शनार्थम्। अयोनौयःसमाक्रामेद्बहुभिर्वापिवासयेत्। शुल्कंसोऽष्टगुणन्दाप्योविनयन्तावदे
मेणानुसङ्गच्छेद्बातदन्तनखादिभिः। वेश्यायास्त्वपराधेदण्डादिकंमत्स्यपुराणेदर्शितम्। गृहीत्वावेतनंवेश्यालोभादन्यत्रगच्छति। तावदेवन्दाप
यन्तीति। वेश्यायास्त्वपिभाटकमिति। इतरस्यदत्तशुल्कस्य। तत्रैवविशेषान्तरमुक्तम्। अन्यमुद्दिश्यवेश्यायांयोनयेदन्य
येद्द्याद्दितरस्यापिभाटकमिति। नतस्यदण्डोभवेद्राज्ञःसुवर्णस्यपमाषकम्। नीत्वाभोगमयोदद्याद्दाप्योद्विगुणवेतनम्। राजसद्विगुणन्द
स्यकारयात्। नतस्यदण्डोभवेद्राज्ञःसुवर्णस्यपमाषकम्। नीत्वाभोगमयोदद्याद्दाप्योद्विगुणवेतनम्। राजद्विगुणन्द

षण्डन्तथाधर्म्मोनहीयते ॥ बहूनांव्रजतामेकांसर्वेतद्धिगुणान्धनम् । तस्यैदद्युःपृथक्षण्डास्तेदशाङ्चद्विगुणाम्परमिति । अत्र निर्णीहृनाहनारदः । वेश्याप्रधानायास्तत्रकामुकास्तद्गृहोषिताः । तत्समुत्थेषुकार्येषुनिर्णयंसंशयेविदुरिति । इतिवेतना दानाख्यव्यवहारपदम् ॥●॥ अथसम्विद्व्यतिक्रमाख्यव्यवहारपदम् । तस्यस्वरूपंव्यतिरेकमुखेनदर्शयतिनारदः । पाख ण्डनैगमादीनांस्थितिःसमयउच्यते । समयस्यानपाकर्मतद्विवादपदंस्मृतमिति ॥ पाखण्डाःवैदिकमार्गद्वेषिणःक्षपणका दयः । नैगमाःसार्थिकाःवणिजइतिमदनरत्ने । नैगमाःवेदप्रामाण्याभ्युपगन्तारःपाशुपतादयइतिमिताक्षरायाम् । आदि शब्देनविद्वाह्मणसमूहादीनांग्रहणम् । समयस्यानपाकर्मअव्यतिक्रमः । समयपरिपालनमितियावत्तद्व्यतिक्रम्यमाणं विवादपदम्भवतीत्यर्थः । तद्रुपयोग्यार्थमाहवृहस्पतिः । वेदविद्याविदोविप्रान्श्रोत्रियानग्निहोत्रिणः । आहृत्यस्थापयेत्त त्रतेषांवृत्तिम्प्रकल्पयेदिति । याज्ञवल्क्योपि । राजाकृत्वापुरेस्थानंब्राह्मणंन्यस्यतत्रतु । त्रैविद्यंवृत्तिमद्ब्रूयात्स्वधर्मःपाल्यता मिति । ब्राह्मणानांसमूहोब्राह्मण्यम् । ब्राह्मणमाणववाडवाद्यदितिसूत्रेणयत् । विद्यावेदाःतिसृणांविद्यानांसमाहारस्त्रि विद्यम् । त्रिविद्यमधीतेइतित्रैविद्यम् । तदधीतेतद्वेदेतिअण्प्रत्ययः ॥ ननुद्विगोर्लुगनपत्येइतिसूत्रेणाणोलुक्कस्मान्नभ वतिद्विगुनिमित्तत्वाभावादितिगृहाण । तेषांवृत्तिम्प्रकल्पयेदित्यस्याऽर्थौवृहस्पतिनैवविवृतः । अनाच्छेद्यकरास्तेभ्यःप्र दद्याद्गृहभूमयः । मुक्तभाव्यश्चनृपतिर्लेखयित्वास्वशासनमिति । अनाच्छेद्यकराः । अग्राह्यकराः । एतदुक्तम्भवति । आगामिनृपतिभिरग्राह्यकराःतेभ्यविसृष्टकराश्चगृहभूमयःप्रदद्यादिति । एवंनियुक्तैर्यत्कर्तव्यन्तदाहयाज्ञवल्क्यः । निजधर्माविरोधेनयस्तुसामयिकोभवेत् । सोपियत्नेनसंरक्ष्योधर्मोराजकृतश्चयइति । निजधर्माविरोधेनश्रौतस्मार्तकर्माविरोधेनासामयिकःसमयान्निष्पन्नोयोधर्मोगोप्रचारोदकरक्षणदेवगृहपालनादिरूपःसोपियत्नेनपालनीयः । यश्चराज्ञाकृतो निजधर्माविरोधेनैवयःसामयिकोधर्मोयावत्पथिकम्भोजनन्देयमस्मदरातिमण्डलेतुरगादयोनप्रस्थापनीयाइत्येवंरूपःसोपि

चान्तेनरक्षणीयइत्यर्थः । बृहस्पतिरपि । नित्यं नैमित्तिकं काम्यं शान्तिकं पौष्टिकन्तथा । पौराणां कर्म कुर्य्युस्ते सन्दिग्धे निर्णयं तथेति ॥ पौराणां पुरवासिनामित्यर्थः । एवं ग्रामनियुक्तसमुदायविशेषस्य कार्यविशेषमुक्तः । सर्वसमुदायानाञ्च कार्यमाह स एव । ग्रामश्रेणिगणानाञ्च संकेतः समयक्रिया । बाधाकाले तु सा कार्य्या धर्मकार्ये तथैव च । चाटचौरभये बाधाः सर्वसाधारणाः स्मृताः । तत्रोपशमनं सङ्घैः कार्यं नैकेन केनचिदिति । गणानाञ्चेत्यत्र चशब्दः पाषण्डनैगमादीनां समुच्चयार्थः । ततश्च गणपाषण्डनैगमादीनां समयकरणमनन्तरेण यद्यपि बाधा दुःपरिहरः धर्मकार्यं च दुःसाधनन्तदा पारिभाषिकी समयक्रिया सर्वैर्मिलितैः कार्या । चाटो वृकः । चाटचौरादिभ्यो भये प्राप्ते तदुपशमनं सर्वैः कार्यमित्यर्थः । धर्मकार्यमपि सम्भूय कार्यमित्युक्तं तेनैव । सभाप्रपादेवगृहतटाकारामसंस्कृतिः । तथानाथदरिद्राणां संस्कारो यजनक्रिया ॥ कुलायननिरोधश्च कार्यमस्माभिरंशतः । यत्रैतल्लिखितम्पत्रे धर्म्या सा समयक्रिया । पालनीया समस्तैस्तैः समर्थो विसंवदेत् । सर्वस्वहरणं दण्डस्तस्य निर्वासनम्पुरदिति । सभा मण्डपः । प्रपा पानीयशालिका । आरामः उपवनं । संस्कृतिः जीर्णोद्धारः । संस्कारः उपनयनादिकः प्रेतदहनादिकश्च । यजनक्रिया सोमयागादिकर्तृभ्यो दानम् । कुलायननिरोधः । कुलायनदुर्भिक्षाद्युपगमपर्यन्तन्तद्धारणम् । कुल्यायननिरोधश्चेति कल्पतरौ पाठः । कुल्यायननिरोधः कुल्यायाः प्रवर्त्तनप्रतिबन्धः । एवं कृता समयक्रिया न केवलं समुदायिभिरेव पालनीया अपि तु राज्ञापीत्याह नारदः । पाषण्डनैगमश्रेणिपूगव्रातगणादिषु । संरक्षेत्समयं राजा दुर्गे जनपदे तथेति । पाषंडा वेदोक्तलिङ्गधारणव्यतिरिक्ताः सर्वे लिङ्गिनः । तेषु विहितभिक्षाचरणाद्याः सन्ति । नैगमाः सार्थिकावणिक्प्रभृतयः । तेषु सकुञ्चकसन्देशहरपुरुषनिरस्कारिणो दण्ड्या इत्येवमादयो बहवः समया विद्यन्ते । अथवा नैगमाः आप्तप्रणेतृत्वेन येवेदं प्रामाण्यमिच्छन्ति पाशुपतादयः । श्रेणयः एकशिल्पोपजीविनः । नास्तिदमनयैव श्रेण्या विक्रेयमित्येवमादिकाः समया वरीवर्त्तन्ते । पूगा हस्त्यश्वारोहादयः । व्रातगणशब्दयोरर्थमाह कात्यायनः । नानायुधधरा व्राताः समवेतास्तु कीर्त्तिताः । कुला

नांहि समूहस्तु गणः सम्परिकीर्त्तित इति । पूगे व्राते वा स्वमुत्सृज्य समरे न गन्तव्यमित्येवमादयः समया नवर्त्तन्ते । गणे तु पञ्च
मे दिने पञ्चमे वर्षे वा कर्णवेधः कर्त्तव्य इत्येवमादिः समयाः समस्ति । गणादिषु त्रादिग्रहणेन ब्रह्मपुरीनिविष्टस्य महाजनादेः प
रिग्रहः । तत्र गुरुर्दक्षिणार्थमागतो मानतीय इत्यादि समयोस्ति । दुर्गे तु धान्यादिकं गृहीत्वा अन्यत्र न नतद्विक्रेयमित्या
दिरस्ति समयः । जनपदे तु कश्चिद्विक्रेतृसकाशात्कुल्कयहणमित्याद्यनेकविधः समयो वरीवर्त्तते । तदेतत्समयजातं यथा
न भ्रश्यति तथा राजा कुर्य्यादित्यर्थः । समूहादि पुरुषविषये विशेषमाह वृहस्पतिः । कोशेन लेख्यक्रियया मध्यस्थैर्वा परस्पर
म् । विश्वासं कृत्वाय: कुर्य्युः कार्याणि समनन्तरमिति । कोशेन देवतास्नानोदकपानेन । लेख्यक्रियया समयपत्रेण । मध्यस्थैः
प्रतिभूभिः कार्याणि समूहकार्याणि । एतदुक्तं भवति । समुदायिभिः परस्परं समयातिक्रमाभावाय कोशादिभिर्विश्वासमुत्पा
द्य सामयिककार्याणि कर्त्तव्यानीति । कात्यायनोपि । समूहानां तु यो धर्म्मस्तेन धर्मेण ते सदा । प्रकुर्युः सर्वकर्माणि स्वधर्मेषु
व्यवस्थिता इति । सामयिकधर्मे निजधर्म्मानतिक्रमेण समूहकार्याणि समुदायिनः कुर्युरित्यर्थः । याज्ञवल्क्योपि । निजधर्म्मा
विरोधेन यस्तु सामयिको भवेत् । सोपि यत्नेन संरक्ष्यो धर्म्मो राजकृतश्च य इति । निजधर्म्माविरोधेनेत्यनेन निजधर्म्माविरोधी सा
मयिको धर्मो यथा संध्यावन्दनवेलायां सर्वैरेव स्वव्यापारपरिहारेण राजभवनमभ्यागन्तव्यं योनायास्यति तस्य प्रथमसाहसोदण्ड
इति नासौ रक्ष्य इत्यर्थादुक्तम् । कात्यायनोपि । अविरोधेन धर्म्मस्य निर्जितं राजशासनम् । तस्यैवाचरणं पूर्वं कर्त्तव्यं तु नृपाज्ञ
येति । धर्म्मस्य श्रौतस्मार्त्तादिधर्मस्य निर्जितं कृतमित्यर्थः । राज्ञा प्रवर्त्तितान्धर्म्मान्यो नानुपालयति तस्य दण्डमाह स एव ।
राज्ञा प्रवर्त्तितान्धर्म्मान्यो नरो नानुपालयेत् । गर्ह्यः स पापो दण्ड्यश्च लोपयन्राजशासनमिति । विचित्रबुद्धिभिः समुदायिभिर
नेकैरेकमत्येन कार्यकरणासम्भवान्हितवाः पञ्च वा कार्यचिन्तकाः कर्त्तव्या इत्याह वृहस्पतिः । द्वौ त्रयः पञ्च वा कार्याः समूहहित
वादिनः । कर्त्तव्यं वचनं तेषां ग्रामश्रेणिगणादिभिरिति । कार्यचिन्तकेषु हेयोपादेयान्दर्शयति स एव । विद्वेषिणो व्यसनि

नः प्राचीनाः सभीरवः । लुब्धातिवृद्धबालाश्चनकार्याःकार्यचिन्तकाः । शुचयोवेदधर्मज्ञाः दक्षादान्ताःकुलोद्भवाः । सर्वकार्य्यप्रवीणाश्च कर्त्तव्यास्तु महत्तमा इति । प्राचीनाः । अधृष्टाः । कार्यचिन्तकाः । समुदायकार्यसाधकविचारकाः । कार्य्यचिन्तकानामपिसमूहहितवादिनां वचनं सर्वैः समूहिभिः कार्य्यमित्याह याज्ञवल्क्यः । कर्त्तव्यं वचनं सर्वैः समूहहितवादिनामिति । समूहनप्रतिकूलस्य प्रथमसाहसन्दण्डइत्याह सएव । यस्तत्र विपरीतः स्यात्सदाप्यः प्रथमन्दममिति । प्रथमम्पूर्वसाहसम् । कात्यायनोपि । युक्तियुक्तंवचोहन्याद्वक्तुर्यो नवकाशतः । अयुक्तञ्चैवयोब्रूयात्सदाप्यःपूर्वसाहसमिति । वृहस्पतिरपि । यस्तु साधारणंहिंस्यात्क्षिपेत्त्रैविद्यमेव वा । संविक्रियांविहन्याच्चसनिर्वास्यस्ततःपुरादिति । साधारणम् । समुदायधनाद्यन्दण्डादिद्रव्यम् । हिंस्यात् । दद्यादेःसाहाय्यकरणान्नाशयेत् । क्षिपेत्तिरस्कुर्यादित्यर्थः । समूहिनामप्यधर्म्मे याद्वेषादिनाकार्यकरणे दण्डमाह सएव । बाधांकुर्युर्यदैकस्य संभूताद्वेषसंयुताः । राज्ञातुविनिवार्य्यास्तेशास्याश्चैवानुबन्धतइति । अनुबन्धतोनियमतः तारतम्यानुसारेणमुख्यानामपराधविशेषे दण्डविशेषमाह याज्ञवल्क्यः । गणद्रव्यंहरेद्यस्तु संविदंलंघयेच्चयः । सर्वस्वहरणंकृत्वातंराष्ट्राद्विप्रवासयेदिति । मुख्यदण्डनेसमूहस्यैवाधिकारः । अतएवकात्यायनः । साहसीभेदकारीचगणद्रव्यविनाशकः । उच्छेद्याःसर्वएवैते विख्याप्यैवं नृपेभृगुरिति । नृपेविख्याप्यगणेनोच्छेद्या इत्यर्थः । समूहानन्तेनस्यदण्डोराज्ञाविधेयः । अतएवमनुः । योग्रामदेशसंघानांकृत्वासत्येनसंविदम् । विसंवदेन्नरोलोभात्तंराष्ट्राद्विप्रवासयेत् । निगृह्यदापयेच्चैनंसमयव्यभिचारिणम् । चतुःसुवर्णान्षण्णिष्कांश्छतमानञ्चराजतम् । एवन्दण्डविधिंकुर्याद्धार्मिकःपृथिवीपतिः । ग्रामजातिसमूहेषुसमयव्यभिचारिणामिति । एतेषांप्रवासनचतुःसुवर्णषण्णिष्कशतमानरूपाणांत्रयाणांदण्डानांजातिविद्यागुणाद्यपेक्षयाव्यवस्थाकल्पनीया । यत्तुकश्चिदेतेषांत्रयाणान्दण्डानांक्रमेण ब्राह्मणादिचतुर्वर्णविषयत्वमित्याह तदज्ञानविजृम्भितम् । एषान्तुमव्यवस्थायाम्प्रमाणाभावात् । ब्राह्मणस्यप्रवासनं च

त्रियादीनाञ्चतुःसुवर्णादिदण्डइत्यस्यानुचितत्वाच्च । मर्म्मोद्घाटकादीनांपुरान्निर्वासनमेवदण्डइत्याहबृहस्पतिः । अरुन्तु
दःसूचकश्चभेदकृत्साहसीतथा । श्रेणिपूगनृपद्विष्टःक्षिप्रंनिर्वास्यतेततइति ॥ अरुन्तुदःमर्म्मोद्घाटकः । सूचकःपिशुनः
। पिशुनौखलसूचकावित्यभिधानात् । भेदकृत्समुदायिषुभेदमुत्पादयन् । समूहस्थानान्निर्वास्यतेसमूहेनेतिशेषः । नचसमूह
स्यदण्डकरणेऽनधिकारात्समूहेनेतिशेषकरणमयुक्तमितिवक्तव्यम् । पूर्वोक्तकात्यायनवचनेनसमूहस्यैवमुख्यदण्डनेऽधिका
रस्यप्रतिपादितत्वात् । पूगश्रेणिगणाध्यक्षाःपुरदुर्गनिवासिनः । वाग्धिग्दण्डपरित्यागम्प्रकुर्युःपापकारिणाम् । तैःकृतंय
त्स्वधर्म्मेणनिग्रहानुग्रहंनृणाम् । तद्राज्ञाप्यनुमन्तव्यंनिसृष्टार्थाहितेस्मृताइतिबृहस्पतिनाप्यभिधानाच्च । वाग्दण्डःपा
पिष्ठोसीत्यादिभाषणम् । धिग्दण्डोधिक्त्वाभिभाषणम् । परित्यागोऽसद्व्यवहार्य्यत्वकरणंनिर्वासनंवा । उभयत्रापिलोकेपरि
त्यागशब्दप्रयोगदर्शनात् । एतच्चार्थदण्डादेरुपलक्षणार्थम् । निग्रहानुग्रहमित्येतेपुनःसाम्येनाभिधानात्निसृष्टार्था
अनुज्ञातकार्य्याः । नारदोपि । पृथग्गणांस्तुयेभिंद्युस्तेविनेयाविशेषतः । आवहेयुर्भयंघोरंव्याधिवत्तेह्युपेक्षिताइति । ग
णान्श्रेण्यादिरूपान्समुदायान् । बृहस्पतिरपि । तत्रभेदमुपेक्षांवायःकश्चित्कुरुतेनरः । चतुःसुवर्णाषण्णिष्कांस्तस्य
दण्डोविधीयतइति । सुवर्णचतुष्टयषण्णिष्कयोःशक्त्यादितारतम्यानुसारेणगुणवदगुणवद्विषयत्वेनवाव्यवस्थामन्त
व्या । पाषण्डादिसर्वसमूहेषुराज्ञायथावर्त्तितव्यन्तदाहनारदः । योधर्मःकर्मयच्चैषामुपस्थानविधिश्चयः । यच्चैषाम्वृत्त्युपा
दानमनुमन्येततत्तथेति । धर्मस्त्र्यहवदनादिः । कर्मप्रातःपर्युषितभिक्षाटनादिः । उपस्थानविधिःसमूहकार्यार्थंमृदङ्गादि
ध्वनिमाकर्ण्यमण्डपादौमेलनम् । वृत्त्युपादानञ्जीवनायतापसवेषपरिग्रहः । एषाम्पाषण्डिनामित्यर्थः । अन्यदपिराज
कृत्यमाहसएव । प्रतिकूलञ्चयद्राज्ञःप्रकृत्यावमतञ्चयत् । बाधकञ्चयदर्थानान्तत्तेभ्योविनिवर्त्तयेदिति । यद्राज्ञःप्रतिकू
लम् । यथायस्यराज्ञस्तुकुरुतेक्षुद्रोधर्मविवेचनम् । तस्यप्रक्षुभ्यतेराष्ट्रम्बलंकोशञ्चनश्यतीति । एवञ्चसार्थिकादिसमूह

कर्तृकयोर्विवादे धर्म्मविवेचनं च यद्राज्ञः इत्यस्योदाहरणमन्तव्यम्। प्रकृत्यास्वभावतएव। मतंत्ववज्ञातार्थम्पाषण्डादि
षुतान्मूलभक्षणादिकम्। यच्चार्थानांबाधकन्धननाशकरादिकंरसवादादिकन्तत्तेभ्योपिनिवर्त्तयेत्। यथातेनकुर्वन्तित
थाकुर्यादित्यर्थः। अन्यदपिनिवर्त्यमाहसएव। दोषवत्करणंयत्स्यादनाम्नायप्रकल्पितम्। प्रवृत्तमपितद्राजाश्रेयस्कामो
निवर्त्तयेत्। लोभादिदोषवत्करणंश्रुतिस्मृतिविरुद्धम्विधवादौवेश्यात्वादिकंपाषण्डादिभिःप्रकल्पितम्। तद्वहुकालप्र
वृत्तमपिराज्ञानिवर्त्तनीयमित्यर्थः। त्रैविद्यानाम्प्रतिपादितन्धर्म्मंश्रेण्यादिष्वतिदिशतियाज्ञवल्क्यः। श्रेणिनैगमपाषण्डि
गणानामप्ययंविधिः। भेदञ्चैषान्नृपोरक्षेत्पूर्ववृत्तिंचपालयेदिति। समूहकार्यार्थमागतायद्राज्ञासमूहपूजार्थंदत्तन्त
स्यादिसमूहायासौनददातितदाएतद्दत्तंएकादशगुणन्दाप्यइत्याहसएव। समूहकार्यंआयातान्कृतकार्यान्विसर्जयेत्।
सदानमानसत्कारैःपूजयित्वामहीपतिः। समूहकार्य्यप्रहितोयल्लभेततदर्प्ययेत्। एकादशगुणन्दाप्योयद्यसौनार्प्पयेत्स्व
यमिति। यल्लभेतसमूहंसम्माननार्थमितिशेषः। यतोराजदत्तंसर्वसाधारणमतोयथांशतोविभागंकृत्वाग्राह्यंनिःस्वादिभ्यो
वादातव्यमित्याहवृहस्पतिः। ततोलभ्येतयत्किञ्चित्सर्वेषामेवतत्समम्। षाण्मासिकंमासिकंवाविभक्तव्यंयथांशतः॥ देयंवा
निःस्ववृद्धान्धस्त्रीबालातुररोगिषु। सान्तानिकादिषुतथाधर्म्मएषसनातनइति। एकस्यपुरुषस्यषण्मासनिर्वाहायपर्य्या
प्तंकुटुम्बस्यवैकस्यषण्मासनिर्वाहायपर्य्याप्तंलब्धंवायथांशतःस्वस्वांशानुरूपेणविभजनीयन्निःस्वादिभ्योवादेयमितितात्पर्या
र्थः। राजप्रसादलब्धवदृणमपिसर्वेषांसममित्याहसएव। यत्तैःप्राप्तंरक्षितम्वागणार्थेवाऽऽदृणंकृतं। राजप्रसादलब्धञ्चसर्वेषा
मेवतत्सममिति। अयमर्थः। तैःसमूहकार्य्यार्थम्प्रहितैर्यत्सीमाविवादाविधिकंक्षेत्रारामादिकन्धर्म्माधिकरणेन्यायतःप्राप्तं। य
च्चपरैरपह्रियमाणंरक्षितंयच्चसमूहप्रयोजनार्थमुपात्तमृणं। यच्चराजप्रसादलब्धंतत्सर्वंसर्वेषांसमुदायिनांसममिति। ग
णकृतमृणंसर्वेषांसममित्यस्यक्वचिदपवादमाहकात्यायनः। गणमुद्दिश्ययत्किञ्चित्कृत्वर्णंभक्षितम्भवेत्। आत्मार्थेविनियु

कं वा देयन्तैरेव तद्भवेदिति । तैः मुख्यैः ये तु समुदायानुग्रहान्तर्भावं प्राप्ताः ये च समुदायक्षोभादिना ततो बहिर्भूतास्तान्प्रत्या
ह स एव । गणानां श्रेणिवर्गाणां गताः स्युर्येऽपि मध्यताम् । प्राक्तनस्य धनर्णस्य समांशाः सर्व एवेति । तथैव भोज्यं विभज्यं दानध
र्मक्रियासु च । समूहस्थोंऽशभागी स्यात्प्रागतस्त्वंशभाङ्न्विति । इति सम्विद्व्यतिक्रमाख्यव्यवहारपदम् ॥ ० ॥ अथ क्रीतानुश
याख्यव्यवहारपदम् ॥ तत्स्वरूपमाह नारदः । क्रीत्वा मूल्येन यः पण्यं क्रेता न बहु मन्यते । क्रीतानुशय इत्येतद्विवादपदमु
च्यत इति । न बहु मन्यते । सम्यगसम्यगिति पूर्वमविचार्य न गृहीतमित्यर्थः । क्रीतम्परीक्षणीयमित्याह बृहस्पतिः । परीक्षेत
स्वयं क्रीतमन्येषाञ्च प्रदर्शयेत् । परीक्षितं बहुमतं गृहीता न पुनस्त्यजेदिति ॥ अन्येषाम्पण्यगुणदोषविदामिति शेषः । नारदो
पि । क्रेता पण्यम्परीक्षेत प्राक्स्वयं गुणदोषतः । परीक्ष्याभिमतं क्रीतं विक्रेतुर्न भवेत्पुनरिति । चर्मादीनां परीक्षावधिः कार्या ।
तथा च व्यासः । चर्मकाष्ठेष्टकासूत्रधान्यासवरसस्य च । वसुकुप्यहिरण्यानां सद्य एव परीक्षणमिति । अत्र वसुशब्देन रूप्यं गृ
ह्यते । कुप्यं हेमरूप्यव्यतिरिक्तत्रपुसीसादिकम् । तथा च हेमरूप्ये प्रस्तुत्यामरसिंहः । ताभ्यां यदन्यत्तत्कुप्यमिति । क्रीतपण्य
द्रव्यविशेषेण परीक्षणकालावधिमाह नारदः । त्र्यहाद्दोह्यम्परीक्षेत पञ्चाहाद्वाह्यमेव तु । मुक्तावज्रप्रवालानां सप्ताहं स्यात्प
रीक्षणम् ॥ द्विपदामर्द्धमासं तु पुंसां तद्द्विगुणं स्त्रियाः । दशाहः सर्वबीजानामेकाहो लोहवाससाम् । अतोऽर्वाक्पण्यदोषस्तु
यदि सञ्जायते क्वचित् । विक्रेतुः प्रतिदेयं तत्क्रेता मूल्यमवाप्नुयादिति । त्र्यहात् क्रयदिनादारभ्येति शेषः । पञ्चाहादिष्व
दावप्येवमेव शेषोऽवगन्तव्यः । त्र्यहं विक्रेतुः प्रतिदेयमित्यादिविधिदर्शनात्त्र्यहाद्दोह्यमित्यादि परीक्षणं प्रीतिदोह्यादिद्रव्य
विषयमिति गम्यत इति स्मृतिचन्द्रिकायाम् । दोह्यं महिष्यादिकम् । वाह्यं बलीवर्दादिकम् । मुक्तादिग्रहणं रत्नोपलक्षणम्
। द्विपदाम्पुंसान्दासानामित्यर्थः । तद्द्विगुणं मासमित्यर्थः स्त्रियाः दास्या इत्यर्थः । पूर्वोदाहृतचर्मकाष्ठेत्यादिव्यासवचनेन भक्ष
णार्थं गृहीतानां धान्यादीनां सद्यः परीक्षणाभिधानात्सर्वबीजानामित्यत्र बीजशब्दो वापार्थं गृहीतधान्यपरः । अन्यथास

द्युःपरीक्ष्यत्वप्रतिपादकव्यासवचनविरोधःस्यात्अतोवाक्यशेषादेरभ्यन्तरइत्यर्थः। कात्यायनोपि। भूमेर्दशाहोनुशयःक्रेतु
र्विक्रेतुरेवचेति। भूमेर्गृहक्षेत्रादिरूपायाअनुशयःपरावर्त्तनयोग्यःकालःपरीक्षाकालइतियावत्। यथोक्तपरीक्षाकालाद
तिक्रमेदोषदर्शनेनप्रतिदानमित्याहसएव। अविज्ञातन्तुयत्क्रीतन्दुष्टम्पश्चाद्विभावितम्। क्रीतन्तत्स्वामिनेदेयम्पण्यङ्का
लेऽन्यथानचेति। अविज्ञातम्परीक्षाशेषित्याभवतोऽपरिज्ञातम्। दुष्टंविभावितंदोषवत्तयाज्ञातमित्यर्थः। कालेपरीक्षा
काले। अन्यथातत्कालात्ययेदुष्टतयापरिभावितमपितत्स्वामिनेदेयम्। अविज्ञातन्तुयत्क्रीतमित्यनेनयत्क्रयात्प्राक्अपरीक्ष्य
क्रीतन्तत्परीक्षासमयेदोषदर्शनेपरावर्त्तनीयम्। यत्तुपरीक्ष्यगृहीतन्तन्नपरावर्त्तनीयमितिदर्शितमर्थंनारदआह। क्रीत्वा
नानुशयंकुर्य्याद्वणिक्पण्यविचक्षणः। क्षयंवृद्धिञ्चजानीयात्पण्यानामागमन्तथा॥ क्रेतापण्यंपरीक्षेतप्राक्स्वयंगुणदोषतः
। परीक्ष्याभिमतंक्रीतंविक्रेतुर्नभवेत्पुनरिति॥ अनुशयंपश्चात्तापम्। पण्यानांअश्वादीनांअस्मिन्देशेमूल्यहानिरस्मिन्देशे
तदाधिक्यमितिक्षयवृद्धीएतद्देशसम्भवमित्यागमञ्चक्रयात्प्रागेवजानीयादित्यर्थः। दोषदर्शनमन्तरेणापरीक्षाकालएवप्र
त्यर्पणेविशेषमाहकात्यायनः। क्रीत्वानुशयम्पश्चात्त्यजेद्दोषादृतेनरः। अदुष्टमेवकालेतुसमूल्याद्दशमंवहेत्। क्रीत्वाग
च्छन्ननुशयंक्रयीहसमुपागते। षड्भागमस्यमूल्यस्यदत्वाक्रीतंत्यजेन्नरइति। अदुष्टमनभियुक्तम्। कालेपरीक्षाकाले। अत्र
मूल्यदशमभागदानव्यवस्थाउपभुज्यमानमपिननश्यतिभूम्यादिकन्तद्विषयंउपभोगविनश्वरबीजादिविषयंषड्भागदानमितिव्य
वस्थाज्ञेया। ननुविज्ञानताप्यनुशयोनकार्यःक्रीत्वानानुशयंकुर्यादितिनिषेधसद्भावादितिचेन्नायंअपवादस्यसत्वात्सचापवा
दोदर्शितोनारदेन। क्रीत्वामूल्येनयत्पण्यंदुःक्रीतंमन्यतेक्रयी। विक्रेतुःप्रतिदेयन्तत्तस्मिन्नेवाह्न्यविक्षतमिति॥ मन्यत
इत्यनेनवस्तुनोदोषाभावउक्तः द्वितीयादिदिवसप्रत्यर्पणेविशेषमाहसएव। द्वितीयेऽह्निददत्क्रेतामूल्यात्त्रिंशांशमाहरे
त्। द्विगुणन्तत्तृतीयेह्निपरतःक्रेतुरेवतदिति॥ परतःतृतीयाह्नःपरतःक्रेतुरेवतत्क्रीत्वाअनुशयादिकञ्चानत्नापिनकुर्यादि

त्यर्थः । यत्तु मनुवचनं क्रीत्वा विक्रीय वा किञ्चिद्यस्येहानुशयो भवेत् । सोऽन्तर्दशाहात्तद्द्रव्यं दद्याच्चैवाददीत चेति । तदुपभोगे नश्वरक्षेत्रगृहयानशयनादिविषयम् । यत्तूपभोगेन सदोषमपि विकारं प्रापितं तत्परीक्षाकालमध्येऽपि न प्रतिदेयमित्याह नारदः । परिभुक्तं तु यद्वासः क्लिष्टरूपं मलीमसम् । सदोषमपि तत्क्रीतं विक्रेतुर्न भवेत्पुनरिति । वासो यहणमुपलक्षणमिति मदनरत्ने वासोविषयत्वेवास्येति माधवीये । पण्यानां देशकालस्थोपचयापचयौ ज्ञातव्यावित्याह नारदः । क्षयं वृद्धिञ्च जानीयात्पण्यानामागमं तथेति । अश्वादिपण्यानामस्मिन्काले ऽस्मिन्देशे च क्षयं वृद्धिं वा जानीयात्तथागमं कुलीनत्वादिज्ञानार्थं उत्पादकं जन्मभूम्यादिकञ्च जानीयादित्यर्थः । क्रयकाले मूल्यक्षयवृद्धिदोषदर्शनमन्तरेण क्रीतविक्रीतयोः प्रत्यर्पणे पुनर्य्येहणे दण्डमाह याज्ञवल्क्यः । वृद्धिं क्षयं वा वणिजा पण्यानामविजानता । क्रीत्वा नानुशयः कार्यः कुर्वन्षड्भागदण्डभागिति ॥ वृद्धिं मूल्यवृद्धिं अविजानता क्रेत्रा । एवं मूल्यक्षयमविजानता विक्रेत्रेत्यर्थः । परीक्षाकालातिक्रमेण प्रत्यर्पणे दण्डमाह मनुः । परेण तु दशाहस्य न दद्यान्नापि दापयेत् । आददानो ददच्चैव राज्ञा दण्ड्यः शतानि षडिति ॥ दशाहग्रहणं परीक्षाकालस्य पूर्वोक्तस्योपलक्षणं । सर्वमेतत्परिभाषणेऽपरिभाषणे तु तदनुसारेणैव प्रतिदानं तदभावादिकं मन्तव्यं । इति क्रीतानुशयाख्यव्यवहारपदं ॥ * ॥

अथ विक्रियासम्प्रदानाख्यव्यवहारपदम् । तत्स्वरूपमाह नारदः । विक्रीय पण्यं मूल्येन क्रेतुर्यन्न प्रदीयते । विक्रीयासम्प्रदानं तद्विवादपदमुच्यत इति । तत्र विक्रेयद्रव्यस्य द्वैविध्यं षड्विधत्वं क्रमेणाह स एव । लोकेऽस्मिन्द्विविधं पण्यं जङ्गमं स्थावरं तथा । षड्विधस्तस्य तु बुधैर्दानादानविधिः स्मृतः । गणिमं तुलिमं मेयं क्रियया रूपतः श्रियेति । दानं विक्रयः । आदानं क्रयः । गणयित्वा यस्य क्रयो तद्गणिमम् । एवं तुलिमादिकं गणिमं संख्येयं क्रमुकफलादिकं तुलिमं तुलाधृतं हेमचन्दनादिकम् । मेयं व्रीह्यादिकम् । क्रियया वाहनदोहनादिरूपया युक्तमिति शेषः । रूपतः रूपेण युक्तं वस्तु पण्याङ्गनादि । श्रिया दीप्त्या युक्तं पद्मरागादिकम् । यदा विक्रेता मूल्यं गृहीत्वा याचमानाय क्रेत्रे विक्रितं वस्तु न ददाति तदा यत्कर्तव्यं तदाह स एव । विक्रीय पण्यम्

श्येन क्रेतुर्यो न प्रयच्छति । स्थावरस्य क्षयं दाप्यो जङ्गमस्य क्रियाफलमिति । यो गृहीतमूल्यो विक्रेता अजातानुशयाय क्रेत्रे प्रा-
र्थ्यमानाय नार्पयति तत्पण्यं यदि स्थावरात्मकं तदा क्षयेन सहितं सोदाप्यः । यदा तु जङ्गमात्मकं तदा क्रियाफलेन सहितं
इत्यर्थः । विक्रयानन्तरं ज्ञातव्यमुपभोगोऽत्र क्षयः । क्रियाफलं दोहनादि क्रियाफलं क्षीरादिकम् । इदञ्च क्रयकालापेक्षया
अर्पणकाले मूल्याधिक्ये वेदितव्यम् । मूल्यह्रासे वन्द्यवाभिधानात् । तथा च स एव । अर्घश्चेदवहीयेत सोदयं पण्यमावहेदि-
ति । अर्वाक् चेदपचीयेतेति कल्पतरौ पाठः ॥ अर्वाक् विक्रीतस्य क्रेत्रे समर्पणात् पूर्वं अपचीयेत हीनमूल्यं भवेत् सोदयं पण्यमाव-
हेत् । विक्रयकाले यावन्मूल्यं गृहीतं तावता मूल्येनार्पणसमये मूल्यह्रासवशात् यावदुपचयसहितं लभ्यते तावद्दद्यादित्यर्थः
। यदा तु मूल्यसाम्यं तदा पण्यस्योपचयरूपस्यासम्भवात् । निक्षेपं वृद्धिशेषञ्च क्रयं विक्रयमेव च । याच्यमानमदत्तञ्चेद्वर्द्धते पञ्चकं
शतमिति वचनोक्तवृद्धिसहितं पण्यं दाप्यः । अत एव याज्ञवल्क्यः । गृहीतमूल्यं यः पण्यं क्रेतुर्नैव प्रयच्छति । सोदयं तस्य दा-
प्योऽसौ दिग्लाभं वा दिगागत इति । गृहीतमूल्यं पण्यं विक्रेता यदि प्रार्थ्यमानाय स्वदेशवणिजे क्रेत्रे न समर्पयति तत्पण्यं यदि
क्रयकाले यन्मूल्यं तत्कालान्तरे अल्पमूल्येनैव लभ्यते तदा सोदयं वृद्ध्या सहितं विक्रेता क्रेत्रे दापनीयः । यदा मूल्यह्रासव-
शतः पण्यस्योदयो नास्ति किन्तु क्रयकाले यावदेव यतो मूल्यमस्य यत्तत्स्थमिति प्रतिपन्नम् । तावदेव तदा तत्पण्यमादाय यस्मिन्देशे वि-
क्रीतं तस्य यो लाभस्तेनोदयेन सहितं दापनीयाः वचनत्रयस्यार्थः । वणिजस्तु योऽदेशान्तरात् क्रयार्थमागतो वणिक् तस्मै दे-
शान्तरे तत्पण्यविक्रये यो लाभस्तेन सहितं तत्पण्यं दापनीय इत्यर्थः । देशान्तरलाभसहितपण्यदानं केवलमागन्तुकस्यैव
। किन्तु मूल्यस्य वृद्धौ क्षयेऽपीत्याह नारदः । स्थायिनामेष नियमो दिग्लाभं दिग्विचारिणामिति । स्थायिनां विक्रेतृदेशस्थायिनां
एष नियमः स्थावरस्य क्षयं दाप्य इत्यादिवचनोक्तो नियम इत्यर्थः । विष्णुर्विक्रेतुर्दण्डमप्याह । गृहीतमूल्यं यः पण्यं क्रेतुर्नैव
दद्यात्तस्य सोदयं दाप्यो राज्ञा च पणशतं दण्ड्य इति । एतच्चानुशयरहितं क्रेतृ प्रति विक्रेतृविषयमिति मदनरत्ने । यस्तु विक्री-

यानुशयवशान्नार्पयति यश्च क्रीत्वाऽनुशयवशान्न गृह्णाति तौ प्रत्याह कात्यायनः । क्रीत्वा प्राप्तं न गृह्णीयाद्यो न दद्याददूषितम्
समूल्याद्दशभागन्तु दत्वा स द्रव्यमाप्नुयात् । अप्राप्तेऽर्थक्रियाकाले कृतेनैव प्रदापयेत् । एष धर्मो दशाहात्तु परतोऽनुशयो न
त्विति । अदूषितं ज्वरादिनेति शेषः । दोह्यवाह्यादिपण्यस्य दोहनवाहनादिरूपः कालोऽर्थक्रियाकालस्तस्मिन्नप्राप्ते सति
अग्रहणेऽदाने वा कृते सति न दशमभागं प्रदापयेत् किन्तु मदत्त्वैव स्वीयं द्रव्यं प्राप्नुयादिति । एष धर्मो दशाहात्प्राग्वेदि-
तव्यः ततऊर्ध्वमनुशयो न कर्त्तव्यः । विक्रीयासम्प्रयच्छतो यद्धि क्रीतं पण्यं विक्रेतृपार्श्वे स्थितं तस्य यदि नाशः स्यात्तदा वि-
क्रेतुरेव हानिरित्याह याज्ञवल्क्यः । राजदैवोपघातेन पण्ये दोषमुपागते । हानिर्विक्रेतुरेवासौ याचितस्याप्रयच्छत इति । या-
चितस्येति विशेषणोपादानात् याचनाभावेन विक्रेतुर्हानिरित्यर्थाद्गम्यते । नारदोपि । उपहन्येत वा पण्यं दह्येतापह्रि-
येत वा । विक्रेतुरेव सोऽनर्थो विक्रीयासम्प्रयच्छत इति ॥ यथायाचितस्याप्रयच्छतो विक्रेतुर्हानिस्तथा दीयमानं पण्यमगृह्णतः क्रे-
तुरपीत्याह स एव । दीयमानं न गृह्णाति क्रीतं पण्यञ्च यः क्रयी । स एवास्य भवेद्दोषो विक्रेतुर्योऽप्रयच्छत इति ॥ अप्रयच्छतः
विक्रेतुर्यो दोषः स एवास्य भवेदित्यन्वयः । क्रेतुर्दोषाभिधानस्य फलं पण्यस्य मूल्यं क्रेत्रे विक्रेत्रा न प्रत्यर्पणीयमिति । दीयमानम-
गृह्णतीति वदता दीयमानग्रहणेन मूल्यहानिरिति दर्शितम् । क्रयानन्तरं क्रेत्रा न याचितं विक्रेत्रा च न समर्पितं ज्ञातञ्चो-
राद्युपद्रवस्तत्र द्वयोः समा हानिः । क्रेतृविक्रेत्रोरुभयोरपि याचनानर्पणयोरौचित्येन सापराधत्वादित्युक्तं देवणभट्टैः स्मृतिच-
न्द्रिकायाम् । याज्ञवल्क्योऽपि । हानिश्चेत् क्रेतृदोषेण क्रेतुरेव हि सा भवेदिति । क्रेतृदोषो दीयमानस्याग्रहणं यच्च पुनर्जातानुश-
यः । क्रेता विक्रेत्रा दीयमानं न गृह्णाति तत्राप्याह नारदः । दीयमानं न गृह्णाति क्रीत्वा पण्यं च विक्रयी । विक्रीणानस्तदन्यत्र
विक्रेता नापराध्नुयादिति । क्रयी जातानुशय इति शेषः । याज्ञवल्क्योऽपि । विक्रीतमपि विक्रेयं पूर्वे क्रेतर्यगृह्णतीति । यस्तु दु-
ष्टं पण्यं दर्शयित्वा सदोषं विक्रीणीते यश्चान्यहस्ते विक्रीतं तत्क्रेत्रनुशयाभाव एवान्यत्र विक्रीणीते तयोः समानो दण्ड इत्याह

नारदः। निर्दोषं दर्शयित्वा तु सदोषं यः प्रयच्छति। समूल्याद्द्विगुणं दाप्यो विनयं तावदेव तु॥ तथान्यहस्ते तु विक्रीय यो
ऽन्यस्मै तत्प्रयच्छति। द्रव्यं तद्द्विगुणं दाप्यो विनयं तावदेव चेति। याज्ञवल्क्योऽपि। अन्यहस्ते च विक्रीतं दुष्टं वादुष्टवद्यदि
। विक्रीणीते दमस्तत्र मूल्यात्तु द्विगुणो भवेदिति। बुद्धिपूर्वविषयमेतत्। ज्ञात्वा सदोषं यः पण्यं विक्रीणीते विचक्षणः। त
देव द्विगुणं दाप्यस्तत्समं विनयं तथेति बृहस्पतिनोक्तत्वात्। अबुद्धिपूर्वकविक्रये तु क्रयपरावर्त्तनमेव। अन्यत्रापि विषयविशे
षे परावर्त्तनमाह बृहस्पतिः। मत्तोन्मत्तेन विक्रीतं हीनमूल्यं भयेन वा। अस्वतन्त्रेण मूढेन त्याज्यं तस्य पुनर्भवेदिति॥ एतच्च
वैदत्तमूल्ये पण्ये द्रष्टव्यम्। अत एव नारदः। दत्तमूल्यस्य पण्यस्य विधिरेष प्रकीर्त्तित इति। यत्र पुनर्मूल्यं न दत्तं तत्रापि
स एवाह। अदत्तेऽन्यत्र समयान्न विक्रेतुरविक्रय इति। अदत्तमूल्ये तु पण्ये वाङ्मात्रेण क्रये कृते तेन परावर्त्तनीयमित्येवमादि
समयाभावे सति प्रवृत्तौ निवृत्तौ न कश्चिद्दोष इत्यर्थः। यत्र पुनर्वाङ्मात्रक्रयपरिहारार्थं विक्रेतुर्हस्ते क्रेत्रा किञ्चिद्द्रव्यं दत्तं तत्र
क्रेतृदोषवशेन क्रयासिद्धौ त्वाह व्यासः। सत्यंकारं च यो दत्त्वा यथाकालं न दृश्यते। पण्यं भवेन्निसृष्टं तद्दीयमानमगृह्णत इ
ति॥ निसृष्टं भवेत् उत्सृष्टं भवेदित्यर्थः। अत्र पण्यद्रव्यस्योत्सर्गः सत्यंकारद्रव्योत्सर्गोऽभिमतः। अन्यथा वाङ्मात्रक्रयकर्तृ
तुल्यत्वेन विक्रेतुः सत्यंकारद्रव्यग्राहकत्वं तत्सममन्यत्र विक्रयाद्यपराधनिमित्तकं सत्यंकारद्रव्यस्य द्वैगुण्येन प्रतिदानं न स्यात्।
अत्रापि विक्रीतमविक्रेयमित्यनुसंधेयम्। अस्मिन्नेव विषये विक्रेतृदोषवशेन क्रयासिद्धौ त्वाह याज्ञवल्क्यः। सत्यंकारकृतं द्र
व्यं द्विगुणं प्रतिदापयेदिति। सत्यङ्कारः सत्यापनं तत्कृतस्य क्रयस्य सत्यप्रतीकरणमिति यावत्। क्लीबे सत्यापनं सत्यंकारः सत्याकृ
तिः स्त्रियामित्यमरकोशाभिधानात्। सत्यंकाराय कृतं समर्पितं सत्यंकारकृतं क्रयं सत्यंकर्त्तुं यद्विक्रेतृहस्ते कृतमित्यर्थः॥ इति
विक्रीयासम्प्रदानाख्यव्यवहारपदम्॥०॥ अथ स्वामिपालविवादाख्यव्यवहारपदम्। तत्र मनुस्तदभिधानप्रतिज्ञां करोति
। पशुषु स्वामिनां चैव पालानां च व्यतिक्रमे। विवादं सम्प्रवक्ष्यामि यथावद्धर्मतत्त्वत इति। स्वामिपालयोः प्रतिदिनकृत्यमाह नार

दः। उपानयेद्गा गोपायप्रत्यहं रजनीक्षये। चीर्णाः पीताश्च ता गोपः सायाह्ने प्रत्युपानयेदिति। चीर्णाः तृणादिकं भक्षितवतीः। पीताः पीतवतीः। स्वामिना प्रातर्यावन्तः समर्पितास्तावन्तो गोपालेन सायं प्रत्यर्पणीया इत्यर्थः। गोग्रहणम्पशुमात्रोपलक्षणार्थं। तथा च याज्ञवल्क्यः। यथार्पितान्पशून्गोपः सायम्प्रत्यर्पयेत्तथेति। गवादिपरिपालकस्य भृतिपरिमाणमाह नारदः। गवां शताद्वत्सतरी धेनुः स्याद्द्विशता भृतिः। प्रतिसंवत्सरं गोपे संदोहश्चाष्टमेऽहनीति। प्रतिसंवत्सरं संवत्सरे संवत्सरे गोशतपरिपालने वत्सतरी द्विहायनी गोर्भृतिः। द्विशतपरिपालने धेनुर्दोग्ध्री सवत्सेति यावत्। अष्टमे दिवसे सन्दोहः सर्वासां गवां दोहः स्वभृतित्वेन कल्पनीय इत्यर्थः। बृहस्पतिरपि। तथा धेनुभृतः क्षीरं लभेताष्टमेऽहनीति। धेनुभृतः धेन्वा भृतः द्विशतपालक इत्यर्थः। तथा च सन्दोहो धेन्वा समुच्चीयते न वत्सतर्येति मदनरत्ने। कल्पतरौ तु। धेनुभृतो गोपाल इति व्याख्यातं तेन वत्सतर्यापि समुच्चीयत इति गम्यते। गोग्रहणं महिष्यादीनामुपलक्षणं। न्यूनाधिकपरिपालनत्वे तदनुसारेण भृतिकल्पना द्रष्टव्या। इयञ्च वत्सतर्यादिभृतिकल्पना परिभाषितभृत्यभावविषया। परिभाषिते तु परिभाषानतिक्रमेणैव देया। मनुस्तु प्रकारान्तरेण भृतिपरिमाणमाह। गोपः क्षीरभृतो यस्तु स दुह्याद्दशतो वराम्। गोस्वाम्यनुमते भृत्यः सा स्यात्पालेऽभृते भृतिरिति। दशानां दोग्ध्रीणां मध्ये वरामुत्कृष्टां स्वीकृत्य तत्क्षीरभृतो भृत्यो गोपो दशदोग्ध्रीपालनकृद्गृह्णीयादित्यर्थः। सैषा भृतिः पूर्वं द्रव्यान्तरेणाभृते ज्ञेया। यस्तु द्रव्यान्तरेण भृतः न च तदेव भृतिरित्यर्थः। यस्तु भृतिं गृहीत्वा पशून्मारयेत् विनाशयति वा तं प्रत्याह याज्ञवल्क्यः। प्रमादमृतनष्टांश्च प्रदाप्यः कृतवेतनः इति। प्रमादग्रहणम्पशुपालकदोषोपलक्षणार्थं। मनुना प्रमादनाशः स्पष्टीकृतः। नष्टं विनष्टं कृमिभिः श्वहतं विषमे मृतम्। हीनम्पुरुषकारेण प्रदद्यात्पाल एव त्विति। श्वहतम्। शुना हतम्। विषमे दुर्गमप्रदेशे। पुरुषकारः पुरुषप्रयत्नः। यत्पुरुषप्रयत्नेन हीनं सन्नाशादिकं प्राप्तं तद्दातव्यमित्यर्थः। पुरुषकारश्च बृहस्पतिना दर्शितः। कृमिचोरव्याघ्रभयाद्दरीश्वभ्राच्च पालयेत्। व्यायच्छेच्छक्तितः क्रोशेत्स्वामिने वा निवेदयेदिति। व्यायच्छेत व्या

स्तनाभावाय यतेतेत्यर्थः। चौरैर्बलात्कारेणापहृतेन दाप्य इत्याह मनुः। विघुष्य तु हृतं चौरैर्न पालो दातुमर्हति। यदि दे-
शे च काले च स्वामिनः स्वस्य शंसतीति। विघुष्य भृङ्गकादिभिर्घोषं कृत्वा। देशे स्वाम्यवस्थानदेशे। काले अपहरणकाला-
व्यवहितकाले। विषयविशेषे पशुपालस्य दण्डमाह व्यासः। गृहीतमूल्यो गोपालस्तां त्यक्त्वा निर्जले वने। ग्रामचारी नृपैर्बा-
ध्यः शलाकी च वने चर इति। शलाकी नापित इति कल्पतरौ। पुरुषेण प्रयत्नाकरणे दण्डमाह नारदः। स्याच्चेद्गोव्यसनं गो-
पो व्यायच्छेन्न च शक्तितः। अशक्तस्तूर्णमागम्य स्वामिने चानिवेदयेत्। अव्यायच्छेत। विक्रोशन् स्वामिने चानिवेदयन्। वो-
ढुमर्हति गोपस्तं विनयञ्चैव राजनीति। तज्ज्वादिकम्। पशूनान्दैवान्मरणे पालकस्य दोषाभावज्ञानोपायमाह व्यासः। मृ-
तेषु च विशुद्धिः स्याद्वालशृङ्गादिदर्शनात्। आदिशब्देन कर्णादिनां ग्रहणम्। तथा च मनुः। कर्णौ चर्म च वालांश्च वस्तिं स्ना-
युं च रोचनाम्। पशुषु स्वामिनां दद्यान्मृतेष्वङ्गानि दर्शयेदिति। अङ्कादि दर्शयेदिति क्वचित्पाठः। अङ्कः शृङ्गकर्णादिरू-
पचिह्नम्। आदिशब्दः साक्षिसंग्रहार्थः। पशुषु मृतेष्वङ्कादिकं स्वामिने दर्शयेत्। रोचनादिकं यत्नप्रयोजनं तत्तस्मै दद्या-
दित्यर्थः। नष्टगवादिदानं तु तत्स्वामिने मूल्यद्वारेण ज्ञातव्यम्। अत एव विष्णुः॥ ह्येको वा पशूनां वृकाद्युपघाते पाले त्वना-
यति पालकदोषो विनष्टपशूनां मूल्यं स्वामिने दद्यादिति। अनायति। अनागच्छति। विनयद्रव्यप्रमाणमाह याज्ञवल्क्यः
। पालदोषविनाशे तु पाले दण्डो विधीयते। अर्द्धत्रयोदशपणः स्वामिनो द्रव्यमेव चेति। अर्द्धत्रयोदशपणः अर्द्धरहितत्र-
योदशपणः॥ सार्द्धद्वादशपण इति यावत्। तात्तृतीयपूर्वपदात्समानाधिकरणेन समस्यते उत्तरपदलोपश्चेति वार्त्ति-
कादुत्तरपदलोपी कर्मधारयः। यत्तु केनचिदर्द्धाधिकत्रयोदशपणो दण्ड इति व्याख्यातं तत्सार्द्धद्विमात्रादिषु अर्द्धत्रिमा-
त्रादि महाभाष्यकारशब्दप्रयोगदर्शनादुपेक्ष्यम्। पालदोषमाह मनुः। अजाविके तु संरुद्धे वृकैः पाले त्वनायति। यां प्रस-
ह्य वृको हन्यात्पाले तत्किल्बिषं भवेदिति। अनायति। उपद्रवनिवारणाय अनागच्छतीत्यर्थः। यामजाविकजातीयाम्। सु

गमस्थलस्थविषयमेतत्। दुर्गमस्थलस्थविषये त्वाह स एव। नाशाच्चेद्वरुद्धानाच्चरन्तीनां मिथो वने। यामुद्धृत्य वृको
हन्यान्न पालस्तत्र किल्विषीति। अवरुद्धानाम्पालकेन स्थापितानामित्यर्थः। गवादिप्रचारार्थं भूमिमाह याज्ञवल्क्यः।
ग्राम्येच्छया गोप्रचारो भूमिराजवशेन वा। ग्राम्येच्छया ग्रामीणजनवशेन राजेच्छया वा। गोप्रचारो गवां तृणादिभक्षणार्थं कि
यानपि भूभागोऽवसृष्टः परिकल्पनीय इत्यर्थः। गवां स्थानासन्नसौकर्य्याय ग्रामक्षेत्रयोरन्तरमाह स एव। धनुःशतम्परी
णाहो ग्रामक्षेत्रान्तरम्भवेत्। द्विशते खर्वटस्य स्यान्नगरस्य चतुःशतमिति। परीणाहशब्देनात्र सर्वासु दिक्षु अनुप्रस्थ
स्थलं गृह्यते। एतादृशं धनुःशतम्परिमितं ग्रामक्षेत्रयोरन्तरं कार्यम्। खर्वटस्य शतद्वयपरिमितं नगरस्य शतचतुष्टय
परिमितमित्यर्थः। खर्वटः अनेककारुकुशीबलयुक्तो ग्राम इति मदनरत्ने। माधवाचार्य्यैस्तु प्रचुरकण्टकसन्तानो ग्रा
म इति व्याख्यातम्। तत्र शस्योत्पत्तेः प्रागेवावरणं कार्य्यमित्याह कात्यायनः। अजातेष्वेव शस्येषु कुर्य्यादावरणं महत्।
दुःखेन विनिवार्य्यन्ते लब्धस्वादुरसा मृगा इति। एवम्पशुनिवारणार्थं कृतेप्यावरणमतिक्रम्य पशुभिः शस्यादिविनाशे क
र्तव्यमाह मनुः। पथि क्षेत्रे परिवृते ग्रामान्तीयेऽथवा पुनः। सपालः शतदण्डार्हो विपालं वारयेत्पशुमिति। पथि क्षेत्रे
मार्गसमीपे क्षेत्रे। ग्रामान्तीये ग्रामसमीपवर्तिनि। सपालः पशुः पालः शतदण्डार्हः तत्पशुपालः पणशतं दण्डनीय इ
त्यर्थः। अयञ्च दण्डः पशुपालेन समर्थेन सता पशुर्न निवार्य्यमाणो वेदितव्यः। अत एव नारदः। उक्तामप्यनुवृत्तिं यः स्याच्छस्य
घाते गवादिभिः। पालः शास्यो भवेत्तत्र न चेच्छक्तो निवारयेदिति। आवरणाभावेनापरिहार्ये शस्योपघातेऽपि न पालस्य द
ण्डः। तथा च मनुः। तत्रापरिवृतं धान्यं विहिंस्युः पशवो यदि। न तत्र प्रणयेद्दण्डं नृपतिः पशुरक्षिणामिति। अनेनावृत
क्षेत्रे शस्योपघाते पशुरक्षिणां दण्ड इत्यर्थादुक्तम्भवति। अदीर्घकालप्रचारविषयमेतत्। दीर्घकालप्रचारे तु अपरिवृतेऽपि
पशुपालो दण्डार्हो भवति। अत एवाल्पकालप्रचारे दोषाभावं दर्शयति विष्णुः। पथि ग्रामविवीतान्ते न दोषोऽल्पकालमिति

Digitized by Google

। पशुविशेषे दण्डपरिमाणमाह याज्ञवल्क्यः ॥ माषानष्टौ तु महिषी शस्यघातस्य कारिणी । दण्डनीया तदर्द्धं तु गौस्तदर्द्धमजाविकं ॥ भक्षयित्वोपविष्टानां यथोक्ताद्द्विगुणो दमः । सममेषां विवीतेऽपि खरोष्ट्रं महिषीसममिति ॥ परशस्यघातकारिण्या महिष्याः स्वामी अष्टौ माषान् दण्ड्यः । गोः स्वामी चतुरः । छागस्वामी द्वौ द्वौ मेषस्वामी च द्वौ द्वौ । एतेषां पशूनां शस्यभक्षणादारभ्य तत्रैवोपविष्टानां स्वामी यथोक्तदण्डाद्द्विगुणं दण्डं दाप्यः । विवीतस्य तृणाद्युपघातेऽपि शस्योपघातवद्दण्डनीयः । खरस्वाम्युष्ट्रस्वामी महिषीस्वामीवद्दण्डनीयः । अत्र पशुस्वामिनो दण्ड इत्यभिधानं तथेमहिष्यादि यद्द्वाम्प्रति पशुदण्डप्राप्त्यर्थम् । भक्षयित्वोपविष्टस्य वत्सविषये यथोक्ताच्चतुर्गुणो दण्डः । तथा च स्मृत्यन्तरम् । वसतां द्विगुणः प्रोक्तः सवत्सानाञ्चतुर्गुण इति । अत्रापराधानुसारेण दण्डनार्थं नाष्टिकमाषो ग्राह्यः न पुनः सौवर्णो राजतो वेति स्मृतिचन्द्रिकायाम् । नाष्टिकमाषश्चकर्षपरिभाषितस्य कार्षापणस्य षोडशो भागो भवति । अयमेव पणस्य पञ्चवापि प्रकीर्त्तिता इति याज्ञवल्क्योक्तपञ्चसुवर्णपरिमितत्वपक्षे पणचतुर्थांशस्य विंशतिमाषात्मकार्षापणस्य माषो विंशतितमो भागः पणस्य परिकीर्त्तित इति नारदोक्तो विंशो भागोऽपि भवति । एतेन स्मृतिचन्द्रिकायाम् । अपराधानुसारेण दण्डनार्थं माषो विंशतितमो भागः पणस्य परिकीर्त्तित इति नारदोक्तो माषः कैश्चिल्लोकत इत्येकीयमतत्वेनोपन्यस्य संस्कारभिन्न रजोमूला मनुना समुदाहृता कार्षापणसंज्ञा नारदादिवचोनियोज्या विनये तथेति बृहस्पतिवचनविरोधेन दूषितं तदुभयथाप्यर्थभेदाभावेन विरोधाभावान्निरस्तं मन्तव्यम् । यत्तु मनुनोक्तं सपादम्पणमर्हतीति तत्स्वामिमतिपूर्वं पशुव्यतिक्रमविषयम् । याज्ञवल्क्यवचनन्त्वबुद्धिपूर्वविषयमिति न तयोर्विरोधः । यत्तु पणस्य पादौ द्वौ गां तु द्विगुणं महिषीन्तथा । तथाजाविकवत्सानां पादो दण्डः प्रकीर्त्तित इति स्मृत्यन्तरं तद्भक्षयित्वोपविष्टगवादिविषयम् । यत्पुनर्नारदेनाभिहितं । माषान् दापयेद्दण्डं द्वौ माषौ महिषीन्तथा । तथाजाविकवत्सानां दण्डः स्यादर्द्धमाषिक इति तन्मुहूर्त्तमात्रभक्षणविषयं अत एवाह नुः शङ्खलिखितौ । सन्तौ चरन्ती गौः पञ्चमाषान् दिवा चीन्मुहूर्त्तं माषं ग्रासेन दण्डमिति । ग्रासेन दण्ड इत्यस्यायमर्थः । म

हिंस्यादिभिः परशस्येषु कवलमात्रभक्षणे कथञ्चित्कृते पालस्वामिनोर्वा स्वल्पोऽपि दण्डो नास्तीति। आतुरपशुविषये बकुसस्य नाशेऽप्येवमेव दण्डाभावप्रतिपादनमुखेनाह नारदः॥ राजग्रहगृहीतो वा वज्राशनिहतोऽपि वा। अथ सर्पेण वा दष्टो वा वृक्षाद्वा पतितो भवेत्। व्याघ्रादिभिर्हतो वापि व्याधिभिर्वाप्युपद्रुतः। न तत्र दोषः पालस्य न च दोषोऽस्ति गोमिनामिति। गोमिनां गोस्वामिनाम्। आतुराणामनिवार्यत्वादित्यभिप्रायः। अनातुराणामपि केषांचित्पशूनां दण्डाभावमाह स एव। गौः प्रसूता दशाहान्तु महोक्षा वाजिकुञ्जराः। निवार्याः स्युः प्रयत्नेन तेषां स्वामी न दण्डभागिति। दशदिनपर्यन्तं प्रसूतायां निरोद्धुमशक्यत्वान्न स्वामी दण्डभाक्। महोक्षस्य सर्वासाङ्गर्भाधानार्थं सर्वदा बन्धनायोगात् तत्स्वामी न दण्डभाक्। वाजिकुञ्जराणां स्वामिनोऽदण्डभागित्वे हेतुमाहोशना। अदण्ड्या हस्तिनोऽश्वाश्च प्रजापाला हि ते स्मृता इति। स्वामिग्रहणं पालकस्याप्युपलक्षणार्थम्। यदाह मनुः। अनिर्दशाहां गां सूतां वृषान्देवपशूंस्तथा। सपालान्वा विपालान्वा अदण्ड्यान्मनुरब्रवीदिति। वृषा महोक्षाः। यद्वा वृषोत्सर्गविधानेनोत्सृष्टाः। देवपशवः देवालयेषु देवोपभोगार्थं स्थापिताः पशवः। याज्ञवल्क्योऽपि॥ महोक्षोत्सृष्टपशवः सूतिकागन्तुकादयः। पालो येषां न ते मोच्या दैवराजपरिप्लुताः। अनिर्दशाहा आगंतुकः स्वयूथात्परिभ्रष्टः सन् देशान्तरात्समागतः। येषाम्पालो नास्ति तेऽपि दैवराजोपहताः सस्यादिनाशकारिणो न दण्ड्या नद्(?)इत्यर्थः। आदिशब्देन मृतवत्सादीनां ग्रहणम्। अत एवोशना। अदण्ड्या मृतवत्सा च संज्ञारोगवती कृशा। अदण्ड्याः काणाकूटाश्च वृषाश्च कृतलक्षणाः। अदण्ड्यागन्तुका गौश्च सूतिका चाभिसारिणीति। कूटः एकशृङ्गः। कृतलक्षणाः प्रतप्तायसेन कृतलाञ्छनः। अभिसारिणी स्वयूथात्प्रच्युता पुनः स्वयूथगामिनी परशस्यविनाशेन केवलम्पशुस्वामी दण्डनीयः सदमपि दापनीय इत्याह बृहस्पतिः। शस्यानिवारयेद्गां तु चीर्णे दोषाद्द्वयोर्भवेत्। स्वामी सदण्डमन्वाप्यः पालस्ताडनमर्हतीति। सदण्डं सममस्य सदण्डमम्। समूलशस्यनाशविषयमेतत्। अत एव नारदः। समूलशस्यनाशे तु तत्स्वामी प्राप्नुयाद्दमम्। वधेन गोर्यो मुच्येत दण्डं स्वामिनि पातयेदिति।

तत्स्वामीयस्य स्वामी सदंडं प्राप्नुयात् । पशुस्वामिनः सकाशादिति शेषः । वधोत्र कशादिना ताडनम् । न प्राणच्छेदः । पा
लस्ताडनमर्हतीति वचनात् । सदंडश्च सामन्तादिभिः परिकल्पितो देयः । अत एव स एवाह । गोभिस्तु भक्षितं सस्यं येन
रः प्रतियाचते । सामन्तानुमतं तद्धि यच्चान्यं यत्र चापितमिति । यत्तु सदंडस्य वचनं निषेधकं । गोभिर्विनाशितं धान्यं यो नरः प्रतिया
चते । पितरस्तस्य नाश्नन्ति न वा पिबन्ति दिवौकसः इत्युशनो वचनं तद्ग्रामादि समीपस्थानावृत क्षेत्रविषयमिति माधवाचार्याः ।
श्राद्धकालादौ गोभक्षितविषयमिति मदनरत्नकृतः । सर्वासां कृत्वा मुक्तं वै श्राद्धदिवसे चादण्ड्यत्वमाह स एव । अदण्ड्या श्चान्यवे
गावः श्राद्धकाले तथैव चेति । गोभिः श्राद्धकालादौ भुक्तमतिशयस्करमित्याशयेनादण्ड्यत्वमाह । आकाल्यश्चाद्दिजैर्भुक्तं परिक्षीणा
स्तु पयो भवेः । गोभिस्तु नरशार्दूल वाजपेयाद्विशिष्यत इति । एतत्पदमुपसंहरति मनुः । एतद्विधानमातिष्ठेद्धार्मिकः पृथिवी
पतिः । स्वामिनां स्वपशूनां स्वपालानां च व्यतिक्रम इति ॥ इति स्वामिपालविवादाख्यव्यवहारपदम् ॥ ● ॥ अथ सीमाविवा
दाख्यव्यवहारपदम् ॥ तत्स्वरूपमाह नारदः । सेतुकेदारमर्यादाविकृष्टाकृष्टनिश्चयः । क्षेत्राधिकारो यत्र स्याद्विवादः
क्षेत्रजस्तु सः ॥ तस्यार्थः सेतुर्जलप्रवाहबन्धः । केदारः क्षेत्रं । मर्य्यादा सीमा । विकृष्टो लाङ्गलप्रहतो देशः अकृष्टस्तद्रहितः
एतेषां निश्चयो यत्र विवादे स्यात्सक्षेत्राधिकारः क्षेत्रविषयको विवादः क्षेत्रजउच्यत इति । अयं विवादः षड्विधः तथा च कात्याय
नः । आधिक्यं न्यूनता चांशे अस्तिनास्तित्वमेव च । अभोगभुक्तिः सीमा च षड्भूवादस्य हेतवः । ममैतावतिका भूरस्तीत्युक्तेनेति
विवादः आधिक्यविवादः एतावती भूस्त्वयेन्युक्ते मम नैतावतीति यो विवादः स न्यूनताविवादः । अत्र ममांशोस्तीत्युक्ते सति यो विवादः
सोस्तित्वविवादः अत्र तवांशो नास्तीत्युक्ते विद्यत इत्येवंविधो विवादो नास्तित्वविवादः । सीमाविवाद इति षड्विधो विवाद इत्यर्थः
। तत्र सीमा चतुर्विधा । देशसीमा ग्रामसीमा क्षेत्रसीमा गृहसीमा चेति । तस्याश्चतुर्विधाया अपि यथासम्भवं पञ्चविधत्वमाह ना
रदः । ध्वजिनी मत्स्यिनी चैव नैधानी भयवर्जिता । राजशासननीता च सीमा पञ्चविधा स्मृता । ध्वजिनी वृक्षादिचिह्निता । व

श्वास्त्वन्यग्रोधादयः । तदाह मनुः । सीमावृक्षांस्तु कुर्वीत न्यग्रोधाश्वत्थकिंशुकान् । शाल्मलीन्सालतालांश्च क्षीरिणश्चैव पा
दपानिति । मेदिनीजलचिह्निता । नैधानी निखाततुषांगारादिलक्षिता । भयवर्जिता । अर्थिप्रत्यर्थिपरस्परसम्प्रतिपत्ति
निर्म्मिता । राजशासननीता । ज्ञातृचिह्नाद्यभावे राजेच्छया निर्म्मिता । तथा च व्यासः । ग्रामयोरुभयोः सीम्नि वृक्षाश्च समुन्न
ताः । समुच्छ्रिता ध्वजाकारा ध्वजिनी सा प्रकीर्त्तिता । स्वच्छन्दगा बहुजला झषकूर्मसमन्विता । नित्यप्रवाहिणी यत्र सीमा साम
त्स्यिनी मता । तुषाङ्गारकपालैस्तु कुम्भैरायतनैस्तथा । सीमा प्रचिह्निता कार्य्या नैधानी सा निगद्यते इति । नित्यप्रवाहिणीत्यनेन कू
पवाप्यादीनि प्रकाशचिह्नान्युपलक्ष्यन्ते । तानि च बृहस्पतिना दर्शितानि । वापीकूपतडागानि चैत्यारामसुरालयाः । स्थल
निम्नं नदीस्रोतः शरगुल्मनगादयः । प्रकाशचिह्नान्येतानि सीमायां कारयेत्सदा । निहितानि तथान्यानि यानि भूमिर्न भक्षयेत्
। अश्मानोऽस्थीनि गोवालास्तुषान्भस्मकपालिकाः । करीषमिष्टकाङ्गारशर्करावालुकास्तथा । नानिबन्धेषु सीमायामप्रका
शानि कारयेत् । चैत्यं इष्टकादिभिः रचितस्तम्भादिकम् । स्थलं उन्नतो भूप्रदेशः । निम्नं परिखा । नगा अश्वत्थादयो वृक्षाः
। आदिशब्देन मार्गादीनां कार्पासबीजानामाद्यग्रहणम् । अस्थीनि पशुमनुष्याद्यस्थीनि । तुषाङ्गारकपालैरित्यकरीषादीनाम
न्येषां चिह्नानामप्युपलक्षणम् । तानि धापयेत् । तद्योगमनुबालानां प्रयत्नेन प्रदर्शयेत् । वार्द्धके च शिशूनां ते दर्शयेयुस्तथैव
च ॥ एवं परम्पराज्ञाने सीमाभ्रान्तिर्न जायत इति । प्रदर्शयेदित्यनुषङ्गात् सम्यक्कार्य एवकवचनम् । एतेषां चिह्नानां कर्षणादिद
भावे निर्णयोपायमाह नारदः । निम्नगापहृतोत्सृष्टनष्टचिह्नासु भूमिषु । तत्प्रदेशानुमानेन प्रमाणैर्भोगदर्शनैः ॥ निम्नगा
या नद्या अपहृतेन अपहरणेन उत्सृष्टानि त्यक्तानि नष्टानि चिह्नानि यासां तास्तथोक्ताः । प्रमाणैः साक्षिसामन्तादिभिः । ए
वं निरूपितैर्लिङ्गैर्निर्णयं कुर्य्यादित्याह मनुः । एतैर्लिङ्गैर्नयेत्सीमां राजा विवदमानयोः । यदि संशय एव स्याल्लिङ्गानामपि द
र्शने । साक्षिप्रत्यय एव स्यात्सीमावादविनिर्णयः । साक्षिप्रत्ययः साक्षिहेतुकः । लिङ्गाभावपक्षपरिग्रहार्थोऽपिशब्दः । तै

यत्राश्रिताः सीमाविषयाः सीमालिङ्गविषया वा । सन्दिग्धविषये प्रमाणवृत्तिः । ग्रामसम्बन्धप्रमाणं वा भोगकालश्च मानश्च । भूमा
मयत्राणञ्चैवयेविदुः सोऽयं सीमासंश्रितः ॥ प्रमाणमियन्तश्च भूर्यत्र ग्रामयोर्मध्ये ग्रामभावेऽस्मत्सन्निधौ निर्णयं कुर्युरित्याह मनुः । सा
क्ष्यभावे तु चत्वारो ग्रामाः सामन्तवासिनः । सीमाविनिर्णयं कुर्युः प्रयता राजसन्निधौ । यदा पुनर्लिङ्गानि न सन्ति न सन्ति वा नानि वा सं
दिग्धानि तदा निर्णयोपायमाह याज्ञवल्क्यः । ग्रामसामन्तगणमन्ताः स्थविरादयो गणाः । रक्षसाश्चवनाः सीमाकृषयेषु क्षितिधा
रिणः ॥ सामन्ताः सन्निहितग्रामस्थेवाद्युपभोक्तारः । समग्रामाः सामन्ताश्चत्वारोऽष्टौ द्व्यादिप्रकारेण समसंख्याकाः । तथाच कात्या
यनः । ग्रामो ग्रामस्य सामन्तः क्षेत्रं क्षेत्रस्य कीर्तितम् । गृहं गृहस्य निर्दिष्टं समन्तात्परिरभ्य हि । ग्रामस्य समन्ताच्चतसृषु दि
क्षु परिरभ्य समवस्थिता ग्रामाः सामन्ताः क्षेत्रादावप्येवं ज्ञेयम् । सामन्तानां यदा रागद्वेषादिना प्रकटदोषसद्भावस्तदा साम
न्तवशान्निर्णयः कार्यः तदाह कात्यायनः । स्वार्थसिद्धौ प्रदुष्टेषु सामन्तेष्वर्थगौरवात् । तत्संसक्तैस्तु कर्तव्य उद्धारो नात्र संश
यः ॥ तत्संसक्तैः सामन्तसंसक्तैः । सीमायाः उद्धारः सीमाया निर्णय इत्यर्थः । तथाचैतदुक्तं भवति । चतसृषु दिक्षु स्थितग्राम
न्तग्रामादिभ्योऽनन्तरत्वेन तद्दिक्षु स्थितग्रामादिभोक्तारः सामन्तसंसक्ताः प्रदिष्टा सीमालिङ्गैर्ग्रामादेः सीमानिर्णयेदिति । यद्य
नु सामन्तसामन्तानामपि प्रकटदोषसद्भावस्तदा सामन्तमौलवृद्धाद्यनुक्रमेणाह कात्यायनः । संसक्तसक्तदोषेणसक्तसंसक्ताः प्रकीर्तिता इति ।
सक्तसंसक्ताः संसक्तसंसक्तसक्ता इत्यर्थः । एवं चैतदुक्तं भवति चतसृषु दिक्षु स्थितसंसक्तग्रामादिभ्योऽनन्तरत्वेन तद्दिक्षु स्थितग्रा
मादिभोक्तारः संसक्तसंसक्ताः प्रदिष्टास्ते सीमालिङ्गैर्ग्रामादेः सीमानिर्णयेदिति । यदा पुनरेषामपि प्रकटदोषवत्ता तदा मौला
दिवशान्निर्णयः कार्य इत्यर्थयाह स एव । कर्तव्यामप्रदुष्टास्तु सामन्तानामसंभवे । दुष्टेषु सामन्तान्यानन्यान्मौलादिभि
स्तु ॥ तत्सम्भवप्रकारश्चैव सीमामेवं धर्मविदो विदुः । अन्यग्रामनिवासिनः सीमाविज्ञानभिज्ञान् नगरादौ निश्चयः । नगराद
प्यन्यदर्शितानारदेन । नगरग्रामगणानां ये च वृद्धतमा नराः । सीमालिङ्गज्ञाना बहुनिश्चेयः । मौलादिभिः मौलवृद्धादयः । सं

मिथ्यामेलयित्वा । मौलादीनाञ्चलक्षणान्दर्शितङ्कात्यायनेन । येतत्र पूर्वे सामन्ताः पश्चाद्देशान्तरङ्गताः । तन्मूलत्वात्तु ते मौ
लास्ते ऋषिभिः परिकीर्त्तिताः ॥ निष्पाद्यमानं यैर्दृष्टन्तत्कार्य्यं तेन्वगुणान्वितैः । वृद्धा वा यदि वा वृद्धास्ते च वृद्धाः परीकीर्त्तिताः ॥
न्दगुणान्वितैः पुरुषगुणान्वितैः । वाकारोऽनास्थायां वयोवृद्धत्वस्याप्रयोजकत्वात् । येपरम्परया कार्य्यज्ञातारस्तेऽवृद्धा इत्या
शयः । तथा च संसक्तसंसक्तेषु स्फुटदोषदुष्टेषु पूर्वसामन्तादिषु पितनागारिकग्राम्यजनश्रेणिवयोवृद्धदर्शितैः सम्यक्लिङ्गैः सी
मानिर्णयः कार्य्यः । यदा तु प्रतिवादिना सामन्तेषु कश्चिद्दोषः उद्भावितः ते च न प्रकटदोषयुक्तास्तदोक्तो विशेषो मनुना । साम
न्ताः साधनं पूर्वमनिष्टोक्तौ गुणान्विताः । द्विगुणास्तु ततः प्रोक्ता मौलास्तेऽन्ये त्रिगुणा मताः । अनिष्टोक्तौ प्रतिवादिना गुप्तदोषाभि
धाने तत्सामन्तास्ततो द्विगुणा ग्राह्याः तेष्वपि दोषाभिधाने तत्सामन्तास्ततो द्विगुणा ग्राह्याः तत्रापि तथात्वे मौलवृद्धादयः साम
न्तत्रिगुणा ग्राह्या इत्यर्थः । साक्ष्यादीनामेतेषां यदा त्वभावस्तदाऽऽह मनुः । सामन्तानामभावे तु मौलानां सीम्नि साक्षिणाम्
। इमानप्यनुयुञ्जीत पुरुषान्वनगोचरान् । व्याधान् शाकुनिकान् गोपान् कैवर्त्तान्मूलखानकान् । व्यालग्राहानुञ्छवृत्तीनन्यां
श्च वनगोचरान् । वनगोचराणां ग्रहणं सीमासन्निहितदेशकर्षकाणामसत्त्वे विज्ञेयम् । अत एवोक्तं नारदेन । सीमासु च व
हिर्यैस्युर्येपि तत्कृषिजीविनः । गोपाः शाकुनिका व्याधा ये चान्ये वनगोचराः इति । अत्र च सर्वत्र स्थावरविवादे सेत्वादिविवादे
च सामन्तादयो निर्णायकाः तथा च कात्यायनः । तेषामभावे सामन्ता मौलवृद्धोद्धृतादयः । स्थावरे षट्प्रकारेपि कार्य्या ना
त्र विचारणा । क्षेत्रवास्तुतडागेषु आरामवनसेतुषु । समेतभावात् सामन्तैः कुर्यात्तत्र विनिर्णयम् । ग्रामसीमासु च तथा तद्वन्न
गरदेशयोः । तेषां साक्षिणाम् । याज्ञवल्क्योपि । आरामायतनग्रामनिपानोद्यानवेश्मसु । एष एव विधिर्ज्ञेयो वर्षाम्बुप्रवहा
दिषु । आयतनन्निवेशनन्निपानं पानीयस्थानं वर्षाम्बुप्रवहो वृष्ट्युद्भूतजलप्रवाहः पुनः कात्यायनेपि । क्षेत्रकूपतडागानां के
दारारामयोरपि । गृहप्रासादावसथनृपदेवगृहेषु च । केदारः क्षुद्रसेतुयुक्तः क्षेत्रविशेषः । गोबलीवर्दन्यायेन भिन्नोक्तिः प्र

ह्लादः प्रसदः ॥ बृहस्पतिरपि । सर्वेष्वस्थावरेवादेविधिरेषाप्रकीर्त्तिता । राज्ञायामीणामांवादिप्रतिवादिनोस्वसमक्षं सामन्ताद
यः प्रष्टव्याः तैर्यद्दृष्टन्तत्पत्रेलेखनीयमित्याहमनुः । यामीयककुलानान्तु समक्षं सीम्नि साक्षिणः । प्रष्टव्याः सीमलिङ्गानि तयोश्चै
व विवादिनोः ॥ ते पृष्टास्तु यथाब्रूयुः समस्ताः सीम्नि निर्णयम् । निबध्नीयात्तथा सीमां सर्वांस्तांश्चैव नामतः ॥ सीमलिङ्गसाक्ष्यभि
प्रायेण सीमलिंगानीत्युक्तम् । सीमासाक्षिणस्तु सीमां ब्रूयुः । तथाच बृहस्पतिः । शपथैः शापिताः स्वैः स्वैर्ब्रूयुः सीमाविनिर्णयम् ।
दर्शयेयुश्च लिङ्गानि तत्प्रमाणमिति स्थितिः ॥ स्वैः स्वैः । सत्येन शापयेद्विप्रं क्षत्रियं वाहनायुधैरित्यादिनोक्तव्यवस्थानतिक्रमेणे
त्यर्थः । यदा तु ये सीमालिङ्गसाक्षिणः सीमाचिह्नानि दर्शयितुमशक्नुवन्ति केवलं सीमामात्रं जानन्ति तदा ते कथं ब्रूयुरित्याकांक्षा
यामाह मनुः । शिरोभिस्ते गृहीत्वोर्वीं स्रग्विणो रक्तवाससः । सुकृतैः शापिताः स्वैः स्वैर्नयेयुस्ते समञ्जसमिति ॥ उर्वीं मृदम् ।
सीमाक्रमणाद्यात् इति शेषः । नयेयुरिदं द्वयोर्निसर्गार्थं बहुवचनं नत्वेकस्य । नारदेन । एकश्चेदुन्नयेत्सीमां सोपवासः समु
न्नयेत् । रक्तमाल्याम्बरधरो भूमिमादाय मूर्द्धनीति ॥ एकस्याप्यनुज्ञानात् । बृहस्पतिरपि । ज्ञातृचिह्नैर्विना साधुरेकोप्युभय
संमतः । रक्तमाल्यांवरधरो मृदमादाय मूर्द्धनि ॥ सत्यव्रतः सोपवासः सीमान्तान्दर्शयेन्नरः । ज्ञातृचिह्नैर्विना सीमायाः ज्ञातृणां
लिङ्गानाञ्चासत्वे । ननु कथमेकस्य सीमानिर्णायकत्वम् नैकः समुन्नयेत्सीमान्नरः प्रत्ययवानपि । गुरुत्वादस्य कार्यस्य क्रियैषा बहुषु
स्थिता इत्येकस्य नारदेन निषेधादिति चेन्नैवम् । स्वक्षभयानुमतधर्मविद्व्यतिरिक्तविषयइति मकाप्यनुपपत्तिः । अयञ्च नि
र्णयः सीमाक्रमणादिनादारभ्य पक्षत्रयपर्य्यन्तं साक्षिसामन्तादीनान्दैविकराजिकोपद्रवाभावे अवसेयः न तु सीमाक्रमणाव्यव
हितोत्तरमेव । तथाच कात्यायनः । सीमाचंक्रमणे कोशे पादस्पर्शे तथैव च । त्रिपक्षपक्षसप्ताहन्दैवराजिकमिष्यते । यथासंख्यमि
ति शेषः । यदा तु साक्ष्यादीनाम्पक्षत्रयाभ्यन्तरे दैविकराजिकोपद्रवः अन्यथावा मिथ्यावादित्वनिश्चयस्तदा तेपणाद्दयन्दण्ड
म्प्रत्येकं दाप्याः । तथाच मनुः । यथोक्तेन नयन्तस्ते पूयन्ते सत्यसाक्षिणः । विपरीतन्नयन्तस्तु दाप्याः स्युर्द्विशतन्दमम् । य

योक्तेन शिरोभिस्ते गृहीत्वोर्वीं मिथ्यादिनोक्तप्रकारेण नयन्तो निर्णयं कुर्वन्तः यथाभूतेनार्थेन निवेशेयः । द्विशतं पणाशतद्वयम् । पणाशतद्वयन्दण्डम्प्रत्येकम् । यथोक्तेन शिरोभिस्ते गृहीत्वोदाप्याइत्यर्थः । सामन्तानां मिथ्यावादित्वे सहस्रामध्यमसाहसविकल्पेन दण्डेन दण्डनीयाः । तथा चाह याज्ञवल्क्यः । अनृते तु पृथक्दण्ड्या राज्ञा मध्यमसाहसम् । सामन्ता यद्यनृतं मिथ्याभूतं सीमानिर्णयं कुर्युः तदा मध्यमसाहसं कार्षापणानां चत्वारिंशत् अधिकानि पञ्चाशतानि दण्डनीयाः । नारदोपि । अथ चेदनृतं ब्रूयुः सामन्ताः सीम्नि निर्णये । सर्वे पृथक्पृथक्दण्ड्या राज्ञा मध्यमसाहसं ॥ सामन्तव्यतिरिक्तानामन्येषां मौलादीनां मिथ्यावादित्वे पूर्वसाहसाख्येन दण्डेन प्रत्येकन्ते दण्डनीयाः । तथा च नारदः । शेषाश्चेदनृतं ब्रूयुर्नियुक्ता भूमिकर्मणि । प्रत्येकन्तु जघन्यास्ते विनेयाः पूर्वसाहसमिति । मौलादीनामनृतवादित्वे तमेव दण्डं स एवाह । मौलवृद्धादयश्चान्ये दण्डनीयाः पृथक्पृथक् । विनेयाः प्रथमेनैव साहसेनानृते स्थिताइति । आदिग्रहणेन गोपशाकुनिकादिवनगोचराणां ग्रहणम् । दण्डनीयाः मिथ्यावादित्वेन दण्डयितुमर्हाः मौलवृद्धादयः पृथक्पृथक्प्रथमेन साहसेन विनेया दण्ड्याइत्यर्थः । यद्यपि सामन्तादीनां साक्ष्यपेक्षया दण्डाल्पत्वमुक्तन्तथापि तेषामाचनिकन्दण्डाधिक्यमिति न कोपि दोषः । यद्यपि शाकुनिकादयो बहुधापापरतत्वाल्लिङ्गप्रदर्शनोपयोगेनान्यथा विद्धान साक्षात्सीमानिर्णये उपयुज्यन्ते तथापि वृक्षादि लिङ्गप्रदर्शन एव मिथ्याभावितत्वेसंभवात्तदभिप्रायेणैव दण्डविधानम् । लोभादिनाभेदेनोक्तो अनुक्तौ च साक्ष्यादीनां दण्डमाह कात्यायनः । बहूनान्तु गृहीतानां न सर्वे निर्णयं यदि । कुर्युर्भयाद्वा लोभाद्वा दाप्यास्तूत्तमसाहसं । एवमज्ञानादिना अनृतवचने साक्ष्यादीन्दण्डयित्वा पुनः सीमाविचारः प्रवर्तयितव्यः । तथा च स एवाह । अज्ञानोक्तौ दण्डयित्वा पुनः सीमां विचारयेत् । कीर्तिते यदि भेदः स्यात् दण्ड्यास्तूत्तमसाहसम् । साक्ष्यादीनां सर्वेषां अज्ञानोक्तौ भेदेनोक्तौ च पुनर्विचारणं लेख्यप्रमाणेन कर्तव्यम् । अत एव शंखलिखितावपि । सामन्तविरोधे लेख्यप्रत्ययइति । यदा पुनः सामन्तप्रभृतयो ज्ञातारश्चिह्नानि च न सन्ति तदा राजा लेख्यया निर्णयं कुर्या

न्। तथा च याज्ञवल्क्यः। अभावे ज्ञातृचिह्नानां राजा सीम्नः प्रवर्त्तिता। ज्ञातॄणां सामन्तादीनां लिङ्गादीनां च वृक्षादीनामभावे रा
जैव स्वातन्त्र्येण सीमानं प्रवर्त्तयेत्। नारदोऽपि। यदा च न स्युर्ज्ञातारः सीमायाश्च न लक्षणम्। तदा राजा द्वयोः सीमामुन्नयेदि
ष्टतः स्वयम्॥ इष्टतः इच्छया सार्वविभक्तिकस्तसिः। ग्रामद्वयमध्यवर्त्तिनीं विवादास्पदीभूतां भुवं समं प्रविभज्यास्येयं भू
रित्युभयोः समर्प्य तन्मध्ये सीमालिङ्गानि कुर्य्यात्। यदा तस्यां भूमावुपकारातिशयो दृश्यते तदा तत्रैव सा सकला भूर्योजनीया
न तूभयत्र। तथा च मनुः। सीमायामविषह्यायां स्वयं राजैव धर्मवित्। प्रदिशेद्भूमिमेतेषामुपकारादिति स्थितिरिति। अविष
ह्यायां ज्ञातृचिह्नरहितायाम्। प्रदिशेत् प्रवेशयेदित्यर्थः। अयञ्च निर्णयो राज्ञा निर्णयान्तरवदवच्छिन्नो न परमेव न कर्त्त
व्यः किन्तु सीमालिङ्गानि यदा श्रावरकाद्यभावात् स्फुटं दृश्यन्ते न तदा कर्त्तव्यः तथा च मनुः। सीमां प्रति समुत्पन्ने विवादे ग्रामयोर्द्व
योः। ज्यैष्ठे मासि नयेत् सीमां सुप्रकाशेषु सेतुषु॥ द्वयोर्ग्रामाधिपयोर्विवादे सीमां प्रति समुत्पन्ने ज्यैष्ठे मासि सोऽप्युपलक्षणं मासान्तरे
पि सेतुभृतिषु सीमालिङ्गेषु व्यक्तेषु विवादाध्यासितां सीमां निर्णयेदित्यर्थः। ग्रामग्रहणं नगरादेरुपलक्षणार्थं। अत एव कात्या
यनः। सामन्ताश्चेत् सामन्तैः कुर्यात् क्षेत्रादिनिर्णयम्। ग्रामसीमादिषु तथा तद्वन्नगरदेशयोरिति। यदा पुनर्ग्रामादीनां सी
मात्वेन परिकल्पिता नदी कदाचित् ग्रामान्तरं भित्त्वा प्रवहन्ती दक्षिणभागे स्थितां पूर्वं काञ्चिद्भूमिं वामभागनिविष्टां कुरुते तत्र तथा
यथैकग्रामसम्बन्धिनी भूरन्यत्र राज्ञा योज्यते तत्र निर्णयोपायमाह बृहस्पतिः। अन्यग्रामात् समाहृत्य दत्ता नद्या यदा मही। म
हानद्यथ राज्ञा च कथं तत्र विचारणा। नद्योत्सृष्टा राजदत्ता यस्य तस्यैव सा मही। अन्यथा न भवेल्लाभो नराणां राजदैविकः॥
क्षयोदयौ जीवनञ्च दैवराजवशान्नृणाम्। तस्मात् सर्वेषु कार्येषु तत्कृतं न विचालयेत्॥ न च नदीकृतस्य दैवकृतत्वाभावः शङ्क
नीयः। दैवशब्दस्य भाग्यवाचित्वान्नदीकृतमपि दैवकृतं भवत्येव। तथा चाह स एव। ग्रामयोरुभयोर्यत्र मर्यादा कल्पिता न
दी। कुरुते दानहरणं भाग्याभाग्यवशान्नृणाम्॥ एककूलपातन्तु भूमेरन्यत्र संस्थितिम्। नदीतीरे प्रकुरुते तत्स्वताम्न

विचालयेत्। तस्य नदीवशात्प्राप्तभूमिकस्य तां प्राप्तां भूमिं न विचालयेत्। नान्यथा कुर्यात्पूर्वस्वामी नापच्छिंद्यादित्यर्थः। स एतदनुपन्नसस्यतीरविषयम्। उपन्नसस्यविषये पुनः स एवाह। क्षेत्रं सस्यसमुल्लंघ्य भूमिः छिन्ना यदा भवेत्। नदीस्रोतःप्रवाहेण पूर्वस्वामी लभेत ताम्। तां सस्याम्भूमिं पूर्वस्वामी यावदुत्पन्नस्य सस्यस्य फलप्राप्तिस्तावल्लभेतेत्यर्थः। फलप्राप्तेरूर्ध्वं पुनः पूर्ववचनविषयसमानता। राजदत्तविषये कंचित्प्रतिप्रसवमाह स एव। या राज्ञा क्रोधलोभेन छलन्यायेन वाहृता। प्रदत्तान्यस्य तुष्टेन न सा सिद्धिमवाप्नुयात्॥ स्वल्पहेतुप्रतिग्रहादिलब्धक्षेत्रविषयमेतत्। स्वल्पहेतुप्रतिग्रहादिप्रमाणाभावे पुनः स एवाह। प्रमाणरहितां भूमिं भुञ्जानो यस्य याहृता। गुणाधिकाय वेदत्तां तस्य तां न विचालयेत्॥ प्रमाणरहितां स्वल्पहेतुप्रतिग्रहादिप्रमाणरहिताम्। गृहादिविषयकं निर्णयमाह स एव। निवेशकालादारभ्य गृहचर्योपशादिकम्। येन यावद्यथाभुक्तं तस्य तन्न विचालयेत्॥ येन स्वामिना यावत्प्रचारभूम्यादि युक्तं यथा येन पूर्वादिदिगभिमुखद्वारादियुक्तत्वादिरूपेणोपभुक्तं तस्य स्वामिनः सकाशान्न विचालयेत् नान्यथा कुर्यादित्यर्थः। अत्र निवेशकालादारभ्येत्यभिधानान्मध्ये कृतायाव्यवस्थायानिवर्त्यत्वं दर्शितम्। निवेशकालादारभ्य स्थितानि गवाक्षादिकानि प्रातिवेशिकादृनिष्टकारिण्यपि न निवर्त्यन्त इत्युक्तन्तेनैव। वातायनं प्रणालीं च तथा निर्व्यूहवेदिका। चतुःशालस्यन्दनिकां प्राग्विष्टान्न चालयेत्। वातायनं गवाक्षः। प्रणाली पाषाणादिनिर्मितजलनिर्गमोपायः। निर्व्यूहो द्वारनिर्गतकाष्ठविशेष इति हलायुधकल्पतरौ। निर्व्यूहो गृहकोण इति स्मृतिचन्द्रिकायाम्। वेदिका रथ्यादिप्रदेशसंस्कृतोन्नतभूमिः। चतसृणां शालानां समाहारः चतुःशालम्। तस्मात्स्यन्दनिकावृष्टिजलनिपातः। चतुःशालपदं तृणगृहस्योपलक्षणम्। कात्यायनोपि। मेखलाभ्रमनिःकाशगवाक्षान्नोपरोधयेत्। प्रवाणीं गृहवास्तु स्वपीडयन्दण्डभाग्भवेत्॥ मेखला कुडवमूलबन्धः। भ्रमः जलनिर्गमः। निःकाशः हर्म्यादिभित्तिषु निर्गतं काष्ठादिनिर्मितमस्पृष्टभूमिकमुपवेशनस्थानम्। नोपरोधयेत्। न निरुंध्यात् गृहवास्तुः वासभूमिः। पूर्वमविद्यमानाः परानिष्ट

कारिणा एतेन कर्त्तव्या इत्यप्याह स एव । निवेशनमयादूर्द्धं नैते योज्याः कदाचन । दृष्टिपातं प्रणालीञ्च न कुर्य्यात्परवेश्मसु ॥ दृष्टिपातो गवाक्षः । परवेश्मसु परवेश्माभिमुख्येन । परकुड्यनिकटे पुरीषोत्सर्गादिकमपि न कर्त्तव्यम् ॥ तथा च वृहस्पतिः । वर्चस्थानं वह्निचयङ्गर्त्तोच्छिष्टं वुवेचनम् । अ्रयारात्परकुड्यस्य न कर्त्तव्यं कथञ्चन । वर्चःस्थानम् । पुरीषोत्सर्गस्थानम् । अ्रयारादन्तिसमीपे । अरत्निद्वयवर्ज्जितप्रदेश इत्यर्थः । तथा च कात्यायनः । चिरमूत्रोदकमेकञ्च वह्निश्वभ्रनिवेशनम् । अरत्निद्वयमुत्सृज्य परकुड्यान्निवेशयेत् । संसरणशब्दार्थनिर्वचनपुरःसरं तस्यानिरोद्धव्यत्वमाह वृहस्पतिः । यान्त्यायान्ति जना येन पशवश्चानिवारिताः । तदुच्यते संसरणं न रोद्धव्यं तु केनचित् ॥ तथा च सम्यगनिवारितं संसरणं यस्मिन्निति संसरणनिर्वचनमित्यर्थः । चतुष्पथादयोऽपि न निरोद्धव्याः । तथा च नारदः । अवस्करस्थलश्वभ्रस्यन्दनिकादिभिः । चतुष्पथसुरस्थानराजमार्गान्निरोधयेत् । अवस्करः पुरीषं । गृहादिशोधनार्थं पांशुसमूह इति हरिहरादयः । स्थलं वेदिका श्वभ्रं गर्त्तः । भ्रमो जलनिर्गममार्गः । स्यन्दनिका पटलप्रान्तः । अन्यदपि आदिशब्देन तादृशं ग्राह्यम् । रथ्यामार्गे राजमार्गमनु चतुष्पथे इति कल्पतरुः । न चतुष्पथराजमार्गयोरभेद इति शङ्कनीयमनयोर्भेदात् । तथा च कात्यायनः । सर्वे जनाः सदा येन प्रयान्ति स चतुष्पथः । अनिषिद्धा यथाकालं राजमार्गः स उच्यते ॥ अनिषिद्धा इत्यत्र पूर्वेणान्वयः । यत्र राजपथे रथादि गमनागमनं क्रियते स राजमार्ग इत्यर्थः । क्षेत्रस्य समीपे मध्ये वा यस्य सर्वदा मार्गोऽस्ति तत्र निरोधो न कर्त्तव्यः । तथा च शङ्खलिखितौ । मार्गक्षेत्रे पथि विसर्गे राजमार्गे रथस्य परिवर्त्तनानीति । पथिविसर्गैः पथो विसर्गः । राजमार्गे यावता प्रदेशेन रथैः परिवर्त्तते तावान् प्रदेशो रथस्य कल्प इत्यर्थः । संसरणानामवरोधकारिणा तु दण्डो माषैको दाप्यः । तथाह वृहस्पतिः । यस्तत्र संकरं श्वभ्रमुद्धारोपणमेव च । कामात्पुरीषं कुर्याच्च तस्य दण्डस्तु माषकः ॥ सङ्करोऽत्र शकटादिसङ्कीर्णता । वृक्षोपादानं लतादीनामप्युपलक्षणम् । माषोऽत्र ताम्रिकः दण्डस्य अपराधानुसारेण कल्पयितुमुचितत्वात् । ये तु राजमार्गे पुरीषोत्सर्गादिकं कुर्वते तेषामधिको

दण्डः । तथा च मनुः । समुत्सृजेद्राजमार्गे यस्त्वमेध्यमनापदि । स द्वौ कार्षापणौ दद्यादमेध्यं चाशु शोधयेत् ॥ आपद्गता दिषु तु दण्डस्तेनैवोक्तः । आपद्गतस्तथा वृद्धा गर्भिणी बाल एव च । परिभाषणमर्हन्ति तच्च शोध्यमिति स्थितिः ॥ परिभाषणं रूक्षभाषणम् । तडागादीनां तीर्थध्वंसे दण्डः । तथा च कात्यायनः । तडागोद्यानतीर्थानि योऽमेध्येन विनाशयेत् । अमेध्यं शोधयित्वा तु दण्ड्यः स्यात्पूर्वसाहसम् ॥ ये पुनर्मलिनवस्त्रप्रक्षालनादिना तीर्थानि दूषयन्ति तस्याप्ययमेव दण्ड इत्याह स एव । दूषयेद्यस्तु तीर्थानि स्थापितानि महात्मभिः । पुण्यानि पावनीयानि प्राप्नुयात्पूर्वसाहसम् ॥ मर्यादाप्रभेदनादौ दण्डमाह याज्ञवल्क्यः । मर्यादायाः प्रभेदे तु सीमातिक्रमणे तथा । क्षेत्रस्य हरणे दण्डा अधमोत्तममध्यमाः । अनेकक्षेत्रव्यवच्छेदिका साधारणी भूमिर्मर्यादा सीमा तस्याः प्रकर्षेण भेदने सीमातिक्रमणे सीमामनिलंघ्य कर्षणे क्षेत्रस्य च भयादिप्रदर्शनेन हरणे यथाक्रमेणाधमोत्तममध्यमसाहसदण्डा वेदितव्याः । यत्तु विष्णुवचनम् । सीमाभेत्तारमुत्तमसाहसं दण्डयित्वा पुनः सीमां कारयेदिति । तत्र हि सीमामतिलंघ्य कर्षकः पुनः सीमाकरणम्पुनस्तत्र कर्षकस्याकरणमित्येवं व्याख्येयम् । तेन न पूर्ववचनविरोधः क्षेत्रग्रहणं गृहाद्युपलक्षणार्थम् । अज्ञानात्क्षेत्रादिहरणेऽधर्म एव । यथाह मनुः । गृहं तडागमारामं क्षेत्रं वा भीषया हरन् । शतानि पञ्च दण्ड्यः स्यादज्ञानाद्द्विशतो दमः । वृद्धमनुः । स्थापितां चैव मर्यादामुभयोर्ग्रामयोस्तथा । अतिक्रामन्ति ये पापास्ते दण्ड्या द्विशतन्दमम् । अपह्रियमाणक्षेत्रादिभूयस्त्वे तूत्तमोऽपि दण्डः प्रयोक्तव्यः । वधः सर्वस्वहरणं पुरान्निर्वासनाङ्कने । तदङ्गच्छेद इत्युक्तो दण्ड उत्तमसाहसमिति स्मरणात् ॥ यत्तु शङ्खलिखिताभ्यां सीमातिक्रमणे दण्डाधिक्यमुक्तं । सीमाव्यतिक्रमे त्वष्टसहस्रमिति तत्सम्पूर्णसीमातिक्रमविषयम् । सीमासन्धिषूत्पन्नवृक्षादिफलं नैव ग्राह्यं यथाह कात्यायनः । सीमामध्ये तु जातानां वृक्षाणां क्षेत्रयोर्द्वयोः । फलम्पुष्पञ्च सामान्यं क्षेत्रस्वामिषु निर्दिशेत् ॥ सामान्यं साधारणं क्षेत्रयोः स्वामिषु क्षेत्रस्वामिषु । तथा चान्यतरेणैव तद्वृक्षीयफलादिग्रहणे तदनुरूपेण दण्ड्य इति ध्वनितम् । यदा पुनरन्यक्षेत्रे वृ

क्षादि रूत्पन्नोऽन्यक्षेत्रे शाखादि प्ररूढाः तत्र कः स्वामी स्यादित्याकाङ्क्षायां स एवाह । अन्यक्षेत्रे तु जातानां शाखा यत्रान्यसंस्थिताः । स्वा
मिनं तं विजानीयाद्यस्य क्षेत्रस्य संश्रिताः । संश्रिताः प्ररूढाः । परक्षेत्रे प्रार्थनया क्रियमाणं सेतुकूपादिकं क्षेत्रस्वामिना न निषेद्धव्यं त
थाह याज्ञवल्क्यः । न निषेध्योऽल्पबाधस्तु सेतुः कल्याणकारकः । परभूमिं हरन् कूपः स्वल्पक्षेत्रो बहूदकः ॥ अल्पबाधः अल्पपीडाका
रः कल्याणकारको बहूपकारकः । स्वल्पक्षेत्रः स्वल्पक्षेत्रवर्त्ती आभ्यां विशेषणाभ्यां यः सेतुः क्षेत्रमध्यवर्त्तितया बहुपीडाकरो तदा
दिष्टु संनिहितक्षेत्रवर्त्तितया अल्पोपकारको वा न तदा निषेद्धव्य इति दर्शितम् । तथ नारदोऽपि । परक्षेत्रस्य मध्ये तु सेतुर्न प्रतिषि
ध्यते ॥ महागुणोऽल्पदोषश्चेद्वृद्धिरिष्टा क्षये सति ॥ क्षये अल्पक्षेत्रक्षये सत्यपि वृद्धिर्यतः इष्टा अतो महागुणः स्वक्षेत्रेऽपि उपका
रकरोऽल्पदोषश्चेत्तदा न प्रतिषेद्धव्य इत्यर्थः । अन्यक्षेत्रे सेतुकूपादिवर्त्तनं तत्स्वाम्याद्याज्ञालाभपूर्वकं कर्त्तव्यमित्याह याज्ञव
ल्क्यः । स्वामिने योऽनिवेद्यैव क्षेत्रे सेतुं प्रवर्त्तयेत् । उत्पन्ने स्वामिनो भोगस्तदभावे महीपतेः । यस्तु क्षेत्रस्वामिनं तद्वंश्यं तदभा
वे राजानं वा प्रार्थ्य अर्थादानेन वा तत्क्षेत्रे सेत्वादिकं करोति स सेत्वाद्युत्पन्नफलोपभोगं दृष्टमदृष्टं वा न लभते किन्तु तत्स्वाम्येव तल्लभते
तदभावे राजा । अतस्तदाज्ञां गृहीत्वा सेत्वादिकं कर्त्तव्यमित्यर्थः । जीर्णानां अन्यदीयसेत्वादीनां उद्धारोऽपि तत्स्वाम्याद्यनुज्ञां गृ
हीत्वा कार्य इत्याह नारदः । पूर्वप्रवृत्तमुत्पन्नमपृष्ट्वा स्वामिनन्तु यः । सेतुं प्रवर्त्तयेद्यस्तु न स तत्फलभाग्भवेत् ॥ मृते तु स्वामिनि पु
नस्तद्वंश्ये वापि मानवे । राजानमामन्त्र्य ततः कुर्य्यात्सेतुप्रवर्त्तनम् । अतोऽन्यथा क्लेशभाक् स्यान्मृगव्याधनिदर्शनात् । मृगव्याधदृ
ष्टान्तः स्फुटीकृतस्तेनैव । इषवस्तस्य नश्यन्ति यो विद्धमनुविध्यति । तस्य मृगव्याधस्य । कात्यायनोऽपि । अस्वाम्यनुमतेनैव संस्का
रं कुरुते तु यः । गृहोद्यानतडागानां संस्कर्त्ता लभते न तु ॥ देयं स्वामिनि चायाते तन्निवेद्य नृपे यदि । अथावेद्य प्रयुक्तस्तु तद्वृतं
लभते व्ययम् ॥ स्वयं अनावेद्य गृहोद्यानतडागादिसंस्कारार्थं व्ययं तत्स्वामिनि यामान्तरादागते तेन देयमपि न प्राप्नोति । स्वयं नि
वेद्य संस्कारं करोति तदा व्ययं प्राप्नोति । फलन्तु स्वाम्यनुमत्यभावेन प्राप्नोतीत्यर्थः । यः परक्षेत्रे मद्दमिदं ब्रवामीत्युरीकृत्य पश्चा

द्रोनक्षयन्तेनाप्यन्येन कर्षयेत्तत्सम्प्रत्याह याज्ञवल्क्यः । फालाहतमपि क्षेत्रं न कुर्य्यान्न कारयेत् । स प्रदाप्यः कृष्टफलं क्षेत्रमन्येन कारयेत् ॥ यद्यपि फालाहतं किञ्चिद्धलेन विदारितं तथाऽपि बीजावापयोग्यं न भवति तथाप्यकृष्टक्षेत्रस्य फलं यावत्तत्रोत्पत्तियोग्यं सामन्तादिकल्पितं तावत्स क्षेत्रस्वामिने दापनीयः । तच्च पूर्वकर्षकादाच्छिद्य परेण कारयेत् । व्यासोऽपि । क्षेत्रं गृहीत्वा यः कश्चिन्न कुर्य्यान्न च कारयेत् । स्वामिने स शदं दाप्यो राज्ञे दण्डं च तत्समम् ॥ शदं क्षेत्रफलम् । तत्सममिति तदनुरूपमित्यर्थः । स्वामिग्राह्यं क्षेत्रफलमपि कियदित्याकाङ्क्षायां स एवाह । चिरावसन्ने दशमं कृष्यमाणे तथाऽष्टकम् । सुसंस्कृतेऽपि षष्ठं स्यात्परिकल्प्यं यथास्थितिरिति । चिरावसन्ने चिरकालसंकष्टक्षेत्रेऽहमिदं कृषामीत्यूरीकृत्योपेक्षिते वामनैर्यथास्थिति क्षेत्रस्थित्यनुसारेणैतावदन्यान्युपयोज्यमिति परिकल्प्य क्षेत्रस्वामिने तस्माद्दशमभागः कृष्यमाणे त्वचिरावसन्नेऽत्यनुपेक्षिते तु त्वष्टममभागं सुसंस्कृतेऽनुपेक्षितं षष्ठभागं दाप्य इत्यर्थः । यस्तु क्षेत्रस्वामिनः सामर्थ्ये वैकल्यादिनाऽथो लाघवावस्थां प्राप्ते क्षेत्रस्वाम्यनिवारितस्सन् स्वयमेव तत्कर्षणादि कुरुते तेन तदा स क्षेत्रस्वामिने फलं न दापनीयः । किन्तु तस्य फलं स्वयमेव गृह्णीयादित्याह नारदः । अशक्तप्रेतनष्टेषु क्षेत्रिकेष्वनिवारितः । क्षेत्रं चेद्विकृषेत्कश्चिदश्नुवीत स तत्फलम् ॥ प्रेता मृताः । नष्टाः कुत्र गता इति चिरमपरिचिताः ॥ क्षेत्रिकेषु क्षेत्रस्वामिषु तेन क्षेत्रस्वामिना तत्पुत्रादिना वा समागतेनैवं विधाय कर्षादि खिलभञ्जनार्थं व्ययद्रव्यं वस्तीयं क्षेत्रं ग्राह्यमिति स एवाह । विकृष्यमाणे क्षेत्रे तु क्षेत्रिकः पुनराव्रजेत् । खिलोपचारं तत्सर्वं दत्त्वा क्षेत्रमवाप्नुयात् ॥ अर्धखिलावस्था कदा क्षेत्रस्य भवतीत्याकाङ्क्षायां स एवाह । संवत्सरेणार्द्धखिलमितः स्याद्वत्सरैस्त्रिभिः । पञ्चवर्षावसन्नं तु क्षेत्रं स्यादटवीसमम् । कर्षणरहितं संवत्सरेणार्द्धखिलं भवति तदसाध्यं भवति वर्षत्रयेण तद्रहितं खिलं महायाससाध्यं भवति । वर्षपञ्चकेन तद्रहितं क्षेत्रमटवीतुल्यं स्यात् । अतिदुष्कर्षं भवेदित्यर्थः । खिलभञ्जनार्थं व्ययदानासामर्थ्ये क्षेत्रस्वामिनः क्षेत्रफलस्याष्टमो भागः कर्षकेणाष्टवर्षाष्टकं स्वामिने देयः । अवशिष्टं सर्वं स्वयमेव ग्राह्यम् । क्षेत्रं च वर्षाष्टकानन्तरं स्वामिने देयम् ।

तथा च कात्यायनः । अशक्तितो न दद्याच्चेत् खिलार्थं यः कृतो व्ययः । तदष्टभागहीनं तु कर्षकः फलमाप्नुयादिति ॥ वर्षाख्ये
ष्टौ स भोक्तास्यात्परतः स्वामिने तु तदिति ॥ इति सीमाविवादाख्यव्यवहारपदम् ॥ ● ॥ अथ दण्डपारुष्याख्यव्यवहारपदम्
। तत्स्वरूपं दर्शयति । नारदः । परगात्रेष्वभिद्रोहो हस्तपादायुधादिभिः । भस्मादिभिश्चोपघातो दण्डपारुष्यमुच्यते
इति । परगात्रेषु स्थावरजङ्गमात्मकेषु । आदिग्रहणात्पाषाणादीनां ग्रहणम् । तथाभिद्रोहो हिंसनं दुःखोत्पादनम्भ
स्मादिभिरित्यादिग्रहणाद्रजःपङ्कपुरीषादीनां ग्रहणं । उपघातः संस्पर्शनरूपं मनोदुःखोत्पादनम् । तदुभयं दण्डपारुष्य
मित्यर्थः । तस्यैव त्रैविध्यमाह स एव । तस्यापि दृष्टं त्रैविध्यं हीनमध्योत्तमक्रमात् । अवगोरणनिःशङ्कपातनक्षतदर्शनैः ॥ ही
नमध्योत्तमानां च द्रव्याणां समतिक्रमात् । त्रीण्येव साहसान्याहुस्तत्र कण्टकशोधनमिति ॥ अवगोरणं ताडनाद्युद्योगः । निः
शङ्कपातनं निःशङ्कप्रहरणम् । त्रीण्येव साहसानि त्रिप्रकारस्यैव साहसस्थानानि दण्डपारुष्याणीत्यर्थः । अन्यानपि भेदाना
ह परिशिष्टकारः । दुःखं रक्तं व्रणं भङ्गश्छेदनं भेदनं तथा । कुर्याद्यः प्राणिनां तद्धि दण्डपारुष्यमुच्यते इति । स्थावरजं
गमप्राणिनां प्राण्यन्तरं हननखादिना छेदनादिभवं दुःखं रक्तव्रणादिकञ्च दण्डपारुष्यमुच्यत इत्यर्थः । व्यासोपि । भस्मादि
ना प्रक्षिपणी ताडनञ्च करादिना । आवेष्टनं चांशुकाद्यैर्दण्डपारुष्यमुच्यत इति । आदिग्रहणाद्दुःखकरं कर्दमपांशुमलादिद्र
व्यं गृह्यते । करादिनेत्यादिशब्देन पाषाणेष्टकायुधादिद्रव्यं । अंशुकाद्यैरित्यादिशब्देन रज्जुशृङ्खलादि द्रष्टव्यं । दण्डपारुष्यस्य
पञ्चप्रकारा विषया नारदेन दर्शिताः । विधिः पञ्चविधस्तूक्त एतयोरुभयोरपि । पारुष्ये सति संरम्भादुत्पन्ने क्रुद्धयोर्द्वयोः ॥
स मान्यते यः क्षमते दण्डभाग्योऽतिवर्तते । पूर्वमाक्षारयेद्यस्तु नियतं स्यात्स दोषभाक् । पश्चाद्यः सोप्यसत्कारी पूर्वे तु विनयो
गुरुः । द्वयोरापन्नयोस्तुल्यमनुबध्नाति यः पुनः ॥ स तयोर्दण्डमाप्नोति पूर्वो वा यदि वेतरः । पारुष्यदोषावृतयोर्युगपत्सम्प्र
वृत्तयोः । विशेषश्चेन्न लक्ष्येत विनयः स्यात्समस्तयोः ॥ श्वपाकषण्ढचाण्डालव्यङ्गेषु वधवृत्तिषु । हस्तिपव्रात्यदासेषु गुर्वाचार्य

न्त्यपेषु च। मर्य्यादातिक्रमे सद्यो घात एवानुशासनम्। यमेव ह्यतिवर्त्तेरन्नेते सन्तञ्जनं नृषु। स एव निस्संशयं कुर्य्यात्तद्विनय
भाग्नृपः। मला ह्येते मनुष्याणान्धनमेषां मलात्मकम्। अतस्तान्घातयेद्राजा नार्थदण्डेन दण्डयेदिति। अयमर्थः। वाग्दं
डपारुष्ययोरुभयोरपि द्वयोः प्रवृत्तकलहयोर्मध्ये यः क्षमते न तस्य केवलं दण्डाभाव एव किन्तु पूज्यत्वमपि। तथा पूर्वे कलहे
प्रवृत्तस्य दण्डगुरुत्वम्। कलहे च वद्धवैरानुसन्धातुरेव दण्डभाक्त्वम्। तथा नयोर्द्वयोरपराधविशेषापरिज्ञाने सम एव दण्डः।
तथा श्वपचादिभिरार्याणामपराधे कृते सज्जना एव दण्डदाने अधिकारिणस्तेषामशक्यत्वे तान् राजा घातयेद्धनार्थं गृह्णीया
दिति। यत्तु बृहस्पतिवचनं। आक्रुष्टस्तु समाक्रोशन्ताडितः प्रतिताडयन्॥ हत्वापराधिनञ्चैव नापराधी भवेन्नर इति। तत्पू
र्वप्रवृत्तसमन्दंडं। पश्चात्प्रवृत्तस्यनेत्येवम्परं नतु दण्डाभावपरम्। दण्डपारुष्यस्वरूपसन्देहे निर्णायकमाह याज्ञवल्क्यः।
असाक्षिकहते चिह्नैर्युक्तिभिश्चागमेन च। द्रष्टव्यो व्यवहारस्तु कूटचिह्नकृतो भयादिति। यदा कश्चित् [illegible] नेमाहमइति स
ञ्ज्ञेनिवेदयति तदा चिह्नैर्व्रणादिभिस्तत्स्वपगतैर्लिङ्गैः युक्तिभिः कारणप्रयोजनपर्य्यालोचनादिभिः आगमेन जनप्रवादेन च शङ्का
द्दिव्येन वा कूटचिह्नकृतसम्भावनभयात्परीक्षा कार्य्येत्यर्थः। एवन्निश्चिते साधनविशेषाद्दण्डविशेषमाह स एव। भस्मपङ्कर
जःस्पर्शे दण्डो दशपणः स्मृतः। अमेध्यपार्ष्णिनिष्ठ्यूतस्पर्शने द्विगुणस्ततः। समेष्वेवम्परस्त्रीषु द्विगुणस्तूत्तमेषु च। हीने
ष्वर्द्धदमो मोहमदादिभिरदण्डनमिति। अमेध्यानि अश्रुश्लेष्मादीनि। पार्ष्णिः पादस्य पश्चिमो भागः॥ निःष्ठ्यूतं मुखनि
स्सारितञ्जलम्। मोहश्चित्तवैकल्यं मदो मद्यपानजन्योऽवस्थाविशेषः। आदिशब्देन ग्रहावेशादीनां ग्रहणम्। पुरीषादि
स्पर्शने त्वाह कात्यायनः। छर्द्दिमूत्रपुरीषाद्यैः स्पर्शने स चतुर्गुणः। षड्गुणः कायमध्ये स्यान्मूर्द्ध्नि त्वष्टगुणः स्मृत इति। ता
डनाय हस्तस्योद्गूरणे दण्डमाह स एव। उद्गूरणे तु हस्तस्य कार्यो द्वादशको दमः। स एव द्विगुणः प्रोक्तः पातने तु सजातिष्वि
ति। बृहस्पतिरपि। उद्यते शस्त्रशिलाकाष्ठे कर्त्तव्यः प्रथमो दम इति। विष्णुरपि। हस्तेनोद्गूरयिता दशकार्षापणान्पादे

नविंशतिङ्काष्ठेनप्रथमसाहसंशस्त्रेणोत्तममिति । दण्डइत्यनुवर्त्तते । अधमःशस्त्रेणोत्तमस्ययदोदूरगाङ्कोतितदा साबुत्तमसाहसन्दण्ड्यइत्यर्थः । बृहस्पतिरपि । मध्यमःशस्त्रसम्पातेसंयोज्यस्तुधयोर्द्वयोः । कार्यःकृतानुरूपस्तुलग्नेघातेदमोबुधैः । इष्टिकोपलकाष्ठेनताडनेतुद्विमाषकः । द्विगुणःशोणितोद्भेदेदण्डःकार्योमनीषिभिरिति । विष्णुरपि । शोणितेनविनादुःखमुत्पादयित्वाद्वात्रिंशत्पणान्सह शोणितेनचतुःषष्ठिमिति । अत्रसर्वत्रदण्डभेदोऽपराधाल्पत्वमहत्वानुसारेणव्यवस्थापनीयइति । ताडनार्थेहस्तपादाद्युद्योगेदण्डविशेषमाहयाज्ञवल्क्यः । उद्गूर्णेहस्तपादेतुदशविंशतिकौदमौ । परस्परन्तुसर्वेषांशस्त्रेमध्यमसाहसमिति । हस्तेपादेवाताडनार्थमुद्यतेयथाक्रमन्दशविंशतिपणकौदमौ । परस्परंवधार्थंशस्त्रउद्यतेसर्वेषांवर्णानांमध्यमसाहसोदण्डइत्यर्थः । काष्ठादिभिस्ताडनेयोग्याहसएव । शोणितेर्नविनादुःखंकुर्वन्काष्ठादिभिर्नरः । द्वात्रिंशतम्पणान्दण्ड्योद्विगुणोदर्शनेऽसृजइति । त्वङ्मांसास्थिभेदेमनुराह । त्वग्भेदकःशतंदण्ड्योलोहितस्यचदर्शकः । मांसभेत्तातुषण्णिष्कान्प्रवास्यस्त्वस्थिभेदकइति । मांसभेत्ताव्रणकर्त्ता । कात्यायनोऽपि । कर्णौष्ठघ्राणपादाक्षिजिह्वाशिश्नकरस्यच । छेदनेचोत्तमोदण्डोभेदनेमध्यमोभृगुरिति । पादाद्याघर्षणादौत्वाहयाज्ञवल्क्यः । पादकेशांशुककरोल्लुञ्चनेषुपणान्दश । पीडाकर्षांशुकावेष्ट्यपादाध्यासेशतन्दमः । पादकेशकरांशमन्यतमंगृहीत्वायउल्लुञ्चतिझटित्याकर्षयत्यसौदशपणान्दण्ड्यः । योवस्त्रेणावेष्ट्यगाढंसंपीड्याकृष्यपादेनघट्टयतिसशतम्पणान्दण्ड्यइत्यर्थः । कर्णादिभङ्गेत्वाहसएव । करपाददतोभङ्गेछेदनेकर्णनासयोः । मध्योदण्डोव्रणोद्भेदेमृतकल्पहतेतथा ॥ चेष्टाभोजनवाग्रोधेनेत्रादिप्रतिभेदने । कन्धराबाहुसक्थ्नांचभङ्गेमध्यमसाहसः ॥ एकघ्नतांबहूनाञ्चयथोक्ताद्द्विगुणोदमइति । करपाददन्तानांप्रत्येकम्भेदेकर्णनासिकयोश्चछेदनेमृतकल्पहतेचमध्यमसाहसोदण्डः । गमनभोजनभाषणनिरोधेनेत्रादिप्रतिभेदनेचग्रीवाबाहूरुभङ्गेचमध्यमसाहसएवदण्डः । मिलित्वैकस्यांगभंगंकुर्वतांबहू

नायस्मिन्नपराधे योदण्डउक्तस्तत्रतत्रतस्माद्द्विगुणोदण्डः प्रत्येकं मन्तव्य इत्यर्थः । कात्यायनोपि । मनुष्याणाम्पशूनाञ्चदुः खायप्रहृतेसति । यथामहत्तरन्दुःखन्दण्डं कुर्यात्तथातथेति । प्रातिलोम्यापराधेदण्डमाहयाज्ञवल्क्यः । विप्रपीडाकरञ्छेद्यमङ्गमब्राह्मणस्यतु । उद्गूर्णे प्रथमोदण्डः संस्पर्शे तु तदर्द्धिकइति । अब्राह्मणस्यक्षत्रियादेः । संस्पर्शेश्रस्त्रादिस्पर्शे । तदर्द्धिकः प्रथमसाहसार्द्धदण्ड इत्यर्थः । ब्राह्मणवधार्थमुद्यतेशस्त्रे प्रथमसाहसाभिधानंनशूद्रविषयम् । अतएवमनुः । येनकेनचिदङ्गेनहिंस्याच्छ्रेयांसमन्त्यजः । छेत्तव्यन्तत्तदेवास्यतन्मनोरनुशासनम् । पाणिमुद्यम्यदण्डंवापाणिच्छेदनमर्हतीति । अतःक्षत्रियवैश्ययोः पीडाकारिणोपिशूद्रस्यायमेवदण्डः । श्रेयांसमितिसामान्येनोपादानात् । समानन्यायत्वात्क्षत्रियपीडाकारिणोवैश्यस्यतुयाज्ञवल्क्यप्रतिपादितएवदण्डः । अस्मादिसंस्पर्शे पुनःक्षत्रियवैश्ययोः प्रातिलोम्यापवादे षुद्विगुणत्रिगुणादमाइतिवक्ष्यमाणवाक्पारुष्यन्यायेनकल्प्यः । नारदोपि । येनाङ्गेनापरोवर्णोब्राह्मणस्यापराध्नुयात् । तदङ्गन्तस्यछेत्तव्यमेवंशुद्धिमवाप्नुयात् । राजनिप्रहरेद्यस्तुकृतागस्यपिदुर्मतिः । शूल्यन्तमग्नौविपचेद्ब्रह्महत्याशताधिकेति । कृतागसिकृतापराधे । शूलमारोपयेत्संस्थितेयेतनच्छूल्यं । प्रातिलोम्यानुलोम्यविषयेवाक्पारुष्येउक्तान्दण्डानतिदिशतिकात्यायनः । वाक्पारुष्येयथैवोक्ताः प्रातिलोम्यानुलोमतः । तथैवदण्डपारुष्येपात्याद्दण्डायथाक्रममिति । शूद्रस्यतत्राप्यङ्गच्छेदएव । तथाचाहतुर्मनुनारदौ । अवनिष्ठीवतोदर्पाद्द्वावोष्ठौछेदयेन्नृपः । अवमूत्रयतोमेढ्रमवशर्द्धयतोगुदम् । केशेषुगृह्णतोहस्तौछेदयेदविचारयन् । पादयोर्दाढिकायांचग्रीवायांवृषणेषुचेति । ताडनेदुःखहरणाद्युक्तमाहकात्यायनः । देहेन्द्रियविनाशेतुयथादण्डंप्रकल्पयेत् । तथातुष्टिकरंदेयंसमुत्थानञ्चपण्डितैरिति । तुष्टिकरंव्रणितुष्टिकरं । समुत्थानंव्रणोपशान्तिनिमित्तकव्ययःव्रणगौरवाद्यनुसारेणपण्डितैः औषधार्थपथ्यार्थञ्चकल्पितमाव्रणशोषणांदेयम् । समुत्थानव्ययञ्चदाप्यःसर्वन्दण्डमेवच । अव्रणातु व्रणरोपणमितितेनैवोक्तत्वात् । यत्कालंदुःखकालेऽपहृतमन्नपानादिमनेदानचमित्याहबृहस्पतिः । अङ्गावपीडनेचैवभे

र्दने छेदने तथा । तच्च यस्मात्प्रोक्तः कलहापहृतञ्च यदिति । याज्ञवल्क्योऽपि । कलहापहृतन्देयन्दण्डश्च द्विगुणस्ततः । दुः
खमुत्पादयेद्यस्तु स समुत्थानजं व्ययम् ॥ दाप्यो दण्डं च यो यस्मिन् कलहे समुदाहृत इति । ग्राम्यपश्वभिद्रोहे दण्डमाह विष्णुः
ग्राम्यपशुघाती कार्षापणशतं दण्ड्यः पशुस्वामिने तु तन्मूल्यन्दद्यादिति ॥ मूल्यदानमृतपशुविषयम् । मरणाभावे तु समुत्थानव्य
यं दद्यात् । तथा च स एव । सर्वे पुरुषपीडाकराः समुत्थानव्ययं दाप्याः ग्राम्यपशुपीडाकराश्चेति । बहुभिरेकस्य हनने दण्डमा
ह स एव । एकं बहूनां घ्नतां प्रत्येकमुक्तो दण्डो द्विगुण इति । सम्भूय ताडनञ्चैवं क्रोशन्तं ताड्यमानमुपेक्षमाणानान्तत्समी
पवर्तिनामपि तमेव दण्डं स एवाह । द्विगुणमुक्तः क्रोशन्तमनभिधावतां तत्समीपवर्तिनां सतां चेति । क्वचिदशक्यप्रतीकारविषये
प्राणिघातनिबन्धनो दण्डो नेत्याह मनुः । छिन्ननास्ये भग्नयुगे तिर्यक्प्रतिमुखागते । अक्षभङ्गे च यानस्य चक्रभङ्गे तथैव च । छेद
ने चैव यन्त्राणां योक्त्ररश्म्योस्तथैव च । आक्रन्दे चाप्यपैहीति न दण्डं मनुरब्रवीदिति । छिन्ननास्ये बलीवर्दादेर्नासिकास्वार
ज्ज्वादौ त्रुटिते । युगे भग्ने शकटादियुगकाष्ठभग्ने । यन्त्राणां शकटादिकाष्ठानामन्यबन्धनानां रज्ज्वादीनां । शक्यप्रतीकारे तु प्रेक्ष
कस्याह स एव । यत्रापवर्तते युग्यं वैगुण्यात्प्राजकस्य तु । तत्र स्वामी भवेद्दण्ड्यो हिंसायां द्विशतन्दममिति । प्राजकः शक
टादिनेता । द्विशतग्रहणात्प्राणिहिंसायां विशेषविहितदण्डोपलक्षणार्थमिति स्मृतिचन्द्रिकायाम् । यत्र समर्थप्राजकदो
षेण प्राणिहिंसा न तत्र स्वामिनो दण्डः किन्तु प्राजकस्येत्याह स एव । प्राजकश्चेद्भवेदाप्तः प्राजको दण्डमर्हतीति । आप्तः सम
र्थ इत्यर्थः । स्थावरप्राणिपीडायां स एवाह । वनस्पतीनां सर्वेषामुपभोगो यथा यथा । तथा तथा दमः कार्यो हिंसायामिति धारणा
ति । वनस्पतिग्रहणं स्थावरप्राणिमात्रोपलक्षणम् । उपभोगो यथा यथेत्यनेन येषामाम्रादीनां फलमुपभुज्यते तेषां हिंसाया
मधिको दण्डः । येषां चम्पकादीनां पुष्पमुपभुज्यते तेषां ततो न्यूनः । येषां पत्रमुपभुज्यते तेषां ततोऽपि न्यून इति दर्शितम् । ए
तदेव विवरणपूर्वकं विष्णुराह । फलोपभोगद्रुमच्छेदी तूत्तमसाहसं पुष्पोपभोगच्छेदी मध्यमसाहसं वल्लीगुल्मलताच्छेदी

कार्षापणशतं तृणच्छेदेऽर्कसर्वे तत्स्वामिना तदुत्पत्तिमिति । दण्ड इत्यनुवर्त्तते । सर्वे फलोपभोगद्रुमच्छेदादयः तत्स्वामिनाच्छिन्नद्रुमादिस्वामिना तदुत्पत्तिफलभोगद्रुमाद्युत्पत्तिं पुनः प्रतिरोपितभोगकालपर्यन्तं प्राप्नुयुरिति शेषः । पशुभिद्रोहे दण्डमाह याज्ञवल्क्यः । दुःखे च शोणितोत्पादे शाखाङ्गच्छेदने तथा । दण्डः क्षुद्रपशूनां स्याद्द्विपणप्रभृतिः क्रमात् ॥ लिङ्गस्य छेदने मृत्यौ मध्यमो मूल्यमेव च । महापशूनामेतेषु स्थानेषु द्विगुणो दमः इति ॥ क्षुद्रपशूनामजाविकप्रभृतीनाम् । ताडनेन दुःखोत्पादने । शोणितोत्पादे रक्तस्रावणे । शाखा शृङ्गे नासशृङ्गादिकं गृह्यते अङ्गानि करचरणादीनि तेषां छेदने च यथाक्रमं द्विपणप्रभृतिर्दण्डः । द्विपणश्चतुष्पणः षट्पण इत्येवं रूपः । तेषां लिङ्गच्छेदने मारणे च मध्यमसाहसो दण्डः स्वामिने मूल्यदानं च । महापशूनां गोगजवाजिप्रभृतीनामेतेषु स्थानेषु पूर्वोक्ताद्दण्डाद्द्विगुणो दण्डो वेदितव्य इत्यर्थः । विष्णुरपि । पशूनां पुंस्त्वोपघातीति कार्षापणशतं तमन्नप्रकृतं । स एव । गवाश्वोष्ट्रगोघाती त्वेककरपादः कार्यो विमांसविक्रयी च ग्राम्यपशुघाती कार्षापणशतं दण्ड्यः । पशुस्वामिने च तन्मूल्यं दद्यात् । आरण्यपशुघाती पञ्चाशतं कार्षापणान् । पक्षिघाती मत्स्यघाती च दश कार्षापणान् । कीटोपघाती कार्षापणमिति । विमांसं मृगालादिमांसमिति कल्पतरौ । कात्यायनोऽपि । द्विपणो द्वादशपणो वधे तु मृगपक्षिणाम् । सर्पमार्जारनकुलश्वसूकरवधे नृणाम् । गोकुमारीर्देवपशूनुक्षाणं वृषभं तथा ॥ वाहयन्साहसं पूर्वं प्राप्नुयादुत्तमं वधे इति ॥ परकुड्याभिघाते परगृहे कण्टकादिप्रक्षेपे च दण्डमाह याज्ञवल्क्यः । अभिघाते तथा छेदे भेदे कुड्यावपातने । पणान्दाप्यः पञ्चदश विंशति तद्व्ययं तथा ॥ दुःखोत्पादि गृहे द्रव्यं क्षिपन्प्राणहरं तथा । षोडशाद्यः पणान्दण्ड्यो द्वितीयो मध्यमं दममिति ॥ मुद्गरादिना कुड्यस्याभिघाते विदारणे द्वैधीकरणे च यथाक्रमं पञ्चपणो दशपणो विंशतिपणो दण्डः । कुड्यस्यावपातने तु समुच्चिता एते त्रयो दण्डा ग्राह्याः । कुड्यसम्पादनार्थं च धनमपि तत्स्वामिने दद्यात् । परगृहे कण्टकादिप्रक्षेपणे षोडशपणो दण्डः । विषभुजङ्गादिप्रक्षेपणे मध्यमसाहसो दण्ड इत्यर्थः । स्थावराभिद्रोहे दण्डमाह

स एव । प्ररोहिशाखिनां शाखास्कन्धसर्वविदारणे । उपजीव्यद्रुमाणां तु विंशतेर्द्विगुणो दमः ॥ चैत्यश्मशानसीमासु पुण्य
स्थानेसुरालये । जातद्रुमाणां द्विगुणो दमो वृक्षेथ विश्रुते । गुल्मगुच्छक्षुपलताप्रतानौषधिवीरुधां । पूर्वस्मृतादर्द्धदण्डः स्था
नेषूक्तेषु कर्त्तने इति ॥ प्ररोहिशाखिनां वटादीनां शाखाच्छेदने स्कन्धच्छेदने समूलवृक्षच्छेदने च यथाक्रमं विंशतिपणाद्दण्डादा
रभ्य पूर्वस्मादुत्तरोत्तरं द्विगुणो दण्डः । विंशतिपणश्चत्वारिंशत्पणोशीतिपण इत्येवंरूपः । अप्ररोहिशाखिनामाम्रादीनामुपजी
व्यद्रुमाणां पूर्वोक्तेषु स्थानेषु छेदने पूर्वोक्ता एव दण्डाः । चैत्यादिस्थानेषूत्पन्नानां वृक्षाणां शाखादिच्छेदने पूर्वोक्ताद्दण्डाद्द्विगुणाः
। विश्रुते चाश्वत्थपलाशादिके द्विगुणो दण्डः । गुल्मा मालत्यादयः गुच्छाः कुरण्टकादयः क्षुपाः करवीरादयः लताः द्राक्षातिमुक्ता
दयः । प्रतानाः कांडप्ररोहरहिताः । ओषध्यः फलपाकान्ताः शालिप्रभृतयः । वीरुधः गुडूचीप्रभृतयः । एतेषु पूर्वोक्तेषु स्था
नेषु विकर्त्तने छेदने पूर्वोक्ताद्दण्डादर्द्धदण्डो वेदितव्य इत्यर्थः । भार्य्यादीनामपराधे रज्जुवेणुदलाभ्यामधमांगे ताडयेत् ।
अन्येनोत्तमांगे च ताडयन्दण्ड्य इत्याह यमः । भार्या पुत्रश्च दासश्च दासी शिष्यश्च पञ्चमः । प्राप्तापराधास्ताड्याः स्यू रज्ज्वा वेणुदले
न वा ॥ अधस्तात्तु प्रहर्त्तव्यं नोत्तमाङ्गे कथञ्चन । अतोऽन्यथा प्रवृत्तस्तु यथोक्तं दण्डमर्हतीति ॥ भार्या पुत्रश्च शिष्यश्च दासो भ्राता
च सोदरः । प्राप्तापराधास्ताड्याः स्यू रज्ज्वा वेणुदलेन वा ॥ पृष्ठतस्तु शरीरस्य नोत्तमांगे कथञ्चन । अतोन्यथा तु प्रहरन्प्राप्तः स्या
च्चौरकिल्बिषमिति ॥ शिष्यानुवृत्तावापस्तंबोपि । अपराधेषु चैनं सततमुपालभेत अतित्रासउपवासउदकोपस्पर्शनमिति दं
डाः यथा तन्मात्रनिवृत्तिरिति अपराधनिवृत्तिपर्य्यन्तं अपराधानुरूपं दण्डपातनं कर्त्तव्यमित्यर्थः । यत्र तु आत्मनः कश्चिद्द्वेषात्ताडना
दि चिह्नं विधाय परमभिद्रवति तत्र साक्ष्यादिभिर्दिव्येन वा परीक्षणं कर्त्तव्यमित्याह मनुर्नारदबृहस्पती । कश्चित्कृत्वात्मनश्चिह्नं
द्वेषात्परमभिद्रवेत् । हेत्वर्थगतिसामर्थ्यैस्तत्र युक्त्या परीक्षणमिति । याज्ञवल्क्योपि । असाक्षिकहते चिह्नैर्युक्तिभिश्चागमेन च ।
द्रष्टव्यो व्यवहारस्तु कूटचिह्नकृताद्भयादिति ॥ कात्यायनोपि । हेवादिभिर्न पश्येच्चेद्दण्डपारुष्यकारणं । तदा साक्षिकृतं न

त्रदिव्यंनाविनियोजयेदिति । इतिदंडपारुष्याख्यव्यवहारपदम् ॥०॥ तथावाक्पारुष्याख्यव्यवहारपदम् ॥ तस्यचस्वरूप
माहनारदः । देशजातिकुलादीनामाक्रोशंन्यंगसंयुतम् । यद्वचःप्रतिकूलार्थंवाक्पारुष्यंतदुच्यतेइति । आक्रोशःआक्षेपःभ
र्त्सनमितियावत् । कलहप्रियाःगौडाइतिदेशाक्रोशः । अत्यंतलोलुपाब्राह्मणाइतिजात्याक्रोशः । क्रूरचरितावैश्वामित्राइतिकु
लाक्षेपः । न्यङ्गमवद्यन्तदुभययुक्तंयदुद्वेगजननार्थंवाक्यन्तद्वाक्पारुष्यमित्यर्थः । तस्यचैविध्यमाहसएव ॥ निष्ठुराश्लीलतीव्र
त्वात्तदपित्रिविधंस्मृतम् । गौरवानुक्रमात्तस्यदंडोपिस्यात्क्रमाद्गुरुरिति । निष्ठुरादीनांस्वरूपमाहसएव । साक्षेपन्निष्ठुरं
ज्ञेयमश्लीलंन्यंगसंयुतं । पतनीयैरुपाक्रोशैस्तीव्रमाहुर्मनीषिणइति ॥ धिङ्मूर्खंजाल्मइत्यादिसाक्षेपम्भाषणंनिष्ठुरं । न्यङ्ग
संयुतंअवद्यम्भगिन्यादिगमनसंयुतं । अश्लीलंपतनीयैःसुरापानादिभिरुपाक्रोशस्तीव्रंवाक्पारुष्यमित्यर्थः । कात्यायनोपि ।
यत्त्वसत्यंज्ञितैरङ्गैःपरमाक्षिपतिक्वचित् । अभूतैर्वाथभूतैर्वानिष्ठुरावाक्स्मृतातुसा ॥ न्यग्भावकरणंवाचाक्रोधात्तुकुरुतेयदा ।
वृत्तदेशकुलानान्तुअश्लीलासाबुधैःस्मृताः ॥ महापातकयोक्त्रीचरागद्वेषकरीचया । जातीभ्रंशकरीवाथतीव्रासाप्रथितातुवागि
ति ॥ कल्पतरौन्यंगावगूरणमितिपठित्वानिकृष्टांगप्रकाशनेनतिरस्करणमितिव्याख्यातम् । न्यग्भावकरणमितितुमाधवादि
संमतःपाठः । प्रथममध्यमोत्तमभेदेनत्रैविध्यमाहबृहस्पतिः । देशग्रामकुलादीनांक्षेपःपापेनयोजनम् । द्रव्यम्बिनातुप्रथ
मम्वाक्पारुष्यन्तदुच्यते ॥ भगिनीमातृसम्बन्धमुपपातकशंसनम् । पारुष्यम्मध्यमम्प्रोक्तम्वाचिकंशास्त्रवेदिभिः ॥ अभक्ष्या
पेयकथनंमहापातकदूषणं । पारुष्यमुत्तमम्प्रोक्तन्तीव्रंमर्माभिघट्टनमिति ॥ द्रव्यम्बिनेत्यत्रद्रव्यशब्दोऽभिधेयपरः । तेनोच्य
मानार्थव्यतिरेकेणैवंविधमभिधानंवाक्पारुष्यमित्यर्थइतिकल्पतरौ । द्रव्यंविनाद्रव्यवैशिष्ट्यंविनेतिमदनरत्ने । अभिघट्टनंउ
त्पाटनं । निष्ठुराक्रोशेदंडमाहयाज्ञवल्क्यः । सत्यासत्यान्यथास्तोत्रैर्न्यूनांगेन्द्रियरोगिणाम् । क्षेपङ्करोतिचेद्दण्ड्यःपणानर्द्ध
त्रयोदशानिति । अन्यथास्तोत्रन्निन्दास्तुतिः । न्यूनांगाःकरादिरहिताः । न्यूनेन्द्रियाःनेत्रादिरहिताः । रोगिणःकुष्ठ्यादयः

। अर्द्धत्रयोदशान् । अर्द्धाधिकद्वादशपणानित्यर्थः । एतत्सवर्णविषयम् । अत एव बृहस्पतिः । समजातिगुणानान्तु वाक्पारुष्ये परस्परम् । विनयोविहितःशास्त्रेपणा अर्द्धत्रयोदशाइति । विष्णुरपि । समवर्णाक्रोशनेद्वादशपणान्दण्ड्यइति । परस्परमितिशेषः । मनुनारदावपि । समवर्णेद्विजातीनांद्वादशैवव्यतिक्रमे । वादेष्ववचनीयेषु तदेवद्विगुणंभवेदिति ॥ शङ्खलिखितावपि । समवर्णव्यतिक्रमेद्वादशपणा यथारूपविशिष्टाक्षेपेषु विशिष्टस्य चतुर्विंशतिरविशिष्टस्यातिक्रमे च विशिष्टस्य तदर्द्धमिति ॥ अत्रद्वादशसार्द्धद्वादशयोरुत्कृष्टानुत्कृष्टत्वेनव्यवस्थाद्रष्टव्या । कात्यायनोपि । योगुणान्कीर्त्तयेत्क्रोधान्निर्गुणेष्वागुणवत्तां । अन्यसंज्ञानियोजी च वाग्दुष्टं तन्नरं विदुरिति ॥ नारदोपि । दुष्टस्यैव तु योदोषान्कीर्त्तयेत्क्रोधकारणात् । अन्यायदेशवादी च वाग्दुष्टन्तन्नरं विदुरिति ॥ अत्र क्रोधकारणादित्यनेन दुष्टपरित्यागार्थंदोषकीर्त्तनेनदोषइतिसूचितम् । अत एवोक्तङ्कात्यायनेन । यत्तस्यापरिहारार्थं पतितस्तेनकीर्त्तितं । वचनात्तत्र न स्यात्तु दोषो यत्र विभावयेदिति । वचनात्दोषकीर्त्तनात् । यथाभियोगादोपातित्यादिकं साधयेत्तत्रापि वचनाद्दोषो न स्यादिति यत्र विभावयेदित्यस्यार्थ उक्तः स्मृतिचन्द्रिकायाम् । अत्रापि दण्डपारुष्यन्यायेन युगपत्प्रवृत्तयोर्दण्डतुल्यत्वं अयुगपत्प्रवृत्तयोः पूर्वप्रवृत्तस्यदण्डाधिक्यमिति द्रष्टव्यम् । जातिगुणकृतेविशेषेदंडवैषम्यमाह बृहस्पतिः । समानयोःसमोदंडोन्यूनस्य द्विगुणोदमः । उत्तमस्याधिकःप्रोक्तोवाक्पारुष्ये परस्परमिति ॥ हीनस्योत्तमाक्षेपे द्विगुणः । उत्तमस्य हीनाक्षेपेऽर्द्धं परिमितो दण्डइत्यर्थः । याज्ञवल्क्योपि । अर्द्धोधमेषु द्विगुणः परस्त्रीपूत्तमेषु च । दण्डप्रणयनं कार्यं वर्णजात्युत्तराधरैरिति । अर्द्धःसार्द्धद्वादशपणात्मकइत्यर्थः । पूर्ववाक्यपञ्चविंशतिको दम इति पञ्चविंशतेः प्रकृतत्वात् । वर्णाब्राह्मणादयः । जातयोमूर्द्धावसिक्तादयः । तेचतेउत्तराधराश्च वर्णजात्युत्तराधरास्तैरन्योन्याक्षेपेपरिकल्प्यमानो दण्डस्यप्रणयनं उहनीयं ज्ञातव्यम् । उत्तमाधरभावमात्रेणोक्तात् दण्डः कल्पनीय इत्यर्थः । तमेव कल्पनीयं दण्डमादर्शयति मनुः । शतं ब्राह्मणमाक्रुश्य क्षत्रियो दण्डमर्हति । वैश्योप्यर्द्धशतं द्वे वा शूद्रस्तु वधमर्हति ॥

विप्रः पञ्चाशतन्दण्ड्यः क्षत्रियस्याभिशंसने । वैश्ये स्यादर्द्धपञ्चाशच्छूद्रे द्वादशको दम इति । बृहस्पतिरपि । क्षिपन्विप्रादिक
न्दद्यात्पञ्चाशत्पणिकन्दममिति । शङ्खलिखितावपि । आक्रोशे ब्राह्मणस्य क्षत्रियः पणशतन्दण्ड्यः शतार्द्धं वैश्यस्य पञ्चविंशतिं शू
द्रस्येति । बृहस्पतिरपि । विप्रे शतार्द्धं दण्डस्तु क्षत्रियस्याभिशंसने । विप्रस्तथार्द्धपञ्चाशच्छूद्रस्यार्द्धं त्रयोदश । यच्छूद्रस्या
यमुदितो विनयो नपराधिनः । गुणहीनस्य पारुष्ये ब्राह्मणो नापराध्नुयात् ॥ वैश्यस्तु क्षत्रियाक्रोशे दण्डनीयः शतम्भवेत् ।
तदर्द्धं क्षत्रिये वैश्यं क्षिपन्नविनयमर्हति ॥ शूद्राक्रोशे क्षत्रियस्य पञ्चविंशतिको दमः । वैश्यस्य चैतद्द्विगुणः शास्त्रविद्भिरुदाहृ
तः ॥ वैश्यमाक्षारयन्शूद्रो दाप्यः स्यात्प्रथमन्दमम् । क्षत्रियं मध्यमञ्चैव विप्रमुत्तमसाहसमिति ॥ जिह्वाच्छेदनरूपो त्रोत्तम
साहसो द्रष्टव्यः । तथा च स एव । धर्म्मोपदेशकर्त्ता च वेदोदाहरणान्वितः । आक्रोशकस्तु विप्राणां जिह्वाच्छेदेन दण्ड्यत इति
॥ शूद्र इत्यनुषङ्गः । आपस्तम्बोपि । जिह्वाच्छेदनं शूद्रस्यार्य्यन्धार्म्मिकमाक्रोशत इति । गौतमोपि । शूद्रो द्विजातीनभिसन्धा
याभिहत्य च वाग्दण्डपारुष्याभ्यामङ्गम्मोच्यो येनोपहन्यादिति । अभिसन्धाय बुद्धिपूर्वं वाचातिक्रम्य अभिहत्य दण्डयेण दण्डेन
ताडयित्वा अङ्गं मोच्यते नाङ्गेन वियोजनीय इत्यर्थः । गुर्व्वाद्याक्रोशे त्वाहतुः शङ्खलिखितौ । तथाऽधिक्षताच्चिप्रान्गुरूंश्च निर्वी
सनम्मुण्डनन्ताडनं वा गोमयानुलेपनं खरारोहणं दर्प्पहरणं वा दण्डो वेति । दण्डः कार्षापणशतरूपः । अत एव विष्णुः । गु
रूनाक्षारयन्कार्षापणशतमिति । पुत्रादिभिर्म्मात्रादीनामाक्रोशे दण्डमाह मनुः । मातरम्पितरञ्जायां भ्रातरं श्वशुरं गुरुम् ।
आक्षारयन्शतन्दाप्यः पन्थानञ्चाददद्गुरोरिति ॥ भ्रातरं ज्येष्ठभ्रातरम् । एतच्चसापराधेषु मात्रादिषु गुरुत्वनिरपराधायां जा
यायामिति मिताक्षरायामभाणि । श्वश्रुः श्वाद्यधिक्षेपे दण्डमाह बृहस्पतिः । क्षिपन्श्वश्र्वादिकन्दद्यात्पञ्चाशत्पणिकन्दममिति
बाह्वादिच्छेदननिष्ठुरभाषाभिभाषणे दण्डमाह याज्ञवल्क्यः । बाहुग्रीवानेत्रसक्थिविनाशे वाचिके दमः । शत्यस्तदर्द्धिकः पाद
नासाकर्णकरादिष्विति । बाह्वादिविनाशे वाचिके करिष्यामीति वाचा प्रतिपादितं शत्यः शतपरिमितो दण्डः । पादादिभङ्गक

रिष्यामीत्याक्षेपे पंचाशत्परिमितो दण्ड इत्यर्थः ॥ एवंवादिनोऽशक्तस्य दशपणो दंडनीय इत्याह स एव । अशक्तस्तु वदन्नेवं दंडनीयः पणान्दशेति । यः पुनः शक्तोऽशक्तस्य बाह्वादिभङ्गाक्षेपं करोति न केवलं स दण्ड्यः किन्तु अशक्ताक्षेपार्थं प्रतिभुवमपि दापनीय इत्याह स एव । तथाशक्तः प्रतिभुवं दाप्यः क्षेमाय तस्य चेति । अश्लीलभाषणे दण्डमाह स एव । अभिगन्तास्मि भगिनीं मातरं वा तवेति ह । शपन्तं दापयेद्राजा पञ्चविंशतिकं दममिति ॥ तीव्राक्रोशे दंडमाह स एव । पतनीयकृते क्षेपे दंडमुत्तमसाहसः । उपपातकयुक्ते तु दाप्यः प्रथमसाहसमिति । पतनीयैः पातित्यहेतुभिर्ब्रह्महत्यादिभिः । उपपातकानि गोवधादीनि । मनुरपि । ब्राह्मणक्षत्रियाभ्यां तु दण्डः कार्यो विजानता । ब्राह्मणे साहसः पूर्वः क्षत्रिये त्वेव मध्यमः ॥ विट्शूद्रयोस्त्वेवमेव स्वजातिं प्रति तत्त्वतः । छेदवर्जं प्रणयनं दण्डस्येति विनिश्चयः ॥ पापोपपातकारोपे महापातकशंसकाः । आद्यमध्योत्तमान्दण्डान्दद्युस्तेषु यथाक्रममिति । विष्णुरपि । परस्परपतनीयक्षेपे कृते तूत्तमसाहसं उपपातकयुक्ते तु मध्यमम् । त्रैविधवृद्धानां क्षेपे जातिपूगानां ग्रामदेशयोः प्रथममिति । देशाद्याक्रोशे दण्डमाह बृहस्पतिः । देशादिकं क्षिपन्दाप्यः पणानर्द्धत्रयोदश । पापेन योजयन्दर्प्याद्दाप्यः प्रथमसाहसम् ॥ एष दण्डः समाख्यातः पुरुषापेक्षया मया । समन्यूनाधिकत्वेन कल्पनीयो मनीषिभिरिति ॥ याज्ञवल्क्योऽपि । मध्यमो जातिपूगानां प्रथमो ग्रामदेशयोरिति । राजाक्रोशे दण्डमाह नारदः । अवकुश्य च राजानं वर्त्मनि स्वे व्यवस्थितम् । जिह्वाछेदाद्भवेच्छुद्धिः सर्वस्वहरणेन वेति ॥ याज्ञवल्क्योऽपि । राज्ञोऽनिष्टप्रवक्तारं तस्यैवाक्रोशकं तथा । तन्मन्त्रस्य च भेत्तारं छित्वा जिह्वां प्रवासयेदिति ॥ सत्यदोषाभिधानेऽपि वाक्पारुष्ये दंडोऽस्त्येव । तथा च नारदः । पतितं पतितेत्युक्त्वा तथा चौरेति वा पुनः । वचनात्तुल्यदोषः स्यान्मिथ्या द्विर्दोषतां व्रजेदिति ॥ मनुनारदावपि । काणं वाप्यथवा खञ्जमन्यं वापि तथाविधम् । तथ्येनापि ब्रुवन्दाप्यो दंडं कार्षापणावरमिति ॥ विष्णुरपि । काणखञ्जादीनां तथ्यवाच्यपि कार्षापणद्वयमिति । एतच्चतुर्वृत्तविषयमिति माधवीये विद्यारण्यश्रीपादैरभिधायि । मिथ्यावदनशीलानां दंड

माह कात्यायनः । अन्तराल्यानशीलानाञ्जिह्वाच्छेदो विशोधनमिति । हारीतोपि । मिथ्याभाषिणां मेलकानाञ्च राजा जिह्वा
च्छिंद्याद्दंडयेद्वेति । मेलको भक्षकः । कस्यचिद्वाक्पारुष्य कृतोर्द्धदंडमाहोशना । मोहात्प्रमादात्संघर्षात्प्रीत्या वोक्तं मयेति
यः । नाहमेवं पुनर्वक्ष्ये दंडार्द्धं तस्य कल्पयेदिति । वक्ष्ये इत्यत्र वक्तास्मीति शेषः ॥ इति वाक्पारुष्याख्यव्यवहारपदम् ॥ ● ●
● ● ॥ अथ स्तेयाख्यव्यवहारपदम् ॥ तल्लक्षणमाह मनुः । स्यात्साहसं त्वन्वयवत्प्रसभं कर्म यत्कृतम् । निरन्वयम्भवेत्
स्तेयं हृत्वापह्नूयते च यदिति । अस्यायमर्थः । अन्वयवद्द्रव्यरक्षकराजाध्यक्षादिसमक्षं बलावष्टम्भेन यत्परधनापहरणा
दि क्रियते तत्साहसं । स्तेयम्पुनर्निरन्वयं स्वाम्याद्यसमक्षं यद्वञ्चयित्वा परधनाद्यपहरणं तदुच्यते । यच्च राजाध्यक्षादिस
मक्षमपहृत्य न मयेदं हृतमिति भयान्निह्नुते तदपि स्तेयमिति । अत एव नारदः । उपायैर्विविधैरेषां छलयित्वापकर्षणम् । सु
प्तमत्तप्रमत्तेभ्यः स्तेयमाहुर्मनीषिण इति ॥ एषामित्येतच्छुद्रनिर्दिष्टान्याह स एव । मृद्भाण्डासनखट्वास्थिदारुचर्मतृणादि
यत् । शमीधान्यं कृतान्नञ्च क्षुद्रद्रव्यमुदाहृतम् । वासः कौशेयवर्ज्जञ्च गोवर्ज्जम्पशवस्तथा ॥ हिरण्यवर्ज्जो लोहञ्च मध्यं व्रीहि
यवादि च । हिरण्यरत्नकौशेयस्त्रीपुङ्गोगजवाजिनः । देवब्राह्मणराज्ञाञ्च विज्ञेयन्द्रव्यमुत्तममिति । बलात्कारकृतमपहर
णं साहसान्तर्गतं स्तेयमित्याह स एव । तस्यैव भेदः स्तेयः स्याद्विशेषस्तत्र तूच्यते । आधिः साहसमाक्रम्य स्तेयमाधिश्छलेन त्विति
। तस्यैव साहसस्यैव । आधिः पीडा धनापहरणादिद्वारा आक्रम्य प्रसह्य परस्य क्रियमाणः क्लेशः साहसरूपं स्तेयम् । छलेन क्रिय
माण आधिः केवलं स्तेयमित्यर्थः । तस्करज्ञानोपायमाह याज्ञवल्क्यः । ग्राहकैर्गृह्यते चौरो लोप्त्रेणाथ पदेन वा । पूर्वकर्म्मापरा
धी च तथा चाशुद्धवासकः ॥ अन्येपि शङ्कया ग्राह्या जातिनामादिनिह्नवैः । द्यूतस्त्रीपानसक्ताश्च शुष्कभिन्नमुखस्वराः ॥ परद्र
व्यगृहाणाञ्च पृच्छका गूढचारिणः । निरायाव्ययवन्तश्च विनष्टद्रव्यविक्रयाः इति । ग्राहकै राजपुरुषैर्लोप्त्रेणापहृतभाज
नादिना चौर्यः । अशुद्धवासः अप्रज्ञातस्थानवासी । जातिनिह्नवो नाहं शूद्र इत्येवंरूपः । नामनिह्नवो नाहं डित्थ इत्येवं रू

पः । आदिग्रहणात्स्वदेशग्रामकुलाद्युपलापेनचलक्षितायाह्याः । घृतपण्याङ्गनामद्यपानादिष्वतिप्रसक्ताःतथाकुतस्तो
यित्वमितिचौरग्राहिभिःपृष्टोयदिशुष्कमुखोभिन्नस्वरोवाभवति । वक्रवचनात्छिन्नललाटादीनांग्रहणम् । तथायेनिष्कार
णाङ्कियदस्यद्रव्यंकिंवास्यगृहमित्येवंपृच्छन्ति । येचवेषान्तरधारणेनात्मानंगूहयित्वाचरन्ति । येचायाभावेपिबहुव्ययकारि
णः । येचविनष्टद्रव्याणाञ्जीर्णवस्त्रभिन्नभाजनादीनामनिर्ज्ञातस्वामिकानांविक्रयकारिणःतेसर्वेपिचौर्यसम्भावनयायाह्या
इत्यर्थः । एवंविधलिङ्गयुक्तान्पुरुषान्गृहीत्वैतेचौराभवन्तिनवेतिसम्यक्परीक्षेतनतावन्मात्रेणनिश्चिनुयात् । चौरस्या
पिलिङ्गसम्बन्धसम्भवात् । अतएवनारदः । अन्यहस्तात्परिभ्रष्टमकामादुत्थितम्भुवि । चौरेणवाप्रतिक्षिप्तंलोप्त्रंयत्नात्प
रीक्षयेत् ॥ असत्याःसत्यसङ्काशाःसत्याश्चासत्यसन्निभाः । दृश्यन्तेविविधाभावास्तस्माद्युक्तम्परीक्षणमिति ॥ सोयस्तेयंत्रिविध
माहसएव । तदपित्रिविधंज्ञेयंद्रव्यापेक्षम्मनीषिभिः । क्षुद्रमध्योत्तमानांतुद्रव्याणामपकर्षणादिति । चौरस्तद्विविधमा
हबृहस्पतिः । प्रकाशाश्चाप्रकाशाश्चतस्करद्विविधास्मृताः । प्रज्ञासामर्थ्यमायाभिःप्रभिन्नास्तेसहस्रधेति ॥ प्रकाशतस्करान्ना
हसएव । नैगमावैद्यकितवाःसभ्योत्कोचकवञ्चकाः । दैवोत्पातविदोभद्राःशिल्पज्ञाःप्रतिरूपकाः ॥ अक्रियाकारिणश्चैवमध्य
स्थाःकूटसाक्षिणः । प्रकाशतस्कराह्येतेतथाकुहकजीविनइति ॥ प्रतिरूपकाःप्रतिरूपकाराः । अतएवनारदः । प्रका
शवञ्चकास्तत्रकूटमानतुलाश्रिताः । उत्कोचकाःसोपधिकावञ्चकाःपरयोषितः ॥ प्रतिरूपकराश्चैवमङ्गलादेशवृत्तयः । इत्ये
वमाद्योज्ञेयाःप्रकाशास्तस्कराभुवीति ॥ नैगमादिव्याजेनयेपरद्रव्यापहारकास्तेनैगमाद्याःप्रकाशतस्करा इत्यर्थः । अप्रकाशे
तस्करस्वरूपभेदानाहव्यासः । साधनाङ्गान्वितारात्रौविचरन्त्यविभाविताः । अविज्ञातनिवासाश्चज्ञेयाःप्रच्छन्नतस्कराः । उ
त्क्षेपकःसन्धिभेत्तापान्थमुड्ग्रन्थिभेदकः । स्त्रीपुञ्जाश्वपशुस्तेयीचौरोनवविधःस्मृतइति ॥ एतानितिप्रायिकम् । अरण्यादेर्द्वि
वापिसम्भवात् । उत्क्षेपकःधनिनामनवधानतान्निरीक्ष्यतत्समीपस्थन्धनमुत्कृष्यग्राहकः । सन्धिभेत्तागृहयोःसन्धौछिन्दान

ण्यभित्तिभेत्ता । पांथमुदकान्तारादौ पथिकानां धनप्राणापहारकः । ग्रंथिभेदकः परिधानीयादिग्रथितधनं गृहीत्वा तद्ग्रन्थिमो
चकाइति । प्रकाशतस्कराणांदण्डमाहसएव । स्त्रीपुंसौ वञ्चयन्तीह मङ्गलादेशवृत्तयः ॥ गृहणन्तिछद्मनाथार्थमनाख्यास्त्वा
र्थलिङ्गिनः ॥ नैगमाद्याभूरिधनाद्दण्ड्या दोषानुरूपतः । यथातेनानिवर्तन्ते तिष्ठन्ति समयेनयेति ॥ दोषानुरूपतो दण्ड्या न
तु धनानुरूपत इत्यभिप्रायः । केषाञ्चित्प्रकाशतस्कराणां दण्डमाह बृहस्पतिः । प्रच्छाद्य दोषं व्यामिश्रं पुनः संस्कृत्य विक्रयी । प
ण्यं तद्द्विगुणं दाप्यो वणिग्दण्डञ्च तत्समम् ॥ अज्ञातौषधिमन्त्रस्तु यश्च व्याधेरतत्त्ववित् । रोगिभ्योऽर्थं समादत्ते स दण्ड्यश्चोरवद्भि
षक् ॥ कूटाक्षदेविनः क्षुद्रा राजभाव्यहराश्च ये । गणकावञ्चका ये च दाण्ड्यास्ते कितवाः स्मृताः ॥ अन्यायवादिनः सभ्यास्तथै
वोत्कोचजीविनः । विश्वस्तवञ्चकाश्चैव निर्वास्याः सर्व एव ते ॥ ज्योतिर्ज्ञानं तथोत्पातमविदित्वा तु येऽन्तराम् । आवयन्त्यर्थ
लोभेन विनेयास्ते प्रयत्नतः ॥ दण्डाजिनादिभिर्युक्तमात्मानन्दर्शयन्ति ये । हिंसन्ति छद्मना न्ॄणाम्वध्यास्ते राजपूरुषैः । अ
ल्पमूल्यन्तु संस्कृत्य नयन्ति बहुमूल्यताम् । स्त्रीबालकान्वञ्चयन्ति दण्ड्यास्तेऽर्थानुसारतः । हेमरत्नप्रवालाद्यान्कृत्रिमान्कु
र्वते तु ये । क्रेतुर्मूल्यं प्रदाप्यास्ते राज्ञा तद्द्विगुणं दमम् । मध्यस्थं वञ्चयन्त्येकं स्नेहलोभादिना यदा । साक्षिणस्त्वन्यथा ब्रूयुर्दा
प्यास्ते द्विगुणन्दममिति ॥ भाव्यङ्करविशेषः । मनुरपि । सर्वकण्टकपापिष्ठं हेमकारन्तु पार्थिवः । प्रवर्तमानमन्याये छेद
येल्लवशः क्षुरैरिति । विष्णुरपि । द्यूते च कूटाक्षदेविनां करच्छेद इति । अप्रकाशतस्कराणां दण्डमाह सएव । उत्क्षेपकसंध
दंशच्छेत्तव्यो राजपूरुषैः । सदंशोऽत्र करः । तथा च याज्ञवल्क्यः । उत्क्षेपकग्रन्थिभेदौ करसन्दंशहीनकौ । कार्यौ द्वितीया
पराधे करपादैकहीनकाविति । अङ्गुष्ठतर्जन्योर्ग्रन्थिमोचने साधकतमत्वेनात्र सन्दंशशब्देन तयोर्ग्रहणम् । प्रथमापराधे
तौ क्रमेण पाणिसन्दंशाभाववन्तौ कर्तव्यौ । द्वितीयापराधे तु भावप्येकपाणिपादाभाववन्तौ कर्तव्यावित्यर्थः । सन्धिभेत्तॄणां दण्ड
माह मनुः । सन्धिम्भित्वा तु ये चौर्यं रात्रौ कुर्वन्ति तस्कराः । तेषां छित्वा न्टपो हस्तौ तीक्ष्णशूले निवेशयेदिति ॥ तानि निशेषः ।

बृहस्पतिरपि । सन्धिच्छेदकृतो ज्ञात्वा शूलमायाहयेत्प्रभुरिति । आयाहयेत् आरोपयेदित्यर्थः । ग्रंथमुखोद दण्डमाह स एव । त
थापात्र्यमुखं वृक्षं गलेबध्वावलम्बयेदिति । ग्रंथमुखं पथिलुण्ठकान् । ग्रन्थिभेदकस्य दण्डमाह मनुः । अंगुलीग्रन्थिभेदस्य
छेदयेत्प्रथमे ग्रहे । द्वितीये हस्तचरणौ तृतीये वधमर्हतीति ॥ अङ्गुली तर्जन्यंगुष्ठौ । द्वितीये हस्तस्य छेदः चरणस्य च तृ
तीये वध इत्यर्थः । अत एव नारद आह । प्रथमे ग्रन्थिभेदानामंगुष्ठहस्तयोर्वध इति । स्त्रीहर्तुर्दण्डमाह व्यासः । स्त्रीहर्तारं लोहश
यने दग्ध्वा वै कराग्निनेति । पुंहर्तुर्दण्डमाह स एव । नरहर्तुर्हस्तपादौ छित्वा स्थाप्यश्चतुष्पथ इति । गोहर्तुर्दण्डमाह बृ
हस्पतिः । गोहर्तुर्नासिकां छित्वा बध्वाम्भसि निमज्जयेदिति । नारदः । सर्वस्वं हरतो नारीं कन्यां तु हरतो वधः । वाजिवार
णलोहानामश्वादीनां बृहस्पतिरिति । सर्वस्वमित्यनुषङ्गः । पशुहर्तुर्दण्डमाह व्यासः । पशुहर्तुस्तु अर्धपादं तीक्ष्णशस्त्रेण
कर्तयेदिति । पशुहरणे पश्वनुसारेण दण्डनीय इत्याह नारदः । महापशून्स्तेनयतो दण्डमुत्तमसाहसम् । मध्यमप
शून्पूर्वं लघुक्षुद्रपशूंस्तथा हृतवानिति । हृत इति षष्ठी । बन्दिग्रहादीनां दण्डमाह याज्ञवल्क्यः । बन्दिग्राहांस्तथा वाजिकुञ्ज
राणां च हारिणः । प्रसह्य घातिनश्चैव शूलानारोपयेन्नर इति ॥ अङ्गच्छेदादयः उत्तमसाहसत्वाद्ब्राह्मणव्यतिरिक्तेषूत्तमद्र
व्यापहारविषयाः । साहसेषु य एवोक्तस्त्रिषु दण्डो मनीषिभिः । स एव दण्डः स्तेयेऽपि द्रव्येषु त्रिष्वनुक्रमादिति नारदेनोत्त
मसाहसस्योत्तमद्रव्यविषयत्वेन व्यवस्थापनात् तेन क्षुद्रमध्यमद्रव्योत्क्षेपकादीनां तदनुरूपेण करच्छेदादिः । तस्करस्यापहृ
तं धनं तत्स्वामिने दापयित्वा दण्डः कर्तव्य इत्याह याज्ञवल्क्यः ॥ चौरं प्रदाप्यापहृतं घातयेद्विविधैर्वधैरिति । धान्याद्यपहरणे द
ण्डमाह मनुः । धान्यं दशभ्यः कुम्भेभ्यो हरतोऽभ्यधिकं वधः । शेषेऽप्येकादशगुणं दाप्यस्तस्य च तद्धनमिति ॥ कुम्भो विंशतिप्रस्थाः
शेषे दशकुम्भाधिकान्न्यूने । तस्य धान्यस्वामिनः । रत्नहरणे दण्डमाह स एव । मुख्यानां चैव रत्नानां हरणे वधमर्हतीति ।
स एव । सुवर्णरजतादीनामुत्तमानां च वाससाम् । पञ्चाशतस्त्वभ्यधिके हस्तच्छेदनमिष्यते । शेषे चैकादशगुणं मूल्या

दण्डं प्रकल्पयेत्। पुरुषाणां कुलीनानां नारीणाञ्च विशेषत इति। अत्र सुवर्णादीनां संख्याकर्षेऽक्ता तेष्वाकुः वृद्धा इति मदनरत्ने। अत्राङ्गच्छेदादिदण्डो ब्राह्मणव्यतिरिक्तविषयः। स चिह्नं ब्राह्मणं कृत्वा स्वराष्ट्राद्विप्रवासयेदिति याज्ञवल्क्यस्मरणात्। चिह्नं ललाटे श्वपदाकाराङ्कनम्। तथा च मनुः। गुरुतल्पे भगः कार्यः सुरापाने सुराध्वजः। स्तेये च श्वपदं कार्यं ब्रह्मण्यशिरः पुमानिति। एतच्च प्रायश्चित्तमकुर्वतां दण्डोत्तरकालं न तु प्रायश्चित्तं चिकीर्षताम्। प्रायश्चित्तं तु कुर्वाणाः पूर्वे वर्णा यथोदितम्। नाङ्क्या राज्ञा ललाटे तु दाप्यमूत्तमसाहसमिति मनुस्मरणात्। जात्यादिभेदेन च दण्डतारतम्यमाह स एव। अष्टापाद्यं तु शूद्रस्य स्तेये भवति किल्बिषम्। षोडशैव तु वैश्यस्य द्वात्रिंशत्क्षत्रियस्य तु। ब्राह्मणस्य चतुःषष्टिः पूर्णं वापि शतं भवेत्। द्विगुणा वा चतुःषष्टिस्तद्दोषगुणवेदिन इति॥ यस्मिन्नपराधे योदण्ड उक्तः स शूद्रकर्तृके तस्मिन्नष्टगुणं दापनीयः वैश्यकर्तृके षोडशगुणः क्षत्रियकर्तृके द्वात्रिंशद्गुणः। ब्राह्मणकर्तृके चतुःषष्टिगुणः। शतगुणो वाष्टाविंशत्युत्तरशतगुणो वेत्यर्थः। भाण्यूनमूल्यानां क्षुद्राणां मूल्यात्पञ्चगुणो दम इत्याह नारदः। काष्ठभाण्डतृणादीनां मृन्मयानां तथैव च। वेणुवैणवभाण्डानां तथा स्नाय्वस्थिचर्मणाम्। शाकानामार्द्रमूलानां हरणे फलमूलयोः। गोरसेक्षुविकाराणां तथा लवणतैलयोः। पक्वान्नानां कृतान्नानां मत्स्यानामौषधस्य च। सर्वेषामल्पमूल्यानां मूल्यात्पञ्चगुणो दम इति। यत्पुनः क्षुद्रद्रव्यविषये द्विगुणदण्डप्रतिपादकमनुवचनम्। सूत्रकार्पासकिण्वानां गोमयस्य गुडस्य च। दध्नः क्षीरस्य तक्रस्य पानीयस्य तृणस्य च। वेणुवैदलभाण्डानां लवणानां तथैव च। मृन्मयानाञ्च हरणे मृदो भस्मन एव च॥ मत्स्यानां पक्षिणाञ्चैव तैलस्य च घृतस्य च। मांसस्य मधुनश्चैव यच्चान्यत्पशुसम्भवम्। अन्येषाञ्चैवमादीनां मद्यानामोदनस्य च। पक्वान्नानाञ्च सर्वेषां तन्मूल्याद्द्विगुणो दम इति। तदल्पप्रयोजनविषयम्। पांथादीनामल्पप्रयोजनद्रव्यापहारे न दण्डः। तथा च स एव। द्विजोऽध्वगः क्षीणवृत्तिर्द्वाविक्षू द्वे च मूलके। आददानः परक्षेत्रान्न दण्डं दातुमर्हति॥ चणकव्रीहिगोधूमयवानां मुद्गमाषयोः। अनिषिद्धैर्गृहीतव्यो मुष्टिरे

कापथिस्थितैः। तथैवसप्तमेभक्तेभक्तानिषडनश्नता। अश्वस्तनविधानेनहर्त्तव्यंहीनकर्मणइति। नकेवलचौरस्यैवदण्डः
किन्तुचौरस्यापिचौरोपकारिणइत्याहयाज्ञवल्क्यः। भक्तावकाशाग्न्युदकमन्त्रोपकरणव्ययान्। दत्वाचौरस्यवाहन्तुर्जानतो
दमउत्तमइति। भक्तंअशनं। अवकाशोनिवासस्थानम्। अग्निश्चौरस्यशीतापनोदनाद्यर्थः। उदकन्तृषितस्य। मन्त्रःचौ
र्यप्रकारोपदेशः। उपकरणंचौर्यसाधनम्। व्ययःअपहारार्थन्देशान्तरङ्गच्छतःपाथेयम्। एतानिचौरस्यहन्तुर्वादुष्टत्वं
जानन्नपियःप्रयच्छतितस्योत्तमसाहसोदण्डइत्यर्थः। कात्यायनोपि। चौराणाम्भक्तदावेस्युस्तथाग्न्युदकदायिनः। क्रेता
रश्चैवभाण्डानाम्प्रतिग्राहिणएवच॥ समदण्डाःस्मृताह्येतेयेचप्रच्छादयन्तितानिति। चौरोपेक्षाकारिणंप्रत्याहनारदः।
शक्ताश्चयदुपेक्षन्तेतेपितद्दोषभागिनः। उत्क्रोशतांजनानान्तुह्रीयमाणेधनेतथा। श्रुत्वायेनाभिधावन्तितेपितद्दोषभागि
नइति। इतिस्तेयाख्यव्यवहारपदम्॥ ● ॥ अथसाहसाख्यंव्यवहारपदम्। तस्यस्वरूपमाहनारदः। सहसाक्रियतेकर्म
यत्किञ्चिद्बलदर्पितैः। तत्साहसमितिप्रोक्तंसहोबलमिहोच्यतेइति। तस्यचातुर्विध्यमाहवृहस्पतिः। मनुष्यमारणं
चौर्यम्परदाराभिमर्शनम्। पारुष्यमुभयञ्चेतिसाहसंस्याच्चतुर्विधमिति। उभयपारुष्यम्वाग्दण्डपारुष्ये। तस्यत्रैवि
ध्यमाहनारदः॥ तत्पुनस्त्रिविधंज्ञेयम्प्रथमंमध्यमन्तथा। उत्तमञ्चेतिशास्त्रेषुतस्योक्तंलक्षणंपृथगिति। एतेषांस्वस्वरूप
माहसएव। फलमूलोदकादीनांक्षेत्रोपकरणस्यच॥ भङ्गाक्षेपोपमर्द्दाद्यैःप्रथमंसाहसंस्मृतम्॥ वासःपश्वन्नपानानांगृ
होपकरणस्यच। एतेनैवप्रकारेणमध्यमंसाहसंस्मृतम्॥ व्यापादोविषशस्त्राद्यैःपरदाराभिमर्षनम्। प्राणोपरोधियच्चान्य
दुक्तमुत्तमसाहसमिति॥ भङ्गःफलादिस्वरूपनाशनम्। आक्षेपआक्रोशःवाक्तिरस्करणमितियावत्। अपमर्द्दःस्वरूपावशे
षेणपीडनम्। एतेनैवप्रकारेणेत्यर्थः। त्रिविधेपिसाहसेदण्डमाहनारदः। तस्यदण्डःक्रियापेक्षःप्रथमस्यशतावरः। म
ध्यमस्यतुशास्त्रज्ञैर्दृष्टःपञ्चशतावरः। उत्तमेसाहसेदण्डःसहस्रावरइष्यते। वधःसर्वस्वहरणंपुरान्निर्वासनांकने॥ तदङ्ग

च्छेद इत्युक्तो दण्डस्तन्नमसाहसइति ॥ ब्राह्मणस्य तु महत्यप्यपराधे शारीरदण्डाभावमाहसएव । अविशेषेण सर्वेषामेष दण्ड विधिः स्मृतः । वधादृते ब्राह्मणस्य न वधे ब्राह्मणोऽर्हतीति । यमोऽपि । न शारीरो ब्राह्मणस्य दण्डो भवति कस्यचिदिति । मनुरप्य राधे ब्राह्मणस्य दण्डमाह सएव । गुप्ते तु बन्धने वध्यो राजा भक्तम्प्रदापयेदिति । नारदोऽपि । शिरसो मुण्डनन्दण्डस्तस्य निर्वास नं पुरात् । ललाटे चाभिशस्ताङ्कः प्रयाणङ्गर्दभेन चेति । परद्रव्यापहरणरूपसाहसस्वरूपकन्तत्र दण्डमाह याज्ञवल्क्यः । सामान्यद्रव्यप्रसभहरणं साहसं स्मृतम् । तन्मूल्याद्द्विगुणो दण्डो निह्नवे तु चतुर्गुण इति । वक्तुभिर्जनैः प्रहरादिकालक्रमेण रक्ष्यमाणस्य द्रव्यस्य बलात्कारेण हरणं साहसरूपं स्तेयमिति पूर्वार्द्धार्थः । तन्मूल्यादपहृतद्रव्यमूल्यात् । निह्नवे । अपला पे यः साहसं करोति तद्द्विगुणान्दमम् । यस्तु साहसं कृत्वा निह्नुते स चतुर्गुणान्दाप्य इत्युत्तरार्द्धार्थः । साहसिकस्य प्रयोजयितारं प्र त्याह सएव । यः साहसं कारयति स दाप्यो द्विगुणान्दमम् । यश्चैवमुक्ताऽहन्दाता कारयेत् स चतुर्गुणमिति । द्विगुणान्दमं साह सिकदण्डाद्द्विगुणं दण्डं । साहसिकविशेषं प्रत्याह सएव । अर्घ्याक्रोशातिक्रमकृद्भ्रातृभार्याप्रहारदः । संदिष्टस्याप्रदाता च समुद्रगृहभेदकृत् ॥ सामन्तकुलिकादीनामपकारस्य कारकः । पञ्चाशत्पणिको दण्ड एषामिति विनिश्चयः ॥ स्वच्छन्दविध वागामी विक्रुष्टे नाभिधावकः । अकारणेन विक्रोष्टा चाण्डालश्चोत्तमान् स्पृशन् । शूद्रप्रव्रजितानाञ्च दैवे पित्र्ये च भोजकः । अयुक्तं शपथं कुर्वन्नयोग्यो योग्यकर्मकृत् । वृषक्षुद्रपशूनाञ्च पुंस्त्वस्य प्रतिघातकृत् । साधारणस्यापलापी दासीगर्भविनाश कृत् ॥ पितृपुत्रस्वसृभ्रातृदम्पत्याचार्यशिष्यकाः । एषामपतितान्योन्यत्यागी च शतदण्डभागिति । अज्ञानकर्तृके साहसिके पितारि बान्धवाः । प्रष्टव्या राजपुरुषैः सामादिभिरुपक्रमैः । विज्ञेयोऽसाधुसंसर्गाच्चिह्नैर्होढेन वा नरैः । एषोऽदिनाघातकानां पित्रारि बान्धवाः । प्रष्टव्या राजपुरुषैः सामादिभिरुपक्रमैः । विज्ञेयोऽसाधुसंसर्गाच्चिह्नैर्होढेन वा नरैः । एषोदिनाघातकाना त्सत्करणाञ्च भावना । गृहीतः शङ्कया यस्तु न तत्कार्यं प्रपद्यते । शपथेनाववोद्धव्यः सर्ववादेष्वयं विधिरिति । चिह्नं रक्तलेपा दि । होढो मृतस्तस्य धनादिकम् । ज्ञानानन्तरकर्तव्यमाह व्यासः । ज्ञात्वानुघातकं सम्यक् ससहायं सबान्धवम् । हन्याच्चि

वधोपायैरुद्वेजनकरैर्नृपइति। वृहस्पतिः। प्रकाशघातकाश्चैव तथा चोपांशुघातकाः। ज्ञात्वा सम्यग्धनं हृत्वा हन्तव्या विवि
धैर्वधैरिति॥ ब्रह्मघ्नक्षत्रियादिविषयमेतत्। यतश्चाह बौधायनः। क्षत्रियादीनां ब्राह्मणस्य वधः सर्वस्वहरणञ्च तेषामेव तु
ल्यापकृष्टवधे यथाबलमनुरूपन्दण्डञ्च कल्पयेदिति। तेषां क्षत्रियादीनान्तुल्यापकृष्टवधे सजातीयहीनजातीयवधे द
ण्डं शारीरदण्डम्। एकघातार्थप्रवृत्तानां बहूनान्दोषानुरूपन्दण्डमाह कात्यायनः। एकश्चेद्बहवो हन्युः संरब्धाः पुरुष
न्नराः। मर्मघाती तु यस्तेषां स घातक इति स्मृतः। यो मर्मघातकः स एव वधापराधदण्डभागित्यर्थः। स एव। आरम्भकृत्सहा
यश्च दोषवक्तानुदेशकः। आश्रयः शस्त्रदाता च भक्तदाता विकर्म्मिणाम्॥ युद्धोपदेशकश्चैव तद्विनाशप्रवर्त्तकः। उपेक्षा
कार्य्ययुक्तश्च दोषवक्तानुमोदकः॥ अनिषेद्धा क्षमो यः स्यात् सर्वे ते कार्यकारिणः। यथाशक्त्यनुरूपन्तु दण्डमेषाम्प्रकल्पयेदि
ति। वृहस्पतिरपि। एकस्य बहवो यत्र प्रहरन्ति रुषान्विताः। मर्म्मप्रहारको यस्तु घातकः स उदाहृतः॥ मर्मघाती तु यस्ते
षां यथोक्तम्प्रापयेद्दमम्। आरम्भकृत्सहायश्च दोषभागी तदर्द्धतः॥ क्षतस्याल्पमहत्त्वञ्च मर्म्मस्थानञ्च यत्नतः। सामर्थ्य
ञ्चानुबन्धञ्च ज्ञात्वा चिह्नैः प्रसाधयेदिति॥ विषयविशेषे मनुष्यवधकर्त्तुर्दण्डाभावं दोषाभावप्रदर्शनमुखेनाह मनुः। शस्त्रं द्वि
जातिभिर्ग्राह्यं धर्मो यत्रोपरुध्यते। द्विजातीनाञ्च वर्णानां विप्लवे कालकारिते॥ आत्मनश्च परित्राणे दक्षिणानाञ्च सङ्गरे।
स्त्रीविप्राभ्युपपत्तौ च घ्नन् धर्म्मेण न दुष्यतीति। यत्र देशे काले च धर्म्मस्तटाकारामादिरूपो भेदनच्छेदनादिना परुध्यते तत्र त
था शूद्रेतरवर्णसङ्करे परदारक्रमणादिरूपे राजाभावकालकारिते। तथात्मनः परतः प्राणसंशये। तथा दक्षिणानां सङ्ग
रे गोयहरणनिमित्तके युद्धे। तथा स्त्रीविप्राभ्युपपत्तौ दुर्बलहिंसानिवारणे। धर्म्मात् क्ते नाधर्म्मं दुष्यति यतः। अतस्तत्र द्विजाति
भिः क्षत्रधर्मा अयणाररहितैरपि समर्थैः शस्त्रं ग्राह्यमित्यन्वयः। अत्र द्विजातिग्रहणं ब्राह्मणवैश्यविषयम्। प्रजापालनार्थं क्ष
त्रियस्य चनान्तरेणैव शस्त्रग्रहणस्य प्राप्तत्वादित्यभिसन्धायैव बौधायन आह। ब्राह्मणार्थे गवार्थे च वर्णानां वापि सङ्करे। गृह्णी

यानां विप्रविशेषाणां स्वधर्मव्यतिक्रमे इति ॥ यत्तु परीक्षार्थमपि ब्राह्मण आयुधं नाददीतेत्यापस्तम्बवचनम्। यच्च बौधायनव
चनम्। हास्यार्थमपि ब्रह्म आयुधं नाददीतेति। तद्द्वयमपि धर्मोपरोधादिभिन्नविषयम्। साहसस्तेयस्य क्रोधलोभकृततम
माह बृहस्पतिः। साम्प्रतं साहसस्तेयं श्रूयतां क्रोधलोभजमिति। स्त्रीसंग्रहणाख्यसाहसस्वरूपमाह स एव च। अनिच्छन्त्याय
त्क्रियते सुप्तोन्मत्तप्रमत्तया। प्रलपन्त्या वा रहसि बलात्कारकृतं तु तदिति। अनिच्छन्त्या परपुरुषेण सह हेतिशेषः। अनिच्छं
त्यायानि चिह्नानि तस्याः कर्त्तव्यं राजकर्त्तव्यं चाह सम्बर्त्तः। नेच्छन्त्या यानि चिह्नानि बलात्कारकृतानि च। परपुंसः प्रसंगे तु नारी
णां तानि शृणुत ततः। नखदन्तक्षतक्षामा सकचग्रहविक्षिता। सद्यो विस्मापिता नारी बलात्कारेण दूषिता ॥ उच्चैर्विक्रोशयन्ती
च रुदन्ती लोकसन्निधौ। तस्य नाम वदन्ती च यथा हन्तेन दूषिता ॥ शोचेदेवंविधैर्लिङ्गैर्गृहीतकृतपयोधरा। चिह्नालंकारकेशे
स्वव्याकुलीकृतलोचना। राज्ञा सभ्यैः सभान्तो वा स्वयमन्विष्यतत्क्षणात्। यद्ब्रूयात्सहजानत्र तत्कर्त्तव्यं प्रयत्नतः। विवादे साक्षि
णामत्र प्रकुर्वीत परिग्रहम् ॥ प्रार्थनादभिशस्तस्य न दिव्यं दातुमर्हतीति। अत्र दण्डमाह मनुः। सहस्रं ब्राह्मणो दण्ड्यो वि
प्रां गुप्तां बलाद्व्रजन्निति। गुप्तां स्वनियमेन रक्षिताम्। क्षत्रियादिसवर्णविषये दण्डमाह बृहस्पतिः। सहसा कामयेद्यस्तु ध
नं तस्याखिलं हरेत्। उत्कृत्य लिङ्गवृषणौ भ्रामयेद्गर्दभेन त्विति। कामयेत्परस्त्रियं गच्छेत। अयमेव दण्डो अनुलोम
प्रतिलोमजात्योः सजातीयपरभार्यागमने वेदितव्य इति मदनरत्ने। हीनजातीयपरस्त्रीगमने ब्राह्मणादिष्वेतदर्द्धप
रिमितो दण्डः। उत्कृष्टजातीयपरदारगमने अयमेव दण्डो वधसहितः कार्य इत्याह स एव। दमो नेयः समायां तु हीनायाम
धिकस्ततः। पुंसः कार्योऽधिकायां तु गमने सप्रमापणमिति ॥ दमः सहसा कामयेदित्यादिनोक्तः। नेयः प्रापणीयः। यत्तु वध
मात्राभिधायकं कात्यायनवचनं। स्त्रीषु वृत्तोपभोगः स्यात्प्रसह्य पुरुषो यदा। वधे तत्र प्रवर्त्तेत कार्यातिक्रमणं हि तदिति। तद्वि
गुणस्य भार्यागमने वेदितव्यम् ॥ इति साहसाख्यव्यवहारपदम् ॥ * ॥ अथ स्त्रीसंग्रहणाख्यं व्यवहारपदम्। तस्य त्रैविध्यमा

ह । वृहस्पतिः । पापमूलंसंग्रहणन्त्रिप्रकारन्निबोधत । बलोपधिकृतेद्वेतुतृतीयमनुरागजमिति ॥ एतेषांस्वरूपन्दर्शयतिस्व
एव । अनिच्छन्त्यायत्क्रियतेमत्तोन्मत्तप्रमत्तया । प्रलपन्त्यावारहसिबलात्कारकृतन्तुतत् ॥ छद्मनागृहमानीयदत्वास्वंम
दकारणम् । संयोगःक्रियतेयत्रतमुपधिकृतंविदुः ॥ अन्योन्यञ्चक्षुरागेणदूतीसम्प्रेषणेनवा । कृतंरूपार्थलोभेनज्ञेयन्तद
नुरागजमिति ॥ अनुरागजसंग्रहस्यत्रिविधत्वन्दर्शयतिसएव । तत्पुनस्त्रिविधम्प्रोक्तम्प्रथमंमध्यमोत्तममिति । व्यासोपि । संग्र
हस्त्रिविधोज्ञेयःप्रथमोमध्यमस्तथा । उत्तमश्चेतिशास्त्रेषुतस्योक्तंलक्षणंपृथगिति ॥ एतेषांस्वरूपमाहतुल्योसवृहस्पती ।
कटाक्षावेक्षणंहास्यन्दूतीसम्प्रेषणन्तथा । स्पर्शोभूषणवस्त्राणाम्प्रथमःसंग्रहःस्मृतः ॥ प्रेषणङ्गन्धमाल्यानाम्फलधूपान्नवा
ससाम् । सम्भाषणञ्चरहसिमध्यमंसंग्रहंविदुः ॥ एकशय्यासनंक्रीडाचुम्बनालिङ्गनन्तथा । एतत्संग्रहणम्प्रोक्तमुत्तमंशा
स्त्रवेदिभिरिति ॥ स्त्रीसंग्रहणस्यज्ञानोपायमाहयाज्ञवल्क्यः । पुमान्संग्रहणेग्राह्यःकेशाकेशिपरस्त्रिया ॥ सद्योवाकामजैश्चि
ह्नैःप्रतिपत्तौद्वयोस्तथेति ॥ परभार्ययासहकेशाकेशिक्रीडनेनसद्यःअभिनवैःकामजैःकररुहदशनादिकृतव्रणादिचिह्नै
र्द्वयोःसम्प्रतिपत्त्यावायंस्त्रीसंग्रहणवानितिप्रतिपत्तव्यइत्यर्थः । उपायान्तरमाहसएव । नीवीस्तनप्रावरणसक्थिकेशाव
मर्शनम् । अदेशकालसम्भाषंसहैकस्थानमेवचेति ॥ कुर्वाणइतिशेषः । सक्थिऊरू । मनुरपि । स्त्रियंस्पृशेददेशेयःस्पृ
ष्टोवामर्षयेत्तया । परस्परस्यानुमतेसर्वंसंग्रहणंस्मृतमिति । यस्तुदर्पादिनामयेयम्भुक्तेतिवदतिसोपितथाविधत्वेनग्राह्य
इत्याहतुर्मनुनारदौ । दर्पाद्वायदिवामोहात्श्लाघयावास्वयंवदेत् । पूर्वंमयेयम्भुक्तेतिसचसंग्रहणंस्मृतमिति ॥ बलात्कार
कृतस्यस्त्रीसंग्रहणस्यसाहसान्तर्भूतत्वेनतत्रैवदर्शितत्वादुपधिकृतेदण्डमाहवृहस्पतिः । दण्डनाकामयेद्यस्तुतस्यसर्वंहरे
दमः । अङ्कयित्वाभगाङ्केनपुरान्निर्वासयेत्ततइति ॥ सर्वहरःसर्वस्वहरःएतत्सजातीयविषयम् । हीनोत्कृष्टगमनेतुक्रमेणा
र्द्धन्धनंसर्वस्वहरणरूपोवधसहितसर्वस्वहरणरूपोदण्डोवावगन्तव्यः । दमोनेयःसमायान्त्विति[illegible]वादनिरूपणद

र्षिति वचनात् । तत्रवचने पुरुषस्यापकर्षेऽप्यभवेयुत्तमो दण्डो न स्त्रिया इति नोक्तस्तस्याः दण्डः । तेनसाहसस्त्रीसंग्रहणव्रतप्रकरणे
पिसजातीयोपभुक्तायाः संव्यवहार्य्यायाः प्रायश्चित्ताचरणानन्तरव्यवहितोपभुक्ताया इति ज्ञातव्यमित्युक्तं मदनरत्ने । अनुसम
काचिविधसंग्रहणोदण्डमाह स एव । त्रयाणामपि चैतेषाम्प्रथमो मध्यमउत्तमः । विनयः कल्पनीयः स्यादधिको द्रव्यविशेषाधिक
इति ॥ अधिकः प्रथमसाहसादिभ्योऽधिकः । सम्भोगे दण्डमाह याज्ञवल्क्यः । सजातावुत्तमो दण्ड आनुलोम्येतुमध्यमः । प्रातिलो
म्येवधः पुंसो नार्य्याः कर्णादिकर्त्तनमिति । चतुर्णामपि वर्णानाम्बलात्कारेण सजातीयपरभार्यागमने साशीतिपणसाहस्रोदण्डः
। यदा त्वानुलोम्येन हीनजातीयागमने मध्यमसाहसः । उत्कृष्टजातीयागमने गन्तुर्वधः । तस्याः कर्णादिकर्त्तनमित्यर्थः । अ
न्यानुरागजंग्रहणविषयं स्त्रिया अपि दण्डाभिधानात् । बलात्कारोपधिकृतयोस्तु स्त्रिया अनपराधित्वेन दण्डाभावात् । अस्मा
देव प्रातिलोम्येन गमने पुरुषस्य वधं विधाय स्त्रियास्तदर्द्धं तुल्यकर्णनासादिकर्त्तनविधानात्सजातीयागमने पुरुषस्य यावुक्ता
वुत्तममध्यमसाहसौ दण्डौ तदर्द्धं स्त्रिया दण्ड इति सूचितम् । अत एव कात्यायनः ॥ सर्वेषु चापराधेषु पुंसो यो्ऽर्थदमः स्मृतः ।
तदर्द्धं योषितो दद्युर्वधे पुंसोङ्गकर्त्तनमिति । स्त्रिया इति शेषः । यदा पुनः सवर्णा सगुप्ता आनुलोम्येन गुप्ता वाऽभिगता विशेष
माह मनुः । सहस्रं ब्राह्मणो दण्डो गुप्तां विप्राम्बलाद्व्रजन् । शतानि पञ्च दण्ड्यः स्यादिच्छन्त्या सह सङ्गतः । सहस्रम्ब्राह्मणो द
ण्ड्यो दाप्यो गुप्ते तु ते व्रजन् । शूद्रायां क्षत्रियविशोः सहस्रन्तु भवेद्दम इति । ते क्षत्रियवैश्ये ॥ एतच्च गुरुसखिभार्य्यादिव्यतिरिक्त
विषयम् । तत्र दण्डान्तरविधानात् । तदाह नारदः । माता मातृष्वसा श्वश्रूर्मातुलानी पितृष्वसा । पितृव्यसखिशिष्यस्त्री भगि
नी तत्सखी स्नुषा । दुहिताचार्यभार्य्या च सगोत्रा शरणागता । राज्ञी प्रव्रजिता धात्री साध्वी वर्णोत्तमा च या । आसामन्यतमा
ङ्गच्छन्गुरुतल्पग उच्यते । शिश्नस्योत्कर्त्तनात्तत्र नान्यो दण्डो विधीयत इति । यत्तु प्रातिलोम्यगमने क्षत्रियादेः पुरुषस्य वध
इत्युक्तं योगीश्वरवचने । तद्गुप्ताविषयमन्यथा धनदण्डः । तथा च मनुः । उभावपि हि तावेव ब्राह्मण्या गुप्तया सह । विप्लु

तोऽशूद्रवद्दण्ड्यो दग्धव्यो वा कटाग्निना ॥ ब्राह्मणीं यद्यगुप्तान्तु सेवेतां वैश्यपार्थिवौ । वैश्यम्पञ्चशतं कुर्य्यात् क्षत्रियन्तु सहस्रिण
मिति । पञ्चशतम्पणाः शतपञ्चकं दण्डभाजमित्यर्थः । एवं सहस्रिणमित्यत्रापि । क्षत्रियस्यागुप्तवैश्यागमने वैश्यस्य चागुप्तक्ष
त्रियागमने क्रमेण पणसहस्रं पणशतपञ्चकन्तयोर्दण्ड इत्याह स एव । वैश्यश्चेत् क्षत्रियां गुप्तां वैश्यां वा क्षत्रियो व्रजेत् । यो ब्राह्म
ण्यामगुप्तायान्तावुभौ दण्डमर्हत इति ॥ शूद्रस्यागुप्तोत्कृष्टस्त्रीगमने लिङ्गच्छेदनसर्वस्वापहरणे गुप्तागमने तु वधसर्वस्वापहा
रौ । तथा च स एव । शूद्रो गुप्तमगुप्तं वा द्वैजातं वर्णमावसन् । अगुप्तैकाङ्गसर्वस्वैर्गुप्तं सर्वेण हीयत इति । अयञ्च वधाद्युपदे
शः प्रजापालनाधिकाराद्राज्ञ एव न द्विजातिमात्रस्य । ब्राह्मणः परीक्षार्थमपि शस्त्रं नाददीतेति शस्त्रग्रहणस्य निषिद्धत्वात् ।
यदा तु राज्ञो निवेदने कालविलम्बेन कार्य्यातिपातस्तदा द्विजातिमात्रस्यापि शस्त्रग्रहणेऽधिकारोऽस्त्येव । शस्त्रं द्विजातिभिर्ग्राह्यं ध
र्म्मो यत्रोपरुध्यते । नाततायिवधे दोषो हन्तुर्भवति कश्चन ॥ प्रच्छन्नं वा प्रकाशं वा मन्युस्तं मन्युमृच्छतीति शस्त्रग्रहणाभ्य
नुज्ञानात् । परस्त्रिया सह सम्भाषणकर्तुर्दण्डमाह मनुः । परस्य पत्न्या पुरुषः सम्भाषां योजयन् रहः । पूर्वमाक्षारितो दोषैः प्रा
प्नुयात् पूर्वसाहसमिति ॥ आक्षारितः अभिशस्तः । दोषैः नानास्त्र्युपभोगवाञ्छाभिः । पापबुद्ध्या यः सम्भाषणं करोति तद्विषयमे
तत् । अत एव । यस्त्वनाक्षारितः पूर्वमभिभाषेत कारणात् । न दोषं प्राप्नुयात् किञ्चिन्न हि तस्य व्यतिक्रम इति ॥ मनुबृहस्पत्यु
क्तपूर्वसाहसमध्यमसाहसयोरुत्कृष्टसजातीयासम्भाषणादिविषयत्वेन व्यवस्था परिकल्पनीया । परपुरुषेण सह पित्रा
दिभिर्निषिद्धं सम्भाषणं या करोति सा पणशतं दण्ड्या परस्त्रिया सह पित्रादिभिर्निषिद्धसम्भाषणं यः पुरुषः करोति स पणशतद्वयं
दण्डनीयः । द्वयोरपि निषिद्धपरस्परसम्भाषणादि कुर्वतोः सम्भोगे यो दण्डः स एव दण्ड इत्याह याज्ञवल्क्यः । स्त्री निषेधे श
तं दद्याद्द्विशतन्तु दमं पुमान् । प्रतिषेधे तयोर्दण्डो यथा संग्रहणे तथेति ॥ निषिध्यत इति निषेधः कर्म्मणि हलश्चेति घञ् । चा
रणादिस्त्रीव्यतिरिक्तविषयमेतत् । नैष चारणदारेषु विधिर्नात्मोपजीविषु । सज्जयन्ति हि ते नारीर्निगूढाश्चारयन्ति चेति मनु

स्मरणात्नटाः आत्मोपजीविनः वेषोपजीनः। एतेषान्दारेषुएषविधिर्न्न। अभिभाषणादिनिमित्तकदण्डविधिर्न्न। पररते
नारीःस्वभार्याःसज्जयन्तिपुरुषान्तरेसंयोजयन्तिप्रच्छन्नीकृतन्यचारयन्तिचेत्यर्थः। साधारणस्त्रीगमनेदंडमाहयाज्ञव
ल्क्यः। अवरुद्धासुदासीषुभुजिष्यासुतथैवच। गम्यास्वपिपुमान्दाप्यःपञ्चाशत्पणिकन्दममिति। स्वामिनायाशुश्रूषार्थं
गृहेएवस्थातव्यमित्येवम्पुरुषान्तरोपभोगतोनिरुद्धा अवरुद्धाः। पुरुषांतरेणावरुध्यभुज्यमानाभुजिष्याःयादास्योभुजि
ष्या अवरुद्धावातासुसर्वपुरुषगम्यास्वपिगमनेपञ्चाशत्पणान्दण्ड्याः। नासाम्परपरिगृहीतत्वेनपरस्त्रीतुल्यत्वात्। चशब्दा
द्वेश्यास्वैरिणीनामपिग्रहणं। तास्वपिसर्वपुरुषसाधारणासुपरपरिगृहीतासुगमनेऽयमेवदंडइतिमन्तव्यम्। एतदेवाभि
प्रेत्याहनारदोऽपि। स्वैरिण्यब्राह्मणीवेश्यादासीनिःकासिनीचया। गम्याःस्युरानुलोम्येनस्त्रियोनप्रतिलोमतः॥ आस्वेवतुभुजि
ष्यासुदोषःस्यात्परदारवत्। गम्यास्वपिहिनोपेयाद्यत्ताःपरपरिग्रहाइति। अब्राह्मणीतिस्वैरिण्यविशेषणम्। स्वैरिणीस्व
तन्त्रापुंश्चली। निष्कासिनीकुटुम्बान्निर्गतेतिमदनरत्ने। स्वाम्यनवरुद्धादासीतिविज्ञानेश्वरमाधवाचार्यप्रभृतयः। भुजि
ष्यास्वास्वेतिसम्बन्धः। यासोपि। परोपरुद्धागमनेपञ्चाशत्पणिकोदमः। प्रसह्यवेश्यागमनेदंडोदशपणाःस्मृतइति। प्र
सह्यवेतनदानंविना। अत्रानवरुद्धासुवेश्यादिषुगम्यत्वाभिधानन्नपापाभावप्रतिपादनार्थंकिन्तुराजदंडाभावप्रतिपादना
र्थम्। पश्वेश्यादिगमनेप्राजापत्यंविधीयतइत्यादिवचनैःप्रायश्चित्तस्मरणात्बलात्कारेण अनवरुद्धदास्यभिगमनेदंडमा
हयाज्ञवल्क्यः। प्रसह्यदास्यभिगमेदंडोदशपणाःस्मृतः। बहूनांयद्यकामासौचतुर्विंशतिकःपृथगिति। पुरुषसम्भोगजीवि
कासुदासीषुस्वैरिण्यादिषुशुल्कदानमन्तरेणबलात्कारेणाभिगच्छतोदशपणोदंडः। यद्यनिच्छंतीमेकाम्बलात्कारेणबह
वोगच्छंतितर्हिप्रत्येकञ्चतुर्विंशतिपणात्मकोदंडइत्यर्थः। यदिपुनःसास्वेच्छयाभाटकंगृहीत्वापश्चान्नेच्छतितदाबलाद्भजतामपि
बहूनामदोषःयदितस्याव्याध्याद्यभिभवोनभवेत्। अतएवनारदः। व्याधितासश्रमाव्ययाराजकर्मपरायणा। आमन्त्रिता

चेन्नागच्छेद्दण्ड्यो वडवास्मृतेति ॥ पारदार्यप्रसंगात्कन्यायामपि दंडमाह याज्ञवल्क्यः । अलंकृतां हरन्कन्यामुत्तमं त्वन्यथाधमम् । दण्डं दद्यात्सवर्णासु प्रातिलोम्ये वधः स्मृत इति ॥ अलंकृतां विवाहाभिमुखीं तां सवर्णां कन्यामपहरन्नुत्तमसाहसं दण्डनीयः । तदनभिमुखीं हरन्प्रथमसाहसम् । उत्कृष्टवर्णकन्यां हरतः क्षत्रियादेर्वध इत्यर्थः । आनुलोम्येन सकामां हरतो प्रथमसाहसो दंडः तथा च स एव । सकामास्वनुलोमासु न दोषस्त्वन्यथाधम इति । कन्यादूषणे दंडमाह स एव । दूषणे तु करच्छेद उत्तमायां वधः स्मृतः । शतं स्त्रीदूषणे दद्याद्द्वे तु मिथ्याभिशंसने इति । पशून्गच्छञ्शतं दाप्यो हीनां स्त्रीं गां च मध्यममिति । सकामां कन्यां मत्स्यक्षतादिना प्रसह्य दूषयति तदा करच्छेदः । यदा तु अंगुलिप्रक्षेपेण नामेव योनिक्षतं कुर्वन्दूषयति तदा विशेषमाह मनुः । अभिषह्य तु यः कन्यां कुर्याद्दर्पेण मानवः । तस्याशु कर्त्ये अंगुल्यौ दंडं चार्हति षट्शतमिति । सकामदूषणेप्याह स एव । सकामां दूषयन्कन्यां नांगुलिच्छेदमर्हति । द्विशतं तु दमं दाप्यः प्रसंगविनिवृत्तय इति । यदा कन्या विदग्धा बाकन्यां दूषयति तदाप्याह स एव ॥ कन्यैव कन्यां या कुर्यात्तस्यास्तु द्विशतो दमः । या तु कन्यां प्रकुर्यात्स्त्री सा सद्यो मौण्ड्यमर्हति ॥ अंगुल्योरेव वाच्छेदः खरेणोद्वहनं तथेति । कुर्यान्नयोनिक्षतवतीमिति शेषः । यदा पुनरुत्कृष्टजातीयां कन्यां सकामामकामां वाभिगच्छति तदा हीनस्य क्षत्रियादेर्वधः । यदा सकामां सवर्णामभिगच्छति तदा शुल्कं गोमिथुनं तत्पित्रे दद्यात् । अनिच्छन्तीं निष्कंडरूपेण शुल्कं दद्यात् । सवर्णामकामां गच्छतो वध एव । तदाह मनुः । उत्तमां सेवमानस्तु जघन्यो वधमर्हति । शुल्कं दद्यात्सेवमानः समामिच्छेत्पिता यदि ॥ यो कामां दूषयेत्कन्यां स सद्यो वधमर्हति । सकामां दूषयंस्तुल्यो न वधं प्राप्नुयान्नर इति ॥ चण्डाल्यादिगमने दण्डमाह याज्ञवल्क्यः । अन्त्याभिगमने त्वंक्यः कुबन्धेन प्रवासयेत् । शूद्रस्तथान्त्य एव स्यादन्त्यस्यार्यागमे वध इति ॥ अन्त्या चाण्डाली तद्गमने । त्रैवर्णिकान्प्रायश्चित्तानभिमुखान्सहस्रं दण्ड्यास्त्रियमिति मनुवचनानुसारेण पण सहस्रं दण्डयित्वा कुत्सितवर्णेन भगाकारेणांकयित्वा स्वराष्ट्रान्निर्वासयेत् । शूद्रः पुनश्चाण्डालीं गच्छं श्चाण्डाल एव । अं

सवर्ण एवेतिमाधवीयेपाठः॥ चाण्डालस्योत्कृष्टजातिस्त्र्यभिगमनेवध एवेत्यर्थः। योनिव्यतिरिक्तस्थलेगच्छतोदण्डमाहस एव। अयोनौगच्छतोयोषाम्पुरुषंवाभिमेहतः। चतुर्विंशतिकोदण्डस्तथाप्रव्रजितागमइति। यस्तुयोषांमुखादावभिगच्छतिपुरुषंवाभिमुखेमेहतितथाप्रव्रजितांवागच्छति असौचतुर्विंशतिपणान्दण्डनीयइत्यर्थः। स्त्रीकृतेसंग्रहणेदण्डमाहबृहस्पतिः। गृहमागम्ययानारीप्रलोभ्यस्पर्शनादिना। कामयेत्तत्रसादण्ड्यानरस्यार्द्धदमःस्मृतइति। वचसास्त्रियम्प्रलोभ्यागच्छतःपुरुषस्ययोदण्डस्तंयाह्याःतदर्द्धपुरुषोग्राह्यइत्यर्थः॥ इतिस्त्रीसंग्रहणाख्यव्यवहारपदम्॥ ● ॥ अथस्त्रीपुंयोगाख्यव्यवहारपदम्॥ तत्स्वरूपमाहनारदः। विवाहादिविधिःस्त्रीणांयत्रपुंसाञ्चकीर्त्त्यते। स्त्रीपुंसयोगसंज्ञन्तद्विवादपदमुच्यतइति॥ विवाहादिशब्देनस्त्रीपुन्धर्मागृह्यन्ते। अतएवमनुर्व्यवहारपदोद्देशकालेस्त्रीपुन्धर्मोविभागश्चेत्युद्दिश्यप्रतिज्ञापूर्वकन्तेषांनिरूपणञ्चकार। पुरुषस्यस्त्रियाश्चैवधर्म्येवर्त्मनितिष्ठतोः। संयोगेविप्रयोगेचधर्मान्वक्ष्यामिशाश्वतानित्यादिना। संयोगेअन्योन्यसन्निधाने। विप्रयोगे। देशतःकालतोवाव्यवधाने। शाश्वतान्नित्यान्अवश्यानुष्ठेयानितियावत्। केतेधर्माइत्याकांक्षायामाहस एव। अस्वतन्त्राःस्त्रियःकार्याःपुरुषैःस्वैर्दिवानिशं। विषयेषुचसज्जन्त्यःसंस्थाप्याह्यात्मनोवशइत्यादि। पुरुषैःभर्तृपुरुषैः। विषयेदण्डहेतुभूतचाञ्चल्यादिविषये। नारदोपि। स्वातन्त्र्याद्विप्रणश्यन्तिकुलेजाताअपिस्त्रियः। अस्वातन्त्र्यमतस्तासांप्रजापतिरकल्पयदिति। अतोन्यैरपिस्त्रीणामस्वातन्त्र्यंयथाभवतितथाकल्पयितव्यमित्याशयः। पुरुषेणस्वस्त्रीव्यभिचाराद्वश्यंरक्षणीया। तथाचहारितः। एकव्रतस्तदभावात्परेन्द्रियोपहतत्वाच्चदुष्टाःकुलसङ्करकारिण्योभवन्तिजीवतिजारजःकुण्डोमृतेभर्तरिगोलकस्तस्माद्रेतोपघाताज्जायांरक्षेज्जायानाशेकुलनाशःकुलनाशेतन्तुनाशस्तन्तुनाशेदेवपितृयज्ञनाशोदेवपितृयज्ञनाशेआत्मनाशेआत्मनाशेसर्वस्वनाशइति। एकव्रतस्तदभावात्। स्त्रीणांएकभर्त्रैतिनियमनाशात्। परेन्द्रियोपहतत्वात्। परस्मिन्पुंसिइन्द्रियस्यमनसोरागादिनाउपहतत्वात्। कुलसङ्करकारिण्यस्त

ज्ञातिस्वभावानुगतप्रजोत्पादनेनकुलसांकर्य्यम्। अतएवशंखलिखितौ। यस्मिन्भावेर्प्पितंस्त्रीणामार्त्तवेमादृशमन्तानुग्र
यन्तीति। तन्तुःपुत्रादिसन्ततिः। मनुरपि। सूक्ष्मेभ्योपिप्रसङ्गेभ्यःस्त्रियोरक्ष्याविशेषतः। द्वयोर्हिकुलयोःशोकमावहे
युररक्षिताः॥ इमंहिसर्व्ववर्णानांपश्यन्तोधर्म्ममुत्तमम्। यतन्तेरक्षितुम्भार्य्यांभर्त्तारोदुर्बलाअपि॥ स्वाम्प्रसूतिंचरित्र
ञ्चकुलमात्मानमेवच। स्वधर्म्मंहिप्रयत्नेनजायांरक्षन्हिरक्षतीइति॥ द्वयोःकुलयोर्भर्त्तृकुलपितृकुलयोः। अनेनकुल
द्वयवृद्धैरपिरक्ष्याइतिश्लोककथनमुखेनदर्शितम्। अतएववृहस्पतिः। सूक्ष्मेभ्योपिप्रसङ्गेभ्योनिवार्य्यास्त्रीस्वबन्धुभिः।
श्वश्र्वादिभिःपालनीयागुरुस्त्रीभिर्दिवानिशम्। मनुरपि। कालेऽदातापितावाच्योवाच्यश्चानुपयन्पतिः। मृतेभर्त्तरिपुत्र
स्तुवाच्योमातुररक्षितेति॥ कालेकन्यादानयोग्येकाले। वाच्योनिन्द्यः। अनुपयन्अनुगच्छन्। सएव। पितारक्षतिकौमारे
भर्त्तारक्षतियौवने। पुत्रास्तुस्थाविरेभावेनस्त्रीस्वातन्त्र्यमर्हतीति॥ याज्ञवल्क्योपि। रक्षेत्कन्याम्पिताविन्नांपतिःपुत्रास्तुवार्द्ध
के। अभावेज्ञातयस्तेषान्नस्वातन्त्र्यंक्वचित्स्त्रियाइति। विन्नाविवाहिता। पतिपुत्रविहीनायास्तुरक्षसम्पतिपक्षान्तर्गतैरेव
प्रत्यासन्नेनकार्य्यं। तथाचनारदः। मृतेभर्त्तर्य्यपुत्रायाःपतिपक्षःप्रभुःस्त्रियः। विनियोगात्मरक्षासुभरणेचसईश्वरः॥ प
रिक्षीणेपतिकुलेनिर्म्मनुष्येनिराश्रये। तत्सपिण्डेषुवासत्सुपितृपक्षःप्रभुःस्त्रियः। पितृपक्षस्याप्यभावेसएवाह। पक्षद्वयाव
सानेतुराजाभर्त्तास्मृतःस्त्रियः। सतस्याभरणंकुर्य्यान्निगृह्णीयात्पथश्च्युतामिति। विनियोगःकर्म्मणिनियोजनम्। भर्त्ता
पोषकः स्त्रीस्वभावन्दर्शयतिदक्षः। जलौकावत्स्त्रियःसर्व्वाभूषणाच्छादनाशनैः। सुहितापिहरन्त्येवपुरुषंह्यपकर्षतीति
॥ जलौकारक्तमादत्तेकेवलंसानपस्विनी। इतरातुधनंचित्तंमांसंवीर्य्यंबलंसुखम्॥ साशंकाबालभावेतुयौवनेभिमुखीभवे
त्। तृणवन्मन्यतेनारीवृद्धभावेस्वकम्पतिम्। स्वकाम्येवर्त्तमानासास्नेहान्नचनिवारिता। अपथ्यानुभवेत्पश्चाद्व्याध्यधिरो
पेक्षिताइति। सुहितातृप्ताकृतापीत्यन्वयः। अपकर्षतिस्वतनमात्रामार्गंकरोतिस्वकाम्येस्वेच्छायाम्। अपथ्याअपनाहि

नहेतुभूता । मनुरपि । नैता रूपम्परीक्षन्ते नासां वयसि संस्थितिः । सुरूपं वा विरूपं वा पुमानित्येव भुञ्जते ॥ पौंश्चल्याच्चल
चित्ताच्च नैस्नेह्याच्च स्वभावतः । रक्षिता यत्नतोपीह भर्तृष्वेता विकुर्वते ॥ शय्यासनमलंकारं कामं क्रोधमनार्जवम् । द्रोहभा
वं कुचर्याञ्च स्त्रीभ्यो मनुरकल्पयत् । नास्ति स्त्रीणां क्रिया मन्त्रैरिति धर्मे व्यवस्थितः । निरिन्द्रिया ह्यमन्त्राश्च स्त्रियोऽनृत
मिति स्थितिः ॥ तथा च श्रुतयो बह्व्यो निगीता निगमेष्वपि । स्त्रीलक्षणपरीक्षार्थं तासां शृणुत निष्कृतीः । यन्मे माता प्रलुलुभे वि
चरन्त्यऽपतिव्रता । तन्मे रेतः पिता वृङ्क्तामित्यस्यैतन्निदर्शनम् । ध्यायत्यनिष्टं यत्किंचित्पाणिग्राहस्य चेतसा । तस्यैष व्यभि
चारस्य निह्नवः सम्यगुच्यते ॥ एवं स्वभावं ज्ञात्वासां प्रजापतिनिसर्गजम् । परमं यत्नमातिष्ठेत्पुरुषो रक्षणम्प्रतीति ॥
निरिन्द्रिया निर्वीर्य्या धैर्यप्रज्ञादिरहिता इति यावत् । स्त्रियोऽनृतमिति प्रायशोऽनृतवदनशीलत्वादुच्यन्ते । श्रुतयः श्रुतिवाक्या
नि । निगमेषु वेदेषु स्त्रीलक्षणं स्वरूपं तासां श्रुतीनां मध्ये यानि कृतिरूपाव्यभिचारप्रायश्चित्तरूपास्ताः श्रुतीः शृणुत स्त्रीस्व
भावज्ञानार्थमित्यर्थः । महाभारतेपि । कुलीना रूपवत्यश्च नाथवत्यश्च योषितः । मर्यादासु न तिष्ठन्ति स दोषः स्त्रीषु नारद ।
अनर्थित्वान्मनुष्याणां भयात्परिजनस्य च । मर्यादायाममर्यादाः स्त्रियस्तिष्ठन्ति भर्तृषु । यौवने वर्त्तमानानां मृष्टाभरणवास
साम् । नारीणां स्वैरवृत्तीनां स्पृहयन्ति कुलस्त्रियः ॥ यदि पुंसां गतिर्ब्रह्मन् कथञ्चिन्नोपपद्यते । अन्योन्यस्मिन्प्रवर्त्तन्ते न च तिष्ठ
न्ति भर्तृषु । अलाभात्पुरुषाणाञ्च भयात्परिजनस्य च । वधबन्धभयाच्चैव स्वयं गुप्ता भवन्ति ताः । नाग्निस्तृप्यति काष्ठानां नापगा
नां महोदधिः । नान्तकः सर्वभूतानां न पुंसां वामलोचना । कामानामपि दातारं कर्त्तारं मानसान्त्वयोः । रक्षितारं न मृष्यन्ति भर्त्ता
रं यत्नतः स्त्रिय इति ॥ श्रीरामायणेपि । नैवांगनानां दयितो नापि द्वेष्योऽस्ति कश्चन । सर्वमेवाश्नुवन्ते स्ता गहने जाह्नवीति
। अथ रक्षणप्रकारः । तत्र मनुः । न कश्चिद्योषितः शक्तः प्रसह्य परिरक्षितुम् । एतैरुपाययोगैस्तु शक्यास्ताः परिरक्षितुमि
ति ॥ प्रसह्य आक्रम्य । अवरुध्येति यावत् । यद्यप्यवरोधेन शरीरव्यभिचाराद्रक्षणं शक्यं तथापि मानसव्यभिचाराद्रक्षण

मशक्यमित्याश येन मनुना न कश्चिद्योषितः शक्तः प्रसह्य परिरक्षितुमित्युक्तम् । न च मानसव्यभिचारदुष्टाया मनर्थकमन्यज
न्माभावेन प्रजाविशुद्धिविधानाभावादिति वक्तव्यम् । यतस्त्वाह स एव । यादृशं भजते हि स्त्री सुतं सूते तथाविधम् । तस्मात्प्र
जाविशुद्ध्यर्थं स्त्रियं रक्षेत्प्रयत्नतः इति ॥ यादृशम्पुरुषमृतुकाले स्त्री मनसा भजते तत्समानशीलम्पुत्रञ्जनयतीति पूर्वोक्तोऽर्थः
। अत एवाहतुः शङ्खलिखितौ । यस्मिन्भावोऽर्पितः स्त्रीणामार्तवे तच्छीलम्पुत्रञ्जनयन्तीति । मानसव्यभिचारादपि स्त्रियं र
क्षेदिति शेषः । तथा च मनुना तस्मादित्यादिनोत्तरार्द्धेन तायमेवार्थो दर्शितः । परिरक्षणोपायानाह मनुरेव । अर्थस्य संग्रहे चै
नां व्यये चैव नियोजयेत् । शौचे धर्म्मे च पक्त्यां च पारिणाह्यस्य वेक्षणे इति । अर्थस्य संग्रहे । स्वेन समानीतार्थसन्निधाने ।
व्यये स्वेनोक्तेऽर्थव्यये । शौचे गृहादिशुद्धिकरसंमार्जनोपलेपनादौ । धर्म्मे अग्निहोत्राद्यनुकूललौकिकव्यापारे । पक्त्यामन्नपाक
व्यापारे । पारिणाह्यं पीठादिगृहोपकरणं तस्य वेक्षणे विचारणे । निरन्तरगृहव्यापारनियोजनादिना पुरुषान्तरचिन्ता
राहित्यं यथा भवति भार्याया अन्तथा कुर्यादिति तात्पर्यार्थः । वृहस्पतिरपि । आयव्यये ऽर्थसंस्कारे गृहोपस्कररक्षणे । शौचाग्नि
कार्यसंयोज्याः स्त्रीणां शुद्धिरियं स्मृतेति । एवंविधव्यापारासक्तचित्ततया साध्व्य इति व्यपदिश्यन्त इत्याह मनुः । आत्मानमात्मना
यास्तु रक्षेयुस्ताः सुरक्षिता इति । आत्मना गृहव्यापारासक्तेनान्तःकरणेन सुरक्षिताः सुष्ठु रक्षिताः साध्व्यः । आप्तपुरुषरक्षिता
स्तु स्त्रियो न सम्यग्रक्षिता इत्याह स एव । अरक्षिता गृहे रुद्धाः पुरुषैराप्तकारिभिरिति । आप्तकारिभिः पुरुषैः गृहे रुद्धा इ
त्यन्वयः । आप्ताश्च नेकारिणश्चाप्तकारिणः । अरक्षिताः सम्यग्रक्षाविहीना इत्यर्थः । भर्तुर्द्धर्मे नित्यत्वमपि स्त्रीणां रक्षणोपा
यत्वेन दर्शयितुं स एवाह । यादृग्गुणेन भर्त्रा स्त्री संयुज्येत यथाविधि । तादृग्गुणा सा भवति समुद्रेणेव निम्नगा ॥ अक्षमाला व
सिष्ठेन संयुक्ताऽधमयोनिजा । शारङ्गी मन्दपालेन जगामाभ्यर्हणीयताम्मिति ॥ भार्यायामरक्षणस्यावश्यकमित्याह स एव ।
देवदत्ताम्पतिर्भार्यां विन्दते नेच्छयात्मनः । तां साध्वीं विभृयान्नित्यन्देवानां प्रियमाचरन् । देवैर्दत्तादेवदत्ता दैवबशया तेतियाव

न्। तामग्न्यायां स्वयंवरे पतिं विन्दते। तत्र स्वयंपाशाद्देवदत्तामित्यनेन विवाहलक्षणमस्य स्त्रीपुंसयोः सम्बन्धस्य नस्वाधीनत्वञ्चिन्त
र्हि देवदत्तत्वमिति निदर्शितम्। देवदत्तत्वञ्च स्त्रीणां सोमो ददद्गन्धर्वाय गन्धर्वो ददद्ग्नये। रयिञ्च पुत्रांश्चादादग्निर्मह्यमथो इ
मामित्यादिभ्यः श्रुतिवाक्येभ्योऽवगम्यते। तेन देवैर्दत्ताया अभरणेन दातॄणां देवानां द्रोहः पापाद्युत्पद्यत इत्यर्थवाद इत्युक्तम्भव
नरत्ने। नच साध्वीमित्यस्य पतिव्रतामित्यर्थपरत्वेन व्यभिचारिण्या भरणमनावश्यकमिति वक्तव्यम्। तस्यापि कदन्नादिना
ऽवश्यम्भरणीयत्वात्। तथाच नारदः। व्यभिचारे स्त्रिया मौण्ड्यमधःशयनमेव च। कदन्नञ्च कुवासश्च कर्म चावस्करोज्झ
नमिति। स्त्रिया इत्यर्थः व्यभिचारे जाते मुण्डनमधःशयनञ्च साधयेत्। कदन्नं कुवासश्च भरणार्थं दद्यात्। अमेध्यशोधन
रूपं कर्म कारयेदित्यर्थः। दोषरहिताया भार्यायाः परित्यागनिन्दमप्याह नारदः। अनुकूलामवाग्दुष्टां दक्षां साध्वीं प्रजावती
म्। त्यजन्भार्यामवस्थाप्यो राज्ञा दण्डेन भूयसेति। विष्णुरपि। निर्दोषाम्परित्यजन्पत्नीञ्चेति चौरवच्छास्य इत्यनुषङ्गः।
निर्दोषान्त्यागहेतुभूतदोषरहिताम्। दण्डेमस्थापयितुमशक्तो वाह्ययोगीश्वरः॥ आज्ञासंपादिनीं दक्षां वीरसूं प्रियवादि
नीम्। त्यजन्दाप्यस्तृतीयांशमद्रव्यो भरणं स्त्रिया इति। तृतीयांशम्धनस्य तृतीयांशम्। राज्ञा भार्याया दाप्यः। अल्पधनः
भरणमात्रपथ्यां पुनर्धनं दाप्य इत्यर्थः॥ इति स्त्रीपुंयोगाख्यव्यवहारपदम्॥*॥ अथ विभागाख्यव्यवहारपदम्॥ यत्र मन्वा
दिवचनव्याख्यासु वह्वधा बुधाः। विवदन्ते दायभागः स प्रबन्धेन वर्ण्यते॥ तल्लक्षणमाह नारदः। विभागोऽर्थस्य पित्र्यस्य पु
त्रैर्यत्र प्रकल्प्यते। दायभाग इति प्रोक्तं तद्विवादपदं बुधैरिति॥ पित्रोरयम्पित्र्य इति॥ तत्रैकशेषात्पितृशब्दात्। अथेमा
तृधनस्यापि विभागकथनात्। पित्र्यस्य पुत्रैरिति चद्वयमपि सम्बन्धिमात्रोपलक्षणम्। पत्न्यादीनामेषामपि भर्त्रादिधनेन तद्वि
रूपणात्। अत एवोपक्रमे मनुनापित्रादिपदं नोपात्तम्। एषस्त्रीपुंसयोरुक्तो धर्मो वो रतिसंहितः। आपद्यपत्यप्राप्तिश्च
दायधर्मं निबोधतेति। दायधर्मोऽपत्यविभागरूपोऽभिप्रेतस्तस्यैवाग्रे लक्षणकथनपूर्वकं निरूपणात्। उद्देशावसरेऽपि स्त्री

एतन्धर्म्मौ विभागश्चेति तस्यैव विवादपदत्वेनोद्देशात्। अत एव बाह्येयावत्सम्बन्धिधनविभागमेव प्रदर्शितवान्मनुः। दायशब्द
श्चायं स्वामिसम्बन्धमात्रद्रव्ये स्वत्वन्तद्रूपोवदति। तथाच निघंटुकारः। विभक्तव्यम्पितृद्रव्यं दायमाहुर्मनीषिणइत्याह। अत्रा
पि पितृपदं सम्बन्धिमात्रोपलक्षणमन्यत्रापि दायशब्दप्रयोगात्। विभक्तव्यं विभागार्हमित्यर्थः। अन्यथैकपुत्रादिस्वामिके
विभागाभावाद्दायशब्दवाच्यतानस्यात्। यत्तु जीमूतवाहनेन दीयतइति व्युत्पत्त्या दायशब्दो ददातिप्रयोगश्चगौणः। मृतप्र
व्रजितादिस्वत्वनिवृत्तिपूर्वकपरस्वत्वोत्पत्तिफलसाम्यात्। ननुमृतादीनान्तत्त्यागोस्ति। तत्पूर्वद्रव्यस्वामिसम्बन्धाधीन
न्तत्स्वाम्योपरमेयत्र द्रव्येऽन्यस्वत्वन्तत्र निरूढोदायशब्दइत्युक्तन्तन्नसुन्दरम्। निरूढत्वाङ्गीकारे दायददातिशब्दयोर्गौण
त्वोपन्यासानर्थक्यात्। सर्वथाऽवयवार्थराहित्ये हि निरूढत्वं मत्वयोगरूढत्वम्। अवयवार्थबाधस्य स्वयमेवोपन्यासात्।
गौणमवयवार्थम्परिकल्प्य तदङ्गीकारस्य निःप्रयोजनत्वमन्योन्याश्रयत्वमनुभवविरोधोव्याघातश्च॥ तत्स्वाम्योपरमइतिच
जन्मनापिस्वत्वस्योपपादयिष्यमाणत्वादव्यापकम्। विभागशब्दस्त्वनेकस्वाम्यानां द्रव्यसमुदायविषयाणान्तदेकदेशे
व्यवस्थापने शक्तः। अत एवैकपुत्रादीनाम्पित्रादिधनस्वाम्ये विभागशब्दाप्रयोगो दायोऽनेनलब्धइत्येवच प्रयोगः। यत्रा
पिचैकस्यास्त्रीगवादिवत्साधारणत्वन्तत्रापि तत्तत्कालविशेषनियतदास्यदोहनादिनातस्य तस्यादिनाव्यञ्जनादस्त्वैकदेश
स्वाम्यव्यवस्थापनरूपोविभागशब्दार्थः। अत एव एकां स्त्रीं कारयेत्कर्म्म यथांशेन गृहेगृहइति। उद्धृत्यकूपवाप्यम्भस्त्वनु
सारेण गृह्यतइति। युक्त्या विभजनीयन्तदन्यथानर्थकम्भवेदिति च वृहस्पत्यादिवचनेषु वक्ष्यमाणरीत्या तदुपपादयिष्य
ते। सच दायोद्विविधोऽप्रतिबन्धः सप्रतिबन्धश्च। पुत्रादीनाम्पित्रादीधने पुत्रत्वादिनैव सत्यपिस्वामिनि पित्रादौ जन्मनैव स्व
त्वोत्पत्तेः स तेषामप्रतिबन्धोदायः। स्वामिसद्भावस्याप्रतिबन्धकत्वात्। यस्तुविभक्तस्यासंसृष्टिनोपुत्रस्य मृतस्य पितृभ्रात्रादीना
न्तद्धनरूपोदायः स सप्रतिबन्धः। स्वामिसद्भावस्य प्रतिबन्धकस्यापगम एव तत्र स्वत्वोत्पत्तेः। ननुसर्वोपि सप्रतिबन्धएवदा

थः। स्वामिसद्भावे पुत्रादीनामपि जन्ममात्रेण स्वत्वस्य वक्तुमशक्यत्वात्। तथाहि। यदि जन्मनैव पुत्रादीनाम्पित्रादीधनेस्व
त्वं स्यात्तर्ह्युत्पन्नमात्रस्य पुत्रादेः स्वत्वसाधारण्यमिति तदनुमतिं विना द्रव्यसाध्येष्वाधानादिषु पित्रादीनामनधिकारापत्तौ जातपु
त्रः कृष्णकेशोऽग्नीनादधीतेति श्रुतिविरोधः। किञ्च। विभागात्प्राक् पित्रादिप्रसादलब्धस्याविभाज्यत्ववचनं व्यर्थं स्यात्। नहि
पित्रा पुत्रान्तरानुमत्या यदिदं मंस्वैरं वदन्नमिति विभागप्राप्त्यभावादेव प्रतिषेधोऽनर्थकः। अननुमत्या तु साधारणद्रव्यस्य दान
मेव न संभवतीति पित्रादिप्रीतिदत्तत्वादिवाचोयुक्तिरयुक्ता। एवं पुत्राद्यनुमतिमन्तरेण स्वस्यादीनामपि भर्त्रादिभिः प्रीतिदान
स्यासम्भवात्तदनुमतौ तु तेरपि दत्तत्वात्। भर्त्रा प्रीतेन यद्दत्तं स्त्रियै तस्मिन्मृतेऽपि तत्। सा यथाकाममश्नीयाद्दद्याद्वा स्थावरादृते
इति वचने यथाकाममश्नीयाद्दद्याद्वेत्यनेनाविभाज्यत्वं भर्तृप्रीतिलब्धस्य यदभिहितं तदपि व्यर्थं। न चेदमविभागावस्थायां प्रीति
दानं तस्य चाविभाज्यत्वं प्रतिपादयति किन्तु स्थावरादृते यद्दत्तमित्यन्वयाद्विभागोत्तरमपि भर्त्रा स्त्रियै स्थावरं न प्रीत्या देयमज्ञा
नाद्दत्तमपि तेन पुत्रादिभिरपहृत्य विभजनीयमस्थावरं तु न प्रत्याहर्तव्यमित्यनुवादमात्रं। स्थावरस्य स्त्रियै प्रीतिदानप्रतिषेध
मात्रतात्पर्य्यं वा बोधयतीति शङ्कनीयं। तथा च यस्य यद्विहितयोजनमाप्रसक्तेनायुक्तत्वात्। स्थावरप्रीतिदानप्रतिषेधमात्रता
समर्थकत्वेऽन्यांशस्यानुवादमात्रं यथेत्यपरपर्यायस्याप्यत्र ने। अथमणिमुक्ताप्रवालानां सर्वस्यैव पिता प्रभुः। स्थावरस्य तु सर्व
स्य न पिता न पितामहः॥ तथास्य पितृप्रसादाद्भुज्यं तेन स्वाख्यामरणानि च। स्थावरं तु न भुञ्जीत प्रसादे सति पैतृक इति वचनमवश्यं
विभागप्राक्कालीनस्थावरप्रसाददानप्रतिषेधपरं वाच्यं मणिमुक्तादिप्रसाददानानुमतिपुरस्सरं तत्प्रतिषेधाभिधानात्। अ
न्यथा तस्यानुवादमात्रत्वेन वैयर्थ्यापत्तेः। तथा च जन्मना पुत्रादीनां स्वत्वान्मणिमुक्तादिषु तदनुमतिमन्तरेणापि दाने पितुः स्वा
तन्त्र्यम्। स्थावरे तु तदनुमत्यैवेति विशेषद्वितिवचनद्वयार्थस्य वाच्यत्वाज्जन्मना स्वत्वमायातीति मैवम्। तस्य पितामहोपात्तस्थाव
र विषयत्वात्। अतीते पितामहे तत्स्वाम्यनाशात् पितापुत्रयोः साधारणे तदीयद्रव्यसत्त्वेऽपि स्थावर एव पुत्रानुमत्यपेक्षा मणिमुक्ता

द्धीतुमेतितदर्थात्। यत्तुगौतमवचनं रूपन्येषाद्धं स्वामित्वं लभतेइत्याचार्य्याइति। जन्मनःस्वत्वहेतुत्वेमितास्तराकृताप्रमाणत्वेनो
पन्यस्तन्तद्दायभागतत्त्वकृताव्याख्यातमेव। पितृस्वत्वोपरमेतज्जन्यत्वस्यहेतुभूतेनोत्पत्तिमात्रसम्बन्धेनान्यसम्बन्धाधिकेनजन
कधनेपुत्राणांस्वामित्वाभङ्गनंपुत्रोलभतेनान्यःसम्बन्धीत्याचार्य्यामन्यन्तइति। ननुपितृस्वत्वेविद्यमानेपितत्रपुत्रस्वत्वमितितदर्थः
। नारददेवलवचनविरोधात्। पितर्य्यूर्द्ध्वंगतेपुत्राविभजेयुर्द्धनम्पितुरितिनारदः। पितुर्द्धनमित्याह। अन्यथाधनन्विभजे
युरित्येवावक्ष्यत्। पितर्य्युपरतेपुत्राविभजेयुर्द्धनम्पितुः। अस्वाम्यंहिभवेदेषांनिर्दोषेपितरिस्थितेइति। देवलोऽपिपितुर्द्ध
नमित्युक्त्वामतार्द्धेनास्वाम्यंहीतिस्पष्टमेवतेषामस्वत्वन्तत्रहेतुत्वेनोक्तवान्। निर्दोषेपातित्यादिस्वत्वापगमकदोषरहिते। म
नुरपि। ऊर्द्ध्वंपितुश्चमातुश्चसमेत्यभ्रातरःसमं। भजेरन्पैतृकंरिक्थमनीशास्तेहिजीवतोरिति। जीवतोर्म्मातापित्रोस्तद्धनेपु
त्राणामस्वाम्यंवर्त्तमेवाह। यत्तुशङ्खलिखिताबाहदहतुः। नजीवतिपितरिपुत्रारिक्थम्भजेरन्। यद्यपिस्वाम्यम्पश्चाददधिगत
ऽस्तैरनर्हास्तेवपुत्राश्चार्थधर्म्मयोरस्वातन्त्र्यादिति। स्मृतिचन्द्रिकाकारेणापव्याख्यातम्। यद्यपितैःपुत्रैःस्वकीयजन्मनःपश्चादन
न्तरमेवपितृधनेस्वाम्यमधिगतंप्राप्तन्तथापिजीवतिपितरितद्धनन्तादिच्छातिनानविभजेरन्नर्थधर्म्मयोरस्वातन्त्र्यात्पितृपारत
न्त्र्यादिभागकरणेऽनर्हाःपुत्राइति। तेनानेनवचनेनजन्मनापुत्रादीनांपित्रादिस्वामिकधनेस्वत्वमितितदपिन। मन्वादिवच
नानांबहूनामस्वाम्यप्रतिपादकानामनुरोधेनास्याप्यथावर्णनीयत्वात्। वर्णितञ्चकल्पतरौ। यद्यपिपश्चादधिगतंपितृधनंव्या
पारनिरपेक्षैःपुत्रैर्वैश्यादिभिरुपात्तेधनेस्वाम्यन्तथापितत्राप्यस्वाम्यञ्जीवतिपितरिकिमुतपितृधनेस्वार्थधर्म्मयोस्तेषांपितरिजीव
त्यस्वातन्त्र्यादितितत्त्वं। स्वत्वंपुनःस्वैकसमधिगम्यंतत्रपरिक्थक्रयादिवज्जन्मनःस्वत्वहेतुत्वेनानुक्तेर्जन्मनास्वत्वमप्रमाणकमेव
। अतएवचभार्य्यादिवचनं। भार्य्यापुत्रश्चदासश्चत्रयएवाधनाःस्मृताः। यत्तेसमधिगच्छन्तियस्यतेतस्यतद्धनमिति। पार
तन्त्र्यमात्रप्रतिपादनपरन्तथाऽस्वाम्यवचनान्यपीत्यपास्तं। भार्य्यादिष्वध्यग्न्यादिवचनैःकर्मनादिनाचार्यकत्वेनस्वामित्वेसि

द्धेयुक्तमस्वातंत्र्यमात्रपरत्वमन्यथा पुत्रादिषु धनसाध्येषु पुरणादिश्रुतत्तेषामधिकारित्वमपि विरुध्येत । अत्र तु प्रत्युत जन्मनः स्वत्वहेतुत्वे प्रमाणाभावाद्व्यर्थमेवान्यथानेकवचनवर्णनम् । किञ्च । यदि स्वत्वं लौकिकं स्यात्तर्हि तदुपायानामपि लौकिकत्वात्स्वा मी रिक्थक्रयसम्विभागपरिग्रहाधिगमेषु ब्राह्मणस्याधिकं लब्धं क्षत्रियस्य विजितम् । निर्विष्टं वैश्यशूद्रयोरिति गौतमवचनं व्यर्थ मेव स्यादनुवादमात्रत्वान्नहि पाकादोदनो भवतीत्यादि शास्त्रे निःप्रयोजनमनुवादमात्रमुच्यते । तस्य हि वचनस्यायमर्थः । रि क्थं दायः । क्रयः प्रसिद्धः । सम्विभागो दायस्यैवैकदेशनिष्ठस्वामित्वव्यञ्जको विभागः । परिग्रहः पूर्वमपरेणास्वीकृतस्यार ण्यादि साधारणप्रदेशसम्बन्धिनस्तृणजलकाष्ठादेः स्वीकारः । अधिगमोऽज्ञातस्वामिकस्य निध्यादेः प्राप्तिः । एतेषु स्वत्वहेतु षु सत्सु स्वामी भवति । जातेषु च जायते । ब्राह्मणस्य लब्धं प्रतिग्रहादिप्राप्तमधिकमसाधारणं रिक्थादयस्तु सर्वसाधारणाः । अ धिकमित्युत्तरत्र सर्वत्र सम्बध्यते । क्षत्रियस्य विजितं युद्धविजयदण्डादिप्राप्तमसाधारणम् । वैश्यस्य निर्विष्टं कृषिगोरक्षणा दि भृतिलब्धम् । शूद्रस्य द्विजशुश्रूषादिभृतिलब्धम् । निःपूर्वस्य विशेर्भृतिवाचकत्वं । निर्वेशो भृतिभोगयोरिति त्रिकाण्डाभिधा नात् । वैश्यशूद्रयहणस्योपलक्षणत्वादन्येषामप्यनुलोमजप्रतिलोमजातानां सूतानामश्वसारथ्यमित्याद्यौशनसादिप्रति पादितं वृत्तिजातं निर्विष्टशब्देन संगृह्यते । सर्वस्य भृतिरूपत्वात् । किञ्च । योऽदत्तादायिनो हस्तात्लिप्सेत ब्राह्मणो धनम् । याजनाध्यापनेनापि यथा स्तेनस्तथैव सः इत्यदत्तादायिनश्चौरस्य हस्ताद्याजनादिस्ववृत्त्यापि धनमर्जयतो दण्डविधानमनुप पन्नं स्वत्वस्य लौकिकत्वे । स्ववृत्त्यार्जयतो निरपराधत्वात् । मन्मते तु शास्त्रैकसमधिगम्यत्वात्स्वत्वस्य चौरदातृकयाजनादावेतद्ध नादेः स्वत्वानुत्पादकत्वात्तद्विधानमुपपन्नतरम् । अपि च ममस्वमनेनापहृतमिति व्यपदेशो न स्यात्स्वत्वस्य लौकिकत्वे । अपह र्तुरेव तत्र स्वत्वात् । मन्मते त्वपहारस्य निषिद्धत्वेन स्वत्वानुत्पादकत्वादुपपन्नोऽयं व्यपदेशः । यदि च सुवर्णत्वादिकमिव तत्स्वत्वम पि प्रत्यक्षप्रमाणकं तर्हि सुवर्णत्वादौ यथा न सन्देहस्तथास्य स्वमिदमस्य वेत्यपि सन्देहो न स्यात्तन्निर्णीतत्वात् । इदमेवोक्तं संग्रह

कारेण । वर्त्ततेयस्ययद्धस्तेनस्यस्वामीसएवन । अन्यस्तमन्यद्धस्तेषुचौर्य्याद्यैःकिन्नदृश्यते । तस्माच्छास्त्रतएवस्यात्स्वा
म्यंनानुभवादपि । अस्यापहृतमेतेननयुक्तंवक्तुमन्यथा । विदितोऽर्थागमःशास्त्रेनथाऽवर्णिपृथक्पृथगिति । शास्त्रेस्वामीरिक्थक
येत्यादौसाधारणासाधारणरूपोऽर्थागमःस्वत्वोपायःपृथक्पृथग्वर्णितस्तथाविदितोलौकिकत्वेतच्छास्त्रानर्थक्यंस्यादिदितइत्य
र्थः । अन्यत्स्पष्टम् । यथावर्णमितिस्मृतिचन्द्रिकायांपाठः । पूर्वपाठस्तुमदनरत्नेलिखितः । अथयद्यस्ययथेष्टंविनियोज्यन्त
त्तस्यस्वमितिलोकप्रसिद्धेर्य्यथेष्टविनियोज्यत्वंस्वत्वमितिचैर्याद्युपार्ज्जितेनातिप्रसङ्गस्तत्रचौरादेर्य्यथेष्टविनियोज्यत्वाभावाद्वि
नियोगकालेनाशादिदर्शनात् । अतएवसन्देहोप्युपपन्नःसुवर्णत्वादिनितुस्वत्वाभावात्स्वत्वस्यमेवम् । असम्भवात् । शास्त्रेण
सर्वस्यकुटुम्बभरणादौविनियोगविशेषनियमाद्वैच्छिकविनियोगविषयत्वस्यकुत्राप्यप्रसिद्धेः । तदप्याहसंग्रहकारःशङ्कोप
न्यासपुरःसरम् । नचस्वमुच्यतेतद्यत्स्वेच्छयाविनियुज्यते । विनियोगोस्यसर्वस्यशास्त्रेणैवनियम्यतेइति । अत्रपूर्वार्द्धेशङ्को
पन्यासउत्तरार्द्धेतत्परिहारः । नचरिक्थादिवदुत्पत्त्यैवार्थस्वामित्वमितिगौतमवचनउत्पत्तेरपिजन्मापरपर्य्याययोःस्वत्वहे
तुत्वोक्तेःसर्व्यपिस्वत्वस्यतदुपायानाञ्चशास्त्रैकसमधिगम्यत्वेजन्मनापुत्रादेःपित्रादिधनेस्वत्वमक्षतमेवेतिवाच्यम् । तस्यानै
कटुपयोरन्यथाव्याख्यानस्यप्रागेवोक्तत्वात् । इदमेवाभिसन्धायधारेश्वरेणापिशास्त्रैकसमधिगम्यमेवस्वत्वमितिसिद्धान्तित
म् । अपिच । जीवत्यपिपित्रादौपुत्रादेस्तद्धनेजन्मनास्वत्वेतदनिच्छायामपिपुत्रादीच्छयैवविभागःस्यात् । अस्वातन्त्र्यवचना
न्नैवमितिचेन्न । तथासतिदृष्टादृष्टविरोधमात्रंभवेद्व्यवहारस्तुसिद्ध्येदेव । यथापित्रादिभिःसहपुत्रादिभिस्त्वनुष्ठाद्व्यवहा
रेप्रवर्त्त्यमानेतेषांदृष्टादृष्टयोःश्रेयोविघातमात्रंगुरोःशिष्येपितुःपुत्रइत्यादिवचनार्थइतिप्राक्प्रपञ्चितन्तथात्रापिस्यात् । अ
स्त्वितिचेन्नसकलनिबन्धविरोधात् । कश्चिज्जन्मनैवेतिप्राचीनग्रन्थलिखनमपिजन्मनिबन्धनत्वात्पितापुत्रादिसम्बन्धस्यपितुम
रणाद्यपतत्स्वत्वापगमहेतुत्वेनपरम्परयावर्णनीयम् । किञ्च । ऊर्ध्वंपितुश्चेत्यादिमनुवचनञ्जन्मनापुत्राणांस्वत्वपदेजीवति

पितरि सत्यपि पुत्राणां स्वाम्ये तदिच्छया विना तद्विभाग ऊर्ध्वं तु सेच्छयेति विभागनिषेधार्थं प्रागिति वचनं तस्यान्यार्थत्वं स्वाम्यपर
त्वापत्तेः। न च पितुरुपरमकालविधानार्थं विभागविधानार्थं चेति युक्तम्। दृष्टार्थत्वाद्विभागस्योभयस्याप्यनुपपत्तेः। नापि नि
यमविधिर्विभागस्य एवं सह वसेयुर्वा पृथग्वा धर्मकाम्ययेति मनुना विकल्पाभिधानात्। काम्यविधौ च पितुरुपरमानन्तरकालस्यै
व विभागे नैमित्तिकत्वनिमित्तानन्तर्य्यं बाधायं स्यात्। जाते हि वज्जातप्राणवियोगापत्तिसरूपविशेषविरोधस्यात्राभावात्। अ
तो जीवतोः पित्रोः सत्त्वे न स्वाम्यं नास्ति किन्तूपरतयोस्तयोरिति तत्कालीनस्वत्वज्ञापनार्थं मन्वादिवचनं विभास्तु स्वातंत्र्यात्तत्का
लीनेच्छाप्राप्तेनानूद्यते। तथा चैतद्वचनविरोधात् पितृजन्मना स्वत्वं वक्तुं शक्यम्। उपरमवत्यतित्वादिकमपि पित्रादिस्व
त्वनाशकारणं वक्ष्यते। तस्मात्पित्रादिस्वत्वनाश एव तज्जन्ये पुत्रादीनां स्वाम्यं न तत्स्वत्वसमकालीनमिति स्वाम्यादिसद्भावस्य सर्वे
ष्वप्रतिबन्धकत्वात्सर्वोऽपि सप्रतिबन्ध एव दाय इति हेतुद्वैविध्यमनुपपन्नमिति। अत्रोच्यते। यदि स्वत्वापगम एव पुत्रादीनां तज्जन्ये
स्वत्वं तर्हि निर्दोषे पित्रादौ जीवति तेषां धनसाध्यवैदिककर्मस्वनधिकारप्रसङ्गे जातपुत्रः कृष्णकेशोऽग्नीनादधीतेत्यादिश्रुतिवि
रोधस्तु स्यः स्वकपोलकल्पितहेत्वाभाससमर्थितस्मृत्यर्थानुरोधेन श्रुतिसङ्कोचोऽयुक्तः। आहिताग्निर्विष्टप्रथमयज्ञे पित्रादौ जी
वत्यपि पुत्रादीन्प्रति तत्प्रवृत्त्यविशेषात्। सकलयाज्ञिकशिष्टानां तदनुष्ठानदर्शनाच्च। जातपुत्रकृष्णकेशपदाभ्यां वयोवृद्धा
नतिक्रमस्यैव विवक्षा न तु तयोरव्यवस्थिततयोः स्वरूपेणेति विशेषाधिकरणे भाष्यवार्त्तिकादौ स्थितत्वात्। न च यथा पुत्रानुमत्या
पितुर्मन्वन्मते तदधिकारस्तथा मन्मतेऽपि पुत्रादीनामपि पित्राद्यनुमत्येति वाच्यम्। यतो द्वयोरपि मते पितुः स्वत्वस्य धने विद्यमान
त्वात्स्वत्वत्यागरूपप्रधाननिष्पत्तिरविहता मत्वन्मते तु पुत्रादीनां स्वत्वस्यैवाभावादनुमतेश्च स्वत्वाजनकत्वाद्यागादिप्रधाननिष्पत्ति
रेव कथम्। वस्तुतस्तु पितुः पुत्रानुमतिरपि नापेक्षिता स्वातन्त्र्यात्। पित्राद्यनुमतिस्तु पुत्रादेरपेक्षिता पारतंत्र्यादित्येतावान्विशे
षो यथा स्त्रियाः स्वधनेनापीष्टापूर्त्तादिव्रतादौ भर्त्रादनुमतिः पारतंत्र्यवचनात्। अननुमतौ तु स्वतन्त्रः प्रत्यवायो वैगुण्यं वा का

म्यैश्वेनानुपधानस्वरूपानिष्पत्तेः। पित्राद्यनुमतेः स्वत्वोत्पादकत्वञ्चेत्तदनुरोधात्कल्प्यमानमलौकिकमशास्त्रीयञ्च। तस्मा च्छास्त्रैकसमधिगम्येऽपि स्वत्वे कथञ्चिज्जन्मनेऽपि रिक्थादिवचनादधिगमादिपदेन संग्रह आवश्यकः श्रुतिस्मृतिपुराणशिष्टाचा रसिद्धस्य निर्देशे जीवत्यपि पित्रादौ पुत्रादियज्ञाद्यनुष्ठानाधिकारस्यासुसेधात्॥ वस्तुतस्तु लौकिकमेव स्वत्वं लोके च ज्ञानमज्ञा नामेव पुत्रादीनाम्पित्रादिधने स्वाम्यव्यवहारोऽन्येषामपीति साधयिष्यामः। यच्च पित्रादीनामनुमत्ययोग्यपुत्रादिसाधार णस्वत्वे कथमनुमतिमन्तरेणाधानादिकं स्यादित्युक्तन्तदनुमतिनयोग्येष्वपि पुत्रादिषु स्वातन्त्र्यात्पित्रादीनां तदनुमत्यपेक्षा। कि न्तु तानुमत्ययोग्येष्वितिपरिहृतप्रायमेव तद्विधिवशादेवाधिकारोऽवगम्यत इति तु विज्ञानेश्वराचार्य्यः। अतश्चोभयस्यैवार्थे स्वामि त्वमितिगौतमवचनस्य यज्जीमूतवाहनरघुनन्दनाभ्यामपारम्परिकोत्पत्तिस्वत्वहेतुत्वेन व्याख्यानं तदनन्तदपि यथार्थमेव। यत्तु वचनन्तस्यापि स्मृतिचन्द्रिकोक्तव्याख्यैव साधीयसी। कल्पतरुकृद्व्याख्यायान्तु विज्ञाद्युपात्ताध्याहारेऽनुपस्थितस्य भूयः पदाध्या हारः प्रसज्येत। जन्मपदाध्याहारस्तु पुत्रत्वाद्याक्षेपोपस्थितेरल्पाध्याहारसूचनायुक्तः। तेन श्रुत्युपष्टम्भस्मृत्यनुरोधान्मनुना रदद्देवलादिवचनानामेवास्वातन्त्र्यपरत्ववर्णनमुचिततरम्। यदप्युक्तं प्रीतिदत्तस्याविभाज्यत्ववचनानि जन्मनास्वत्वाभ्युपग मेऽनुपपन्नानीति। तदपि न। अनुमत्यभिप्रायेण स्थावरप्रीतिदानाभावस्थिरीकरणार्थतयोपपत्तेः। स्वार्जितं त्वाज्ञापितुरनु मतिमन्तरेणापि तेन दत्तं स्थावरव्यतिरिक्तं पुत्राणामविभाज्यत्वमुच्यते। अतएव स्थावरे विशेषवचनम्। स्थावरं द्विपदं चैव यद्यपि स्वयमर्जितम्। असम्भूय सुतान्सर्वान्न दानन्न च विक्रय इति॥ मणिमुक्ताप्रवालानामित्यादिवचनन्तु जन्मना स्वत्व पक्षएवोपपन्नतरम्। तच्च पितामहोपात्तस्थावरमात्रविषयत्वमित्युक्तं। न पिता न पितामह इति तद्धयग्रहणात्। पितामहस्यहि स्वार्जितमपि पुत्रपौत्रेष्वसत्स्वपि न देयमिति वचनञ्जन्मनास्वत्वं गमयति। यथा परमते मणिमुक्ताप्रवालादीनाम्पितामहानाम पि पितुरेव स्वत्वन्तत्सापेक्षत्वात्तथा स्थावरस्यापि पुत्रादीनान्तज्जन्मना स्वत्वे साधारणेऽपि पितुर्दानाधिकार इत्यविशेषः। तस्मात्पैतृके

पैतामहे च द्रव्ये पुत्रादीनां यद्यपि जन्मना नैव स्वत्वं तथापि पितुरवश्यकेषु धर्मकृत्येषु वाचनिकेषु च प्रसाददानकुटुम्बभरणापद्विमोक्षादिषु च स्थावरव्यतिरिक्तद्रव्यविनियोगे स्वातन्त्र्यमिति ध्येयम्। स्थावरे तु स्वार्जिते पित्रादिपरम्पराप्राप्ते च पुत्राद्यधीनत्वमेव। स्थावरं द्विपदं चैव यद्यपि स्वयमर्जितम्। असम्भूय सुतान् सर्वान्न दानं न च विक्रयः। ये जाता येऽप्यजाताश्च ये च गर्भे व्यवस्थिताः। वृत्तिं च तेऽभिकाङ्क्षन्ति न दानं न च विक्रय इत्यादिवचनात्। अस्यापवादो वक्ष्यते। यच्च स्वत्वस्य शास्त्रैकसमधिगम्यत्वात् कस्यचिज्जन्मनः क्वापि स्वत्वहेतुतानभिधानात्कथं जन्मना पुत्रादीनां पित्रादिधने स्वत्वस्वीकार इत्युक्तम्। तन्न शास्त्रैकसमधिगम्यत्वमभ्युपेत्यापि गौतमादिवचनजातेनापि स्वत्वोत्पत्तेः परिहृतमेव प्राक्। वस्तुतस्तु न स्वत्वस्य शास्त्रैकसमधिगम्यत्वं युक्तियुक्तम्। सर्वथा शास्त्रज्ञानगन्धरहितानां प्रत्यन्तवासिनां म्लेच्छादीनामपि समस्तमिदं मदीयं स्वमिति व्यपदेशस्तत्कृतश्च क्रयविक्रयादिव्यवहारो दृश्यते। तेनान्वयव्यतिरेकाभ्यां क्रयाद्युपायकं स्वामित्वमपि तैर्यथेष्टविनियोगार्हत्वरूपं पदार्थान्तररूपं वा प्रत्यक्षादिप्रमाणादेवावगतमित्यवश्यं वाच्यम्। एतदर्थमेव पाश्चात्योऽनुमानवाक्यप्रयोगोऽपि मिताक्षरायामभिनोक्तः। स्वत्वं लौकिकं लौकिकार्थक्रियासाधनत्वाद्व्रीह्यादिवदित्यन्वयदृष्टान्तः। आहवनीयादीनां हि शास्त्रैकसमधिगम्यानामलौकिकार्थक्रियासाधनत्वमस्तीति व्यतिरेकदृष्टान्तः। तेनान्वयव्यतिरेकी हेतुः। यद्यप्याहवनीयादीनामपि यागादिलौकिकक्रियासाधनत्वमप्यस्ति। तथापि तल्लौकिकप्रमाणकाग्न्यादिरूपेण नालौकिकाहवनीयादिरूपेणेति न व्यभिचारः। इह तु सुवर्णादिरूपेण न क्रयादिसाधनत्वमपि तु स्वत्वेनैवेति सुवर्णत्वादिना भरणाद्यर्थक्रियासाधनत्वात्तद्वल्लौकिकरूपमेव स्वत्वमपि सर्वानुगतं लौकिकमेव न ह्यस्वत्वेन क्रयादिक्रियानिर्वाहो लोके। न चैवं स्वामी रिक्थक्रयेत्यादिस्मृतीनां लोकसिद्धार्थानुवादकत्वेनानर्थक्यापत्तिरिति वाच्यम्। धर्माधर्मोपयोगितया व्याकरणस्मृतावनादिवाचकत्वादभावरूपं साध्वसाधुत्वविवेकस्येव तस्योपपत्तेः। साधुशब्दाधिकारो ह्येतदवस्थितं यत्तच्छब्दव्यवहारिणां लोकानामविशिष्टं लौकिकमेव साधुत्वं शास्त्रे बोधि

धाने । ननु लौकिकत्वे साधुत्वं साधुभिर्भाषितेनेत्यादि विधानं व्योन्याश्रयप्रसङ्ग इत्यादि । एवमन्यापि तथ्यं च नयविवेके भवनाथः ।
लोकसिद्धस्य स्वत्वस्य नन्वादिस्मृतिषु तत एवानिन्द्यम् प्रथमं लोकधीविषयं व्यवस्थितं तन्निबन्धनार्थाः स्मृतिर्व्याकरणादि स्मृतिवदिति । अ
न्यादीन्यादिपदेन शब्दादि इति ग्रहणम् । व्याकरणादीत्यादिपदेन सङ्गीतरत्नपरीक्षासामुद्रिकाणां ग्रहणम् । रागादीनामपि हि
लोकसिद्धानामेवानभिज्ञान् प्रति विवेकार्थमेव तल्लक्षणकथनमित्युक्तं स्मृत्यधिकरणे भाचार्यचरणैः । स्वामी रिक्थेत्यादिवच
नन्तु प्रागेव व्याख्यातम् । रिक्थशब्दस्तु निःप्रतिबन्धदायपरः संविभागशब्दश्च सप्रतिबन्धदायपर इति मिताक्षरायां विज्ञानेश्व
रेण व्याख्यातम् । स्मृतिचन्द्रिकाकृता तु रिक्थं पित्रादिधने पुत्रादीनां स्वामित्वापादकं जन्मनैवेति व्याख्याय संविभागः पित्रादि
धने विशेषनिष्ठस्वामित्वसम्पादको विभाग इति संविभागशब्दो व्याख्यातस्तन्न । स्वस्य सतो विभागात् स्वत्वहेतुत्वेन तत्प्रतिपादना
नौचित्यात् । एकदेशव्यवस्थापनमात्रं हि स्वविभागेन क्रियते । मुख्यामुख्यहेतुत्वग्रहणे स्वामिपदे वैरूप्यापत्तेः । अत एवाह
मिताक्षरायां विज्ञानेश्वराचार्यैः । विभागशब्दश्चानेकस्वामिकधनविषयः प्रसिद्धो नान्यदीयविषयो न प्रहीणविषय इति ।
लोके पुत्रादीनां जन्मनैव स्वत्वं प्रसिद्धतरमिव । यदपि पत्नी दुहितरश्चेत्यादिवचनं तदपि स्वामिसम्बन्धनिबन्धनानेकदाय
हरप्राप्तौ लोकप्रसिद्धेऽपि सन्देहे व्यामोहनिरासार्थम् । प्रायेण व्यवहारस्मृतीनां लोकसिद्धार्थानुवादकत्वमिति सकलनिबन्धृभि
रभिधानात् । नियतोपायिकं स्वत्वं लोकसिद्धमेवेति भगवतो गुरोरपि संमतम् । लिप्सासूत्रे हि तृतीये वर्णके द्रव्यार्जननियमानां
क्रत्वर्थत्वे स्वत्वमेव न स्यात् स्वत्वस्यालौकिकत्वादिति पूर्वपक्षासम्भवमाशंक्य द्रव्यार्जनप्रतिग्रहादिनां स्वत्वसाधनत्वं लोकसिद्धमेवेति
पूर्वपक्षः समर्थितस्तेन । न च द्रव्यार्जनस्य क्रत्वर्थत्वे स्वत्वमेव न भवतीति याग एव न संवर्तेत । प्रलपितमिदं केनापि । अर्जनं स्व
त्वं नापादयतीति विप्रतिषिद्धमिति ग्रन्थेन । अस्यार्थष्टीकाकृता विवृत एवम् । यदा द्रव्यार्जननियमानां क्रत्वर्थत्वं तदा नियमा
नां स्वत्वोपायतामिदं शास्त्रं न बोधयति । क्रत्वर्थताबोधनेऽप्यावृतत्वात् । तथा सति प्रतिग्रहादिप्राप्तस्य स्वत्वमित्यत्र प्रमाणाभावा

दृष्टेन च स्वर्गयागात्मकयागासम्भवात्तस्येदम्। द्रव्यार्जननियमाभावेयुरितिपूर्वपक्षासम्भवइतिग्रन्थार्थः। प्रत्युपेतमित्या
द्युत्तरसूत्रार्थः। अर्जनप्रतिग्रहादेःस्वत्वहेतुतायालौकिकत्वेनशास्त्रस्य तत्राव्यापारान्नियमानांक्रत्वर्थत्वेनतेनगम्यतइतिन
यागासम्भवेनियमानर्थक्यञ्चेति। सिद्धान्तेपितेनस्वत्वस्यलौकिकत्वाभ्युपगमेनैवविचारप्रयोजनमुक्तम्। अतोनियमातिक्र
मःपुरुषस्यनक्रतोरिति। अस्यापार्थएवंविवृतः। यदाद्रव्यार्जननियमानांक्रत्वर्थत्वन्तदानियमार्जितेनैवक्रतुर्न्नियमातिक्र
मार्जितेनद्रव्येण। ननुपुरुषस्यनियमातिक्रमदोषःपूर्वपक्षे। सिद्धान्तेवर्जननियमस्यक्रत्वर्थत्वाभावात्केवलपुरुषार्थत्वाद
तिक्रमार्जितेनापिद्रव्येणक्रतुसिद्धिरप्रत्यूहा। पुरुषस्यैवतुनियमातिक्रमदोषइति। अनेननियमातिक्रमार्जितस्यापिस्वत्व
मभ्युपगतमन्यथाक्रतुसिद्ध्यभिधानविरोधात्। तत्रैवाधिकरणेकुमारीस्वामिनोप्यत्रभवतःस्वत्वंलौकिकमित्येवाभिमतमिति।
नत्वयवानिकतत्वरत्नाभियोगमाजांसुलभमेव। अतएवाहशास्त्रदीपिकायांपार्थसारथिःरागप्राप्तत्वादर्जनन्नशास्त्रीयं।
रागतश्चपुरुषार्थतयाप्राप्तिःप्रत्यक्षेणैवार्जितन्द्रव्यम्पुरुषम्प्रीणयत्पुरुषार्थेविज्ञायतेनतदनुमानेकत्वेकश्चेवतयाशक्यंविज्ञातुम्
। तस्मात्पुरुषार्थन्द्रव्यंक्रतुरपिपुरुषकार्य्याणामन्यतमइतिकार्यान्तरवत्क्रतावप्युप्रयुज्यतइत्येतावान्विशेषः। ननुतस्यैवाङ्गन्तथा
सतिजीवनलोपात्क्रतुरेवनसम्वर्तेतेतिप्रघट्टकेन। अन्यार्जनस्यशास्त्रीयत्वन्निरस्यतास्वत्वस्यतदुपायानाञ्चलौकिकत्वंस्पष्ट
तरमेवोक्तम्। अन्यदपितेनैवोक्तम्। तस्मात्पुरुषार्थन्द्रव्यार्जनमेवञ्चदृष्टार्थम्भवति। नियमस्तुदृष्टाभावात्काममदृष्टा
र्थःस्यात्। अदृष्टमपिपुरुषार्थार्जनविषयत्वात्। नियमस्यपुरुषगतमेवकल्प्यते। तेनासावुपायान्तरेणार्जयन्प्रत्यवैतीति
गम्यतइति। तत्रस्वस्वामीरित्यादिवचसांलौकिकमेवस्वित्वादौमंस्वत्वोपायत्वमनूद्यतदितिरिक्तोपायनिवृत्तौतात्पर्य्यमिव
मविधयेतिनामसंज्ञकेष्वपि। तृप्तिसाधनभोजनमाश्रितदिङ्नियमवत्। द्रव्यार्जनमेवक्रत्वर्थपुरुषार्थत्वविचारेदाहरणमि
यमस्तुपूर्वपक्षयुक्तितयोपन्यस्तः। सएवतत्रोदाहरणमित्येवभट्टगुरुमतयोर्भेदःस्वत्वस्यलौकिकत्वंनूभयसम्मतमितिनि

ऽर्थः । तन्नदूषणाभूषणादिनु तत्राभियोगवतामाकरे एव व्यक्तं प्रस्तुतानुपयोगादिह नोच्यते । एतेन चौर्य्यादिप्राप्तस्यापि स्वत्वं स्यादिति यत्संग्रहकारधारेश्वराभ्यां स्वत्वस्य लौकिकत्वे दूषणमभिहितं तदपि परास्तम् । चौर्य्यादिषु स्वत्वोपायत्वस्य लोक एव प्रसिद्धेरन्यस्य स्वमिदन्नास्येत्येवं व्यवहारात् । कयाचिदुपायसन्देहादेव स्वत्वसन्देहोऽपीदमस्य वास्य वेत्याकारको नानुपपन्नः । ममस्वमनेनापहृतमिति न ब्रूयादपहर्तुरेव स्वत्वादिति चयत्स्वत्वस्य लौकिकत्वे दूषणमभिहितं तदप्येतेनालूनविशीर्णम् । यच्चोक्तं संग्रहकृता । शास्त्रेण सर्वस्य मन्त्रविनियोगनियन्त्रणाद्यथेष्टविनियोगार्हत्वरूपस्वत्वासम्भवः । इच्छया क्कापि नियोगासम्भवादिति । तदप्यापाततः । नहि वयमैच्छिकविनियोगोपहितत्वं ब्रूमोऽपि तु तदर्हत्वमात्रम् । अन्यथा राजादिभयादिच्छाप्रतीघातेऽपि तत्स्वाद्विनियोगेच्छानिच्छादशयोः स्वत्वतदभावौ विरुद्धौ प्रसज्येयाताम् । राजादिनियन्त्रणादिवशास्त्रनियन्त्रणादन्यत्रैच्छिकविनियोगाभावेऽपि तदर्हत्वस्यानपायात् । अत एव दुर्वृत्तेनाशास्त्रीयविनियोगेऽप्यस्वत्वव्यवहारो नास्ति । प्रत्यवायमात्रं परं शास्त्रातिक्रमात् । तदर्हता च तदर्जितत्वप्रयुक्तास्त्येव । तथा च नयविवेकेऽप्युक्तम् । तच्च तस्य तदर्हं यद्येनार्जितमिति । तदर्हं यथेष्टविनियोगार्हमित्यर्थः । प्रतिबन्धादङ्कुरमजनयतोऽपि कुसूलस्थबीजस्य बीजत्वप्रयुक्तमङ्कुरोत्पादनार्हत्वमिव । वस्तुतस्तु बीजत्वाङ्कुरार्हत्वयोरिव स्वत्वयथेष्टविनियोगार्हत्वयोरपि भेद एव । अन्यथार्हतावच्छेदकापरिचयेऽर्हतायादुर्निरूपत्वात् । तेन ब्राह्मण्यमिव स्वत्वमपि तदुपायज्ञानयोग्यं पदार्थान्तरमेवोत्पत्तिविनाशशालि । ब्राह्मण्यन्तु जातिरूपं नित्यमित्येतावान्परभेदः । इदञ्चाकरे व्यक्तं लीलावत्यादौ च । अत्र मिताक्षरायां स्वत्वलौकिकालौकिकत्वविचारप्रयोजनमुक्तं शास्त्रैकसमधिगम्ये स्वत्वे । मनुः । यद्गर्हितेनार्जयन्ति कर्म्मणा ब्राह्मणा धनं । तस्योत्सर्गेण शुध्यन्ति दानेन तपसैव चेत्यादिस्मरणादसत्प्रतिग्रहादेर्यस्य यदर्जनोपायत्वेन निषिद्धं तदर्जिते तस्य स्वत्वाभावाच्चौर्य्याद्युपार्जितवत्तत्पुत्राणामपि तदविभाज्यमेव । लौकिकत्वे तु स्वत्वस्य तदर्जितेऽपि पितुः स्वत्वात्तत्पुत्राणामपि पितृधनत्वेन तद्विभाज्यम् । अर्जयितुरेव प्रतिषेधातिक्रमनिमित्तप्र-

व्यवायात्प्रायश्चित्तम्। तत्पुत्रादीनान्तु दायरूपधर्मोपायतत्त्वमितिन प्रायश्चित्तमपि। सप्तविंशागमाधर्म्यादायोलाभःक्रयो
जयः। प्रयोगः कर्म्मयोगश्च सत्प्रतिग्रह एवचेतिमनुस्मरणात्। प्रयोगो वृद्ध्यर्थन्द्रव्यप्रयोगः कर्म्मयोग आर्त्विज्यादिकरणम्
। तत्रदायादीनांत्रयाणांवर्णचतुष्टयसाधारण्येनजयस्यक्षत्रियस्यप्रतियोगस्यक्रयस्य च वैश्यस्यशूद्रस्य प्रतिधर्म्यत्वम्। स्वस्वधं
तस्यापदि च स्वस्वधंक तस्यापि सर्वान्प्रति। कर्म्मयोगस्यतु विप्रस्यैवेति विशेषइति। अत्र मदनरत्नकारो दूषणमाह। सत्यस्व
शास्त्रैकसमधिगम्यत्वेप्यसत्प्रतिग्रहादिनिषेधोनस्वत्वानुत्पादकतान्तेयांवदति। किन्तु प्रत्यवायमात्रहेतुताम्। इतरथा
आपद्गतः सम्प्रगृह्णन्भुञ्जानोवायतस्ततः। नलिप्येतैनसाविप्रोज्वलनार्कसमोहिसः। कुसीदंकृषिवाणिज्यंप्रकुर्वीतास्वयंकृत
म्॥ आपत्कालेस्वयंकुर्व्वन्नैनसायुज्यतेद्विजइतिवचनैरेनसानयुज्यतइत्यभिधानेनापदि प्रत्यवायाभावावगमेनापदिप्रत्य
वायस्यैवावगमात्। प्रतिषेधप्रतिप्रसवयोः समानविषयत्वौचित्यात्। अतएवानापदि तदन्द्रव्यपरित्यागपूर्वकं जपतपोरूपं
प्रायश्चित्तमेवविदधाति। नचैर्व्यादिवद्राजदण्डमपिकिञ्चिद्वचनमसत्प्रतिग्रहादौ। तेनासत्प्रतिग्रहादेः पूर्वपक्षसिद्धा
न्तयोर्द्वयोरपितेषांस्वत्वोत्पादकत्वाविशेषात्तदर्जितस्यपुत्रादिविभाज्यत्वमपितुल्यमितितेनतत्प्रयोजनंविचारस्यास्य युक्तमिति
। अत्रवदामः। शास्त्रैकसमधिगम्यस्वत्ववादिनोमतेयथाचौर्य्यादिनिषेधस्यस्वत्वानुत्पादकत्वदण्डप्रयोजनंविचारस्यास्ययुक्त
मिति। अत्रकर्तुः प्रायश्चित्तार्हताप्रयोजकत्वपरता। तथाऽसत्प्रतिग्रहादिनिषेधस्याप्यस्तु यथाचापद्युपाधिना। तथैवसप्तमे
भक्तेभक्तानिषडनश्नता। अश्वस्तनविधानेनहर्त्तव्यंहीनकर्म्मणः। आख्यातव्यञ्चतत्तस्मैपृच्छतेयदिपृच्छतीत्यादिप्रतिप्रस
वबलाच्चौर्य्ये तच्चितयाभावस्तथाऽसत्प्रतिग्रहादेरप्यस्तु। अन्ययोभयत्रापिततः पञ्चमहायज्ञाद्यनित्यतिप्रसङ्गः शास्त्रीयत्वे
स्वत्वस्याप्रसक्तचौर्य्योपायकत्वनिषेधः कथमितिचेत्। अधिगमान्तर्भावेनकथञ्चित्तत्प्रसक्तेस्तेनावश्यवक्तव्यत्वात्। अपरथाप्र
तिषेधानुपपत्तेः। शास्त्रप्राप्तप्रतिषेधे च विकल्पापत्तिभियादीक्षितोनजुहोतीत्यादिवद्व्याख्याकारमतेनपर्य्युदासत्वंसामान्य

विशेषभावेन विशेषनिषेधसामान्यविध्योर्बाध्यबाधकभावोऽपि वामतान्तरे सोऽर्थापत्तिकार्य्यमेवागम्या। प्रतिग्रहादेस्तु प्रसक्तिर्न्न
ह्यस्यादेरस्तेयेत्यापन्नद्भावोपाधिकौ प्रतिप्रसवप्रतिषेधावप्युपपन्नतरौ। नह्यस्वप्रतिग्रहस्वयंग्रहणवाणिज्यादावनापदि
ब्राह्मणस्य राजदण्डोऽपि स्यादिति चेन्नइष्टापत्तेः। नहि स्वधर्म्मत्यागिनो राजदण्डाभावः कस्यापि सम्मतः। सचकचित्सामान्य
रूपेणोक्त एव गृह्यते कचिद्विशेषाम्नातइत्यन्यदेव। अत एवालौकिकस्वत्ववादिनइदमप्यपरदूषणम्। चौर्य्यादिनिषेध
स्यचितयप्रयोजकतागौरवम्। पर्य्युदासत्वादिस्वीकारगौरवञ्च लौकिकस्वत्ववादिनस्तु दृष्टप्रत्यवायमात्रपरत्वम्॥ नेयं
स्वत्वानुपायत्वस्य लोकसिद्धत्वादितरगप्राप्तनिषेधे पर्य्युदासादिस्वीकारेनापि निस्तारो लाघवमिति। नस्वाध्यासेकसमधि
गम्येस्वत्वेऽसत्प्रतिग्रहादेस्तदनुपायत्वात्तदर्जिते पितुःस्वत्वाभावःस्यादेवेत्यापाद्यचौर्य्याद्यर्जितपितृधनाविभागवदसत्प्रतिग्र
हाद्यर्जितस्याप्यविभाज्यत्वम्। लौकिकेतु नतस्मिन्लोकेतेषामपितदुपायत्वासिद्धत्वाद्विभाज्यमितिमिताक्षरोक्तं साध्वेव प्रयोज
नम्। इदञ्चोपलक्षणम्। पूर्वपक्षेचौर्य्याद्यर्जितपितृधनस्वीकारे यथापुत्रादीनामपिदण्डप्रायश्चित्तमभवत्येवतथाऽस
त्प्रतिग्रहाद्यर्जिततद्ग्रहणेऽपीत्यपिप्रयोजनमवसेयं स्वर्जयितुरेवप्रायश्चित्तमित्यभिधानेनोचितत्वात्। इदन्त्विह विचार्य्यम्।
स्वत्वस्य लौकिकत्वे चौर्य्यस्य लोके तदनुपायत्वे सिद्धे मनुक्तानरनाद्यापदियचौर्य्यमनुमतन्तेन चौरितेस्वत्वमुत्पद्यतेनवा। ना
द्यः लोकेऽनुपायत्वेनावधारितात्तदुत्पत्तेरभ्युपगन्तुमशक्यत्वात्। नहि प्रत्यक्षविरुद्धं शास्त्रवचनसहस्रेणापिजन्यते दधिजनकत्वादि
बोध्यते। नद्वितीयः। अस्तेनपञ्चमहायज्ञादिप्रधानानिष्पत्तेः। नचवस्तुप्रतिघातमात्रमेवतेनक्रियतेनान्यद्लौकिकमितिवा
च्यं। शिष्टाचारविरोधात् नहि शिष्टाः पञ्चमहायज्ञाद्युक्तत्वात्तदुपयुञ्जते। यदन्नःपुरुषो लोके तदन्नास्तस्य देवता इति स्मरणाच
। अत एव विश्वामित्रस्य। श्वपचगृहात्हृत्यैन्द्रादिदेवोद्देशेनयज्ञभोक्तामीतिमनसि हृद्यय दायथादेवतान्तद्भा
गं स्वकुम्भवृत्तस्तदानुष्टैरिन्द्रादिभिर्वृष्टिःसृष्टा। सस्यस्तत्क्षणमेवप्रभूतमभूदित्याख्यायिका पुराणेषु संश्रूयते। शास्त्रेकस्य

मधिगम्येतु स्वत्वे यथाशास्त्रञ्चौर्यादेरपि स्वत्वोत्पादकत्वतदभावौ न विरुद्धौ। लौकिकस्वत्वन्तदुपायवादिनस्तूभयतःपाशार
ज्जुरियमिति। अत्रप्रतिविदध्मः। यद्यपि चौर्य्यस्य स्वत्वोत्पादकत्वन्न लोकसिद्धन्तथाप्यनेनैव समभक्ताशनकालेषड्भक्तानशि
नो ग्रहणविधानाद्गम्यते। स्वत्वमात्रस्य हि शास्त्रीयत्वं विरुद्धत्वमतज्ज्ञानानां क्रयादिस्वत्वसाध्यव्यवहारानुपपत्तेः। अतश्चौर्य्यनि
षेधो दण्डपापमात्रबोधक एव। चौर्य्यस्य स्वत्वोत्पादकत्वाप्रसक्तेर्न्न तदभावपरः। यथा ब्राह्मण्यस्य सर्वत्र प्रत्यक्षत्वेपि जात्युत्क
र्षस्थले शास्त्रीयत्वमेव। पुरुषेयत्तानियमस्य शास्त्रैकगम्यत्वात्। यथाङ्कुराचार्य्याः। एतावन्मात्वन्त्विहागमिकम्प्रत्येतव्यम्।
न ह्ययम्पुरुषेयत्तानियमो लोकप्रमाणगम्य इति। तत्रापि तावत्पुरुषपरम्पराजन्यव्यक्तौ ब्राह्मण्यमभिव्यज्यत इति यद्व्यञ्जक
भावस्यैव परं शास्त्रीयः व्यञ्जके ज्ञानवतस्तादृशव्यक्तौ ब्राह्मण्यप्रत्यक्षमेव। व्यक्तिप्रत्यक्षप्रमुखजातिप्रत्यक्षसामग्रीसम्भारादिख
पि वदन्ति। इह तु चौर्य्यमात्रस्यैव स्वत्वानुत्पादकत्वग्रहणादृशस्यतस्य स्वत्वोत्पादकत्वं शास्त्रेण बोध्यते। न च प्रत्यक्षविरोधः
। न हि प्रत्यक्षविरुद्धं शास्त्रसहस्रेणापि बोधयितुं शक्यमिति वाच्यम्। न ह्यनुत्पादकत्वमपि लोकात्। तादृशेन व्यवहाराभावाद
न्वयव्यतिरेकगम्यास्वत्वस्य चौर्य्यानुपायकतानावगम्यत इत्येतावत्। तथा च पुत्रेष्ट्यादीनां लोकानवगतपुत्रादिजनकताय थाशा
स्त्रादवगम्यते तेषां दृष्टोपायान्तरजन्यतायामपि तथेहाप्यस्तु। स्वर्गाहवनीयादीनामलौकिकमात्ररूपाणां दृष्टोपायाभावो
प्यधिक इत्यन्यदेतत्। प्रतिबन्धकप्रतिबद्धदाहादिजनकतायथोत्तेजकमन्त्राणामथर्वादिशास्त्रगम्यालोकप्रमाणगम्यत्वात्
। उत्तेजकतायाश्च प्रतिबन्धकप्रतिबद्धकार्यजनकतातिरिक्तायाश्चानिर्वाच्यत्वात्। शक्तिनाशनतदुत्पत्तिकल्पनायामतिगौरवा
त्। यमुजन्मना स्वत्वन्निराकुर्वता जीमूतवाहनेन कश्चिज्जन्मनैवेति। जन्मनिबन्धनत्वात्पितापुत्रस्य सम्बन्धस्य पितृमरणस्य च
कारणत्वात्परम्परया वर्णनमिति प्राचीनलिखनाभिप्रायमुक्त्वा कथमुत्पादनरूपेण पितृगतव्यापारेण पुत्रे स्वत्वोत्पत्तिरित्याशङ्क्या
न्यव्यापारेणाप्यन्यस्य स्वत्वमविरुद्धं शास्त्रमूलकत्वादस्य। दृष्टश्च लोकेपि हाने हि चेतनोद्देश्यकत्यागादेवदानव्यापारान्व

म्प्रदानस्य द्रव्ये स्वामित्वं। न च स्वीकरणात्स्वत्वं स्वीकर्तुरेव दातृत्वापत्तेः। परस्वत्वापत्तिफलेन हि दानरूपता तच्च फलं सम्प्रदाना
धीनम्। यथा हि देवतोद्देशेन त्यागं कुर्वन्नपि यजमानो न होता किन्तु तस्यैव यागस्य होमाभिधाननिमित्तभूतम्प्रक्षेपं कुर्वन्नृत्विगेव
होतेत्युच्यते तद्वदत्रापि स्यात्। किञ्च। मनसा पात्रमुद्दिश्येत्यादिशास्त्रे स्वीकारात्प्रागेव दानपदं दृष्टं। ननु यद्ग्रहणं स्वीकारः।
अभूततद्भावे च्विप्रयोगादस्वं स्वं कुर्वन्व्यापारः स्वीकारो भवति कथन्ततः प्रागेव स्वत्वं। उच्यते। उत्पन्नमपि स्वत्वं सम्प्रदानव्यापारे
णाममेदमिति ज्ञानेन यथेष्टव्यवहारार्हं क्रियत इति स्वीकारशब्दार्थः। याजनाध्यापनसाहचर्याच्च प्रतिग्रहस्य स्वत्वमर्जनयतोप्य
र्जनरूपता न विरुद्धा। याजनादौ दक्षिणादानादेव स्वत्वात्। पितृनिधनकालीनञ्जीवनमेव वा पुत्रस्यार्जनम्भविष्यति।
किञ्च। भ्रात्रादिधने तन्मरणात्तन्मरणकालीनजीवनाद्वा भ्रात्रन्तरादेः स्वत्वमकामेनापि वाच्यन्तद्वदिहाप्यस्त्विति। तदेतद्भा
नमतिविलसितम्। तथा हि शास्त्रमूलत्वादस्येति ताबत्स्वत्वस्य लौकिकत्वसाधनादेव निराकृतम्। यदपि दृष्टस्वलोके पोष्यादित
दप्यापातसुन्दरम्। न हि प्रतिग्रहीतर्य्यस्वीकुर्वत्यपि तस्य स्वत्वमुत्पद्यते। पात्रविशेषोद्देशेन त्यागे तेनास्वीकृतेपि तत्स्वत्वे त्यज्यमानस्य
परस्मैनस्य प्रतिपादनासम्भवप्रसङ्गात्। यदपि स्वीकर्तुरेव दातृत्वापत्तेरिति तदप्ययुक्तम्। परस्वत्वापत्तिफलकव्यापार
स्य दानत्वात्संप्रदानस्वीकारानुकूलानुमाननादिव्यापारस्य दानपदार्थत्वात्तत्फलोपहिततानु तस्य संप्रदानस्वीकारमन्तरेणानुप
न्नभवतीति सम्प्रदानव्यापारस्तद्घटकः। ननु स एव दानशब्दार्थः। यदपि यथा हीत्यादि तदपि न। यजमानकर्तृकाग्निहोत्र
होमादौ तद्विरोधात्। यत्रापि दर्शपूर्णमासादौ त्यागमात्रं यजमानेन क्रियते। चरुहवनस्य प्रक्षेपोऽध्वर्य्वादिभिस्तत्रापि विवि
क्तकर्तृकत्वादन्यथा स्वन्तद्व्यवहारविरोधात्। अव्यक्तस्य प्रक्षेपपरं होमशब्दवाच्यता नास्ति। स तु त्यागः स्वकर्तृकोऽन्यकर्तृको वा
वच्छेदकोस्तु। न तावता कश्चिद्दोषः। अत एव यागस्य न प्रक्षेपापेक्षात्मलाभो होमस्य तु तदपेक्ष एव। दानस्य तु प्रतिग्रहीत
व्यापारसापेक्षत्वैव। तदभावे दानपदार्थानिष्पत्तेः। यच्च किञ्चेत्यादि। तदपि यत्किञ्चित्। उत्सर्गस्यैव तत्र विधानात्ननु दा

नस्य । अत एव दाता तत्फलमाप्नोतीत्युक्तमन्यथा तस्यानुवादत्वापत्तेः । दानत्वेहितस्य तत्फलाभावाप्रसक्तेस्तु तत्फलमाप्नो
तीति व्यर्थमेव स्यात् । अतस्तत्र जलप्रक्षेपरूपः पात्रोद्देश्यकमुत्सर्ग एव ददातिना विवक्षितो दानत्वनिष्पत्तिस्तु तस्य सम्प्रदा
नकर्तृकस्वीकारे सत्येवेति परमार्थः । अत एवोत्सृजेदित्येव तत्र सङ्कल्पवाक्यं शिष्टानामनुदास्येहं तिसम्प्रददे इति वा । अत एव
प्रतिग्रहादेव दानस्य फलेपि सम्प्रदानस्य स्वत्वमिति प्रतिग्रहस्यार्ज्जनरूपत्वमविरुद्धम् । स्वत्वजनको हि व्यापारोऽर्ज्जनशब्दा
र्थः । अत एवाह प्रभाकरः । प्रलपितमिदं केनापि । अर्ज्जनं स्वत्वं नापादयतीति विप्रतिषिद्धमिति । अयमाशयः प्रामेयविदु
षः । किञ्च । प्रतिग्रहस्य ममेदमितिज्ञानरूपस्य दातृव्यापारमात्रोत्पन्नस्वत्वव्यवहारार्थतामात्रसम्पादकतायामर्ज्जनशब्दस्य
तत्र गौणता स्यात् । अन्यस्मै तत्प्रतिपादनानुपपत्तिश्च पूर्वमुक्ता । तदस्वीकारे प्रागुत्पन्नस्वत्वस्य नाशश्च कल्प्यः स्यात् । न च दा
तृव्यापारात्मकस्वत्वनाशान्यथाधारणस्य सम्प्रदानस्वत्वोत्पत्तिरवश्याभ्युपेया त्वयापि । अपरथैतत्स्वत्वनाशेऽन्यस्य च स्वत्वानुत्पत्तावे
कस्य तस्य परिग्रहादिनाऽन्यस्य यस्य कस्यापि वनगतास्वामिकतृणकाष्ठादाविव तत्र स्वत्वं स्यात् परिपालनाप्रसक्तिश्च । न चा
न्यतेपि पात्रविशेषोद्देश्यकत्यागे पात्रविशेषस्योत्पन्नमपि स्वत्वं तदस्वीकारेण नश्यत्यन्यस्य स्वीकारात्तस्योत्पद्यत इति मतेपि विशे
षः साधारणस्वत्वविनाशासाधारणस्वत्वोत्पत्तिवदिति वाच्यम् । यतस्तत्र साधारणस्वत्वव्यवहाराभावेन तदुत्तरप्रतिग्रहीत्रा
नैव स्वीक्रियते गौरवाच्च । किन्तु दातुरेव यथेष्टविनियोगार्हस्वत्वापगमेपि परस्वत्वापत्तिफलाभावे दानस्य हानिनिवर्त्तनीयोऽवि
धिगिरस्कफलार्थिनः प्रतिपादनावधिपरिपालनीयत्वरूपं स्वत्वमस्त्येव । यथा कृतेह विविभक्तसाङ्गत्वावधिः अकृत्यस्य भो
दिनिषेधाश्रपणनिमित्तदोषश्रवणानुरोधेन तथा चान्यस्वत्वानुत्पत्तावपि नमध्यकत्व परिग्रहाद्यनिवारणादिदोषः । शि
ष्टाचारेप्युभयत्र परिपालनरूपस्तन्मूलक एव । न चोत्सर्गमात्रस्य तत्र त्वया विध्यभ्युपगमात् परस्वत्वापादनादरश्च न स्या
दिति वाच्यम् । तादृशोत्सर्गस्यैव विधितात्पर्य्यविषयत्वात् । होमस्थलेप्यन्यथा भस्मसाद्भावनादरापत्तेः । यच्च याज्ञव.

ध्यापनस्याहृ चर्थ्यात्प्रतिग्रहस्यापिस्वत्वाजनकत्वेपिगौणमेवार्जनत्वमिति । तदप्यबोधात् । नवाहि येये द्विजप्रभृतीनामभ्या
गास्तेषान्तेषान्तेभ्योभृतिरूपेणैव दक्षिणाकालेप्रतिपादनम् । परिक्रयव्यवहारोप्यत एव स्वामिकर्म्मपरिक्रयइतिजैमिनि
सूत्रादौ विस्तरेणनिर्णीत एव विस्तरन्तु तत्रैवद्रष्टव्यं । कर्म्मकरणानीतजनिकाभृतिरेवहि परिक्रयः । एवमध्यापनेपिशिष्यो
ध्यापकायाध्यापनभृतिमेवतत्स्वत्वजननीमध्ययनान्तेर्प्पयंति । नियतभृतिकरणेनुभृतकाध्यापनमुपपातकम् । अत एव या
जनाध्यापनयोःप्रतिग्रहाद्भृतित्वाद्वाचार्यनिर्वेशाच्चपृथगभिधानमुभयमिश्रितत्वात् । तेनतयोरपिमुख्यमेवार्जनत्वं । दक्षिणा
त्वव्यवहारोप्यतएवचर्त्विगध्यापकदेये । यदपिभ्रात्रादिधनेभ्रात्रन्तरादिस्वत्वोत्पादकत्वन्तन्निधनस्यतत्कालीनभ्रात्रन्तरादि
जीवनस्यवाकॢप्तमितिपुत्रादावपिपित्रादिनिधनन्तत्कालीनतज्जीवनम्वास्वत्वोत्पादकमस्तुनत्वकॢप्तंपुत्रादिजन्मनैवेत्युक्तम् । तद
पिजन्मनोपिस्वत्वोत्पादकत्वस्यावश्यकत्वोपपादनादेवपरिहृतं । यच्चोक्तमूर्ध्वंपितुश्चेत्यादिमनुवचनमपिजन्मनःस्वत्वापाद
कत्वेनघटते । प्राग्विभागनिषेधार्थत्वेनतस्यास्वार्थपरत्वापत्तेः विभागदृष्टार्थत्वेनतद्विधानकालविधानयोरसम्भवात् । विभागस्य
पक्षप्राप्तस्यनियमार्थत्वसद्भावान्नविधिविरोधाद्यापत्तेः । तस्मात्पितरि सतिमातरि च सत्यान्तद्धनस्वाम्याभावकपरतयोरेवत
योःपुत्रादेस्तद्धनस्वाम्यमितिप्रतिपादनार्थमेवतद्वाक्यमिति । तदप्युक्तानभिधानम् । अस्वार्थविधानापत्तेरनुक्तत्वात् । प्रा
गस्वातन्त्र्येणकालविधिपरत्वेबाधकाभावात् । इच्छाप्राप्तकालानुवादेपिव्यवहारशास्त्रत्वेनाविरोधात् । एतेनजातेष्ठिवच्छे
षविरोधादिनिमित्तानन्तर्यबाधकाभावात्पितुरुपरमानन्तरक्षण एव विभागःप्रसज्येतेत्यप्यपास्तम् । कालविधानेनपितुरुपरम
स्यानिमित्तत्वाबोधनाच्च । अन्यथानिमित्तेसतिनैमित्तिकस्यावश्यकत्वात्पित्रोरूर्ध्वंविभागकरणेप्यवायोपिप्रसज्येत । पतितत्व
पारिव्राज्ययोःपितुःस्वत्वनाशोप्यधिकःजन्मनास्वत्वन्तुल्यमेव । पातित्येतुप्रायश्चित्तानाचरणएवस्वत्वनाशोविभागानर्हताच
। अन्यथाद्रव्यसाध्यंप्रायश्चित्तमपिपित्रोःस्वद्रव्येणनस्यात् । अत एव मातुर्निवृत्तेरजसीत्याद्यपिकालविधिपरमेव । ननुपा

निष्यादिवत्तत्स्वत्वाभावः । स नु लोकत एव विभागनिषेधासम्भवादविवेच्यादि वक्ष्यते । किञ्च । यदेवं पितृस्वत्वापगम एकः कालः अपरश्चानपगत एव पितृस्वाम्ये पितुरिच्छयेति कालद्वयमित्युक्त्वा मध्ये मिताक्षरोक्तं विभागकालत्रयं दूषयित्वा । तस्मात्पतितत्वनिस्पृहत्वोपरमैः पितृस्वत्वापगम एकः कालः अपरश्च सति स्वत्वे तदिच्छातः इति कालद्वयमेव युक्तमित्युपसंहरता जिमूतवाहनेनैव पितृस्वत्वानपगमेऽपि पुत्राणां विभागो हि न स्वत्वपुत्राणाम्पितृधने स्वत्वोत्पादः कथम् । कथञ्च जीवतोः पित्रोः स्वाम्यप्रतिपादकवचनैः सह न विरोधः । अस्वस्य विभागासम्भवात्कथन्तेषां विभागः ॥ पितृस्वत्वापगम एवोर्ध्वे पितुरित्यनेन विवक्षितोऽन एवमृतपदम्परित्यज्योर्ध्वमित्युक्तम् । पितृस्वत्वापगमोर्ध्वमित्यर्थः । पितृस्वत्वापगमश्च तन्निधनादिवत्तस्य पतितत्वनिस्पृहत्वाभ्यामपीत्यादि स्वग्रन्थे पूर्वापरविरोधश्च न कथम् । अत्राप्युपरतस्पृहत्वादिना पुत्राणां स्वत्वम्पितृधने भवतीति ज्ञापनादयमेकः काल इति च उक्तम् । तत्राप्युपरतस्पृहत्वादिनेत्यनेन पितृस्वत्वापगम एव यदि विवक्षितः स्यात् ह्यनपगते पितृस्वत्वे तदिच्छातोऽपरः काल इत्यभिधानं विरुद्धम् । पितृस्वत्वापगमकालीनपुत्रादिजीवनस्यैवार्जनस्य तदीयस्य स्वीकारात्पितृस्वत्वे सति पुत्राणान्तद्धने स्वत्वस्वीकारः कथम् । न ह्यनाश्रमित्वमातृरजोनिवृत्तिमात्रेण पितुः स्वत्वापगम पूर्वे द्रव्यस्वामिसम्बन्धाधीनत्तत्स्वाम्योपरमे यत्तद्द्रव्ये स्वत्वं तत्रानिरूढो दायशब्द इति स्वोक्तदायशब्दार्थाभावात्पितृस्वत्वानपगमे यत्र विभागस्तत्र दायशब्दप्रयोगोऽपि तुः स्यद् इत्यादिवक्तृव्याकुलोऽस्यात् । जन्मना स्वत्वस्वीकारे तु सर्वमनाकुलमित्यादि सुधीभिरूह्यमेयं । अत एव मिताक्षरादौ पूर्वस्वामिसम्बन्धाधीनत्वं यद्धनं तत्स्वत्वमन्यस्य तदेव दायशब्दवाच्यमित्युक्तं न तु पूर्वस्वामिस्वाम्योपरमेऽपि तत्र प्रवेशितः । तत्सिद्धं द्विविधो दाय इति मिताक्षरोक्तविभागकालत्रयसमर्थनन्तु तत्प्रस्तावे प्रयत्नयिष्याम इत्यलम्प्रसक्तानुप्रसक्तविचारेणेति । यच्च जीमूतवाहनेनैव मिताक्षरोक्तं । विभागो नाम द्रव्यसमुदायविषयाणामनेकस्वाम्यानां तदेकदेशेषु व्यवस्थापनमिति विभागशब्दार्थः । न च सम्बन्धाविशेषात्सर्वेषां सर्वधनोत्पन्नस्य स्वत्वस्य द्रव्यविशेषे व्यवस्थापनं विभाग इति वाच्यमित्याद्यं

क्यसम्बंध्यन्तरसद्भावप्रतिपक्षस्य सम्बन्धस्यावयवेष्वेव विभागव्यञ्जकत्वापादकत्वात्। जन्मपितृधनगतस्वत्वोत्पादविनाश
कल्पनागौरवात्। यथेष्टविनियोगफलाभावेनानुपयोगाच्चेति दूषयित्वा उच्यते। एकदेशोपात्तस्यैव भूहिरण्यादावुत्पन्नस्य
स्वत्वस्य विनिगमनाप्रमाणाभावेन वैशेषिकव्यवहारानर्हतया अव्यवस्थितस्य गुटिकापातादिना व्यञ्जनं विभागः। विशेषेण भज
नं स्वत्वज्ञापनं वा विभाग इति व्युत्पत्त्येत्युक्तम्। तद्वायतत्वहतोपन्यस्तं दूषितम्। यत्रास्य स्वत्वन्तत्रैव गुटिकापात इति कथं वचनाभा
वा निश्चेतव्यं। यत्र हि पितुर्निधनानन्तरं तत्र कीयाशयोरेकमादाय भ्राता यदर्जितं तत्रार्जकस्य द्वौ भागावपरस्यैकः सर्वसंमतः
। न च यदि प्राचीनधनविभागकाले गुटिकापातादर्जकेन स एवांशः पश्चाल्लब्धस्तदा प्रादेशिकस्वत्ववादिमते प्रागर्जकस्यैव स्वे
च्छया अर्जितेनार्जितधने कथं भ्रात्रन्तरस्य विभागः। तत्रैव स्वत्वेन तदुत्पन्नेषु तरां स्वत्वाभावादन्यस्य चाविभाज्यत्वात्। यदि वार्जके
न रेणासोऽस्य अंशस्तदा तेनार्जितधनस्य सममभाग एव युक्तः। एकस्य स्वायासेनापरस्याश्वायासेनार्जकत्वादिति दूषिते। वस्तुत
स्तु सम्बन्धाविशेषात्सर्वे सम्बन्धिनां सर्वधनोत्पन्नस्वत्वस्य गुटिकापातादिना प्रादेशिकव्यवस्थापनं विभागः। जन्मधनगतस्वत्वो
त्पादविनाशावप्यगत्या कल्प्येते। संसृष्टतायां प्रादेशिकस्वत्वस्य तत्तद्धनस्वत्वोत्पादविनाशाविव नच विभक्तो यः पुनः पित्रा भ्रात्रा वैक
त्र संस्थितः पितृव्येणाथवा प्रीत्या स तु संसृष्ट उच्यत इति बृहस्पतिवचने येषामेव हि पितृभ्रातृपितृव्यादीनां पितृपितामहोपार्जित
द्रव्येणाविभक्तं स्वत्वमुत्पन्नं तैः संभवति। त एव विभक्ताः सन्तः पुनः परस्परप्रीत्या पूर्वकृतविभागं धत्ते। यत्तव मम यन्मम धन
न्तव वा पीत्येकस्मिन्कार्ये एकरूपतया स्थितास्ते संसृष्टाः। न चानेकरूपाणान्धनसंसर्गमात्रेण सम्भूयकारिणां वणिजामपि
संसर्गित्वम्। नापि विभक्तानान्द्रव्यसंसर्गमात्रेण। प्रीतिपूर्वकतादृगभिसन्धिविनैव भिद्धनादायभागकनापि स्वहस्तितम्
। साधारणस्वत्वादेव हि बन्धूनामविभक्तानां भोगमेव प्रदापयेत्। इति कात्यायनवचनं यथाश्रुतमेव सङ्गच्छते। यावद्धि ध
नमात्रे स्वं स्वत्वस्यापि सत्त्वात्। अत एवात्र परस्परस्य चौर्यमपि नायं धत्ते। एवञ्च। साक्षित्वम्प्रातिभाव्यञ्च दानं ग्रहणमेव च।

विभक्ताभ्रातरःकुर्य्युर्न्नाविभक्ताःपरस्परमिति ॥ नारदवचनेपरस्परनिरूपितदानादिनिषेधोपिन्यायमूलकएव। दानादेरपूर्वमपिदेयादौप्रतिग्रहीत्रादेःस्वत्वसत्वाद्दानप्रतिग्रहादेरसम्भवात्। अविभक्तत्वादेवचाविभक्तद्रव्येणयत्कृतंदृष्टादृष्टार्थंकर्म्मतत्रसर्वेषांफलभागित्वम्। तथाचनारदः। भ्रातॄणामविभक्तानामेकोधर्म्मःप्रवर्त्तते। विभागेसतिधर्मोऽपिभवेत्तेषांपृथक्पृथक् ॥ व्यासोपि। स्थावरस्यसमस्तस्यगोत्रसाधारणस्यच। नैकःकुर्य्यात्क्रयन्दानम्परस्परमतंविना ॥ अत्रसमस्तस्येतिविशेषणोपादानात्कृत्स्नधनगतमेवप्रत्येकस्वत्वंक्रीयते। तस्मात्तुल्यधनसम्बंध्यन्तरसत्वेनसम्बन्धिसकाशात्संक्रान्तधनस्तस्यापिममापीतिसम्बन्धिनाप्रतीयतेतद्धिमतौदानादिकंप्रतिषिद्धंस्वार्थम्। अतोनैकदेशगतंस्वत्वमिति। इदञ्चद्रव्यसमुदायविषयाणामनेकस्वाम्यानामेकदेशेव्यवस्थापनंविभागइतिवदतोमिताक्षराकृतोप्यभिमतमितिलक्ष्यते। इदन्त्विहविचार्यम्। द्रव्यसमुदायनिरूपितंस्वामिगतंस्वाम्यम्। स्वामिनिरूपितञ्चद्रव्यसमुदायेस्वत्वंव्यासज्यवृत्तिप्रत्येकवृत्तिवा। नाद्यः। एकैकस्वामित्वस्वत्वाश्रयनाशेतन्नाशस्यावशिष्टसमुदायगततत्तुल्यनेष्वकल्पनायामतिगौरवापत्तेः। प्रत्येकस्यप्रत्येकद्रव्येदानक्रयादियथेष्टविनियोगानर्हत्वापत्तेर्व्यवहारविसंवादापत्तेश्च। नद्वितीयःविभागेसतितावतान्नाशोत्पादकल्पनापत्तेः। स्वस्यसतोविभागेननुविभागात्स्वत्वमितिग्रन्थविरोधाच्च। अत्रब्रूमः। प्रत्येकवृत्तीनिसम्बधाविशेषात्स्वाम्यानिचसन्त्येव। परस्परविभागागतेपरस्परस्यान्यान्यदीयद्रव्येतानिनश्यन्तिपरमरणपारिव्रज्यादिनेवेतिनकाप्यनुपपत्तिः। व्यवस्थापनमपीदमेवअन्यथैकदेशउत्पादनमित्येववदेत्। अतएवविनाशमात्रकल्पनानतुस्वत्वान्तरोत्पादकल्पना। जीमूतवाहनमतेचकुत्रवास्तुवंममस्वत्वमितिविभागात्प्रागनिरूपणात्तदधीनश्रौतस्मार्त्तलौकिककर्म्मोच्छेदः। अनुमत्याविभागोत्तरकृतयापरस्परद्रव्येपरस्परस्वत्वान्तरोत्पत्तिस्वीकारेतदुत्पादविनाशकल्पनागौरवंयत्त्वयामिताक्षराकृतेप्रत्यापादितन्ततोपितवाधिकमापन्नम्। व्यवहारानुपयोगेनसमुदायस्वत्वस्यनिःप्रयोजनताचयोपन्यस्तासाप्येकदेशगतस्वत्वाभ्युपगमेतुल्येवेति

छ्रुतमतिदूरंगत्वा ॥ ● ॥ अथविभागकालकर्तृनिरूपणम्। तत्रमनुः। ऊर्ध्वंपितुश्चमातुश्चसमेत्यभ्रातरःसमम्। भजेरन्पैतृकंरिक्थमनीशास्तेहिजीवतोः ॥ पैतृकम्पित्रोःसम्बन्धिप्रागुभयोपादानात्। अतएवपितुरूर्ध्वमितिपितृधनविभागकालः। मातुरूर्ध्वमितिमातृधनविभागकालोऽभिहितः। चशब्दस्तुकालान्तरसमुच्चयार्थःनतुद्वयोरूर्ध्वमितिनियमार्थः। पितृधनविभागेमातृजीवनस्याप्रतिबन्धकत्वात्। मातृधनविभागेपितृजीवनस्य। तथाचाहसंग्रहकारः। पितृद्रव्यविभागःस्याज्जीवन्त्यामपिमातरि। नस्वतन्त्रतयास्वाम्यंयस्मान्मातुःपतिंविना ॥ मातृद्रव्यविभागोपितथापितरिजीवति। सत्स्वपत्येषुयस्मान्नस्त्रीधनस्यपतिःपतिरिति ॥ पत्युरभावेपिपुत्रेषुसत्सुयतोमातुस्तद्धनेस्वातन्त्र्येणस्वाम्यंनास्त्यतस्तस्यांजीवन्त्यामपिपितृधनविभागोयुक्तः। यतस्त्वपत्येषुसत्सुभार्याधनेपत्युःस्वाम्याभावस्ततस्तस्मिन्जीवत्यपिपुत्राणांमातृधनविभागाधिकारइतिभावः। अनस्वानीशास्तेहिजीवतोरित्यपितत्तद्धनेव्यवस्थायाअस्वातन्त्र्यप्रतिपादकन्तत्वस्वत्वप्रतिपादकंजन्मनास्वत्वस्यपुत्राणाम्पितृधनेव्यवस्थापनात्। याज्ञवल्क्यः ॥ विभागञ्चेत्पिताकुर्य्यात्स्वेच्छयाविभजेत्सुतान्। ज्येष्ठम्वाश्रेष्ठभागेनसर्वेवास्युःसमांशिनः ॥ स्वेच्छयापितासुतान्विभजेदितिवदन्जीवत्यपिपितरिपितुरिच्छायदासोपिविभागकालइतिसूचयति। तदाचपितैवविभागकर्ता। अस्वाम्यंहिभवेदेषांनिर्दोषेपितरिस्थितेइत्यनेनपुत्राणामस्वातन्त्र्यप्रतिपादनात्। निर्दोषेइतिविशेषणात्पादित्यादिनिर्दोषवतिसत्यपिपितरिपुत्राणान्तत्पारतन्त्र्याभावात्तदिच्छायदासोपिविभागकालःपुत्राणाञ्चतदाविभागकर्तृत्वमित्युक्तम्भवति। अन्योपिपुत्रेच्छयाविभागकालःपितरिद्रव्यनिस्पृहेनिवृत्तरमणेमातरिचनिवृत्तरजस्कायाम्। यथाहनारदः। अतऊर्ध्वम्पितुःपुत्राविभजेयुर्द्धनंसममिति। पित्रोरूर्ध्वम्विभागमुक्त्वा। मातुर्निवृत्तेरजसिप्रत्तासुभगिनीषुच। निवृत्तेवापिरमणात्पितर्य्युपरतस्पृहे ॥ जीमूतवाहनेनतुविनष्टेवाप्यशरणइतिपाठोलिखितःविनष्टेपतितेअशरणेगृहस्थाश्रमरहितइतिव्याख्यातञ्च। निवृत्तेवापिरमणादितिपाठान्तरमनाकरमित्यप्युक्तन्तद्युक्तंमिताक्षरादिवङ्गनिबन्धलिखितत्वात्पुत्राधनंविभजेयुरि

प्यनुषङ्गः। गौतमोऽप्यूर्ध्वं पितुः पुत्रा रिक्थं विभजेरन् निवृत्ते रजसि मातुर्जीवति चेच्छतीत्याह। बृहस्पतिरपि। पित्रो
रभावे भ्रातॄणां विभागः सम्प्रदर्शितः। मातुर्निवृत्ते रजसि जीवतोरपि शस्यत इति। तथा सरजस्कायामपि मातर्य्यनिच्छत्य
पि पितरि दीर्घरोगग्रस्ते ऽधर्म्मवर्त्तिनि पुत्रेच्छया विभागः। यथाह शङ्खः। अकामे पितरि रिक्थविभागो वृद्धे विपरीतचेतसि
रोगिणि चेति। नारदोऽपि। व्याधितः कुपितश्चैव विषयासक्तमानसः। अयथाशास्त्रकारी च न विभागे पिता प्रभुरिति॥ अत्रापि
त्वपरम एकः कालो निवृत्ते चापि रजसीति द्वितीयो जीवति चेच्छतीति तृतीय इति मिताक्षरायां शूलपाणिना उक्तं दूषणम्। मातृर
जोनिवृत्तेः पित्रुपरतस्पृहत्वविशेषणत्वे। त्रिंशद्वर्षो वहेत्कन्यां हृद्यां द्वादशवार्षिकीम्। त्र्यष्टवर्षोऽष्टवर्षां वा धर्म्मे सीदति
सत्वर इति मनुना विवाहकालविधानात्। वनम्पञ्चाशतो व्रजेदित्याश्रमान्तरगमनकालविधानाच्च। तदा रजोनिवृत्तेर्म्मातुरस
म्भवे पितरि वोपरतस्पृहे वानप्रस्थे तत्पुत्राणामिच्छया विभागाभावप्रसङ्गात्। निर्विशेषणमुपरतस्पृहत्वमेव पितृधनविभाग
काल इति तूच्यमाने ऽनुपरतस्पृहे पितरि पतितेऽप्यविभागप्रसङ्गात्। अयमप्यपरः काल इत्यभिधाने कालचतुष्टयापत्तिः पितुरुप
रमः पतितत्वं निस्पृहत्वमिच्छा चेति। तस्मात्पतितत्वनिस्पृहत्वोपरमैः पितुः स्वत्वापगम एकः कालोऽपरश्च सत्यपि तत्स्वत्वे तदिच्छा तदिति
कालद्वयमेव युक्तमिति। तन्मिताक्षराहृदयापरिज्ञानात्। नहि तेन कालत्रयनियमोऽभिहितः। तथेत्यादि यन्थेन कालान्त
रस्यानुपदमेव प्रतिपादनात्। नियमस्य निर्वीजत्वात्। पितृस्वत्वापगम एकः कालोऽपरश्चानपगत एव पितृस्वाम्ये तदिच्छा तद्
ति कालद्वयमिष्यप्यमुक्तं। निवृत्तरजस्कायां मातरि त्यनन्वयापत्तेः। नहि मातृनिवृत्तरजस्कतामात्रेण पितृस्वत्वापगमः। जन्म
नाऽस्वत्वावस्थापनात् पितृस्वत्वापगमस्य कालोपलक्षणत्वासम्भवाच्च। एवं दीर्घरोगग्रस्तत्वेऽपि न स्वत्वापगम इति कालद्वयनियमस्त
वाप्यदुःसमाधः। इच्छापत्तौ न तद्वचनविरोधः। यथोक्तं तेनैव। मातुर्निवृत्ते रजसीति पितामहादिधनाभिप्रायम्। निवृत्ते रज
सि पुत्रान्तरसम्भवाभावात्तदानीमपि पितुरिच्छयैव पुत्राणां विभागः। अनिवृत्ते रजसि क्रमागतधनविभागे पश्चाज्जातानां पु

त्रिसो पापकर्मेः । तथा शौनकः । येनानायेष्वामानासु येच गर्भे व्यवस्थिताः । वृत्तिं च तेऽभिकांक्षन्ति वृत्तिलोपोन विद्यतइति वचनात् । अत एव पितृधनेकालद्वयमत एवमनुगौतमादिभिर्मृतपदम्पारिग्यज्योर्द्धमित्युक्तम् । ऊर्द्ध्वम्पितुःसत्वापगमइत्यर्थः । यदि चास्य पितृधनविषयता स्यात्तदा हि ऊर्द्ध्वं विभागाज्जातस्तु पित्र्यमेव भजेत् इत्यस्य निर्विषयता भवेत् । निवृत्ते रजसि पुत्रोत्पत्त्यसम्भवात् । मातृधनगोचरत्वञ्चास्य नाशङ्कनीयमेव । मातुरेव निर्द्देशतापत्तेः । अतो निवृत्ते रजसीति पैतामहधनविषयं । न चेच्छामनपेक्ष्य रजोनिवृत्तिमात्रं विभागनिमित्तं सम्भवत्यनिच्छया विभागाभावात् स्वेच्छयेत्यपेक्षायामूर्द्ध्वं पितुः पुत्रा रिक्थं विभजेयुर्निवृत्ते रजसि मातुर्जीवति चेच्छतीति गौतमवचनात्पितुरेवेच्छा नतु इति निर्णीयत इति पितामहादिधनविभागस्यापि पित्रिच्छारम्भावद्व्येककालः । मातुर्निवृत्ते रजसि पितुरिच्छा न तु इति कालद्वयमेवेति । तदप्यनभियुक्तप्रमोदनम् । वृत्तिलोपापत्तेः पितृधनेपि तुल्यत्वात् । ऊर्द्ध्वं विभागादित्यस्य निर्विषयत्वापत्तेरपि पितामहादिधने पितुस्तुल्यत्वात् । सस्पृहे पितरि पातित्यादिदुष्टे पितामहधनेपि पुत्रेच्छया विभागस्य सकलसम्मतत्वादवश्यवाच्यत्वाच्च । वस्तुतस्तु पितामहादिधने भूर्व्यापितामहोपात्तेत्यादिना सदृशस्य पितापुत्रस्वाम्यस्य वक्ष्यमाणत्वात्पुत्रेच्छया पितरि विभागउचित एव । यत्तु व्याख्यानान्तरं मनोधनस्य तद्धनगोचरत्वादिकल्पनं तत्स्वैतत्प्रपञ्चनाविवेचने निराकरिष्यामः । वयन्तु स्वामित्वार्हे पितरि जीवति तदिच्छैव विभागनिमित्तं । पातित्यपारिव्रज्यादिभिस्तदनर्हे पुत्रेच्छापि । तदुपरमे तु स्वेच्छाया निमित्तत्वमर्थसिद्धमिति कालत्रयमेवानेन प्रकारेण । अन्यथा बहूनामुपरतस्पृहत्वादीनां विकल्पसमुच्चयादिककल्पनानुपपत्तौ विशेषस्य विशेषाभावाद्व्यवस्थापत्तौ वक्ष्याकुलीभावः । अत एव कालचतुष्टयेके ग्राह्यं दोषापादनमनुपादानञ्च केषाञ्चिन्नाद्रियते । एकमूलकल्पनालाघवेनोपरतस्पृहत्वादिभिः पितुःस्वात्वाभावस्यैकस्य सर्वैरूपलक्षणात् । अनीशास्तेहि जीवतोःनिर्दोषे पितरि स्थिते । जीवतोरपि शस्यतेइत्यादिवचनस्वरसोप्येवमेव । अत एवापन्नो जीवतो भ्रातृभ्यां सहवासो मुख्य स्तदनुमत्यादिना ज्येष्ठस्य कार्य्यक्षमस्यान्यस्य वा पुत्रस्य स्वातन्त्र्यमन्येषान्तदनु

रोधवृत्तित्वमितिचपक्षद्वयमुक्तवन्तोव्यासादयः। भ्रातृणांजीवतोःपित्रोःसहवासोविधीयतइतिव्यासः। जीवतिपितरिपुत्राणा
मर्थादानविसर्गाक्षेपेषुनस्वातन्त्र्यम्। कामन्दीनेप्रोषितेआर्त्तिज्ञतेज्येष्ठोवार्थांश्चिन्तयेदितिहारीतः। शङ्खलिखितावनुस्पष्टत
ममाहतुः। पितर्यशक्तेकुटुम्बव्यवहारान्ज्येष्ठःप्रतिकुर्यात्तदनन्तरोवाकार्यज्ञस्तदनुमतोनन्वकामेपितरिरिक्थविभागोवृद्धेविप
रीतचेतसिदीर्घरोगिणिवाज्येष्ठएवपितृवदर्थान्पालयेदितरेषामृक्थमूलंहिकुटुम्बमस्वतन्त्राःपितृमन्तोमातुरप्येवमवस्थिता
याइति। तस्माद्यथोक्तरीत्याविभागस्यकालत्रयमेवेतिब्रूमः। अत्रमनुवचनेसममेत्येत्यनेनपाक्षिकंसाहित्यमनूद्यतेवक्तव्यवत्
। अन्यथैकेच्छयाद्वयोर्भ्रात्रोर्विभागोनस्यात्सममितितुनियम्यते। तच्चविवक्ष्यामः। यत्तुपित्रोरितिद्विवचननिर्देशात्सोदर
भ्रातॄणाम्पितृधनविभागोपिमातुरभावएवकार्यः। ननुमातृधनविभागार्थंमातुरभावोपदानं। जीवतोरपीत्यस्यमातृधनगोचर
त्वानुपपत्तेरन्यधनगोचरत्वमवश्यम्वाच्यमतोयत्रैवपित्रोरभावोनिमित्तंतत्रैवजीवतोरपीत्यपिग्रहेनजीवनस्यापिप्रसक्तत्वकीर्त्ति
मात्रंमातुरभावोमातृधनेव्याख्येयइतिजीमूतवाहनआहतदसम्बद्धम्। पितुश्चमातुश्चेतिमनुवचनेपृथङ्निर्देशादन्यथापि
द्विवचनस्यविभागसम्बन्धविवक्षामात्रेणव्याख्यानंयुक्तम्। इतरथैकतरधनेऽन्यतराभावस्यादृष्टार्थत्वापत्तेः। यच्चोक्तंजीवतो
रित्यादेर्मातृधनगोचरत्वानुपपत्तेरित्यादि। तस्यापिकोभिप्रायः। मातुःपितरिजीवत्यसत्त्वात्तद्धनगोचरत्वमितियदि
तर्हिसत्त्वपक्षेषुभार्य्याधनेपिपितुःस्वाम्यन्तदभावस्यापितत्रानुपयोगादन्यविषयत्वापत्तिः। अभिप्रायान्तरन्त्वसम्भवदुक्ति
कमेवेतिवक्ष्यामः। तस्माद्दृष्टार्थत्वात्तद्धनविषयकएवतदभावः। संग्रहकारस्तूक्तोयुक्तः। यथाचपित्रोर्जीवतोर्भ्रातॄणां
सहवासोमुख्यस्तथातदूर्ध्वमपि। तथाचशङ्खलिखितौ। कामंसहवसेयुरेकतःसंहतावृद्धिमापद्येरन्निति। संहताःसह
वसन्तोद्रव्योपचयसाहाय्यादिनापरस्परहितेनवृद्धिमाप्नुयुरित्यर्थः। नारदोपि। बिभृयाद्वैकतःसर्वान्ज्येष्ठोभ्रातायथा
पिता। भ्राताशक्तःकनिष्ठोवाशक्त्यपेक्षाकुलस्थितिः॥ मनुरपि। ज्येष्ठएवतुगृह्णीयात्पित्र्यन्धनमशेषतः। शेषास्तमुपजी

वेयुर्य्यथैवपितरन्तथा ॥ ज्येष्ठेनजातमात्रेणपुत्रीभवतिमानवः । पितॄणामनृणश्चैवसतस्मात्सर्वमर्हति ॥ यस्मिन्नृणंसंनय
तियेनचानन्त्यमश्नुते । सएवधर्म्मजःपुत्रःकामजानितरान्विदुः । पितेवपालयेत्पुत्रान्ज्येष्ठोभ्रातॄन्यवीयसः । पुत्रवच्चापिवर्त्तेर
न्ज्येष्ठेभ्रातरिधर्म्मतः । ज्येष्ठःकुलंवर्द्धयतिविनाशयतिवापुनः । ज्येष्ठःपूज्यतमोलोकेज्येष्ठःसद्भिरगर्हितः ॥ योज्येष्ठोज्येष्ठवृत्तिः
स्यान्मातेवसपितेवसः । अज्येष्ठवृत्तिर्य्यस्तुस्यात्ससम्पूज्यस्तुबन्धुवत् ॥ योलोभाद्विनिकुर्वीतज्येष्ठोभ्रातॄन्यवीयसः । सोज्येष्ठः
स्यादभागश्चनियंतव्यश्चराजभिरित्यादिवचनानिचयद्गुणाज्येष्ठवर्त्तिनस्तयासर्वेषांसहवासःप्रशस्तः । धर्म्मवृद्धिकामनया
तुविभागःकार्य्यइत्याहतुर्म्मनुप्रजापती । एवंसहवसेयुर्वापृथग्वाधर्म्मकाम्यया । पृथग्विवर्द्धतेधर्म्मस्तस्माद्धर्म्यापृथक्क्रिया
॥ धर्म्मश्चदेवाद्यर्चनरूपस्तस्यैवसहवासेपृथक्करणाभावात् । तथाचवृहस्पतिः । एकपाकेनवसतांपितृदेवद्विजार्चनम् । ए
कम्भवेद्विभक्तानान्तदेवस्याद्गृहेगृहे इति ॥ यत्तुसंग्रहकारेणाग्निहोत्रादिधर्म्मवृद्धिरपिधर्म्मवृद्धिशब्देनगृह्यतइत्युक्तम् । य
दाह । क्रियतेस्वन्विभागेनपुत्राणाम्पैतृकन्धनम् । स्वन्वेसतिप्रवर्त्तन्तेतस्माद्धर्म्यापृथक्क्रियाइति । प्रवर्त्तन्तेसाध्यन्तेचाग्नि
होत्रादिक्रियाइतिशेषइति । तत्तुजन्मनैवपुत्राणाम्पितृधनेस्वत्वाद्विभागात्प्रागपिश्रौतस्मार्त्तकर्म्माधिकारंप्रतिपादयद्भिर
स्माभिःप्रागेवप्रत्याचि । तस्मात्पञ्चमहायज्ञादिधर्म्मएवधर्म्मशब्देनात्रग्राह्यः । दत्तास्तुभगिनीषुचेतितुनकालार्थङ्किन्तुता
सामवश्यंदानार्थम् । यथायच्छिष्टम्पितृदायेभ्योदत्त्वर्णम्पैतृकन्ततः । भ्रातृभिस्तद्विभक्तव्यमृणीनस्याद्यथापितेतिनारदव
चनमृणादानावश्यकत्वार्थंनविभागकालार्थम् । पिताचयदिस्वेच्छयापुत्रान्विभजतितदापिनिरङ्कुशेच्छानोपादेयाकिन्तुज्ये
ष्ठंवाश्रेष्ठभागेनसर्वेवास्युःसमांशिनइतिपक्षयोर्म्मध्येयःपक्षइष्टःसग्राह्यइतियोगीश्वरवचनार्थः । ज्येष्ठंश्रेष्ठभागेनमध्यमंम
ध्यमभागेन । कनिष्ठङ्कनिष्ठभागेन । सर्वेवाज्येष्ठादयःसमांशभाजःकार्य्याइतिविज्ञानेश्वराचार्य्याः । प्राच्यास्तुस्वेच्छयेतिपृ
थक्पक्षान्तरंज्येष्ठादिभागसमभागौचद्वौपक्षाविति पक्षत्रयमतएवज्येष्ठन्वेतिप्रथमोवाशब्दःस्वेच्छयेतिपक्षापेक्षयासमञ्जसोव

श्यमाणपक्षापेक्षत्वेक्लिष्टः स्यादित्याहुरुपपत्तिस्वरसत एव द्रष्टव्यम् । पितैव वा स्वयं पुत्रान्विभजेद्वयसि स्थितः । ज्येष्ठं वा श्रेष्ठभागे नयथा वास्य मतिर्भवेदिति नारदवचने । ज्येष्ठस्येत्यादिनैकविषमविभागप्रकारमुपन्यस्य यथा वास्येत्युक्तेरन्योपि न्यूनाधिक भागः पितुरिच्छया स्यादिति गम्यते । हारीतोपि । जीवन्नेव वा विभज्य वनमाश्रयेद्वृद्धाश्रमं वा गच्छेत्स्वल्पं वा संविभज्य भूयिष्ठमा दाय वसेद्यद्युपदस्येत्पुनस्तेभ्यो गृह्णीयादिति । वृद्धाश्रमः पारिव्रज्यम् । उपदस्येद्द्रव्याभावेन क्षीणो भवेत् । अत्रापि स्वल्पमन्वे त्यादिपक्षान्तरमुक्तम् । तस्मात्तदेकमूलकतानुरोधेन योगीश्वरवचनेपि तत्संग्रहायेच्छयेति पृथक्पक्ष एव युक्त इति । तदसत् । वाशब्दस्तावद्द्वैधाप्युपपन्नेनैव समुच्चयार्थतया चोपपत्तिरुक्ता साप्ययुक्ता । यदि वचनान्तरोपात्तपक्षान्तरसंग्रहार्थत्वमिच्छयेत्यस्याभ वेत्तदा तदर्थमेवास्यादुक्तपक्षद्वयस्यापि वचनान्तरोपात्तत्वादिच्छयेत्यनेन तयोरपि संग्रहसम्भवात् । तदितरपक्षसंग्रहार्थत्वेन न्यप्रयोजनतास्यादेव । इच्छाया निरंकुशत्वेनानियमवारणाय वचनान्तरालोचनं विना तदर्थानिर्वाहात् । स्वोपात्तपक्षद्वयेव्य वस्थानिरासार्थं तयेच्छयेति व्याख्याने वचनान्तरालोचनानावश्यकत्वात् । न च विकल्पो नावेच्छाभेद इच्छयेति निरर्थकमि ति वाच्यम् । उभयसन्दंशे वैयर्थ्यापेक्षया व्यवस्थितविकल्पनिरासाय स्ववाक्योपात्तपक्षद्वयविषयतया तदनुवादस्यैवोपपन्नतरत्वात् नारदाद्युक्तमूलकतानुविज्ञानेश्वरव्याख्याने विनापीति । तदुक्तपक्षद्वयस्य वचनान्तरेष्वप्युपादानात् । न च निर्मलेच्छा मात्रमेव पक्षान्तरं योगीश्वरवचनार्थोस्त्विति वाच्यम् । अयथाशास्त्रकारी च न विभागे पिता प्रभुरित्यस्य निर्विषयतापत्तेः । इ च्छामात्रस्य शास्त्रीयत्वेऽयथाशास्त्रकारित्वाप्रसक्तेः । जीवद्विभागे तु पिता नैकं पुत्रं विशेषयेत् ॥ निर्भाजयेन्न चैवैकमकस्मात्का रणं विनेति कात्यायनवचसोपि निर्विषयता स्यात् । इच्छाया एव कारणत्वात् । न विशेषयेदिच्छातो ज्येष्ठभागाद्यतिरिक्तेनेच्छया विशेषवन्तं न कुर्यात् कारणमशास्त्रीयं तादृशं विना अकस्मात्क्रोधादनुभवपुत्रस्नेहादिना वा न निर्भाजयेद्भागरहितं न कुर्यादित्यर्थः । यत्तु न्यूनाधिकविभक्तानां धर्म्याः पितृकृताः स्मृता इति योगीश्वरवचनं तदपि धर्म्यो धर्म्या इत्येवं चोपपादनात्

हृत एव स्मृतेन निवर्त्तते। अधर्म्मं त्वयथाशास्त्रकृतो निवर्त्तनीय एवेत्यभिप्राय इति विज्ञानयोगिभिर्व्याख्यातं व्याधितः कुपितश्चे
त्यादिवचनानुरोधात्। एवं। समन्यूनाधिका भागाः पित्रा येषां प्रकल्पिताः। तथैव ते पालनीया विनेयास्ते स्युरन्यथा। पित्रै
व तु विभक्ता ये समन्यूनाधिकैर्धनैः। तेषां स एव धर्म्यः स्यात्सर्वस्य हि पिता प्रभुरिति बृहस्पतिनारदवचने अपि पित्रास्थेये। ज्येष्ठादि
विभागे पित्रा ज्येष्ठादिभ्यो दत्ते ऽन्यैरनुशयो न कार्य्यः। समांशविभागे वा ज्येष्ठादिभिरिति तात्पर्य्यार्थः। अत एव नारदस्तेषां
स एव धर्म्यः स्यादित्याह। ज्येष्ठादिभागश्च मनुनोक्तः। ज्येष्ठस्य विंश उद्धारः सर्वद्रव्याच्च यद्वरम्। ततोऽर्द्धं मध्यमस्य स्यात्तु
रीयन्तु यवीयस इति॥ समांशपक्षं बौधायन आह। पुत्रेभ्यो दायं व्यभजदिति समांशस्त्वेषामविशेषादिति। मनुः। पुत्रेभ्यो
दायं व्यभजदिति श्रुतौ विशेषाश्रवणात्सर्वेषां पुत्राणां समांश इत्यर्थः। यदि पिता स्वेच्छया समांशेन पुत्रान्विभजति तदा स्वपत्नी
भ्यः पुत्रसममंशं दद्यादित्याह याज्ञवल्क्यः। यदि कुर्य्यात्समानंशान्पत्न्यः कार्य्याः समांशिकाः। न दत्तं स्त्रीधनं यासां भर्त्रा वा श्व
शुरेण वा॥ यासां भर्त्रा श्वशुरेण वा स्त्रीधनमध्यग्न्यादि न दत्तं। भर्त्रादि इह समुपलक्षणं यास्तु च स्वल्पमात्रस्त्रीधनशून्या इत्यर्थः
। तासां पत्नीनां पुत्रसमांशभागमत्र नियम्यते। तथा च यदा ज्येष्ठभागादिवर्ज्जं पिता पुत्रान्विभजति तदा पितुर्ज्येष्ठभागाद्युद्धृत्यैव कु
र्य्योद्धारादुद्धृतसमुदायात् पुत्रसमानेषां शान्पत्न्यो लभन्ते न तु ज्येष्ठभागादिकमित्यर्थः पर्य्यवस्यति। यस्तु पत्न्याः सोद्धारः परीभाण्डा
दिकं समपि पत्नी लभते। तथा चापस्तम्बः। परीभाण्डञ्च गृहेऽलङ्कारो भार्य्याया इति। परीभाण्डम्भाजनपात्रादि। यद्वा
धारणीयस्यालङ्कारोऽप्यसाधारणस्तद्विवेचयिष्यते। न च पक्षद्वयेऽप्येतावता पुत्रसमांशित्वं पत्नीनां। विज्ञानेश्वरेणोक्तन्तद्धि
यदि कुर्य्यात्समानंशानिति समांशानुवादोऽयमर्थः पत्न्यो ज्येष्ठांशादि न लभन्त इत्येतावन्मात्रमेव वाच्यमिति युक्तम्। यतः। एवं स
मुद्धृतोद्धारे समानंशान्प्रकल्पयेत्। उद्धारेऽनुद्धृते त्वेषामियं स्यादंशकल्पना॥ एकाधिकं हरेज्ज्येष्ठः पुत्रोऽध्यर्द्धं ततोऽनु
जः। अंशमंशं यवीयांस इति धर्म्मो व्यवस्थित इति मनुना द्व्यंशी वा पूर्वजः स्यादेकैकमितरेषामिति। गौतमेन च यथाभागद्वयादाय

भागो द्व्यंशहरे ज्येष्ठो गवाश्वस्य चात्र दशमम् अजावयो गृहञ्च कनिष्ठस्य कार्ष्णायसं गृहोपकरणानि च मध्यमस्येति । वसिष्ठेन ।
ज्येष्ठस्यांशोऽधिको देयः कनिष्ठस्यावरः स्मृतः । समांशभाजः शेषाः स्युरप्रत्ता भगिनी तथेति ॥ नारदेन चोद्धारमुक्ते विषमभागमां
चमुक्तं तद्युग्मादृश्य नेतद्दापत्नीनामंशाभावप्रतिपादनार्थं यद्यदि कुर्य्यात्समानंशान्पितुः कामितिन दोषः । अत एव भ्रातृणामवि
भक्तानां यद्युत्थानं भवेत्सह । न तत्र विषमभागस्मिात् द्व्याक्षयन्नेनेति मनुना सर्वेषां भ्रातृणां बहुत्वाभेनैव यदि सह समानमे
वोत्थानमुद्योगो भवेत्तदा पितुर्विषमविभागदानप्रतिषेधकमनुवचनव्याख्यानेन जीमूतवाहनेनोक्तमुद्धारस्तु पितादानयदेवं
तस्य विभागरूपत्वाभावात् । न्यूनाधिकविभागस्यैव निषेधादिति । तस्माज्ज्येष्ठं वा श्रेष्ठभागेनेति याज्ञवल्क्याद्युक्तोद्धारेऽपि स
मांशभागितापुत्राणामस्त्येवेति तत्रापीदमनवचनम्प्रवर्त्तत एव । शास्त्रादिपक्षेपरं न प्रवर्त्तत इति विज्ञानयोगिनामाशयः । एवं
तु बोधते दनैवद्ध्यम्प्रकल्पयेदिति यत्रार्द्धदानं वक्ष्यते । यद्यपि तदाधिवेदनिकं भर्त्रादीयमाने वक्ष्यते तथाप्युपायाः समांशसमाल
न्यायत्वादत्रापियोज्यम् । बौधायनः । बहूनामेकधर्म्माणामेकस्यापियदुच्यते । सर्वेषामेव तत्कुर्य्यादेकरूपाहि ते स्मृता इति ।
भ्रातृणामविभक्तानामित्यादिमनुवाक्यं सहोत्थानं सर्वेषामविभागप्राप्तौ नायदि भवतीति जीमूतवाहनेन तदनुजायि नाद्यमानम्
तावद्व्याख्यानम् । यदि पुनः पितरि जीवति पुत्राणां विभागमर्थयन्ते तदा विषमविभागः पित्रा न दातव्य इति वदतां नव्यमह
वैयर्थ्ये उत्थानपदस्य चोद्योगवाचिनोऽपि भागप्रार्थनापरत्वमन्याय्यमित्यस्माद्व्याख्यानमेवादर्त्तव्यम् । तथा च समानार्थत्वमुपा
ने विभागस्तु समः स्मृत इति योगीश्वरवचः सम्वादोऽपि लभ्यते । तस्मात्प्रदभिमतार्थतथैवोपपन्नेः । द्रनेनद्व्येऽमिथ्यान्नापर्द्धम
त्वः समप्रविभागवचनेनाभवति तत्र तस्य यावतापूर्वं दत्तमिदानीं दीयमानं तत्सममं भवति तावद्देयमिति मिताक्षरायामुक्तन्तदयुक्त
माशयः । यद्यपि नपुंसकस्याद्ध्यं शद्वत्स्य पुंस्यकर्द्धे स्वे समे शकइति कोयात्समंशः वाचित्वमस्ति । तथापि कदाचिद्वासं पुत्राविकल्प
धनत्वङ्कदाचित्तदूनधनत्वमव्यवस्थितमङ्गे नियमस्यषादृष्टार्थत्वं मापमांक्षेदिति पुत्रसमं भिमयाम एवमात्रमुचिति । अथ

प्रदनर न्नकार आह । पत्न्यंइतिवक्तुवचनात्प्रतिपत्तिसमांशंपितृगृह्णीयात्मनुनाप्यःपृथक्कन्याशोदातव्यः । जायाप
त्योर्विभागोनविद्यतइतिहारीतवचनविरोधापत्तेरिति । तन्न । नाचजायापत्योर्विभागइत्यनेनहारीतवचनविरोधः स्मा[illegible]
नुपत्यैवपुत्रविभागसमर्थेनाभ्यसनमांशदानमीतिद्धानवत् । अतएवस्त्रीधनेदव्यर्द्धमिप्युक्तमिनिनकोपिदोषः । वस्तु
जीवतिपितरिपुत्रेच्छयाविभागःसर्वेषामंशसमांशमातुर्निवृत्तेरस्तीतिमनुवचनेसमर्थइत्युक्तंविषमएववदोपिपितुरूर्ध्वंवि
भागःसोपिसमएव । पूर्वोदाहृतमनुवचनेसममित्यभिधानात् । हारीतोपि । समानोमृतेपितरिरिक्थविभागः । पैठीन
सिरपि । पैतृकेविभज्यमानेदायाद्योभ्रातृणांसमोविभागः । याज्ञवल्क्योपि । विभजेरन्सुताःपित्रोरूर्ध्वंमृक्थमृणंसमम् । पि
त्रोरूर्ध्वमितिकात्यःसुताइतिकर्त्तारः समामितिप्रकारनियमइतिमिताक्षरा । ननुमनुनैवपितुरूर्ध्वंविभागमुपक्रम्यज्येष्ठस्य
वनुगृह्णीयात्पित्र्यंधनमशेषतः । शेषास्तमुपजीवेयुर्यथैवपितरंतथेति । सहवासपक्षमुक्त्वाज्येष्ठस्यविंशउद्धारइ
त्यादिनाविषमविभागोप्युक्तस्तत्कथंसमनियमइतिचेत् । उच्यते । एतद्युगान्तरविषयंविषमभागोजीवज्जीवतिपितरि[illegible]
[illegible]तथापिवचनान्तरानुरोधात्सोपिसमएवेतिनियमः । अस्वर्ग्यंलोकविद्विष्टंधर्म्यमप्याचरेन्नत्वितियोगीश्वरवचनात् । अ
स्वर्ग्यंलोकपदेनयुगमुच्यते । युगान्तरेधर्म्यमपियुगान्तरेलोकविद्विष्टंप्रतिषिद्धमित्याचारेदित्यर्थः । अन्यथाधर्म्यत्वास्वर्ग्यत्वयो
र्व्याघातः । शास्त्रविहितेनरकभिन्नविद्वेषेवाधितएव । तदनभिज्ञधार्मिकजनविद्वेषस्तुनास्वर्ग्यत्वापादकोऽयोग्यमीवादिद्वि
ष्टादावतिप्रसङ्गादित्यादिदूषणंस्यात् । अतएवमितात्क्षरायांमधुपर्कपशुवधगवालम्भादिकालवशमिवलोकविद्विष्टत्वे
नोदाहृतम् । कलिवर्ज्येष्वपुनरुद्वाहादिकमध्वन्तादीनांयत्तोनन्तज्येष्ठांशाद्युद्धारादिकमपि । तथाचादिपुराणे । ऊढा
याःपुनरुद्वाहोज्येष्ठांशोगोवधस्तथा । कलौपञ्चनकुर्वीतभ्रातृजायाकमण्डलुः । स्मृतिसंग्रहेपि । यथानियोगधर्मोनो
नानुबन्ध्यावधोपिवा । तथोद्धारविभागोपिनैवसम्प्रतिवर्त्तते ॥ नियोगधर्मोभ्रातृभार्यायांवाग्दत्तायांमृतपतिकायांगुरोरादेशात्

योगेनविधिनागमनम्। मैत्रावरुणीं गामनूबन्ध्यामालभेतेतिविहितोगोवधः। सम्प्रतिकलौ। अतएवापस्तम्बोऽपिजीवन्पुत्रे
भ्योदायंविभजेत्सममितिस्वमतमुक्त्वाज्येष्ठोदायादइत्येकइतिसत्स्वधनग्रहंसाज्येष्ठस्येत्येकीयमतमुपन्यस्यदेशविशेषेसुव
र्णागावःकृष्णम्भौमंज्येष्ठस्यरथःपरीभाण्डम्पितुर्गृहेऽलङ्कारोभार्य्यायाज्ञातिधनञ्चेत्येकमतमनेनैवोक्तास्यविभागस्य[illegible]यित्वाव
च्छास्त्रविप्रतिषिद्धमितिनिरस्तवान्। शास्त्रविप्रतिषेधस्वरूपमेवविवृणवान्। मनुः। पुत्रेभ्योदायंव्यभजदित्यविशेषेण
श्रूयतइति। तस्मान्नविषमविभागःशास्त्रदृष्टोऽपिकस्मादनुष्ठेयः। यत्तुमिताक्षराकृताश्रुतिविरोधेनुक्तान्तद्विचार्यम्। श्रुति
विरोधेहिसतियुगान्तरेपितस्यानुष्ठानेतद्बोधकवचनानांसर्वथाऽप्रामाण्यमेवस्यादितिकलिवर्ज्यतयोपन्यासोविरुद्धः। न
वाच्यन्तंश्रुतिविरोधोऽपि। अविशेषश्रवणस्यस्मृतिसमस्यादन्श्रुतित्वाद्विनिगमकस्याभावात्तामत्वस्य। स्मृतिचन्द्रिकायान्तुबौधायनो
दाहृतंविषमविभागप्रतिपादकमपिश्रुत्यन्तरंलिखितम्। ज्येष्ठंदायादइत्येकेश्रुत्यन्तरमित्याहसएव। धनमेवमेकमनुत्तरे
ज्ज्येष्ठः तस्माज्ज्येष्ठंपुत्रन्धनेननिरवसाययन्तीतिश्रुतेरिति। धनमेकमेकमितिवदन्श्रुतिवाक्यगतंधनेनेत्येकवचनंविवक्षितमितिसूच
तमितिसूचयतिनिरवसाययन्तीतिश्रुतेरिति। धनमेकमेकमितिवदन्श्रुतिवाक्यगतंधनेनेत्येकवचनंविवक्षितमितिसूच
यति। निरवसाययन्तितोषयन्तीत्यर्थइतियन्त्येन। अमूनवाक्षनादवस्तुयदाभक्त्यतिग्रयादिनाभ्रान्हशामनुमतिस्तदोद्धा
शद्विषमविभागोऽनएवाघतनानाम्भक्त्याद्यभावाद्धारादृहर्ज्येष्ठाभावाच्चसमभागएवलोकेदृश्यतेइत्यादिनाग्रंथेनानुमत्य
ननुमतिभ्यांविषमसमभागयोर्व्यवस्थामाहुः तन्नुतथासतिपुत्रेच्छायाएवप्रयोजकत्वापत्तेःपूर्वार्द्धविरोधादनादेयम्। पित्रिच्छा
याःस्वतन्त्रपक्षान्तरपरत्वमनुप्रागेवनिराकृतम्। पितापुत्रेभ्यःस्वार्जितधनविभागन्दद्तात्स्वयमंशद्वयंग्राह्यमित्याहनारदः। द्वा
वंशौप्रतिपद्येतविभजन्नात्मनःपितेति। बृहस्पतिरपि। जीवद्विभागेतुपितागृह्णीतांशद्वयंस्वयमिति। पितुरंशद्वयग्रहण
मेकपुत्रविषयमित्याहतुःशङ्खलिखितौ। सयद्येकपुत्रःस्याद्द्वौभागावात्मनःकुर्वीत। व्यवहारपारिजातकारइदंवचन

मेवंव्याचष्ट । एकशब्दोत्रश्रेष्ठवाची । तथाचयदिपुत्रोगुणवत्तयाधनार्ज्जनशक्तस्तदातेनसह विभागेपित्रांशद्वयंग्राह्यमि
ति । जीमूतवाहनस्तु । एकस्यपुत्रःएकपुत्रएकपितृकश्चैरसइतियावत् । नपुनःएकःपुत्रोयस्येतिबहुव्रीहिस्तस्यान्यपदा
र्थप्राधान्येनषष्ठीतत्पुरुषाद्दुर्बलत्वात् । तथाचक्षेत्रजस्यचावृत्तिस्तस्यद्विपितृकत्वात् । तथाचौरसपुत्ररूपःपितास्वपितृधनेभा
गद्वयंगृह्णीयान्नतुक्षेत्रजाइतिव्याचख्यौ । तदसत् । तथासतिपितामहधनगोचरतास्यस्यात्तत्रचसदृशंस्वाम्यम्पितापुत्रयोरित्यौ
रसस्यापिपितुःपुत्रसमांशतायाव्यवस्थापयिष्यमाणत्वात् । तथाचागत्याबहुव्रीहिरेवास्थेयः । मिताक्षराकृतात्विदम्वचनमना
र्जितमेव । कात्यायनः । द्व्यंशहरोऽर्द्धहरोवापुत्रवित्तार्ज्जनात्पिता । मातापिपितरिप्रेतेपुत्रतुल्यांशभागिनीति । अत्रजीमूतवा
हनः । पुत्रस्यवित्तार्ज्जनात्पुत्रार्ज्जितेपिवित्तेस्वार्ज्जितइवपितुरंशद्वयमित्यस्यार्थोनतुपुत्रस्यचित्तस्तयोरर्जनादिति । अन
र्जितपुत्रस्यापिभ्रातृभिर्विभागेवित्तार्जकत्वयांशद्वयस्येष्टत्वात् । अतोविभागार्हसम्बन्धिनिविद्यमानेऽर्जकस्यद्व्यंशादिहरत्वमस
तितुसर्वहरत्वमितिवाच्यन्तथासतिपितृपुत्रपदयोःप्रमत्तगीततास्यात् । किञ्चार्जनंस्वत्वहेतुभूतोव्यापारः । अर्जनंस्वत्वन्नापादय
तीतिविप्रतिषिद्धमित्यभिधानात् । नचपुत्रेषुस्वत्वमस्तीतिसर्वस्वदानेदर्शितमतस्तत्रगौणमर्जनपदंवित्तेचमुख्यमितिसकृदु
च्चरितेवैरूप्यमयुक्तम् । नचपुत्रस्यार्जकत्वादेवांशद्वयप्राप्तेःपितुश्चास्माद्वचनादृतेपिवचनान्तरादेवभागद्वयसिद्धेर्वचनमि
दमनर्थकमितिवाच्यम् । एतद्वचनमन्तरेणापिपुत्रधनेपितुर्भागद्वयाप्राप्तेरस्यसार्थक्यातद्व्याह । तन्न । द्वंद्वापेक्षयाषष्ठ्यर्थेब
हुव्रीहावतोभवदुक्तसमासस्यायुक्तत्वात् । यच्चानर्जितपुत्रस्येत्यादिद्वंद्वदूषणन्तदप्यसम्बन्धम् । भ्रातृभागाद्युविषयकत्वादस्य ।
पितृधनप्रस्तावात् । नचैवम्पुत्रपदंव्यर्थंवित्तार्जनस्यैवद्व्यंशहरत्वेहेतुत्वोपपत्तेरितिवाच्यंस्वस्वातन्त्र्यार्थत्वात् । यतःपुत्रेपिवि
त्तवत्तेनैवार्जितस्तेनपरतन्त्रःस्वार्जितधनेपितुरंशद्वयग्रहणावग्रहोनभवतीत्यत्रतात्पर्य्यम् । यच्चार्जनपदवैरूप्यन्तदप्यसत्
। पुत्रेपिपितृस्वस्येष्टत्वात् । नचसर्वस्वदाननयविरोधः । पित्राद्युस्वत्वेतस्यतात्पर्य्यात् । पुत्राद्युदानस्यतन्नयसिद्धान्तस्यभाष्य

प्रदर्शितचोदकविरोधयुक्तिसिद्धत्वात् । अत एव पुत्रकन्यादानादिविधयो मुख्यार्था एव न पुत्रादिपरतन्त्रीकरणरूपगौणप्रदानाद्यर्थः । इदञ्च पितुरंशद्वयोपादानं स्वार्जितविषयं न पित्रार्जितविषयं । भूर्य्या पितामहोपात्ता निबन्धो द्रव्यमेव वा । तत्र स्यात्सदृशं स्वाम्यं पितुः पुत्रस्य चोभयोरिति याज्ञवल्क्येन तत्र पितापुत्रयोः समस्वाम्याभिधानात्समांशभागित्वमेव । तस्यार्थस्त्वयमर्थः । भूः शालिक्षेत्रादिका । निबन्धो राज्ञामुकस्यैकस्मिन्पर्व्वणि भरकममुकभरकाद्वियन्तिपर्णादीनि देयानीति शासनारूढं तथा यद्भूमित्वे नदीयतेतदुच्यते । तथा द्रव्यं सुवर्णादि तत्र पितुः पुत्रस्य च स्वाम्यं हिशब्देन प्रसिद्धमित्युच्यते । जन्मनैव स्वत्वात् । तदपि सदृशमुल्यमतोऽत्र पुत्राणां न पित्रर्जितद्रव्यवत्पितृपारतन्त्र्यमिति तत्र निच्छयापि विभागांशद्वयनियमश्च पितुर्नास्तीति । बृहस्पतिः । द्रव्ये पितामहोपात्ते स्थावरे जङ्गमे तथा । सममंशित्वमाख्यातं पितुः पुत्रस्य चैव हि ॥ पित्रा सम एवांशो ग्राह्यो न तु स्वार्जितवदंशद्वयमिति विषमविभागपक्षाश्रयणं वेत्यर्थ इति मदनरत्नकारः । जीमूतवाहनस्तु यत्र द्वयोर्भ्रात्रोर्ज्येष्ठो विद्यमाने पितर्य्येकः पुत्रमुत्पाद्य नष्टोऽन्यश्च जीवति । पश्चात्पितापि मृतस्तत्र पितृधनं पुत्रस्यासत्त्वेः पुत्रस्यैव प्राप्नोति न तु प्राङ्मृतपितृकपौत्रस्य विप्रकर्षात्तद्बाधार्थं सदृशं स्वाम्यमिति वचनं । यथा पैतामहधने पितुः स्वाम्यं तत्पुत्रस्य स्वाम्यं तथा तत्पौत्रस्यापि । न तु सन्निकर्षविप्रकर्षयुक्तो विशेषः । पार्वणविधिना पिण्डदातृत्वेन द्वयोरविशेषादित्यभिप्रायः । अत एव मृतपितृकः प्रपौत्रोऽपि प्रपितामहधने पुत्रपौत्राभ्यां सह तुल्यवदेव स्वामी । पिण्डदानाद्यविशेषात् । जीवति तु पितरि पुत्राणां तत्र न स्वाम्ये सपुत्रभ्रातृद्वयविभागे तत्पुत्राणामपि विभागः स्वामित्वसाम्यात् । तस्मान्मृतपितृकपौत्रविषयकमिदं न पौत्रविषयकत्वं चाप्रक्रान्तत्वादनर्थकत्वं प्रागनेकपितृकाणामेव प्रक्रमात् । सादृश्यवचनन्तु स्वार्जितवत्पितुरिच्छया विभागाभावार्थम् । यथाह विष्णुः । पिता चेत्पुत्रान्विभजेत्तस्य स्वेच्छा स्वयमुपात्तेऽर्थे पैतामहे तु पितापुत्रयोस्तुल्यं स्वाम्यमिति । अतः स्वोपात्ते पितान्यूनाधिकभागैः पुत्रानिच्छया विभजन्नपि पैतामहे तु तुल्यस्वाम्यत्वात्पितुः स्वच्छन्दवृत्तिता । एतावतैवैतद्वचनोपपत्तौ सामान्यप्राप्तमपि पितुरिच्छया विभागकालत्वमपि तु स्वभागद्वयं न निषिध्यते । जीव

त्पितृकपौत्रविषयतापि वाधारेश्वरानुमतस्यास्तान्तथापीच्छाहृतन्यूनाधिकभागनिरासार्थतैव। ननु पुत्रेच्छया विभागे शङ्कया
भावश्च पितुरनेन बोध्यते। किञ्च जन्मविद्यागुणज्येष्ठो द्व्यंशं दायादवाप्नुयात्। समांशभागिनस्त्वन्ये तेषां पितृसमस्तु षड्निवृ
त्त्यनिवचनात्पितापि स्वपितृहृतनरकनिवर्त्तको गुणज्येष्ठः स्वभ्रातृभिः सह विभागे पितृसमत्वेन यच्चांशद्वयभाक्त्वं पुत्रैः सह विभा
गे पितैवांशद्वयं पैतामहधनेनाप्नोति स्वद्वारकरणं च पुत्राणामन्वहं न सम्भवत्येवं स्वत्वेनीनि भवतो मुनीनां स्ववचनमनुचितं। तस्मादि
च्छया विभजेत्सुतानिति पित्रिच्छाया विभागकालत्वं द्वावंशौ प्रतिपद्येतेत्यादिवचनेन पितुर्भागद्वयं चाविशिष्टं पितामहधने
पि। न्यूनाधिकभागमात्रं तु पुत्रेषु स्वाच्छन्द्येन भवति। द्रव्ये पैतामहे पापे स्थावरे जङ्गमे तथा। सममंशित्वमाख्यातं पितुः पुत्र
स्य चैव हीति बृहस्पतिना पितापुत्रयोरंशसाम्यस्यैवाहत्य विधानात्कथं पितुरत्राप्यंशद्वयमिति चेन्न। स्वांशित्वमंशकर्तृत्वं समत्वं
तु स्वेच्छयास्वार्जितवन्न्यूनाधिकांशकर्तृत्वमिति तदर्थात्। नत्वंशवत्त्वं समभिति। सयद्येकपुत्रः स्यादित्येकपुत्रपदस्योरसप
रत्वस्यौचित्यात्पितृकक्षेत्रजादिरूपपित्रभिप्रायं वा समांशित्वाभिधानमित्याह। तदनादेयं। सन्दर्भविरोधात्। तथाहि। अ
नेकपितृकाणां पितृद्वारकभागकल्पनामभिधायानन्तरं भूर्य्या पितामहोपात्ता निबन्धः स्वाम्यमेव पौत्राणां पैतामहे धने पित
रि जीवति विभागाभावे वा। तदिच्छयैव वा स्वार्जितवद्विभागइति शङ्कां वयमेवोन्निश्चाति। यत्मिताक्षरायामुक्तन्निराकरणा
र्थमेवेदं वचनं तद्व्याख्यानरीत्या सङ्गच्छते। प्रमीतपितृकपौत्रविषयकत्वेन सङ्कोचोऽस्य कुतः। न च धारेश्वरावधारितरीत्या पौत्र
मात्रविषयकतायामपि न्यूनाधिकभागमात्रस्य पित्रिच्छाहृतनिरासायेदं न पित्रिच्छाकाचनदीयभागद्वयस्याविशेषप्रवृत्तस्येति वि
वाच्यम्। विनिगमनाविरहात्। किञ्च। पित्रिच्छाया हेतुत्वमिच्छया विभजेदिति तृतीयानिर्द्देशाच्छाब्दमार्थिकं तु तस्या विभा
गकालोपलक्षणात्वं। तच्च शाब्दं हेतुत्वम्बाधमानेनानेनार्थिकं कालोपलक्षणात्वं न बाध्यतइति चिन्त्यं। सति च स्वाम्यसाम्ये पुत्रेच्छ
यानिमित्तत्वमन्यत्कृतं च तस्याः कालोपलक्षणात्वं जल्पेपातिकपायतत्सु वैरम्। ननु पितुरंशद्वयं पितृत्वप्रयुक्तं न स्वाम्याधिक्यप्रयुक्तं

नाप्यर्जकत्वप्रयुक्तं तस्य येन चैषां स्वयमुपार्जितं स्यात्सद्व्यंशमेव लभेतेति वाशिष्टसाधारणवचनादेव सिद्धे द्व्यंशं प्रतिपद्येतेति
विशेषवचनानर्थक्यप्रसङ्गात्। तस्मात्पित्रर्जितेपि ज्येष्ठपुत्रत्वप्रयुक्तं यथा तस्यांशद्वयं विशेषवचनात्तथा पैतामहे पितुरपि। अत
एवास्मन्मते पुत्रार्जितेपि पितुरंशद्वयमिति चेत्। सत्यं। परन्तु निःशङ्कोऽयं प्रवृत्तस्वाम्यसाम्यवचनेन तद्बाध्यते। पुत्रार्जिते तु पि
तुरंशद्वयाभावो भवदुदाहृतपुत्रवित्तार्जनादिति वचनस्य भवदुक्तार्थे दूषणात्प्रागेव व्यवस्थापितः। न च तद्वचनादंशद्वयाभावे
पि सामान्यवचनादेव पुत्रार्जितेपि पितुरंशद्वयमायातीति वाच्यम्। वित्तार्जनस्य तत्र हेतुत्वोपन्यासवैयर्थ्यप्रसङ्गात्। न च तद
र्थवादमात्रमन्यथार्जकत्वप्रयुक्तभागद्वयस्य वसिष्ठवचनादेव सिद्धेर्विशेषवचनानर्थक्यापत्तिरिति वाच्यम्। यतस्तथार्जकत्वप्र
युक्तपुत्रांशद्वयस्य वारणात्पितृत्वप्रयुक्तपित्रंशद्वयेपि भागसाम्य एव पर्यवसानम्भवेन्न तु भवदभिमतं पुत्रापेक्षया पितुरंशाधिक्य
न्तथाहत्यवचनाभावात्। यच्च किञ्चिद्यथाशिमानौचित्यमुक्तन्तन्न किञ्चित्। वार्धनिकसाम्येऽनौचित्याप्रसक्तेः। ज्येष्ठस्य ज्येष्ठत्वप्र
युक्तमंशद्वयम्पितृत्वप्रयुक्तञ्च पितुरिति ज्येष्ठपुत्रसाम्यापत्तेस्तथाप्यनौचित्यस्य दुर्वारत्वात्। मदनरत्नधृतकात्यायनवचनानान्तु
सर्वेषां भ्रातॄणाम्पितापुत्राणाञ्च समांशग्रहणमेव मुख्यमिति प्रतीयते। सकलं द्रव्यजातं यद्भागैर्गृह्णन्ति तत्समैः। पितरौ भ्रातर
श्चैव विभागो धर्म्य उच्यत इति। अत एव योगीश्वरोपि सर्वे वा स्युः समांशिन इति सर्वपदम्प्रायुङ्क्त अन्यथा समांशिनो वा कुर्वीत सुता
निति वदेत्। यस्तु विभागिनां मध्ये स्वव्यवसायेन जीवनसमर्थः पितृधनादिविभागन्न जिघृक्षति तम्प्रत्याह मनुः। भ्रातॄणां यस्तु
नेहेत धनं शक्तः स्वकर्मणा। स निर्भाज्यः स्वकादंशात्किञ्चिद्दत्त्वोपजीवनम्। याज्ञवल्क्योपि। शक्तस्यानीहमानस्य किञ्चिद्दत्त्वा
पृथक्क्रिया। निर्वास्यो निस्सम्बन्धीकरणीयः। पृथक्क्रियेत्यस्याप्ययमेवार्थः। किञ्चिद्दत्त्वेति विभागचिह्नत्वेन किञ्चिदसारम
पि दत्त्वेत्यर्थः। तत्पुत्राणान्दायजिघृक्षानिवृत्त्यर्थञ्चेदं। ह्वलायुधस्तु कुटुम्बार्थे पुचोद्युक्तस्तत्कार्य्येकुरुतेतु यः। स भ्रातृभिर्बृह
णीयो ग्रासाच्छादनवाहनैरिति नारदवचनैकवाक्यतालोभेन मनुवचने स निर्वाप्य इति पाठं प्रकल्प्य स भ्रातृभिर्गृहीतभागैः स्वस्वभा

गाढ्ञनमाच्छपूरणीयइत्यर्थइतिव्याख्यातवान्। ननुनेहेतेत्यादिपदवैयर्थ्यापत्तेरुपेक्षम्। मेधातिथिप्रमुखाचार्य्यैर्नाद्धतत्त
थापाठकल्पनानौचित्याच्च। पृथक्क्रियेतिस्पष्टवचनसम्वादाच्च। प्रकाशकारस्तुयोभागिषुधनार्थेव्यापृतेषुप्रमादालस्यादिना
नेहेतनव्याप्रियेतसाहाय्यन्नकुर्य्यात्। स्वकर्म्मणास्वव्यापारेणाशक्तःसाहाय्यकक्षमोपिसन्स्वकादंशात्स्वव्यापारजनिताद्धनाद्द
हिकार्य्यःकिञ्चिदुपजीवनंदत्वामूलधनमात्रभागीकरणीयइतीदमनुवचनन्निर्वाह्येत्याकरपाठमङ्गीकार्य्यैवव्याचष्टे। तदपि
नयुक्तम्। अपिशब्दाद्यध्याहारप्रसङ्गात्। योगीश्वरवचनसम्वादिनोऽर्थस्यस्पष्टतरप्रतीतिकत्वाच्च। भवदुक्तार्थस्यवचना
न्तरवशत्वाच्च। कात्यायनः। अविभक्तेनिजेप्रेतेतत्सुतंरिक्थभागिनम्। कुर्वीतजीवनंयेनलब्धन्नैवपितामहात्। लभेतांशंसपि
त्र्यन्तुपितृव्याद्वापितत्सुतात्। सएवांशस्तुसर्वेषांभ्रातॄणान्न्यायतोभवेत्। लभतेतत्सुतोवापिनिवृत्तिःपरतोभवेत्। निजेभ्रा
तरि। तत्सुतंभ्रातृपुत्रम्। जीवनम्भागः। सकीदृशम्भागंलभतइत्यपेक्षितेआहपित्र्यमंशमिति। तत्सुतोयस्यधनंविभज्यते
तस्यप्रपौत्रः। पौत्रस्यप्रस्तुतत्वात्। परतस्तत्सुतान्निवृत्तिर्भागनिवृत्तिर्भवेत्प्रपौत्रपुत्रोभागन्नलभेतेत्यर्थः। अतएवदेवलोपि
। अविभक्तविभक्तानांकुल्यानांवसतांसह। भूयोदायविभागःस्यादाचतुर्थादितिस्थितिरिति। बीजिचतुर्थमभिव्याप्यदायभा
गइत्यर्थः। विभक्तानामपिसंसर्गादिनासहवासेसतीयंव्यवस्था। वसतांसहेतिवचनात्। पित्र्यमंशमितिकात्यायनोक्तः। पि
तृद्वारकोभागइतिसूचितम्। अतएवाहयाज्ञवल्क्यः। प्रमीतपितृकाणान्तुपितृतोभागकल्पनेति। पैतामहेधनेजन्मनास्व
त्वम्पौत्राणांपुत्रैःसहाविशिष्टमेवयद्यपितेनपुत्रवत्पौत्राणामपिपुत्रसमएवभागउचितः। तथापितेषाम्पितृद्वारेणभागंप्रक
ल्प्यस्वस्वपितृभागाधिकारेणतुपैतामहेधनेस्वतोभागित्वमित्यर्थः। एतदुक्तंभवतिअविभक्ताभ्रातरोयदापुत्रानुत्पाद्यदिष्टङ्गता
स्तत्रैकस्यद्वौपुत्रावन्येषाञ्चचतुरादयइतिपौत्राणांवैषम्यन्तदाद्वावेकंस्वपितृभागंद्वेधाविभज्यगृह्णीतःअन्येचतुरादयोऽपिस्वस्व
पितृभागमेकैकंत्रेधादिरूपेणविभज्यगृह्णन्तिनतुपौत्रसंख्ययापैतामहधनभागाः। अनयैवरीत्याकेषुचिद्भ्रातृषुजीवत्सुके

॥वी०नि०॥ सुचिन्वपुत्रानन्यानुत्पन्नान्पुत्रिकाणां सर्वांशभागिनोऽन्येषां पुत्राः स्वस्वपित्रंशभागिन इति वाचनिकोऽयं भेदः। अतएव च
॥ व्य० ॥ वचनमिदमन्यथैवानुवादकम्। उद्धारादिविषमविभागो पित्रावाचनिकः समांशत्वं तु स्वाम्यप्राप्तमेवानूद्यते। अतएव पैतामहमप्यु
॥१७७॥ सिद्धं यदन्यैः पिता पितृव्योद्धृतं तत्रापि विशेषं च्छयैव पितुर्जितं च पौत्रा विभागभाग् इत्याह मनुः। पैतृकं तु पिता द्रव्यमनवाप्तं यदाप्नुयात्
। न तत्पुत्रैर्भजेत्सार्द्धमकामः स्वयमर्जितम्। स्वयमर्जितमिवेतीव शब्दाध्याहारेण योज्यम्। यद्यपि पितामहद्रव्यं नष्टमतेनैवोद्धृत
मतः स्वार्जितमेव जातं यत इति हेतुतया योज्यम्। अकाम इति वचनाद्विनिच्छयैव नापि पैतामहे पितृविभागे न पुत्रेच्छयेति गम्य
ते। तथा स्मृत्यन्तरमपि। पैतामहं हृतं पित्रा स्वशक्त्या यदुपार्जितम्। विद्याशौर्यादिना प्राप्तं तत्र स्वाम्यं पितुः स्मृतम्। प्र
दानं स्वेच्छया कुर्याद्भोगं चैव ततो धनात्। तदभावे तु तनयाः समांशाः परिकीर्तिता इति। हृतमपरैरपहृतं पितामहेनाप्राप्त
हृतमपि वानुपत्याहृतमित्यर्थः। अपरः प्रत्युक्तः पितामहद्रव्यानुपत्येऽप्यस्यार्थः। तदुपत्युपेयानुद्धृतेऽनेकत्वनिमित्तमंशद्वयं
येन चैषां स्वयमुपार्जितं स्यात्तदंशमेव च भेतेति विशेषाणां नाविभजते। इदं च विद्यादिष्वपि योज्यं तच्च विस्तरेण विवेक्ष्यते
। अयमत्र निर्गलितोऽर्थः। यद्यपि जन्मनैव पैतृके पैतामहे च धने पुत्रपौत्राणां स्वाम्यं तथापि पूर्वोक्तवचनैः पैतृके पुत्राणामपि तत्प
रतन्त्रतया पितुश्चार्जकतया प्राधान्यात्पित्रा स्वार्जिते विनियुज्यमाने। स्थावरं द्विपदं चैव यद्यपि स्वयमर्जितम्। असंभूय सुतान्सर्वान्न दानं न च विक्रय
इत्युक्तैरनुमतिरवश्यं कार्या। पैतामहे तु निषेधाधिकारोऽप्यस्ति। तदनुद्धृते पित्रोद्धृते तु तदिच्छायत्त इति पैतामहेऽपि
मणिमुक्तादौ तु पैतामहेऽपि पितुरेव स्वातन्त्र्यं मणिमुक्ताप्रवालानामित्यादिप्रागुक्तवचनेभ्यः। अत्र पितुरपरमानकारोऽयमाह
सांविभागः स पित्रोरिति द्विवचनादुभयोपरमएव पितृधनेऽपि तनुमाता पुत्रपरमेव मातृधनगोचरइति संग्रहकारमतमसार्थं
। पैतृकमिति च पित्रोरिदमित्येकशेषकल्पनायामप्रमाणाभावात्। अनयोः संस्थितयोस्तु समं धनं विभजेरन्नित्यादिना मातृधन
विभागस्याग्रे वक्ष्यमाणत्वाच्चात्र मातृधनविभागविधौ पौनरुक्त्यापत्तेश्च। अत एवाक्षेपमपि मातुर्दुहितरः शेषमृणादित्यादौ मातृधनविभा

प्राप्य विभजेरन्नूर्ध्वं पितुरिति पित्र्यमिति सम्बन्धो ऽभिमतः किन्तु पित्रोरूर्ध्वमित्येव । पितुरूर्ध्वमथ मृगाणामिति तु सम्बन्धो ऽन्यो मातृधनस्य
चरणविभागस्यानभिधानेनोक्तेः । अत एव प्रागुक्तशंखलिखितवचनेऽपि प्रथमं बहिष्कृतं स्यादित्यादौ मातुरप्येवमवस्थितत्वादृष्टत्वे
न मातुरपेक्षया प्रसक्तस्य विभागस्य निषेधः । सोऽदर्शनं तस्याप्यजीवन्त्यामिव न दर्शितम् । अत एव भागद्वयाज्जीवतो
ऽपि स्वयं कामतो विधीयते । अथ भार्याविभक्तानां धर्म्यं सेयं विभक्तं नाद् निक्षवचनेन सर्वस्य सर्वविधानमुखेन पृथग्भावनिषेधः
जीवत्पितृकानुजीवन्तं वनस्य विभागनिषेधः जीवतोरिति साहित्यमविवक्षितम् । अत एव एकस्मिन्नपि जीवति विभागो न धर्म्यः
किन्तूभयोपरमे । पित्रोरभावे भ्रातॄणामिति बृहस्पतिवचनेऽपि पितृवत् अत्रापि मातरि जीवन्त्यां विभागस्य मातृधनगोचरत्वानुपप
त्तेः मातृधनस्य विभागस्य जीवतोः पितृवत्पितृधनस्य निर्दिष्टत्वात् तज्जीवतो ऽनात्मभावे रस भ्रातृविभागः पितृधनगोचरः एव
व्यवस्थाप्यते । अत एव शास्त्रे संख्यायां विभागस्य मातृप्रधानकत्वं दर्शयति । यथाह । समानजातिसंख्याये ज्येष्ठा
स्वे के न स्वभवः । विभिन्नमातृकास्तेषां मातृभागः प्रशस्यते ॥ बृहस्पतिरपि । यद्येकजाता बहवः समाना जातितः संख्यया । सा
पत्न्यास्तैर्विभक्तव्यं मातृभागेन धर्मतः इति । अत्र जातिसंख्यया स्वस्वमात्रापेक्षमपि भागविशेषः स्वरूपकृतो नातोऽभिमातृभागाव
विधानं मातृप्राधान्यपरमेव स्त्रीणां बहुत्वे ऽविभागः किन्तु मातॄणामित्युद्दिश्य विभागः कर्तव्य इत्यत्र नाभिप्रेतम् । तेनैव मातृ
मद्वाच्यापि मातृजीवमे पुत्राणां परस्परं विभागो धर्म्यः । यत्नेनैव मातृधनविभागे धर्म्यं बृहस्पतिप्रमातुः परत्वे ऽपि मातृवि
जीमूतवाहनस्याह । तथापि मातृधनेऽमानमवापेक्ष्य ज्येष्ठाय ज्येष्ठांशः प्रागेव निरस्तम् । यदपेक्षया मातृज्येष्ठाः पुत्रास्तस्य प्रमाणं
स्यात्तेन तथापनेऽम्बुनास्त्र मातृधनस्य पुत्रस्याभियुक्त प्रदृष्टार्थतमभिप्रायात् एकस्य सर्वकर्मव्यत्वाद्युक्तम् । पौनरुक्त्य
मप्ययुक्तम् । पूर्वोक्तस्यापि मातृधनविभागस्य विशेषविधानाय अनुवादोपपत्तेः । याज्ञवल्क्यवचनेऽनुमिताक्षराकृतेव मातापित्रो
रूर्ध्वं सुतानां विभजेरन्नित्युक्तम् । तत्र मातृधनेऽपवादं माहेश्वरोत्तरार्द्धमवतारयन्तानपि नरलक्षणमपरिहृतम् । नाम्यत्र तेन यद्दि

षट्दुहितृभावेऽन्वयः पुत्रादिर्मातृधनमृणावशिष्टं गृह्णीयादिति व्याख्यायद् ऊर्ध्वं विभजेरन् सुताः पित्रोरूर्ध्वं पृथगृणं समभि
व्यनेनैव सिद्धमपि स्पष्टार्थमुक्तमित्युक्तम् । नचात्र पित्रोरूर्ध्वमित्येवास्तु सम्बन्धः मातृधनविभागस्योत्तरार्द्धेऽभिधानात् पितृ
धर्मैकथमृणमिति पर्य्यवस्यति । तथा च ताभ्य इत्यादेर्निरर्थकानुवादत्वमपि न प्रसंभवनीति वाच्यम् । कत्वकत्वणपदयोः सम
भिव्याहार्य्यत्वात्तदाकाङ्क्षायां स्ववाक्योपात्तपित्रोरिति पदानुषङ्गस्यैव परिशेषावगतार्थिकपितुःपदान्वयापेक्षयाभ्यर्हितत्वात्
तदंशेन तु ताभ्य इत्यस्यानुवादत्वस्याप्यभ्युपगमो चित्यात् । येत्वन्वयपदं दुहितृत्वयदौहित्रादिपरत्वेन व्याचक्षते तन्मते नुवैय
र्थ्यशङ्कैव नास्ति । तदेतद्विस्तरेण स्त्रीधनविभागप्रस्तावे प्रपञ्चयिष्यामः । शङ्खलिखितोक्तं मातरि जीवन्त्यामस्वातन्त्र्यमनुमानव
द्वनन्तद्धनगोचरमप्रसङ्गत्वत एव । भ्रातॄणामित्यादिव्यासवचनमपि सहवासप्राशस्त्यमात्रमुभयजीवनस्याहेति जीवतोरि
ति साहित्यविवक्षायामपि न दोषः । वस्तु तस्तु पित्रोरूर्ध्वमपि ज्येष्ठ एव तु गृह्णीयादिति सहवासस्य मुख्यत्वाद्विभागस्य च धर्म
वृद्ध्यर्थत्वान्मातरि जीवन्त्यामपि धर्मस्य पञ्चमहायज्ञादेरावश्यकत्वात्तद्वृद्ध्यर्थे विभागः कर्त्तव्य एव । यत्तु पित्रोरभाव इति वृह
स्पतिवचनेनिवृत्तरजस्कायां मातरि जीवन्त्यामित्यर्थ इत्युक्तं तन्न । उभयजीवने सहवासः प्रशस्तस्तदभावे विभाग इति पू
र्वार्द्धेनाभिहिते । मातर्य्यनिवृत्तरजस्कायां सुतान्तरसम्भवात्तद्वृत्तिलोपस्य च येजाता येप्यजाता इत्यादिवचनेन गर्हितत्वान्नि
वृत्तरजस्कायान्तु तस्यान्तदप्रसक्तेरुपरमस्पृहेपितरौ व विभागः प्रशस्त इति तस्यार्थः । तथासति निवृत्तरजस्कायान्तस्या न्तु
दीयत्वस्याधिकारिकन्यासन्तानस्यासम्भवात्सुतान्तरानुत्पत्त्या तद्धनविभागोपि पुत्राणामुचित इति मातृधनगोचरताप्यस्य
वचसः सम्भवतीति न किञ्चिदेतत् । यदपि व्यासवृहस्पतिवचसोर्मातृप्राधान्यं सापत्नविभागस्योक्तं तन्मम प्रविरुद्धम् । यथा
हि जीवतोरस्वतन्त्रः स्यादाजरयामिति समन्वित इत्यादिवचनवशाद्विभागोत्तरपितृमातृपारतन्त्र्यं तथैतद्वचनवशान्मातृभागए
वायमिति युज्यात दाक्षणं वद नयात तज्जीवनावधिस्थेयमित्येतावतापि न तु धनविभागेपि तस्यास्तज्जीवन्त्यामनधिकारः कुतस्त्व

इत्यलमधिकेन। जीवत्पितृकविभागेपित्रा यथा स्वपुत्रांशसमांशभागिन्यः स्वपत्न्यः कार्य्यास्तथा तदुपरमविभागेऽपि पुत्रैस्ताः
स्वसमांशभागिन्यः कार्या इत्याह याज्ञवल्क्यः। पितुरूर्द्ध्वं विभजतां माताप्यंशं समं हरेत्। यदि स्त्रीधनं दत्तं न भवति। दत्ते
त्वंशार्द्धहारिणी कार्य्येति वचनात् प्यत्रार्द्धशब्दो न समविभागवचनः। किन्तु यावता पुत्रसमांशिता भवति तावदेव विवक्षि
तम्। अत्र मातृपदस्य जननीवाचकत्वान्नापुत्रसपत्नमातृपरत्वमपि। सकृच्छुतस्य मातृपदस्य मुख्यगौणोभयार्थत्वानुपप
त्तेः। यत्त्वसुतास्तु पितुः पत्न्यः समानांशाः प्रकल्पिताः। पितामह्यश्च सर्वास्ता मातृतुल्याः प्रकीर्त्तिता इति व्यासवचनाद्येगीश्व
रवचने पत्नीग्रहणाच्च जीवत्पितृकविभागे पत्नीमात्रस्य पुत्रसमांशत्वम्। पुत्रपत्नीपदद्वयोः पितृप्रतियोगिकसम्बन्धार्थकतया
गौणमुख्यार्थकत्वानापत्तेः। पित्रोरूर्द्ध्वं विभागे तु पुत्रकर्तृकतया तत्सम्बन्धमातृप्रतीतेर्वैरूप्यादुभयपरत्वासम्भवात् पुत्रवती
नामेव स्वपुत्रसमांशित्वं अपुत्राणान्तु ग्रासाच्छादनमात्रभाक्त्वमविभक्तसंसृष्टपत्नीनामिव। युक्तञ्चैतज्जीवद्विभागे पितुः स्वा
तन्त्र्यात्। अजीवद्विभागे पुत्राणां स्वातन्त्र्यात्। मातृपदपत्नीपदस्वरसाच्च। युक्तञ्चापुत्राणां ग्रासाच्छादनमात्रभाक्त्वम
मितिबहुतरनिबन्धस्वरसः। मिताक्षराकृतस्तु जीवद्विभागे पुत्रसमांशित्वम्पत्नीनामुक्तमिदानीम्पितुरूर्द्ध्वम्विभजतामपि पुत्र
समभागित्वम्पत्नीनामाहेत्यवतारणिकम्पितुरूर्द्ध्वम्विभजतामित्यस्य योगीश्वरवचसः प्रयच्छतोऽपि सपुत्रापुत्रसकलपितृपत्नी
नाम्पुत्रसमांशित्वमभिप्रेतमिति प्रतीयते। मदनरत्नकृताप्यत एवोक्तम्। जननीग्रहणमपुत्राणामपि मातृसपत्नीनामुपल
क्षणम्पितामहीनाञ्च। असुताश्च पितुः पत्न्य इत्यादिव्यासवचनादिति। युक्तञ्चैतत्पितुः पत्न्य इति पुत्रप्रतियोगिकपितृग्रहणा
स्यान्यथा वैयर्थ्यात्। पुत्रसमांशित्वस्य पितृकृतविभागविषये पत्न्यः कार्य्याः समांशिका इति वदन् पिमातर इत्येव वदेत्। तस्मा
त्पितृपत्नीत्वप्रयुक्तमेव जीवद्विभागसाधारणं पुत्रसमांशभाक्त्वमिति मिताक्षरामदनरत्नकृतोरभिप्रायः। पितुरिति कर्तरि ष
ष्ठी। तेन पितृकर्तृके विभागे पत्न्यः समानांशा इत्युक्तेऽर्थात्तत्प्रतियोगिकस्यैव पत्नीत्वस्य लाभाज्जीवद्विभागविषयतैवास्योचिता।

तत्र तु मातृपदे मुख्यामुख्यमातृपरत्वानौचित्यात्प्रतिसम्बन्धितया च पुत्राणामेव स्ववचनोपात्तानामुपस्थितेर्जननीपरत्वमेव मातृपदस्य मुख्यार्थलाभायोचितम्। शिष्टाचारोऽप्येवम्। यदत्र युक्तं तद्ग्राह्यमित्यलमधिकेन। बृहस्पतिः। तदभावे तु जननी तनयांशसमांशिनी। अत्र प्रक्रमाच्छब्देन पिता गृह्यते। पितरि प्रेते यदि केऽपि भ्रातरोऽसंस्कृताः सन्ति तदा तत्संस्कारं समुदायद्रव्येण विधायावशिष्टं यथांशेन विभजनीयमित्याह याज्ञवल्क्यः। असंस्कृतास्तु संस्कार्य्या भ्रातृभिः पूर्वसंस्कृतैः। भ्रातृभिरित्यभिधानात् संस्कृता भ्रातर इति प्रतीयते। संस्कार्य्यत्वमात्रविधानस्य दायभागप्रस्तावसम्बन्धात् समुदायद्रव्यादिति विवक्षितम्। तथा च व्यासः। असंस्कृतास्तु ये तत्र पैतृकादेव तद्धनात्। संस्कार्य्या भ्रातृभिर्ज्येष्ठैः कन्यकाश्च यथाविधि। अविद्यमाने पितृधनेऽसंस्कृतः संस्कारावश्यकत्वमाह नारदः। अविद्यमाने पित्रर्थे स्वांशादुद्धृत्य वा पुनः। अवश्यकार्य्याः संस्कारा भ्रातृभिः पूर्वसंस्कृतैः। असंस्कृतभगिनीसंस्कारोऽप्यावश्यकः। सति पितृद्रव्ये ताभ्योंऽशदानमपीत्याह याज्ञवल्क्यः। भगिन्यश्च निजादंशाद्दत्त्वांशं तु तुरीयकमिति। असंस्कृताः संस्कार्य्या इत्यनुषङ्गः। मनुः। स्वेभ्योंऽशेभ्यस्तु कन्याभ्यः प्रदद्युर्भ्रातरः पृथक्। स्वात्स्वादंशाच्चतुर्भागं पतिताः स्युरदित्सवः। अत्रोभयत्र प्रत्येकपरिकल्पितान्निजादंशादुद्धृत्य स्वैर्भ्रातृभिर्भगिनीभ्यः प्रत्येकं चतुर्थोंऽशो देय इत्यर्थो न भवति। तथा सति बहुभ्रातृकाया बहुधनत्वं बहुभगिनीकस्य भ्रातुर्निर्धनतापत्तेः। तस्मात्संस्कारोपयुक्तद्रव्यदानमात्रं विवक्षितमिति रत्नाकरचिन्तामण्यादौ व्याख्यातं। अनूढानां तु कन्यानां वित्तानुरूपेण संस्कारं कुर्यादिति विष्णुवचनञ्चोपोद्वलकमुपन्यस्तम्। तदयुक्तं। अंशदानाविवक्षायाः स्मृतिद्वयेऽप्यन्याय्यत्वात्। संस्काराकरणप्रत्यवायात्पृथगदानप्रत्यवायश्रवणाच्च अन्यथा पतिताः स्युरदित्सव इत्यदानप्रत्यवायवचनमपि संस्कारप्रत्यवायपरं स्यात्। अतो मेधातिथिमिताक्षराकारादिभिर्व्याख्यातमेवम्। निजादंशात्स्वात्स्वादंशादिति नापादाने पञ्चम्यापि तु ल्यब्लोपे। तथा च तमपेक्ष्येति यावत्। एवञ्च सजातीया कन्या तज्जातीयपुत्रभागचतुर्थांशभागिनी सा कार्य्या। तथा चायमर्थो ब्राह्मणजातीया या कन्या वक्ष्यमाणो ब्राह्मणीपु

त्रभागोयावांस्तच्चतुर्थांशस्तस्याः। एवंक्षत्रियादिजातीयकन्यास्वपि। तच्चयथा। यदिकस्यचिद्ब्राह्मणस्यैवैकापत्नीतस्याश्चैकः
पुत्रःकन्यकाचैका। तत्रपित्र्यन्द्रव्यंसर्वमेवद्विधाविभज्यतत्रैकम्भागञ्चतुर्द्धाकृत्वैकंभागंभगिन्यैतेनदेयोऽवशिष्टंसर्वंस्व
यंगृह्णीयात्। एवंपुत्रद्वयेकन्यैकेचत्रेधाविभागंसर्वद्रव्यस्यविधायैकस्यचतुर्द्धाकृतस्यभागस्यचतुर्थभागम्भगिन्यैदत्वाशेषं
द्वाभ्यांयथांशम्विभज्यग्राह्यम्। पुत्रैकेकन्याद्वयेद्वेधाकृतस्यद्रव्यस्यैकम्भागञ्चतुर्द्धाकृत्वाद्वावंशौद्वाभ्यांकन्याभ्यान्दत्वाऽव
शिष्टन्तेनग्राह्यम्। एवंसमानजातीयेषुसाम्येपिसर्वथाभगिनीनांभ्रातृजात्युचितभागतुरीयांशभागितायथाभवतितथाग्राह्यम्।
यदातुब्राह्मणीपुत्रएकःक्षत्रियाकन्याचैका। तत्रपितृधनंसप्तधाविभज्यक्षत्रियापुत्रभागांस्त्रींश्चतुर्द्धाविभज्यतुरीयमंशंक्षत्रि
याकन्यायैदत्वाशेषम्ब्राह्मणीपुत्रोगृह्णीयात्। यदातुद्वौब्राह्मणीपुत्रौक्षत्रियाकन्याचैकातदापितृधनमेकादशधाकृत्वाक्षत्रि
यापुत्रभागांस्त्रींश्चतुर्द्धाविभज्यैकमंशंक्षत्रियाकन्यायैदत्वाब्राह्मणीपुत्रावन्यत्सर्वम्विभज्यगृह्णीयाताम्। एवंसर्वत्रजातिवै
षम्येभ्रातृभगिनीसंख्यासाम्यवैषम्ययोरूह्यम्। विष्णुरपि। मातरःपुत्रभागानुसारभागहारिण्योऽनूढाश्चदुहितरःपुत्रभागा
नुसारेणयथावर्णक्रमेणपुत्राणाञ्चतुरस्त्रिद्व्येकभागभागिनामथातत्तज्जातीयपत्नीनामपि। अनूढाश्चदुहितरःपुत्रभागानुसा
रभागहारिण्यइत्यनेनयद्यपिचतुरस्रादीनांसर्वेषांदुहितृभ्योदानम्प्रतीयतेतथापितेभ्योंऽशेभ्यःस्वात्स्वादंशादितिमनुयोगीश्व
राभ्याञ्चतुर्थांशदानस्योक्तेस्तथैवपुत्रभागानुसारेणसजातीयभ्रातृसमभागहारित्वमित्यविरोधः। स्पष्टमाहवृहस्पतिः। समांशा
मातरस्त्वेषाञ्चतुर्थांशाश्चकन्यकाइति। कन्यकानान्त्वदत्तानाञ्चतुर्थोभागइष्यते। पुत्राणाञ्चत्रयोभागाःसाम्यन्त्वल्पधनेस्मृ
तमितिवदतःकात्यायनस्याप्येतदेवाभिमतम्। साम्यमित्यादेस्त्वयमर्थः। यदिसंस्कारपर्याप्तमपिपितृधनंनास्तितदापुत्रस
मभागितैवदुहितॄणामिति। अनूढानांत्वित्यादिविष्णुवचनमपिमेधातिथ्यादीनामप्रतिकूलम्। वित्तानुसारेणसंस्कारमनू
ढानाम्पितुःकन्यानांस्वभगिनीनांकुर्य्यादित्यनेनसंस्कारावश्यकतामात्रमवोच्यतेनतुभागदानादाने। स्मृतिचन्द्रिकाकारस्तु।

कन्याभ्यश्च पितृद्रव्यन्देयं वैवाहिकञ्च वस्विति देवलवचनानुसारेणासंस्कारमात्रोपयोगिद्रव्यदानमेवमन्यते। वैवाहिकं वसु दे
यमिति वैवाहिकविशेषणस्यान्यथा वैयर्थ्यापत्तेरिति तदाशयः। अत्र वदामः। कन्याभ्यः पितृद्रव्यन्देयमिति पृथग्विधिः। तच्च
मन्वाद्युक्तरीत्या चतुर्थांशरूपमेव। वैवाहिकम्वसु च देयमित्यपि पृथगेव विधिः। विभज्यमाने दायाद्ये कन्याऽलङ्कारं वैवाहि
कञ्च स्त्रीधनं लभेतेति शङ्खवचनसमानार्थं तथा व्याख्यातञ्चेदं शङ्खवचनं विद्यारण्यश्रीचरणैः पराशरस्मृतिटीकायाम्। पैतृ
कद्रव्यविभागकाले सधृतालङ्कारादिकमपि कन्या प्राप्नोतीत्याह शङ्ख इति। यदि तु वैवाहिकं विवाहोपयोगि पितृद्रव्यं कन्या
भ्यो देयमित्यर्थः स्याद्वसु पदम्पुनरुक्तं स्यादिति पृथग्विधिद्वयमेवान्वयुक्तम्। दायतत्त्वकृता तु कन्याभ्यश्च पितृद्रव्याद्देयम्वैवा
हिकम्वस्विति पठितन्तत्रापि शङ्खेन समानार्थकतालाभायास्मदुक्तमेव व्याख्यानमादर्तुमर्हं ननु विवाहोपयुक्तद्रव्यपरतैव वर्णनी
यम्। अत्र च मन्वादिवचनेषु भगिनीपदं क्वचित् क्वचिच्च कन्यादिपदं यद्यपि श्रूयते तथापि भ्रातृकर्तृकविभागाधिकारे पितृप्र
तियोगिकं कन्यात्वं दुहितृत्वं भ्रातृप्रतियोगिकञ्च भगिनीत्वमादायैकार्थकता बोध्या। तस्माद्जीवत्पितृकविभागे भगिनीनाम
पि पितृद्रव्यांशभागित्वन्न तु संस्कार्यतामात्रम्। पूर्वन्तु यत्किञ्चित्पिता ददाति तदेव लभते विशेषवचनाभावादिति। जीमूत
वाहनेन तूक्तम्। प्रदद्युर्भ्रातरः स्वांशान्निति मनुयोगीश्वराभ्यामभिधानान्न भगिनीभिरधिकारबुद्ध्या चतुर्थांशो ग्राह्यः। न
ह्यधिकारिणा स्वकस्मै भ्रात्रेऽन्येभ्यो भ्रातृभ्यः स्वांशाद्दद्यादित्युच्यते। तथा च चतुर्थांशदानमपीति तद्दाने भ्रातृणामेव दोषो न तु तासामप्र
ह्यकारित्वेनेति। तदप्ययुक्तम्। उक्तिवैचित्र्यमात्रस्यार्थाप्रयोजकत्वात्। इच्छया विभजेत्सुतानुद्धारं ज्यायसे दद्यादि
वत्। यदपि तेनैवोक्तम्। येषान्तु न कृतास्तेषां संस्कारविधयः क्रमात्। कर्त्तव्या भ्रातृभिस्तेषां पैतृकादेव तद्धनादिति नारदवा
क्ये येषामिति पुंलिङ्गनिर्देशात्तदनन्तरमेव चाविद्यमाना इति वचनारम्भाद्भ्रातृसंस्कारार्थमेवेदम्वचनमिति सति पितृद्रव्ये मन्वादि
वचनेभ्यो भगिनीसंस्कारावश्यकत्वप्रतीतेः संस्कारोपयोगिद्रव्यदानमेव विवक्षितमिति तन्नेयं। वचनान्तरेषु भगिनीसंस्कारस्याव

श्यकत्वप्रतीतेः । पिता पितामहो भ्राता सकुल्यो जननी तथा । कन्याप्रदः पूर्वनाशे प्रकृतिस्थः परः परः । अप्रयच्छन् समाप्नोति भ्रूणहत्यामृतावृताविति । भ्रातुरपि योगीश्वरेण भगिनीविवाहसंस्कारकरणे भ्रूणहत्यादोषश्रुतेस्तदेकमूलकतया येषान्तो धामित्यस्य सामान्यलिङ्गनपुंसकमिति वचनात्सामान्यविवक्षान्यायाच्च नपुंसकषष्ठ्यन्तत्वं विरूपैकशेषोपि वाभ्युपगन्तुमुचितएवे ति । यवीयस इति नुमस्तोर्घयोरभावश्छान्दसमभिप्रेत्य । असंस्कृतास्तु भ्रातरस्तु येस्युस्तत्र यवीयसः । संस्कार्य्याः पूर्वजैस्तैवै पैतृकान्मध्यकाद्धनादिति बृहस्पतिवचनम्पठित्वा भ्रातृग्रहणम्भगिनीनामप्युपलक्षणमिति मदनरत्नकृता व्याख्यातम् । अ त्र संस्कारसाहचर्य्यादनूढानां दुहितॄणाम् । कन्यकानामदत्तानामित्यनूढत्वविशेषणोपादानाच्चापरिणीता एव चतुर्थांशभागिन्यो भगिन्यो न्यास्तु यत्किञ्चिदौचित्याल्लभन्त इति बोध्यम् । मातृधने चेदम्प्रपञ्चनीयम् । स्थावरस्य स्वार्जितस्य पैतामहस्य वा पुत्राननुमत्यैव पितादानादि कुर्य्यात् । स्थावरं द्विपदञ्चैवेति प्रागुदाहृतवचनात् । यद्यपि स्वयमर्जितमित्यनेन पैतामहे कैमुतिकन्यायेन पुत्राननुमत्यावश्यकता प्रदर्शिता । कुटुम्बव्यापिन्यामापदि तु यः कश्चिदन्याननुमतावपि कुटुम्बभरणस्यावश्यकत्वात्स्थावरस्यापि दानविक्रयादावधिकारी । एकोपि स्थावरे कुर्य्याद्दानाधमनविक्रयम् । आपत्काले कुटुम्बार्थे धर्म्मार्थे च विशेषत इति वचनात् । धर्म्मार्थ इत्यनेनात्यावश्यकः पितृश्राद्धादिरूपो धर्म्मो गृह्यते । यत्तु स्मरणं । विभक्ता अविभक्ता वा सपिण्डाः स्थावरे समाः । एको ह्यनीशः सर्व्वत्र दानाधमनविक्रय इति ॥ तत्राविभक्तानां मध्यकद्रव्ये स्वाम्यसाम्यादनीशत्वमन्यानुमतिं विना सिद्धमपि स्थावरे विशेषतस्तदादरार्थमुच्यते । अविभक्तानान्तु व्यवहारसौकार्य्यार्थम् । कालान्तरे हि विभक्ताविभक्तसंशये विभागभावनावश्यं साक्ष्यादिप्रमाणेन तथा सति कार्य्यं स्यादन्यथा बाधारणाद्द्रव्यदानाद्यसम्भवात् । अनुमतौ तु सर्व्वां तदनपेक्ष एव व्यवहारः सिद्ध्यति । ननु यथाश्रुतं स्थावरे विभक्तानामपि समं स्वाम्यं । विभागस्य दृष्टार्थताप्रसङ्गात् अतस्तत्रान्यानुमतिमन्तरेणापि दानादि स्वरूपं सिद्ध्यत्येव । विभागभावनायां व्यवहारेपि । यथा स्वग्रामज्ञातिसामन्तदायादानु

मतेनवा। हिरण्योदकदानेनषड्भिर्गच्छन्तिमेदिनीतिवचनेग्रामानुमतिःसामन्तानुमतिश्च। सामन्तानुमतिस्तुसीमाविप्रतिप
त्तिनिरासायापि। ज्ञातिदायादानुमतेस्तुपूर्ववदेवव्यवस्था। अतएवस्मृत्यन्तरम्। प्रतिग्रहःप्रकाशःस्यात्स्थावरस्यविशेषत
इति। अन्यथात्रापिग्रामसामन्तानुमतिमन्तरेणदानाद्यसिद्धिःप्रसज्येत हिरण्योदकदानेनेतिस्थावरेविक्रयोनास्तिकुर्य्या
दाधिमनुज्ञयेतिस्थावरस्यविक्रयप्रतिषेधात्तुभूमिंयत्प्रतिगृह्णातिभूमिंयश्चप्रयच्छति। तावुभौपुण्यकर्म्माणौनियतंस्वर्गगामि
नावितिदानप्रशंसनाच्चकुटुम्बभरणाद्यर्थमवश्यकर्त्तव्येऽपिविक्रयेसहिरण्यमुदकंकृत्वादद्यात्। दानांशोऽपिकश्चित्कर्त्तव्यस्तथा तच्चभव
तितथादानरूपेणस्थावरविक्रयंकुर्य्यादितिसूचितम्। जीमूतवाहनस्तु। स्थावरस्यसमस्तस्यगोत्रसाधारणस्यच। नैकः
कुर्य्यात्क्रयन्दानम्परस्परमतंविना। विभक्तावाऽविभक्तावेत्यादिव्यासीयवचनद्वयमुपन्यस्यनेदमेकस्यक्रयदानाद्यनधिका
रप्रतिपादनार्थं। यथेष्टविनियोगार्हत्वलक्षणस्यस्वत्वस्यद्रव्यान्तरइवस्थावरेऽपिविशेषात्स्वव्यापारात्मकदानाद्यनिषेधेनैवे
चनशतेनापिवस्तुनोऽन्यथाकरणाशक्तेर्वैधयितुमशक्यत्वात्। किन्तुदुर्वृत्तपुरुषम्प्रतिकुटुम्बार्थादिनिमित्ताभावेकुटुम्बवि
रोधाद्धर्म्मभागिताज्ञापनार्थंनिषेधरूपम्। एवंस्थावरंद्विपदश्चैवेत्यादिकमपिविभक्तविषयम्पूर्ववद्व्याख्यानीयम्। अत
एवनारदः। यद्येकजाताबहवःपृथग्धर्म्माःपृथक्क्रियाः। पृथक्कर्म्मगुणोपेतानचेत्कार्य्येषुसंमताः। स्वभागान्यदिदद्यु
स्तेविक्रीणीयुरथापिवा। कुर्य्युर्यथेष्टंतत्सर्वमीशास्तेस्वधनस्यहीतिसामान्यतएवविक्रयाद्यनुमन्यते। ईशास्तेस्वधनस्यही
तिहेत्वभिधानात्स्थावरगोचरमपीदम्वचनम्। अपरथातद्दानर्थक्यापत्तेरित्याह। तन्नस्वयमेवपरंस्वधर्म्मभागिताज्ञापनता
र्थमित्युक्तम्। वृथास्थावरविक्रयस्यबहून्प्रत्यपिनिषेधादेकग्रहणापार्थक्यापत्तेः। व्यवहारशास्त्रस्यव्यवहारसौकार्य्यादि
दृष्टप्रयोजनसम्भवेऽदृष्टकल्पनानुपपत्तेः। अन्यथाऽनुमतावपितदापत्तेः। कुटुम्बविरोधजन्यवचनान्तरप्रतिपादितार्थ
र्म्मप्रयोजकतापरमस्तु। अत्रचपुत्रेच्छयायोजीवद्विभागोयश्चाजीवद्विभागःसएकेच्छयापिभवत्यविशेषात्। अतएवविभा

गम्प्रकव्ययकात्यायनेनोक्तम्। अप्राप्तव्यवहाराणां धनं व्ययविवर्जितम्। न्यसेयुर्बन्धुमित्रेषु प्रोषितानामथैव चेति। तदपि वि
म्मतम्। अन्यथा तदनुमतिमन्तरेण विभागाभावेन तद्धनस्य बन्धुमित्रेषु न्यासविधानमनुपपन्नं स्यात्। तथा विष्णुरपि। अप्राप्त
व्यवहाराणां धनमाव्यवहारप्राप्तेरिति। अथ स्वपुत्राणां विभागः पुत्रपौत्रप्रपौत्रपर्यन्ताः समाना उत्पत्तितः प्रत्यासत्तिक्रमेणाधिकार
क्रमः। पुत्रादीनां त्रयाणामेव पार्वणे पिण्डदानाधिकारात्। अत एव देवलः। पिता पितामहश्चैव तथैव प्रपितामहः। उपासते सु
तं जातं शकुन्ता इव पिप्पलम्। मधुमांसैश्च शाकैश्च पयसा पायसेन च। एष नो दास्यति श्राद्धं वर्षासु च मघासु चेति। तथा च श्लो
कशङ्खलिखितगौतमाः। पिता पितामहश्चैव तथैव प्रपितामहः। जातमुत्रं प्रशंसन्ति पिप्पलेषु शकुना इव। मधुमांसेन खड्गे
न पयसा पायसेन वा। एष दास्यति नो नित्यं वर्षासु च मघासु चेति। एवं तुल्याधिकारात् जन्मना स्वत्वस्य पितृतुल्यत्वात्तुल्यभा
गभागितां प्रसक्तामप्यनेकपितृकाणामिति वचनेन नियमयन्ते। जीवत्पितृकयोः पौत्रप्रपौत्रयोः पार्वणानधिकारेण पिण्डदातृत्वा
भावात्पितामहप्रपितामहधनेऽनधिकारः। यदा चैकस्य पुत्रस्य पुत्राः सन्त्येकस्य पुत्र एवास्ति। तदा पुत्रस्यैको भागो यश्चैकः
सर्वेषां पौत्राणाम्। स्वपित्रधीनजन्ममूलकत्वात्पितामहधनसम्बन्धस्य यावन्त्येव धनेऽन्तस्वस्वामित्वार्हत्वं तावत्येव तेषामपीति जी
मूतवाहनोक्तं वचनादेयम्। उत्पन्नानां पौत्राणामपि पितामहधने स्वत्वव्यवस्थापनात्। तस्मात्पौत्राणां पितामहधने वाचनिकमे
व भागवैषम्यं न त्वौपपत्तिकम्। यत्तु तेनैवोक्तम्। यत्रैकस्य भ्रातुरनेकसंख्याः पुत्रा अन्यस्य च ततोऽल्पसंख्यास्तत्रेदमनेकपितृका
णामिति वचनम्। पौत्राणां सर्वेषां समभागनिवृत्त्यर्थं जीवति तु पितरि पौत्राणां पितामहधनस्वाम्ये सपुत्रापुत्रभ्रातृद्वयविभागे तत्पु
त्राणामपि विभागः स्यात् स्वाम्याविशेषादिति तत्प्रागेव निरस्तम्। उक्तोऽतिप्रसङ्गोऽप्यनेनैव परास्तः। अत एव पितृभ्रातृपुत्रसमवा
ये पितृव्यपितृधनं तद्दिति भ्रातृपुत्राणां न स्वाम्याभावाद्विभाग एव न स्यादित्यप्यपास्तम्। यच्च जीवत्पितृकयोरित्यादि तदपि
मन्दम्। न हि पिण्डदानाधिकार एव दायग्रहणप्रयोजकः। ज्येष्ठे सति कनीयसामनधिकारेऽपि दायग्रहणात्। तदुक्तं नाथाख्या

वाप्यनपायात्। गोत्रजादीनां दायहराणामनेकेषां समवाये पिण्डदानाद्युपकारित्वं धनस्वामिनो यत्तदनुपकारित्वात्तत्कम्य
रत्नं तु तदत्र प्रयोजकं। जीवद्विभागेऽजीवद्विभागे वा कश्चिच्छिन्नपितृपत्न्यां भ्रातृपत्न्यां वास्पष्टगर्भायामप्रसवम्प्रतीक्ष्य विभागः का
र्यः॥●॥ अथ भ्रातृणां दायविभागो याश्चानपत्याः स्त्रियस्तासामापुत्रलाभादिति वसिष्ठस्मरणात्। आपुत्रलाभादिति वचनात्
स्पष्टगर्भासु प्रतीक्षाऽस्पष्टगर्भासु तु नेत्यवगम्यते। अत एव तत्र पश्चादुत्पन्नस्य विभागप्रकारमाह योगीश्वरः। विभक्तेषु सुतो
जातः सवर्णायां विभागभाक्। पित्रिच्छया पुत्रेच्छया वा जीवतोः पित्रोर्विभक्तेषु पुत्रेषु पश्चात्सवर्णायां भार्यायामुत्पन्नो विभाग
भाक्। विभज्यत इति विभागः पित्रोर्भागस्तं भजत इति विभागभाग्भवति॥ पित्रोरूर्ध्वं स एव तयोरंशं लभत इत्यर्थः। असवर्णा
दुहितरि मातृभागमिति विशेषः। सवर्णायामिति विशेषणादसवर्णायां जातस्तु पित्र्याद्धनात्स्वांशमेव लभते दुहित्रभावे मातृभा
गं सर्वमेव। अनेनैव न्यायेन जीवद्विभागेऽपि विभक्तजो सवर्णापुत्रः स्वजात्युचितभागेव। न सकलपित्र्यभागित्यवसेयम्। एतदे
वाभिप्रेत्य मनुः। ऊर्ध्वं विभागाज्जातस्तु पित्र्यमेव हरेद्धनमिति। पित्रोरिदं पित्र्यं धनं तयोः क्रव्यवस्थया हरेत्। एवकारेण भ्रा
तृभिः स्वांशाद्दातव्यस्वभागसमभागभाक्त्वनकार्य्यः। गौतमोऽपि। विभक्तजः पित्र्यमेवेति। जीवति तु पितरि मातरि तत्सपत्न्यां चाऽ
विस्पष्टगर्भायां विभक्ते विभागानन्तरोत्पन्नायं स्वभागाद्दातव्यस्वभागसमभागभाक्त्वकार्य्यः। तथा च विष्णुः। पितृविभक्ता विभागा
नन्तरोत्पन्नाय विभागं दद्युरिति। तच्च भ्रातृदत्तं द्विभागम्पितैव गृहीत्वा तम्परिपालयेत्। तस्यैव तत्राधिकारात्। अप्राप्तव्यव
हाराणामित्यादि प्रागुक्तवचनाच्च। यच्च वचनम्। अनीशः पूर्वजः पित्रोर्भ्रातृभागे विभक्तज इति तस्याप्ययमेव विषयः। पूर्वजो वि
भागात्पूर्वमुत्पन्नः प्राप्तपितृधनविभागः पित्रोर्विभागेऽनीशोऽस्वामी। विभक्तजश्च पूर्वभक्तस्य भ्रातृभागेऽनीश इत्यर्थः। विभा
गोत्तरस्वयमर्जितन्तदपि विभक्तजस्यैव। पुत्रैः सह विभक्तेन पित्रा यत्स्वयमर्जितम्। विभक्तजस्य तत्सर्वमनीशाः स्युः पूर्व
जाः। यथा धने तथर्णे च दानाधानक्रयेषु च। परस्परमनीशाः स्युर्मुक्त्वा शौचोदकक्रियामिति वृहस्पतिस्मरणात्। एवं॥

पित्रा सह विभक्ता ये सापत्ना वा सहोदराः । जघन्यजास्तु ये तेषां पितृभागहरस्तु ते ॥ अत्र हेतुरनीशः पूर्वजः इत्यादितद्वचनो
क्त एव । ये तु विभक्ताः पित्रा संसृष्टाः पुत्रास्तैः सह तु तस्य विभागो न सकलपित्र्यधनग्रहणमित्याह मनुः । संसृष्टास्तेन वा ये स्यु
र्विभजेत स तैः सह । तेन पित्रा पितुरूर्ध्वम्पितृधने भ्रातृभिर्विभज्य गृहीते विभागसमयेऽस्पष्टगर्भायाः पितृपत्न्याः पश्चात्पुत्रे जाते
स्वस्वभागादायव्ययविशोधितान्तैः स्वस्वभागसमभागभाक्करणीय इत्याह याज्ञवल्क्यः । दृश्याद्वा तद्विभागः स्यादायव्ययविशो
धितात् । दृश्याद्भ्रातृभिर्गृहीतात् । आयः प्रतिमासम्प्रतिदिनम्प्रत्यब्दं यत्तदुपरिवृद्धम् । व्ययः पितृकृतर्णापाकरणं भ्रातृभगि
नीसंस्कारकरणञ्च । तस्य सर्वसाधारण्येन कर्त्तव्यत्वात् । न तु भ्रातृकर्त्तव्यव्ययस्तस्यैतत्सम्बन्धाभावात् । ताभ्यामायव्ययाभ्यां
विशोधितात्पितृधनात्तस्य विभागोऽनन्तरोत्पन्नस्य विभागः पूर्वविभक्तसमः स्यादित्यर्थः । एतदुक्तम्भवति । प्रातिस्विकेषु स्वस्वभा
गेषु तदुत्पन्नमायम्प्रवेश्य व्ययञ्च साधारणं व्ययन्निष्काश्यावशिष्टं स्वस्वभागेभ्यः किञ्चित्किञ्चिदुद्धृत्य विभक्तजः स्वभागसमभा
क्कार्य्य इति । कथं तर्हि विभक्तेषु सुतो जात इति पूर्वार्द्धे न सह व्यवस्थितविकल्पार्थः व्यवस्था चोक्तैव । हलायुधस्तु । दृश्या
त्प्रत्यक्षात्तु मातापितृधनादित्यर्थमुक्त्वा । विभक्तभ्रात्रपेक्षया योऽल्पगुणो विभक्तजस्तद्विषयोऽयं पक्ष इत्याह । तन्निर्बीजत्वात्
गुणवतोऽपि विभागानन्तरेऽज्ञातस्य समभागेन विभजनीयत्वात् अत्र तत्प्रवृत्तौ प्रमाणाभावान्नियमकल्पनेऽदृष्टार्थतापत्तेर्विज्ञाने
श्वरोक्तार्थकतया च वचनसामञ्जस्यादुपेक्ष्यम् ॥०॥ असवर्णानां भ्रातॄणां विभागप्रकारमाह योगीश्वरः । चतुस्त्रिद्व्येकभागाः स्यु
र्वर्णशो ब्राह्मणात्मजाः । क्षत्रजास्त्रिद्व्येकभागा विड्जास्तु द्व्येकभागिन इति । तिस्रो वर्णानुपूर्व्येण द्वे तथैका यथाक्रमम् । ब्राह्मण
क्षत्रियविशां भार्य्याः स्वा शूद्रजन्मन इति योगीश्वरेण ब्राह्मणस्य सवर्णा तिस्रः क्षत्रियस्य द्वे । विश एका भार्य्या इति । सवर्णामा
दाय तेषां मध्ये ब्राह्मणस्य चतस्रः क्षत्रियस्य तिस्रो वैश्यस्य द्वे इत्युक्तं । सवर्णा असवर्णा सर्वभार्य्याभिप्रायेण च्यादि संख्याव्याख्याने वै
श्यस्यापि द्वे शूद्रापरिहारे चस्यैवेति स्वा शूद्रजन्मन इति वैश्याद्वे लक्षण्या संज्ञने रेवं सवर्णाभिप्रायेणेयं संख्येति विज्ञानयोगिभिर्व्या

Digitized by Google

ख्यानम् । तथा च ब्राह्मणाद्ब्राह्मण्यादिषु स्त्रीषु जाताः पुत्रा यथाक्रमं वर्णशो मातृवर्णानुसारेण । संख्यैकवचनाच्छस्वीप्साया मित्यधिकरणकारके शस्प्रत्ययः वर्णे वर्णे इत्यर्थः । ब्राह्मण्यादिभ्यः क्षत्रियादिषु जातानां मूर्द्धावसिक्तादिजातित्वेन तद्वर्णशब्देन ग्रहणासम्भवान्मातृवर्णश इत्यर्थः । चतुस्त्रिद्व्येकभागाः स्युः । एतदुक्तं भवति ब्राह्मणेन ब्राह्मण्यामुत्पन्ना एकैकशश्चतुरश्चतुरो भागाँल्लभन्ते । तेनैव क्षत्रियायामुत्पन्नास्त्रींस्त्रीन् । तेनैव वैश्यायामुत्पन्ना द्वौ द्वौ । तेनैव शूद्रायामुत्पन्ना एकमेकमिति । वर्णश इति सर्वत्रोत्तरत्र सम्बध्यते । तथा च क्षत्रियात् क्षत्रियादिषु जाता यथाक्रमं त्रींस्त्रीन् द्वौ द्वावेकैकञ्च लभन्ते । विट्वैश्यादिषु जाता यथाक्रमं द्वौ द्वावेकमेकञ्च लभन्त इति । शूद्रस्य सवर्णा भार्येति भावान्न पुत्राणां सजातीयपुत्रभागः पूर्वोक्त एव । यद्यपि शूद्रापरिणयनेऽपि द्विजानेर्भूयानाक्षेपः पुत्रार्थविवाहस्तु सर्वथा शूद्रायां निषिद्ध एव । तथा च मनुविष्णू । हीनजातिं स्त्रियं मोहादुद्वहन्तो द्विजातयः । कुलान्येव नयन्त्याशु ससन्तानानि शूद्रताम् । शूद्रावेदी पतत्यत्रेरुतथ्यतनयस्य च । शौनकस्य सुतोत्पत्त्या तदपत्यतया भृगोः । तदपत्यतया शूद्रामात्रजनितापत्यवत्तया ब्राह्मणस्य तु क्षत्रविट्पेक्षयाप्यधिकदोषतामाहतुस्तत्परिणयेनापि ॥ शूद्रांशयनमारोप्य ब्राह्मणो यात्यधोगतिम् । जनयित्वा सुतं तस्यां ब्राह्मण्यादेव हीयत इति । योगीश्वरोऽपि । यदुच्यते द्विजातीनां शूद्राद्दारोपसंग्रहः । नैतन्मम मतं यस्मात्तत्रात्मा जायते स्वयमिति । तेन विप्रादिजातशूद्रापुत्राभावात्कथं तस्यांशाभिधानमिति प्रतिभाति । तथापि रतिधर्मार्थविवाहयोरनुकल्पत्वेन परिणीतायां शूद्रायामनुषङ्गाज्जातस्य विभागाभिधानमुपपन्नमेव । शूद्रायां जातो निषादोऽयः पारशवेति जातिकथनमिव । आचारमिताक्षरयामेवव्यवस्थापितम् । अत एव मनुना । कामतस्तु प्रवृत्तानामिमाः स्युः क्रमशोऽवरा इति कामत इत्यवरा इति । एवं दत्ता सवर्णापरिणयनमेव मुख्यमित्युक्तं । शङ्खलिखिताभ्यामपि । भार्याः कार्याः सजातीयाः सर्वेषां श्रेयस्यः स्युरिति पूर्वः कल्पस्ततोऽनुकल्पश्चतस्रो ब्राह्मणस्यानुपूर्व्येण । तिस्रो राजन्यस्य । द्वे वैश्यस्य । एका शूद्रस्येति । आनुपूर्व्येणेत्युक्तेरुत्तरोत्तरजघन्यता सूचिता । यत्तु मनुना चातुर्वर्ण्यपुत्रविभागे प्रकारद्वयमुक्तं । [illegible]

हरेद्विप्रो द्वावंशौ क्षत्रियासुतः। वैश्याजोऽध्यर्द्धमेवांशमंशं शूद्रासुतो हरेत्। सर्वं वा रिक्थजातं तु दशधा परिकल्पयेत्। ध
र्म्यं विभागं कुर्वीत विधिनानेन धर्मवित्॥ चतुरोंऽशान्हरेद्विप्रस्त्रीनंशान्क्षत्रियासुतः। वैश्यापुत्रो हरेद्द्व्यंशमंशं शूद्रासुतो हरे
दिति। तच्चोत्तरप्रकाशे योगीश्वरसंवादी। तद्गुणवद्गुणवत्क्षत्रियादिपुत्रविषयतया व्यवस्थापनीयम्। अत एव ब्राह्मण
जातो राजन्यापुत्र एव यदि जन्मज्येष्ठो गुणवांश्च तदा ब्राह्मणीपुत्रसमांशभाक्। ब्राह्मणेन क्षत्रियेण च वैश्यायां जनितस्तु
क्षत्रियापुत्रसमांशभागित्याह बृहस्पतिः॥ विप्रात्क्षत्रियाजातो जन्मज्येष्ठो गुणान्वितः। भवेत्समांशो विप्रेण वैश्याजातस्त
थैव च। तथा बौधायनः। सवर्णापुत्रानन्तरापुत्रयोरनन्तरापुत्रश्चेद्गुणवान् ज्येष्ठांशं हरेत्। गुणवान्हि शेषाणां भर्ता भवती
ति। एतद्वचनेऽनन्तरोऽप्यसमानवर्णगुणवत्त्वज्येष्ठताप्रयुक्तोत्कृष्टपुत्रसमांशभाक्त्वोक्तेर्वैश्यजशूद्रापुत्रस्याप्येवंविधस्य वैश्यापु
त्रसमांशितादृष्टत्वा बृहस्पत्यनुक्तापि। ज्येष्ठांशं हरेदित्युत्कृष्टसमांशहरणमेवार्थो बृहस्पतिसंवादात् तत्समजातीयापेक्षया
धिकांशानौचित्याच्च। यदा तु शूद्रा एवैकः पुत्रो ब्राह्मणस्य। तदा स तद्धनतृतीयांशहारी भागद्वयं सपिण्डानां तदभावे सकुल्या
नां तेषामप्यभावे श्राद्धकर्त्तुः। यदाह देवलः। निषाद एकः पुत्रस्तु विप्रस्वस्य तृतीयभाक्। द्वौ सपिण्डः सकुल्यो वा स्वधादा
ताथवा हरेत्। ब्राह्मणाच्छूद्रायां जातो निषादः स एकश्चासौ पुत्रश्चेदित्यर्थः। क्षत्रियवैश्ययोस्तु शूद्र एवैकः पुत्रः सधनार्द्धं हरे
परमर्द्धमपुत्रधनग्रहणाधिकारिणस्तद्वत्क्रमेण गृह्णीयुः। तथा च विष्णुः। द्विजातीनां शूद्रस्त्वेकपुत्रोऽर्द्धहरोऽपुत्ररिक्थस्य
या गतिः साऽर्द्धस्य द्वितीयस्येति। द्विजातिपदेनात्र क्षत्रियवैश्यमात्रग्रहणम्। देवलेन ब्राह्मणे विशेषाभिधानात्। एकपु
त्र इति कर्मधारयः। इदमपि सद्वृत्तातिगुणवच्छूद्रापुत्रविषयम्। अन्यथा। यद्यपि स्यात्तु सत्पुत्र इत्यादिना। ब्राह्मणक्षत्रिय
विशामित्यादिना च वक्ष्यमाणमनुवचनेन विरोधापत्तेः। यद्यपि सामान्यत इयन्भागकॢप्तिरुक्ता। तथापि प्रतिग्रहप्राप्तभूमिव्य
तिरिक्तविषया क्षत्रियादिसुतानां तत्र भागप्रतिषेधात्। तथा च बृहस्पतिः। न प्रतिग्रहभूर्देया क्षत्रियादिसुताय वै। यद्यप्ये

यं पिता दद्यान्मृते विप्रात्सुतो हरेत्। अत्र प्रतिग्रहोपादानान्नीयादिप्राप्यायां भुव्येव तेषामविभागः स ज्ञायत इति सूचि
तम्। अत एव भूमिमात्रविषये शूद्रापुत्रस्य पृथक्कृत्ये धोदेवलेनोक्तः। शूद्र्यां द्विजातिभिर्जातो न भूमेर्भागमर्हति। सजातावाप्नु
यात्सर्वमिति धर्म्मो व्यवस्थित इति। यत्तु। ब्राह्मणक्षत्रियविशां शूद्रापुत्रो न रिक्थभाक्। यदेवास्य पिता दद्यात्तदेवास्य धनं स्मृत
मिति मनुवचनम्। तत्पितृप्रीतिदत्तधनसद्भावविषयमिति दाक्षिणात्याः। निर्गुणापरिणीतशूद्रापुत्रविषयमिति तु पौरस्त्यास्त
न्मन्दम्। यदेवास्येत्यादिवाक्यशेषोपात्तव्यवस्थामपहायानुपात्तसगुणनिर्गुणव्यवस्थायाः कल्पयितुमनर्हत्वात्। अपरिणी
तशूद्रापुत्रभागस्य च दासप्रस्तावेऽभिधास्यमानत्वात्प्राच्यैव व्यवस्था सुस्था ॥ * ॥ मुख्यामुख्यपुत्राणां विभागव्यवस्थां वक्तुं तत्स्व
रूपं निरूप्यते। तत्र याज्ञवल्क्यः। औरसो धर्म्मपत्नीजस्तत्समः पुत्रिकासुतः। क्षेत्रजः क्षेत्रजातस्तु सगोत्रेणेतरेण वा। गृहे
प्रच्छन्न उत्पन्नो गूढजस्तु सुतः स्मृतः। कानीनः कन्यकाजातो मातामहसुतो मतः। अक्षतायां क्षतायां वा जातः पौनर्भवः सुतः।
दद्यान्माता पिता वा यं स पुत्रो दत्तकः स्मृतः। क्रीतश्च ताभ्यां विक्रीतः कृत्रिमः स्यात्स्वयंकृतः॥ दत्तात्मा तु स्वयं दत्तो गर्भे विन्नः सहो
ढजः। उत्सृष्टो गृह्यते यस्तु सोऽपविद्धो भवेत्सुतः। सवर्णा धर्म्मविवाहोढा धर्म्मपत्नी तस्यां जात औरसः पुत्र इति मिताक्षरा। अ
स्तु नस्तु नेदमेव बोद्धव्यं। अनुलोमजानां मूर्द्धावसिक्तादीनामौरसत्वाभावादिति स्ववचनविरोधात्। नहि ते सवर्णायामुत्प
न्ना ब्राह्मणादिषु येषां येन धर्म्म्यविवाहास्तदूढोत्पन्नानामनौरसत्वप्रसङ्गेन तु सत्स्वप्यन्येषां दायग्रहणप्रसङ्गाच्च। तस्मादुक्त
योऽभिप्रायं सवर्णायां च धर्म्मपत्नीजत्वमात्रं वाक्योपात्तक्षेत्रजादिव्यावर्त्तकं वक्तव्यं। अत एव मनुः। संस्कृतायां स्वभार्य्यायां स्वय
मुत्पादयेत्तु यम्। औरसं तं विजानीयात्पुत्रं प्रथमकल्पितम्। वसिष्ठोऽपि। द्वादशैव पुत्राः पुराणदृष्टाः स्वयमुत्पादितः स्वक्षेत्रे सं
स्कृतायामौरसः प्रथम इति। विष्णुरपि। अथ द्वादश पुत्रा भवन्ति स्वक्षेत्रे संस्कृतायामुत्पादितः स्वयमौरसः प्रथम इति। अत्र व
चनद्वयेऽपि स्वक्षेत्रे संस्कृतायामिति व्याख्यानव्याख्येयभावोऽन्यथा पौनरुक्त्यापत्तेः। देवलः। संस्कृतायां स्वभार्य्यायां स्वयमुत्पादि

निश्चयः । औरसो नाम पुत्रः स प्रथमः पितृवंशधृक् ॥ आपस्तम्बः । सवर्णापूर्वशास्त्रविहितायां यथर्तुगच्छतः पुत्रास्तेषां कर्माभि सम्बन्धःदायेनाव्यतिक्रमश्चोभयोर्मातापित्रोः । बौधायनः । सवर्णायां संस्कृतायां स्वयमुत्पादितमौरसं पुत्रं विद्यात् । अथाप्यु दाहरन्ति । अङ्गादङ्गात्सम्भवसि हृदयादभिजायसे । आत्मा वै पुत्रनामासि स जीव शरदः शतम् ॥ आधत्त पितरो गर्भं कु मारं पुष्करस्रजम् । यथेह पुरुषस्यात्मा तथा त्वमिह जायसे । आत्मा पुत्र इति प्रोक्तः पितुर्मातुरनुग्रहात् । पुन्नाम्नस्त्रायसे यस्मात्पुत्रस्तेनासि संज्ञित इति ॥ आपस्तम्बीयबौधायनीययोः सवर्णाग्रहणमुत्कर्षाभिप्रायकमेव । अतएवासवर्णास्वप्युत्पन्ना नामप्यौरसपुत्रत्वाद्वक्ष्यमाणविभागप्रकारस्ततः सङ्गच्छते । आपस्तम्बवचने सवर्णामपूर्वामिति रत्नाकरे धृतः पाठोऽपूर्वाऽ नपूर्वः पतिर्यस्याः सा वाग्दत्तापि यान भवतीत्यर्थ इति प्रकाशकार इति व्याख्यानञ्च । पारिजातेऽप्युक्तं । सवर्णा द्विजातस्य द्विजा । शूद्रस्य शूद्रा । न तु ब्राह्मणस्य ब्राह्मणी क्षत्रियस्य क्षत्रिया वैश्यस्य वैश्या । अन्यथा ब्राह्मणादिपरिणीतक्षत्रियादिपुत्राणां द्वाद शपुत्रान्तर्भावो न स्यादिति । पुत्रिकायाः सुतः पुत्रिकासुतः स तत्समः । यथाह वसिष्ठः । अभ्रातृकां प्रदास्यामि तुभ्यं कन्या मलंकृतां ॥ अस्यां यो जायते पुत्रः स मे पुत्रो भवेदिति । मनुरपि । अपुत्रोऽनेन विधिना सुतां कुर्वीत पुत्रिकाम् । यदपत्यं भवेद स्यां तन्मम स्यात्स्वधाकरम् ॥ अनेन तु विधानेन पुरा चक्रेऽथ पुत्रिकाम् । विवृद्ध्यर्थं स्ववंशस्य स्वयं दक्षः प्रजापतिः ॥ ददौ स दश धर्माय कश्यपाय त्रयोदश । सोमाय राज्ञे सत्कृत्य प्रीतात्मा सप्तविंशतिम् ॥ अत्र परिभाष्य दत्तायामुत्पन्नः पुत्रिकापुत्रो मातामह स्यैवेत्युक्तम् । अपरिभाषितदत्तायामपि सम्भवतीति भ्रातृमतीमिति विशेषणं तस्यां पुत्रिकाकरणशङ्कानिवृत्त्यर्थम् । अनेन चाप रिभाषितापि पुत्रिका भवतीत्याचार मिताक्षरायां निरूपितम् । अत एव गौतमोऽपि । पितोत्सृजेत्पुत्रिकामनपत्योऽस्मदर्थमपत्य मिति संवाद्य । अभिसन्धिमात्रात्पुत्रिकेत्येकेषामिति । ब्रह्मपुराणेऽपि । अपुत्रेणानुया कन्या मनसा पुत्रवत्कृता । राजभिः सर्वे ष्वपि समक्ष्यार्थं कुर्वीत ॥ प्राग्गर्भमथवा मुख्ये युक्तापि त्वाधरा यथा । मृते पितरि वा दत्ता सा विज्ञेया तु पुत्रिका ॥ पित्रा तु यस्य

सम्भागं लभेतेतादृशी सुतेति ॥ मनुः । मातुः प्रथमतः पिण्डं निर्वपेत्पुत्रिकासुतः । द्वितीयं तु पितुस्तस्यास्तृतीयं तु पितुः पितुरिति
। अथवा पुत्रिकाया सैव सुतः स्वपुत्रिकासुत इति पुत्रिकैव पुत्रस्थानीयेत्यर्थः । तस्यास्त्वौरसेऽजातत्वेपि कन्यात्वात्पुत्रसमत्वमिति
वयम् । पित्रवयवानामल्पत्वान्मात्रवयवानां वाऽल्पत्वादौरससमत्वमिति मिताक्षरा । यथाह वसिष्ठः । द्वितीयः पुत्रः पुत्रिकैवे
ति । द्व्यामुष्यायणस्तु । अपुत्रेणपरक्षेत्रे नियोगोत्पादितः सुतः । उभयोरप्यसावृक्थी पिण्डदाता च धर्मत इति । याज्ञवल्क्यो
ऽपि । सबीजिनो यत्रयोरसस्तथाप्यन्यक्षेत्रोत्पन्नत्वादौरसादपकृष्ट एव । अत एवौरसो धर्मपत्नीजस्तत्रौरसलक्षणान्तेनैवाभि
हितम् । अस्माभिरपि क्षेत्रजत्वानपायात्क्षेत्रजपुत्रमध्य एव व्याख्यास्यते । मनुरपि । क्रियाभ्युपगमात्क्षेत्रं बीजार्थे यत्प्रदीयते
। तस्येह भागिनौ दृष्टौ बीजी क्षेत्रिक एव च ॥ यथा लोके क्रियाकर्षणाख्या तदभ्युपगमात् । एकस्य वा पार्थिवी जग्धं व्रीह्यादिना
स्वक्षेत्रमस्ति अपरस्य रक्षेत्रं नास्ति बीजमस्ति । तत्र तौ मदीयं बीजं त्वदीयं क्षेत्रं तत्र तदावापेन कृषिं कुर्वः तत्रोत्पन्नं फलमावयो
रस्त्वित्यभ्युपगमं सम्विदं यदि कुरुतस्तथा सति द्वावपि तत्फलभागिनौ दृष्टौ । तथा द्व्यामुष्यायणस्थलेप्यत्रोत्पन्नमावयोरस्त्वि
ति संविदा यद्येकस्य क्षेत्रेऽपरः स्वबीजमावपति तदुत्पन्नमपत्यमुभयोर्भवतीति तस्य क्षेत्रजस्य द्विपितृकत्वेन द्व्यामुष्यायणसं
ज्ञा । अत एव याज्ञवल्क्येन नियोगोत्पादित इत्युक्तं गुरुनियुक्तस्यैव देवरसपिण्डादेर्भ्रात्रादिभार्यायां घृताभ्यङ्गादिविधिना पुत्रो
त्पादनमितरथा प्रत्यवायश्चोभयोरित्युक्तं भवति । तथा च मनुः । अपुत्रां गुर्वनुज्ञातो देवरः पुत्रकाम्यया । सपिण्डो वा सगोत्रो वा
घृताभ्यक्त ऋतावियात् ॥ अनेन विधिना जातः क्षेत्रजोऽस्य भवेत्सुतः । यदा त्वनभिसन्धाय द्वयोरपत्यं परक्षेत्रे देवरादिना बीज
मुप्यते तदा क्षेत्रिण एव तदपत्यं । तदप्याह मनुः । फलं त्वनभिसन्धाय बीजिनां क्षेत्रिणां तथा । प्रत्यक्षं क्षेत्रिणामर्थो बीजाद्यो
निर्बलीयसीति । फलमपत्यं तदनभिसन्धाय यत्र परक्षेत्रे यदपत्यमुत्पाद्यते तत्क्षेत्रस्वामिन एव भवति । यथा लोके परक्षेत्रे व्री
ह्यादिबीजं क्षेत्रस्वामिना सह संविदमकृत्वैव यद्वायुरुदपरकायेऽन्यदीयेन दुर्दैवादिवीर्यमावपति तदुभयथापि क्षेत्रस्वामि

नएवतदुत्पन्नेफलंस्वाम्यंदृश्यतइतिप्रत्यक्षमित्यस्यार्थः। तत्रहेतुर्बीजाद्योनिर्बलीयसीति। गवाश्वादौतथादर्शनादितिभा
वः। तथाचाभिसन्धेरसत्त्वेक्षेत्रजस्यबीजिस्वाम्येनद्व्यामुष्यायणत्वंक्षेत्रस्वामिस्वाम्यन्तुक्षेत्रजत्वेभयत्रापीतिफलितोर्थः। अत
एवयद्यपियाज्ञवल्क्येनापुत्रेत्यादिवचनेबीजाभिसंधिर्नोपात्तस्तथापिमन्वाद्येकमूलकतयानुसन्धेयः। अतएवक्षेत्रजःक्षेत्र
ज्ञातस्तुसगोत्रेणेतरेणवेत्यनभिसन्धिसाधारणंक्षेत्रजलक्षणमुक्तमन्यथापौनरुक्त्यापत्तेः। सगोत्रेणदेवरसपिण्डादिना।
इतरेणासगोत्रेणेत्यनुकल्पः। मनुनासपिण्डोवासगोत्रोवेत्यभिधानात्। नियोगश्चवाग्दत्ताविषयएवेत्याचार्य्याः। यस्याम्रि
येतकन्यायावाचासत्येकृतेपतिः। तामनेनविधानेननिजोविन्देतदेवरइति। मनुनातत्रैवनियोगविधिनापुत्रोत्पादनस्यनि
यमितत्वात्। विधवानियोगस्यप्रत्युतप्रतिषिद्धत्वाच्च। तथाहि। देवराद्वासपिण्डाद्वास्त्रियासम्यङ्नियुक्तया। प्रजेप्सिताधि
गन्तव्यासन्तानस्यपरिक्षये। विधवायांनियुक्तस्तुघृताक्तोवाग्यतोनिशि। एकमुत्पादयेत्पुत्रंनद्वितीयंकथञ्चनेत्यादिविध
वानियोगमुपन्यस्यनिषेधयतिस्वयमेवमनुः। नान्यस्मिन्विधवानारीनियोक्तव्याद्विजातिभिः। अन्यस्मिन्हिनियुञ्जानाध
र्म्मंहन्युःसनातनम्॥ नोद्वाहिकेषुमन्त्रेषुनियोगःकीर्त्यतेक्वचित्। नविवाहविधावुक्तंविधवावेदनम्पुनः॥ अयंद्विजै
र्हिविद्वद्भिःपशुधर्म्मोविगर्हितः। मनुष्याणामपिप्रोक्तोवेणेराज्यंप्रशासति॥ समहीमखिलाम्भुञ्जन्राजर्षिप्रवरःपुरा।
वर्णानांसङ्करञ्चक्रेकामोपहतचेतनः॥ ततःप्रभृतियोमोहात्प्रमीतपतिकांस्त्रियम्। नियोजयत्यपत्यार्थन्तंविगर्हन्तिसाधव
इति। अत्रवाग्दत्ताशब्देनतुभ्यमहंसम्प्रददइत्यादिसङ्कल्पवाक्येनकन्यादानादत्तागृह्यते। विधवाशब्देनतुसप्तपदोपर्य्य
न्तविवाहोढापश्चान्मृतपत्निका। ननुविवाहात्प्रागनियतकालप्रतिश्रवस्वरूपवाग्दानदत्तायाः। अव्यङ्गेऽपतितेऽक्लीवेद
शदोषविवर्जिते। इमांकन्यांप्रदास्यामिदेवाग्निगुरुसंनिधावितिवाक्येनप्रतिज्ञायते। अतएवपतिरितिमनुनोक्तम्। प्रा
गपिप्रतिश्रवणस्यविवाहप्रयोगबहिर्भावेनप्रतिश्रावयस्यपतित्वाग्निगुरुसन्निधावितिवाक्येनप्रतिज्ञायते। यद्यपिसङ्कल्पिता

थाऽपि न सपतिशोनः। भार्य्यात्ववत्पतित्वस्याप्यलौकिकसंस्कारात्मकत्वेन विवाहभावनाभाव्यत्वात्तस्यागनुपपत्तेः। नच
पि प्रयोगोपक्रमे तत्फलीभूततद्व्यवहारसम्भवः। यजमाने स्थितः प्रागप्याहवनीयव्यवहारवत्। प्रतिश्रवणमात्रेणुनतदुप
क्रमोऽपीति सर्वथा पतित्वव्यपदेशोऽनुपपन्नः। अत एव प्रतीच्योदीच्यादीनां विवाहादर्वाक् प्राक्कालेवाग्दानायास्तदुद्देश्ये मृ
तेऽपि पुनरविगीतशिष्टैरन्येन सह विवाहः क्रियते। अन्यथा कलौ नियोगविधेरपि निषिद्धतया पुनरक्षतादिविवाहस्य दुराषा
स्ततया सदाचार एव स्यात्। तथा चायमर्थः। वाचा सत्ये कृते तेन कल्पवाक्येन दाने चैतेरनियमः पतिः पतित्वमाथक विवाहभा
वनाविषयीभूतः पुरुषो म्रियेतेति। नच विहितप्रतिषिद्धत्वाद्विकल्प एव विधवानियोगस्यास्त्विति वाच्यम्। वस्तुनि विकल्पासं
भवात्॥ नहि विधवायां नियोगात्प्रवृत्तस्य प्रत्यवायो भवति न भवति चेति सम्भवति। नियोगविधेर्य्यस्या म्रियेतेत्यादिवचनेन वा
ग्दत्ताविषयत्वे नियमिते विधवाविषये प्रवृत्त्यभावात् नियोगस्यापि वृत्त्याश्चिन्दा श्रवणात् स्त्रीधर्म्मेषु व्यभिचारस्य च [illegible] नन्वत्र
अवचनात्संयमस्यापि प्रशंसनाच्चतुस्त्ववस्यापि विधिप्रतिषेधयोरभावात्। तथा च मनुरेव। काममनुक्षपयेद्देहं पुष्पमूलफलैः
शुभैः। न तु नामापि गृह्णीयात्पत्यौ प्रेते परस्य तु। आसीतामरणात्क्षान्ता नियता ब्रह्म
चारिणी॥ यो धर्म एकपत्नीनां काङ्क्षन्ती तमनुत्तमम्। अनेकानि सहस्राणि कुमारब्रह्मचारिणाम्। दिवं गतानि विप्राणाम
कृत्वा कुलसन्ततिम्। मृते भर्त्तरि साध्वी स्त्री ब्रह्मचर्य्ये व्यवस्थिता। स्वर्गं गच्छत्यपुत्रापि यथा ते ब्रह्मचारिणः॥ अपत्यलोभाद्या
तु स्त्री भर्त्तारमतिवर्त्तते। सेह निन्दामवाप्नोति पतिलोकाच्च हीयत इति। पुत्रार्थमपि पुरुषान्तराश्रयणं निन्दातिशयपुरस्सरम्प्र
तिषिद्धवान्। पश्चात्स्वयमेव यस्या म्रियेतेत्यनेन वाग्दत्ताविषयनियोगस्य धर्म्मं विमुक्तवान्। अनेन विधानेन नित्युक्त्वाऽन्यथा। प्र
य्याविद्ध्यधिगच्छेनां शुक्लवस्त्रां शुचिव्रताम्। मिथो भजेता प्रसवात्सकृत्सकृदृतावृताविति विधानमपि दर्शितवान्। [illegible]
दिः पूर्वोक्तः स्मृत्यन्तरोक्तश्च यो विधिः सोऽप्यनेनेति सर्वेनाऽन्यपरामृश्यते। देवरश्च सपिण्डादेरुपलक्षणं। [illegible]

म्। पतिपदं वाचास्यइतिचव्याख्यातमेव। यस्मैवादद्यात्सप्रतिग्रहसमस्तरेवोवतस्याः पौनर्भवस्यादेवास्ययत्तुद्विविधस्य [illegible]

प्यस्मादुक्तार्थाभिप्रायकतयैवनेयः। यथाश्रुतेदोषस्योक्तत्वात्। अनयोरवाग्रेतनोग्रन्थः। अयच्चविविधोयज्ञाभ्यङ्गादिनियमा

न्नियुक्तागमनाङ्गमेवेतिनदेवरस्वतस्याभ्भाख्यानमापद्यते। अन्तस्तदुत्पन्नमपत्यंक्षेत्रस्वामिनएवास्यानियमविदि। सम्वि

दि। सम्विदैवनूभयोरपीति। नारदः। क्षेत्रिकानुमतेबीजंयस्यक्षेत्रेप्रसिच्यते। तदपत्यंद्वयोरेवबीजिक्षेत्रिकयोर्मतम्

शङ्खलिखितौ। मन्त्रसंस्कारकर्तुरपत्यमित्याङ्गिरसोबीजिक्षेत्रिकयोरनुमतेयद्बीजमुत्पाद्यतेतत्द्विधासत्यमित्युशना।

कात्यायनः। क्षेत्रिकस्यमतेनापिफलमुत्पादयेत्तुयः। तस्येहभागिनौतौतुनफलंद्विविनेकतः। हारीतः। जीवतिक्षेत्रजमप

रस्मात्तस्मान्मृतेद्व्यामुष्यायणमनुत्पन्नबीजत्वात्। नाबीजंक्षेत्रंफलति। नाक्षेत्रमबीजंजायतेहृत्युभयदर्शनादुभयोरपत्यमित्यपरे

। तेषामुत्पादयितुःप्रथमःप्रवरोभवति। द्वौपिण्डौनिर्वपेद्वाद्युरेकस्मिन्पिण्डेवाद्वावनुकीर्तयेत्। द्वितीयेपुरुषेतृतीयेवेत्रोपि-

नश्चत्वीन्वाचक्षाणाश्चासप्तमादित्येके। जीवतिक्षेत्रपतौतस्यैवक्षेत्रजम्मुख्यमाहुः। अत्रहेतुरस्यावश्यवाच्चित्त्वयाद्यर्थः। मृतेतु

क्षेत्रपतौ। अपुत्रायायनंभर्तुरित्यादिवक्ष्यमाणमनुवचनादस्मातन्त्रमविशिष्टंयत्तुपितयापिनक्षेत्रिणएवमतहेतुरनुत्पन्नबी-

जत्वात्क्षेत्रिणोबीजिनम्प्रत्यनुमत्यवश्यम्भावादित्यर्थः। तथोपपादकताबीजमित्यादिनिर्वापेनिरूप्यतेस्मिन्निति निर्वापःपि

ण्डपितृयज्ञस्तत्रद्व्यामुष्यायणाःपितृद्वयायद्वौपिण्डौपृथग्दद्युः। एकपिण्डेवाद्वौपितरावनुकीर्तयेत्। एवमेकस्मिन्द्वावि

तिवीप्सावोध्या। यदिद्विपितास्यादेकैकस्मिन्पिण्डेद्वौद्वावुपलक्षयेदित्यापस्तम्बस्मरणात्। तयाश्चामपिद्विपित्रादिनिमानः।

द्वितीयइत्यादि। द्वितीयन्तृतीयंचारभ्येत्यर्थः। तेपिनश्च्यौनित्यादि। तन्कीर्तनेपिद्वौद्वावनुकीर्तयेदित्यर्थः। नारदोपि।

द्व्यामुष्यायणकादद्युर्द्वाभ्यामपिण्डोदकेपृथक्। षट्कादद्वौषमादद्युर्बीजिक्षेत्रिकयोस्तथा। षट्कादद्वौषमितियथोर्विभागे

पलक्षणम्। बौधायनः। अथाप्युदाहरन्ति। द्विपितुःपिण्डदानंस्यात्पिण्डेपिण्डेचनामनी। त्रयश्चपिण्डाःषण्णांस्युरेवंकुर्व

न्नदुद्यतीति। यस्तांपितृपितामहप्रपितामहानाम्। सएव। मृतस्यप्रसूतोयःक्लीबस्यव्याधितस्यवा। तेनानुमतस्यक्षेत्रे स्वे
यजःसचद्विपिताद्विगोत्रश्चद्वयोरपिस्वधाऋक्थभाग्भवति। मनुः। यस्तल्पजःप्रमीतस्यक्लीबस्यव्याधितस्यवा। स्वधर्म्मेणनि
युक्तायांसपुत्रःक्षेत्रजःस्मृतः॥ अत्रसर्वत्रजीवतिक्षेत्रिणिव्याध्यादिप्रतिरुद्धपुत्रोत्पादनेयथायोगंगुरूणाम्भर्तुरपिनियोगः
सम्बिद्ध॥ मृतेतुगुरूणामेव। तथाचक्षेत्रजोद्विविधोद्विपितृकःक्षेत्रिपितृकश्च। गृहेप्रच्छन्नउत्पन्नोजारात्सवर्णात्स्वर्णाअवि
ज्ञातत्वेननिर्णीतःक्षेत्रस्वामिनोगूढजोनामपुत्रः। मनुः। उत्पद्यतेगृहेयस्यनचज्ञायेतकस्यसः। सगृहेगूढउत्पन्नस्तस्यस्याद्यस्य
तल्पजः। नचेत्यादि। पुत्रविशेषजन्यत्वेनाज्ञानेपिसवर्णजारजन्यत्वेनज्ञानः। सजातीयेष्वयम्प्रोक्तस्तनयेषुमयाविधि
रितियोगीश्वरोक्तेस्तथाव्याख्यास्यते। कानीनःकन्यकायामपरिणीतायांसवर्णाज्जातःमातामहस्यपुत्रोयस्यसाकन्यातस्यैवपुत्रइ
त्यर्थः। परिणीतायान्तुजातोवोढुरेवगूढजः। यथाहमनुः। पितृवेश्मनिकन्यातुयम्पुत्रञ्जनयेद्रहः। तंकानीनम्वदेन्ना
म्नावोढुःकन्यासमुद्भवमिति। एतैर्वाक्यैरपरिणीतायाम्पितृगृहावस्थितायांसवर्णजारजःकानीनस्सचमातामहसुतइत्युक्त
न्नाद्विरुद्धम्ब्रह्मपुराणीयङ्कल्पतरुलिखितंवाक्यम्। अदत्तायान्तुयोजातःसवर्णेनपितुर्गृहे। सकानीनःसुतस्तस्ययस्मैसा
दीयतेपुनः॥ नारदवाक्यमपितत्रैव। कानीनश्चसहोढश्चगूढायांयश्चजायते। तेषांवोढापिताज्ञेयस्तेचभागहराःस्मृताइ
ति। अत्रादत्तायांसवर्णात्पितुर्गृहेजातस्यकानीनत्वमविरुद्धम्। यस्मैसापुनर्दीयतेतस्यासौसुतइतितुविरुद्धंनारद
वचनेपिगूढोत्पन्नसहोढकानीनस्यापिवोढैवपितेतिप्रतिपादितम्। मनुनापिवोढुरित्युक्तंनमातामहस्येति। यानुमिताक्षरा
कृतायद्यनूढायामुत्पन्नस्तर्हिमातामहस्युतोप्यूढायान्तत्सवोढुरेवेतिव्यवस्थाकृता। सापिमनसिनचमत्कारमादधाति। वयं
सतिहिकन्याशब्दवाच्यायामपरिणीतायामजातत्वात्तस्यकानीनत्वन्दुर्वचम्। नचकन्याशब्दःअपत्यमात्रपरोविशेषणवैयर्थ्यात्
। गूढजादीनामपितत्रोत्पन्नत्वेनाव्यावर्त्तकत्वात्। सर्वाह्निकस्यचित्कन्यैव। ब्रह्मपुराणवचनविरोधश्चदुष्परिहरश्च

न्यायमियुक्तत्वात् । अत एवमानवविरोधोऽपि दृष्टसमाधय एव । कल्पतरुकारेणापि परस्परविरुद्धवचनानि लिखितवता हृदयस्थ-
न्यवस्थावस्थानभिधानाद्विरोध एव न प्रतिसंहितः । तेन हि मातामहस्यैव तत्त्वं कानीनस्य बोधयन्ति बहूनि वचनान्युपन्यस्य तद्विरु-
द्धे ब्रह्मपुराणनारदवचने तदनुपदमेव विलिखिते । मत्स्यवसिष्ठस्य वचः । कानीनः पञ्चमः या पितृगृहेऽसंस्कृता कामादुत्पाद-
येत्स कानीनो मातामहस्य पुत्रो भवतीत्याह । अथाप्युदाहरन्ति । अपुत्रा दुहिता यस्य पुत्रं विन्देत तत्सुतः । पौत्री मातामहस्ते-
न दद्यात्पिण्डं हरेद्धनमिति । नारदस्यैवं । अज्ञातपितृको यस्तु कानीनोऽमूढमातृकः । मातामहस्य दद्यात्स पिण्डं रिक्थं हरेत सः
। बौधायनस्यापि । असंस्कृतामनतिसृष्टां यामुपगच्छेत्तस्यां यो जातः स कानीन इति । अत्र प्रतिविद्ध्मः । मातामहसुत-
त्वं कानीनस्य प्रतिपादयतां वचनानां सर्वथा यानदत्तानस्यां सवर्णाज्जातविषयत्वम् । वोढुसुतत्वं प्रतिपादयतां तु सङ्कल्पितायाम-
प्तपदीपर्य्यन्तं विवाहभावनाभाव्यभार्य्यात्वमप्राप्तायां यः सवर्णादुत्पन्नस्तद्विषयत्वम् । अदत्तायामिति नारदवचने बौधायनव-
चने चानतिसृष्टामिति यदाभ्याममप्राप्तविवाहभावनोच्यते न तु सर्वथा दत्तायुक्तत्वैतत् । सङ्कल्पेन पितृस्वत्वापगमपरिणेतृस्व-
त्वोत्पत्त्युपक्रमात् । पितुः सर्वथा स्वत्वापगमाभावाच्च कानीनत्वव्यपदेशः स्वपरिणेतृस्वत्वोपक्रमेणातदीयत्वस्य च सम्भवात् । पू-
र्णे पितृस्वत्वे तु तदुत्पन्नस्य मातामहसुतत्वोपपत्तेः । मनुवचनस्याप्ययमर्थः । या सङ्कल्पिताऽसमाप्तविवाहभावनाऽनष्ट-
वकन्यापरिणेतृभार्य्यात्वस्यानिष्पत्तेः । तादृशकन्यासमुद्भवं कानीननामानं वोढुर्यैन विवाह्यते तस्य वदेदिति । अत एव
पितृवेश्मनीत्यपि सङ्गतमनुवादनया । विवाहानन्तरमेव भर्तृगृहप्रवेशात् । मिताक्षरायमस्याप्ययमर्थः । अनूढायां वोढु-
मनुपक्रान्तायाम् । ऊढायां वोढुमुपक्रान्तायामिति । आदिकर्मणि क्तः । न तु भूते । समाप्तविवाहभावनायां तु सवर्णाज्जारजा-
तो गूढजः । अत एव गृहे प्रच्छन्न उत्पन्नो भर्तृगृहे तेनाज्ञातोऽज्ञात इत्युक्तम् । पुनर्भूर्द्विविधा । विवाहमात्रेणाक्षताप्यन्येन परि-
णीयमानैका । अन्या तु विवाहात्प्रागेव पुरुषसम्भोगदूषिता । तस्याञ्जातः पौनर्भवः । अत एवाक्षतायां क्षतायां वा जात इत्यु-

क्रमम् । मनुः । यानुपत्यापरित्यक्ताविधवावास्वयेच्छया । उत्पादयेत्पुनर्भूत्वासपौनर्भवउच्यते । कात्यायनः । क्लीवंविहाय
पतितंयापुनर्लभतेपतिम् । तस्यांपौनर्भवोजातोव्यक्तमुत्पादकस्यसः । वसिष्ठविष्णू । पौनर्भवश्चतुर्थइति । चतुर्थत्वञ्च
दत्तकापेक्षया । माताभर्त्राज्ञयापितावायमन्यस्मैदद्यात्समस्यदत्तकःपुत्रः । तथाचमनुः । मातापितावादद्यातांयम
द्भिःपुत्रमापदि । सदृशम्प्रीतिसंयुक्तंसज्ञेयोदत्त्रिमःसुतः ॥ आपदीत्युक्तेरनापदिदातुःप्रत्यवायः । मातापितरौप्रत्येकं
मिलितौवा । अद्भिरितिदानप्रतिग्रहप्रकारोपलक्षणम् । सदृशंसवर्णम् । प्रीतिसंयुक्तमितिक्रियाविशेषणम् । एकःपुत्र
स्तुनदेयोनप्रतिग्राह्यः । तथाचवसिष्ठः । शुक्रशोणितसम्भवःपुरुषोमातापितृनिमित्तकस्तस्यप्रदानविक्रयपरित्यागेषु
मातापितरौप्रभवतः । नत्वेकम्पुत्रन्दद्यात्प्रतिगृह्णीयाद्वा । सहिसन्तानायपूर्वेषाम्नतुस्त्रीपुत्रन्दद्यात्प्रतिगृह्णीयाद्वान्यत्रानु
ज्ञानाद्भर्तुरिति । अत्रभर्त्रनुज्ञाविधवायाःपुत्रप्रतिग्रहनिषेधाद्दत्तानुज्ञेभर्त्तरिमृतेविधवयाक्रतःपुत्रोदत्तकोनभवती
त्याकरस्तन्न । अपुत्रस्यगत्यभावात्पुत्रकरणस्यावश्यकत्वेनवशात्स्वाम्यनुमतस्मृतेःतद्भर्त्रनुज्ञावाप्रत्यक्षतः । नचैवमनुज्ञामात्र
स्यचेतिव्यर्थम् । ब्रह्मचर्याभावाच्छास्त्रीयानुमतेःसर्वत्रावश्यकत्वादितिवाच्यम् । मुमुक्षोःपत्यन्तरेपुत्रवतोवानुज्ञायाअसम्भ
वाद्वाच्यायांयदिस्वपुत्रार्थमेतत्प्रतिषेधस्य । सर्वासामेकपत्नीनामेकाचेत्पुत्रिणीभवेत् । सर्वास्तास्तेनपुत्रेणप्राहपुत्रवतीर्म
नुरिति । पुत्रकार्य्यश्राद्धादेःसपत्नीपुत्रेणसिद्धेर्भर्त्रनुज्ञाविमानाद्दृश्याःपुत्रोनकार्य्यः । उभयोरपिमतकार्य्यस्यतेननि
ष्पत्तेः । भर्तुर्हिसऔरसःसएवमुख्यःतस्याऽपिदत्तकवद्गौणाइतिवादृश्यमर्थमनुमतिमन्तरेणोवरीसम्प्रतिग्राह्यइतितात्पर्य्यार्थो
। वस्तुतस्तुभ्रातॄणामेकजातानामेकश्चेत्पुत्रवान्भवेत् । सर्वास्तांस्तेनपुत्रेणपुत्रिणोमनुरब्रवीदितिवचनवदेवस्यापिभ्रातृपु
त्रस्यगौणादत्तकपुत्रत्वादिसम्भवेऽन्यःपुत्रप्रतिनिधिर्नकार्य्यइत्यर्थकतयामिताक्षरस्मृतिचन्द्रिकादौव्याख्यातत्वाद्भर्तुरिज्ञी
वतिभार्य्यायास्तान्यैवात्तद्दत्तमनुमतोऽप्यनुज्ञीकरणीयइतिमनुस्मृ[illegible] । [illegible]

मु तस्मिन्पारतन्त्र्यन्तदनुमतिरेवापेक्षिता । एवं सति दृष्टार्थता भवति प्रतिषेधस्य । तस्मादद्भार्यानुज्ञेमृतेपि भर्तुरिभार्य्यायाद नकादिकरणमविरुद्धम् । मनुवचनद्वयस्य पूर्वोक्तार्थकत्वेऽनुपपत्तिरपि मितात्क्षरादावेवोक्ता । यदपुत्ररिक्थग्रहणाधिकारिक्रमपरे पत्नीदुहितरश्चैवापुत्रः स्त्रीधनमित्यत्र च भ्रातृपुत्रसपत्नीपुत्रयोः पत्न्यादिभर्त्राद्यभावेऽधिकारप्रतिपादनमविरोधाय मेरिति । तच्चतत्रैव प्रपञ्चयिष्यते । अनेकपुत्रसद्भावेपि ज्येष्ठः पुत्रो न देयः । ज्येष्ठेन जातमात्रेण पुत्री भवति मानवइति पुत्रकार्यकरत्वेनतस्यैव मुख्यत्वाभिधानात् । क्रीतस्वयंदत्तकृत्रिमेष्वपि समानन्यायत्वादेकपुत्रज्येष्ठपुत्रयोर्निषेधः । अत एव बह्वृचब्राह्मणे हरिश्चन्द्रोपाख्याने क्रीतेपि ज्येष्ठपुत्रप्रतिषेधलिंगदर्शनं स ज्येष्ठपुत्रं निगृह्णीत न कनीयांसमुत माता तच्च वाचेति । पुत्रप्रतिग्रहप्रकारश्च । पुत्रम्प्रतिग्रहीष्यन्बन्धूनाहूय राजनिचावेद्य निवेशनस्य मध्ये व्याहृतिभिर्हुत्वाऽदूरबान्धवं बन्धुसन्निकृष्ट एव प्रतिगृह्णीयादिति वसिष्ठोक्तः । अदूरबान्धवमित्यत्र देशभाषाविप्रकृष्टस्य प्रतिषेधः । एवं क्रीतादिष्वपि । समानन्यायत्वात् । कश्यपस्तोत्वदूरबान्धवमसन्निकृष्टमेवेति पाठं लिखित्वाऽदूरबान्धवं सन्निहितमातुलादिकम् । असंनिकृष्टमेव । अविज्ञातगुणदोषमपि । अयमर्थ एव रत्नाकर इति व्याख्यातम् । सन्देहे चोत्पन्ने दूरेबान्धवे शूद्रमिव स्थापयेद्धि ज्ञायते ह्येकेन च बहूंस्त्रायत इति मिताक्षरायां वसिष्ठवचनमधिकं लिखित्वैवं विवृतम् । सन्देहे वान्धवानामसन्निधानाज्जातिसन्देह उत्पन्ने शूद्रमिव संस्कारहीनमेव स्थापयेत् । शूद्रोपि हि कृतपुत्रो भवतीत्यभिप्राय इति । क्रीतस्तु पुत्रस्ताभ्यां विक्रीत इति । ताभ्यां मातापितृभ्यां मात्रा भर्त्रनुज्ञया पित्रा वा मूल्यग्रहपरस्य दत्तः । एकपुत्रः ज्येष्ठपुत्रं वर्ज्जयित्वाऽऽपद्येव । सजातीयेष्वित्युपसंहारात्सवर्ण एव । यत्तु मनुनोक्तम् । क्रीणीयाद्यस्त्वपत्यार्थं मातापित्रोर्यमन्तिकात् । स क्रीतकः सुतस्तस्य सदृशोऽसदृशोपि वेति । तदुणैः सदृशोऽसदृशो वेति व्याख्येयमनुजात्याऽसदृश इति सजातीयेष्वित्यनेन विरोधापत्तेः । बौधायनोपि । मातापित्रोर्हस्तात्क्रीतोऽन्यतरस्य वा योपत्यार्थं गृह्यते स क्रीतक इति । कृत्रिमस्तु पुत्रार्थिना स्वयं धनक्षेत्रादिप्रदर्शनादिना प्रलोभ्य त्वम्मे पुत्रो भवेति यः सवर्णः पुत्रीकृतः स उच्यते ।

मातापितृविहीनश्चेत् । तत्सद्भावे तत्परतन्त्रतया तेन पुत्रीभवितुमशक्यत्वात् । मनुविष्णू अपि । सदृशं यम्प्रकुर्य्यात्तं गुणदो
षविचक्षणम् । पुत्रं पुत्रगुणैर्युक्तं स विज्ञेयस्तु कृत्रिम इति ॥ सदृशं सवर्णम् । प्रकुर्य्यात्तां मातापितरौ मिलितौ प्रत्येकम्वा । द
त्मानुस्वयन्दत्तः स्वयमेव स्वात्मानमन्यस्मै दत्तवांस्तवाहम्पुत्रो भवामीति स्वयमुपगतो मातापितृविहीनस्ताभ्यान्त्यक्तो वा स्ववर्णे
पतितः स उच्यते । तथा च मनुः । मातापितृविहीनो यस्त्यक्तो वा स्यादकारणात् । आत्मानं स्पर्शयेद्यस्मै स्वयन्दत्तस्तु स स्मृत इति
अकारणात्पातित्यादिकारणमन्तरेणैव दुर्भिक्षादौ पोषणाद्यसामर्थ्यादिना मातापितृभ्यान्त्यक्तः स्वतन्त्र इत्यर्थः । यस्तु गर्भस्थि
तोऽपरिणीतावस्थायां सवर्णाज्जाराज्जातो गर्भिण्यास्तस्याम्परिणीयमानायां विन्नः प्राप्तः । विदॢ लाभ इत्यस्य निष्ठान्तं रूपम् ।
नुदविदेत्यादिसूत्रेण निष्ठासम्बन्धितकारस्य नकारः । स सहोढज उच्यते । स वोढुः पुत्रः । तथा च मनुः । या गर्भिणी सं-
स्क्रियते ज्ञाताऽज्ञातापि वा सती । वोढुः स गर्भो भवति सहोढ इति चोच्यते ॥ विष्णुरपि । सहोढः सप्तमः । गर्भिणी या संस्क्रियते
तस्याः पुत्रः स तु पाणिग्राहस्येति । सप्तम इति तदीयपाठक्रमापेक्षया । उत्सृष्टो मातापितृभ्यान्त्यक्तो यो ह्यन्तेपुत्रार्थिना सोऽपवि
द्धो नाम यद्धीतुः पुत्रः । एतावपि सवर्णावेव । तथा विष्णुरपि । अपविद्धस्त्वेकादशः पित्रा मात्रा च परित्यक्तः स येन गृहीतः । व
सिष्ठः । अपविद्धः पञ्चमो यं मातापितृभ्यामपास्तं गृह्णीयात् । एकादशत्वम्पञ्चमत्वं च तत्तत्पाठक्रमापेक्षया । यस्तु मनुना गौणपु
त्रमध्ये पारशवाख्यः शूद्रापुत्रः परिगणितः स योगीश्वरेण सजातीयेष्वयं प्रोक्तस्तनयेषु मया विधिरित्युक्तोपसंहारव्याजेन निय
मकरणात्स्वयङ्कथञ्चिदपि सजातीयत्वासम्भवान्नोक्तः । अत एव जातोऽपीत्यादिना ग्रन्थेन स उक्तः । द्विजातस्य शूद्रापुत्रस्या
न्याभावेऽपि पिण्डदत्वहरत्वाभावाच्च । तच्च वक्ष्यते । तथा च मनुः । यं ब्राह्मणस्तु शूद्रायां कामादुत्पादयेत्सुतम् । स पारयन्नेव
शवस्तस्मात्पारशवः स्मृत इति । बौधायनोऽपि । द्विजातिप्रवराच्छूद्रायां जातः कामात्पारशव इति । तत्रौरसादयो गौणाः पु
त्रा मुख्यस्त्वौरस एव । तथा च मनुः । क्षेत्रजादीन्सुतानेतानेकादश यथोदितान् । पुत्रप्रतिनिधीनाहुः क्रियालोपान्मनीषि

णः ॥ क्रियालोपात्परिणयादिक्रियालोपादिक्रियालोपादितिप्रतिनिधित्वेहेतुः। स्मृतिचन्द्रिकायान्तु । औरसाभावेतत्क
र्तृकश्राद्धादिक्रियालोपाद्बिभ्यतोमनीषिणश्चतुर्दशयएकादशपुत्रप्रतिनिधीकर्त्तव्येनाङ्गरितिव्याख्यातम्। बृहस्पतिः ॥ पुत्रास्त्र
योदशप्रोक्तामनुनायेऽनुपूर्वशः। सन्तानकारणन्तेषामौरसःपुत्रिकादश ॥ पुत्रप्रतिनिधीकर्त्तव्येनाङ्गरितिव्याख्यानम्। बृ
हस्पतिः। आज्यंविनायथातैलंसद्भिःप्रतिनिधिःस्मृतः। तथैकादशपुत्रास्तुपुत्रिकौरसयोर्विना। ब्रह्मपुराणे। दत्तकःस्वय
न्दत्तःकृत्रिमःक्रीतएवच। अपविद्धश्चयेपुत्राभरणीयाःसदैवहि ॥ भिन्नगोत्राःपृथक्पिण्डाःपृथग्वंशकरास्तथा। सूतकेमृ
तकेवापित्र्यहाशौचस्यभागिनः। अपिवस्त्रान्नदातॄणांक्षेत्रवीजवतान्तथा। शूद्रोदासःपारशवोविप्राणांविद्यतेक्वचित्॥
शङ्कानुशापदग्धानान्नित्यंक्षयवतान्तथा। अथसंग्रामशीलानांकदाचिद्वाभवन्तिते। औरसोयदिवापुत्रस्त्वथवापुत्रिकासु
तः। नविद्यतेत्रतेषांविज्ञेयाःक्षेत्रजादयः। एकादशपृथग्भावावंशमात्रकरास्तुते। श्राद्धादिदानवत्सर्वंतेषांकुर्वन्तिनि
श्चयः। गूढोत्पन्नश्चकानीनःसहोढःक्षेत्रजस्तथा। पौनर्भवश्चवैश्यानांराजदण्डभयादपि। वर्जिताःपञ्चधनिनांशेषाःस
र्वेभवन्त्यपि। शूद्राणान्दासवृत्तीनाम्परपिण्डोपजीविनाम्। परायत्तशरीराणान्नकश्चित्पुत्रइष्यते। तस्माद्दासस्यदास्या
ञ्जायतेदासएवहीति। एवमेतेषांपुत्राणांस्वरूपन्निरूप्यतेषान्दायग्रहणन्निरूप्यते। तत्रयोगीश्वरः। पिण्डदोंशह
रश्चैषांपूर्वाभावेपरःपरः॥ परइतिवीप्सादर्शनात्पूर्वपूर्वाभावइत्यपिवीप्सावसेया। औरसपौत्रिकेयसमवायेप्येवमौरसे
सतिपुत्रिकासुतस्यदायग्रहणाभावेप्रसक्तेमनुरपवदति। पुत्रिकायांकृतायान्तुयदिपुत्रोऽनुजायते। समस्तत्रविभागःस्या
ज्ज्येष्ठतानास्तिहिस्त्रियाइति ॥ बृहस्पतिरपि। एकएवौरसःपित्र्येधनेस्वामीप्रकीर्त्तितः ॥ ननुत्वापुत्रिकाप्रोक्ताभर्त्तव्यास्त
परेसुताः। नचपुत्रिकायाएवप्रथमपुत्रेजातेपश्चादौरसोत्पत्तौपुत्रिकापुत्रस्यज्येष्ठत्वात्स्त्रीत्वाच्चज्येष्ठांशभागिताभवेदिति
युक्तम्। तस्यपौत्रत्वात्। तदाहमनुः। अकृतावाकृतावापियंविन्देत्सदृशात्सुतम्। पौत्रीमातामहस्तेनदद्यात्पिण्डंहरे

हृनमिति ॥ पुत्रिकाहि पुत्रस्तत्पुत्रो दौहित्रोऽपि पौत्रस्तद्वान्पौत्री भवति । पौत्रस्य च ज्येष्ठत्वेनांशातिरेको नैव श्रुतः । नच
यस्यां यो जायते पुत्रः स मे पुत्रो भवेदिति पुत्रिकापुत्रस्यापि पुत्रत्वाभिधानात्तद्विरोध इति वाच्यम् । मनुविरोधेन तस्य गौणत्वपरत्व
दातृत्वनिमित्तपुत्रत्वाभिप्रायकत्वात् । पुत्रिकायाः पुंस्त्वाभावाद्यथा गौणं पुत्रपदप्रतिपाद्यत्वं तथा तस्य जन्यपुत्रिकाजन्य
पुत्रस्यापि । पुंस्त्वे सत्यपि जन्यत्वाभावात् । जन्यपुंस्त्वस्यैव पुत्रपदशक्यत्वात् । तथान्येषामपि पुत्राणां पूर्वपूर्वसत्त्वे सर्वभा
गानर्हत्वमनेन प्रसक्तमपवदति । वसिष्ठः । तस्मिंश्चेत्प्रतिगृहीत औरस उत्पद्येत चतुर्थभागभागी स्याद्दत्तक इति । दत्तक
ग्रहणं क्रीतादीनामुपलक्षणम् पुत्रीकरणाविशेषात् । उत्पन्ने त्वौरसे पुत्रे चतुर्थांशहराः सुताः ॥ सवर्णा असवर्णास्तु ग्रासाच्छा
दनभाजनाइति कात्यायनवचनाच्च । सवर्णाः क्षेत्रजदत्तकादयस्ते सत्यौरसे चतुर्थांशहराः । असवर्णाः कानीनगूढोत्पन्नसहो
ढपौनर्भवास्ते तु सत्यौरसे न चतुर्थांशहरा अपि । किन्तु ग्रासाच्छादनमात्रभागिन इत्यर्थः कात्यायनवचनस्य । अत एव वि
ष्णुः । अप्रशस्तास्तु कानीनगूढोत्पन्नसहोढजाः । पौनर्भवश्च नैव ते पिण्डरिक्थांशभागिन इत्यौरसे सति कानीनादीनां चतु
र्थांशभागित्वं प्रतिषेधति । कानीनादीनामप्यौरसाद्यभावे त्वेव पितृधनग्रहणम् । पूर्वाभावे परः पर इति वचनात् ।
यच्च मनुवचनम् । एक एवौरसः पुत्रः पित्र्यस्य वसुनः प्रभुः । शेषाणामानृशंस्यार्थं प्रदद्यात्तु प्रजीवनमिति । तदपि कानी
नादीनामौरसप्रतिकूलत्वोत्पन्ननिर्गुणत्वे च चतुर्थांशादिनिषेधपरं कानीनादिपरञ्च । तेषां सत्यौरसे ग्रासाच्छादनमात्रभागित्व
स्योक्तत्वात्तदेकमूलकत्वकल्पनात् । क्षेत्रजस्य तु सत्यौरसे पञ्चमषष्ठांशौ मनुनैवोक्तौ । षष्ठं तु क्षेत्रजस्यांशं प्रदद्यात्पैतृकाद्धनात्
। औरसो विभजन्दायं पित्र्यं पञ्चममेव वेति । प्रतिकूलत्वनिर्गुणत्वसमवाये षष्ठमेकतरसद्भावे पञ्चममिति व्यवस्था । यस्तु समग्र
धनभोक्ता स्यादौरसोऽपि ज्येष्ठजः ॥ त्रिभागं क्षेत्रजो भुङ्क्ते चतुर्थांशं पुत्रिकासुत इत्यादिब्रह्मपुराणादिवचनैः समभागार्हतया
मन्वादिभिरुक्तस्य पुत्रिकापुत्रस्य चतुर्थांश उक्तः पञ्चमषष्ठांशार्हतयोक्तस्य क्षेत्रजस्य तृतीयांशस्योक्तः सपुत्रिकापुत्रस्याप्यन्तानि

गुणाल्वेसवर्णत्वेच । क्षेत्रजस्यचात्यन्तसगुणत्वानुकूल्ययोर्व्यवस्थापनीयः औरसाभावेदत्तकस्याखिलधनग्रहणार्थपृथगारथ
म्मनुना । उपपन्नोगुणैःसर्वैःपुत्रोयस्यतुदत्रिमः । सहरेतैवतद्रिक्थंसम्प्राप्नोप्यन्यगोत्रतः ॥ स्वगोत्रसम्प्राप्नःकिमुतेतिकिमु
त्यन्त्यार्थोपिशब्दः । जनकधनग्रहणञ्चतस्यप्रतिषिद्धन्तेनैव । गोत्ररिक्थेजनयितुर्नभजेद्दत्रिमःसुतः । गोत्ररिक्थानुगःपिण्डो
व्यपैतिददतःस्वधेति ॥ ददतःसम्बन्धीपिण्डस्ततोव्यपैति । स्वधापितृतृप्तिहेतुरितिपिण्डविशेषणम् । गोत्ररिक्थानुगइतिहे
तुगर्भम् । दत्तकमात्रविषयकमपिसत्यौरसेचतुर्थांशहरत्वप्रतिपादकंपृथगारब्धंवसिष्ठेन । तस्मिंश्चेत्प्रतिगृहीतऔरसउत्प
द्येतचतुर्थभागभागीस्याद्दत्तकइति । क्रीतादिसाधारणान्तुकात्यायनीयम्प्रागेवपठितम् । तत्रतृतीयांशहरइतिकल्पतरुलि
खितःपाठोयदिसाकरस्तर्हिदत्तकादीनामौरसापेक्षयासगुणत्वेतृतीयांशहरत्वमितिव्याख्येयः । मनुनैवक्षेत्रजस्यौरससमभा
गभागित्वमप्युक्तम् । यवीयान्ज्येष्ठभार्य्यायाम्पुत्रमुत्पादयेद्यदि । समस्तत्रविभागःस्यादितिधर्म्मोव्यवस्थितः ॥ उपसर्ज्ज
नंप्रधानस्यधर्म्मतोनोपपद्यते । पितापुधानम्प्रजनेतस्माद्धर्म्मेणतम्भजेत् । धनंयोबिभृयाद्भ्रातुर्मृतस्यस्त्रियमेववा । सोऽप
त्यंभ्रातुरुत्पाद्यदद्यात्तस्यैवतद्धनम् ॥ यद्येकरिक्थिनौस्यातामौरसक्षेत्रजौसुतौ । यस्ययत्पैतृकंरिक्थंसतद्गृह्णीतनेतरः ॥ य
द्यप्यौरसप्रक्रमात्समभागभागित्वंक्षेत्रजस्यतन्निरूपितमेवोक्तमित्याभाति । तथापिवाक्यविरोधेप्रक्रमस्यबाध्यत्वाद्बीजिसमभा
गित्वपरन्तदितिबोध्यम् । अतएवोत्तरवचनेपितुर्वीजिनःप्राधान्यमुपन्यस्यति । सोपत्यंभ्रातुरुत्पाद्येत्यनेनापियस्यक्षेत्रजस्त
दीयधनन्तस्मैदद्यादितिभ्रातृस्थानीयत्वात्तस्यससमभागिताम्प्रतिपादयति । एवमन्यान्यप्युच्चावचभागान्क्षेत्रजादीनां
प्रतिपादयन्तिवृहस्पत्यादिवचनानिकथञ्चिद्व्यवस्थापनीयानि । तत्रवृहस्पतिः । क्षेत्रजाद्याःसुतास्त्वन्येपञ्चषट्समभागि
नः । हारीतः । विभजिष्यमाणएकविंशङ्कानीनायदद्यात् । विंशम्पौनर्भवाय । एकोनविंशन्द्व्यामुष्यायणाय । अष्टादशंक्षे
त्रजाय । सप्तदशंपुत्रिकापुत्राय । इतरानौरसायपुत्रायदद्युः । ब्रह्मपुराणे ॥ समग्रधनभोक्तास्यादौरसेपिजघन्यजः ॥

त्रिभागं क्षेत्रजो भुङ्क्ते चतुर्थं पुत्रिकासुतः। कृत्रिमः पञ्चमम्भागं षष्ठांशं गूढसम्भवः। सप्तांशमपविद्धस्तु कानीनश्चाष्टमांशकः। नवभागं सहोढश्च क्रीतो दशममश्नुते। पौनर्भवस्तु परतो द्वादशांशं स्वयमागतः। त्रयोदशमभागन्तु शौद्रो भुङ्क्ते पितुर्धनात्। तद्दौत्रजो वा धर्मिष्ठो ब्रह्मचार्य्यथवा पुनः। अन्यौरसे सतीति सर्वत्र ज्ञेयः। पूर्वाभावे परः परइति वचनात्। ब्रह्मपुराणीयस्य समयेत्यादि प्रथमश्लोकस्य पूर्वमेव विषयव्यवस्थोक्ता। अन्येषामपि गुणतारतम्येन देशाचारानुसारेणावा यथायथं व्यवस्था द्रष्टव्या। षष्ठांशं षष्ठम्भागं। नवभागं नवमं भागमित्यर्थः। अन्यथार्थासङ्गतेः प्रक्रमभङ्गप्रसङ्गाच्च। परतो दशमात्परमेकादशम्। त्रयोदशमेत्यार्षं। शौद्रः शूद्रापुत्रः। यदपि मनुना पुत्राणां षट्कद्वयमुक्त्वा पूर्वषट्कस्य दायादबान्धवत्वमुत्तरषट्कस्य चादायादबान्धवत्वमुक्तम्। औरसः क्षेत्रजश्चैव दत्तः कृत्रिम एव च। गूढोत्पन्नोऽपविद्धश्च दायादा बान्धवाश्च षट्॥ कानीनश्च सहोढश्च क्रीतः पौनर्भवस्तथा। स्वयंदत्तश्च शौद्रश्च षडदायादबान्धवाइति। तदपि स्वपितृसपिण्डसमानोदकानां सन्निहितरिक्थहर्तृसंतत्यभावे पूर्वषट्कस्य तद्रिक्थहरत्वमुत्तरषट्कस्य तु तन्नास्ति। पितृरिक्थहरत्वन्तु सर्वेषामपि पूर्वपूर्वाभावे समानमेवेति तद्दायादत्वविभागो नोपपद्यते। पूर्वाभावे परः परइति वचनात्। एक एवौरसः पुत्रः पित्र्यस्य वसुनः प्रभुरित्युक्त्वा। तस्मात्ते न पितरः पुत्रा रिक्थहराः पितुरिति वचनस्य गौणपुत्राणामेव सर्वेषाम्पितृरिक्थहारित्वप्रतिपादनपरत्वाच्च। दायादशब्दस्य दायादानपि दापयेदित्यादौ पुत्रव्यतिरिक्तरिक्थहारिष्वेव प्रचुरप्रयोगाच्च। बान्धवत्वं सपिण्डत्वसमानगोत्रत्वाभ्यामुदकदानादिकार्य्यकरत्वं षट्कद्वयस्यापि समानमेवेत्येतदर्थकम्। यत्तु हारीतवचनम्। षड्बन्धुदायादाः साध्व्यां स्वयमुत्पादितः क्षेत्रजः पौनर्भवः कानीनः। पुत्रिकापुत्रो गूढोत्पन्नो गृहइति। बन्धुदायादाः। दत्तः क्रीतोऽपविद्धः सहोढः स्वयमुपगतः सहसादृष्टश्चेत्यबन्धुदायादाइति॥ साध्व्यां स्वयमुत्पादित औरसइत्यर्थः। सहसादृष्टो यो मातापित्रादिविहीनो कस्माद्दृष्टः केनचित्पालितोऽयम्मम पुत्रो भवेत्युक्तस्तथा तिप्रतिपद्यते। कृत्रिमइति यावत्। तत्र मनुविरोधः स्पष्टः। तेन कानीनपौनर्भवयोरबन्धुदायादमध्ये परि

गणनात्। हारीतेनबन्धुदायादमध्ये दत्तकृत्रिमापविद्धेषु चव्यभ्यधयात्। तस्मादेवं सवर्णादिभेदेन देशाचारभेदेनवाविरोधः परिहरणीयः। बौधायनस्तु मन्वनुसारेणैवाह। औरसम्पुत्रिकापुत्रं क्षेत्रजन्दत्तकृत्रिमौ। गूढजन्मापविद्धञ्च रिक्थभाजः प्रचक्षते। कानीनञ्च सहोढञ्च क्रीतम्पौनर्भवन्तथा। स्वयन्दत्तन्निषादञ्च गोत्रभाजः प्रचक्षतइति। औरसपुत्रिकापुत्रक्षेत्रजकानीनगूढोत्पन्नापविद्धसहोढपौनर्भवदत्तकस्वयमुपगतकृतकक्रीतानभिधायाह देवलः। एतेद्वादशपुत्रास्तु सन्तत्यर्थमुदाहृताः। आत्मजाः परजाश्चैव लब्धायादृच्छिकास्तथा। तेषां षड्बन्धुदायादाः पूर्वेऽन्ये पितुरेवषट्॥ विशेषश्चापि पुत्राणामानुपूर्व्याद्विशिष्यते॥ सर्वेह्यनौरसस्यैते पुत्रादायहराः स्मृताः। औरसे पुनरुत्पन्ने तेषु ज्येष्ठ्यन्नविद्यते। तेषांसवर्णा येपुत्रास्तेतृतीयांशभागिनः। हीनास्तमुपजीवेयुर्ग्रासाच्छादनसंभृताः। आत्मजत्वादिकम्परिगणितेषु यथायथंसस्पष्टमेव। अनौरसस्य। नविद्यतेऔरसोयस्यतस्येतिबहुव्रीहिः। नारदोपि। औरसः क्षेत्रजश्चैवपुत्रिकापुत्रएवच। कानीनश्च सहोढश्च गूढोत्पन्नस्तथैवच। पौनर्भवोपविद्धश्च दत्तः क्रीतः कृतस्तथा। स्वयञ्चोपगताः पुत्राद्वादशैते प्रकीर्त्तिताः॥ एषांषड्बन्धुदायादाः षडदायादबान्धवाः। पूर्वः पूर्वः स्मृतः श्रेष्ठो जघन्योयोऽनुत्तरः। क्रमायातेप्रवर्त्तन्ते मृते पितरि तद्धने। ज्यायसोज्यायसोऽभावे जघन्यस्तदवाप्नुयात्। मनुः। श्रेयसः श्रेयसोऽलाभे पापीयान् रिक्थमर्हति। बहवश्चेत्तु सदृशाः सर्वे रिक्थस्य भागिनः। वृहस्पतिः। दत्तोपविद्धः क्रीतश्च कृतः शौद्रस्तथैवच। जातिशुद्धामध्यमास्ते सर्वे रिक्थसुताः स्मृताः॥ क्षेत्रजोगर्हितः सद्भिस्तथापौनर्भवः सुतः। कानीनश्च सहोढश्च गूढोत्पन्नस्तथैवच। हारीतः। शूद्रापुत्राः स्वयंदत्तायेचैते क्रीतकाः सुताः। सर्वेते गोत्रिणः प्रोक्ताः काण्डपृष्ठानसंशयः। स्वकुलं पृष्ठतः कृत्वा योवै परकुलं व्रजेत्। तेनदुश्चरितेनासौ काण्डपृष्ठोनसंशयः। यमः। आपद्यन्नोह्युपगतो यश्च स्याद्दैवजोसुतः। सर्वेते मनुना प्रोक्ताः काण्डपृष्ठास्तथा। कुलंकाण्डमितिख्यातं यस्मात्पूर्वाशितेजकः। तत्रज्येष्ठतरोयः स्यात्सन्येकाण्डेविनिर्द्दिशेत्। स्वकुलं पृष्ठतः कृत्वा योवै परकुलंव्रजेत्। तेनदुश्चरितेनासौ

काण्डपृष्ठइतिस्मृतः। वैश्यवीशूद्रेतिकल्पतरौ। उक्तोपसंहारमुखेननियममाहाचयोगीश्वरः। सजातीयेष्वयम्प्रोक्तस्त
नयेषु मयाविधिः। अयंपूर्व्वाभावेपरःपरोधनभागित्युक्तोयोमयाविधिःससजातीयेषूत्पादकसजातीयेष्वेवक्षेत्रजादिपुत्रे
ष्वेन विजातीयेषु तत्रकानीनगूढोत्पन्नसहोढपौनर्भवानांसवर्णत्वञ्चजनकद्वारेणनस्वरूपेणतेषुवर्णजातिलक्षणाभावात् वर्ण
जातिविवेकमभिधायविन्नास्वेषविधिःस्मृतइतियोगीश्वरेणैवाभिधानात्। अनुलोमजानांमूर्द्धावसिक्तादीनामौरसेष्वेवा
न्तर्भावाच्चतुस्त्रिद्व्येकभागाइत्यादिनाभागक्लृप्तिरुक्ता। तेनतेषामप्यभावेक्षेत्रजादयःपित्र्यरिक्थहारिणः। शूद्रापुत्रस्यत्वौर
सत्वेपिनक्षत्रत्नपित्र्यधनभागित्वमन्याभावेप्यस्ति। यथाहमनुः। यद्यपिस्यात्तुसत्पुत्रोयद्यपुत्रोपिवाभवेत्। नाधिकन्दशमाद्द
द्याच्छूद्रापुत्रायधर्म्मतः। यदिसत्पुत्रोविद्यमानस्सवर्णापुत्रोयदिवाऽपुत्रोऽविद्यमानस्सवर्णापुत्रोभवेत्तस्मिन्मृतेक्षेत्रजादिः
पुत्रोन्योवारिक्थहारीशूद्रापुत्रायतद्धनाद्दशमांशादधिकंनदद्यात्। अस्मादेववचनात्सवर्णापुत्राभावेक्षत्रियावैश्यापुत्रयोः
सकलविप्रपितृधनग्रहणंगम्यते। यत्तुप्राक्चतुस्त्रिद्व्येकभागाइत्यादिवाशूद्रापुत्रस्यैकभागभागित्वंयोगीश्वरादिभिरुक्तन्तदति
सदृत्तशूद्रापुत्रविषयंवेदितव्यमन्यथामानवविरोधात्। ब्राह्मणक्षत्रियविशामितिमनुवचनन्तुप्रागेवव्याख्यातम्। शूद्रधनवि
भागेविशेषमाहयाज्ञवल्क्यः। जातोपिदास्यांशूद्रेणकामतोंशहरोभवेत्। मृतेपितरिकुर्य्युस्तंभ्रातरस्त्वर्द्धभागिकम्। अभ्रातृ
कोहरेत्सर्व्वंदुहितृणांसुतादृतेति। शूद्रेणदास्यामुत्पन्नःपुत्रःकामतःपितुरिच्छयाभागंलभते। पितुरूर्ध्वन्तुभ्रातरःपरिणीताः
शूद्रापुत्रास्तन्दासीपुत्रंस्वभागार्द्धभागिनंकुर्य्युः। अत्रबहुवचनात्सर्व्वैस्स्वस्वभागादर्द्धन्दद्युरितिनभ्रमितव्यम्। तथासतिबहु
भ्रातृकस्यततोप्यतिबहुधनत्वापत्तेरव्यवस्थास्यात्। किन्त्वेकपुत्रस्ययावान्भागस्तत्तदर्द्धभागंशूद्रापुत्रालभन्तेव्यक्त्यभिप्रायेण
जात्यभिप्रायेणचबहुवनैकवचने। परिणीतशूद्रापुत्रस्तत्पुत्राद्यभावेतुदासीपुत्रोपिकृत्स्नंशूद्रस्यपितुर्द्धनंलभतइत्यर्थाद्गम्य
ते। शूद्रग्रहणाद्द्विजातिभ्योदास्यामुत्पन्नःपित्रिच्छयाप्यंशमर्द्धभागंवातदूर्द्ध्वम्नलभतेहात्स्नन्तद्धनग्रहणंदूरपास्तमेवकिन्त्वपु

तिकुलस्थेष्वजीवनमात्रमिति प्रतीयते। मुख्यगौणपुत्राभावे मृतपतितपरिव्राजकादिधनग्रहणाधिकारित्वमुच्यते। तत्र योगी
श्वरः॥ पत्नी दुहितरश्चैव पितरौ भ्रातरस्तथा। तत्सुतो गोत्रजो बन्धुः शिष्यः सब्रह्मचारिणः॥ एषामभावे पूर्वस्य धनभागुत्तरोत्तरः
। स्वर्यातस्य ह्यपुत्रस्य सर्ववर्णेष्वयं विधिरिति। अपुत्रस्य पूर्वोक्तद्वादशविधपुत्ररहितस्य स्वर्यातस्य मृतस्य पत्न्यादयः पूर्वपू
र्वाभावे पाठक्रमेणोत्तरोत्तरस्य धनं गृह्णीयुरित्यर्थः। अयं विधिः सर्वेषु मूर्द्धावसिक्ताद्यनुलोमजप्रतिलोमजादिषु वर्णेषु च ब्राह्म
णादिषु वेदितव्यमित्यर्थः। तत्र प्रथमम्पत्नी धनहारिणी॥ पत्नीग्रहणेनैव विवाहसंस्कृता। पत्युर्नो यज्ञसंयोगे इति पाणिनिस्मर
णात्। जात्यभिप्रायेण चैकवचनं तेन बह्व्यश्चेत्पत्न्य एकस्य तदा सर्वाः सजातीया विजातीयाः क्रमेण यथायथं भर्तृधनं विभज्य गृह्णी
युः। पत्नीशब्दादासुरादिविवाहोढाया धनग्रहणं धर्म्यविवाहोढपत्न्यन्तरसद्भावे नास्तीति गम्यते॥ तथा च स्मृतिः। क्रयक्रीता तु
या नारी न सा पत्नी विधीयते। न सा दैवे न सा पित्र्ये दासीं तां कश्यपो विदुरिति॥ अत्र च दासीत्वकथनमदृष्टार्थकर्मस्वसहाधि
कारभावाभिप्रायेण न तु दासीवदगम्यत्वाभिप्रायेण। विवाहितात्वेन परदारत्वावाधात्। अतएव मनुर्धर्म्याधर्म्यविवाहान
नुक्रम्य सन्तानगतावेव गुणदोषावाह। अनिन्दितैः स्त्रीविवाहैरनिन्द्या भवति प्रजा। निन्दितैर्निन्दिता नॄणां तस्मान्निन्द्यान्वि
वर्जयेदिति। प्रजाया निन्दितत्वमपि सद्धर्मस्वभवत्वाभावेन तु वर्णजात्यभावः। परिणेतुः परिणीतायामुत्पन्नत्वमात्रस्य वर्णजा
तिग्राहकत्वात्। विप्रास्वेय विधिः स्मृत इत्युक्तेः। अतएव न सा दैवे न सा पित्र्ये इति सहाधिकारस्यैव प्रतिषेधः। तथा चापि
त्र्यादिकर्म्माहतापि पतिदायहरत्वप्रयोजिकेति पत्नीपदेन ज्ञापितम्। अतएव श्रौतस्मार्तसहाधिकारिणी पतिव्रतैव भर्तृधन
भागिनीत्याह प्रजापतिः। पूर्वं मृता त्वग्निहोत्रं मृते भर्त्तरि तद्धनम्। लभेत्पतिव्रता नारी धर्म्म एष सनातनः॥ वृद्धमनुरपि।
अपुत्रा शयनम्भर्तुः पालयन्ती व्रते स्थिता। पत्न्येव दद्यात्तत्पिण्डं कृत्स्नमंशं लभेत चेति। अत्रोत्तरार्द्धे पाठक्रमस्यार्थक्रमेण
वाधात्प्रथमं कृत्स्नमंशं लभते। पश्चात्पिण्डं दद्यादिति स्मृतिचन्द्रिकाकारेणोक्तन्तद्धेयम्। क्रमे तात्पर्य्याभावात्। क्रमयाधि

कारप्रतिपादनमात्रपरत्वाद्वचनस्य । अन्यथा यावद्दंशलाभमप्यन्त्येष्टिविलम्बोऽपि प्रसज्येत । स चानेकस्मृतिनिषिद्धः । अ
दृष्टकल्पनापत्तिश्च । पत्न्यैवेत्येवकारेणापुत्रस्यान्यकर्म्मण्यपि पुत्रापुत्रवत्पत्न्या इत्यादिवचनाद्भ्रात्रादिसत्त्वेऽपि सैवाधिकारिणी
निर्द्दिष्टा । अयमेवार्थः प्रपञ्चितः प्रजापतिना । जङ्गमं स्थावरं हेमं कुप्यं धान्यं रसाम्बरं । आदाय दापयेच्छ्राद्धं मासषाण्मा
सिकादिकम् । पितृव्यगुरुदौहित्रान्भर्तुःस्वस्रीयमातुलान् ॥ पूजयेत्कव्यपूर्त्ताभ्यां वृद्धानाथानतिथीन्स्त्रियः । कुप्यं त्रपुसी
सादि । कव्यमित्यत्रार्थे सङ्कल्पितमन्नादि । पूर्त्तं स्नानादिकर्म्माङ्गं दक्षिणादि । एतदुक्तम्भवति । स्थावरेणापि सहितं सर्वं भ
र्तृधनमधिगम्य धनसाध्यं स्वाधिकारिकं पत्युरात्मनश्च श्रेयःसाधनं कर्म्म पतिपक्षीयपुरस्कारेण पत्न्या कार्य्यमिति । एवं वर्त्तमा
नायाये पीडाकारिणस्ते सज्ञा चोरवद्दण्ड्या इत्याह स एव । सपिण्डा वान्धवा ये तु तस्याः स्युः परिपन्थिनः । हिंस्युर्द्धनानि तान्रा
जा चौरदण्डेन शासयेत् ॥ स्मृतिचन्द्रिकायां वा हे स्यात्तेन पत्न्याः स्थावरग्रहणनिषेधकं । याद्रूभर्त्तुधनं छिद्रा द्याधादि विविधं
स्मृतम् । तज्जायास्थावरमुक्त्वा लभते मृतभर्तृकेति वचनं लिखितं । जङ्गमं स्थावरमित्यादि प्रजापतिवचनविरोधपरिहाराय
वृत्तविहीनपत्नीपरत्वमविभक्तपत्न्यंशविषयत्वम्वान्यैरुक्तं । वृत्तस्थायिहृतेऽप्यंशेन स्त्री स्थावरमर्हतीति तच्छेषविरोधेनापास्य दुहि
तृरहितपत्नीविषयत्वेन व्यवस्थापितञ्च । तत्र मदनरत्नकारेण मिताक्षराकल्पतरुहलायुधादिसर्वग्रन्थान्तरेष्वलिखनान्नि
र्मूलत्वमस्य । जङ्गमं स्थावरमिति प्रजापत्यस्य च सर्वत्र लिखनात्समूलत्वमिति दूषणमुक्त्वा तदुक्तव्यवस्थायाश्च स्वोत्प्रेक्षामात्रक
ल्पितत्वेनायुक्तत्वमभिधाय समूलत्वेऽपि स्थावरादिसमग्रधनग्रहणम्ब्राह्म्यादिविवाहोढाविषयन्तद्वचनेषु पत्नीशब्दप्रयोगात् ।
स्थावरग्रहणप्रतिषेधकबृहस्पतिवचनन्तु जायास्त्रीशब्दमात्रप्रयोगादासुरादिविवाहोढाविषयमिति स्वयं व्यवस्थाकृता । आ
सुरादिविवाहोढायाः पत्नीशब्देनाग्रहणाज्जायादिशब्दोपेतवचनानामपि तदेकमूलकतया तत्परत्वात्स्मृतिचन्द्रिकायामेवनि
रस्ता । यत्तु तदुक्तव्यवस्थायामौत्प्रेक्षिकत्वमुक्तन्तदपि न । दुहितृसत्त्वे तत्सन्तानद्वारेण स्थावरस्योपभोगधनस्वाम्युपकारयोः

सम्भवाद्दुहितृमपियाह्यन्नद्दुहितायास्तु नदभावान्न मद्रूहस्वामिति तत्रापि वीजसम्भवात्। अतएव पितुरपि स्थावरे स्वार्जिते पिपुत्रानुमतिमन्तरेणानधिकारः प्रागुक्तः॥ यत्तुगृहीतधनायाः पन्यास्तद्धनेन जीवनमात्रन्दानाधीकरणविक्रयेषु तु नाधिकार इति मृते भर्त्तरि भर्त्तुः शं लभेत कुलपालिका। यावज्जीवन्न हि स्वाम्यन्दानाधमनविक्रय इति कात्यायनवचनात्प्रतीयते। तदपि दृष्टार्थनटनर्त्तकादिदानास्वातन्त्र्यपरम्। अदृष्टार्थे दाने तदुपयोगिनोराधीकारणविक्रययोश्चतेनैवाधिकाराभिधानात्। व्रतोपवासनिरताब्रह्मचर्य्ये व्यवस्थिता। दमदानरतानित्यमपुत्रापि दिवं व्रजेदिति॥ दिवंव्रजेदित्यनेन काम्येपि दानादौ तस्याअधिकारः प्रतीयते किमुत नित्ये नैमित्तिके च। जङ्गमं स्थावरं हेमेत्यादि पूर्वोदाहृतप्रजापतिवचनाच्च। तत्रापि पूर्वैय हणात्काम्येष्वप्यधिकारश्चायातीति स्मृतिचन्द्रिकाकारादयः। यत्त्वापरमपि कात्यायनवचनमेव। अपुत्राशयनम्भर्त्तुः पालयन्ती गुरौ स्थिता। भुञ्जीतामरणात्क्षान्तादायादाऊर्द्ध्वमाप्नुयुरिति। तत्र स्मृतिचन्द्रिकाकार आह। क्षान्ता। दायादकारितधन विनियोगप्रतिवन्धं सहमानासत्यामरणाद्भुञ्जीतेत्यर्थः। इदञ्चारक्षणभरणाद्यसमर्थेषु कार्य्यान्तरव्ययेषु वाश्वशुरादिषु पत्न्या यत्स्वयमेव स्वजीवनार्थमुपात्तमविभक्तन्तद्विषयम्। विभक्तद्रव्यविषयत्वे मन्वादिपरिनिष्ठितार्थवाधापत्तेरिति। पौरस्त्यास्तु गुरौ श्वशुरादि समीपे स्थिता भर्त्तृधनम्भुञ्जीतैव। ननु स्त्रीधनवद्यथेच्छन्दानाधानविक्रयादि कुर्वीत तस्या ऊर्ध्वं दायादा दुहित्रादयस्तद्धनाधिकारिणो गृह्णीयुर्न तु ज्ञातयः। तेषां दुहित्रादिभ्यो जघन्यत्वात् तद्बाधकत्वानुपपत्तेः। पत्नी हि तेषां वाधिका। तदधिकारप्रागभावप्रध्वंसयोरविशेषाद्बाधकाभावस्य तद्बाधानुपपत्तेः। नापि स्त्रीधनाधिकारिणो गृह्णीयुः। कात्यायनेनैव स्त्रीधनाधिकारिणां वचनान्तरैरुक्तत्वात्तेन रुक्तत्वापत्तेः। अतः पत्नी दुहितरश्चेत्यादिना ये पूर्वपूर्वस्याभावे परभूता अपुत्रासंसृष्टिविभक्तमृतधनाधिकारिणो निर्दिष्टास्ते यथा पत्न्यधिकारप्रागभावं गृह्णीयुस्तथा पत्न्या जाताधिकारायाः प्रध्वंसेपि भोगावशिष्टं गृह्णीयुः। तदानीं दुहित्रादीनामेवान्यापेक्षया मृतोपकारकत्वात्। दानधर्मेषु महाभारतवचनमप्येतदुपोद्बलकम्। स्त्री

यां स्वपतिदायस्तु उपभोगफलः स्मृतः । नापहारं स्त्रियः कुर्य्युः पतिवित्तात्कथञ्चनेति । उपभोगोपि न सूक्ष्मवस्त्रादिना । कि
न्तु पत्युरुपकाराय देहधारणमात्रोपयोग्युपभोगानुज्ञानम् । एवञ्च वृहस्पतिना पितृव्यगुरुदौहित्रानित्यादिना पितृव्यपदेन
भर्तृसपिण्डोपलक्षणाद्दौहित्रपदेन तद्दुहितृसन्तानोपलक्षणान्मातुलस्त्रीयपदाभ्यां तन्मातृकुलोपलक्षणात्तेभ्य एवार्थानु
रूपम्भर्तुः श्राद्धाद्यौर्ध्वदेहिकोपकारकं दद्यात् । न तु स्वपितृकुलसम्बन्धिभ्यस्तदनुमत्या तु तेभ्योपि । तथा च नारदः । मृते भर्त्त
र्य्यपुत्रायाः पतिपक्षः प्रभुः स्त्रियाः । विनियोगेऽथ रक्षासु भरणे च स ईश्वरः । परिक्षीणे पतिकुले निर्मनुष्ये निराश्रये ॥ तत्सपि
ण्डेषु वाऽसत्सु पितृपक्षः प्रभुः स्त्रिया इति । संमुखमेव वचनार्थमादाय नास्त्येव स्त्रिया भर्तृरिक्थे दानविक्रयाद्यधिकार इत्याहुः ।
तच्चेदन्याय्यं । किन्त्वस्य तया अन्येपि दानादौ तत्स्वरूपानिष्पत्तिरेव । तन्नावदेवं युक्तं । मन्वादिवचनैः सकलभर्तृधनग्रहणेन तस्या
स्तत्र स्वत्वे सति तस्यास्तत्र स्वत्वे दानादिस्वरूपानिष्पत्तेर्बाधितत्वात् । अत एव जीमूतवाहनेनैव स्थावरस्य समस्तस्य । विभक्तावाऽविभ
क्ता वा स्थावरं द्विपदं स्त्रैण्यादीनि स्थावरविषयाणि दानादिनिषेधवचनान्युपन्यस्याधर्म्मभागिताज्ञापनार्थमेतानि हेतुर्वृत्तं पुरु
षं प्रतिकृष्टस्य दुःखदानार्थमेव दानविक्रयादिप्रवृत्तं प्रतिषेधकानि न तु दानादिस्वरूपानिष्पत्तिप्रतिपादकानि । यथेष्टविनियो
गार्हत्वलक्षणस्य स्वत्वस्य द्रव्यान्तर इव स्थावरेप्यविशेषाद्वचनशतेनापि वस्तुनोऽन्यथाकरणाशक्यात्तत्प्रतिपादनानुपपत्तेरिति निरू
पितम् । तद्वत्तरीत्यात्रापि दुर्वृत्ततया दायादाद्दुःखदानार्थमेव भर्त्तृरिक्थदानादिप्रवृत्तायाः स्त्रियास्तु प्रतिषेधातिक्रमादधर्मः । धर्मा
र्थं दानप्रवृत्तायाः स्वजीवनाद्यर्थं विक्रयाधाने कुर्वन्त्याश्च नास्त्येवाधर्म्मोपि । न च भुञ्जीतैवेति नियमाद्दायादायार्ध्वमाप्नुयुरि
त्यभिधानाच्च दानाद्यनधिकार एव तस्यास्तत्र विभक्तधन इव तत्रेति वाच्यम् । साधारणस्वत्वाश्रयाविभक्तधनेनासाधारणस्वत्वाश्र
यस्यास्य वैधर्म्यात् । न च स्वभोगस्य प्राप्तत्वेनाविधेयत्वाद्दानादिपरिसङ्ख्यार्थ एव विधिस्तया चानधिकारस्तत्रागत एवेति वाच्य
म् । वस्तुन्यथाकरणाशक्तेर्नियमस्य वृथादानादिना द्रव्यनाशनिवृत्त्यर्थतयैवोपपत्तेरवश्यवाच्यत्वात् । अन्यथाऽनधिकारेद

मट्टानरताप्रजयेत्कथप्रीताभ्यामित्यनेनदानविधिनाविरोधोऽपरिहार्य्यः । यच्चदायादाःपत्न्यनन्तराधिकारिणःपत्नीदुहित
रइत्यत्रनिर्द्दिष्टास्तेगृह्णीयुःप्रागभावप्रध्वंसयोःप्रतिबन्धकपत्न्यभावत्वस्याविशेषात्तदधिकारोद्भवादित्युक्तन्नदन्तिस्थवीयः ।
दायादपदेनस्त्रीधनाधिकारिग्रहणेयथावचनान्तरोक्तत्वात्पौनरुक्त्यंतथातेषामपिकात्यायनेनवचनान्तरोक्तत्वात्पौनरुक्त्याविशे
षात् । वस्तुतस्तुजातस्वत्वेस्वामिनिमृतेतत्प्रत्यासन्नानामेवतद्धनग्रहणमुचितम् । पत्न्यादिशब्दानांसम्बन्धशब्दत्वेनद्रव्यस्वामित्वे
पत्न्याद्युपजातेपूर्वस्वामिदुहित्रादीनाङ्कःप्रसङ्गः । तेनयद्यपिपूर्वाभावःप्रागभावःप्रध्वंसस्त्वात्यन्ताभावश्चप्रतिबन्धकसंसर्गाभा
वत्वभयाभावस्वतुल्यस्तथापियोद्रव्यस्वामीतस्मिन्मृतेतत्सम्बन्धिपत्न्यादिकमपुत्रस्यतस्यधनंलभेतेत्येववाक्यार्थः । अन्यथादुहि
त्रादिभिरपुत्रपितृधनेलब्धेतन्मरणेतत्सन्तत्यभावेतल्लब्धेनेनतद्धनंपूर्वस्वामिनःपितुर्यैपित्रादयस्तएवलभेरन्नितिमहत्यव्यवस्थाप्रस
ज्येत । तस्माद्भर्तृरिक्थम्पत्न्यालब्धन्तस्यांमृतायांतद्भोगावशिष्टमातुर्दुहितरइत्यादिवचनाद्दुहित्रादिग्राह्यत्वेनप्रसक्तदायादा
ऊर्ध्वमाप्नुयुरित्यनेनापोद्यते । अयञ्चवचनार्थः । दायादाइत्यत्रकस्येत्यपेक्षायांसन्निधानाद्भर्तुरित्येवोपस्थितत्वादनुषज्यते
। तथाचैवंवचनव्यक्तिःतस्याऊर्ध्वम्भर्तुर्दायादाश्चविभक्ततद्धनाधिकारिणोविभक्तभ्रातृधनमपितत्पत्नीभोग्यावशिष्टंगृह्णीयुर्नै
पत्नीरिक्थहरादुहित्रादयइतिएवञ्चापूर्वार्थत्वाच्चतुर्थचरणस्यार्थवत्त्वंभवतिअन्यमतेवचनान्तरेणैकार्थानुवादमात्रमनर्थकंस्या
त्तस्माद्दृष्टार्थेदानेदृष्टादृष्टावश्यककार्यार्थमाधौविक्रयेचास्त्येवपत्न्याःसकलभर्तृधनविषयोधिकारःनियमस्तुनटनर्त्तका
दिदानानावश्यकाधिविक्रयनिवृत्त्यर्थइतिसिद्धम् । अतएवक्षान्तेत्युक्तम् । द्रव्यप्राप्तुंविनावृथाद्रव्यव्ययकारिणीनभवेदि
त्यर्थः । दानधर्मस्थंमहाभारतवचनन्तुसुतरामस्मदुक्तमेवार्थमुपोद्बलयति । तथाहिस्त्रीणांस्वपतिदायःस्वभर्तृरिक्थमु
पभोगफलः । उपभोगोधर्म्म्यप्रत्यासन्नोभोगोनत्वसद्भोगःफलम्प्रयोजनंयस्यतादृशःस्मृतउक्तोमन्वादिभिः । उपराद्धं
तदेवव्यनक्ति । स्त्रियःपतिवित्तादपहारंवृथाव्ययंनकुर्युः । कथञ्चनेत्यनेनावहारस्यसर्वथैवाश्रेयस्करतामाह । अपहारो

हिचौर्य्यम् । नटनर्त्तकादौ वृथादानम् । सूक्ष्मवस्त्रादिपरिधित्वामृष्टभक्ष्यादिबुभुक्षेत्येवमाद्यपिसर्व्वं नाया अतौ विज्ञानं
र्य्यंतुल्यमित्यपहारशब्देगौणः । धर्म्मार्थ्यदानादिकन्तुननयेतिनापहारशब्देनबोधयितुंशक्यते । तस्मात्सर्वंसुस्थम् । प
त्न्याअपुत्रविभक्तासंसृष्टिपतिस्वापतेयग्रहणेप्रथमाधिकारप्रतिपादकान्यपराण्यपिभूयांसिस्मृतिवचनानितत्रबृहस्पतिः ।
आम्नायेस्मृतितन्त्रेचलोकाचारेचसूरिभिः । शरीरार्द्धंस्मृताजायापुण्यापुण्यफलेसमा ॥ यस्यनोपरताभार्य्यादेहार्द्धं तस्य
जीवति । जीवत्यर्द्धशरीरेऽर्थंकथमन्यःसमाप्नुयात् ॥ सकुल्यैर्विद्यमानैस्तुपितृमातृसनाभिभिः । अपुत्रस्यप्रमीतस्यपत्नी
तद्भागहारिणीति । योगीश्वरोपिपूर्वाभावेपराधिकारंवदन्सर्वप्राथम्येनपत्न्याएवाधिकारमभिधत्ते । विष्णुरपि । अपुत्रस्य
धनंपत्न्यभिगामितदभावेदुहितृगामितदभावेपितृगामितदभावेमातृगामितदभावेभ्रातृगामितदभावेभ्रातृपुत्रगामितदभावे
बंधुगामितदभावेसकुल्यगामितदभावेशिष्यगामितदभावेसहाध्यायिगामितदभावेब्राह्मणधनवर्ज्जंराजगामीति । बंधुरत्रस
पिण्डःसकुल्यःसगोत्रः । बंधुपदेनबक्ष्यमाणपितृबंध्वादिग्रहणेयोगीश्वरोक्तक्रमविरोधापत्तेः । कात्यायनोपि । पत्नीपत्युर्द्धन
हरीयास्यादव्यभिचारिणी । तदभावेतुदुहितायद्यनूढाभवेत्तदा । स्मृत्यन्तरमपि । अपुत्रस्याथकुलजापत्नीदुहितरोपिवा
। तदभावेपितामाताभ्रातापुत्राश्चकीर्त्तिताइति ॥ एतैर्वचनैःसर्वतःपूर्वंपत्नीपतिधनभागिनीतिप्रतिपादितम् । एतद्विरुद्धा
न्यपिवचनानिलक्ष्यन्ते । तथाचनारदः । भ्रातृणामप्रजाःप्रेयात्कश्चिच्चेत्प्रव्रजेत्तवा । विभजेरन्धनन्तस्यशेषास्तेस्त्रीधनंवि
ना ॥ भरणञ्चास्यकुर्वीरन्स्त्रीणामाजीवनक्षयात् । रक्षन्तिशय्याम्भर्त्तुश्चेदाच्छिंद्युरितरासुचेति । पत्नीसद्भावेपिभ्रातृणा
न्धनग्रहणम्भरणञ्चतत्पत्नीनामाह । मनुरपि । पिताहरेदपुत्रस्यरिक्थंभ्रातरएववचेति । पितृभ्रात्रोर्विकल्पेनापुत्रधनग्रह
णाधिकारंवदतिनतुपत्न्याः ॥ अनपत्यस्यपुत्रस्यमातादायमवाप्नुयात् । मातर्य्यपिचवृत्तायाम्पितुर्माताहरेद्धनमितिचस्मृ
तिर्म्मातृपितामह्योरपुत्रधनाधिकारमभिदधाति । शङ्खलिखितपैठीनसियमोपि । अपुत्रस्यस्वर्य्यातस्यभ्रातृगामिद्रव्यन्तदभा

वे पितरौ हरेयातां ज्येष्ठा वा पत्नी ति भ्रातुः पित्रोश्चाभावे पत्न्यधिकारं कथयन्ति । देवलोपि । ततो दायमपुत्रस्य विभजेयुः सहोद
राः । तुल्या दुहितरो वापि ध्रियमाणः पितापि वा ॥ सवर्णा भ्रातरो माता भार्य्या चेति यथाक्रममिति । सर्वपूर्वाभावे नयोगीश्वरेणाभि
हितायाः पत्न्या भ्रात्राद्यभावे ऽधिकारमाचष्टे भ्रातृशब्देनात्र भिन्नोदराः । सहोदराणां पृथगुपादानात् । कात्यायनेपि । विभक्ते
संस्थिते द्रव्यं पुत्राभावे पिता हरेत् । भ्राता वा जननी वाथ माता वा तत्पितुः क्रमादिति । पित्रादिषु ग्राहकेषु पत्न्या निर्द्देशमपि न करो
ति । एतेषामन्योन्यविरुद्धानां वचनानामाचार्येश्वर इत्थं व्यवस्थामाह । विभक्तासंसृष्टभ्रातुरपुत्रस्य पत्नी यदि नियोगमङ्गी
कुरुते तदैव पतिधनं लभते । अनियोगार्थिन्यास्तु तस्यामविभक्तसंसृष्टपत्नीवद्भरणमात्रमेव नियोगद्वारैवापुत्रपत्न्याः पति
स्वापतेयस्वामित्वन्न च बीजमनेकस्मृतिष्वपत्यद्वारैव तस्या धनसम्बन्धबोधनम् । तथा च गौतमः । पिण्डगोत्रर्षिसम्बन्धा
रिक्थं भजेरन् स्त्री वानपत्यस्य बीजं वा लिप्सेतेति । अनपत्यस्य रिक्थं पिण्डगोत्रर्षिसम्बन्धा भजेरन् तस्य स्त्री वा रिक्थं भजेत् । य
दि बीजं चेल्लिप्सेत ॥ वाशब्दो यद्यर्थो अन्यथा रिक्थग्रहणबीजलिप्सयोरतुल्यत्वेन विकल्पार्थकत्वानुपपत्तेः । तथा मनु
रपि । धनं यो बिभृयाद्भ्रातुर्मृतस्य स्त्रियमेव वा । सोपत्यं भ्रातुरुत्पाद्य दद्यात्तस्यैव तद्धनमिति । विभक्तधनसम्बन्धमप्यपत्यद्वा
रेणैव पत्न्या दर्शयति । तथा विभागाभावेपि । कनीयान् ज्येष्ठभार्य्यायां पुत्रमुत्पादयेद्यदि । समस्तत्र विभागः स्यादिति धर्म्मो
व्यवस्थित इति वदन्नपत्यद्वारा धनसम्बन्धो स्त्रीणामाह । तेनान्वयव्यतिरेकाभ्यामपत्यद्वारक एव पत्न्या धनसम्बन्धो नान्यथेति सि
द्धम् । वसिष्ठोपि । रिक्थलोभान्नास्ति नियोग इति रिक्थलोभप्रयुक्तं नियोगं प्रतिषेधन्नगृहीतनियोगाया एव धनसम्बन्धो नेत
रस्या इति स्पष्टमेवाचष्टे । तथा च भ्रातृणामप्रजाः प्रेयादित्यादीनि नारदादिवचनान्यनियोगार्थिनीविषयाणि पर्य्यवस्यन्ति । अ
पुत्रा योषितश्चैषां भर्त्तव्याः साधुवृत्तयः । निर्वास्या व्यभिचारिण्यः प्रतिकूलास्तथैव चेति योगीश्वरोप्यपुत्राणामन्यादियोषितां भ
रणमाचक्षाणः पुत्रस्यैव धनसम्बन्धप्राधान्यान्न तत्र केवलस्त्रीणां धनसम्बन्ध इति सूचयन्न्यायसाम्यात्सर्वत्रापत्यमूलकमेव स्त्री

णां रिक्थग्रहणं ज्ञापयति। यज्ञार्थं द्रव्यमुत्पन्नं तत्रानधिकृतास्तु ये। अरिक्थभाजस्ते सर्वे ग्रासाच्छादनभाजना इति स्मृतिः। पुरु
षाणामपि पुत्रादीनां यज्ञानधिकृतानां रिक्थानधिकारं वदन्तो दण्डापूपन्यायेन सुतरामभर्तृकाणां तदनधिकारिणीनां धनस
म्बन्धन्निरस्यति। तथा स्मृत्यन्तरमपि। यज्ञार्थं विहितं वित्तं तस्मात्तद्विनियोजयेत्। स्थानेषु धर्म्मयुक्तेषु न स्त्रीमूर्खविधर्म्मि
ष्विति। स्त्र्यादिषु धनविनियोगमपि प्रतिषेधत्साक्षात्तस्या एव कात्स्न्र्येन धनग्रहणं सुदूरं दूषयतीति। तदिदं विज्ञानेश्वरादयो नानु
मन्यन्ते पत्नी दुहितर इत्यादिषु साक्षान्नियोगानुपादानात्। प्रस्तावाभावाच्च। किञ्च नियोग एव पत्न्या रिक्थसम्बन्धप्रयोजकस्त
दुत्पन्नमपत्यं वा। प्रथमे नुत्पादितपुत्राया अपि स्वीकृतनियोगाया धनाधिकारः स्यान्नियोगोत्पन्नपुत्रस्य च न स्यान्नियोगमात्रेणैव
भर्तृधनस्वाम्यात्। द्वितीये वचनान्तरैरेवापत्यस्य धनसम्बन्धसिद्धेः पत्नीवचनमनर्थकम्। अथ स्त्रीणां पतिमात्रद्वारको धनसम्ब
न्धो न प्रकारान्तरेण जीवति पत्यौ तद्द्वारको मृते त्वपत्यद्वारक इति बोधनार्थं नियोगार्थिनी पत्नी परम्पत्नीवचनमिति मतम्। तदस
त्। अध्यग्न्यध्यावाहनिकमित्यादिवक्ष्यमाणवचनैरन्यथापि तासान्धनसम्बन्धबोधनात्। भर्तृधने द्वैधैव सम्बन्धो नियम्यत इति
चेत्। तर्हि जीवति पत्यौ तद्धनसम्बन्धस्य पाणिग्रहणाद्धि सहत्वमित्यादिगौतमवचनेनैव सिद्धेर्मृते तु तस्मिन्नियोगनिमित्तत
द्धनसम्बंध उच्यमानः क्षेत्रजपुत्रस्यैवोक्तो भवति सोपि प्रायुक्त इत्यपुत्रप्रकरणे पत्नीत्यनारभ्यमेव। यच्च गौतमवचनं बीजं वालि
प्सेतेति यदि बीजं लिप्सेतेत्यर्थकतया नियोगद्वारक एव धनसम्बन्धोऽपुत्रपत्न्या इत्यत्र प्रमाणमित्युक्तन्तदप्ययुक्तम्। वाशब्दस्य
पक्षान्तरवाचित्वेन यदर्थाप्रतीतेः। धनग्रहणबीजलिप्सयोस्तुल्यार्थतया विकल्पार्थकत्वासम्भवे निपातानामनेकार्थत्वात्प्रकृता
न्वयोपयोगी यदर्थ एव कल्प्यत इति चेत्। न बीजम्वा लिप्सेत सत्यं नावा भवेदिति प्रासङ्गिकधर्म्मान्तरोयद्देशरूपतया विकल्पार्थ
कताया एव सम्भवात्। तथा च गौतमवचसापि नियोगनिरपेक्षमेव भर्तृरिक्थग्रहणमुक्तम्भवति। किञ्च विधवानियोगस्य निषिद्ध
त्वात्पुत्राश्रयणं भर्तुः पावयन्तीत्यादिमन्वादिवचनैः संयताया एव धनाधिकारप्रतिपादनान्निर्वाह्यस्याव्यभिचारिण इत्यादिनाभ

रग्रामात्रस्याप्यसंयतानामभावात्कृत्स्नभर्तृरिक्थग्रहणं दूरापास्तमेव । यच्चाभिहितमनयोर्विभृयाद्भ्रातुः कनीयान्ज्येष्ठभार्य्या
यां रिक्थलोभान्नास्तिनियोगइतिमन्वादिवचनैर्विभक्ताविभक्तधनसम्बन्धोऽव्यवधानेनाभ्यामपत्योत्पादद्वारकएवपत्न्याश्चायावीति
। तदपिवार्त्तम् । अविभक्तेसंसृष्टिनिवाभर्त्तरिप्रेतेपुत्रद्वारकएवतस्यास्वत्वं नसम्बन्धेनेति । धनलोभेननियोगोनाभ्युपेयइति
ननाव्यवस्थ्यात् । अतएवसंसृष्टानान्तुयोभागःततस्तानेवस्तेबुधैरित्यभिधायतत्स्त्रीणामनपत्यानाम्भरणमात्रंनारदेनप्रति
पादितम् । नचैवंभर्त्तृणामपुत्राःप्रेत्यादिव्यस्यापिसंसृष्टाविभक्तविषयत्वेसंसृष्टं । असंसृष्टानानुभागइत्यनेनपौनरुक्त्यं
स्यादितिवाच्यम् । तदंशविवरणपूर्वकंस्त्रीधनादिविभाज्यत्वमंशहरयोरपूर्वयोर्विधानात् । यच्चपुत्रायोबिनस्त्वैषामितियोगीश्व
रवचनंतत्तुक्लीबादीनांप्रकृतानामेवामितिसर्वनाम्नापरामर्शात्स्त्रीविषयमितिकिमागतंनधिकारिनिरूपणाप्रस्तावेबह्व
ने । यदपिद्विजातिधनस्ययज्ञार्थत्वान्नदनधिकारिण्याःप्रमीतपत्निकयानग्रहणमनर्हमित्युक्तंतदप्ययुक्तंयज्ञशब्दस्यदाना
द्युपलक्षकत्वात्तत्रचतस्याअप्यधिकारात् । यथाश्रुतेयज्ञभिन्नदानहोमादिष्वप्यविनियोगप्रसङ्गः । वस्तुतस्तुकेवलधर्मार्थ
त्वमपिधनस्यनास्ति । धर्ममर्थञ्चकामञ्चयथाशक्तिनहापयेत् । तथापूर्वाह्णमध्यन्दिनापराह्णानफलान्कुर्य्याद्धर्मार्थकामेभ्य
इत्यादिभिरर्थकामयोरपितत्साध्ययोरावश्यकत्वात् । यज्ञार्थत्वञ्चद्रव्यस्ययदिस्यात्तदाद्विरस्यधारस्यस्यकात्वव्यभिचारिद्विरस्यच
सम्बन्धेनक्रत्वर्थत्वेवस्त्रादिनिपुरुषार्थत्वंयतस्तस्यापितन्नैतद्विरुध्येत । नस्त्रीस्वातन्त्र्यमर्हतीत्यादिवचनान्तरात्तन्मात्रमस्तु
स्त्रियाःन्तुधनग्रहणेकोपिविरोधः ॥ यज्ञार्थन्द्रव्यमुत्पन्नमितितुधर्म्मविनियोगप्राशंसार्थम् । अतएवस्थानेषुधर्म्मयुक्तेषुन
स्त्रीमूर्खविधर्म्मिष्वितिवाक्यशेषः । मिताक्षराकृतस्तुःयज्ञार्थंलब्धमददद्भासःकाकोपिवाभवेदितिदोषश्रवणस्यपुत्रादिष्वप्यवि
शेषेणापिश्रवणाद्यज्ञार्थमर्जितमुत्रादिभिरपितत्रैवविनियोज्यंनान्यत्रेत्येवंपरमेतदित्याहुः ॥ श्रीकरादयस्तु । भार्य्याभरणा
मात्रपर्य्याप्तंवदिभर्तृधनन्तदासर्वमेवगृह्णाति । अतिरिक्तस्वेच्छयाचादयइतिविषयव्यवस्थामाहुः । कृत्स्नमंशंलभेतचेत्यत्रतद

र्पितत्परमेव । वर्त्तनदानस्यावश्यकत्वात् । तेन सर्ववाक्यानामविरोध इति चतत्रोपपत्तिं दूषयन्ति । वार्त्तमेतत् । बहुत्वे तध
नपदस्य पत्न्यपेक्षजीवनपर्य्याप्तधनपरत्वं भ्रात्रपेक्षजीवनमात्रपरत्वमिति तात्पर्य्यभेदस्य सति सारूप्यसम्भवेऽन्याय्यत्वात्
। मनुवचने हातत्पदवैयर्थ्यापाताच्च । सत्सु पौत्रेषु पुत्रेषु तत्समांशग्रहणं यदुक्तं जीवदजीवद्विभागयोः अंशं यदि कुर्य्यात्समा
नंशान्पत्न्यः कार्याः समांशिकाः । पितुरूर्ध्वं विभजतां मातापि अंशं समं हरेदित्याभ्यामेव वचनाभ्याम् । असत्सु पुत्रेषु पत्नी भरणमा
त्रं लभत इति महान्व्यामोहः । तत्रापि जीवनपर्य्याप्तमेवांशशब्देन विवक्षितमिति चेन्न ॥ अंशशब्दसमशब्दयोरानर्थक्यप्र
सङ्गात् । दत्तेनक्रमेण कल्पयेदित्यत्रापि जीवनोपयुक्तपरत्वावश्यम्भावे सर्वथार्द्धपदार्थत्यागापत्तेश्च । अल्पधने पुत्रसमांशं
बहुधने जीवनोपयुक्तमात्रं विवक्षितमिति तु विधिवैषम्यापत्तेरप्ययुक्तम् । तथा हि । तावेव समांशशब्दौ वाक्यान्तरमपेक्ष्य बहुधने
जीवनमात्रपर्य्याप्तधनपरौ कदाचित् । अल्पधने तु यथाश्रुतार्थकाविति एकस्मिन्विधौ वाक्यार्थभेदेन वाक्यभेदापत्तेरयुक्तम् ॥ युग
पच्छ्रुतिलक्षणावृत्तिद्वयापाताच्च । यथा चातुर्मास्यप्रकरणे द्वयोः प्रणयन्तीति वाक्येन पूर्वपक्षिणा सौमिकप्रणयनातिदेशः उत्तरवे
दिमुपकिरन्ति न शुनासीरीय इत्युत्तरवेदिप्रतिषेधेऽप्राप्तस्य प्रतिषेधायोगात् तत्त्वेनोक्तत्वाच्चैकदेशिना नातिदेशप्राप्तयोः
सौमिकोत्तरवेद्योरयम्प्रतिषेधः किन्तु प्राञ्च वपन्तीति प्राकरणिकवचनप्राप्ताया इत्युपन्यस्ते प्राकरणिकं वचनम्प्रथमोत्तमयोः पर्वणोः
प्रतिषेधमपेक्ष्य पाक्षिकीं प्राप्तिं विधत्ते मध्यमयोस्तु नित्यप्रतिपन्नमेव पाक्षिकामुत्तरवेदेः प्राप्तिं करोतीति विधिवैषम्यप्रसङ्गेन पूर्वपक्षिणा
मन्मते दूषिते परमसिद्धान्तिना पूर्वपक्ष्युक्तविधिवैषम्यभयादेव प्रथमोत्तमयोः पर्वणोः प्राप्तप्रतिषेधायोगान्नवैश्वदेव इत्यत्रवि
ध्यनुवादः उपाञ्च वपन्तीति तु द्वयोः प्रणयन्तीत्यादिवदर्थवादः सहश्रुतं मध्यमयोरेव वरुणप्रघासशाकमेधपर्वणोरुत्तरवेदिविधा
ननुवचनातिदेशोऽयमिति प्रतिपादितम् । अत्र कश्चिदाह । भ्रातॄणामपुत्रधनग्राहित्वम्भरणं चास्य कुर्वीरन्स्त्रीणामाजीवन
क्षयादिति भरणोपयुक्तधनदानस्य तत्स्त्रीणामुक्तत्वाद्दाभरणमात्रोपयुक्तमेवापुत्रधनं पत्नी विन्दते च । तदापि किं भ्रातर एव

Digitized by Google

वगृह्णन्तिपत्नीवेतिविरोधेपत्न्याएवधनग्रहणम्पत्नीदुहितरइत्यादिनापूर्वपत्नीयस्त्वहापनायोच्यतइति । तदपिमन्दम् ।
पूर्वोक्तविधिवैयर्थ्यस्यात्रापितादवस्थ्यात् । धनभागिनिपदंवाक्यान्तरमपेक्ष्याल्पधनेजीवनमात्रपर्य्याप्तधनभाक्त्वम्पत्नीविष
येवदतिपित्रादिषुतुसकलधनभाक्त्वमिति । कथन्तर्हिविरोधपरिहारइतिचेत् । शृणु । पिताहरेदित्यादिषुक्रमाप्रतीतेरपु
त्रधनग्रहणाधिकारमात्रप्रदर्शकानितानि । योगीश्वरवचसितेषामभावेपर्वस्यधनभागुत्तरोत्तरइतिक्रमपरत्वात्पत्न्यादिग
णस्यनिबद्धक्रमस्याभावेपितेषामर्थाविरोधात्पत्न्याद्यभावेपित्रादयोपुत्रधनग्राहिणइति । शङ्कितव्यभिचारायास्तुपत्न्याःहा
रीतेनधनग्रहणंनिषिद्धम् । विधवायौवनस्थाचेन्नारीभवतिकर्कशा । आयुषःक्षपणार्थन्तुदातव्यञ्जीवनन्तदेति । अस्मा
देववचनादनाशङ्कितव्यभिचारायाःसकलभर्तृधनग्रहणङ्गम्यते । अतएवशङ्खवचनेज्येष्ठावापत्नीत्युक्तंज्येष्ठागुणैःप्रशंस्या ।
नतुवयोज्येष्ठा । मनुनापिवर्णक्रमेणज्यैष्ठ्यङ्कथितम् । यदाह । यदिस्वाश्चपराश्चैवविन्देरन्योषितोद्विजाः । तासांवर्णक्र
मेणैवज्यैष्ठ्यम्पूजाचवेश्मचेति । अतःपरिणयनवयोभ्यांकनिष्ठापिसवर्णैवासवर्णातोज्येष्ठासवर्णास्वपिगुणवती । तथाच
मनुः । भर्तुःशरीरशुश्रूषान्धर्मकार्यञ्चनैत्यकम् । स्वाचैवकुर्य्यात्सर्वेषान्नास्वजातिःकथंचन ॥ यस्तुतत्कारयेन्मोहात्स्वजात्या
स्थितयान्यया । यथाब्राह्मणचाण्डालःपूर्वदृष्टस्तथैवसः । योगीश्वरोपि । सवर्णासुविधौधर्म्येज्येष्ठयानविनेतरा । तथाचय
ज्ञसंयोगात्पत्नीशब्देनापिसैवोच्यते । सवर्णायाश्चाभावेत्वनन्तरवर्णासैव । तथाचविष्णुः । सवर्णाभावेत्वनन्तरैवापदिनत्वेव
द्विजःशूद्रयाधर्मकार्य्यमिति । अत्रकुर्य्यादित्यनुवर्त्तते । तथाचब्राह्मणस्यब्राह्मण्यभावेक्षत्रियैवापदिनतुवैश्याशूद्रेपरिणी
तेष्वपि । क्षत्रियस्यक्षत्रियायाश्चाभावेवैश्यैव । वैश्यस्यानन्तरापिशूद्रानकिन्तुस्वैव । शूद्रायाःसर्वथानिषेधात् । तथाचानाश
ङ्कितव्यभिचारासवर्णाक्रमेणभर्तृधनंगृहीत्वान्याःसपत्नीःपरिपालयेत् । वपुःसादृश्यस्तुयथास्वम्विभज्यगृह्णीयुः । अतःपत्नीत्ये
कवचनन्त्वात्यभिप्रायेण । तस्मादपुत्रस्यासंसृष्टिनोविभक्तस्यप्रमीतस्यसाध्वीभार्य्याकृत्स्नधनाधिकारिणीविभक्तसंसृष्टिनोर

पुत्रयोः साध्यपि भरणमात्रं भ्रातृणां मम प्रजा इत्यादिस्मरणादिवचनमालभते । व्यभिचारिणीनां तु भरणमपि न । आह च हारीत
रास्त्यभिधानात् । यत्तु व्यभिचारिणीनामप्यन्नवस्त्रदानमुक्तम् । एवमेव विविधं कुर्य्याद्योषितस्तु पतितास्वपि । वस्त्रान्नमात्रं
देयं तु वसेयुश्च गृहान्तिके इति । तत्तु । हृताधिकारां मलिनां पिण्डमात्रोपजीविनीम् । परिभूतामधःशय्यां वासयेद्व्यभिचारि
णीमिति । भर्तारं प्रत्युत्तरयोगोत्तरे रणाभिधानात्तद्विसंवादेन भर्तृविषयकम् । तदपि प्रायश्चित्तावधि । अयोद्धृत्यात्तद
कुर्वन्तीनां त्वनेनापि निष्कासनमित्यादि प्रायश्चित्तप्रकाशे विवेक्ष्यामः । पत्नी दुहितरश्चेत्यस्य विभक्तासंसृष्टिविषयत्वं विभाग
स्य पूर्वमुक्तत्वात् संसृष्टिविभागस्य च सर्वापवादेनाग्रे वक्ष्यमाणत्वात् यौतुकं तु इति विज्ञानेश्वरलक्ष्मीधरस्मृतिचन्द्रिकाकार
विश्वरूपमेधातिथिमदनरत्नप्रकाशादीनां भूयसां संमतम् ॥ अथ पुत्रपदं पत्न्यादिसूत्रे भवतु पौत्रप्रपौत्राभावोपलक्षणम् ।
प्रपौत्रपर्यन्ताभाव एव पत्न्या धनग्रहणौचित्यात् । पुत्रपौत्रैर्ऋणं देयमिति वचनेन पौत्रस्यापि ऋणदानेऽधिकाराभिधानाद्रिक्थ
ग्राहकान्तरसत्त्वे च ऋणग्राहत्वं स्यादिति वचनात् पौत्रस्य ऋणदानाधिकारे सत्यपि पौत्रे तत्प्रतितद्विधानासम्भवाद्धनाज्जन्यादिना
ऋक्थग्रहणस्य रिक्थग्राह इत्यनेन तस्यापि सिद्धेः वैयर्थ्यं पौत्रविधेरतः पौत्रेऽपि पितामहऋणग्रहणेऽपि पुत्रवद्दृष्टान्तेयमित्युक्तेः
गडापूपिकया सतितद्विकर्षेण्यस्य सम्बन्धविकासे दूरं निरस्तः । एवमेव प्रपौत्रेऽपि न्यायः । अत एव प्रपौत्रसंग्रहार्थं पुत्रपौत्रै
रिति बहुवचनमितरथा द्विवचनत्वं स्यादभिप्रायकं बहुवचनमिति बालकल्पसंस्थान् । एवञ्चायमर्थः । पुत्रश्च पौत्रश्च पुत्रस्य पौत्रः
पुत्रपौत्रः स चेत्तिष्ठति तत्पुत्रस्य भ्रातरमावृत्य पुत्रपौत्रपदे पुत्रस्य पौत्रस्य च भिन्नाविभक्तत्वे पुत्रपौत्रौ च पुत्रपौत्र इत्येकशेषे तत्पुत्रस्वरूपपुत्र
पौत्रपदे सरूपैकशेषे बहुवचनेनोपपत्तिः । पुत्रपौत्रप्रपौत्रैरिति यावत् । पौत्रपदं प्रपौत्रोपलक्षणमन्या । पुत्रापेक्षया पौत्रस्य तद
पेक्षया प्रपौत्रस्य ऋणदाने । विशेषप्रकारविधिरप्यत एव सङ्गच्छते । अन्यथा प्रपौत्रे विशिष्टविधिकल्पनापत्तिः । त्रयाणामनु
ह्योपकारित्वरूपाविशेषविधिना पिण्डदानेनास्पष्टम् । तथा च मनुः । त्रयाणामुदकं कार्यं त्रिषु पिण्डः प्रवर्तते । चतुर्थः सम्प्रदा

तेषाम्पञ्चमोनोपपद्यते । बैाधायनोपि । पुत्रपौत्रप्रपौत्रानननुक्रम्याह प्रपितामहः पितामहः पितास्वयंसोदर्य्याभ्रातरः सवर्णा
याः पुत्रः पौत्रः प्रपौत्रएतानविभक्तदायादान्सपिण्डानाचक्षते । विभक्तदायादांश्चसकुल्यानाचक्षते । सत्स्वङ्गजेषुतद्गामीह्य
र्थोभवती ति । अस्यार्थः । पित्रादिपिण्डत्रयेषुसपिण्डनेनभोक्तृत्वात्पुत्रादिभिस्तत्पिण्डस्यैवदानात् । योहिजीवन्पिण्डदाताम
मृतः सन्सपिण्डनेनतत्पिण्डभोक्ता । एवंमध्यस्थितः पुरुषोजीवन्पूर्वेषांपिण्डदातामृतश्चतत्पिण्डभोक्तापरेषाञ्जीवतांपिण्डसंप्र
दाननंमृतैश्चतैः सहदैाहित्रादिदेयपिण्डभोक्ताश्चतोयेषामयंपिण्डदातायेवातद्दत्तपिण्डभोक्तारस्तेऽविभक्तंपिण्डरूपन्दायम
श्नन्तीत्यविभक्तदायादाः सपिण्डाएकपिण्डसम्बन्धात्पञ्चमस्यतुपूर्वस्यमध्यमः पञ्चमोनपिण्डदातानचतत्पिण्डभोक्ताएवमधस्त
नोपिपञ्चमोनमध्यमस्यनपिण्डदातानापितद्भोक्ता । एतेनवृद्धप्रपितामहात्प्रभृतिपूर्वपुरुषास्त्रयः प्रतिप्रणप्तृप्रभृत्यधस्तनपुरु
षास्त्रयएकपिण्डभोक्तृत्वाभावाद्विभक्तदायादाः पञ्चमप्रभृतयउभयतः सकुल्याइत्याचक्षतेमुनिः कुलमात्रसम्बन्धात् । इदंसपि
ण्डत्वंसकुल्यत्वंदायग्रहणोपयोगित्वेनोक्तन्तत्प्रकरणपाठात् । अशैाचविवाहाद्यर्थन्तुपिण्डलेपभुजामपि ॥ लेपभाजश्चतुर्था
द्याः पित्राद्याः पिण्डभागिनः पिण्डदः सप्तमस्तेषांसापिण्ड्यंसाप्तपैारुषमितिस्मरणात् । सपिण्डतातुपुरुषेसप्तमेविनिवर्त्ततइ
तिच । पञ्चमात्सप्तमाटूर्ध्वंमातृतः पितृतस्तथेतियोगीश्वरवाक्यैकवाक्यासप्तमेपुरुषेस्थित्वाष्टमेविनिवर्त्ततइतिव्याख्येयम् । ते
नयथाप्रत्नानान्तुस्त्रीणान्त्रिपुरुषम्विज्ञायतइत्याशैाचप्रकरणपठितन्तन्मात्रोपयोगित्रिपुरुषंसापिण्ड्यन्तथेदम्विभागमात्रे
पयोगीतिध्येयं । कात्यायनस्तुस्पष्टमेव । पुत्रपैात्रप्रपैात्राणान्धनग्रहणमाह । अविभक्तेमृतेपुत्रेतत्सुतंरिक्थभागिनम् । कु
र्वीतजीवनंयेनलब्धन्नैवपितामहात् । लभेतांशंसपित्र्यन्तुपितृव्यात्तस्यवासुतात् । सएवांशस्तुसर्वेषांभ्रातॄणांन्यायतोभवेत् ।
लभेततत्सुतोवापिनिवृत्तिः परतोभवेत् । इतिप्रपैात्रानन्तरमुक्तोयः प्रणप्तृप्रभृत्यनधिकारः ससपिण्डत्वेनध्येयः । सकुल्य
त्वेनत्वस्त्येवयथाप्रत्यासत्तिः । भ्रातॄणामेकजातानामित्यादितुदायातिरिक्तश्राद्धादिपुत्रकार्य्यकारित्वपरंभ्रातृपुत्रस्यपुत्रीकर

णसम्भवेनान्यःपुत्रीकरणीयइतिनियमार्थम् ॥ अन्यथाभ्रातृपुत्रस्यभ्रात्रनन्तरमभिधानमपुत्ररिक्थहार्य्यभिधायकेवाक्येक्र
मपरेनसङ्गच्छेत । पुत्रादीनान्त्रयाणामपित्रादित्रिकमहोपकारकारित्वात्पुत्रादिभिर्गृहीतन्धनंस्वामिनएवोपकारकमुपका
रप्रत्यासत्यातदीयमेव । उपकारप्रत्यासत्तिश्चाभ्यर्हिता । यथाह । ज्येष्ठेनजातमात्रेणपुत्रीभवतिमानवः । पितॄणामनृण
श्चैवसतस्माल्लब्धुमर्हति ॥ तस्मादितिहेतुत्वेनोपकारकत्वस्योपन्यासाद्दायभागप्रकरणेधनस्वाम्युपकारकत्वातिशयोयत्रास्ति
तस्यतद्धनस्यभवतिसएवतद्धनग्राहीतिप्रत्यासत्तिरौत्सर्गिक्यभ्यर्हिताचेतिसूचितम् । पुत्रादीनांमहोपकारकत्वञ्चानेकश्रु
तिस्मृतिपुराणादिप्रसिद्धम् । तत्रश्रुतिर्हरिश्चन्द्रोपाख्यानेवह्वृचब्राह्मणे । यंत्विमम्पुत्रमिच्छन्तियेविजाननियेचन । किं
स्वित्पुत्रेणविन्देततन्मआचक्ष्वनारदेतिगाथयाहरिश्चन्द्रेणपृष्टोनारदोदशभिर्गाथाभिःपुत्रमाहात्म्यपराभिःप्रबोधितवानि
त्युक्तम् । सएकयापृष्टोदशभिःप्रत्युवाच ऋणमस्मिन्सन्नयत्यमृतत्वञ्चगच्छति । पितापुत्रस्यजातस्यपश्येच्चेज्जीवतोमुखमि
त्यादिनास्मृतयश्च । मनुविष्णू । पुन्नाम्नोनरकाद्यस्मात्पितरन्त्रायतेसुतः । तस्मात्पुत्रइतिप्रोक्तःस्वमेवस्वयम्भुवा । शङ्खलि
खितौ । पितृणामनृणोजीवन्दृष्ट्वापुत्रमुखम्पिता । स्वर्गीसुतेनजातेनतस्मिन्संन्यस्यदूषणम् । अग्निहोत्रञ्चवेदाश्चयज्ञा
श्चैवसदक्षिणाः । ज्येष्ठपुत्रप्रसूतस्यकलांनार्हन्तिषोडशीम् । मनुविष्णुवसिष्ठहारीताः । पुत्रेणलोकाञ्जयतिपौत्रेणा
नन्त्यमश्नुते । अथपुत्रस्यपौत्रेणब्रध्नस्याप्नोतिविष्टपम् ॥ याज्ञवल्क्यः । लोकानन्त्यन्दिवःप्राप्तिःपुत्रपौत्रप्रपौत्रकैः । यस्मात्त
स्मात्स्त्रियःसेव्याःकर्त्तव्याश्चसुरक्षिताइति । पुराणादिषुतूपाख्यानानिपुत्रादिप्रशंसापराणीनिवहूनि । तस्मात्प्रपौत्रपर्य्यन्ता
भावेविभक्तासंसृष्टपतिरिक्थहारिणीपत्नीतिसिद्धम् । अत्रजीमूतवाहनः । वृहस्पतिविरोधान्नेयंव्यवस्थायदाह । विभक्ताभ्रा
तरोयेचसम्प्रीत्यैकत्रसंस्थिताः । पुनर्विभागकरणेतेषांज्यैष्ठ्यंनविद्यते । यदाकश्चित्प्रमीयेतप्रव्रजेद्वाकथञ्चन । नलुप्यतेत
स्यभागःसोदर्य्यस्यविधीयते । यातस्यभगिनीसातुततोंशंलब्धुमर्हति । अनपत्यस्यधर्म्मोयमभार्य्यापितृकस्यच । संसृष्टा

नान्वयः कश्चिद्दिव्यशौर्य्यादिनाधनम् । प्राप्नोति तस्य दातव्योऽंशः शेषाः स्मर्त्ताभिनदृति । अत्रोपक्रमोपसंहारयोः संसृष्ट
त्वकीर्त्तनात्तन्मध्ये च पठितमनुपपन्नं तस्य भागः सोदर्य्यस्य विधीयत इति वचनं संसृष्टिविषयमवश्यमभ्युपेयं न चानपत्यस्य धर्मो
यमभार्य्यापितृकस्य चेत्यभिधानात्पुत्रदुहितृपत्नीपितृणामभावे संसृष्टसोदराधिकारः प्रतीयत इति कथमस्य पत्नीबाधकत्वम् ।
किञ्चनन्नुपपन्नमिति संसृष्टाविभक्तभ्रात्रनन्तरीयद्रव्यस्य मिश्रीभूतस्य लोपाशङ्कायामुपपद्यते । अविभक्ता संसृष्टधने तु विभक्ते का
लोपशङ्का तस्मात्संसृष्टविषयत्वमेवामीषां लिङ्गादपि । किञ्च । पत्नीतः पूर्व्वं भ्रात्रधिकारबोधकशङ्खादिवचनानां संसृष्टाविभ
क्तविषयत्वं विस्पष्टवचनान्तरन्यायाद्वा प्रवलादुच्यते । नाद्यः विस्पष्टविशेषवचनाभावात् । संसृष्टिनस्तु संसृष्टीत्यादिवक्ष्य
माणवचनन्तु भ्रात्रधिकारावसरे विशेषकथकं नामुमर्थमवगमयति । बृहस्पतिवचनन्तु पुत्रादिपितृपर्य्यन्ताभावे संसृष्टसोद
राधिकारबोधकं प्रत्युतासंसृष्टविषयकतामेवावगमयति । न द्वितीयः । न्यायो ह्ययमाख्यः । अविभागसंसर्गयोर्य्यदेकस्य धन
न्तदेवापरस्यापीति मृतस्य तत्स्वत्वेऽपगतेऽपि जीवतस्तत्स्वत्वानपगमिताद्युक्तानस्वाम्यन्तरकल्पनेति । न चासौ युक्तः । अविभागसं
सर्गवतामप्यविज्ञातैकदेशव्यवस्थितिप्रतिनियताश्रयमेव स्वत्वं नत्वेकैकत्र सर्व्वेषां नापि समग्रे अनेकस्वत्वोत्पादविनाशकल्पना
प्रसङ्गात् । किञ्च । पाणिग्रहणाद्धि सहत्वमित्यादिप्राग्लिखितगौतमादिवचनेभ्यः पत्न्याः परिणयादुत्पन्नम्पतिधने स्वत्वमविभ
क्तसंसृष्टभर्त्तृमरणे नश्यत्यन्यत्र च न नश्यतीति कल्पनायाम्प्रमाणाभावः । पुत्रादिषु सत्सु तदधिकारशास्त्रबलादेव पत्नीस्वत्वना
शः कल्प्यते । अत्रापि संसृष्टाविभक्तभ्रात्रधिकारशास्त्रात्तन्नाशः कल्प्यत इति चेत् । अन्यस्य तादृशशास्त्रस्यादर्शनात् । अस्य
चेतरथा अन्योन्याश्रयप्रसङ्गादसिद्धेः । सिद्धे हि संसृष्टाविभक्तभर्त्तृमरणे पत्नीस्वामित्वनाशे भ्रात्रधिकारशास्त्रस्य तद्विष
यकत्वम् । सिद्धे च तस्मिन्पत्नीस्वत्वनाशकल्पनेति । अत एव योगीश्वरविष्ण्वादिवचने पुत्रराहित्यमेवोपात्तं न तु विभक्तत्वासं
सृष्टत्वे । विभागस्योक्तत्वात्संसृष्टिनाञ्च वक्ष्यमाणत्वाद्यथोपात्तमेवेति चेत् । तर्हि मुख्यगौणपुत्रेषु रिक्थग्राहितयोक्तेषु तद

इतिविषयत्वमप्यर्थात्सिद्धमतोऽप्यपुत्रत्वमपिनोपादेयम् । अपुत्रस्यैतएवानेनैवक्रमेणेतिनियमार्थतयातत्सार्थक्यमन्ययोरपितु
ल्यम् । विभागोक्तपर्यवसानन्तुनजानीमेव । संसृष्टिवचनंभ्रात्रधिकारावसरेविधानार्थन्नपत्न्याद्यपवादार्थमित्युक्तमेवकिञ्च
। शङ्खलिखितादिवचनानामविभक्तसंसृष्टभ्रातृपरत्वेनाप्यस्याऽपुत्रस्यधनन्तद्विधभ्रातृगामितदभावेपितरौहरेतामित्यस्यको
र्थःतदाचविकल्पनीयम् । किमविभक्तासंसृष्टौपितरौगृह्णीयातामिति । उताविभक्तसंसृष्टाविति । तत्रप्रथमःकल्पः
। तादृशयोःपित्रोःपत्नीबाध्यत्वात्कथंभ्रात्रभावेपत्नीतःपूर्वन्तयोरधिकारबोधः । नापिद्वितीयः । अविभक्तसंसृष्टपितृव्याद्य
पेक्षसर्वेषामविवादाद्वचनवैयर्थ्यात् । अपिच । यथापित्राभ्रात्राचविभक्तासंसृष्टधनेशरीरदातृतयाआत्मावैजायतेपुत्रःय
थैवात्मातथासुतइत्येकत्वस्मृतेर्द्धनदेहयोरपौत्रयोःपितुःप्रभुत्वात्पितृदेयपितामहप्रपितामहपिण्डयोर्द्वयोःसपिण्डनेनमृ
तस्यपुत्रस्यभोक्तृत्वाज्जीवतिचपितरिपुत्राणांपार्वणपिण्डदानाभावाद्भ्रातृभ्यःपूर्वम्पित्रोरधिकारस्तथेतरत्रापियुक्तः । अविभा
गसंसर्गयोरविशेषाद्भ्रातुस्त्वाधिकारोयुक्तोनतुमात्रभावेपितुरिति । किञ्चपित्रोरविभक्तसंसृष्टत्वविशेषणमनुपपन्नंमात्रास
हविभागाभावेनाविभक्तविशेषणानर्थक्यात् । अतएवसंसर्गाभावोऽपि । विभागपूर्वकत्वात्तस्य । यथाहबृहस्पतिः । विभक्तो
यःपुनःपित्राभ्रात्राचैकत्रसंस्थितः । पितृव्येणाथवाप्रीत्यासतत्संसृष्टउच्यतइति । एतेनयेषामेवहिपितृभ्रातृपितृव्याणांपितृपि
तामहार्ज्जितद्रव्येणाविभक्तत्वमुत्पत्तितःसम्भवतितएवविभक्ताःसन्तःपरस्परप्रीत्यापूर्वविभागध्वंसेनयत्तवधनन्तन्ममयच्च
ममतत्तवेत्यभिन्नतयैकपाकेनपूर्ववदेकगृहितयास्थिताःसंसृज्यन्ते । नपुनरनेवम्भूताद्रव्यसंसर्गमात्रेणावणिजामपिसम्भूय
समुत्थानेसंसृष्टत्वव्यवहारापत्तेः । प्रीतिपूर्वकाभिसन्धिरहितानांसौकर्य्यादिवशाद्द्रव्यमिश्रणेनव्यवहारादिकुर्वतांभ्रात्रा
दीनामप्यतएवनसंसृष्टिव्यवहारः । तस्मान्मातृगतोभ्रातृसद्भावाधिकारविरोधोदुःसमाधः । अतःप्रपौत्रपर्यन्ताभावएवावि
शेषेणापुत्रप्रमीतभर्तृधनेसमस्तेऽधिकारिणीपत्न्येवेरमणीयम् । नत्वश्रुतासंसृष्टविभक्तगोचरत्वकल्पना । जितेन्द्रिया

द्वयोरप्येवमाहुः । प्रपौत्रपर्य्यन्ताभावे तस्याश्चापि भर्त्तुः श्राद्धादिनोपकारकत्वातिशयात् । पत्न्येव दद्यात् तत्पिण्डं कृत्स्नमंशं हरे
त्चेति मनुवचनादिभ्यः । व्यासोपि । मृते भर्त्तरि साध्वी स्त्री ब्रह्मचर्य्ये व्यवस्थिता । स्नाता प्रतिदिनं भर्त्त्रे दद्यात् स्वाञ्जली
न् । कुर्य्याच्चानुदिनं भर्त्तुर्यादेवतातिथिपूजनम् । विष्णोराराधनञ्चैव कुर्य्यान्नित्यमनुव्रता ॥ दानानि विप्रमुख्येभ्यो दद्यात् पुण्य
विवृद्धये । उपवासांश्च विविधान् कुर्य्याच्छास्त्रोदितान् शुभे ॥ लोकान्तरस्थं भर्त्तारमात्मानञ्च वरानने । तारयत्युभयं नारी नि
त्यं धर्म्मपरायणेत्यादि । तस्मात् पत्न्या अपि पतितनरकनिस्तारकत्वाद् न हीनतया वाऽकार्य्यं कुर्वन्ती स्त्रीया पुण्येनार्द्धशरीरसंरक्ष
णायार्द्धं शरीरस्य यस्य भार्य्या सुराम्पिवेदित्यादिलिङ्गदर्शनात् पतिमपि पातयेदिति तया गृहीतं स्वाम्यर्थमेव तद्धनं भवतीति सर्वेभ्यो
न्येभ्यः पूर्वम्पत्न्या एव पतिधनग्रहणं युक्तम् ॥ शङ्खादिवचने तु व्यवहितयोजना कार्य्या । अपुत्रस्य पुत्रपौत्रप्रपौत्ररहितस्य स्व
र्य्यातस्य धनं ज्येष्ठाप्रथमस्यतमापत्नी लभते । तदभावे दुहितृदौहित्रयोश्चाभावे पितरौ लभेयातां तदभावे भ्रातृगामीति । त
दाभाव इति मध्यपठितं पूर्वोत्तराभ्यामविरोधान्न्यायस्य पूर्वमुक्तत्वाच्च सम्बध्यते । भ्रातॄणामप्रजाः प्रेयादित्यादीनि नारदादि
वचनान्यपत्नीरूपपरिणीतस्त्रीविषयाणि । स्त्रीशब्दमात्रोपादानात् तत्र । अत्र च पत्नीशब्दोपादानात् । परिणीतानामपि पत्
नीत्वम्प्राक्प्रपञ्चितम् । अत एव नारदस्यैव वचनान्तरे । अन्यत्र ब्राह्मणात् किन्तु राजा धर्म्मपरायणः । तत्स्त्रीणां जीवनं दद्या
देष दायविधिः स्मृत इति ॥ स्त्रीशब्दश्रवणाद् पत्नीनामब्राह्मणस्त्रीणां वर्त्तनदानमाह । पत्नीनान्तु ब्राह्मणस्त्रीणामपि कृत्स्न
भर्त्तृधनाधिकारमाह बृहस्पतिः । येऽपुत्राः क्षत्रविट्शूद्राः पत्नीभ्रातृविवर्ज्जिताः । तेषां धनं हरेद्राजा सर्वस्याधिपतिर्हि सः
। पत्नीभ्रातृविवर्ज्जिता इति सब्रह्मचारिपर्य्यन्तानामभावोपलक्षकम् । तेषां वक्ष्यमाणानां मध्ये राज्ञोऽननुप्रवेशात् । प्रदर्शितविष्णुव
चने सहाध्यायिपर्य्यन्तानभिधाय तदभावे ब्राह्मणधनवर्ज्जं राजगामीति कथनाच्चेति तत्त्वं विविनक्तिस्म । तत्रेदमालोचनीयं । ना
रदशङ्खादिवचनानामविभक्तसंसृष्टिविषयत्वेन या व्यवस्था तत्र न्यायविरोधो वा द्वयोर्वचनविरोधो वा । न तावन्न्यायविरोधः ।

बाधकन्यायस्याभावात्। प्रत्युत साधकोन्यायोस्ति। तथाहि। अविभक्तप्रमीते तावत्तस्यांशएवनाभूत्किमियं गृह्णातु संसृष्टे ज्ञा
तोप्यंशः पुनः साधारणस्वत्वात्पत्न्यापगतः। नच साधारणस्वत्वाश्रयोप्यविविक्तस्तद्भागोस्त्येवेति वाच्यम्। अस्तु तावत्तापि यत्प्रति
योगिकं साधारणं स्वत्वं तदपगमे विद्यमानस्वत्वकः संक्रमएवोचितो नत्वन्यस्वत्वोत्पत्तिकल्पना। पाणिग्रहणाद्धि सहत्वङ्कर्मसु
तत्फलेषु द्रव्यपरिग्रहेषु चेति गौतमवचनात्तत्पत्न्या अपि तद्भागेऽविविक्तेपि स्वत्वमुत्पन्नं तन्नाशः किमिति तत्स्वत्वे कल्प्यतइति चेन्न
। औपपत्तिको हि न तु तात्त्विकः। पत्न्याः पतिद्रव्ये स्वत्वं क्षीरनीरवदेकलोलीभावापन्नं सहाधिकारिककर्मोपयोगितनुभ्राल्लया
मिव परस्परं। ततएव तेषां विभागो न तु जायापत्योः। एतन्न्यायमूलकमेव जायापत्योर्न विभागो विद्यतइति वचनम्। तथाच प
त्युः स्वत्वापगमे तस्याः स्वत्वापगमस्तत्रावश्यकः। एवञ्चाविभक्तसंसृष्टिपतिस्वापनेये पत्न्याः स्वत्वोत्पत्तिः कल्प्यतामविभक्तसंसृष्टि
स्वत्वस्य स्वतोः साधारण्यं वेति वीक्षायामुत्तरपक्षकक्षीकरणमेवोचितं लाघवात्। नच पत्न्येव विभागप्रतियोगिनी॥ प्रापकप्रमा
णाभावात्। नचैतान्येव वचनानि प्रापकानि। तेषां विषयविवादाद्विभक्तासंसृष्टिविषयत्वेनाप्युपपत्तेः। अत एवान्योन्याश्र
योपि दवीयान्। विमर्शदशायान्तदप्रसङ्गात्। सति विमर्शे तद्विषयत्वनिश्चयादेव। अविभागसंसर्गवतामपीत्यादिवचनवदु
क्तन्नास्मत्पक्षक्षतिक्षमम्। प्रतिनियताविविक्तस्वत्वस्वीकारेपि संसृष्टाविषयतायान्यायान्तरविरुद्धत्वात्। नचाश्रुतविभक्ता
संसृष्टविषयत्वम्पत्नीत्यादिवाक्यानामप्रमाणकम्। विरुद्धनारदादिवचनानां व्यवस्थान्तरासम्भवे पूर्वोपपादितन्यायोपष्ट
म्भार्थापत्तेरेव प्रमाणत्वात्। व्यवस्थान्तरसम्भवञ्च दूषयिष्यामः। नच यथाविभागस्य क्रान्तासंसृष्टिनाऽवश्यमागत्वाद्दर्शिविभक्ता
संसृष्टिधनपरत्वम्पत्नीत्यादेर्यातीति तदनुपादानन्तथा मुख्यगौणपुत्रविभागमुक्त्वा पत्नीत्यादिवचनारम्भात्पुत्रधनविषयत्व
त्वमपि सिद्ध्यतीति तेषामित्यपुत्रस्यैवापि न वाच्यमिति वाच्यं। एकएवौरसः पुत्रः नभ्रातरो न पितरौ पुत्रा रिक्थहराः पितुरित्यस्यार्थस्य सु
व्यन्तरेण तस्य योगीश्वरेण वचनान्तरेणानुक्तेस्तदवबोधनार्थत्वात्। अन्यथा जीवदवर्जीविभागयोः सत्त्वपि पुत्रेषु पितृपत्नीनांवर्य

शुभाक्रान्तथात्रापीतिशङ्कास्यात्। पुत्रविभागपर्यवसानत्वनात्वान्न तच्छङ्कावसर इति यदि तर्हि स्मृत्यन्तरेष्वेकस्यैवौरसोत्भ्रातरेणापि नर इति स्वतंत्रस्यमुख्यगौणपुत्रसत्वे पत्न्याधनाधिकारप्रतिपादकस्यास्यस्तुतरामानर्थक्यं स्थानस्पष्टीकरणार्थे त्वर्थन्यायसिद्धमपि निबध्यते व्यवहारस्यास्य इति समाधिः पदमात्रे स्तुतरां स्तुवदः। स्पष्टार्थे विभक्तासंसृष्टत्वेऽपि पुत्रेणोपान्तरेतिचेत्। स्वतन्त्रेच्छत्वान्मुनीनाम्। आक्षेपे स्वतिविभिन्नानुसरणमिति न्यायेच यथा न्यायार्थसिद्धानिबन्धनमस्ति। नत्वसिद्धस्य गतिश्चिन्तनीयेति रीत्या स्पष्टीकरणार्थं तथा वैयर्थ्यं परिहृयते नतु तदभिधानमपार्थकं सर्वेषां चोचितम्। यत्वसंसृष्टिनस्तु संसृष्टीत्यस्याभ्रात्रधिकारावसरे विशेषविधानमात्रार्थत्वपत्न्याद्यपवादकत्वमित्युक्तं तदतिवार्तम्। तुशब्दविरोधात्। उत्तरोत्तरम्पूर्वापवादसन्दर्भाच्च। अत एव प्रतिबाधकं तु शब्दोपादानम्। क्लीबादिवाक्यमुत्पादितमत्र दाययहणाधिकारिसंज्ञोक्त्वादिनाधिकारापवादकमिति। अत एवामिताक्षरायां विज्ञानेश्वरेणाचार्येण तान्येव तानि च मान्यवतारितानि व्याख्यातानि च। यत्तु किञ्चेत्यादिनाशङ्कालिखितवचनेभ्रातृभावेपितोरधिकारे विकल्पस्याभिज्ञानसादृप्रतिफलितम्। महद्दत्तयापि व्युत्क्रमेण विभक्तासंसृष्टपितृपरत्वेन तस्य व्याख्यातुं शक्यत्वेनैकापत्त्यपनुयोगात्। यच्चापित्यादि। तदपि तुल्ययोगक्षेममित्युपेक्ष्यम्। यदपि किञ्चेत्यादि। तदपि मात्रंशे विशेषणासम्बन्धेऽपि योग्यतया प्रियेसम्बन्धादचोद्यम्। वस्तुतस्तु साक्षात्मात्रा विभागाभावेऽपि जीवद्विभागेऽपि विच्छेयानस्याप्यपि भागसम्भवादजीवद्विभागेतु साक्षादेव विभागोक्तेः प्रीत्याऽभिसन्धिविशेषपूर्वकमुक्तैः सहसंसर्गासम्भावात्। नचैवं विभक्तो यइत्यादिबृहस्पतिवचनविरोधः। अत एवमिताक्षराकृतानाप्युक्तम्। संसर्गश्च न येन केनापि। किन्तु पित्रा पितृव्येणावेत्यत्र सम्मतिमेनेन तद्वचनमुपन्यस्ततेतिवाच्यम्। यतस्तथा सति सकललोकव्यवहारविद्धे दौहित्रादिसंसर्गोऽप्यन्याप्यः स्यात्। तस्माद्येषाम्परस्परविभागस्तेषामेव तत्पूर्वकः परस्परसंसर्गोऽप्यभिसन्धिविशेषपूर्वको न परस्परद्रव्यमिश्रीकरणमात्रेणावणिगादीनामिवेत्यत्र बृहस्पतिवच

ननान्दृश्वश्रूमात्रादिनिवृत्तौ । त्रिदोषपरिसंख्यापत्तेः । अत एव मात्रा वापितृव्येणाथवेत्यनास्थायां वादिभिहस्तत्वोपात्तः । रत्नाकरे चण्डेश्वरेणाप्युक्तम् । अनास्थायां वाकारः । तेन पितृव्यजेनांशिनाकृतविभाग एकत्र स्थितः संसृष्टः सर्वलोकगृहीतो लभ्यत इति । वाचस्पतिरप्येवमेवाह । यत्तु तेनोक्तं पृथग्धनानामेकत्र मेलनमेव संसर्गो लाघवात् । ननु विभागपूर्वकत्वं तत्र विशेषणम्परस्परानुमतिश्च तत्र हेतुरिति । तन्न । पुनःशब्दविरोधात् विभागेऽपि संसर्गशब्दप्रयोगापत्तेः । जन्मना स्वत्वानङ्गीकारेण तत्रापि धनसम्बन्धाभावेन पुत्रद्वारैव तत्सम्बन्धात् प्रसक्तो रिक्थलोभेन नियोगस्वीकारः प्रतिषिध्यते । न चात्रापि पत्नीभिन्नाया भार्य्याया भर्तृधनानधिकारात् तस्या एव रिक्थलोभेन प्रसक्तो निषिध्यते नियोगस्वीकार इति न भवत्यप्रसक्तिप्रतीक्षेति वाच्यम् । पत्न्या एव तत्र प्रस्तुतत्वात् तद्भिन्नभार्य्यापरत्वानुपपत्तेः । अत एव धारेश्वरादिभिर्नियोगार्थिपत्नीपरत्वे पत्नीत्यादिवाक्यस्येदमेवविरुद्धवचनम्प्रमाणतयोपन्यस्तम् । तस्मान्नारदवसिष्ठवाक्यबलात्संसृष्टिभर्तृधनग्रहणप्रतिषेधः पत्न्या वृहस्पतिवचने चानपत्यस्य धर्म्मोऽयमभार्य्यापितृकस्य चेति कथनात्पत्न्यां सत्यां सोदरस्यापि संसृष्टिभ्रातृधनग्रहणप्रतिषेध इति विरोधश्चावश्यकः कथञ्चिद्विषयव्यवस्थया परिहर्त्तव्यौ परिहृतोऽन्यैः परिह्रियते । सन्दंशोत्थितप्रकरणवत्वात्प्रसक्तमप्यभार्य्यापितृकस्य संसृष्टिविशेषणत्वमन्यथासिद्धनारदादिवाक्यानुरोधात् संसृष्टिपरत्वावश्यकतया बाध्यते । वाक्यविरोधे प्रकरणस्याप्रयोजकत्वात् । न चायमिति सर्वनाम्ना संसृष्टिधनग्रहणरूपधर्म्मस्य प्रक्रान्तस्यानेन विशेषाभिधानात् अनपत्यस्येतिवदभार्य्यापितृकस्येत्यस्यापि संसृष्टिप्रमीतविशेषणत्वमिति वाक्ययोरैक्ये विरोधः न वाक्यप्रकरणयोरिति वाच्यम् । सर्वनाम्नः संसृष्टिधनग्रहणपरामर्शकत्वेऽपि सोऽयमनपत्यसंसृष्टिस्वामिकधनग्रहणरूपो धर्म्मो भार्य्यापितृरहितस्य संसृष्टिनोऽप्यनपत्यस्य प्रमीतस्य । असंसृष्टिविभक्तप्रमीतस्य धनन्तु भार्य्यापितृसहितस्यैवानपत्यस्य सोदरो गृह्णीयान्न भार्य्यापित्रन्यतरवदिति वाक्यार्थोपपत्तेः । चकारोऽप्येवमनुक्तासंसृष्टिसमुच्चयार्थो व्याख्येयः अतश्चासंसृष्टविषये यानेन प्रकारेण विच्छेदे जाते संसृष्टानामनुयः कश्चिदित्यमिम

वाक्ये संसृष्टपदोपादानमपि सार्थकं भवति ॥ अन्यथा प्रक्रमादेवात्रापि तल्लाभे तन्मन्दप्रयोजनं स्यात्। अत एव ताण्डीये निवि
ष्टधिकरणेऽसम्बद्धनिविद्विच्छिन्नसामिधेन्यवान्तरप्रकरणाग्रह्यमुपवीतनसामिधेन्यङ्गमपि तु महाप्रकरणाद्दर्शपूर्णमासाङ्ग
म्। ये तु पश्चात्पन्नाङ्गुणास्ते पुनर्वचनादेव दूरस्थानुवादेनैव द्वादशोपसान्त्ववत्सामिधेन्यनुवादेन विधीयत इति भट्टमतेन सिद्धा
न्तितम्। वस्तुतस्तु यातस्य भगिनीत्यनेन सोदराभावे वैमात्रेयभगिन्यधिकारः संसृष्टिधने प्रतीयते। तस्यैवाव्यवहितस्यानपत्यस्येति
वाक्यशेषस्थेनायमिति सर्वनाम्ना परामर्षस्त्ववचनकोऽपि विरोधः। चन्द्रिकायामप्येवमेवोक्तम्। अविभक्तापुत्रपतिस्वामिकस्व
ल्पधनग्रहणन्तु पत्न्याः कात्यायनवचनविरुद्धम्। यदाह। स्वर्याते स्वामिनि स्त्री तु ग्रासाच्छादनभागिनी। अविभक्ते धनांशे
तु प्राप्नोत्यामरणान्तिकम्॥ तु शब्दो वा शब्दार्थे न था चायमर्थः। ग्रासाच्छादनमेव साक्षाल्लभते आमरणान्तिकँ यावज्जीवँ या
वता धनेन जीवनं त्वधिकारिकमावश्यकञ्च कर्म्म सिद्ध्यति तावदन्यधनांशम्वा प्राप्नोति। धनांशमामरणान्तिकमित्युक्तेः कार्त्स्न्येन धन
मविभक्तस्य पत्युर्लभत इति निरस्तम्। न च स्त्रीशब्दस्य वशात्पत्नीव्यतिरिक्तस्त्रीपरमिदमपीति वाच्यम्। अविभक्त इति विशे
षणानर्थक्यापत्तेः। विभक्तेऽपि भर्त्तरि पत्नीभिन्नाया अपुत्राया भरणमात्रोक्तेः। अत एव क्षतेऽप्यंश इत्यनुवृत्तौ बृहस्पतिः। प्रदद्या
न्नैव पिण्डं स्त्रीक्षेत्रांशं वा यदीच्छति। अस्य व्याख्यानं स्मृतिचन्द्रिकायां। पिण्डग्रहणमशनाच्छादनोपलक्षणार्थं तत्पर्य्याप्तं धन
न्तस्याम्यादेकं क्षेत्रांशम्वा स्वरुच्या भर्त्तृधनग्राही पत्नीव्यतिरिक्तविधवायै भ्रात्रादिस्तद्धनग्राही प्रदद्यात्॥ एवकारः प्रदानस्यावश्यक
र्त्तव्यत्वार्थ इति। एतद्विषयकमेव नारदवचनम्। यावन्तो विधवाः साध्व्यो ज्येष्ठेन श्वशुरेण वा। गोत्रजेनापि वान्येन भर्त्तव्याश्छा
दनाशनैरिति॥ भर्त्तृधनग्राहिणीति सर्वविशेषः। धनग्रहणनिमित्तत्वाद्भरणं स्यात्। साध्व्य इत्यनेन सर्वत्र साध्वीनामेव भरण
मसाध्वीनान्तु पत्नीनामपत्नीनाञ्च न तदपि। आच्छिंद्युरितरास्त्विति प्रागुक्तनारदवचनवाक्यशेषादिभ्यः॥ अत एव साध्वीनां
जीवनार्थं श्वशुरादिभिर्द्दत्तमन्यैरपि दायादैर्नापहरणीयमित्यप्याह बृहस्पतिः। स्थावरादिधनं स्त्रीभ्यो यद्दत्तं श्वशुरेण तु। न

तच्छक्यमपाहर्त्तुं न्दायादैरिहकर्हिचिदिति ॥ अन्यादृशीनान्तुदत्तमप्यपहर्त्तव्यमित्याह कात्यायनः। भोक्तुमर्हति कृप्तांशं गुरुशुश्रूषणे रता। नकुर्य्याद्यदि शुश्रूषां चैलपिण्डेनियोजयेत्। अपकारक्रियायुक्ता निर्लज्जा चार्थनाशिका। व्यभिचाररता या च स्त्री धनमर्हति ॥ नार्हतीत्यनेनन देयं स्त्रीधनपर्य्याप्तमपि। दत्तमपि च ताद्दृश्याः सकाशादपहरणीयमितिद्वयमप्युक्तम्भवति। यत्तु तस्मात्स्त्रियोनिरिन्द्रिया अदायाइति श्रुतिवचनं तन्मूलकञ्च अनिन्द्रिया ह्यदायादाः स्त्रियो नित्यमिति स्थितिरिति मनुवचनं तद्द्वयमपि यासांश्श्रृङ्गयाहिकया धनग्रहणं नोक्तन्तद्विषयमवसेयं। गौतममिताक्षरयोः हरदत्तोप्येवमेवाह। केचित्तु निरिन्द्रियपदसमभिव्याहाराद्गिन्द्रामात्रपरं तदित्याक्रुस्तन्न। दायादत्वांशेनिन्द्रायानिषेधकल्पनावश्यम्भावात्। स्त्रीगाह्यायमेव प्राप्तेर्न्नित्यानुवादासम्भवात्। अनिन्द्रियत्वन्तु पुम्पारतन्त्र्यात्कश्चिदनुवादः। वस्तुस्वभावविपरीतनिषेधकल्पनस्यवाधात्। तस्मात्पूर्वोक्त एव समाधिः। पराशरस्मृतिटीकायां विद्यारण्यादिनाप्युक्तं नन्त्राप्नन्त दविभाज्यमितिव्याचखुः पत्नीवत्तग्रहे पन्त्यार्थानास्त्रीत्यदायादपदस्यार्थः। नच हेतुरनिन्द्रियाइति इन्द्रियं वै सोमपीथ इन्तसोमेपीन्द्रियशब्दप्रयोगाच्चतोनिर्गताइति सोमपानानधिकृताइति पत्नीवत्तग्रहप्रशंसेति। इति पत्न्यधिकारविचारः ॥०॥ पत्न्यभावे दुहितरोऽपुत्रविभक्तासंसृष्टिधनभाजः। तथा च मनुः। यथैवात्मा तथा पुत्रः पुत्रेण दुहिता समा। तस्यामात्मनि तिष्ठन्त्यां कथमन्यो धनं हरेत्। बृहस्पतिरपि। अङ्गादङ्गात्सम्भवति पुत्रवद्दुहिता नृणाम्। तस्मात्पितृधनन्त्वन्यः कथं गृह्णीत मानवइति। अत्र पुत्रेण समा पुत्रवदिति च साम्याभिधानेपि पुत्रे पित्र्यवयवानामाकृत्स्न्येन संक्रान्तेर्दुहितरि च पत्नीनां पुमान्पुंसोधिकेशुक्रे स्त्री भवत्यधिके स्त्रिया इत्यादिवचनैः स्मृतिष्वायुर्वेदे च प्रतिपादनात्पुत्रतुल्यत्वन्दुहितुरुक्तमिति द्रष्टव्यम्। आत्मनि। आत्मा वै जायते पुत्र इत्यात्मभूतपुत्रतुल्यायामित्यर्थः। तिष्ठन्त्यामित्यनादरे सप्तमी तामनादृत्येत्यर्थः। यद्यप्यनेनौरसपुत्राभावे दुहितुर्द्धनग्रहणमित्ययं न्यायउक्तस्तथापि गौणपुत्रपत्न्योरभावे दुहितुर्द्धनग्रहणमिति कोन्यायः। उच्यते। नारदेन मन्दानुग्रहाय सोपि स्पष्टीकृतः। यदाह। पुत्राभावेतु दु

हितानुल्यसन्तानदर्शनादिति। विवृतञ्चैतदन्तेनैव। पुत्रश्च दुहिता चोभौ पितृसन्तानकारकाविति। अयमाशयः। पुत्रदुहि
तरावुभौ पितुः पौत्रदौहित्राख्यसन्तानकारकौ अतः सन्तानप्रवर्त्तकत्वस्य तुल्यत्वात् दुहितुरपि पुत्रवदधिकारः। पौत्रदौहित्राख्य
सन्तानयोश्च स्वरूपतस्तुल्यत्वाभावात्कार्य्यतस्तुल्यत्वमभिप्रेतम्। कार्य्यमपि नरकापाकरणरिक्थग्रहणलक्षणम्पुत्रपौत्रैर्वर्ह
णांदेयम्। पितामहद्रव्यमधिकृत्य च तत्रस्यात्सदृशं स्वाम्यम्पितुः पुत्रस्य चोभयोरिति वचनाभ्याम्पौत्रे सति दौहित्रस्य तदनधिका
रात्। तेनादृष्टमत्र कार्य्यं श्राद्धकर्तृत्वम्। पूर्वेषान्तु स्वधाकारे पौत्रा दौहित्रका मता इति विष्णूक्तेः। एवञ्च दृष्टादृष्टोपका
रकसन्तानमुखेनोपकारकपुत्रात्क्वचिददृष्टोपकारकसन्तानमुखेनोपकारिका दुहितान्यूना। नचैवमप्यपेक्षया पुत्राभाव
भाजन्याद्दुहितेति पत्नीतः पूर्वं सैव धनमर्हतीति वाच्यम्। यतः सहाधिकारेणाग्निहोत्रादिवैदिककर्म्मोपकारिका कामास्यपुरु
षार्थसाधनतया सन्तानसाधनतया च दृष्टादृष्टोपकारकर्त्री देहार्द्धं संस्तुता पत्न्येव ततोऽधिका तत्रश्च पुत्राभाव इति पत्न्यभावस्या
प्युपलक्षकम्प्रागुल्लिखितविष्णुवचनात् स्मार्त्तयोगीश्वरवचनात्। यच्चापि पुत्रकर्तृकश्राद्धे सम्प्रदानतया स्वयमेवादृष्टोपकार
कः पिता दुहित्रपेक्षया प्रत्यासन्न इति पिता हरेदपुत्रस्य रिक्थमिति वचनस्यावसरस्तु चितो दुहितुः प्राक्। तथापि तस्यामात्मनि
तिष्ठन्त्यामित्यनेन शरीरप्रत्यासत्त्या सैवाग्रेसरीति तदभावे तद्वचनस्यावसरः। वाघट्टोपादानेन तस्य क्रमपरत्वाभावात्। जीमू
तवाहनस्तु दुहितुरधिकारे सन्तानकारकत्वस्य हेतोर्निर्द्देशात्सन्तानस्य च पिण्डदस्यैवोपकारकत्वात् पिण्डदस्यानुपकारकत्वे
नान्यसन्तानादसन्तानाच्चाविशेषात् पुत्रवती सम्भावितपुत्रा च दुहिता धनाधिकारिणी। विधवा वन्ध्यावदुहितृप्रसूत्यादिना
विपर्य्यस्तपुत्रा पुनर्नाधिकारिण्येवेति दीक्षितमतमादरणीयमित्याह। तदपि चिन्त्यम्। प्राथमिककन्याधिकारस्य। अपु
त्रमृतस्य कुमारी रिक्थं गृह्णीयात्तदभावे चोढा। हेतुनिर्द्देशस्य प्रत्यासत्तिनिश्चयमात्रप्रदर्शकतयाप्युपपत्तेः। किञ्च। स्वयमेव
कन्यायाम् असम्भवे सम्भावितपुत्रायाः पुत्रवत्याश्चाधिकार इति वदन्हेतोर्व्यभिचारितां दर्शयति। तस्माद् दस्मदुक्तरीत्यैव प्रत्या

सत्यर्थतया हेतुर्व्याख्येयः। धारेश्वरदेवस्वामिदेवप्रभृतयस्तु। पितामहे दत्पुत्रस्येत्यादिवचनविरोधपरिहाराय दुहि-
त्रधिकारप्रतिपादकवचसां पुत्रिकाविषयत्वन्तदभावेऽनुपित्रादयः एव यथोक्तक्रमेणाधिकारिण इत्याहुः। तदतिपेलवम्।
पुत्रिकायाः और सो धर्मपत्नीजः समः। पुत्रिकासुतः तृतीयः पुत्रः। पुत्रिकाविज्ञायत इति योगीश्वरवसिष्ठादिवचनैः गौणपुत्र-
कोटिनिविष्टायाः क्षेत्रजादिपुत्रवद्भ्रातरो न पितरः पुत्रा रिक्थहराः पितुरिति गौणपुत्रविषयेण मानवेन वचनेन पत्न्यां सत्यामा-
पि रिक्थग्राहिण्यास्तदभावे रिक्थग्राहित्वं दण्डापूपिकयैव सिद्धमिति वचनारम्भानर्थक्यापत्तेः। दुहितृमात्रवाचकानां वचना-
नां विनाकारणं विशेषपरत्वकल्पनानुपपत्तेश्च। किञ्च। भवन्मते अङ्गादङ्गात्सम्भवतीत्यादिना पुत्रिकाविषयेणैव स्वस्याः पु-
त्रिकाया धनग्रहणोक्तेः पुनः। सदृशी सदृशेनोढा साध्वी शुश्रूषणे रता॥ कृताऽकृता वापुत्रस्य पितुर्धनहरी तु सेत्यनेन पुन-
र्धनहरत्वप्रतिपादनन्तेनैवमुनिनाक्रियमाणं विवरणमात्रतयाऽपुनरुक्तं नैवं स्यात्। सामान्यविशेषविषयतया तु स्पष्ट-
मेवापौनरुक्त्यं। सदृशीपि तु सवर्णा। सदृशेन सवर्णेनोढेति प्रकृष्टापकृष्टवर्णसम्बन्धनिरासाय। तज्जातस्योत्तमवर्णमातामह-
श्राद्धादिनिषेधादिति जीमूतवाहनोक्तमनादेयं। ऊढापदेनैवाधमवर्णसम्बन्धनिरासात्। नह्यधमवर्णोढत्वमुत्तमव-
र्णायाः सम्भवति। तस्मादुत्तमवर्णनिरासार्थमेव सदृशग्रहणम्। ननु नारदेन कन्यारूपाणाम्पितृभ्रातृरहितानां सर्वासामे-
व दुहितृणाम्पितृधनप्राप्तिरुत्सर्गतोऽभिहिता। यथाह। स्यात्तु चेत् दुहिता तस्याः पित्र्योंऽशो भरणे मतः। आसंस्काराद्भरेद्भा-
गम्परतो बिभृयात्पतिरिति। तस्याइतिपतिपुत्रविहीनपत्नीर्मधिकृत्याह। तेन नादृश्यायदि दुहिता विद्यते तस्या भरणनिमि-
त्तमात्रपित्र्योंऽशस्तस्मात् विवाहसंस्काराद्भरणार्थमेव सा पितृधनभागं हरेत्परतो विवाहादूर्ध्वं पतिस्तां बिभृयात्। तेन तावत्का-
लभरणावशिष्टमपि तनेगृह्णीयात्। यथेष्टविनियोगार्थं तु कन्यायाः पितृधनग्रहणं दूरापास्तमेव। ततश्चास्यापवादकानि दु-
हितुः पितृधनप्राप्तिप्रतिपादकानि वचनानि सर्वाणि पुत्रिकाविषयाण्येव वाच्यानि। अन्यथा द्वयोरपि दुहितृसामान्यविषतयो

न्वर्गापवादत्वानुपपत्तेः। तस्माद्धारेश्वरादिमतमनुमन्तव्यमितिचेन्न। स्यादेवंयदिनारदवचनम्विभक्तविषयंस्यात्। पैठीनसिपर्य्यपर्य्यालोचनयासंसृष्टाविभक्तविषयन्तत्स्फुटमवगम्यते। ततश्चाविभक्तविषयेदुहितृमात्रस्यपत्न्यभावेपितृधनेयद्ग्रहणप्रतिपादकानिप्रापकाण्येवनापवादकानीतिनपुत्रिकामात्रविषयत्वेतेषांकिमपिबीजम्पश्यामः। यत्तुसकलपितृधनग्रहणाधिकारप्रतिपादकतयाकन्याभ्यरित्यादिदेवलवचनञ्जीमूतवाहनेनोपन्यस्तन्तत्पूर्वापरविरुद्धं। जीवद्विभागेकन्याभ्यःविवाहमात्रोपयुक्तधनेनतस्यप्रमाणतयोपन्यासात्। तदपिचास्माभिःप्राङ्गिरस्तम्। दुहितृष्वपिप्रथममप्रत्ताःपितृधनंगृह्णीयुस्तदभावेप्रत्ताः। तासामपिमध्येप्रागभावप्रतिष्ठितास्तदभावेप्रतिष्ठिताः। सर्वाःसमानरूपास्तुसमंविभज्यगृह्णीयुरित्यर्थःसिद्धम्॥

तथाचकात्यायनः। पत्नीपत्युर्धनहरीयास्यादव्यभिचारिणी। तदभावेतदेति। गौतमःस्त्रीधनन्दुहितृणामप्रत्तानामप्रतिष्ठितानाञ्चेति। अप्रतिष्ठितानिर्धनाः। यद्यपिस्त्रीधनमित्युक्तन्तथापितुल्यन्यायतयापितृधनविषयमप्येतत्। वंध्यत्वादिनासन्तानरहिताप्रतिष्ठितेतितुनयुक्तम्। तस्याःसन्तानमुखेनादृष्टोपकाराभावेनधनहारित्वायोगात्। सदृशीसदृशेनोढेतिप्राक्पठितंवृहस्पतिवचनंस्मृतिचन्द्रिकाकारइत्थंव्याचख्यौ। अत्राद्यानिचत्वारिविशेषणानिपत्न्याऊर्ध्वमर्थग्राहिणीदुहितृविषयाणि। ततःप्राग्धनग्राहिणीदुहितृविशेषणेद्वे अवशिष्टे। कृताकृतावेत्यत्रपुत्रिकेतिविशेष्याध्याहारः। इतरत्रदुहितेतिविशेष्याध्याहारः। वाशब्दश्चव्यवस्थितविकल्पार्थः। एवञ्चायमर्थः। औरसपुत्रविहीनस्यपितुर्धनंद्विविधापिपुत्रिकापत्न्याःपूर्वंगृह्णीयात्। सवर्णादिविशेषणोपेतातुदुहिताततऊर्ध्वमिति। एवञ्चपत्न्याऊर्ध्वंसवर्णादिविशेषणोपेतप्रतिष्ठिताप्रतिष्ठितोढानूढानांदुहितृणांसमवायेप्रागनूढैवगृह्णातिपित्राभर्त्तव्यत्वात्। तदभावेऊढाऽप्रतिष्ठिता। भर्त्राभर्त्तव्यत्वेपिभर्त्तुर्भरणासामर्थ्येनाप्रतिष्ठितत्वात्। तदभावेप्रागुक्तयापत्न्यासवर्णादिविशेषणोपेताप्रतिष्ठितापिधनंगृह्णाति। अन्यैस्तुकृतेतिपुत्रिकापरमकृतेतिदुहितृमात्रपरमभ्युपेत्यवाशब्दश्चनास्थापरमास्थायाखिलंदुहितृमात्रविषयंविशेष्याध्याहारमन्तरेणैवव्याख्यातं।

सैष्यनेनदुहितृमात्रपरामर्शात्। दुहितरइतिबहुवचनंसजातीयानांसमांशेसमानजातीयानांवर्णक्रमेणविशेषांशइतिप्र
तिपादनाय ॥०॥ इतिदुहितुरधिकारः ॥ दुहितुरभावेदौहित्रः। चशब्दादनुक्तसमुच्चयार्थात्। तथाचविष्णुः। अपुत्रपौत्र
सन्तानेदौहित्राधनमाप्नुयुः। पूर्वेषान्तुस्वधाकारेपौत्रदौहित्रकास्समाः। अपुत्रपौत्रेतिदुहितृपर्य्यन्ताभावोपलक्षणम् ॥
मनुरपि। अकृतावाकृतावापियंविन्देत्सदृशात्सुतम्। पौत्रीमातामहस्तेनदद्यात्पिण्डंहरेद्धनमिति। पौत्रीत्यनेनयथापुत्रा
भावेपौत्रःपितामहधनाधिकारीतथादुहित्रभावेदौहित्रइत्युक्तम्। वृहस्पतिरपि। यथापितृधनेस्वाम्यन्तस्याःसत्स्वपिबन्धुषु
। तथैवतत्सुतोपीष्टेमातृमातामहेधने ॥ यथायेनदौहित्रदेयपिण्डेनदुहितापितृधनाधिकारिणीतथैवतेनैवपिण्डदानेनदु
हितृसुतोपिमातामहधनेस्वामीसत्स्वपिबन्धुषुपित्रादिष्वित्यर्थः। नचपुत्रिकापुत्रविषयमिदम्वचनम् ॥ तस्याइतितत्सुतइ
तिचसर्वनामभ्यांप्रकृतदुहितृमात्रपरामर्शात्। अतएवमनुरपिदौहित्रमात्रस्यैवमातामहधनाधिकारंदर्शयति। दौहित्रो
ह्यखिलंरिक्थमपुत्रस्यपितुर्हरेत्। सएवदद्याद्द्वौपिण्डौपित्रेमातामहायच। पौत्रदौहित्रयोर्लोकेनविशेषोस्तिधर्म्मतः। त
योर्हिमातापितरौसम्भूतौतस्यदेहतइति। पितुरितिमातुःपितुरितिव्याख्येयम्। अतएवायेमातामहायचेत्याह। अयमाशय
यथास्वपितुरखिलंरिक्थंगृह्णातितथाऽपुत्रस्यमातामहस्यापि। स्वयमेवतत्पुत्रकार्य्यकारित्वात्। तदेवाहसएवेति। स्वपित्रेमा
तामहायचेत्यर्थः। मातापितराविति चनयथाक्रममन्वयः। किन्तु। पौत्रस्यपितादौहित्रस्यमाताधनस्वामिनोदेहतःसम्भूतावि
तियथायोग्यम्। केचित्पुत्रपौत्रेतियथाश्रुतविष्णुवचनात्पत्नीदुहितृतःप्राग्दौहित्रस्यधनाधिकारमाहुस्तद्योगीश्वरविरोधा
त्तथैवतत्सुतोपीतिवृहस्पतिवचनेपिदुहितृनन्तरस्यजघन्यभावावगमेहेयम् ॥०॥ इतिदौहित्राधिकारः ॥ दौहित्राभावेपि
तरौधनभाजौ। अत्रमिताक्षरा। यद्यपियुगपदधिकरणवचनतायांद्वन्द्वस्मरणात्तदपवादत्वाच्चैकशेषस्यमातापित्रोर्द्धनग्रहणे
क्रमोनप्रतीयते। तथापिविग्रहवाक्येमातृशब्दस्यपूर्वनिपातादेकशेषाभावपक्षेचमातापितरावित्यत्रमातृशब्दस्यपूर्वश्रवणात्पाठ

क्रमादेवार्थक्रमोवगम्यमानःक्रमाकांक्षायांसत्यंनपरित्यक्तुमर्हइतिप्रथमंमाताऽपुत्रपुत्रधनभाक्तदभावेपिता। किञ्चपितापुत्रा
न्तरेष्वपिसाधारणोमातात्वस्यैवासाधारणीतिप्रत्यासत्त्यतिशयात्अनंतरःसपिण्डाद्यस्तस्यतस्यधनंभवेदितिमनुनाप्रत्यासत्त्यति
शयेनधनग्रहणाधिकारस्यविनिगमितत्वात्सपिण्डसमानोदकादिष्वेवविनिगमनाकांक्षायामेतद्वचनप्रवृत्तेरप्यदण्डवारित
त्वादिति। अत्रस्मृतिचन्द्रिकाकारःप्रगल्भते। सारस्वतोभवतद्व्यत्वोत्पत्तिवाक्येऽर्थमावगम्यभावेनयाज्यक्रमेणप्रधानानुष्ठा
नक्रमःपञ्चमेनिरूपितोनत्वेकशेषतएवकाचित्क्रमानुगतिरूपपादिता। तद्वदत्रापिक्रमार्थमन्यत्प्रमाणमन्वेषणीयन्तद
भावइतरेतरयोगस्यद्वंद्ववदेकशेषेप्यवगतेर्विभज्यैवपित्रोस्तुल्यतयाधनग्रहणंयुक्तम्। यत्तुपितासपत्नीपुत्रेष्वपिसाधारणो
मातात्वसाधारणेतिप्रत्यासत्त्यतिशयात्तस्याएवपितृतःप्राग्धनग्रहणंन्याय्यमित्युक्तन्तदप्यन्याय्यम्। नहिजननीजनकयोर्ज
न्यंप्रतिप्रत्यासत्तितारतम्यमस्ति। पुत्रान्तरजनकस्यापिएतज्जनकतायामातृतुल्यत्वात्। नहिजनकतापिव्यासज्यवर्त्तिनी॥
नचपितृगृहीतंधनंभिन्नोदरेष्वपिसंक्रामति। मातृगृहीतत्वेनतत्सहोदरेष्वेवेतिमातुरेवधनग्रहणमितिवाच्यम्। तस्याःप्र
त्यासत्तेर्भ्रातृभगिनीधनाधिकारविनिगमकतयाजनकाज्जनन्याधनग्रहणविनिगमकत्वासम्भवात्। द्वंद्वस्थानीयैकशेषा
त्तुल्यतावगतौप्रत्यासत्तेरप्रयोजकत्वाच्च। सत्यांहिक्रमाकांक्षायांसाक्रमनियामिकानत्वसत्यामपि। तस्मात्पित्रोस्तुल्यत्वा
त्याद्विभज्यैवानपविधुरपुत्रधनग्रहणमिति। श्रीकरस्तदयुक्तं। पिताहरेदपुत्रस्यरिक्थंस्वर्यातस्यह्यपुत्रस्यमातादायमवा
प्नुयादित्यादिवचनेषुपितुर्मातुश्चनिरपेक्षस्वाम्यप्रतीतेर्युगपद्ग्रहणायोगात्। व्रीहियवयोर्न्निरपेक्षसाधनत्वप्रतीतौमिश्रत्वायो
गवत्। केचित्तुमातुर्गर्भधारणपोषणादिनात्यन्तोपकारित्वात्सहस्रन्तुपितुर्मातागौरवेणातिरिच्यतेइत्यादिस्मरणाच्चप्रथमंमा
तुर्द्धनाधिकारमाहुस्तदपितुच्छम्। पितुरपिसंस्कारवृत्तिसम्पादनादिनावक्तुर्धर्मविधातृत्वात्तयोरपिपितैवश्रेयान्बीजप्रधा
नत्वदर्शनादित्यादिस्मरणेनसत्प्रतिपक्षत्वाच्चगौरवमात्रस्यधनग्रहणप्रयोजकत्वे। उत्पादकब्रह्मदात्रोर्गरीयान्ब्रह्मदःपिते

ण्यादिस्मरणाच्चपितृतोऽपिपूर्वमाचार्य्यस्याधिकारापत्तेर्भ्रातृभ्रातृपुत्रयोश्चसतोःपितामहपितृव्यादीनामेवप्रागधिकारापत्तेः॥
जीमूतवाहनस्तु। पितरावित्यस्मात्पितृक्रमएवावगम्यते। तथाहि। मातृप्रतिपदिकात्प्रथमम्पितुरवगतौद्विवचनाच्चतेनै
कशेषकल्पनायांसरूपैकशेषासम्भवेविष्णुमन्वादिवचनसम्वादाच्चविरूपैकशेषकल्पनिश्चयेमातुरवगमात्। अतःक्रमज्ञानं
क्रमाभिधानव्याप्तंक्रमाभिधानेव्यापकेनिवर्त्तमानेनिवर्त्ततइतिश्रीकरोक्तविपरीतक्रमोनिरस्तःविज्ञानेश्वरायानयुक्तोप्याह। तस्मा
न्नैदायिकक्रमस्यात्राव्यवस्थितत्वाद्वृहद्विष्णुवचनोक्तःक्रमआदरणीयः। तत्रचदुहितृगामीत्युक्तात्तदभावेपितृगामीत
दभावेमातृगामीत्युक्तम्। मिताक्षराकारस्यतुप्रथममातृएवतादृशपाठेनैववृहद्विष्णुवचनंलिखितन्तद्विरुद्धन्यायमात्रावलम्बने
नपितरावित्यत्रपितृतःप्राङ्मातुःपुत्रधनाधिकारंसिद्धान्तयतोमहत्येवहृदयशून्यताप्रतिभाति। दौहित्रस्यापिदुहितृस्थानि
दुहितृकोटिनिविष्टत्वाद्वृहद्विष्णुनापृथगनभिधानन्तेनदौहित्राभावेपिदुहित्रभावेनोपलक्ष्यतइतिमन्तव्यम्। तस्मात्स्मृ
तिचन्द्रिकामदनरत्नकारकल्पतरुरत्नाकरपारिजातकारप्रभृतीनाम्बहूनाम्पितुरभावेमातुःपुत्रधनाधिकारइत्येवसिद्धान्तः।
वाचस्पतिनातुतदभावेमातृगामितदभावेपितृगामीतिवृहद्विष्णुवचनम्पठित्वायथामिताक्षरामेवसिद्धान्तितन्तत्तुकुत्रापितदति
रिक्तग्रन्थेतथापाठस्यालिखनाद्भ्रान्तिविलसितमेव। विग्रहवाक्येमातृशब्दस्यपूर्वनिपातादित्यपिमिताक्षराग्रन्थोदुष्टःविग्रह
वाक्येपूर्वनिपातनियमाभावात्। समासेहितन्नियमःशाब्दिकैःस्मर्य्यतेनतुविग्रहवाक्यइत्यादिविज्ञानेश्वरोक्तन्यायेयद्दूषणमन्यै
रुक्तंतत्परिहारायपराक्रम्यते। युगपदधिकरणवचनतातावद्द्वन्द्वस्यवचनाधिकरणेवार्त्तिकेतन्त्ररत्नेचमहताप्रबन्धेननिरस्ता
। इतरेतरयोगोपिपदान्तरान्वयेद्वन्द्वाच्छाब्दरीत्याप्रतीयतेतेनपितरौधनभाजावित्यनेनयुगपदन्वयोपिवस्तुगत्यातयोःक्रमेपि
नवाक्यदोषः। सर्वैश्चश्रीकरभिन्नैस्तदभ्युपगमात्सर्वैःसमाधेयमिदम्। एकशेषाभावपक्षेचमातापितरौमातरपितरावित्यत्रमा
तृशब्दस्यपूर्वश्रवणात्समासैकशेषयोश्चतुल्यप्रतीतिजनकत्वाभावेविकल्पायोगादत्रापितथाप्रतीतेरभ्युपेयाविग्रहवाक्येष्वपिपू

वैनिपातनियमो नानुशासनसिद्धस्तथापि व्याख्यातृसम्प्रदायसिद्धोऽस्त्येव । नहि कोऽपि पिता च माता च पितराविति विग्रहं दृश्यते
किन्तु माता पिता च पितराविति वैयधिकरण्यपरिविशेषो व्यवसायकर इति न्यायेन तस्यापि विनिगमकता सम्भवतीत्यनेनाशयेन तयोरप्य
सम्भवः । पितुः पुत्रान्तरसाधारण्यं मातुस्तु साधारण्यमिति प्रभावसिद्धिर पिजनकतायास्तथात्वाद्वृत्तिर्नवे पि तदभिप्रायेणैवोक्ता
। साधारण्यासाधारण्ये हि सम्बन्धकृतेव्यपदेशप्रतीतिविलम्बाविलम्बनेभवतएवतथानुभवात् । वाक्यार्थबोधेक्रमाभावे किम्भि
नवस्तुक्रम आश्रीयत इति श्रीकरो किन्तु वचनान्तरे निरपेक्षसाम्यावगत्याक्रमापेक्षया स्मृतिचन्द्रिकाकारादिभिरप्यवश्यमिष्ट
स्यैव । पृथक्त्वे तु वचनविरोधः परन्तु स त्वरोऽव भविष्यते तत्रापि यथाशक्ति प्रतिविधीयते । गौरवप्रतिपादकानि वचनानि तावन्मा
तापित्रोर्विषयाविरुद्धानि दृश्यन्ते । तानि विषयव्यवस्थयावश्यमविरोधन्नेयानि । तथाहि । उपाध्यायाद्दशाचार्य्य आचा
र्य्याणां शतम्पिता । सहस्रन्तु पितुर्म्माता गौरवेणातिरिच्यते । गर्भधारणपोषाभ्यान्तेन माता गरीयसीत्यादीनि मातुरभ्यर्हित
त्वप्रतिपादकानि । तयोरपि पिताश्रेयान्बीजप्राधान्यदर्शनादित्यादिस्मृतिवचनानि पित्राज्ञया परशुरामेण मातुः शिरश्छिन्नं
। रघुनाथेन कौशल्यया निवारितेनापि पित्राज्ञया राज्यम्विहाय वनवास आदृत इत्यादि पौराणिकान्यार्यदर्शनानि च पितृपूज्यता
प्रत्यायकानि । तेषाञ्चायमविरोधप्रकारो यः पिता महागुरुलक्षणोपेतः स गुरुर्यः क्रियाः कृत्वा वेदमस्मै प्रयच्छतीत्यादियोगी
श्वरादिवचोभिः प्रतिपादितो माता च तदाज्ञावशवर्त्तित्वादि पतिव्रताप्रयोजकसमस्तलक्षणरहिता । तयोर्म्मध्ये मातुरपेक्ष
यापितैवाधिकाभ्यर्हितः । यत्र तु माता हृन्धत्यादिवत्समस्तपतिव्रतागुणोपेता पिता तु जन्ममात्रप्रदः स तत्र मातैव पितुरपेक्षयाभ्य
धिकमान्या । चिरकारिकोपाख्यानादौ महाभारतादप्येवमुपाख्यानस्वरसादयमर्थ उन्नीयते नतत्रापि मन्वादिवचनेष्वपुत्र
पुत्रधनग्रहणाधिकारः क्वचिन्मातुः प्रथमम् । क्वचित्पितुः प्रतीयमान एवमेवव्यवस्थापयितुमर्हः ॥ तथाहि । अनपत्यस्य पु
त्रस्य माता दायमवाप्नुयात् । मातर्य्यपि च वृत्तायाम्पितुर्म्माता हरेद्धनमिति मनुः । भार्य्यासुतविहीनस्य तनयस्य मृतस्य च ।

मातारिक्थहरीज्ञेयाभ्रातावातदनुज्ञयेतिवृहस्पतिः । पुनर्मातुरेव । पिताहरेदपुत्रस्यरिक्थंभ्रातरएववेति । तदभावेपिता
तदभावेमातेतिप्राग्दर्शितवृहद्विष्णुवचनानि । योगीश्वरवचनेतुपितरावित्यत्रविज्ञानेश्वरोक्तरीत्याप्राङ्माताततदनुपिता । अ
न्यमतेसम्भूयविभागःपितुर्वाप्राथम्यमितिविप्रतिपन्नौपितुरधिकमान्यायामातासापितुरपेक्षयाप्रथमाधिकारिणी । यातुपितु
रपेक्षयान्यूनमानभाक्सापितुःपश्चात् । युक्तञ्चैतत् । वृत्त्यादिसन्निधानमकुर्वतःपितुरपेक्षयामातुरेवाधिकोपकारकत्वाद्ध
नग्रहणम् । वृत्त्यादिसन्निधानकर्तुस्तुतस्ययावज्जीवम्भरणपोषणादिनातिशयितोपकारकस्यधनग्रहणमितिसर्वस्मृती
नांसर्वनिबन्धानाञ्चादुस्थातामभवतीत्यादिसुधीभिर्विभाव्यम् ॥*॥ पित्रोरभावेभ्रातरोधनभाजः ॥ यद्यप्यपुत्रधनंभ्रातृगामि
अपुत्रस्यस्वर्य्यातस्यभ्रातृगामिद्रव्यन्तदभावेपितरावित्यादिशङ्खपैठीनसिवचनयोःभ्रातरएवेति । मनुश्च । पितृतःप्राक्भ्रातॄ
णान्धनग्रहणम्प्रतीयते । मातर्य्यपिचवृत्तायांपितुर्माताहरेद्धनमितिचमनुवचनेभ्रातृतःप्राक्पितामह्यास्तथापिक्रमपरयोगी
श्वरवृहद्विष्णुवचनाविरोधायतेषान्धनाधिकारमात्रपरत्वमेतत्क्रमाविरोधस्तुवचनार्थमेवमनुनाभ्रातरएववेतिपैठीनसिनापिज्येष्ठा
वापत्नीतिवाशब्दःप्रयुक्तोन्यथातुल्यकक्ष्याधिकारिषुतत्प्रयोगोत्यन्तमयुक्तःस्यादितिमिताक्षराकारादयोबहवः । कल्पतरुका
रस्तुपत्नीभ्रातृस्थलेश्राद्धाद्यधिकारिणीसाध्वीपत्नीप्रथमाधिकारिणीतदन्यातुभ्रातृपितृतोनन्तरम् । पितृभ्रातृस्थलेतुपितृ
पितामहाद्युपार्ज्जितंयद्विभागेनपुत्रेसंक्रान्तधनन्तस्मिन्नपुत्रेप्रमीतेपित्रोःपितृद्रव्याविरोधेनयत्नेनोपार्ज्जितन्तत्पित्रोःस्वत्वम
रपिभ्रातॄणामेवेत्याहममनुप्रतिभातिमातर्य्यपिचवृत्तायामितिमनुवाक्ये । तदभावेमातापितरावितिशङ्खपैठीनसिवचनयोस्तु
तोदायमपुत्रस्यविभजेरन्सहोदराः । तुल्यादुहितरोवापिध्रियमाणःपितापिवा । सवर्णाभ्रातरोमाताभार्य्याचेतियथाक्रमम् ।
तेषामभावेगृह्णीयुःकुल्यानांसहवासिनइतिदेवलवचने । सर्वत्रापिवृत्तायान्तदभावे । यथाक्रममित्यादिपदैःक्रमप्रतीते
र्योगीश्वरवृहद्विष्णुवचनयोरेवक्रमपरत्वमितरेषान्त्वधिकारमात्रपरत्वेनतदविरोधेनतत्रतत्स्थाननिवेशेपेक्षितिरितिसमाधि

नैवसाधुःकिन्तुक्षेत्रजादिपुत्रस्यचेयथास्मृतिवचनक्रमविपर्य्यासस्तथौरसानुकूल्यप्रातिकूल्यगुणवत्त्वागुणवत्त्वादिभिर्य्येवस्था
पितस्तथात्रापिदायभागप्रकरणेपुत्रादीनाम्पित्राद्युपकारकत्वकीर्त्तनस्यगुणवत्त्वादिकीर्त्तनस्यवानन्यप्रयोजनत्वात्प्रत्यास
त्तितारतम्यवत्। धनस्वाम्युपकारातिशयानतिशयगुणवत्त्वागुणवत्त्वादिभिर्यथावचनंसर्वैरपिक्रमविपर्य्यासःसमाधेयोन्येतु
समाधयःकुशकाशवलम्बनमात्रतुल्याअनुपादेयाइति। एवमग्रेपीतिसर्वंसुस्थम्। भ्रातृष्वपिप्रथमंसहोदराः। अनन्त
रःसपिण्डाद्यस्तस्यतस्यधनम्भवेदितिमनुनाबहवोज्ञातयोयस्यसकुल्याबान्धवास्तथा॥ यस्त्वासन्नतरस्तेषांसोनपत्यधनंह
रेदितिवृहस्पतिनाचप्रत्यासत्त्यतिशयस्यैवासतिविशेषवचनेविनिगमकत्वेनोक्तेः। भिन्नोदराणांमातृक्रमविप्रकर्षात्। भ्रातर
इतिसामान्यग्रहणात्सोदरभावेभिन्नोदराः। इदमेवव्यक्तमुक्तंसंग्रहकारेण। सोदर्य्याःसन्त्यसोदर्य्याभ्रातरोद्विविधायदि।
विद्यमानेप्यसोदर्य्यैसोदर्य्याधनभागिनइति॥ इतिभ्रात्रधिकारः॥०॥ भ्रात्रभावेतत्सुताःभ्रातृसुताधनभाजः। नचतथाम
त्सुताइतितथाशब्देनभ्रातृपुत्रयोःसादृश्यप्रतिपादनात्। अनेकपितृकाणान्तुपितृतोभागकल्पनेतिवचनाच्चानयोःपित्रभावेवि
भज्यधनग्रहणमस्त्वितिवाच्यम्। विष्णुवचनाविरोधात्तथाशब्दस्यचशब्दार्थत्वात्। अन्यथातथापदस्यपूर्वत्राप्यन्वयसम्भवेन
पित्रोर्भ्रातॄणाञ्चविभज्यग्रहणमित्यपिकुतोनस्यात्। नचैवंविष्णुवचनविरोधात्तेप्युच्यन्तेसोत्रापितुल्यः। अनेकपितृकाणान्त्विति
वचनेभ्रात्रभावेतेषामधिकारेसम्पन्नेकस्मिंश्चिदप्यपुत्रेभ्रातरिप्रमीतेविद्यमानानांभ्रातॄणांसर्वेषान्तद्धनसम्बन्धेजातेतद्विभा
गात्प्रागेवतन्मध्येपियदिकश्चिन्मृतस्तदातत्पुत्राणाम्पितृव्यैःसहसमविभागेप्रसक्तेस्वपितृविभागमेवतेविभज्यगृह्णीयुर्नसर्वैःपि
तृव्यसममित्येतदर्थम्॥ भ्रातृसत्वेतत्पुत्राणाम्पितृव्यधनेऽनधिकारात्। पूर्वाभावेपरःपरइतियोगीश्वरवचनात्तदभावेभ्रा
तृपुत्रगामीतिविष्णुवचनेभ्रातृपरामर्षकतत्पदेनभ्रात्रभावाभिधानाच्च। भ्रातृपुत्रेष्वपिप्रत्यासत्त्यतिशयात्पूर्वंसोदरभ्रातृजास्त
दभावेभिन्नोदरजाःयुक्तश्चैतत्। असोदरभ्रातृपुत्रोहिधनिनोमातरम्विहायस्वपितामहीविशिष्टस्यधनिपितुःपिण्डन्ददाती

निसोदरभ्रातृपुत्राज्जघन्यस्तदनन्तरमेवाधिकारीति । नचसपत्नीकत्वेनत्रयाणांश्राद्धदेवतात्वात्सपत्नमात्रादीनामप्यस्ति
तत्रानुप्रवेशइतिवाच्यम् । मात्रादिशब्दानांस्वजननीपितृजननीपितामहजननीष्वेवमुख्यत्वात्तेनैवचरूपेणश्राद्धानुप्रवेश
स्मरणात् । यथास्मरन्ति । स्वेनभर्त्रासहश्राद्धंमाताभुङ्क्तेस्वधाकरं । पितामहीचस्वेनैवस्वेनैवप्रपितामहीति । सपत्नमात्रादी
नामनुप्रवेशःप्रत्युत । अपुत्रायेमृताःकेचित्पुरुषावास्त्रियोपिवा । तेषामपिचदेयंस्यादेकोद्दिष्टन्नपार्वणमितिस्मरणाद्दायानि
। किञ्च । सपत्नीकदेवताकश्राद्धविधेःपुत्रादिसर्वजनाधिकारिकत्वात्सपत्नमात्रादीनाञ्च नित्यत्वान्नित्यानित्यसंयोगाविरोधान्मा
त्रादिसापेक्षमेवसपत्नीकत्वविधायकत्वंयुक्तं ॥ इतिभ्रातृपुत्राधिकारः ॥●॥ भ्रातृपुत्राभावेगोत्रजाः । पूर्वोक्तपितृभ्रातृतत्सुत
भिन्नागृह्यन्तेगोत्रबलीवर्दन्यायात् । तेचपितामही । सपिण्डाःसमानोदकाश्च । तत्रप्रथमम्पितामहीधनभाक् ॥ मातर्य्यपिच
वृत्तायांपितुर्म्माताहरेद्धनमितिमानवान्मात्रनन्तरम्पितामह्याधनग्रहणेप्रसक्तेपित्रादीनांभ्रातृसुतपर्य्यन्तानाम्बह्वक्रमाणाम
न्तरातदनुप्रवेशासम्भादुक्तवैपर्य्येतदुक्तालनकारणाभावात्तदनन्तरम्पितामहादयोन्येगोत्रजाइतिविज्ञानेश्वरः ॥ अत्रस्मृ
तिचन्द्रिकायांगोत्रजाइत्यत्रसरूपैकशेषेणपुमांसएवगोत्रजानतुस्त्रीरूपाः । विरूपैकशेषोहिकुक्कुटावानरमिथुनञ्चरिष्या
मइत्यादिवाक्यशेषादिसमभिव्याहारादिप्रमाणान्तरावगततात्पर्य्यग्रहनिबन्धनीनचात्रप्रमाणमस्ति । प्रत्युतभ्रातृदत्तादिसाह
चर्य्यपुंसामेवजग्रहणस्यएवसाधकमस्ति । किञ्चपत्नीदुहित्रादीनाम्प्रकृत्याहीकयाधनग्रहणाधिकारोक्तेस्तस्मात्स्त्रियोनिरिन्द्रि
याअदायादाइतिश्रुतेरस्तुतद्भिन्नविषयतागोत्रजादिस्थलेतद्विरोधादिरूपैकशेषकल्पनैवहातुमर्हा । अतएवजीव
त्पुत्रेभ्यःपितादायंविभजेदित्यापस्तम्बसूत्रव्याख्यानेतद्व्याख्याकारेणपुत्रेभ्यएवदायंविभजेतनस्त्रीभ्योदुहितृभ्यइत्युक्तो नं
यद्यपिभ्रातृपुत्रौस्वस्रदुहितृभ्यामितिपाणिनिस्मरणात्पुत्रेभ्यइत्यत्रपुत्राश्चदुहितरश्चेतिविगृह्यविरूपैकशेषाद्दुहितॄणाम
प्यत्रपुत्रेनुप्रवेशःशक्यतेकर्तुंन्तथापियुमांसोदायादानस्त्रियः । तस्मात्स्त्रियोनिरिन्द्रियाअदायादाइतिश्रुतेरिति । श्रुति

विरोधान्नापय्यैयाहकमानाभावाच्चविरूपैकशेषोऽनुशिष्टोप्यत्रनयाह्यइतिभाष्यकाराभिप्रायः। जीमूतवाहनोपियाज्ञव
ल्क्येनचपिवादिदेहिनस्यापितद्गोत्रजातस्यपिण्डदानानन्तर्य्यक्रमेणाधिकारप्रतिपच्यर्थंगोत्रजपदद्वयद्दयंकृतं। सपिण्ड
स्त्रीणाञ्चयुदासार्थञ्चनासामनद्गोत्रजातत्वात। अतएवअर्हन्तिस्त्रीव्यनुवृत्तौवौधायनः॥ नदायन्निरिन्द्रियाअदायादाश्चस्त्रि
योमताइतिश्रुतेरिति। नायमर्हन्तिस्त्रीत्यन्वयः। पत्न्यादीनान्त्वधिकारोविशेषवचनादविरुद्धइति। तन्नसाधुः। मन्वादि
वचनेषुप्राग्लिखितेषुपितामह्याधनाधिकारस्यशृङ्गयाहिकयैवविधानात्तदेकवाक्यतयायोगीश्वरवचनस्यापिविरूपैकशेषेवा
तत्संग्रहेपिश्रुतेस्तदन्यपरत्वेनाविरोधात्। जीमूतवाहनस्यतुमात्रधिकारविचारप्रस्तावेपितामहसन्तानात्पूर्वम्पितामह्याश्च
परतःपितामह्याधनाधिकारः। पितृतःपरतोमात्रधिकारवत्। याज्ञवल्क्येनमात्रधिकारप्रदर्शनेनैवपितृव्यादिभ्यःपूर्वम्पि
तामह्याअधिकारस्यसूचितत्वात्पृथङ्नोक्तइतिवदतोचचसपिण्डस्त्रीषुदासार्थंगोत्रजग्रहणमवदतःपूर्वापरविरोधानुसन्धान
मपिनास्ति। शृङ्गयाहिकयायोगीश्वरवचनेपितामह्याःपितृव्यादिपत्नीवदनभिधानस्यतुल्यत्वात्तद्वदेवादायादश्रुतिप्रवृत्तेर
विरोधात्। विद्यारण्यश्रीचरणोक्तप्राग्लिखिततस्मान्निरिन्द्रियाइत्यादिश्रुतिव्याख्यानेतुस्त्रीणान्दायग्रहणप्रतिषेधकत्वमेवा
स्याःश्रुतेर्नास्तीतिमवाशङ्कानचोत्तरं। परन्तुवौधायनमुनिवचनविरोधेतद्व्याख्यानङ्कथमुपपद्यतां। अस्तुवाइन्द्रियपदस्यवा
क्यशेषात्सामान्यपरतातथापिदायादत्वाभावाभिधानावलम्बनस्यान्यस्यासत्वान्निरालम्बनश्रुतेस्त्वासम्भवात्विरुद्धवक्यैतनानुपप
त्तिप्रसक्तप्रतिषेधकल्पनावश्यम्भावात्। तस्माद्वर्भेणाविज्ञानेनहतेनब्रह्महेत्यत्रेवेतिध्येयं। पितामह्याअभावेपितामहादयः
सगोत्राःसपिण्डाधनभाजः। भिन्नगोत्राणांसपिण्डानाम्बन्धुशब्देनग्रहणात्। तत्रापिपितृसन्तानाभावेपितामहीपितामहःपि
तृव्यास्तत्पुत्राश्चक्रमेणधनभाजः। पितामहसन्तानाभावेप्रपितामहीप्रपितामहस्तत्सूनानतत्सूनवश्चेत्येवमासप्तमात्समानगो
त्राणांसपिण्डानामपुत्रधनभाक्त्वं॥ सपिण्डाभावेसमानोदकानाम्। तेचसपिण्डानामुपरिसप्त। जन्मनामज्ञानावधिकाश्च।

यथाह मनुः । सपिण्डता तु पुरुषे सप्तमे विनिवर्त्तते । समानोदकभावस्तु निवर्त्तेता चतुर्द्दशात् । जन्मनाम्नोः स्मृतेरेके तत्परं गोत्रमुच्यत इति । विष्णुवचने बन्धुसकुल्यपदाभ्यां सपिण्डसगोत्रौ गृह्येते इति प्रागेव प्रतिपादितं । समानोदका अपि प्रत्यासत्तिक्रमेण धनभाजः । समानोदकाभावे बन्धवो धनभाजः । बन्धवश्च त्रिविधा आत्मबन्धवः पितृबन्धवो मातृबन्धवश्च । तथा च स्मृतिः । आत्मपितृष्वसुः पुत्रा आत्ममातृष्वसुः सुताः । आत्ममातुलपुत्राश्च विज्ञेया ह्यात्मबान्धवाः । पितुः पितृष्वसुः पुत्राः पितुर्म्मातृष्वसुः सुताः । पितुर्म्मातुलपुत्राश्च विज्ञेयाः पितृबान्धवाः । मातुः पितृष्वसुः पुत्रा मातुर्म्मातृष्वसुः सुताः । मातुर्मातुलपुत्राश्च विज्ञेया मातृबान्धवा इति । तत्रापि प्रत्यासन्नत्वात्प्रथममात्मबन्धवस्तदनन्तरम्पितृबन्धवस्तदनु मातृबन्धव इति क्रमः ॥ मनुस्मृतौ तदभावे सकुल्यः स्यादाचार्य्यः शिष्य एव वेत्यत्र सकुल्यशब्देन सगोत्रसमानोदकानां मातुलादीनां बन्धुत्वस्य च ग्रहणं योगीश्वरवचनेऽपि बन्धुपदेन मातुललक्षणामन्यथा मातुलादीनामग्रहणमेव प्रसज्येतेति तत्पुत्राणामन्वनाधिकारस्ततः प्रत्यासन्नानान्तेषामेव सत्ने निमहदनौचित्यमापद्येत । बन्धूनामभावे आचार्य्यो धनभाग्यद्यपि योगीश्वरवचस्याचार्य्येणोपात्तस्तथापि शिष्यस्योपात्तस्ततः प्रधानतमः प्रत्यासन्नतमश्चाचार्य्यः शिष्यादुपलक्षणीयः । आचार्य्यः शिष्य एव वेति मनुना । पुत्राभावे प्रत्यासन्नः सपिण्डस्तदभावे आचार्य्यस्तदभावेऽन्तेवासीत्यापस्तम्बेन च स्पष्टमेवाचार्य्याभावे शिष्यस्याधिकारबोधनाच्च । शिष्याभावे सब्रह्मचारी सहाध्यायी धनभाक् । यस्यैकस्मादाचार्य्यादुपनयनाध्ययने । सब्रह्मचारिणोऽभावे ब्राह्मणद्रव्यव्यतिरिक्तं राजा गृह्णीयात् । सहाध्यायिपर्य्यन्तमधिकारमुक्त्वा तदभावे ब्राह्मणधनवर्ज्जं राजगामीति प्रागुदाहृत वशिष्ठवचनात् । सर्वेषामप्यभावे तु ब्राह्मणा रिक्थभागिनः । त्रैविद्याः शुचयो दान्तास्तथा धर्म्मो न हीयते । अहार्य्यं ब्राह्मणधनं राज्ञा नित्यमिति स्थितिः । इतरेषान्तु वर्णानां सर्वाभावे हरेन्नृप इति मनुवचनाच्च । ब्राह्मणद्रव्यं सब्रह्मचारिपर्य्यन्ताभावे श्रोत्रियो ब्राह्मणाः प्रथमं गृह्णन्ति । तदभावे ब्राह्मणमात्रम् । यथाह गौतमः । श्रोत्रिया ब्राह्मणस्यानपत्यस्य रिक्थम्भजेरन्निति । ब्राह्मणमात्रन्तु मनुवचने ब्राह्मणमात्रग्रह

ख्यात्। नारदोऽपि। ब्राह्मणार्थस्य तन्नाशे दायादश्चेन्न कश्चन। ब्राह्मणस्यैव दातव्यमेनस्वी स्यान्नृपोऽन्यथेति। पुत्रादीनां पत्न्या
पर्य्यन्तानामन्वायहरत्वं वानप्रस्थादिविषयेऽपवादमाह योगीश्वरः। वानप्रस्थयतिब्रह्मचारिणां रिक्थभागिनः। क्रमेणाचा
र्य्यसच्छिष्यधर्मभ्रात्रेकतीर्थिन इति। ब्रह्मचार्य्यत्र नैष्ठिको यतिसाहचर्य्यात्। तेनोपकुर्वाणस्य धनं पुत्रादिदौहित्रान्ताना
मसम्भवात्पित्रादयस्तत्क्रमेण गृह्णीयुः। क्रमश्चात्र प्रतिलोमो ज्ञेयः। तथाच नैष्ठिकस्य मृतस्य धनमाचार्य्यस्य यतेः सच्छिष्य
स्य वानप्रस्थस्य धर्मभ्रात्रेकतीर्थिनः। धर्मभ्राता प्रतिपन्नो भ्राता। तीर्थशब्दस्याश्रमवाचित्वादेकतीर्थ एकाश्रमी। धर्मभ्राता
चासावेकतीर्थी चेत्यर्थः। शिष्यस्य सत्त्वञ्चानुसद्वृत्तत्वम्। दुर्वृत्तपुत्रादीनामपि धनानधिकारस्य प्रमाणान्तरेणैव प्राप्तत्वात्।
तच्च वक्ष्यते। किञ्चाश्रमशास्त्रस्य वयोधारयतस्तद्विहितानुष्ठानक्षमत्वं ग्राह्यम्॥ मदनरत्नकारस्तु। वानप्रस्थधनमाचार्य्यो गृ
ह्णीयाच्छिष्यो वेति विष्णुवचनं विरोधानुवादमेव क्रमं मत्वा वानप्रस्थधनमाचार्य्याभावे शिष्यो गृह्णीयादित्याह। तन्न। तस्या
श्रमान्तरगतादितिवक्ष्यमाणवचनैर्नैष्ठिकादीनां धनसम्बन्धाभावस्य वक्ष्यमाणत्वात्तद्धनग्रहणाधिकारिकथनमचानुप
पन्नं चारिक्थग्राहस्तेषामसिद्धादिभिर्निषेधेऽपि प्रसक्तस्यानुत्तरीयधनाधिकारप्रतिपादकमिदम्भविष्यतीति वाच्यम्।
ब्रह्मचारी यतिश्चैव पतितास्तावस्मिन्नाभावि निष्पृहे ... प्रभृतिग्रहादिनिषेधात्। अनिषेधाद्धनमितिचेत्। नवान
प्रस्थस्य तावत्। अह्नो मासस्य षण्णां वा तथा संवत्सरस्य वा। अर्थस्य निचयं कुर्य्यात्कृतमाश्वयुजे त्यजेदिति नवसमाह्वानादिवर्षा
स्य किञ्चिद्धनसंग्रहोऽस्त्येव। यतेरपि। कौपीनाच्छादनार्थं हि वासो वै विभृयान्मुनिः। योगसम्भारभेदांश्च गृह्णीयात्पादुके
तथेति वचनाद्धनपुस्तकादि किञ्चिदस्त्येव। नैष्ठिकस्यापि शरीरयात्रार्थं वस्त्रादिसम्भव आवश्यकः। तेन मृतानामेषां
तत्केन ग्राह्यमित्यपेक्षायामन्वयादाननिषेधापवादेनैतेऽधिकारिण उक्ता इति॥ अथ संसृष्टिधनविभागः। तत्र मनुः। विभक्ताः
सह जीवन्तो विभजेरन्पुनर्यदि। समस्तत्र विभागः स्याज्ज्यैष्ठ्यं तत्र न विद्यते इति॥ तत्र समविभागनिषेधाद्वा विषमविभाग

प्रकारान्तरमपि सिद्धे ज्येष्ठस्यान्तरणं विद्यात इति पुनर्वचनं ज्येष्ठस्यादिकृतस्यैव विषमविभागो न भवति । बह्वल्पधनसंसर्गानुरोधेनानु
विषमविभागो भवत्येवेति सूचनार्थम् । केचित्तु संसृष्टद्रव्योपचयांश ज्यैष्ठ्यादिकृते विषमविभागो भवत्येव । संसृष्टद्रव्यवि
भागस्तु सम एवेत्येतज्ज्ञापनाय ज्यैष्ठ्यमिति वाक्यशेष इत्याहुः । तत्रैतादृशव्यवस्थाया अस्मादप्रतीतेः । समस्तत्र विभाग
स्यादित्युक्त्या द्रव्योपचयेपि साम्यनियमप्रतीतेः । संसृष्टिविभागेप्यविभक्तविभागवत्संसृष्टद्रव्याविरोधेन विद्यादिलब्धस्यावि
भाज्यत्वन्तुल्यमेव प्राप्तमपवदति बृहस्पतिः । संसृष्टिनामनुयः कश्चिद्विद्याशौर्य्यादिनाधिकम् । प्राप्नोति तस्य दातव्यो ह्यंशः
शेषाः समांशिनः ॥ संसृष्टिनापि पित्रादिनैव कर्तव्यानान्येन विभक्तो यः पुनः पित्रेत्यादि प्राक्लिखितबृहस्पतिवचनादिति वहवा
वयन्तूपलक्षणम्पित्रादि यद्ग्रहणमित्यादि प्रागेव प्रपञ्चितम् । अविभक्तविभागात्संसृष्टिष्वपि मिथो विभागकरणात्प्राग्ये मृतस्त
स्य पुत्राः प्रमीतपितृकारणान्तु पितृतो भागकल्पनेति वचनात्स्वपित्र्यं स्वांशं विभज्य गृह्णीयुः । यस्य तु संसृष्टिनो मृतस्य पुत्रादयो
न सन्ति तद्धनग्रहणे पत्न्यादिवचनस्यापवादानां प्राप्ते तदपवादत्वेन स्वर्य्यातस्य ह्यपुत्रस्येत्यनुवृत्तावाह योगीश्वरः । संसृष्टि
नस्तु संसृष्टीति । तुशब्दात्पूर्वापवादः । अपुत्रस्य संसृष्टिनो मृतस्य धनं संसृष्ट्येव गृह्णीयान्न पत्न्यादिरित्यर्थः । एतेन पत्न्याद्य
पुत्रधनग्रहणाधिकारिणो भ्रात्रधिकारावसरे वचनमिदं प्रवर्त्तत इति व्याचक्षाणो जीमूतवाहनो भ्रान्त एवेत्यवसेयम् । अस्याप्य
पवादः सोदरस्य तु सोदरः । दद्याच्चापहरेच्चांशं जातस्य च मृतस्य चेति । संसृष्टिनः संसृष्टीत्यस्यापि सम्बन्धः । तथा चा
यमर्थः । सोदरः संसृष्टी संसृष्टिनः सोदरस्य जातस्य पुत्ररूपेणोत्पन्नस्यांशं दद्यात्तत्पुत्राय दद्यादित्यावत् । मृतस्य पुत्रादि
रहितरूपेणाप्यजीवतो रंशमपहरेदात्मसात्कुर्य्यात्स्वयमेव गृह्णीयादित्यर्थः । पदद्वयानुषङ्गं विनैव व्याख्याने तु शब्दबलायात
मस्य पूर्वापवादत्वं भज्येत । एवञ्च सोदरासोदरसंसृष्टिसद्भावे सोदर एव संसृष्टी सोदरसंसृष्टिधनग्रहणाधिकारी नभि
न्नोदर इति पूर्वांशापवादः । यत्र तु भिन्नोदर एव संसृष्टी सोदरश्च । तत्र द्वयोर्विभज्य पुत्रादिरहितभ्रातृधनग्रहणमित्याह

। अन्योदर्य्यस्तु संसृष्टीनान्योदर्य्यो धनं हरेत् । असंसृष्ट्यपि चादद्यात्संसृष्टो नान्यमातृज इति । अत्रासंसृष्टिपदद्वा
काङ्क्षितत्पूर्वोत्तरार्द्धयोरपि संबध्यते । तथा संसृष्ट इत्यपि । तत्र पूर्वार्द्धे एकोदर संसृष्टः सोदर इत्यर्थकः ॥ उत्तरार्द्धे तु संसृ
ष्टित्वार्थकं अन्यमातृज इत्यनन्तरं चैवकारोऽध्याहार्य्यः । ततश्चायमर्थः । अन्योदर्य्यो सोदरोऽपि संसृष्टी चेद्धनं हरेत् । असं
सृष्टी चेद्धनं हरेत् । असंसृष्टी चेदन्योदर्य्यो न हरेत् । तथा चान्वयव्यतिरेकप्रदर्शनेन भिन्नोदरस्य संसृष्टित्वमेवैकन्धन
ग्रहणकारणं न भ्रातृत्वमात्रमित्युक्तम्भवति । तथा संसृष्टः सोदरोऽसंसृष्टस्यापि चेद्धनं हरेत्किमुत संसृष्टी । संसृष्टः संसृष्ट
स्यान्यमातृज एवैको धनन्न हरेत् । किन्तु सोदरेणासंसृष्टिनापि सह विभज्य गृह्णीयात् । अत्रायम्पर्य्यवसितोऽर्थः । असंसृ
ष्टिसोदरे संसृष्टिभिन्नोदरे च सत्यपुत्रभ्रातुर्द्धनं सोदरत्वसंसृष्टित्वरूपैकैकधनग्रहणकारणयोगात्तुल्यं विभज्य गृह्णीयाता
म् । सोदरोऽपि चेत्संसृष्टी कारणद्वययोगेन बलवत्वात्सर्वं स एव गृह्णीयादिति । अत्र चैकैकनियमेनार्थद्वयपरकारणानि सव
सिद्धावपि दृढीकरणाय पुनस्तन्निरासः । उभयथापि वाक्यव्युत्पत्तेः । पुल्लिङ्गञ्चासंसृष्टीत्यादाववविवक्षितमत एवमनुनासोद
रभगिनीनामपि तद्धनग्रहणमुक्तम् । यथाह । विभक्ताः सह जीवन्तो विभजेरन्पुनर्य्यदीति संसृष्टिविभागम्प्रक्रम्य । येषां
ज्येष्ठः कनिष्ठो वा हीयेतांशप्रदानतः । म्रियेतान्यतरो वापि तस्य भागो न लुप्यते । सोदर्य्या विभजेयुस्तं समेत्य सहिताः समम् ।
भ्रातरो ये च संसृष्टा भगिन्यश्च सनाभय इति । येषां संसृष्टिनां मध्येऽन्यतरः संसृष्टी ज्येष्ठः कनिष्ठोऽपि मध्यमो वांशप्रदानतो
हीयेतानधिकार्य्यंशप्रदाने स्यात् । सार्वविभक्तिकत्वात्तस्प्रत्ययेन तसिः । विभागकाले पातित्येनाश्रमान्तरपरिग्रहेण वा म्रियेत वा
ऽगृहीतभाग एव । तर्हि तस्य भागो न लुप्यते पृथगुद्धरणीयः । स च प्रथमन्तत्पुत्रादिभ्यो देयः । तदभावे सोदर्य्या भ्रातरोऽसंसृ
ष्टा अपि । समेत्य देशान्तरगतास्तत्रागत्य सहिता मिलिताः । ये च भ्रातरो भिन्नोदरा अपि संसृष्टाः संसृष्टिनः सनाभयो मृतस्य स
होदरा भगिन्यश्च समम वैषम्येण विभजेयुर्विभज्य गृह्णीयुरित्यर्थः । अत्र सोदरभ्रातरभगिनीनामसंसर्गेऽपि संसर्गे च भिन्नोदरा

सामपि धनाधिकारमभिदधता मनुना योगीश्वरोक्त एवार्थः स्पष्टमुक्तो भवति। अत्र श्रीकरः। संसृष्टिनस्तु संसृष्टी व्यस्यासोदरसंसृष्टिमात्रविषयत्वेऽन्यानपेक्षत्वात्सोदरस्य तु सोदर इत्यस्याप्यसंसृष्टसोदरमात्रविषयत्वे तथात्वात् सोदरे संसृष्टिनि सोदरे चासंसृष्टिन्युभयोः प्राप्तौ यदि द्वयमेव प्रवर्त्तेत तदान्योन्यसापेक्षयोरुभयोर्विधायकत्वं स्यात्। न चैकस्य सापेक्षनिरपेक्षोभयरूपतया विधायकत्वम्विधिवैषम्यादापादकमुचितं। एवं द्वये विकल्पसापेक्षं विधानं। एवं द्वये च निरपेक्षमिति उत्तरवेदिविधिवैषम्यापत्तेः यथा द्वयोः प्रणयन्तीत्यस्य न वैश्वदेव उत्तरवेदिमित्यादिनिषेधकृतविकल्पसापेक्षं एवं द्वयम्विधानमन्यएवं द्वये तु निरपेक्षमिति सप्तमाधिकरणे विधिवैषम्यभयादन्यथा सिद्धान्तितं। तथा सिद्धान्तितम्। तथा चासोदरे संसृष्टिन्यसंसृष्टिनि च सोदरे उभयोरप्रवृत्तौ न कोऽपि तद्धनं गृह्णीयादित्यापतेत्। अतः संसृष्टि नस्त्वित्यनेन संसृष्टिधने संसृष्टिनोऽधिकार उक्तो न तदपवादोयं सोदरस्य त्विति। तथा चासंसृष्टिनोऽप्यसोदरस्य सोदरे संसृष्टित्वरहितेऽपि सति नाधिकार इत्याह। तन्मीमांसानयतत्वानालोचननिबन्धनमभिधाने हि द्वयोः क्वचिन्निरपेक्षयोः प्रवृत्तयोः शास्त्रयोः क्वचिदुभयविषयसमावेशवशादेकत्र प्रवृत्तिमात्रेणावैरूप्यम्भवति तथा सति केवलोद्गातृप्रतिहर्त्रोत्रपच्छेदे निरपेक्षयोः सर्वस्वदाक्षिण्यशास्त्रयोर्युगपदुभयापच्छेदे प्रवृत्त्यभावाद्विरोधाभावेन किं केन बाध्यत इति विचारो निर्मूलः स्यादपच्छेदनये। तस्मात् क्वचिद्विध्यन्तरबाधनिरपेक्षविधानं क्वचित्तद्बाधसापेक्षं त्वेनदा वैरूप्यं यथोपात्तवपन्तीत्यत्र प्राङ्निरूपितं। अन्यथा चतुर्होत्रा पौर्णमासीमभिमृशेत् पञ्चहोत्रामावास्यामित्यनयोरुपांशुयागाग्नीषोमीयविषयत्वे इन्द्राग्न्यैन्द्रपयोविषये चैकैकशः प्रवृत्तयोरुभयसाधारणयोर्हि विधिविषयसमावेशे प्येकमपि न प्रवर्त्तेत। यदपि स्वयमुपवर्णितं संसृष्टिनस्त्वित्यस्यापवादः। सोदरस्य त्वित्यादिरिति। तदप्यसम्बद्धम्। विनिगमकाभावेन वैपरीत्यस्यापि सम्भवात्। पौर्वापर्यमात्रस्याप्रयोजकत्वात्॥ यच्चान्योदर्य्यवचनं संसृष्टिनस्त्वित्यस्यैव विवरणार्थमित्युक्तं तेन वचोभङ्ग्यानर्थक्यमेव तस्योक्तं। किञ्च सोदरेऽसंसृष्टिनि संसृष्टासोदरापवादार्थे सोदरवचनस्य वर्णनात् सोदरासोद

रयोरुभयोरप्यसंसृष्टित्वे प्रवृत्त्यभावात्तस्याधिकारो वाद्वयोरपि स्यात्। अथात्रापि सोदरवचनमेव प्रवर्त्तेत तर्ह्येकत्र संसृष्टित्ववच
नबाधसापेक्षमन्यत्र तु स्थिरपक्षमिति प्रत्युत तत्रैव विधिवैरूप्यम्॥ यथा सौमिकी वेदिः पादिदीक्षणीयादिष्वतिदेशप्राप्तदर्श
पौर्णमासिकवेदिबाधेन विधीयेत तर्हि तत्रातिदेशबाधसापेक्षस्तद्विधिरन्यत्र तन्निरपेक्ष इति वैरूप्यात् वेदिमद्विषयकत्वमेव
तस्य व्यवस्थापितन्तद्वत्। अस्मन्मते तु व्याख्यातरीत्या द्वयोर्भिन्नविषयत्वेनानर्थक्यवैरूप्ययोर्न प्रसक्तिरिति कृतं विस्तरेण। स्मृति
चन्द्रिकाकारस्त्वाह येषां ज्येष्ठः कनिष्ठो वेत्यादि मनुवचने च शब्देन सोदरभ्रातृभगिन्यसोदरसंसृष्टभ्रातृणामितरेतरयुक्ता
नां विभागकर्तृतायाः समेत्य सहितशब्दाभ्यामवगतेर्योगीश्वरवचः संसृष्टिसोदरसद्भावे भिन्नोदरस्यानधिकारावगतेरस्ति
तावदनयोर्विरोधरे तद्विरोधपरिहारार्थे केचिदेवं मानवं व्याचक्षते। तमलुप्तभागं सोदरा यदि संसृष्टास्तदा त एव गृह्णीयुर्ना सं
सृष्टिनः सोदरा अपि। संसृष्टसोदराभावे सर्वे सोदराः समेत्यमिति त्वसहिताः समप्रधानभावेन सममन्यूनाधिकं विभजेरन्
। सोदराणामभावे सनाभयो भगिन्यस्तासामप्यभावेऽन्योदर्य्या इति। तदेतदनेकाध्याहारदोषादतिक्लिष्टत्वाच्चोपेक्षणीयं।
विज्ञानेश्वरेणापि मानवसंवादायान्योदर्य्यस्तु संसृष्टिनान्योदर्यो धनं हरेदिति पाठेन योगीश्वरवचनस्य यत्तदध्यावृत्त्यध्या
हारादिनाक्लिष्टमप्यन्ताप्रतीयमानार्थकं स्वप्रज्ञाविलसितमात्रम्। तस्मादन्यथाप्रतीयमानार्थकयोरेवमनुयोगीश्वरवाक्ययोर्वि
षयव्यवस्थयैवाविरोधो वाच्यो नातिक्लिष्टैकार्थ्येनेति सेवोच्यते स्थावरजङ्गमात्मकोभयविधधनसद्भावे मनुवचनं संसृष्टासंसृष्टा
नां भ्रातृणां भगिनीनाञ्च विभज्य ग्रहणं बोधयति। योगीश्वरवचस्तु केवलस्थावरसद्भावे केवलतदितरद्रव्यसद्भावे वा तद्विषय
म्। अन्तर्द्धनं तु यद्द्रव्यं संसृष्टानान्तु तद्भवेत्। भूमिं गृह्णन्त्वसंसृष्टाः प्रगृह्णीयुर्य्ये यांशत इति प्रजापतिस्मृतेः। द्रव्यमिति
गोवलीवर्द्दन्यायेन प्रकटस्य द्विपदचतुष्पदादिरूपस्य जङ्गमद्रव्यस्य ग्रहणम्। संसृष्टानाम्भिन्नोदराणामिति शेषः। योगी
श्वरवचसि नान्योदर्यादिनिपाठः। तस्मात्केवलस्थावरसद्भावे केवलजङ्गमसद्भावे च योगीश्वरवचनादसंसृष्टेऽपि सोदर

सदृह्णीयान्नतु संसृष्टोपि भिन्नोदरः। उभयविधधनसद्भावे तु प्रजापतिवचनोक्तव्यवस्थायाः संसृष्टाः सोदरभ्रातृभगिन्यः
संसृष्टाभिन्नोदराश्च विभज्य गृह्णीयुः। मनुवचनस्याप्येतदर्थकत्वैवेति। तदसत्। अध्याहारक्लिष्टतादिदोषस्यानवाप्यन
पायात्। प्रजापतिवचनोक्तव्यवस्थाया विज्ञानेश्वरीयव्याख्यानेप्यविरोधात्। अत एव मदनरत्नकृतानद्व्याख्यानमभ्युपेत्यैव प्र
जापतिवचनमपि व्यवस्थापकतया पठितम्प्रत्युत भवद्व्याख्याने योगीश्वरवचने पौनरुक्त्यं दुष्परिहरमापद्यते। अन्योदर्य्यं तु सं
सृष्टी नान्योदर्य्यौधनं हरेदित्यनेनोक्तस्यैवार्थस्य संसृष्टो नान्यमातृज इत्यनेनान्यूनानतिरिक्तस्य प्रतिपादनात्। मानवसंवा
दिनो पुनरुक्तस्यार्थस्यक्लेशेनापि वक्तुं शक्यत्वे मूलभूतश्रुत्यन्तरकल्पनागौरवापादकस्यार्थान्तरस्य कल्पयितुमनुचितत्वाच्च। या
ज्ञवल्क्यस्मृतिटीकायां मूलपाठः। अन्योदर्य्यः संसृष्टी नान्योदर्य्यधनं गृह्णीयात्। असंसृष्ट्यपि सोदर एव गृह्णीयात्। ननु सं
सृष्टः सापत्नभ्राता॥ नान्योदर्य्यौधनं हरेदिति पाठे अन्योदर्य्यः सन् संसृष्ट्यपि धनं न गृह्णीयादिति व्याख्या। असंसृष्टि सोदरस
धिकारार्थमिदं वचनमतो न पुनरुक्ततेत्याह तत्तु श्रीकरमतसमानयोगक्षेमं। रत्नाकरकृत्त्वाह यस्तु कल्पतरौ नान्योदर्य्यधनं ह
रेदिति पाठो दृश्यते स मूलभूतयाज्ञवल्क्यमिताक्षरापारिजातहलायुधग्रन्थेषु नान्योदर्य्यौधनं हरेदिति पाठदर्शनात्तदनुसारि
व्याख्यानदर्शनाच्च लिपिप्रमाद एवेति। दायतत्त्वकारस्तु सोदरे संसृष्टिनि संसृष्टिन्यसोदरे च कतरस्तावद्गृह्णीयात्। एवं
सोदरासोदरयोः संसृष्टिनोः सद्भावे कतर इत्यत्र प्रथमश्चाह अन्योदर्य्यस्त्विति। अन्योदर्य्यः पुनः संसृष्टी सन् गृह्णीयान्नान्यो
दर्य्यमात्रः। किन्त्वसंसृष्ट्यपि पूर्ववचनस्थसोदरपदानुषङ्गात्सोदरो गृह्णीयात्। तेनैकत्र विषये पूर्ववचनोक्तसोदरत्वसंसृ
ष्टित्वयोरेकशः सम्बन्धेन तुल्यत्वाद्विभज्य ग्रहणमेतदुभयसत्त्वे वासोदरस्यासंसृष्टिनोनुत्पत्त्यरूपत्वान्नेति। द्वितीयश्चाह संसृष्टो
नान्यमातृज इति। सोदरे संसृष्टे सत्यन्यमातृजः संसृष्टोपि न गृह्णीयात्। अर्थात्तत्र संसृष्टी सोदर एव गृह्णीयात्। संसृष्ट
त्वाविशेषेपि सोदरत्वेन तस्यैव बलवत्त्वादित्याह तदपि मिताक्षरादिसम्मतद्वैव्याख्यानाकौशलान्त्वधिकं। यदा तु संसृष्टः पिता पितृ

श्चेवानास्तितदाऽसंसृष्टभिन्नोदरोगृह्णीयात्। तदभावेत्वसंसृष्टःपिता। तदभावेतत्पत्नी। तथाचशङ्खः। स्वर्य्यातस्य ह्य
पुत्रस्यभ्रातृगामिद्रव्यन्तदभावेपितरौहरेयातांज्येष्ठावापत्नीति। स्वर्यातस्यापुत्रस्यसंसृष्टस्वसंसृष्टस्यभावेभिन्नोदरसंसृष्ट
भ्रातृगामिद्रव्यमित्यर्थः। तेनसंसृष्टधनविषयेयथास्थितमेवेदम्वचनमितिस्मृतिचन्द्रिकामदनरत्नकारावाहतुः। संसृष्टभ्रा
तृविषयमेवैतत्तेनपितृपत्न्योस्तदभावइतिनविरुद्धमितिमिताक्षराकारादयः॥ स्मृतिचन्द्रिकायांशङ्खवचनेज्येष्ठयहणंतुसंब
न्धादिगुणाधिकयनार्थेनतुमध्यमादिनिवृत्त्यर्थम्। पुनरपितदभावइतिवक्तव्येवाशब्दःप्रयुक्तफलसाम्यात्। तथाहि। वा
शब्दाद्विकल्पःप्रतीयते। नचात्रसाम्यरूपेवस्तुनितुल्यावगतेःफलसाम्यमस्त्येव। एवंचायंक्रमःभ्रात्रभावेपिता। तदभावेमा
ता। तदभावेज्येष्ठापत्नीति। मदनरत्नेतुमातापित्रोर्विपरीतक्रमः। मिताक्षरोक्तन्यायाद्विभक्तासंसृष्टविषयविष्णुवचनवद
न्यायबाधकवचनाभावादितितदाशयः। अतएवपत्नीदुहितरइतिवचनेविष्णुवचनानुरोधेनस्मृतिचन्द्रिकावत्पितराविव्य
नुप्राक्षिप्तातदभावेमातेत्येवतत्रोक्तम्। प्रपञ्चितञ्चैतद्विस्तरेणास्माभिःप्रागेव। ततश्चमदनरत्नदुहित्रादिक्रमविरोधादवि
रोधायैतत्संसृष्टभागविषयमितिकल्प्यते॥ विभक्तोक्तनैयायिकपत्नीदुहित्रादिक्रमोऽत्रवाचनिकक्रमेणबाध्यते। अस्मिन्क्रमेवा
स्यचिन्त्यायस्याभावाद्वाचनिकएवायंक्रमः। नारदोपि। मृतेपत्यौतुभार्य्यास्तुअभ्रातृपितृमातृकाः। सर्वेसपिण्डास्तुधनंविभ
जेयुर्ययथांशतइति। अस्यार्थः। भार्य्याःपत्न्यः। अभ्रातृपितृमातृकाः। याःपत्युर्भ्रातृपितृमातरस्तद्द्वाविशिष्टाइत्यर्थः। अ
त्रद्वन्द्वसमासेभ्रात्रपेक्षयाभ्यर्हितत्वेपिपित्रादिपदपूर्वनिपातंपरित्यज्यवैपरीत्येनसमासरचनांकुर्वतानारदेनसंसृष्टापुत्रद्रव्यंप्रथ
मंभ्रातृगामितदभावेपितृगामितदभावेमातृगामितदभावेपुत्रस्यपत्न्यभिगामीतिदर्शितम्। एवञ्चसंसृष्टपत्नीनांमुख्यगौणापु
त्राभावेनप्रथमन्दायहरत्वंकिन्तुसंसृष्टिसोदरभिन्नोदरभ्रातृपितृमातॄणामप्यभावेइतिद्रष्टव्यम्। सर्वेसपिण्डास्त्वित्यादे
स्त्वयमर्थः। संसृष्टापुत्रस्ययेभ्रातृपितृमातृव्यतिरिक्ताःसपिण्डाभ्रातृपुत्रादयस्तेतद्धनम्पूर्वमपुत्रधनेनसहस्वपित्रादिनाहं

संसृष्टिनस्तदूर्ध्वं तत्पत्नीभिः सहपृथगंशतो भ्रातृपुत्राणां भ्रात्रंशे भार्य्याणां भर्त्रंश इत्येवमंशानतिक्रमेण विभजेयुरिति । पत्न्य भावे संसृष्टापुत्रांशं तद्भगिनी लभते । तथा च बृहस्पतिः । या तस्य भगिनी सा तु ततोंऽशं लब्धुमर्हति । अनपत्यस्य धर्मोऽयमभार्य्यापितृकस्य च । अमातृकस्य चेति चशब्दार्थः । भगिन्यभावे तु केवलाः सपिण्डा अनन्तराः सपिण्डास्तद्दायं विभजेरन्यथांशतः । तदाप्नुस्तस्य धर्म्म्यं यदिति मनूक्तप्रत्यासत्तिक्रमेण लभेरन् । प्रतिपदोक्तानामभावात् । तथा च स एव । मृतोऽनपत्योऽभार्य्यश्चेदभ्रातृपितृमातृकः । सर्वे सपिण्डास्तद्दायं विभजेरन्यथांशतः । तद्दायं संसृष्टिदायम् । मृतोऽनपत्य इत्यादेः प्रतिपदोक्तसंसृष्टधनग्राहिरहितश्चेदित्यर्थः । सपिण्डाभावे तु विभक्तमृतधनवदेव संसृष्टः सर्व्वो तद्द्रव्यमपि प्रागुक्तक्रमेण प्रत्यासत्तितारतम्येन समानोदकादिगामीति द्रष्टव्यम् । संसृष्टे द्रव्यमधिकृत्य सपिण्डेभ्य ऊर्ध्वं विशेषास्मृतिरिति । ननु सर्व्वविभक्त्यादौ वचनान्मृतसंसृष्टिधनस्य संसृष्टिभ्रात्रादिग्राह्यत्ववत्संसृष्टासंसृष्टपुत्रसद्भावेऽपि पितृधनस्याप्येतद्वचनबलात्संसृष्टिपुत्रमात्रग्राह्यत्वमस्त्विति चेन्न । पुत्रस्येति पूर्ववचनस्थस्यानुषङ्गादपुत्रसंसृष्टिमरणस्य धनग्रहणकारणत्वात्संसृष्टिनश्च पुत्रेणापुत्रत्वाभावात्संसृष्टिर्नास्तीत्यस्याप्रवृत्तेर्विभजेरन्सुताः पित्रोरिति वचनात्पित्र्यंशे पुत्रयोर्द्वयोरप्यविसमभागभागित्वम् । प्राक्तनः स्वांशः परं संसृष्टपुत्रेण भुक्तावशिष्टः पृथगुद्धरणीयः । पितुर्य्यो वा स तदानीं विद्यमानोंऽशः स संसृष्टासंसृष्टाभ्यां विभज्य ग्राह्यः । न च संसृष्टिनस्त्वित्यत्रापुत्रपदानुषङ्गो मास्त्विति वाच्यम् । सपुत्रसंसृष्टिभ्रात्रादिधनेऽपि पुत्रादिबाधेन तदंशस्य भ्रात्रादिग्राह्यतापत्तौ सकलदेशीयानादिव्यवहारविरोधाय । अन्यथापुत्रवदपुत्रधनाधारणस्यापुत्रमात्रविषयपत्नीत्यादिवाक्यापातकत्वानुपपत्तेस्तद्बाधकतुशब्दविरोधापत्तेश्च ॥ न च भ्रात्रादिसंसृष्टिन एवायं विशेषः पुंव्यावर्त्तकत्वात्पुत्रसंसृष्टिनस्तु तद्व्यावर्त्त्याभावात् । असम्भवाच्च सम्भवे व्यभिचारे च स्याद्विशेषणमर्थवदित्यभियुक्तोक्तेरिति वाच्यम् । पृथग्वाक्यद्वयाभावादेकत्र च वाक्ये क्वचिद्विशेषणपुरस्कारेण क्वचिच्च तदपुरस्कारेण विधिप्रवृत्तौ विशेषणाघटिताघटितवा

क्यार्थद्वयनिबन्धनविधिवैषम्यरूपवाक्यभेदापत्तेः। किञ्च पित्रादिद्रव्यस्वाम्ये पुत्रत्वादिकमेवापतितत्वादि विशिष्टम्प्रयोजक
न्तु संसृष्टत्वविशिष्टमपि गौरवात्। न चैवं सर्वेषां संसृष्टानामसंसृष्टानाञ्च तुल्यमिति सर्वेषामेव पुत्रादीनां विशेषेण तद्धनग्र
हणमुचितम्। न च विभागेन पित्रादिद्रव्यार्हत्वापगमः। सर्वेषु पुत्रेषु विभक्तासंसृष्टिष्वपुत्रवद्भ्रात्रादीनामेव तत्तद्धनाधिका
रापत्तेः। प्रत्युत पत्न्यैव तु हारीतेन च विभागोत्तरमपि पितापुत्रयोः परस्परधनाधिकारप्रतिपादनाच्च। यथाह तु सः। जीवन्ने
व वा विभज्य वनमाश्रयेत् वृद्धाश्रमं वा गच्छेत् स्वल्पेन वा संविभज्य भूयिष्ठमादाय वसेत् यद्युपदृश्येत्। पुनस्तेभ्यो गृह्णीयात् सीदांश्च
विभजेदिति। वृद्धाश्रमं पारिव्राज्यम्। उपदृश्येत् द्रव्याभावेन क्षीयेत्। विभक्तजे तु सति पूर्वविभक्तानाम्पुत्राणाम्प्राप्नोति पि
तृधनाधिकारो वृहस्पतिवचनेनापोद्यते। यथाह सः। अनीशाः पूर्वजाः पित्रोर्भ्रातुर्भागे विभक्तजः। पुत्रैः सह विभक्तेन पित्रा यत्स्व
यमर्जितम्। विभक्तजस्य तत्सर्वमनीशाः पूर्वजाः स्मृताः। यथा धने तथर्णेऽपि च दानाधानक्रयेषु च। परस्परमनीशास्ते मुक्त्वा शौ
चोदककियामिति। संसृष्टिधनहारकेण तत्स्त्रियः परिपालनीयास्तत्कन्याश्च विवाहपर्यन्तं पोषणीयाः संस्कर्तव्याश्चेत्याह
तुः शङ्खनारदौ। संसृष्टिनम्प्रकम्य भ्रातृणामप्रजाः प्रेयात्कश्चिच्चेत्प्रव्रजेत वा। विभजेरन्धनन्तस्य शेषास्ते स्त्रीधनम्बिना॥ भ
रणञ्चास्य कुर्वीरन् स्त्रीणामाजीवनक्षयात्। रक्षन्ति शय्याम्भर्तुश्चेदाच्छिंद्युरितरासु च॥ या तस्य दुहिता तस्याः पित्र्योंऽशो भ
रणे मतः। आसंस्काराद्धरेद्भागम्परतो बिभृयात्पतिरिति। इतरासु भर्तृशय्यामरक्षन्तीषु दुर्वृत्तास्वित्ययावत्। आसंस्काराद्वि
वाहपर्य्यन्तं बिभृयादुद्वाहकरणमपि लभ्यते। इति संसृष्टविभागः॥●॥ अथ स्त्रीधनविभागमवक्तुं तत्स्वरूपं तावन्निरूप्यते
तत्र मनुः। अध्यग्न्यध्यावाहनिकन्दत्तञ्च प्रीतिकर्म्मणि। भ्रातृमातृपितृप्राप्तं षड्विधं स्त्रीधनं स्मृतमिति॥ षड्विधमिति न्यूनसंख्या
व्यवच्छेदपरं नाधिक्यनिरासाय। अत एव योगीश्वरेण। पितृमातृपतिभ्रातृदत्तमध्यग्न्युपागतम्। आधिवेदनिकाद्यञ्च स्त्रीध
नम्परिकीर्तितमित्याद्यशब्दः रूपानः। विष्णुनापि षडधिकानि स्त्रीधनान्युक्तानि स यथाह। पितृमातृसुतभ्रातृदत्तमध्यग्न्युपाग

तं । आधिवेदनिकमन्वादत्तं शुल्कमन्वाधेयकमिति स्त्रीधनमिति । नारदः । अध्यग्न्यध्यावहनिकं भर्तृदायस्तथैव च । भ्रातृदत्तं पितृभ्याञ्च षड्विधं स्त्रीधनं स्मृतमिति । षड्विधत्वम्मानववदेव व्याख्येयम् । स्त्रीधनशब्दश्चायं यौगिकः । स्त्रीस्वामिकं धनमिति ननु पारिभाषिकः । योगसम्भवे परिभाषाया अन्याय्यत्वात् । अत एव योगीश्वरेण रिक्थक्रयादिसाधारणस्वत्वोपायसंग्रहायाद्युपदम्प्रयुक्तम् । ननु चकचित्स्त्रीधनत्वनिषेधोऽनुपपन्न एवं सति स्यात् । नहि स्त्रीस्वामिकत्वं तत्र निषेद्धुं शक्यते । बाधात् । यथाह कात्यायनः । तत्र सोपधि यद्दत्तं यच्च योगवशेन वा । पित्रा भ्रात्राथवा पत्या न तत्स्त्रीधनमुच्यत इति ॥ उपधिरुत्सवादावेवेदमस्यै दत्तं त्वया धार्य्यमलङ्कारादि नान्यदेति नियमस्तत्पूर्वकं दत्तं सोपधि । योगो बन्धश्च मन्द्राद्यादानं । कन्यायै दत्तमिदं त्वत्कुलस्य विभाज्यमिति । शिल्पप्राप्तं सख्यादिभ्यः प्रीत्या प्राप्तं तदपि न स्त्रीधनमित्यप्याह स एव । प्राप्तं शिल्पैस्तु यत्किञ्चित्प्रीत्या चैव यदन्यतः । भर्तुः स्वाम्यं तदा तत्र शेषन्तु स्त्रीधनं स्मृतमिति । पारिभाषिकत्वे भ्रात्रादिदत्तत्वेन प्राप्तं स्त्रीधनं प्रतिषिध्यते । तेनैतस्माद्भिन्नमेव पित्रादिदत्तं शिल्पादिप्राप्तं भिन्नं वा स्त्रीधनमिति परिभाष्यत इति चेत् । उच्यते । नात्र स्त्रीधनत्वनिषेधः । किन्तु तत्कार्यविभागादिनिषेधः । अत एवोत्तरश्लोके तत्र भर्तुः स्वाम्यमित्युक्तम् । भर्तुः स्वेच्छाविनियोगे स्वातन्त्र्यं न स्त्रिया इत्यर्थः । प्रथमश्लोके तु स्त्रीस्वत्वनिषेधोऽपि सम्भवति ॥ उपधियोगपदयोरुपादानात् । तादृशदाने च स्वत्वाभावस्य प्रसिद्धत्वात् । योगाधमनविक्रीतयोगदानप्रतिग्रहम् । यत्र चाप्युपधिम्पश्येत्तत्सर्वं विनिवर्त्तयेदिति मनुवचनात् । भार्या पुत्रश्च दासश्च त्रय एवाधनाः स्मृताः । यत्ते समधिगच्छन्ति यस्य ते तस्य तद्धनमित्यपि वचनम्भार्य्याविषये शिल्पादिप्राप्तपरमेव । एकमूलकल्पनालाघवात् । अध्यग्न्यादिस्वरूपन्निरूपितं कात्यायनेन । विवाहकाले यत्स्त्रीभ्यो दीयते ह्यग्निसन्निधौ । तदध्यग्निकृतं सद्भिः स्त्रीधनं परिकीर्तितम् । यत्पुनर्लभते नारी नीयमाना पितुर्गृहात् । अध्यावहनिकन्नाम स्त्रीधनन्तदुदाहृतम् । प्रीत्या दत्तं तु यत्किञ्चिच्छ्वश्र्वा वा श्वशुरेण वा । पादवन्दनिकञ्चैव प्रीतिदत्तं तदुच्यते । विवाहात्परतो यत्तु लब्धं भर्तृकुलात्स्त्रिया । अन्वाधेयन्तु तत्प्रोक्तं

लब्धंस्वकुलात्तथा। गृहोपस्कारवाह्यानान्दोह्याभरणकर्म्मणाम्। मूल्यंलब्धन्तुयत्किञ्चित्तच्छुल्कंपरिकीर्त्तितम्। ऊढया कन्ययावापिपत्युःपितृगृहेपिवा। भ्रातुःसकाशात्पित्रोर्वालब्धंसौदायिकंस्मृतम्। भर्त्तुःसकाशादितिकल्पतरौदीपाठः। अध्य ग्न्यादिशब्दानांयोगरूढत्वात्तद्धत्स्त्रीधनादावप्रयोगात्। गृहोपस्करणादीनार्थ्यन्मूल्यङ्कन्यापित्रोपाधित्वेनवरादिभ्यःकन्या भरणरूपेणगृह्यतेतच्छुल्कमितिमदनरत्नेव्याख्यातम्। मिताक्षरायान्तुयद्गृहीत्वाकन्यादीयतेतच्छुल्कमित्युक्तम्। उभय आपिपित्रादीनाङ्कन्यायाश्चेदमित्युद्देशोविवक्षितः। अन्यथातत्स्वत्वाभावेनस्त्रीधनत्वव्यपदेशस्यानुपपत्तेःजीमूतवाहनेनतुक र्मिंस्वामिनिपठित्वागृहादिकर्म्मिभिःशिल्पिभिस्तत्कर्म्मकरणेभर्त्रादिप्रेरणार्थंस्त्रियैयद्दत्तोपदानंतच्छुल्कंतदेवमूल्यम्प्रत्यय र्थत्वादितिव्याख्यातम्। पुनश्चोक्तं। यदानेतुम्भर्त्तृगृहेशुल्कन्तत्परिकीर्त्तितमितिव्यासोक्तंवा। भर्त्तृगृहगमनार्थमुक्तोपादि यद्दत्तंच्छुल्कमित्यर्थइति। तदुभयमपिस्त्रीस्वामिकम्भवत्येवतस्याएवदत्तत्वादितितत्रस्त्रीधनत्वव्यपदेशोन्यस्त्रीधनवत्तुग मएव। आधिवेदनिकंत्वनन्तरविवाहकालेपूर्वभार्य्यायैयद्दीयते। यदाहयाज्ञवल्क्यः। अधिविन्नस्त्रियैदद्यादाधिवेदनि कंसमम्। नदत्तंस्त्रीधनंयस्यान्दत्तेत्वर्द्धम्प्रकल्पयेदिति। पित्रादिभिर्ज्जीवनाद्यर्थंस्त्रीभ्योधनदानेविशेषमाहकात्यायनः। पितृमातृपतिभ्रातृज्ञातिभिःस्त्रीधनंस्त्रियै। यथाशक्त्याद्विसाहस्राद्दातव्यंस्थावरादृते॥ स्थावरेतद्धनंयथाशक्तिकार्षापणसह स्रद्वयपर्य्याप्तन्देयमित्यर्थः। व्यासोपि। द्विसहस्रःपरोदायःस्त्रियैदेयोधनस्यतु। आद्विसहस्रादितिकात्यायनेनपरइतिच व्यासेनोक्तेरितोधिकमितिधनिनापिनस्त्रीभ्योदेयमितिदर्शितम्। अयञ्चनियमःप्रतिवत्सरमवरूद्धपणोज्ञेयस्तेनानेकवत्सरेषु जीवनार्थन्दीयमानमितोधिकमपिभवतिचेन्नदोषः। जीवनाद्यर्थत्वाद्दानस्ययावज्जीवञ्चद्विसाहस्रमात्रेणतन्निर्वाहासम्भवा त्। स्त्रीधनेपिभर्त्तानुमतिमन्तरेणस्त्रीणान्नस्वातन्त्र्यमित्याहमनुः। ननिर्हारंस्त्रियःकुर्युःकुटुम्बाद्बहुमध्यकात्। स्वकादपिच वित्ताद्धिस्वस्यभर्त्तुरनाज्ञयेति। निर्हारोव्ययः। क्वचित्तुस्त्रीधनेतासांस्वातन्त्र्यमस्ति। यदाहसौदायिकस्वरूपमुक्त्वाकात्याय

नः । सौदायिकन्धनम्प्राप्य स्त्रीणां स्वातन्त्र्यमिष्यते । यस्मात्तदानृशंस्यार्थं तैर्दत्तमुपजीवनम् ॥ सौदायिके सदा स्त्रीणां स्वातन्त्र्यम्परिकीर्त्तितम् । विक्रये चैव दाने च यथेष्टं स्थावरेष्वपि । भर्त्रा दत्ते तु स्थावरेतर एव स्वातन्त्र्यमित्याह नारदः । भर्त्रा प्रीतेन यद्दत्तं स्त्रियै तस्मिन्मृतेपि तत् । सा यथाकाममश्नीयाद्दद्याद्वा स्थावरादृते । स्थावरे भर्त्तृदत्ते स्त्रिया निवासाद्युपभोगमात्रं न दानविक्रयादिकमित्यर्थः । अपुत्रा शयनम्भर्त्तुरित्यादिकात्यायनवचोपि भर्त्तृदत्तस्थावरविषयमेव नारदैकवाक्यत्वेति केचित् । अस्माभिस्तु पत्नी दुहितर इति व्याख्यानावसरेऽस्य विषयम्प्रपञ्चितं । पुरुषाणामपि कस्मिन्नपि स्त्रीधने न स्वातन्त्र्यं स्वाम्याभावादित्याह कात्यायनः । न भर्त्ता नैव च सुतो न पिता भ्रातरो न च । आदाने वा विसर्गे वा स्त्रीधने प्रभविष्णवः । यदि त्वेकतरोप्येषां स्त्रीधनम्भक्षयेद्बलात् । सवृद्धिकं स दाप्यः स्याद्दण्डञ्चैव समाप्नुयात् । तदेव यद्यनुज्ञाप्य भक्षयेत्प्रीतिपूर्वकम् । मूलमेव तदा दाप्यो यदा स धनवान्भवेत् । अथ चेत्स द्विभार्य्यः स्यान्न च तां भजते पुनः । प्रीत्या विसृष्टमपि चेत्प्रतिदाप्यः स तद्बलात् । ग्रासाच्छादनवासानामुच्छेदो यत्र योषितः । तत्र स्वमाददीत स्त्री विभागं रिक्थिनां तथा । स्त्रिया धनं गृहीत्वा यद्यपरभार्य्यया सह वसत्येनाञ्चावमानी तेन तदा गृहीतन्तद्धनं राज्ञा बलाद्दाप्यः । भक्ताच्छादननिवासान्यदि भर्त्ता न ददाति तदा तेपि स्त्रिया बलाद्ग्राह्यास्तत्पर्य्याप्तन्धनम्वा ग्राह्यमिति श्लोकद्वयस्याथ चेदित्यस्यार्थः । इदमपि तस्या दोषराहित्ये बोध्यं दुष्टा पुनः किमपि स्त्रीधनन्न लभत इत्याह स एव ॥ अपकारक्रियायुक्ता निर्लज्जा चार्थनाशिका । व्यभिचाररता या च स्त्रीधनं न तु सार्हति । नार्हतीत्यनेन तया लब्धमप्याच्छिद्य ग्राह्यमिति सूचितम् । अपकारक्रियायुक्ता सदा भर्त्तुः प्रतिकूलाचरणपरा । निर्मर्य्यादार्थनाशिकेत्यपि पाठः । देवलः । वृत्तिराभरणं शुल्कं लाभश्च स्त्रीधनं भवेत् । भोक्त्री तत्स्वयमेवेदम्पतिर्नार्हत्यनापदि । वृथामोक्षे च भोगे च स्त्रियै दद्यात्सवृद्धिकमिति । वृद्धिर्वर्द्धनार्थं पित्रादिना दत्तमिति स्मृतिचन्द्रिकायाम् । मदनरत्ने तु वृत्तिरिति पठितम् । वृत्तिर्जीवनार्थम्पित्रादिभिर्दत्तमिति व्याख्यातञ्च । लाभो गौर्य्यादिप्रीत्यर्थं यल्लभ्यते कुतश्चित् । वृथा आपदमन्तरेण । मोक्षस्त्यागो दा

नमितियावत्। अननुज्ञातत्यागभोगविषयमेतत्। तदनुज्ञयात्वनापद्यपिनदोषः। स्वयमेवेत्येवकारःस्वापत्यानांव्युदासार्थः
। भर्तृव्युदासस्यपतिर्नार्हतीत्यनेनाभिधानात्। भर्तृव्युदासेनतेनबहिरंगाणांभ्रात्रादीनांव्युदासस्यापिदण्डापूपिकयासिद्धत्वा
त्। अनापदीत्यभिधानादापदिनदोषः। अतएवपुत्रार्तिहरणेचापिस्त्रीधनम्भोक्तुमर्हतीतितस्यैववाक्यशेषः। पतिरित्युप
लक्षणः। पुत्रग्रहणंकुटुम्बोपलक्षकन्तस्यार्तिर्भक्ष्याद्यभावनिमित्तापीडातस्याहरणे। षष्ठ्यादन्यस्मिन्नपिधनाभावनिमित्तेसङ्क
टेस्त्रीधनमननुज्ञातमपिपतिस्त्यक्तुम्भोक्तुञ्चार्हतीत्यर्थः। ननुपरधनेत्यागभोगयोःस्वाम्यनुज्ञयाविनाकथमर्हतावाधितानेनवो
च्यते। अनुज्ञायान्त्वनापद्यपिनविरोधः। उच्यते। वचनबलात्तादृशविषयेव्ययेस्वत्वमेवतस्यतत्रेत्यदोषः। अतएवयोगीश्वरो
पि॥ दुर्भिक्षेधर्म्मकार्य्येचव्याधौसम्प्रतिरोधके। गृहीतंस्त्रीधनम्भर्त्तानाकामोदातुमर्हति। धर्म्मकार्य्यआवश्यकेनित्येनैमित्ति
केच। सम्प्रतिरोधकेदण्डाद्यर्थेराज्ञावरोधेकृते। वाचस्पतिस्तुसम्प्रतिरोधकइतिव्याधिविशेषणाङ्गकार्य्यानुष्ठानवाधकइतिचतद
र्थइत्याह। नाकामोदातुमर्हतीत्यपिदारिद्र्यादिकृतदानासामर्थ्येवोध्यंसतितुसामर्थ्येदुर्भिक्षादिगृहीतमप्यवश्यन्देयमेताव
तैववचनोपपत्तौसामर्थ्येप्यदानमिच्छयेत्यस्यकल्पयितुमनर्हत्वात्। पतिग्रहणादापद्यपिपत्युरेवपत्नीधनग्रहणाधिकारोप्रति
दानञ्चेच्छयानान्यस्येतिज्ञेयम्। भर्त्रादातुम्प्रतिश्रुतम्भार्य्यायैतस्मिन्मृतेपुत्रादिभिस्तस्यैदेयमित्यप्याहसएव। भर्त्राप्रति
श्रुतन्देयमृणवत्स्त्रीधनंसुतैरिति। सुतग्रहणम्पौत्रप्रपौत्रयोरुपलक्षणमृणवदित्यभिधानात्। अनेनस्त्रीधनेजीवन्त्यान्त
स्यांसुतानाञ्जन्मनास्वत्वेपिनास्तिविभागइतिगम्यते। एवंस्त्रीधनमुक्तम्॥●॥ अथतद्विभागोनिरूप्यते। तत्रमनुः। जन
न्यांसंस्थितायान्तुसमंसर्वेसहोदराः। भजेरन्मातृकंरिक्थम्भगिन्यश्चसनाभयः॥ अत्रद्वंद्वसमानार्थकचशब्दोपादानात्सो
दरभ्रातृभगिनीनांमिलितानांमातृधनाधिकारोगम्यते। सोदरग्रहणम्भिन्नोदरव्यावृत्त्यर्थं। देवलः। सामान्यम्पुत्रकन्यानां
मृतायांस्त्रीधनंस्त्रियाम्। अप्रजायांहरेद्भर्त्तामाताभ्रातापितापिवा॥ अत्रतुद्वंद्वस्यैवश्रवणात्पुत्राणांकन्यानाञ्चसहाधिकारः

Digitized by Google

प्रतीयते । इदञ्चान्वाधेयपतिप्रीतिदत्तद्विविधस्त्रीधनविषयम् । यथाह मनुरेव । अन्वाधेयञ्च यद्दत्तम्पत्या प्रीतेन चैव यत्
। पत्यौ जीवति वृत्तायाः प्रजायास्तद्धनम्भवेत् । अन्वाधेयम्पूर्वं लक्षितं यच्च पत्या प्रीत्या दत्तन्तत्स्त्रीधनं वृत्तायाः मृतायाः स्त्रियाः
प्रजा पुत्रदुहितृरूपा तस्याः स्वम्भवति । पत्यौ जीवतीत्यनादरे सप्तमी । जीवन्तमपि पतिमनादृत्येत्यर्थः । तस्यानधिकारस्त
त्रेति यावत् । अत्र च प्रजायाइति सामान्याभिधानात्स्त्रीपुंसप्रजायाः समसाम्यावगतेस्तुल्यवद्विभज्यमातृधनग्रहणं पुनः पू
र्वम्भगिनीनान्तदभावे भ्रातॄणामिति । भगिन्यश्च मनुवचनेऽनूढायाह्याः । तथा च बृहस्पतिः । स्त्रीधनं स्यादपत्यानां दुहिता
च तदंशिनी । अप्रत्ता चेत्समूढा तु लभते मानमात्रकम् । अपत्यानां पुत्राणाम् । दुहितुः पृथगुपादानात् । तदंशिनी पुत्रसमां
शिनी । मानमात्रकमिति गौरवार्थन्तदनुसारेण किमपि लभते न तु पुत्रसमांशमित्यर्थः । अप्रत्तानामभावे प्रत्तानामपि सभर्तृ
काणां भ्रातृसमभागित्वमित्याह कात्यायनः । भगिन्यो बान्धवैः सार्द्धं विभजेरन्सभर्तृकाः । विभागकाले दौहित्रेभ्योऽपि किञ्चि
द्देयम् । तथा च मनुः । यास्तासां स्युर्दुहितरस्तासामपि यथार्हतः । मातामह्या धनात्किञ्चित्प्रदेयम्प्रीतिपूर्वकम् । यथार्हत
इत्युपयोगदारिद्र्याद्यपेक्षयेत्यर्थः । न च दौहित्रीणान्तदा धनस्वाम्याभावात्किमिति दानमिति वाच्यम् । यथा पैतृके पुत्रसत्त्वे
कन्यानां दायार्हत्वेऽपि वचनबलात्तुरीयांशदानमेवमत्राप्युपपत्तेः । अत एव प्रीतिपूर्वकमित्युक्तम् । प्रीतिपूर्वकत्ववचनादेवा
नावश्यकत्वमपि सूचितमत्र । तत्र तु पतिताः स्यु रहितत्ववद् इतिदोषकीर्तनादावश्यकत्वमिति भेदः । यौतकन्तु कुमारीणामेव
मातृधनम् । न पुत्राणां नापि प्रत्तदुहितॄणामित्याह मनुरेव । मातुस्तु यौतकं यत्स्यात्कुमारीभाग एव सइति । युमिश्रणाइति धात्व
नुसाराद्विवाहकाले एकासनोपविष्टयोर्वधूवरयोर्युतयोर्द्वाभ्यां वैर्द्दीयते तद्युतयोरिदं यौतकमिति व्युत्पत्त्या यौतकमित्युच्यते । केचि
त्तु विवाहे स्त्रीपुंसयोरेकशरीरतया मिश्रता भवति । अस्थिभिरस्थीनि मांसैर्मांसं त्वचा त्वचमिति श्रुतेः । भर्तुर्वैश्वस्यादिभि
रस्थ्यादीन्येकीभवन्तीत्यर्थ इत्याहुः । यदेतद्धृदयन्तव तदस्तु हृदयं मम तदस्तु हृदयन्तवेति मन्त्रलिङ्गाद्विवाहे मिश्रतेत्यन्ये

। युतयोर्य्यौतकमिति निघण्टौ । यौतकं यौतुकञ्चेत्यादिकोशाद्यौतुकमित्यपि पाठः । भर्तृगृहलब्धात् पृथग्धनं तथा पितृगृहलब्धं मातृधनं यौतुकम् । यौतशब्दस्यामिश्रणमप्यर्थः । युमिश्रणामिश्रणयोरिति धातुपाठात् । युतसिद्धाविति प्रयोगाच्चेति देवस्वाम्याह । मदनस्तु पितृगृहलब्धात् पृथग्धनं तथा भर्तृगृहलब्धं यौतकमित्याहास्यापि विनिगमकाभावे बन्धुशक्तत्वेनास्य कल्पनामात्रत्वात् । कुमारीणामनेकत्वे समं स्यादश्रुतत्वादिति न्यायेन सत एव विभागो विशेषाश्रवणात् । एतत्त्रिविधमिश्रं मातृधनं दुहितॄणाम् । तत्रापि प्रथममप्रत्तानां तदभावे प्रत्तानां तत्रापि प्रथममप्रतिष्ठितानां तदभावे प्रतिष्ठितानां सधवानां तदभावे विधवानाम् । तथा च गौतमः । स्त्रीधनं दुहितॄणामप्रत्तानामप्रतिष्ठितानाञ्चेति । अप्रतिष्ठिता अनपत्या निर्द्धना दुर्भगा विधवा वेत्यपरार्ककल्पतरुकारेण च व्याख्यातम् । प्राक्तनं द्वयमेव विज्ञानेश्वरादिभिः । अत्र च स्त्रीधनमिति सामान्योक्तिरपि त्रिविधप्रागुक्तस्त्रीधनभिन्नविषया । स्मृतिचन्द्रिकामदनरत्नयोरेवमुक्तम् । जीमूतवाहनस्मार्त्तभट्टाचार्य्याभ्यान्तु प्रागुक्तगौतमवचनं मातुर्दुहितुरभावे दुहितॄणां तदन्वय इति नारदवचनम् । दुहितॄणामभावे तु रिक्थं पुत्रस्य तद्भवेत् । इति कात्यायनवचनम् । मातुर्दुहितरः शेषमृणात्ताभ्य ऋतेऽन्वय इति योगीश्वरवचनम् । एवमन्यान्यपि स्त्रीधनस्य दुहितृग्राह्यत्वपराणि स्मृतिवचनानि प्रागुक्तमन्वादिवचनविरोधान्मातुस्तु यौतुकमिति प्रागुक्तमनुवचनानुरोधान्मातुः पारिणाय्यं स्त्रियो विभजेरन्निति वासिष्ठानुसाराच्च यौतकमात्रविषयाण्युक्तम् । पारिणाय्यं परिणयनलब्धं यौतकमिति यावदिति ताभ्यां व्याकृतम् । कल्पतरौ विवादचिन्तामणौ च पारिणाय्यमिति पठित्वा स्त्रीपरिच्छदं दर्पणकङ्कतिकादीति व्याख्यातम् । विज्ञानेश्वरस्तु सर्वमेव स्त्रीधनं पुत्रादिसत्त्वेऽपि प्रथमं दुहितृदौहित्रीदौहित्रगामि । तदभावे पुत्रादिगामि । अप्रजःस्त्रीधनन्तु व्यवस्थापयिष्यते । मातुर्दुहितरः शेषमृणात्ताभ्य ऋतेऽन्वय इति योगीश्वरवचने दुहितृमात्रं ताभ्य इत्यनेन न परामृश्यते किन्तु दौहित्रीदौहित्रावपि । मातुर्दुहितरोऽभावे दुहितॄणां तदन्वय इति नारदवचनात् । अत्र तदन्वय इत्यनेन तच्छब्देन दुहितरोऽनन्तराः परामृश्यते । तथा च दुहित्रन्वयो दौहि

त्रीदौहित्रक्रमः। तत्रापि प्रथमं दौहित्री तदभावे दौहित्रः। दुहितॄणाम्प्रसूता चेदिति वक्ष्यमाणयोगीश्वरवाक्ये दुहितृश-
ब्देन दुहितरो गृह्यन्ते। साक्षाद्दुहितॄणां मातुर्दुहितर इत्यत्र तेनैवोक्तत्वात् पुनरुक्त्यापत्तेः। दुहितॄणामन्वय इति सामा-
न्योक्तेर्दौहित्राधिकारेऽपि। पुत्राधिकारस्तु विभजेरन्सुताः पित्रोरूर्ध्वमृक्थमृणं समम् इत्यत्र पित्रोरित्येकशेषाल्लभ्यते तत्र च प्रागेव
प्रपञ्चितम्। ताभ्य ऋतेऽन्वय इत्यत्राप्यन्वयपदेन योग्यतया षष्ठ्यन्तमातृपदान्वयान्दुहितॄणामपृथगुपादानात् पुत्रादिरेव गृ-
ह्यते। दुहित्रभावे तदधिकारप्रतिपादनार्थत्वाच्च न पौनरुक्त्यम्। जनन्यां संस्थितायान्त्विति मनुवचनस्याप्ययमर्थः। सर्वैस-
होदरमातृकं रिक्थं स्वाधिकारावसरे समम्भजेरन् सनाभयः सोदरभगिन्यश्च स्वाधिकारावसरे। ननु द्वयेऽपि सम्भूय विभजेरन्नि-
त्यर्थः। इतरेतरयोगस्य द्वन्द्वैकशेषयोरभावादप्रतीतेः। चशब्दस्य तु विभागकर्तृत्वान्वयमात्रेणाप्युपपत्तेः। यथा देवदत्तः कृषिं
कुर्य्याद्यज्ञदत्तश्चेत्युक्ते नेतरेतरयोगप्रतीतिः। वाक्यान्तरेण चद्वयोरपि मातृधनाधिकारे प्राप्तेऽपि सममित्यनेनात्रोद्धारादिवि-
षमविभागनिवृत्त्यर्थं वचनम्। सोदरसनाभिग्रहणमसोदरभ्रातृभगिनीनिवृत्त्यर्थम्। अत एवाधमजातिस्त्रीधनं भिन्नो-
दरापि प्रकृष्टजातीयसपत्नीपुत्री तदभावे च तदपत्यं गृह्णातीत्युक्तं मनुना। स्त्रियास्तु यद्भवेद्वित्तम्पित्रा दत्तं कथञ्चन। ब्रा-
ह्मणी तद्धरेत्कन्या तदपत्यस्य वा भवेदिति। अत्रानपत्यक्षत्रियादिजातीयस्त्रिया इति विवक्षितं ब्राह्मणीपदश्चोत्तमजात्युप-
लक्षणम्। अप्रजस्त्रीधनं भर्तुरित्यस्य चायमपवादः। अत एवानपत्यवैश्याधनं क्षत्रियादुहितानपत्यशूद्राधनञ्च वैश्यादुहि-
ता गृह्णाति। तदभावे तदपत्यानि। तदभावेऽप्रजस्त्रीधनमित्यस्यैव प्रवृत्तिः। तस्मात् स्त्रीधने सांपत्यप्राग्दुहित्राद्यधिका-
रस्तदनु पुत्रादीनामित्याहुः। अत्र जीमूतवाहनः। मनुबृहस्पतिसंखलिखितवचनेषु द्वन्द्वाश्रवणेऽपि समुच्चयवाचि चशब्देन
तदर्थलाभाद्देवलवचने तु पुत्रकन्यानामिति द्वन्द्वस्यापि श्रवणात्संवादेन तत्रापि चशब्दस्येतरेतरयोगार्थकत्वाच्चियाद्भ्रातृभगिनी-
नां सोदराणां विभज्य सहैव धनग्रहणं युक्तम्। किञ्च। केवलदुहितॄणामेव सकलमातृधनाधिकारे यौतकविशेषवचनमनर्थं

कं। नचकुमारीपदोपादानात्प्रत्तदुहितृव्यावृत्त्यर्थं तदिति युक्तम्। तद्व्यावृत्तेः सर्वस्त्रीधन एव गौतमादिवचनेषूक्तत्वात्। कुमा
र्य्यभावे प्रत्ताद्यधिकारस्यावाप्यवर्ज्जनीयत्वात्। तस्मात्पुत्रपत्न्योस्तुल्यवदधिकार एवमन्वाद्यभिप्रेतोऽध्यग्न्यादिस्त्रीधनविष
ये यौतकविषयस्तु पुत्रीमात्राधिकार इत्येव व्यवस्था। अन्वाधेयपतिप्रीतिदत्तमात्रग्रहणानुमनुवचनान्तरेऽध्यग्न्याद्युपलक्ष
णमितरथा यौतके पृथगारम्भस्यानर्थक्यापत्तेरित्याह। दायतत्त्वकृदादीनामप्येतदेव मतं। अत्रेदम्प्रतिभाति। अन्वाधेयादि
ग्रहणस्योपलक्षणत्वे प्रमाणाभावात्तदुभयव्यतिरिक्तसर्वमातृधने दुहित्राधिकारः प्रथमन्तदनु पुत्राधिकारः। यौतके विशेषव
चनन्तु प्रत्तादिनिवृत्त्यर्थम्। अन्यथापि साम्यमेवेति चेत्सत्यम्। किन्तु। न नियता यौतके तु नियतता। तेन यौतकं कुमार्य्यभा
वे विवाहभेदेन स्त्रीधनम्भर्त्रादीनामेव भवति न प्रत्तादीनामिति स्मृतिचन्द्रिकाकारादीनामाशयः। विज्ञानेश्वराचार्य्याणान्त्वय
मभिप्रायः। सामान्यतः स्त्रीधनमात्रस्य दुहितृगामित्वबोधकमनन्यथासिद्धवचनानुरोधेन सङ्कोचः कर्त्तव्यो न चमन्वादिवचन
मनन्यथासिद्धं पुत्रकन्यानां सहाधिकारप्रतिपादकम्। पुत्राधिकारमात्रप्रतिपादनमात्रपरत्वात्। न च चशब्दद्वन्द्वाभ्यां स
हाधिकारः। विभागकर्तृत्वान्वयेनापि तदुपपत्तेः। अन्यथापि नरावित्यादौ मातापित्रोस्तदिष्यत इत्यादौ च द्वन्द्वैकशेषश्रवणे
सकलनिबन्धसम्मतः क्रमो मातापित्रोर्न्न स्यात्। विष्णुवचनाद्यनुरोधात्तत्र शाब्दान्वयसाहित्यमात्रेण तदुपपत्तिरर्थक्रमस्त्वन्यथा
प्यविरुद्ध इत्युच्यते। तर्ह्यत्रापि ताभ्य ऋतेऽन्वयः दुहितृणामभावे तु रिक्थं पुत्रेषु तद्भवेदित्यादि योगीश्वरकात्यायनवचनावग
तार्थक्रमान्यथाभावे द्वन्द्वचशब्दादीनां शाब्दान्वयसाहित्यमात्रेणोपपत्तिरस्तु न तु तदनुरोधेन तेषामेवान्यविषयत्वम्। सिद्धे स
हाधिकारे तेषां सङ्कोचस्तत्सङ्कोचे चैषां सहाधिकारपरत्वनिश्चय इतीतरेतराश्रयत्वञ्चेति। अन्वाधेयादौ विशेषवचनमनर्थक
मिति चेत्। न यौतके चन्द्रिकाकारादिमतवदेव सार्थकत्वात्। अन्वाधेयग्रहणस्योपलक्षणतया प्रजामात्राधिकारे तेन प्रतिपा
दिते जनन्यां संस्थितायान्त्वित्यादिवचनैः साम्यादिविधानमित्येवं सर्वेषां सार्थकत्वात्। तस्मात्सर्वं सुस्थमिति। श्रीविद्यारण्य

श्रीचरणैस्तु स्मृतिचन्द्रिकामिताक्षरयोर्द्वयोर्द्वयोरप्यनुसारेण द्वयमपि लिखितमन्तर्विविक्तम्। पुत्रादिभ्यः प्रागदुहितृदुहितुस्तदनु दौहित्राणामधिकार इति तु मिताक्षराचन्द्रिकामदनरत्नकारसम्मितं द्वारण्यश्रीचरणानां च विसम्वादेन सम्मतः। जीमूतवाहनदायतत्त्वकारौ तु दुहित्रभावे पुत्राणामेवाधिकारो न तु दौहित्र्याद्यधिकारानन्तरम्। तथा हि नारदवचने दुहितॄणामन्तदन्वय इत्यत्र दुहितुरन्वयपदेनान्वयपुत्रादिवाचकेन नान्वयः सम्भवति। दुहितृपदस्य जन्यविशेषवचनस्य जन्यान्तरे समन्वे नानिराकांक्षतयान्वयासम्भवात्। तच्छब्दस्यापि दुहितृत्वरूपेणैव तदुपस्थापकस्य नैराकांक्ष्याविशेषात्। किञ्च। याज्ञवल्क्यवचने तावत्। दुहितर इति प्रथमान्तस्य ताभ्य इति च पञ्चम्यन्तस्य च षष्ठ्यन्तान्वययोग्येनान्वयपदेनान्वयाद्यवहितस्यापि मातुरित्यस्यैवान्वयस्तदेकवाक्यतया पिमातुरन्वय एव पुत्रादिर्गृह्यते न तु दुहित्रन्वयः। किञ्च। सत्स्वङ्गजेषु तद्गामी ह्यर्थो भवतीति बौधायनवचनादनन्तराङ्गजपुत्राधिकार एव प्रत्यासत्तेरुचितो न तु व्यवहिताङ्गजदौहित्रादेरित्याहनुसन्धानम्। जन्यवाचकस्य जन्यान्तरेणान्वये पुत्र इत्यादावप्यन्वयो न स्यात्। तज्जन्यप्रतिसम्बन्धितयान्वयाविरोधस्तत्रापि तुल्यः। अन्यथा दुहितुः पुत्र इत्यत्राप्यन्वयो न स्यात्। तस्मात् काष्ठ्यनुत्पन्नज्ञानमेवेदम्। याज्ञवल्क्यवचने च यद्यपि मातुरन्वयः पुत्रादिरेवोक्तस्तथापि विभजेरन् सुताः पित्रोरित्यनेन प्राप्ताधिकाराणामेव वक्तव्यत्वाद्दानदुहित्रभावे पाधिकत्वज्ञापनार्थोऽनुवादस्तच दौहित्रानन्तरमप्यविरुद्धः। सत्स्वङ्गजेष्विति बौधायनवचनन्तु मातृसाधारण्येन पुत्राणामन्यनाधिकारमात्रमङ्गजपदस्य चापायमात्रवाचकत्वात् पुत्रदुहितृसाधारणमधिकारं प्रतिपादयद्वचनान्तराविरुद्धं प्रत्यासत्त्यैव व्याख्यातुं युक्तमिति न किञ्चिदेतत्॥ सन्तानाभावे त्वाह योगीश्वरः। अतीतायामप्रजसि बान्धवास्तदवाप्नुयुः। अप्रजसि दुहित्रादिप्रपौत्रपर्यन्तरहितायामतीतायां मृतायां बान्धवा वक्ष्यमाणास्तत्स्त्रीधनमवाप्नुयुः। विवाहभेदेन व्यवस्थया बान्धवानामधिकारमाह स एव॥ अप्रजःस्त्रीधनं भर्तुर्ब्राह्मादिषु चतुर्ष्वपि। दुहितृणां प्रसूता चेच्छेषेषु पितृगामि तद्दिति। चतुर्षु ब्राह्मदैवार्षप्राजापत्येषु। अपि शब्दाद्गान्धर्वे

परिग्रहः। यद्वा अतन्दुणासंविज्ञानवद्रुव्रीहिणा ब्राह्मभिन्नादैवार्षप्राजापत्यगान्धर्वा चत्वारः। तेन ब्राह्मदैवार्षगान्धर्वप्राजाप त्येषु यद्धनम्। अप्रजायामतीतायाम्भर्त्तुरेव तदिष्यत इति मनुवचनाविसंवादः। ब्राह्मादिविवाहोढायाधनमनपत्याया भर्त्तुर्भव ति। तदभावे भर्त्तुः प्रत्यासन्नानाम्। स्वामिप्रत्यासत्तेर्भर्त्रैवान्तरायेभर्त्तृप्रत्यासत्तेरेव पुरस्करणीयत्वात्। शेषेष्वासुरादिषुप रिणीतायास्तु पितृगामि। एकशेषेणमातापितृगामि। तत्रापि प्राङ्मातृगामि तदनु पितृगामि। पितराविच्यत्रैकान्यायात्। विरुद्धवचनान्तराभावाच्च। अतएव मनुना। यत्त्वस्याः स्याद्धनन्दत्तं विवाहेष्वासुरादिषु। अतीतायामप्रजसि मातापित्रोस्तदि ष्यत इति द्वंद्वे मातृशब्दपूर्वनिपातेन मातुः प्राथम्यमवगमितम्। कन्याधने च मातुरभावे पितुरधिकारश्रवणात्तत्रापि तथैवौ चित्यात्। यथाह बौधायनः। रिक्थम्मृतायाः कन्याया गृह्णीयुः सोदराः स्वयम्। तदभावे भवेन्मातुस्तदभावे भवेत्पितुरिति। मातापित्रोरभावे तत्प्रत्यासन्नगामि। पूर्वोक्तेषु सर्वेष्वेव विवाहेषु प्रसूतापत्यवती चेत्तद्दुहितृगामि तद्धनम्। दुहितृशब्देन चा त्र दुहितृदुहितरो लक्ष्यन्त इति प्रागेवोक्तम्। तत्राप्यनूढादिक्रमो गौतमादितो दुहितृधनग्रहणकाले दौहित्रीभ्योपि प्रीत्या किंचिद्दानमिति च प्रागेव निरूपितम्। दौहित्रीणाञ्च मातामही धनग्रहणमभिन्नमातृकाणाम्विषममातृद्वारेण। पौत्राणा म्पितृद्वारेणैव। प्रतिमातृ वा स्ववर्गे भाग इति गौतमस्मरणात्। जीमूतवाहनस्तु॥ ब्राह्मादिविवाहेषु यद्धनन्तद्देवानेनव्य वस्थाप्यते न तु तन्नद्विवाहोढायाः सर्वे धनम्। ब्राह्मादिषु यद्धनमिति सम्बन्धे वर्त्तमानसम्बन्धे कृतकालक्षणानस्तद्धस्वी पत्वेऽतीतविवाहक्रियाद्वारकसम्बन्धेकृतलक्षणाया जघन्यत्वादित्याह। तदनुगामी दायतत्त्वकृदप्येवम्। तदपेशलम्। पूर्ववचने अप्रजः स्त्रीधनम्भान्यवा गृह्णीयुरिति सामान्यतउक्तेः कीदृश्या अप्रजसः केवान्यवा गृह्णीयुरित्येवाकांक्षोदयाद्ब्राह्मा दिपदानान्तद्विशेषणत्वस्यौचित्यात्। यच्च वर्त्तमानभूतसम्बन्धकृतं विनिगमकमुक्तन्तदपितुच्छम्। विभागकालेऽतीतत्व स्योभयत्राविशेषात्॥ धनलाभकाले वर्त्तमानत्वस्य चाप्रयोजकत्वात्। विवाहजन्यभार्य्यात्वसम्बन्धस्यान्तरङ्गत्वाच्च। यत्तु

सर्वेष्वपि विवाहेषु पित्रोः सकाशात्तया प्राप्तं विवाहोत्तरन्तद्भ्रातॄणामेव । यदाह कात्यायनः । पितृभ्यां चैव यद्दत्तं दुहितुः स्था
वरं धनम् । अतीतायामप्रजसि भ्रातृगामि तु सर्वदा । विश्वरूपजीमूतवाहनौ तु कन्यादशायां यत्पितृभ्यां दत्तं तद्भ्रातृगा
मि । विवाहात्परतो लब्धस्यान्वाधेयत्वात् । विवाहकाललब्धस्य च विवाहभेदेन भर्तृगामित्वान्मातापितृगामित्वाच्चेत्याहतुः । त
न्न । स्थावरविषयत्वादस्याविरोधात् । न च दण्डापूपिकया स्थावरग्रहणे जङ्गमग्रहणं भ्रातॄणामायात्येवेति वाच्यम् । अपवादे
तन्न्यायाप्रवृत्तेः । शुल्कं तु सोदराणामेव । भगिनीशुल्कं सोदर्य्याणामिति गौतमवचनात्सोदराभावे मातुः । ऊर्द्ध्वं मातुरिति
तद्वचनादेव । पूर्वं चैकइति तु परमतम् । बन्धुदत्तं प्रथममप्रजसो मृतायाबन्धूनां तदभावे भर्त्तुः । बन्धुदत्तन्तु बन्धूनामभावे भ
र्तृगामि तदिति कात्यायनवचनात् । पूर्वा क्रमाप्रजः स्त्रीधनाधिकार्य्यभावे त्वाह वृहस्पतिः । मातृष्वसा मातुलानी पितृव्यस्त्री पितृ
ष्वसा । श्वश्रूः पूर्वजपत्नी च मातृतुल्याः प्रकीर्त्तिताः । यदासामौरसो न स्यात्सुतो दौहित्र एव वा । तत्सुतो वा धनन्तासां स्वस्री
याद्याः समाप्नुयुः । औरसपदे सपुत्रपुत्र्योरुपादानन्तयोः सर्वापवादकत्वात् । अपवादक्रमश्च प्रागुक्त एव । सुतपदेन
च सपत्नीपुत्रस्य । सर्वासामेकपत्नीनामेका चेत्पुत्रिणी भवेत् । सर्वास्तास्तेन पुत्रेण प्राह पुत्रवतीर्मनुरिति मनुवचनात् । न
तु सुतपदमौरसविशेषणमानर्थक्यात् । सपत्नीपुत्रसद्भावे पि स्वस्रीयाद्यधिकारापत्तेरनादिव्यवहारविरोधाच्च । तथा च दौ
हित्राभावे औरसपुत्रादिसुतदभावे सपत्नीपुत्रः । तत्सुत इति तच्छब्देनव्यवहितयोरौरससपत्नीपुत्रयोरुपादानन्तानन्तर
स्यापि दौहित्रस्य दौहित्रपुत्रस्य तस्य पिण्डदानेवहिर्भावात् । तथा च दौहित्रपर्य्यन्ताभावे प्रथममौरसस्तत्सुत तत्पुत्रपौत्रा
। पुत्रपौत्रैर्ऋणं देयमिति ऋणापाकरणाधिकारिणाम्पिण्डदानाधिकारिणाञ्च तेषामेव रिक्थग्रहणौचित्यात् । तदभावे सप
त्नीपुत्रतत्पुत्रतत्पुत्राणाम् । तेषामेव तदापिण्डदातृत्वादृणापाकर्तृत्वाच्च । प्रागुक्तमनुवचनाच्च । तदेषामभावे स्वस्रीयश्वश्रु
रादिषु स्वपिण्डेष्वनन्यगतिकैतद्वचनबलाद्भगिनीपुत्रादीनामेव मातृष्वस्रादिधने प्रत्यासत्तितारतम्येनाधिकारः । स्नुषादीनां

त्तयाच्छादनमात्रभाक्तं। वचनविरोधे सपिण्डवत्प्रत्यासत्तेरप्रयोजकत्वात्। तस्मात्स्त्रियो निरिन्द्रिया अदायादा इति श्रुतेः
। अनिन्द्रिया ह्यदायाश्च स्त्रियोऽनृतमिति स्थितिरिति तन्मूलकमनुवचनाच्च। मृच्छकटिकयाय चकसोऽङ्कः पत्नी दुहितर इ
त्यादौ यासां स्त्रीणां धनाधिकारस्तासामेव। अन्यासान्तु श्रुतिमनुवचनाभ्यां दायग्रहणनिषेध एवेति स्मृतिचन्द्रिकाकारहरद
त्तादीनां दाक्षिणात्यनिबन्धृणां जीमूतवाहनादिपौरस्त्यसर्वनिबन्धृणां सिद्धान्ताच्च। इति स्त्रीधनविभागः ॥ ● ॥ अथ विभा
गकाले केनचिदपह्नुतस्य पश्चाज्ज्ञातस्य विभागप्रकारः। तत्र मनुः। ऋणे धने च सर्वस्मिन्प्रविभक्ते यथाविधि। पश्चाद्दृश्येत
यत्किञ्चित्तत्सर्वं समतां नयेत्। योगीश्वरः। अन्योन्यापहृतं द्रव्यं विभक्तैर्यत्तु दृश्यते। तत्पुनस्ते समैरंशैर्विभजेरन्निति स्थितिः
। अत्र समपदादुद्धारविभागो निषिद्धः विभजेरन्निति वचनाद्दोषो नैव दृष्टान्ते नैव नयाह्यं नाप्यपहर्त्तुं ऽल्पत्वात्तत्स्वामिनिवोध्यते।
एतावता वचनार्थवत्त्वे स्तेयदोषाभावः समुदायद्रव्यापहारे। स्वबुद्ध्यागृहीतत्वादिति केषांचिद्वचनम्प्रलापः। साधारणद्रव्येऽपर
स्वत्वस्यापि सत्त्वेन परस्वापहारस्य स्तेयपदार्थस्यावारणीयत्वात्। अथ परकीयबुद्ध्या न गृहीतमिति न स्तेयमित्युच्यते। तत्र अप
हृवे परकीयबुद्धेरावश्यकत्वात्। अत एवापहृतमित्युक्तम्। ननु मनुना ज्येष्ठस्यैव समुदायद्रव्यापहारे दोषो दर्शितो न कनी
यसाम्। यो लोभाद्विनिकुर्वीत ज्येष्ठो भ्रातॄन्यवीयसः। सोऽज्येष्ठः स्यादभागश्च नियन्तव्यश्च राजभिरिति। सत्यम्परन्तु स
म्भावितत्वस्य पितृस्थानीयस्य ज्येष्ठस्यापि दोषश्चेत्तत्परतन्त्राणाम्पुत्रस्थानीयानां दण्डापूपन्यायेन दोषः सुतरामुक्त एव भव
तीति। अत एव समुदायद्रव्यापहारे समविभागवचनस्य स्तेयदोषाभावपरत्वमाचक्षाणा अनेन मनुवचनेन दूरापास्ताः। अपि
च येण दोषप्रतिपादिकया श्रुत्या च। यथा। यो वै भागिनम्भागान्नुदते चयते वैनं स यदि वैनं न चयतेऽथ पुत्रमथ पौत्रञ्चयत
इति। यो भागिनम्भागार्हं भागान्नुदते निरस्यति। भागन्तस्मै कथञ्चिद्दत्वा द्वचनया वा न प्रयच्छतीति यावत्। सभागान्नुदन्नयं
लोकाच्च्यवते नाशयति दोषवशात्। यद्ययं न नाशयति तदा तस्य पुत्रं पौत्रं वा नाशयतीति श्रुतेरर्थः। अन्यदप्याह प्रलपन्तु नाम साधारण

द्रव्यस्यापिपरस्वत्वेनापहारपदार्थेनपाथादिवदुक्तमेव । यथामौद्गेचरौविपन्नेमाषाद्रव्यात्प्रतिनिधितयामाषेषुगृह्यमाणेषुमुद्गावयवबुद्ध्यागृह्यमाणत्वादयज्ञियावैमाषाइतिनिषेधोनप्रवर्त्ततेमुद्गावयवबुद्ध्यागृह्यमाणत्वादितिपूर्वपक्षितेनिषेधस्यप्राप्तिमात्रापेक्षित्वात्तत्रापिमाषावयवानामप्यवर्जनीयग्रहणंयज्ञसाधनत्वञ्चेतिनिषेधप्रवृत्त्यनपायात्प्रतिनिधितयापितदनुपादानंसिद्धान्तितम् । राज्ञेतुभागिभिर्ननिवेदनीयंराज्ञेनिवेदितमपितेनसामादिनैवदापनीयमितिप्रीत्यविच्छेदादिदृष्टप्रयोजनकमेवकात्यायनश्चाह । बन्धुनापहृतंद्रव्यंबलान्नैवप्रदापयेत् । अविभागकालेऽनेनवस्त्रभुक्तमित्यपिनवक्तव्यंभुक्तमपिराज्ञान्याह्यमित्याशयेनाहसएव । बन्धूनामविभक्तानांभोगंनैवनिवर्त्तयेदिति । नहिन्यूनाधिकभोगोवारयितुंशक्योऽवर्जनीयत्वादितिभावः । एवंदृष्टार्थतयैवोपपत्तौनास्यापिस्तेयदोषाभावपरत्वमदृष्टार्थत्वापत्तेस्तस्मादत्रापिस्तेयप्रायश्चित्तंराजदण्डश्चभवत्येवेत्यवधेयम् ॥७॥ अथाविभाज्यम् । तत्रयोगीश्वरः । पितृद्रव्याविरोधेनयदन्यत्स्वयमर्जितं । मैत्रमौद्वाहिकञ्चैवदायादानांनतद्भवेत् । क्रमादभ्यागतंद्रव्यंहृतमभ्युद्धरेत्तुयः । दायादेभ्योनतद्दद्याद्विद्ययालब्धमेवच । पितृद्रव्याविरोधेनेतिसर्वशेषः । स्वातन्त्र्येऽपिपितृद्रव्योपघातेनयन्मैत्रादिकंतस्याप्यविभाज्यत्वापत्तौमहाजनाचारविरोधोविद्यालब्धेनारदवचनविरोधश्च । कुटुम्बंबिभृयाद्भ्रातुर्योविद्यामधिगच्छतः । भागंविद्याधनात्तस्मात्सलभेताश्रुतोऽपिसन्निति । कात्यायनस्तुविभाज्यविद्याधनलक्षणमुखेनैतदेवद्रढयतियथाह । परभक्तोपयोगेनविद्याप्राप्तान्यतस्तुया । तयाप्राप्तंचधनंयत्तुविद्याप्राप्तंतदुच्यतइति । मनुरपिस्पष्टमाह । अनुपघ्नन्पितृद्रव्यंश्रमेणयदुपार्जयेत् । दायादेभ्योनतद्दद्याद्विद्ययालब्धमेवच । श्रमेणासेवादिना । क्रमादभ्यागतायांपितृद्रव्याविरोधेनोद्धृतायामपिभूम्यांविशेषस्तुशङ्खेन । पूर्वनष्टांतुयोभूमिमेकश्चेदुद्धरेत्क्रमामात् । यथाभागंलभन्तेऽन्येदत्त्वांशन्तुतुरीयकमिति । उद्धर्त्तुंचतुर्थांशमुद्धरणमूल्यमधिकंदत्त्वांशत्रयंसर्वैःसमंविभजेरन्नित्यर्थः । यद्यप्येतादृशाविभाज्यत्वंयद्येनलब्धंतत्तस्यैवेतिन्यायादेवप्राप्तंतथापिप्रायोव्यवहारशास्त्रेन्यायसिद्धानुवादकान्येव

वचनानीतिपरिभाषाप्रकारोक्तप्रायश्चित्तमितिनदोषः। अविभाज्यान्तरमप्युक्तंमनुना। वस्त्रम्पत्रमलङ्कारंकृतान्नमुदकंस्त्रि
यः। योगक्षेमम्प्रचारञ्चनविभाज्यंप्रचक्षते॥ प्रचक्ष्यतेपत्रम्वाहनम्। वस्त्रादियद्येनधृतन्ततस्यैव। अधृतन्तुविक्रयाद्युत्थं
विभाज्यमेव। कृतान्नंपक्वान्नंसर्वैर्यथायथंभोक्तव्यंनतुतोलयित्वाविभाज्यम्। उदकमुदकाधारःकूपादिःसर्वैर्यथोपयोग
मुपभोज्यः। स्त्रियोदास्योविषमानविभाज्याः। पर्यायेणकर्म्मकारयितव्याःपित्रवरुद्धास्तुसमाअपिनविभाज्याः। स्त्रीष्ववरु
द्धासुनविभागइतिगौतमवचनात्। योगक्षेमशब्दाभ्यामिष्टापूर्त्तेउच्येते। तयोरविभाज्यत्वम्पितृद्रव्यविरोधेनार्जितयोरपिदृ
ष्टान्ततयोच्यते। नहिस्वतःफलतोवातस्यविभागःसम्भवतिपैतृकस्यतुसुतरां। तथाचाहलौगाक्षिः। क्षेमम्पूर्त्तंयोगमिष्टमि
त्याहुस्तत्त्वदर्शिनः। अविभाज्येचतेप्रोक्तेशयनासनमेवचेतियोगक्षेमशब्देनतत्कारिणोराजमन्त्रिपुरोहितादयउच्यन्तेइ
तिकेचित्। शस्त्रचामरोपानत्प्रभृतयइत्यन्ये। प्रचारोगृहारामादिप्रवेशनिर्गममार्गाः। तस्याप्यविभाज्यत्वम्। पितृधृतंवस्त्रा
दिकंश्राद्धभोक्त्रेदातव्यम्। यथाहबृहस्पतिः। वस्त्रालङ्कारशय्यादिपितुर्य्यद्वाहनादिकम्। गन्धमाल्यैःसमभ्यर्च्यश्राद्धभो
क्त्रेतदर्प्पयेदिति। स्त्रीधृतोप्यलङ्कारोनविभाज्यः। पत्यौजीवतियःस्त्रीभिरलङ्कारोधृतोभवेत्। नतम्भजेरन्दायादाभजमानाः
पतन्तितेइति। धृतइत्यनेनाधृतस्यविभाज्यत्वमेव। पत्यौजीवतीत्यनेनपतिजीवनचिह्नतयायत्रदेशेयोधार्य्यतेसनविभाज्यइ
तिसूचितं। पितृप्रसादलब्धस्यापिनविभागः। पितृप्रसादाद्भुज्यन्तेवस्त्राण्याभरणानिच। भुज्यन्तेइतिवचनाद्विभाज्यत्वं। त
थापितृदत्तस्यापिपितृभ्यांयस्ययद्दत्तन्तत्तस्यैवधनंभवेदितिस्मरणात्। पितृप्रसाददानप्रीतिदानेअयोग्यानुरोधेनैवज्ञेये
। ननुयथाकामं। महाजनाचारविरोधात्। पितृद्रव्याविरोधोपार्जितप्रपञ्चोभूयस्तुशौर्य्यादिविषयमादायस्मृतिवचस्तुदृश्य
तेसयन्थविस्तरभियानलिख्यते। अथविभागानधिकारिणः ॥●॥ तत्रयोगीश्वरः। क्लीबोथपतितस्तज्जःपङ्गुरुन्मत्तकोजडः
। अन्धोऽचिकित्स्यरोगाद्याभर्त्तव्याःस्युर्निरंशकाः। तज्जः। पतितजः। क्लीबान्धौयदिजन्मतआरभ्यतदाविभागानर्हौवे

वयदित्वन्तरा । नष्टात्मष्टपगमस्वदेषधादिना । नहि दृश्यात्तद्विभागस्यादायविरोधितादितिरीत्याविभागार्हो वेवेतिध्येयम् । आदृश्यशब्देनायमान्तरगतपितृद्वेष्युपपातकिवधिरमूकनिरिन्द्रियाणांयहणम् । यथाहवशिष्ठः । अनंशास्त्वाश्रमान्तरगताइति । नारदोपि । पितृद्विट्पतितःषण्डोयश्चस्यादौपपातिकः । औरसाअपिनैतेंशंलभेरन्क्षेत्रजाःकुतइति । मनुरपि अनंशौक्लीबपतितौजात्यन्धबधिरौतथा । उन्मत्तजडमूकाश्चयेचकेचिन्निरिन्द्रियाइति । व्याधिनानिर्गतमिन्द्रियंयस्यसनिरिन्द्रियः ॥ तेनक्लीबादिभेदः । कश्चित्तुनिरिन्द्रियाःपाणिपादादिहीनाइत्याह । एतेक्लीबादयोंशभाजोनभवन्तिकिन्तुग्रासाच्छादनदानादिनाभर्त्तव्याःपोषणीयाः । अभरणेतुमहान्दोषः । यथाहमनुः । सर्वेषामपितुन्याय्यंदातुंशक्त्यामनीषिणा । ग्रासाच्छादनमत्यन्तम्पतितोह्यददद्भवेदिति । अत्यन्तंयावज्जीवम् । तत्रापिपतितोपपातकिनोर्व्यवस्थाप्रायश्चित्ताचरणमनंशित्वम् । औद्धत्यादिनाप्रायश्चित्तमकुर्वतोस्तुनिपतनमेव । एतेषांचविभागात्प्रागेवदोषभावेऽनंशित्वम् । नपुनर्विभागोत्तरमपिदत्तविभागापहरणम्प्रमाणाभावात् । पश्चाद्पोषधादिनादोषनिर्हरणेस्त्वेवांशभागितेतिविज्ञानेश्वराचार्य्याः । युक्तञ्चैतत् । दोषप्रयुक्तत्वाद्विभागानर्हतायाः । विभक्तेषुसुतोजातःसवर्णायांविभागभागितिन्यायसाम्यात् । पतितादिपुत्रकमविवक्षितमनुपादेयत्वात् । ब्राह्मणोनसुराम्पिबेदित्यादिवत् । तेनयथासम्भवेपत्नीदुहितरइत्यादेरप्ययमपवादः । क्लीबादीनामनंशत्वेपितत्पुत्राणामंशोस्तीत्याहयोगीश्वरः । औरसाःक्षेत्रजास्त्वेषांनिर्दोषाभागहारिणः । निर्दोषाःपूर्वोक्तक्लीबत्वप्रयोजकदोषशून्याः । तत्रक्लीबस्यक्षेत्रजपुत्रःसम्भवत्यन्येषामौरसोपिपुत्रद्वययहणमितरपुत्रव्युदासार्थं । पतितस्तुतयोर्नभरणम् । तथाचदेवलः । मृतेपितरिनक्लीबकुष्ठ्युन्मत्तजडान्धकाः । पतितःपतितापत्यंलिङ्गीदायांशभागिनः । तेषांपतितवर्ज्येभ्योभक्तंवस्त्रञ्चदीयते । तत्सुताःपितृदायांशंलभेरन्दोषवर्जिताइति । लिङ्गीप्रव्रजितादिः । पतितपदेनात्रपतितसुतस्यापिग्रहणम्पतितेनोत्पन्नत्वेनतस्यापिपतितत्वात् । पतितापत्यम्पतितमेवान्यत्रस्त्रियाःसाहिपरगामिनीभवतीतिस्मृतेः ।

मृतइति विभागकालोपलब्धयं क्लीबद्विभागेप्यनर्हत्वात्। कात्यायनोपि। अक्रमोढासुतश्चैव सगोत्राद्यश्च जायते। प्रव्रज्यावसि
तश्चैव न रिक्थं तेषु चार्हति। हीनस्त्रीपरिणयानन्तरमुत्तमस्त्रीपरिणयने द्वयोरप्यक्रमोढात्वन्तयोः सगोत्रादनियोगोत्पन्नः प्रव्र
जितः पुत्रो नार्हति धनं। अक्रमोढासुतस्त्वृक्थी सवर्णश्च यदा पितुः। असवर्णप्रसूतस्तु क्रमोढायाश्च यो भवेत्। प्रतिलोमप्रसू
तायास्तस्याः पुत्रो न रिक्थभाक्। ग्रासाच्छादनमात्रन्तु देयन्तद्बन्धुभिर्मितम्। बन्धूनामप्यभावेतु पित्र्यन्द्रव्यन्तदाप्नुयात्।
सपित्र्यन्तद्धनम्प्राप्नुयाद्दापनीया न बान्धवाः। क्लीबादीनामपि दारपरिग्रहे सपुत्रसम्भवस्त्वक्तो मनुना। यद्यर्थिता तु दारैः स्यात्
क्लीबादीनां कथञ्चन। तेषामुत्पन्नतन्तूनामपत्यन्दायमर्हति। तन्तुरपत्यं। नच क्लीबादेरुपनयनाभावेन पतितत्वात्कथन्दा
रसम्बन्ध इति वाच्यम्। उपनयनानर्हतयाऽनुपनीतस्य शूद्रवदपतितत्वात्। एतेषां क्लीबादीनां दुहितरो विवाहपर्यन्तं भर्त्तव्याः
संस्कर्त्तव्याश्च। नत्वियमस्तु पुत्ररहिताः साध्व्यो भरणीया अप्रतिकूलाश्चेत्। अन्यथा बहिष्कारणीयाः। तदाह योगीश्वरः।
सुताश्चैषां प्रभर्त्तव्या यावद्वै भर्तृसात्कृताः। अपुत्रा योषितश्चैषां भर्त्तव्याः साधुवृत्तयः। निर्वास्या व्यभिचारिण्यः प्रतिकूलास्तथै
वच। आपस्तम्बः। अपपात्रितस्य रिक्थपिण्डोदकानि निवर्त्तन्ते। अपपात्रितोभिन्नोदकीकृतः। तथा बृहस्पतिः। सवर्णजोप्य
गुणवान्नार्हः स्यात्पैतृके धने। तत्पिण्डदाः श्रोत्रिया ये तेषान्तदभिधीयते। उत्तमर्णाधमर्णेभ्यः पितरं त्रायते सुतः। अतस्त
द्विपरीतेन नास्तितेन प्रयोजनम्। तया गवा किं क्रियते या न धेनुर्न गर्भिणी। कोर्थः पुत्रेण जातेन यो न विद्वान्न धार्म्मिकः। शा
स्त्रशौर्य्यार्थरहितस्तपोज्ञानविवर्जितः। आचारहीनः पुत्रस्तु मूत्रोच्चारसमः स्मृतः। अयमर्थः। पित्रादेरौर्ध्वदेहिकं कर्म्म
णः कर्त्ता सुतोऽसंस्कृतोपि वरः श्रेष्ठः। ज्येष्ठो वेदपारगोप्यपरो नवरइति। पुन्नाम्नो नरकाद्यस्मात्पितरं त्रायते सुतः।
तस्मात्पुत्र इति प्रोक्तः स्वयमेव स्वयम्भुवेति स्मृतेः पुत्रकर्म्म कर्त्तुः पितृधनस्वाम्यमेव चेतनमतस्तदकुर्वतः कुतो वेतनाधिकार इ
तिभावः। मनुरपि। सर्व एव विकर्मस्था नार्हन्ति भ्रातरो धनमिति। श्रौतस्मार्त्तकर्मानधिकारिणो विकर्मस्थास्ते भागानर्हा।

इतिभावः। इतिविभागानधिकारिणः ॥०॥ अथविभक्तकृतम्। तत्रनारदः। यद्येकजातावहवःपृथग्धर्माःपृथक्क्रियाः।
पृथक्कर्मगुणोपेतानचेत्कार्य्येषुसंमताः। स्वभागान्यदिदद्युस्तेविक्रीणीयुरथापिवा॥ कुर्युर्य्यथेष्टन्तत्सर्वमीशास्तेस्वधन
स्यहीति। अस्यार्थः। एकस्माज्जातावहवोभ्रातरोयदिविभक्ताइतिशेषइतिकेचित्वयन्तुपृथग्धर्माइत्यादेरेवविभक्ता
इत्यर्थः। तद्विधानस्यात्राप्रतीतेरानर्थक्याच्च। पृथग्विभिन्नोधर्मोदेवपितृद्विजार्चनरूपोयेषांनत्वग्निहोत्रादिरूपः। तस्य
द्रव्यसाध्यत्वेप्यविभागेपिपृथक्त्वात्। तथाचबृहस्पतिः। एकपाकेनवसतांपितृदेवद्विजार्चनम्। एकम्भवेद्विभक्तानां
तदेवस्याद्गृहेगृहे। एतच्चप्राङ्गिरूपितम्। पृथक्क्रियालौकिककृष्यादिरूपायेषांपृथग्विभिन्नायेकर्मणाङ्गडनपेष
णादीनांगुणाउपसर्जनभूतामुसलोलूखलदृषदुपलादयस्तैर्येषाम्। तेचेत्कार्य्येषुनसंमताःपरस्परमनुमतिंयद्यपिनकुर्व
न्ति। तथापितेस्वभागान्यदिदद्युर्विक्रीणीयुर्वा। तत्सर्वमन्यदप्याधीकरणकरणादानादियथेष्टंस्वेच्छयाकुर्य्युः। विभक्ता
यद्यनुमतिंकुर्वन्तिव्यवहारसौकर्य्यमात्रंभवति। अथनकुर्वन्ति। तथापिनदानाद्यनिष्पत्तिः। तत्रहेतुःहियस्मात्तेस्वधन
स्यासाधारणत्वापन्नस्यधनस्येशाःस्वामिनः। साधारणेस्वत्वेहिपरस्परानुमत्यपेक्षानत्वसाधारणेपीतिभावः। यत्तुबृहस्प
तिनोक्तम्। विभक्तावाऽविभक्तावासपिण्डाःस्थावरेसमाः। एकोह्यनीशःसर्वत्रदानाधमनविक्रयइति। तदप्यविभक्तानुम
तिंव्यवहारसौकर्य्यार्थमेवप्रतिपादयति यामाद्यनुमतिवदित्यवसेयंस्थावरेहिचिरकालस्थायिनियतसाक्ष्यादिविगमेविभा
गाविभागनिर्णयोदुःशंकःस्यात्कालान्तरे। सत्यान्त्वनुमतौविभागनिर्णयानपेक्षएवव्यवहारःसिद्ध्यतिसर्वानुमत्यादत्तत्वा
दित्याशयइतिविज्ञानेश्वरादयोवहवआहुः। स्मृतिचन्द्रिकारस्तुयदिविभक्ताअपिस्थावरविभागंदुष्करंमन्यमानास्तत्फ
लमेवफलकालेविभज्यभोक्ष्यामइत्यभिसन्धिनानादितरधनमेवपृथक्विभज्यगृहीत्वास्थावरंमध्यकमेवस्थापयन्तितादृश
स्थावरविषयमिदमित्याह। तत्कल्पनामात्रम्। अविभक्तत्वादेवतत्रानुमत्यपेक्षणात्। सएवयेनांशोयादृशोलब्धःप्राप्य

मन्नविषालयेदिति । प्राप्यस्वीकृत्य । विभागकाले मत्वा पश्चाद्विप्रतिपद्यमानो राज्ञा वार्य्यो योऽध्यायहेद्राज्ञस्तेन त्वाह स एव । स्वेच्छागतविभागो यः पुनरेव विसंवदेत् । स राज्ञांशे स्वके स्थाप्यः शासनीयोऽनुबन्धकृत् । अनुबन्धो निर्बन्धः आग्रह इतियावत् । इति विभक्तकृत्यम् ॥●॥ अथ विभागप्रकारे उक्ते तत्सन्देहे निर्णयप्रकार उच्यते । तत्र याज्ञवल्क्यः ॥ विभागनिह्नवे ज्ञातिबन्धुसाक्ष्यभिलेखितैः । विभागभावना ज्ञेया गृहक्षेत्रैश्च यौतकैः । विभागस्य निह्नवेऽपलापे विभक्तमध्ये केनचित्कृते ज्ञातिभिः पितृबन्धुभिः । बन्धुभिर्मातुलादिभिः साक्षिभिश्चोदासीनैः साक्षिलक्षणलक्षितैः । यद्यपि ज्ञातिबन्धवोऽपि साक्षिविधयैव निर्णयकारणं तथापि बहिरङ्गसाक्ष्यपेक्षया अन्तरङ्गास्ते श्राद्धादिपृथग्भावरूपविभागचिह्नतत्त्वज्ञा इति भागकर्तारश्चेति गोबलीवर्दन्यायेन पृथगुपात्ताः । लेख्येन विभागपत्रेण च विभागस्य भावना निर्णयो ज्ञातव्यः । तथा यौतकैः पृथक्कृतैः । युग्मिश्रशास्त्रमिश्रयोरिति धान्यनुसारात् । गृहैः क्षेत्रैश्च । नारदः । विभागधर्मसन्देहे दायादानां विनिर्णयः । ज्ञातिभिर्भागलेख्येन पृथक्कार्य्यप्रवर्तनात् । ज्ञातिग्रहणाद्येषु सत्सु वान्यसाक्षिपुरस्कार इत्येतदर्थम् । कार्य्यं कृष्यादि तस्य पृथक्प्रवर्तनात् । शङ्खः । गोत्रभागविभागार्थे सन्देहे समुपस्थिते । गोत्रजैस्तावदविज्ञाते कुलं साक्षित्वमर्हति ॥ कुलं बन्धवो मातुलादयः । अत एव नारदेन मुख्यत्वाज्ज्ञातय एव निर्दिष्टाः । ज्ञातृभिरिति पाठस्त्वनाकरः पुरातनपुस्तकेषु निबन्धेषु चादर्शनात् । लिखितन्तु साक्षिभ्यो बलवदिति परिभाषायां निरूपितम् । नारदः । दानग्रहणपश्वन्नगृहक्षेत्रपरिग्रहाः । विभक्तानां पृथग्ज्ञेयाः पाकधर्मागमव्ययाः । साक्षित्वम्प्रातिभाव्यञ्च दानं ग्रहणमेव च । विभक्ता भ्रातरः कुर्युर्नाविभक्ताः कथञ्चन । येषामेताः क्रिया लोके प्रवर्तन्ते स्वरिक्थतः । विभक्तानवगच्छेयुर्लेख्यमप्यन्तरेण तान् । धर्मो वैश्वदेवादिः एकपाकेन वसतामिति प्रागुक्तवचनात् । भ्रातॄणामविभक्तानामेको धर्मः प्रवर्तते । विभागे सति धर्मोऽपि भवेत्तेषां पृथक्पृथगिति नारदेनैवोक्तत्वाच्च । बृहस्पतिः । साहसं स्थावरं न्यासः प्राग्विभागश्च रिक्थिनाम् । अनुमानेन विज्ञेयं न स्यातां यत्र साक्षिणौ । न स्यातामित्यत्र यदीत्यध्याहारः । पृथगायव्ययधनाः कुसीदञ्च परस्परम् ।

वणिक्पथस्त्वयेकुर्य्युर्विभक्तास्तेनसंशयः। आयोव्ययोधनञ्चपृथग्येषामितिविग्रहः कुसीदंवृद्ध्यर्थंधनप्रयोगः। वणिक्पथोवाणि
ज्यम्। परस्परमिति। एकोभ्रातोत्तमर्णःपरश्चाधमर्णः। एकोविक्रीणीतेपरश्चक्रीणाति। इत्येवमादिभिर्लिङ्गैर्विनावि
भागमनुपपद्यमानैर्विभागःप्रमातव्यइत्यर्थः। एताःक्रियाइतिबहुवचनान्निर्दिष्टानामेवैषांलिङ्गत्वमितिनभ्रमितव्यम्। यस्य
समस्तानामपितद्विधानात्। न्यायमूलकत्वाच्चवचनस्य अनुमानेनाप्यनिर्णयेदिव्यैःशपथैर्वाविषयाल्पत्वभूयस्त्वानुसारे
णनिर्णयः। युक्तिष्वप्यसमर्थासुशपथैरेनमर्दयेदितिपरिभाषायांनिरूपितत्वाच्चतुमानुषनिर्णायकप्रमाणत्रयस्याभावाः
। दिव्यशपथाध्यवसायश्चान्यतरस्यनभवति। तत्रपुनर्विभागःकार्य्यइत्याहमनुः। विभागेयत्रसन्देहोदायादानाम्परस्प
रम्। पुनर्विभागःकर्त्तव्यःपृथक्स्थानस्थितैरपीति। सचपरिशेषोभयव्ययमित्यादिसंसृष्टिविभागादिरीत्यैवानुसन्धेयम्
। यच्चमनुनैवोक्तम्॥ सकृदंशोनिपततिसकृत्कन्याप्रदीयते। सकृदाहददानीतित्रीण्येतानिसकृत्सकृदिति। तत्सकृत्त्वंनिका
रणाभावे। कन्यादानदानान्तरयोरप्येवम्। इतिविभागसन्देहनिर्णयः॥ समाप्तञ्चेदन्दायभागाख्यंविवादपदम्॥ ●॥
अथद्यूतसमाह्वयाख्यंव्यवहारपदम्। तस्यस्वरूपमाहनारदः। अक्षवध्रशलाकाद्यैर्देवनंजिह्मकारितम्। पणक्रीडावयो
भिश्चपदंद्यूतसमाह्वयमिति। अक्षाःपाशाः। वध्रश्चर्म्मपट्टिका। शलाकादन्तादिमय्योदीर्घचतुरस्राः। आद्यग्रहणाच्चतुर
ङ्गादिक्रीडासाधनंकरितुरङ्गरथादिकंगृह्यते। तैरप्राणिभिर्य्यापणपूर्विकाक्रिया। तथावयोभिःपक्षिभिःपारावतादिभिःच
शब्दान्मल्लमेषादिभिश्चप्राणिभिर्यापणपूर्विकाक्रीडाक्रियतेतदुभयंयथाक्रमंद्यूतसमाह्वयाख्यंव्यवहारपदमित्यर्थः। द्यूत
ञ्चसमाह्वयश्चद्यूतसमाह्वयम्। अतएवमनुः। अप्राणिभिर्यत्क्रियतेतल्लोकेद्यूतमुच्यते। प्राणिभिःक्रियमाणस्तुसविज्ञेयः
समाह्वयइति। तत्रसभिकंप्रत्याहनारदः। सभिकःकारयेद्द्यूतंदेयंदद्याच्चतत्कृतम्। दशकन्तुशतंवृद्धिस्ततःस्याद्द्यूतकारि
ता॥ अथवाकितवोराज्ञेदत्त्वाभागंयथोदितम्। प्रकाशन्देवनंकुर्य्यादेवन्दोषोनविद्यतइति। तस्यवृत्तिमाहयाज्ञवल्क्यः। ग्लह

ह्रेशतिकवृद्धेस्तु सभिकः पञ्चकं शतम्। गृह्णीयाद्धूर्त्तकितवादितराद्दशकं शतमिति। परस्परं सम्प्रतिपच्या कितवैः परिकल्पितः
पणो ग्लहस्तत्र ग्लहे तदाश्रया शतिका शतपरिमितान दधिकपरिमिता वा वृद्धिर्यस्यासौ शतिकवृद्धिस्तस्मात्कितवात्पञ्चशतञ्जित
स्य ग्लहस्यात्मवृद्ध्यर्थं विंशतितमम्भागं गृह्णीयादित्यर्थः। पञ्चकं शतं पञ्च पणा आयो यस्मिन् शते तत्पञ्चकं तदस्मिन्वृद्ध्येतिकन्॥
सभा कितवनिवासार्था यस्यास्त्यसौ सभिकः सभापतिस्तु कल्पिताक्षादिनिखिलक्रीडोपकरणस्तदुपचितद्रव्योपजीवी। इतरस्मा
द पूर्णशतवृद्धेः कितवाद्दशकं शतञ्जितस्य दशमभागं गृह्णीयादित्यर्थः। एवंक्लृप्तवृत्तेः सभिकस्य यत्कर्त्तव्यन्तदाह स एव। स च
म्यक्पालितो दद्यात् राज्ञे भागं यथाकृतम्। जितमुद्ग्राहयेज्जेत्रे दद्यात्सत्यं वचः क्षमीति। यः क्लृप्तवृत्तिर्द्यूताधिकारी स राज्ञा धूर्त्तकि
तवेभ्यो रक्षितस्तस्मै राज्ञे यथा प्रतिपन्नमंशन्दद्यात्। तथा जितन्द्रव्यं पराजितसकाशादासेधादिनोद्धृत्य जेत्रे जयिने दद्यात्।
तथा क्षमी भूत्वा द्यूतकारिणीति विश्वासार्थं सत्यं वचो वदेदित्यर्थः। नारदोपि। सभिकः कारयेद्द्यूतन्देयन्दद्याच्च तत्कृतमिति। बृ
हस्पतिरपि। सभिको ग्राहकस्तत्र दद्याज्जेत्रे नृपाय वेति द्यूतपराजितकितवानां बन्धनादिना पणग्राहको भवेत्। पणयद्वा
प्रागेव स्वकीयन्द्रव्यं यन्नृपाय च यथाभागं सभिको दद्यादित्यर्थः। तथा च कात्यायनः। जेतुर्दद्यात्स्वकन्द्रव्यञ्जितं ग्राह्यं त्रिपक्षि
कम्। सद्यो वा कितवेनैव सभिकानु न संशय इति। त्रिपक्षिकमित्यनेन यथासामर्थ्यमा त्रिपक्षात्कालो देय इति दर्शितमिति स्मृति
चन्द्रिकायाम्। यदा तु जेत्रे जितन्द्रव्यं सभिको दापयितुमशक्तस्तदा राजा दापयेदित्याह याज्ञवल्क्यः। प्राप्ते नृपतिना भागे प्रसि
द्धे धूर्त्तमण्डले। जितं ससभिके स्थाने दापयेदन्यथा न त्विति। प्रसिद्धे अन्यथा प्रच्छन्ने सभिकरहितेऽदत्तराजभागे द्यूते जित
पणो जेत्रे न दापयेदित्यर्थः। प्राणिद्यूते प्राणिनाश्चय पराजये तत्स्वामिनोरित्याह बृहस्पतिः। द्वंद्वयुद्धेन यः कश्चिदवसादमवा
प्नुयात्। तत्स्वामिना पणो देयो यस्तत्र परिकल्पित इति। पणपरिकल्पनं कृताकृतमित्याह नारदः। परिहासकृतं यच्च यच्चा
प्रतिविहितं नृपे। न वा पिताप्नुयात्काममथवानुमतन्तयोरिति। काम्यत इति कामः पणः। अजयपराजयविप्रतिपत्तौ निर्णयप्र

कारमाह याज्ञवल्क्यः । द्रष्टारो व्यवहाराणां साक्षिणश्च त एव हीति । द्यूतव्यवहाराणान्द्रष्टारः सभ्याः त एव कितवा एव नियोक्तव्या रा
ज्ञा । न तत्र श्रुताध्ययनसम्पन्नादिर्याद्युक्तनियमोस्ति । साक्षिणोपि त एव द्यूते द्यूतकरा एव कार्याः न तत्र स्त्रीबालवृद्धकितवेत्यादि
साक्षिनिरूपणोक्तनिषेधोस्तीत्यर्थः । विष्णुरपि । कितवेष्वेव तिष्ठेरन् कितवाः संशयं प्रति । य एव तत्र द्रष्टारस्त एवैषान्तु सा
क्षिण इति । साक्षिणाम्परस्परविरोधे त्वाह वृहस्पतिः । उभयोरपि सन्दिग्धौ कितवाः स्युः परीक्षकाः । यदा विद्वेषिणस्ते तु
तदा राजा विचारयेदिति । अनियुक्तद्यूतकारिणो दण्डमाह नारदः । अनिर्दिष्टस्तु यो राज्ञा द्यूतं कुर्वीत मानवः । न स तत्प्राप्नुया
त्कामं विनयञ्चैव सोर्हतीति । ये तु कूटं द्यूतं कुर्वन्ति तेषान्दण्डमाह याज्ञवल्क्यः । राज्ञा सचिह्नं निर्वास्याः कूटाक्षोपधिदेविन इति
। कूटैरक्षादिभिः उपाधिना मणिमन्त्रादिना मतिवञ्चनेन च ये दीव्यन्ति तान् श्वपदादिनाङ्कयित्वा राजा स्वराष्ट्रान्निर्वासयेदि
त्यर्थः निर्वासने विशेषमाह नारदः । कूटाक्षदेविनः पापान् राजा राष्ट्राद्विवासयेत् । कण्ठेक्षमालामासज्य स ह्येषां विनयः स्मृत इ
ति दण्डने विशेषमाह विष्णुः । द्यूते कूटाक्षदेविनाङ्करच्छेदः । उपधिदेविना साच्छेद इति । यानि तु द्यूतनिषेधकानि मनुवच
नानि । द्यूतं समाह्वयञ्चैव यः कुर्यात्कारयेत वा । तान् सर्वान् घातयेद्राजा शूद्रांश्च द्विजलिङ्गिनः । प्रकाशमेतत्तास्कर्यं यद्देवन
समाह्वयौ । तयोर्नित्यम्प्रतीघाते नृपतिर्यत्नवान्भवेत् । द्यूतं समाह्वयञ्चैव राजा राष्ट्रे निवारयेत् इत्यादीनि तानि कूटाक्षदेवनवि
षयतया राज्ञाध्यक्षसभिकरहिततया वा योज्यानि । अत एव वृहस्पतिः । द्यूतं निषिद्धं मनुना सत्यशौचधनापहम् । अभ्यनु
ज्ञातमन्यैस्तु राजभागसमन्वितम् । सभिकाधिष्ठितङ्कार्य्यन्तस्करज्ञानहेतुनेति । याज्ञवल्क्योपि । द्यूतमेकमुखङ्कार्यन्तस्क
रज्ञानकारणादिति । राज्ञा द्यूतं एकं मुखम्प्रधानं यस्य तत्तथोक्तङ्कार्यम् । राजाध्यक्षाधिष्ठितं राज्ञा कारयितव्यमित्यर्थः । त
स्करज्ञानकारणात् । स्त्यपलोपेपञ्चमी । तस्करज्ञानरूपम्प्रयोजनम्पर्यालोच्येत्यर्थः । प्रायशश्चौर्यार्जितधना एव कितवा भ
वन्त्यतश्चौरविज्ञानार्थमेकमुखङ्कार्य्यमित्याशयः । द्यूते विहितन्धर्मं जातं समाह्वये अतिदिशति एव । एष एव विधिर्ज्ञेयः प्रा

प्राणिद्यूते समाह्वय इति । सभिकवृत्तिकल्पनादिलक्षणो धर्मः समाह्वयेपीत्यर्थः । इति द्यूतसमाह्वयाख्यं व्यवहारपदम् ॥ इ
ति श्रीमत्सकलसामन्तचक्रचूडामणिमरीचिमञ्जरीनीराजितचरणकमलश्रीमन्महाराजाधिराजप्रतापरुद्रतनूजश्रीमन्म
हाराजमधुकरसाहसूनुश्रीमन्महाराजाधिराजचतुरुदधिवलयवसुन्धराहृदयपुण्डरीकविकाससदिनकरश्रीवीरसिंहदेवो
द्योजितश्रीहंसपण्डितात्मजश्रीपरशुराममिश्रसूनुसकलविद्यापारावारपारीणधुरीणजगद्दारिद्र्यमहागजपारीन्द्रवि
द्वज्जनजीवातुश्रीमन्मित्रमिश्रकृते वीरमित्रोदयाभिधनिबन्धे व्यवहारप्रकाशे समाप्तमष्टादशविवादपदनिरूपणाख्यं तृती
यम्प्रकरणम् ॥ ● ॥ अथ प्रकीर्णकाख्यं चतुर्थम्प्रकरणमारभ्यते ॥ तत्र बृहस्पतिः । एष वादिकृतः प्रोक्तो व्यवहारः समास
तः ॥ नृपाश्रयम्प्रवक्ष्यामि व्यवहारं प्रकीर्णकमिति । तल्लक्षणभेदावाह नारदः । प्रकीर्णके पुनर्ज्ञेया व्यवहारा नृपाश्रयाः
॥ राज्ञामाज्ञाप्रतीघातस्तत्कर्मकरणं तथा । पुरः प्रमाणसम्भेदः प्रकृतीनान्तथैव च । पाषण्डनैगमश्रेणिगणधर्मविपर्य
याः । पितापुत्रविवादश्च प्रायश्चित्तव्यतिक्रमः । प्रतिग्रहविलोपश्च कोप आश्रमिणामपि । वर्णसंकरदोषश्च तद्वृत्तिनियम
स्तथा । न दृष्टं यच्च पूर्वेषु सर्वं तत्स्यात्प्रकीर्णकमिति । प्रतीघातो भङ्गः । तत्कर्म । सिंहासनारोहणादिराजकर्म । पाष
ण्डादयः पूर्वमेव व्याख्याताः । प्रकीर्णके विवादपदेष्वेव विवादा राजाज्ञोल्लङ्घनतडागाकरणान्नकर्मरक्षणादिविषयास्ते नृपस
मवायिन एव । तत्र स्मृत्याचारव्यपेतेन मार्गेण वर्त्तमानानाम्प्रतिकूलतामासाद्य नृप एव व्यवहारनिर्णयं कुर्य्यात् । एवञ्च तत्ता
त्रोन्नृपाश्रये व्यवहारस्तत्प्रकीर्णकमित्युक्तम्भवति । विषयविशेषे दण्डविशेषमाह याज्ञवल्क्यः । न्यूनं वाभ्यधिकं वापि लिखेद्यो
राजशासनम् । पारदारिकचौरं वा मुञ्चतो दण्ड उत्तमः । यो राजदत्तभूमिनिबन्धयोर्मध्येऽन्यतरस्य परिमाणान्न्यूनत्वाधि
क्यान्यतराप्रकाशयन् राजशासनत्वेन लिखति । यश्च पारदारिकचौरं वा गृहीत्वा राज्ञेऽनिवेद्य मुञ्चति तावुभावप्युत्तमसाहसं
दण्डनीयावित्यर्थः । व्यासोपि । न्यायस्थाने गृहीत्वार्थमधर्मेण विनिर्णयम् । कुर्वन्नुक्तो वञ्चकस्तु सद्द्रव्यविनाशकाः । व

क्रोधजीविनोद्रव्यहीनान्कृत्वा विवासयेदिति । राज्ञः कोशापहरणे दण्डमाह मनुः । राज्ञः कोशापहर्तॄंश्च प्रतिकूलेषु चस्थि-
तान् । घातयेद्विविधैर्दण्डैर्हरेत्सर्वस्वमेव वेति । सर्वस्वहरणमसाधारणं यद्द्रव्यस्य जीवनोपकरणं तद्व्यतिरिक्तविषयम् ।
अत एव नारदः । आयुधान्यायुधीयानां वाह्यादि कृषिजीविनाम् । यच्च यस्योपकरणं येन जीवन्ति जीविकाम् । सर्वस्वहर-
णेप्येतन्न राजा हर्तुमर्हतीति । वधस्थाने मौण्ड्यं ब्राह्मणस्य कर्त्तव्यमित्याह मनुः । ब्राह्मणस्य वधो मौण्ड्यं पुरान्निर्वासनाङ्कने ।
ललाटे वाभिशस्ताङ्कः प्रयाणं गर्दभेन वेति । तत्कर्मकरणे दण्डमाह याज्ञवल्क्यः । राजयानासनारोहे दण्डो मध्यमसा-
हसमिति । कात्यायनोपि । राजक्रीडासु ये सक्ता राजवृत्त्युपजीविनः । अप्रियस्त्वस्य यो वक्ता वधन्तेषां प्रकल्पयेदिति । शू-
द्राणां प्रव्रज्यादिकरणे दण्डमाह स एव । प्रव्रज्यावसितं शूद्रं जपहोमपरन्तथा । वधेन शासयेत्पापं राज्ञो वा द्विगुणन्दम-
मिति । धर्मशास्त्रानुसारेण व्यवहारदर्शिनो राज्ञः फलमाह यमः । एवन्धर्मप्रवृत्तस्य सज्ज्ञो दण्डधरस्य च । यशोऽस्मिन्प्रथते
लोके स्वर्गे वासस्तथाक्षय इति ॥ ● ॥ इति प्रकीर्णकाख्यश्चतुर्थं प्रकरणं समाप्तम् ॥ ● ॥ प्रत्याशम्पूरवर्द्धितेऽर्थिजनतानन्दे-
न्यान्धकारापहे श्रीमद्वीरमृगेन्द्रदानजलधिर्यद्वला चन्द्रोदये । राज्ञादेशितमित्रमिश्रविदुषस्तस्योक्तिभिर्निर्मिते यस्मिन्सि-
न्व्यवहारजातविषयः पूर्णः प्रकाशोभवत् ॥ ● ॥ इति श्रीमत्सकलसामन्तचक्रचूडामणिमरीचिमञ्जरीनीराजितचरणकमल
श्रीमन्महाराजाधिराजप्रतापरुद्रतनुजश्रीमन्महाराजमधुकरसाहसूनुश्रीमन्महाराजाधिराजचतुरुदधिवलयवसुन्धराहृ-
दयपुण्डरीकविकासदिनकरश्रीवीरसिंहदेवोद्योजितश्रीहंसपण्डितात्मजश्रीपरशुराममिश्रसूनुसकलविद्यापारावारपा-
रीणधुरीणजगद्दारिद्र्यमहागजपारीन्द्रविद्वज्जनजीवातुश्रीमन्मित्रमिश्रकृते वीरमित्रोदयाभिधनिबन्धे व्यवहारप्रका-
शः पूर्तिमम् ॥ ● ॥ इति श्रीव्यवहारकाण्डं समाप्तम् ॥ ● ॥ शुभमस्तु ॥ * ॥

शाकेमुन्यग्निसप्तेन्दुसम्मितेवत्सरेशुभे। पञ्चाद्रिवसुभूमानेविक्रमादित्यवत्सरे ॥ शाके१७३७ ॥ सम्वत १८७२ ॥
भूयुग्मदृष्टिधराशीसम्मितेयवनाब्दके। चैत्रिकस्यासितेपक्षेपञ्चम्यांगुरुवासरे ॥ सन १२२१ साल ॥
साबधरावसुचन्द्रले शोमनेवतारीख। मारिचमाहवखानियेईसवीगुरुसोशीख ॥
सन १८१५ ईसवी ॥ तारिख ३० मार्च ॥
श्रीमत्साटमहाधिराजनृपतेराज्ञांसमादायतम्। सद्व्याख्यासहितंमिवेकनिपुणंश्रीवीरमित्रोदयम् ॥
श्रीचूडामणिमैथिलाकृतिवरान्संशोध्यसच्चीयुतंवाबूरामसुधीर्हितायविदुषामुद्राक्षरैर्लेखयत् ॥ ३ ॥
॥ संवत्सरयवे खिदिरपुरे श्रीमदनपाले नाङ्कितम् ॥

॥ अथमित्रमिश्रकृतवीरमित्रोदयस्यसूचीपत्रम् ॥

प्रकरण	पत्र	पृष्ठ	पङ्क्ति
अथव्यवहारादिलक्षणम्	१	२	३
अथव्यवहारभेदाः	२	२	३
अथसामान्यपरिभाषा	३	२	११
अथव्यवहारदर्शनविधिः	४	१	१०
अथव्यवहारदर्शनकालः	७	१	१५
अथप्राड्विवाकलक्षणम्	१०	२	२
अथसभ्याः	११	२	१
अथभिन्नानांनिरूपणम्	१३	२	१
आदेयानादेयाख्यव्यवहारः	१४	१	७
सभापतेःकार्य्यनिरूपणम्	१५	१	१३
अथव्यवहारपादः	१६	१	५
अथोत्तरपादः	२२	२	७

अथोत्तरभेदाः	२३	१	१४	अथघटविधिः	७७	१	२
प्राङ्न्यायलक्षणम्	२५	२	१०	अथाग्निविधिः	७९	२	६
अथोत्तराभासा	२५	२	१५	अथजलविधिः	८३	१	१२
अथक्रियापादः	२९	१	२	अथविषविधिः	८४	२	१४
अथनिर्णयापरपर्य्यायः	३६	२	१३	अथकोशविधिः	८६	१	७
अथपुनर्न्यायः	३८	१	१२	अथतण्डुलविधिः	८६	१	४
अथहृतनिवृत्तिः	३९	२	१	अथतप्तमाषविधिः	८७	२	५
अथविशेषपरिषा	४०	१	१४	अथफालविधिः	८८	१	७
अथनिह्नुवादिविधिः	४१	१	१०	अथधर्म्मजविधिः	८८	१	१०
उत्तरदानेविलंबाविलंबव्यवस्था	४३	२	५	अथप्रायश्चित्तविधिः	८८	२	९
अथसाक्षीनिरूपणम्	४४	२	११	प्रमेयाणिव्यवहारपदानि	८९	२	१
अथलेख्यम्	५७	२	२	अथऋणादानम्	९०	१	१२
अथभुक्तिः	६३	२	२	अथाधिः	९७	१	११
अथयुक्तिः	७०	१	९	अथप्रतिभूः	९९	१	१६
अथदिव्यदेशाः	७५	२	७	निःक्षेपाख्यव्यवहारपदम्	१११	२	५
अथदिव्यसाधारणविधिः	७५	२	१४	सम्भूयसमुत्थानम्	११८	१	१२

दत्ताप्रदानिकम्	१२१	१	६
अभ्युपेत्याशुश्रूषाख्यं	१२३	२	१२
वेतनानपाकर्माख्यम्	१२७	२	१०
संविद्व्यतिक्रमाख्यम्	१३०	२	३
क्रीतानुशयाख्यम्	१३३	२	३
विक्रीयासम्प्रदानाख्यम्	१३४	२	११
स्वामिपालविवादाख्यम्	१३६	१	१५
सीमाविवादाख्यम्	१३७	१	८
दण्डपारुष्याख्यम्	१४५	१	२
वाक्पारुष्याख्यम्	१४८	२	१
स्तेयाख्यम्	१५०	२	४
साहसाख्यम्	१५३	१	८
स्त्रीसंग्रहणाख्यम्	१५४	२	१६
स्त्रीपुंयोगाख्यम्	१५७	२	५
विभागाख्यव्यवहारपदं	१५८	२	११
दायभागशब्दार्थकथनम्	१५९	२	१२
एकदायादिविभागः	१६०	१	११

पुत्राद्यधिकारविचारः	१६०	२	१
विभागकालकर्तृनिरूपणं	१७०	१	१
पितृकृतविभागे	१७२	१	१३
पैतामहे धने पुत्राणां समांशिता	१७७	१	१२
अथ भ्रातॄणां दायविभागः	१८२	२	३
असवर्णानां भ्रातॄणां विभागः	१८३	१	१२
मुख्यामुख्यपुत्राणां विभागः	१८४	२	६
तत्र प्रथमं पत्नी धनहारिणी	१९३	१	५
पत्न्यभावे दुहितुरधिकारः	२०३	२	१०
दुहितुरभावे दौहित्रः	२०५	२	२
दौहित्राभावे पितरौ	२०५	२	१४
पित्रोरभावे भ्रातरो धनभाजः	२०७	२	६
भ्रात्रभावे तत्सुताः	२०८	१	८
भ्रातृपुत्राभावे गोत्रजाः	२०८	२	६
अथ संसृष्टिधनविभागः	२१०	१	१५
अथ स्त्रीधनम्	२१४	१	१३
अथ स्त्रीधनविभागः	२१६	१	१२

विभागकालेनिह्नुतस्वपस्था				अथविभक्तजनम्	२२२	२	१
दवगतस्वविभागः	२२०	१	४	अथतत्सन्देहनिर्णयः	२२३	१	३
अथाविभाज्यम्	२२०	२	८	द्यूतसमाह्वयम्	२२३	२	१०
अर्थविभागानधिकारिणः	२२१	१	१५	प्रकीर्णकाख्यम्	२२५	१	६

॥ इतिवीरमित्रोदयस्यसूचीपत्रम् ॥

॥ अथवीरमित्रोदयस्यशुद्धिपत्रम् ॥

पत्र	पृष्ठ	पङ्क्ति	अशुद्ध	शुद्ध	पत्र	पृष्ठ	पंक्ति	अशुद्ध	शुद्ध
२	१	५	इयं	इदं	६	२	१२	सान्य	सामान्य
२	२	८	लेखपू	लेखापू	८	२	१२	वर्णी	वर्णा
३	१	१३	केयर्थः	क्येयर्थः	९	१	१३	न्युदा	न्यदा
३	२	७	न्याप्य	न्याय्य	१०	२	१३	नृपे	नृपे
४	१	१	विशे	विशे	११	१	१०	अभ्वे	अवे
४	२	५	वृत्त	वृत्त	११	१	१४	गृकु	गृहंकु
५	१	१०	गक	गच्छ	१३	१	१	तद्दृष्ट	तद्दृष्ट
५	२	६	मम्रि	अग्नि	१४	१	२	धिङ्कद	धिकृद
६	१	५	योम्या	योया	१५	२	७	रज्ञा	रज्ज्वा

१५	२	१०	माति	मानि
१६	१	४	युत्वा	युक्त्वा
१६	१	११	ग्राधान्य	ग्राधप
१६	२	१६	उस्रोर्मु	उन्मुखो
२१	१	३	पतुभि	पतुर्भि
२२	१	१३	ज्ञाव	ज्ञाव
२४	२	१	कारखोन्त	कारखोन
२५	१	८	योः	योऽर्थः
२५	१	१६	उनसन्त	उनरेन
२६	१	८	ह्याधार	ह्याधार
२७	१	१३	नूप्रति	नुप्रति
३१	१	१६	सम्यादी	सभ्यादी
३१	२	६	र्द्दिशेत्	निर्द्दिशेत्
३२	१	७	स्यारोपा	स्यारोप्या
३३	१	८	यादि	याहादि
३८	२	१०	कायनै	कात्यायनै
३९	१	४	स्वपत्त	स्वपत्त
३९	२	३	नियतद्धा	नियताद्धा
४२	२	९	संमवना	संभावना
४३	२	११	सद्युःतते	सद्योतीते
४४	१	३	वष्टस्ते	वष्टम्भस्ते
४४	१	१०	साहसेषु	साहसेषु
४४	२	१६	दर्षनं	दर्शनं
४५	१	९	दृच्छया	यदृच्छया
४५	१	१३	प्रवणा	श्रवणा
४०	२	२	याचि	याचितम्
४९	१	१०	श्रुतृ	श्रुतृ
५०	१	५	व्याख्यानस्य	व्याख्यानस्य
५१	१	२	न्यपिके	न्यधिके
५२	१	१०	वासस्य	वासस्य
५२	२	७	यद्दयो	यद्दयो
५४	२	३	रिंशके	रिंशत्के
५५	१	२	प्रत्यार्थे	प्रत्ययार्थे
५६	२	६	ननुद्दे	ननुनद्दे

५७	२	१०	निगदस	निगदनव
५८	२	१	नधर्म्मी	योऽधर्म्मी
५९	१	७	नेड्या	न्वेदंड्या
६१	१	१२	कश्चैव	कश्चैव
६१	२	१३	दृष्टृ	द्रष्टृ
६१	२	१४	दृष्टारः	द्रष्टारः
६९	१	७	विरुयां	विरुद्धं
७०	१	११	भिधया	विधया
७०	२	१	वाक्या	वाक्या
७०	२	४	बोप्र	बोप्नं
९७	१	५	व्यगन्न	व्यवगन्न
११२	२	९	पिश्वः	पिसः
१२२	२	५	याज्ञल्क्यः	याज्ञवल्क्यः
१२९	१	८	नश्येनु	नश्येत्तु
१३४	२	११	विक्रिया	विक्रीया
१४८	१	११	रज्वा	रज्ज्वा
१५९	१	९	भार्याया	भार्या
१६२	२	१	स्वाम्य	स्वार्थे
१६२	२	१६	भवाद	भवाद्य
१६५	१	५	वियोगज्य	विनियोज्य
१६६	२	१६	ह्यानेहि	दानेहि
१७०	१	११	पादि	पाति
१७१	१	१४	केयाञ्चि	केषाञ्चि
१७२	२	३	बम्नि	बमम्नि
१७५	१	१६	स्वस्ये	स्वस्वस्ये
१७७	२	१४	दिष्टं	दिव
१८८	२	१६	पार्त्र्य	पारतन्त्र्य
२१३	२	१४	धाना	भ्राता
२२०	२	११	ज्ञातु	ज्ञातु
२२१	१	१०	अएव	अतएव

॥ इतिवीरमित्रोदयस्यशुद्धिपत्रं समाप्तम् ॥

Digitized by Google

Digitized by Google

Digitized by Google

Digitized by Google

Digitized by Google

Digitized by Google